लोकप्रियशास्त्रीयग्रन्थमाला - ५

गदाधरभट्टाचार्यविरचितः

व्युत्पत्तिवादः

(सुदर्शनाचार्यविरचित आदर्शटीकासहितः)

(प्रथमोभागः)

प्रधानसम्पादकः

प्रो. राधावल्लभत्रिपाठी

कुलपतिः

सम्पादकः

भूमिकालेखकश्च

प्रो. हरेरामत्रिपाठी

आचार्योऽध्यक्षश्च

सर्वदर्शनविभागः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

प्रकाशकः
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालय)
५६-५७, इंस्टीट्यूशनल एरिया
जनकपुरी, नवदेहली-११००५८

e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

© राष्ट्रियसंस्कृतसंस्थानम्

ISBN : 978-93-86111-63-0

प्रथमसंस्करणम् : २०११

मूल्यम् : ₹ 375/-

मुद्रकः
अमर प्रिंटिंग प्रेस, दिल्ली-९
E-mail - amarprintingpress@gmail.com

पुरोवाक्

न्यायविद्यास्वरूपायाः देवतायाः स्वात्मनश्च तुष्टये व्युत्पित्सूनां व्युत्पन्नानामुपकाराय च सरलतमगम्भीरविचारपरिपूर्णया आदर्शव्याख्यया सनाथीकृतं व्युत्पत्तिवादाख्यं ग्रन्थरत्नं प्रकाश्यते। तत्र विविधवादिप्रतिपत्त्युपस्थापनमुखेन स्वसिद्धान्तप्रतिपादनैककुशला नानाविचारोपबृंहिता सम्पूर्णा आदर्शटीकेयं लोकप्रियशास्त्रीयग्रन्थमालायां पञ्चमषष्ठमग्रन्थरूपेण प्रकाश्यते। अन्यत्र विप्रतिपन्नस्यापि प्रमाणचतुष्टयस्य न्यायशास्त्रेऽभ्युपगततया तदन्तःपातिन आगमप्रमाणोपजीव्यपदपदार्थसंसर्गजातस्य विचारितत्वसच्छब्दखण्डे व्युत्पत्तिवादस्यैव महतो ग्रन्थस्य ज्येष्ठत्वमिति सर्वे विद्वांसः वदन्ति। अत एव परम्परया शब्दप्रमाणविचारपटोरस्य व्युत्पत्तिवादग्रन्थस्यानितरसाधारणतया कृत्स्नेऽपि कृतिवर्गे विद्वत्प्रायेषु छात्रेषु च भूयानादरातिशयो विलोक्यते।

अस्य च महामहोपाध्यायश्रीगदाधरभट्टाचार्यप्रणीतत्वमपि वैलक्षण्यं ग्रन्थोऽयं द्योतयति। यद्यपि ग्रन्थस्यैतस्य बहुशष्टीका यत्र तत्र मुद्रितास्समुपलभ्यन्ते आदर्शटीकेयमपि द्वितीयाकारकपर्यन्ता मुद्रिता तथापि सम्पूर्णव्युत्पत्तिवादस्येयं टीका इदानीं दुर्लभा वर्तत इति। आदर्शटीकायाः अन्ते शास्त्रिणा उक्तम् ''बालानामुपकाराय द्वावादर्शौ प्रकाशितौ'' इत्यनेन सर्वजनोपकारकेयं टीका वर्तत इति प्रतीयते अत एव लोकप्रियशास्त्रीयग्रन्थमालायामस्य ग्रन्थस्य प्रकाशनोपक्रमोऽभवत्।

योजनायामस्यां लोकप्रियशास्त्रीयग्रन्थानां प्रकाशनं सङ्कल्पितं विद्यते। तं सङ्कल्पं पुरस्कृत्य सम्प्रति प्रकाश्यमानः सुदर्शनाचार्यविरचितो व्युत्पत्तिवादस्य आदर्शटीकाख्यः ग्रन्थः भवत्करपद्ममलङ्करोति। एषा टीका गदाधरभट्टाचार्यविरचितव्युत्पत्तिवादस्य सर्वासु टीकास्वन्यतमा अतिसरला सुबोधगम्या च वर्तते। आदर्शटीकाख्यः एष ग्रन्थः भागद्वयात्मको वरीवर्ति। अत्र हि प्रथमे भागे एकपदार्थेऽपरपदार्थस्य सम्बन्धविचारः, अभेदान्वयाकाङ्क्षाविचारः, अभेदस्वरूपम्, क्रियाविशेषणानामभेदान्वयाकाङ्क्षायाः स्वरूपम्, अभेदान्वयनियामकः, घटो घटः इत्यत्र शाब्दबोधापत्तिनिरासः, भेदान्वयबोधविचारः, राजपुरुषः इत्यत्र शाब्दबोधाकारः, प्रत्ययप्रत्ययार्थयोः विचारः, एकवचनादिविचारः, संख्यान्वयविचारः, आख्यातस्य संख्यार्थताविचारः, द्वितीयातृतीयाप्रयोजकसिद्धान्तः, गुणादिवाचकपदोत्तरविभक्त्यर्थविचारः,

द्वितीयार्थधात्वर्थयोर्निरूपणादिविषयाणां विवेचनं विद्यते। द्वितीयभागे तृतीयाकारकमारभ्य सप्तमीकारकं यावत् विभक्त्यर्थनिरूपणम्, स्त्रीप्रत्ययार्थविचारः, तद्धितधात्वाख्यातादीनां प्रत्ययानामभिधेयत्वं लडादीनामभिधेयत्वञ्च निरूपितं विद्यते। सर्वस्मिन् प्रकरणे पूर्वपक्षमारभ्य न्यायदिशा सिद्धान्तः सयुक्तिकः न्यरूपि ग्रन्थकारेण। व्युत्पत्तिर्वदतीति व्युत्पत्तिवादः कर्मण्यण् इत्यनेन अण् प्रत्यये कृते सति अस्य निष्पतिर्भवति। श्रद्धेयबच्चाझामते शब्दाकाङ्क्षाविज्ञानविशेषकार्यकारणभावविज्ञानरूपाया व्युत्पत्तेः अनुकूलेऽन्तरा मतान्तरखण्डनगर्भत्वेऽपि तदुद्देशेनाप्रवृत्ततया जल्पव्यवहारायोग्ये व्युत्पत्ति-तत्त्वबुभुत्सयारम्भणीयत्वेन वादपदव्यवहारः। एकपदार्थानुयोगिकोऽपरपदार्थप्रतियोगिकः संसर्ग आकाङ्क्षाप्रयोज्यसंसर्गत्वाभिन्नशाब्दबोधनिरूपितविषयतावान् भवति। स च संसर्गः क्वचिद् अभेदः, क्वचिदभेदातिरिक्ताः आधारता, आधेयता, प्रतियोगिता, अनुयोगिता, विषयता, विषयिता, जन्यता, जनकता, समवायः, संयोगादयश्च भवन्ति। प्रातिपदिकविशिष्टोऽभेदः आकाङ्क्षाप्रयोज्यसांसर्गिकविषयतावान् वैशिष्ट्यञ्च स्वप्रयोज्यविशेष्यताकत्व-स्वविशिष्टपदप्रयोज्यप्रकारताकत्वोभयसम्बन्धेन। पदे स्ववैशिष्ट्यञ्च स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वस्वाव्यवहितपूर्व-वर्तित्वान्यतरसम्बन्धेन। प्रातिपदिकपदेन स्वपञ्चकेन च विशेष्यवाचकपदग्रहणम्। नीलो घटः इत्यत्र घटे घटसमानविभक्तिकनीलपदोपस्थापितस्य नीलस्य, नीलघटमित्यत्र घटपदाव्यवहितपूर्ववर्तिनीलपदोपस्थापितस्य नीलस्य च अभेदः संसर्गो भासते। एवं रीत्या व्युत्पत्तिवादस्य टीकाकारैः परिष्कारः क्रियते। पूर्वोक्तादिविषयविवरणावसरे ग्रन्थकारेण अनुसृता सुलभावगमरचनाशैली आदर्शटीकाख्यं ग्रन्थमिममवलोकयतां सुस्पष्टं भवेदिति अलमिति।

श्रीगङ्गाधरशास्त्रिणामन्तेवासिना च पञ्चनदीयेन सुदर्शनाचार्यशास्त्रिणा विरचितामिमामादर्शाख्यां टीकां श्रीमता प्रो. हरेरामत्रिपाठिना सम्पाद्य राष्ट्रियसंस्कृतसंस्थाने ग्रन्थोऽयं समर्पितः तस्मै साधुवादाः समर्प्यन्ते। प्रकाशितया एतया टीकया विद्वांसः, गवेषकाः, जिज्ञासवः, दार्शनिकाः, वैयाकरणाः छात्राश्चोपकृताः स्युरित्याशासे।

सन्दर्भेऽस्मिन् ग्रन्थकारं संस्मरन्, संशोधकं, मुद्रकं, ग्रन्थप्रकाशनाय विहित-प्रयासान् सर्वाभिनन्दामि।

–प्रो. राधावल्लभत्रिपाठी

कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्

भूमिका

विशिष्टा उत्पत्तिः, व्युत्पत्तिः तस्यार्थः विशिष्ट प्रतिपत्तिः। व्युत्पत्तीनां वादः व्युत्पत्तिवादः। व्युत्पत्तिर्वदतीति व्युत्पत्तिवादः इत्यपि विद्वांसः वदन्ति। व्युत्पत्तये वादः व्युत्पत्तिवाद इत्यपि केचन वदन्ति। बच्चाझामते शब्दाकाखाविज्ञानविशेष-कार्यकारणभावविज्ञानरूपायाः व्युत्पत्तेः जल्पव्यवहारायोग्यव्युत्पत्तितत्त्वबुभुत्सारूपः वादः इति। शाब्दबोधे पदं ज्ञानं करणं भवति पदजन्यपदार्थज्ञानं व्यापारः शाब्दबोधः फलं शक्तिज्ञानं सहकारीकारणञ्च भवति। मीमांसकानां नये भावनामुख्यविशेष्यकः, वैयाकरणानां नये व्यापारमुख्यविशेष्यकः, नैयायिकानां नये तु प्रथमान्तार्थमुख्य-विशेष्यकश्च शाब्दबोधो भवति। नैयायिकानां नये कुत्रचित् निपातार्थमुख्यविशेष्यकः, कुत्रचित् व्यापारमुख्यविशेष्यकः कुत्रचित् कृतिमुख्यविशेष्यकश्च शाब्दबोधः प्रथमान्तपदसमभिव्याहाराभावे भवति। व्युत्पत्तिवादे यद्यपि प्रातिपदिकतदूत्तरप्रत्ययानां धातुतदूत्तरप्रत्ययानामर्थः शाब्दबोधे अन्वयप्रकारश्च न्यायरीत्या निरूपितो विद्यते तथापि कारकाणां प्रधानत्वं तत्रोपलभ्यत इति। क्रियानिमित्तत्वं कारकत्वम्, विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यभाक्तसाधारणं कारकत्वम् यद्वा कर्तृत्वकर्मत्वादिषट्कान्यतमद्वारा क्रियान्वयित्वं कारकत्वम्। तत्र क्रियाश्रयत्वं कर्तृत्वम्। कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वम् कर्तृत्वम् अथवा अनुकूलकृतिमत्त्वम् कर्तृत्वम्। कर्मकारकस्य पञ्चलक्षणानि उपलभ्यन्ते। करणव्यापार्य्यत्वं कर्मत्वम्, परसमवेतक्रियाजन्यफल शालित्वम् कर्मणः वा लक्षणम्। अथवा तत्तद्धात्वर्थतावच्छेदकफलशालित्वम् तत्तद्धात्वर्थकर्मत्वम्, तत्क्रियानधिकरणत्वे सति तत्क्रियावच्छेदकफलशालित्वम्, परसमवेततत्तद्धात्वर्थान्वयिफलविशेषशालित्वं तत्तद्धात्वर्थकर्मत्वं वेति कर्मणः लक्षणम्। कारकस्य कर्तुः कर्मणश्च स्वरूपं विस्तृतरूपेणेदानीं प्रकाश्यते।

व्याकरणशास्त्रे ये प्रत्ययाः भवन्ति। तेषां विभागः चतुर्विधः प्रतिपादितो जगदीशेन–

विभक्तिश्चैव धात्वंशस्तद्धितं कृदिति क्रमात्।
चतुर्धा प्रत्ययः प्रोक्तः, कादिभिः पञ्चधाऽथवा॥[१]

तत्र संख्यात्वावान्तरजात्यवच्छिन्नशक्तिमान् यः प्रत्ययः सा विभक्तिरिति सा च सुप्तिङ् चेति भेदाद् द्विविधा भवति। विभक्तेस्स्वरूपं प्रतिपादयन्नाह

जगदीशभट्टाचार्यः–

प्रकृत्यर्थस्य यः स्वार्थे विधेयत्वेन बोधने।
समर्थः सोऽथवा शब्दो विभक्तित्वेन गीयते।।[२]

यः शब्द स्वार्थे धर्मिणि स्वप्रकृत्यर्थविधेयकान्वयबोधं प्रति समर्थः सः सुबादिविभक्तिरित्युच्यते। यद्वा प्रत्ययार्थधर्मिकप्रकृत्यर्थविधेयकान्वयबोधसमर्थः शब्दो विभक्तिरिति। तत्र सुपः किमिति जिज्ञासायामुच्यते

प्रकृत्यर्थे स्वार्थसङ्ख्यान्वयधीहेतवः सुपः।
प्रथमादिप्रभेदेन ताश्च सप्तविधा मताः।।[३]

प्रकृत्यर्थधर्मिकस्वार्थसंख्यान्वयबोधिका विभक्तयः सुप उच्यन्ते। ताश्च प्रथमा द्वितीया तृतीया चतुर्थी पञ्चमी षष्ठी सप्तमी चेति भेदात् सप्तविधा भवन्ति।

तत्र धात्वर्थावच्छिन्न तिङर्थस्यान्वयबोधं प्रति यदन्तनामोपस्थाप्यत्वं तन्त्रं तादृशी सुप्सु प्रथमा।[४] अत्र कृष्णकान्तविद्यावागीशेनोच्यते यादृशानुपूर्व्यवच्छिन्न-नामोपस्थाप्यत्वं विशेष्यतासम्बन्धेन धात्वर्थावच्छिन्न तिङर्थप्रकारकान्वयबोधं प्रति स्वरूपसम्बन्धेन प्रयोजकं तादृशानुपूर्वीमच्छब्दत्वं प्रथमात्वमिति।[५] द्वितीयादीनां विभक्तीनां संक्षेपेण स्वरूपं निरूपयन्नाह जगदीशः–

धातुभेदानुपादाय तदर्थे कर्मतादिकान्।
बोधयन्त्यो द्वितीयाद्या निर्वक्तव्या विभक्तयः।।[६]

तिबन्तपचधातूपस्थाप्यपाकधर्मिककर्मत्वानुभवानुकूलसुप्सजातीयत्वं द्वितीयावि-भक्तेर्लक्षणमिति। अर्थात् यादृशानुपूर्वीप्रकारकनिश्चयत्वं तिबन्तपचधातूपस्थाप्यार्थधर्मिक-कर्मत्वप्रकारकान्वयबोधजनकतावच्छेदकं तादृशानुपूर्वीमत्त्वे सति विभक्तित्वं द्वितीयेति।[७] पच्यर्थधर्मिककरणत्वान्वयबोधानुकूलसुप्सजातीयत्वं तृतीयात्वम्।[८] यद्वा यादृशधर्मा-वच्छिन्नप्रकारकनिश्चयत्वं पच्यर्थधर्मिककरणत्वप्रकारकान्वयबोधजनकतावच्छेदकं तादृशधर्मवत्त्वं तृतीयाविभक्तेर्लक्षणम्। ददात्यर्थदानधर्मिकसम्प्रदानत्वानुभावक-सुप्सजातीयत्वं चतुर्थीत्वम्।[९] अर्थात् दाधातुविशेषोपस्थाप्यदानधर्मिकसम्प्रदानत्व-प्रकारकान्वयबोधजनकतावच्छेदकं यादृशधर्मावच्छिन्ननिश्चयत्वं तादृशधर्मवद्विभक्ति-त्वमिति चतुर्थीविभक्तेर्लक्षणमिति।

अत्र गोकुलनाथोपाध्यायैरुच्यते–

ङेभ्याम्भ्यस्चतुर्थी सा सम्प्रदानत्ववाचिका।
सम्प्रदानन्तु दानस्य क्रियाया वा फलोपयुक्।।[१०]

पतधात्वर्थतावच्छेदकरूपावच्छिन्नधर्मिकविभागबोधानुकूलसुप्सजातीयत्वं पञ्चमीत्वमिति।[११] कृष्णभट्टास्तु यादृशानुपूर्वीप्रकारकनिश्चयत्वं पतनत्वावच्छिन्न धर्मिकविभागप्रकारकान्वयबोधजनकतावच्छेदकविभक्तित्वे सति तादृशानुपूर्वीमच्छब्दत्वं पञ्चमीत्वमिति। तिबन्तदाधात्वर्थधर्मिकस्वार्थान्वयबोधस्वरूपायोग्यत्वे सति प्रथमान्यसुप्त्वं षष्ठीत्वमिति। यद्वा यादृशानुपूर्वीप्रकारकनिश्चयत्वं तिबन्तादिधात्वर्थधर्मिकस्वार्थप्रकार-कान्वयबोधजनकतावच्छेदकं प्रथमान्यत्वे सति तादृशानुपूर्वीमत्सुप्त्वं षष्ठी-विभक्तेर्लक्षणम्।[१२] यद्वा हिनस्त्यर्थहिंसाधर्मिकस्वार्थकर्मत्वानुभावकसुप्सजातीयत्वं षष्ठीत्वम्। सम्बन्धसामान्ये स्वत्वे वा शक्ता सुप् षष्ठी। जगदीशभट्टाचार्येण सप्तमीविभक्तेर्लक्षणद्वयमुक्तम्–

[१३]पचधात्वर्थतावच्छेदकरूपावच्छिन्नधर्मिकस्वार्थाधेयत्वबोधानुकूलसुप्तसजातीयत्वं सप्तमीत्वम्। अर्थात् यादृशानुपूर्वीप्रकारकनिश्चयत्वं रूपादिपरावृत्तिफलजनकतेज:संयोगा-वच्छिन्नक्रियात्वावच्छिन्न विशेष्यकस्वार्थाधेयत्वप्रकारकान्वयबोधजनकतावच्छेदकं सुप्त्वे सति तादृशानुपूर्वीमत्त्वं सप्तमीत्वम्।[१४] अधिकरणतायामाधेयत्वे वा शक्ता सुप् सप्तमी। चैत्रधर्मिक स्वार्थाधिकरणत्वान्वयबोधकसुप्समानानुपूर्वीकत्वं वा सप्तमीत्वमिति अपि केचिद् वदन्ति।

सुपो विभागो द्विविधोऽपि भवति। शक्त्या कारकस्य बोधिका तदन्यस्य च बोधिका सुपिति। अत एव जगदीशभट्टाचार्य आह–

कारकार्थेतरार्था च सुप् द्विधा च विभज्यते।
धात्वर्थांशे प्रकारो यः सुबर्थः सोऽत्र कारकम्॥[१५]

यद्धातूपस्थाप्य यादृशार्थेऽन्वयप्रकारीभूय भासते यः सुबर्थः स तद्धातूपस्थाप्य तादृशक्रियायां कारकमिति जगदीशभट्टाचार्यः। षष्ठ्यर्थस्तु सम्बन्धो न धात्वर्थे प्रकारीभूय भासते अतः सम्बन्धो न कारकमिति। अत एव–

क्रियाप्रकारीभूतोऽर्थः कारकं तच्च षड्विधम्।
कर्तृकर्मादिभेदेन शेषः सम्बन्ध इष्यते॥

क्रियानिमित्तत्वं कारकत्वमिति केचित्। तन्न चैत्रस्य तण्डुलं पचति इत्यत्र सम्बन्धिनि चैत्रादौ अतिव्याप्तेः, अनुमतिप्रकाशनद्वारा सम्प्रदानादेरिव तण्डुलादि-सम्पादनद्वारा सम्बन्धिनोऽपि पाकादिक्रियानिमित्तत्वात्, किन्तु क्रियान्वितविभक्त्यर्थान्वि-तत्वं कारकत्वमिति। अस्ति च कर्तृकर्मादेः क्रियान्विततिङ्सुब्विभक्त्यर्थान्वयः न तूदाहृते सम्बन्धिनि, षष्ठ्यर्थसम्बन्धस्य तण्डुलादिनामार्थान्विततया क्रियानन्वितत्वादिति जयरामभट्टाचार्यः। यादृशेन नामार्थेनावच्छिन्नस्य सुबर्थस्य यादृशधात्वर्थेऽन्वयः स

एव तादृशधात्वर्थे कारकतया व्यपदिश्यत इत्यपि जगदीशभट्टाचार्याः वदन्तीति।

भवानन्दविरचिते कारकचक्रे कारकस्य लक्षणत्रयमुपलभ्यते।

१. क्रियानिमित्तत्वं कारकत्वम्।

२. विभक्त्यद्वारा क्रियान्वयित्वं मुख्यभाक्तसाधारणं कारकत्वम्

३. कर्तृत्वकर्मत्वादिषट्कान्यतमद्वाराक्रियान्वयित्वं कारकत्वमिति। तत्र यः क्रियानिमित्तत्वं कारत्वमिति लक्षणं नैयायिकेनोद्योतकरेण कलापव्याकरणस्य वृत्तिकारेण दुर्गसिंहेन, वाचस्पतिमिश्रेण, शृङ्गारप्रकाशस्य प्रणेत्रा च स्वीकृतम्। तेषां वाक्यानि इत्थं सन्ति।

१. महर्षिणोद्योतकरेणोक्तं न्यायवार्तिके–"सामान्यञ्च कारकाणां क्रियानिमित्तत्वम्[१६]"

२. दुर्गसिंहः कलापव्याकरणस्य वृत्तिटीकायाम्–

"क्रियानिमित्तं कारकं लोकतः सिद्धम्"[१७]

३. वाचस्पतिमिश्रः न्यायवार्तिकतात्पर्यटीकायाम्

"क्रियानिमित्तस्य च कारकत्वात्"[१८]

४. भोजराजः शृङ्गारप्रकाशे– "क्रियानिमित्तं कारकम्"[१९]

क्रियानिमित्तत्वमित्यत्र क्रियापदार्थः धातुजन्योऽर्थः क्रियेति। धात्वर्थविषये वैयाकरणेषु मतद्वयं वर्तत इति। फलावच्छिन्नव्यापारे एव धातोर्शक्तिरित्य-खण्डशक्तिवादिनां मतमिति। सखण्डशक्तिवादिनां नये तु धातोः फले व्यापारे च पृथग् पृथग् शक्तिरिति। अखण्डशक्तिवादिनां नये तु कर्तृवाच्यप्रयोगस्थले फलावच्छिन्नव्यापारे धातोरेकैव शक्तिर्भवतीति। इदं मतं नागेशः स्वीकरोति। फलावच्छिन्नव्यापारे धातोर्शक्तिरिति ये स्वीकुर्वन्ति। तेषां नये ग्रामं गच्छति इत्यत्र गम्धात्वर्थः संयोगावच्छिन्नव्यापारः (संयोगजनको व्यापारः) स च ग्रामे नास्ति। अतस्तत्र कारकलक्षणस्याव्याप्तिर्न दर्शयितुं शक्यत इति। परन्तु गम्धात्वर्थता-वच्छेदकस्योत्तरदेशसंयोगस्य सिद्धौ ग्रामः कारणं भवत्येव। अतः प्रकृतकारकलक्षणस्य ग्रामे समन्वयो भवतीति।

धात्वर्थः फलं व्यापारश्च पृथग् पृथगिति अर्थाद् धातोर्शक्तिः फले व्यापारे चेति। अस्य मतस्योपस्थापनं कुर्वन्नाह नागेशभट्टः।

"फलव्यापारयोः पृथक् शक्तिः"[२०] अत्र श्रीमद्दुर्बलाचार्यैरुच्यते–

"फलावच्छिन्नव्यापारस्य धात्वर्थत्वे विशेष्यविशेषणभावे विनिगमनाविरहाद् अवच्छेदकगौरवमेकदेशान्वयापत्तिश्च।"[२१] भट्टोजीदीक्षित इदं मतमेव स्वीकरोति। अस्मिन् मते गम्धात्वर्थ उत्तरदेशसंयोगः पादप्रक्षेपादिस्वरूपा क्रिया च। "ग्रामं गच्छतीत्यत्र ग्रामः संयोगस्वरूपस्य धात्वर्थस्य सिद्धौ कारणं वर्तत इत्यस्माद्धेतोः कारकलक्षणस्य सङ्गतिर्भवति। प्रकृतकारकलक्षणस्य तात्पर्यमिदं ज्ञातव्यं यत् साक्षाद् वा परम्परया सम्बन्धेन क्रियायाः निष्पत्तौ यत् कारणं भवति तदेव कारकमिति।

अत एव कारकचक्रस्य माधवीटीकायामुक्तम्–

"क्रियाकारणत्वं साक्षात्परम्परासाधारणप्रयोजकत्वमेव"[२३] इति। तथाच "ब्राह्मणाय गां ददाति" इत्यत्र "ब्राह्मणः" सम्प्रदानकारकमिति दानदाता यदा पृच्छति "तुभ्यं गां ददानि" तदा ब्राह्मणः "ददस्व"[२४] इत्युक्त्वा स्वीकृतिं ददाति। तदनन्तरं दानक्रियां प्रति कारणं स भवति। दानव्यापारस्य स साक्षात्कारणं नास्ति अपितु परम्परया कारणमिति। अनुमतिं प्रदायैव दानव्यापारसिद्धौ कारणत्वमिति। एवञ्च परम्परया सम्बन्धेन धात्वर्थव्यापारं प्रति कारणत्वात्तस्यैव सम्प्रदानसंज्ञा भवतीति।

वृक्षात् पर्णं पतति इत्यत्र वृक्षस्यापादानकारकत्वमिति। पर्णे या पतनक्रिया भवति। तस्याः वृक्षपर्णयोः संयोगम् अवरुणद्धि। तस्य संयोगस्य नाशं विभागक्रिया करोति। ततः पर्णस्य पतनं भवति। तथाच पतनक्रियायाः निष्पत्तौ पर्णं साक्षात्सम्बन्धेन कारणं भवति। परन्तु वृक्षस्य पतनप्रतिबन्धकसंयोगनाशकविभागद्वारा पतनक्रिया-निमित्तत्वमिति। यतोहि वृक्षे पतनप्रतिबन्धकसंयोगनाशकविभागानुकूला क्रिया यावत् न भवति तावत् पर्णस्य पतनक्रियायाः निष्पत्तिर्न भवति। तथाच प्रकृतकारकलक्षणस्य वृक्षे सत्त्वात् भवति लक्षणसमन्वयः।

भवानन्दतर्कवागीशनये क्रियानिमित्तत्वमिति[२५] लक्षणं न समीचीनमिति यतोहि क्रियायाः सिद्धौ परम्परासम्बन्धेन यत् कारणं भवति तत् कारकमिति रीत्या सम्बन्धिनि कारकत्वस्य प्रसक्त्यापत्तिः। यथा "देवदत्तः चैत्रस्य तण्डुलं पचति इत्यत्र पाकक्रियायाः निष्पत्तौ देवदत्तः तण्डुलश्चैव साक्षात्सम्बन्धेन कारणं भवति। देवदत्तस्य पाकक्रियायै अग्नेः प्रज्वलनं स्थाल्यां जलस्य तण्डुलस्य च निक्षेपव्यापारादयः, तण्डुले विक्लितिव्यापारश्च भवन्ति। चैत्रः क्षेत्रे कर्षणादिकार्यं सम्पाद्य तण्डुलान् उत्पादयति। स च पाकं न करोति। तण्डुलान् उत्पाद्य पाकाय स यज्ञदत्तं ददाति। स च परम्परासम्बन्धेन पाकं प्रति कारणं भवत्येव। अतः सम्प्रदानस्यापादानस्येव च परम्परासम्बन्धेन पाकं प्रति चैत्रस्य निमित्तत्वात्तत्रातिव्याप्तिर्दुवारैव। वैयाकरणास्तु "सम्बन्धिनि कारकत्वं नाभ्युपगच्छन्ति। यतोहि सम्बन्धिनः क्रियया सह नान्वयोऽपि

तु नामार्थेन सह अन्वयो भवति। अतः उक्तकारकलक्षणस्य षष्ठ्यर्थस्य सम्बन्धस्य प्रतिपादिका या षष्ठीविभक्तिर्तत्रैवातिव्याप्तिर्दुवारैवेति।[२६]

अत एव नैयायिको जयराम आह–

"कारकत्वं नाम न क्रियानिमित्तत्वम्।[२७]" चैत्रस्य तण्डुलं पचतीत्यादौ सम्बन्धिनि चैत्रादावतिव्याप्तेः।" एवं जयकृष्णतर्कालङ्कारोऽपि वदति "क्रियानिमित्तत्वं कारकत्वमिति वैयाकरणाः।[२८] तन्न मैत्रस्य तण्डुलं पचतीत्यादौ सम्बन्धिनि मैत्रे कारकत्वापत्तिः।" यथा भवानन्दतर्कवागीशः उक्तकारकलक्षणस्य खण्डनं करोति तथैव नागेशः मीमांसकः गागाभट्टश्चापि[२९] निराकुरुतः तस्य कारकलक्षणम्।

वस्तुतः भवानन्दतर्कवागीशनये तु विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यभाक्तसाधारणं कारकत्वमिति।[३०] उक्तकारकलक्षणस्य तात्पर्यन्तु यः नामार्थो विभक्त्यर्थद्वारा क्रियायां साक्षात्परम्परया वान्वितो भवति तत्कारकमिति। लक्षणे विभक्त्यर्थस्याभिप्रायस्तु सुब्विभक्तेरर्थः वा तिङ्विभक्तेरर्थः। कर्तृवाच्यस्थले सुप्विभक्तिप्रथमार्थे आश्रयत्वम् तिङ्विभक्त्यर्थः कृतिश्च उक्तविभक्त्यर्थयोः माध्यमेन यः क्रियायामन्वितो भवति तदेव कारकत्वमिति। यथा चैत्रः पचतीत्यत्र चैत्रपदोत्तरं यत् सुप् (सु) विभक्तिर्तस्यार्थ एकत्वम्, पच्पदोत्तरतिप्रत्ययार्थः कृतिः उक्तयोः विभक्त्यर्थयोः द्वारा चैत्रस्य पाकक्रियायामन्वयो भवतीति। अत एव चैत्रे प्रकृतकारणलक्षणस्य समन्वयो भवतीति। कर्मवाच्यस्थले "चैत्रेण तण्डुलः पच्यते" इत्यत्र चैत्रपदोत्तरतृतीयाविभक्त्यर्थः कृतिः।[३१] विभक्त्यर्थकृतिद्वारा पाकक्रियायां चैत्रस्यान्वयात् चैत्रे कारकलक्षणस्य समन्वयो भवति। अत्र शाब्दबोधस्याकारस्तु चैत्रनिष्ठकृतिनिरूपकपाकजन्यविक्लित्याश्रयः वर्तमानकालिकः एकत्ववान् तण्डुलः इति। चैत्रः तण्डुलं पचतीत्यत्र तण्डुलस्य पाकक्रियायां द्वितीयार्थकर्मत्वद्वारा अन्वयो भवत्येव अत एव तण्डुलस्य कारकत्वमिति। अत्र शाब्दबोधस्तु तण्डुलनिष्ठकर्मत्वनिरूपक विक्लितिजनकपाकानुकूलकृत्याश्रयः[३२] वर्तमानकालिकः एकत्ववान् चैत्र इति कुठारेण छिनत्ति इत्यत्र कुठारस्य छेदनक्रियाया तृतीयाविभक्त्यर्थकरणत्वेनैवान्वयो जायत इति। विप्राय गां ददाति इत्यत्र विप्रस्य (सम्प्रदानस्य) दानक्रियायामन्वयः चतुर्थ्यर्थस्य सम्प्रदानत्वस्य चोद्देश्यत्वस्य परम्परया भवति। तथाच विप्रस्यापि कारकत्वं सम्भवति। वृक्षात् पर्णं पततीत्यत्र वृक्षेऽपि कारकत्वं सम्भवति। अत्र पञ्चम्यर्थस्य अपादानत्वस्य वावधित्वस्य माध्यमेन वृक्षस्य पतनक्रियायामन्वयो भवत्येवेति कारकलक्षणस्य सङ्गतिरिति। गृहे चैत्रः स्थाल्यामोदनं पचतीत्यत्र गृहम् स्थाली च परम्परासम्बन्धेन पाकक्रियायामन्वितो भवति। तत्र सप्तम्यर्थः आधारत्वमिति। चैत्रकर्तुः आधारं गृहमोदनरूपकर्मत्वस्य आधारः स्थाली च वर्तते। अत एवात्र गृहं स्थाली च कारकमिति। भवानन्देन यत्कारकस्य लक्षणं

स्वीकृतं तत्तु मुख्यभाक्तकारकयोः सङ्गृतं भवति। विभक्त्यर्थद्वारा क्रियायामन्वितत्वे सति धात्वर्थस्य क्रियायां सिद्धौ साक्षात् वा परम्परया यत्कारणं भवति तत्तु मुख्यं कारकमिति। यथा ग्रामं गच्छतीत्यत्र ग्राममुख्यं कारकमिति। यतोहि द्वितीयार्थः कर्मत्वं, तेन माध्यमेन गमने तस्यान्वयो भवति एवञ्च उत्तरदेशसंयोगरूपस्य फलस्य आश्रयत्वेन गमनक्रियासिद्धौ परम्परया कारणञ्च भवति। क्रियायाः सिद्धौ साक्षात् वा परम्परया यत्कारणं न भवति अपितु केवलविभक्त्यर्थद्वारा क्रियान्वितो भवति तत्तु गौणकारकमिति। यथा घटं जानाति[३३] चैत्रः इत्यत्र घटस्य गौणकारकत्वम्। अत्र ज्ञाधातुः सविषयकस्य वाचको भवति। अत्र द्वितीयार्थः विषयता, सा च घटपदार्थे तिष्ठति।

अतः जानाति क्रियापदान्वयः घटपदार्थे द्वितीयार्थविषयतासम्बन्धेन भवति। कर्मत्वविवेचनस्य स्थले भवानन्देनोक्तं–क्रियायाः सिद्धौ वा परम्परया कारणत्वे सति क्रियाजन्यफलाश्रयत्वमेव मुख्यकर्मकारकत्वमिति। मुख्यगौणकारकयोः लक्षणमनेन रूपेण वक्तुं शक्यते–

"क्रिया निमित्तत्वे सति विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यकारकत्वम्"[३४] अर्थात् क्रियायाः साक्षात् वा परम्परया प्रयोजकत्वे सति सुब्विभक्तिद्वारा वा तिङ्विभक्तिद्वारा क्रियान्वयित्वं मुख्यकारकत्वमिति।

"क्रियाया अनिमितत्त्वे सति विभक्त्यर्थद्वारा क्रियान्वयित्वं भाक्तकारक-त्वमिति"[३५] अर्थात् क्रियायाः साक्षाद् वा परम्परया यः प्रयोजको न भवति परन्तु विभक्त्यर्थद्वारा यस्य क्रियायामन्वयो भवति तत् गौणकारकमिति।

प्रकृतकारकलक्षणस्य "चैत्रस्य पचति इत्यत्र षष्ठ्यन्तपदं "चैत्रस्य" इत्यस्य पाकक्रियायामन्वयात् तत्रातिव्याप्तिरिति चेन्न भवानन्देनोच्यते "चैत्रस्य पचति इत्यत्र षष्ठ्यर्थः सम्बन्धित्वं तस्य पाकक्रियायामन्वयो न भवति अपितु षष्ठ्यन्तपदस्य प्रातिपदिकार्थेन सह आकाङ्क्षा भवति। उक्तकारकलक्षणस्य परिष्कारं कुर्वन्नाह भवानन्दतर्कवागीशः–

कर्तृत्वकर्मत्वादिषट्कान्यतमद्वाराक्रियान्वयित्वं कारकत्वमि[३६] ति तत्रानुकूलकृतित्वं कर्तृत्वम्।[३७] यथा चैत्रः पचति इत्यत्र पाकानुकूलकृतिमत्त्वस्य चैत्रे सत्त्वात् भवति लक्षणसमन्वयः। तत्तद्धात्वर्थतावच्छेदकफलशालित्वं [३८]तत्तद्धात्वर्थकर्मत्वमिति भवानन्देन उक्तम्। रघुनाथशिरोमणिना तु "धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति। परसमवेतक्रियाजन्यफलशालित्वमपि[३९] कर्मणः लक्षणमिति। कारकान्तरेऽचरितार्थत्वे सति हेतुत्वं करणस्य[४०] लक्षणम् यद्वा फलयोगव्यवच्छिन्नकारणत्वं करणत्वमिति। भवानन्दतर्कवागीशनये व्यापारवत्कारणं[४१]

करणस्य लक्षणमिति। कारकत्वे सति कर्तृव्यापारविषयत्वं करणत्वमित्यपि केचित् वदन्ति। तत्क्रियाकारणीभूतकर्मजन्यफलभागित्वेनोद्देश्यत्वं सम्प्रदानत्वमिति।[४२] यद्वा अदृष्टाद्वारकतत्क्रियाकारणीभूतकर्मजन्यफलभागित्वेनोद्देश्यत्वं सम्प्रदानत्वमिति। तत्क्रियाकारणीभूतकर्मजन्यधात्वर्थतावच्छेदकफलभागित्वेनोद्देश्यत्वं सम्प्रदानत्वमित्यपि केचित् वदन्ति। भवानन्दतर्कवागीशेनापादानस्य लक्षणद्वयं प्रदर्शितं कारकचक्र इति। परकीयक्रियाजन्यविभागाश्रयत्वमपादानत्वम्[४३] वा विभागावधित्वमपादानत्वमिति।[४४] अधिकरणस्यापि अनेकानि लक्षणानि सन्ति। कर्तृकर्मान्यतरद्वारा क्रियाश्रयत्वे सति तत्क्रियोपकारकत्वम् अधिकरणस्य लक्षणम्। भवानन्दतर्कवागीशनये परम्परया क्रियाश्रयत्वम् अधिकरणस्य लक्षणम्। प्राचीनमते सप्तम्यर्थः अधिकरणत्वं परन्तु नव्यमते सप्तम्यर्थः आधेयत्वमिति।

एकद्वित्र्यादिविशिष्टार्थशक्तिमान् प्रत्ययो विभक्तिरिति। यद्वा यः शब्दः स्वार्थे धर्मिणि स्वप्रकृत्यर्थविधेयकान्वयबोधं प्रति समर्थः सा सुबादिविभक्ति इत्युच्यते। वा प्रत्ययार्थधर्मिककृत्यर्थविधेयकान्वयबोधसमर्थः शब्दो विभक्तिरिति। तत्र सुब्विभक्तिः प्रथमादिभेदेन सप्तधा। प्रथमाविभक्तिस्तु यादृशानुपूर्व्यवच्छिन्ननामोपस्थाप्यत्वं विशेष्यतासम्बन्धेन धात्वर्थावच्छिन्नतिङर्थप्रकारकान्वयबोधं प्रति स्वरूपसम्बन्धेन प्रयोजकं तादृशानुपूर्वीमच्छब्दत्वमिति। यथा 'चैत्रः गच्छती'त्यत्र चैत्रानुपूर्व्यवच्छिन्ननामोस्थाप्यत्वं विशेष्यतासम्बन्धेन धात्वर्थगमनावच्छिन्नतिङर्थकृतिप्रकारकान्वयबोधं प्रति स्वरूपसम्बन्धेन प्रयोजकं तादृशचैत्रस्वरूपानुपूर्वीमच्छब्दत्वं प्रथमेति। गोकुलनाथोपाध्यैरुच्यते–

विभक्तिः प्रथमा तेषु स्वौजसः प्रत्ययास्त्रयः।
आभिमुख्यं तदर्थस्तदभीष्टप्रत्ययात्मकम्।।[४५]

महर्षिणा पाणिनिना उक्तम्–

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा[४६]

अत्र भट्टोजीदीक्षित आह – नियतोपस्थितिकः प्रातिपदिकार्थः, मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात्।

पदं पदं प्रति इत्यर्थेऽव्ययीभावः। पदपदञ्चात्र प्रातिपदिकसंज्ञानिष्ठविधेयता निरूपितोद्देश्यतावच्छेदकधर्मवत्परम्। उद्देश्यतावच्छेदकधर्मश्च धातुप्रत्ययप्रत्ययान्तभिन्नार्थवत्त्वकृदन्ततदादित्वतद्धितान्ततदादित्वसमासत्वैतदन्यतमरूपः। तथाच प्रतिपदमुद्देश्यतया लब्धुमर्हति यत्तत्प्रातिपदिकम्। अर्थ्यते=बुध्यते इत्यर्थः, प्रातिपदिकस्य अर्थः इति प्रातिपदिकार्थः अर्थात् प्रातिपदिकजन्यबोधविषय इति। प्रातिपदिकस्य लिङ्गं संख्या चार्थः। प्रातिपदिकनिष्ठशक्तिविशिष्टत्वं प्रातिपदिकार्थत्वम्। वैशिष्ट्यञ्च

स्वजन्यबोधविषयत्वप्रकारकतात्पर्यविषयतापर्याप्त्यधिकरणत्वस्वविशिष्टत्वैतदुभय-सम्बन्धेन, सम्बन्धघटकशक्तिवैशिष्ट्यञ्च स्वप्रयोज्यधर्मितानिरूपिता पदार्थसम्बन्धाव-च्छिन्नप्रकारतावत्त्व-स्वविशिष्टावच्छेदकतावद् विषयतावत्त्वैतदुभयसम्बन्धावच्छिन्न-प्रतियोगिताकस्वाभाववत्त्वस्वप्रयोज्यबोधविषयत्वप्रकारकतात्पर्यविषयत्वैतदुभयसम्बन्धेन।

सूत्रे मात्रशब्दः अवधारणे। अवधारणञ्चान्ययोगव्यवच्छेदः। तथाचोक्तार्थे प्रथमाविभक्तिर्भवति। उक्ते कर्तरि प्रथमाविभक्तिर्भवतीति। तत्र जिज्ञासा जायते कः कर्त्ता? उच्यते पाणिनिना–

स्वतन्त्रः कर्त्ता[47]

क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्त्ता स्यात् इति भट्टोजीदीक्षितः। स्वम्=आत्मा तन्त्रम्=प्रधानमस्य इति स्वतन्त्रः।

स्वतन्त्रस्य पञ्च नामानि अधोलिखितानि सन्ति। "स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः"।[48] स्वतन्त्रघटकतन्त्रशब्दार्थः इत्थं वदन्ति सभापतिशर्मोपाध्यायाः। तननं तन्त्रम्[49], तन्यतेऽनेन वा तन्त्रम्। तन्त्रणं तन्त्र्यते वा तन्त्रम्। एवञ्च अन्यानधीनत्वरूपप्रधानार्थकस्वतन्त्रशब्दः। अत्र कारकाधिकारात् क्रियाजनने स्वतन्त्रः। उक्तवाक्यस्य तात्पर्यमिदं विद्यते कर्मादिकारकाणां क्रियाजनने न स्वातन्त्र्यम्, कर्तृव्यापारतन्त्रत्वात् देवदत्तः तण्डुलं पचति इत्यत्र देवदत्तः फूत्कारादिव्यापारं विधत्ते तदैव "समवायेन विक्लितिं प्रति तादात्म्येन तण्डुलः कारणं भवति इति चैत्रव्यापारजन्यायां पच्धात्वर्थविक्लितौ ज्ञानविषयीभवनमेव व्यापारः इति कर्मकारकनिष्ठाक्रियायाः पारतन्त्र्यम्। एवं करणं, सम्प्रदानमापादानमधिकरणनिष्ठा-क्रियायाः पारतन्त्र्यं बोध्यमिति। स्वार्थकारकाप्रयोज्यं यत्स्वार्थनिरूपितकारकत्वं तदाश्रयत्वसम्बन्धेन धातुविशिष्टः।[50] कारकमात्रवृत्तिक्रियाजनकत्वस्वरूपकारकत्वस्य कर्तृरूपतथाविधकारकप्रयोज्यत्वमिति। नागेशमते स्वातन्त्र्यञ्च[51] कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वमिति। सभापतिशर्मोपाध्यायनये कर्तृत्वस्य लक्षणन्तु–

"धातुनिष्ठशक्तिविशिष्टार्थाश्रयत्वम्[52], अर्थे शक्तिवैशिष्ट्यञ्च स्वज्ञान-प्रयोज्यशाब्दबोधीयानुकूलत्वसम्बन्धावच्छिन्नप्रकारतात्वावच्छिन्नप्रतियोगिता-काभाववत्त्व-स्वज्ञानीयविषयताश्रयत्वैतदुभयसम्बन्धेन। प्रतियोगिता च स्वाश्रयत्व-स्वावच्छेदकताश्रयत्वान्यतरसम्बन्धावच्छिन्ना ग्राह्या। बालकृष्णपञ्चोलीमते कर्त्ता त्रिविधो भवति।[53] शुद्धः प्रयोजको हेतुः कर्मकर्ता च। 'मया हरिः सेव्यते' इत्यत्र शुद्धकर्ता वर्तते। 'कार्यते हरिणा' इत्यत्र प्रयोजको हेतुः कर्ता वर्तते। 'गमयति कृष्णं गोकुलम्' इत्यत्र कर्मकर्ता वर्तते। शुद्धत्वं नाम हेतुत्वानाश्रयत्वे सति सामानाधिकरण्येन

कर्मत्वविशिष्टकर्तृत्वानधिकरणत्वरूपमिति। कर्तृकारकस्य स्वरूपं प्रतिपादयन्नाह जगदीशः–

तिङा विकरणात्तस्य धातोरर्थस्तु यादृशः।
स्वार्थे यादृशि बोध्यस्तत् कर्तृत्वं तदिहोच्यते॥[54]

सविकरणेन यद्धातुनोपस्थाप्यो यादृशार्थस्तदुत्तरतिङा स्वोपस्थाप्ययादृशार्थेऽनुभावयितुं शक्यस्तद्धातूपस्थाप्यस्य तस्य तदेव कर्तृत्वं कारकमिति। तत्तत्क्रियानुकूलकृतिमत्त्वं[55] तत्तत् क्रियाकर्तृत्वम् अनुकूलकृतिमत्त्वं वा कर्तृत्वमिति। व्याकरणदृष्ट्या क्रियायाः निष्पत्तेः यः स्वतन्त्रो भवति स च कर्त्ता इति। स्वतन्त्रशब्दस्यार्थः प्रधानमिति पतञ्जलिः। काशिकाकारोऽपि वदति "स्वतन्त्रः इति प्रधानभूत उच्यते। अगुणभूतो यः क्रियासिद्धौ स्वातन्त्र्येण विवक्ष्यते तत्कारकं कर्तृसंज्ञं भवति।"[56] पुरुषोत्तमदेवः, भट्टोजिदीक्षितश्च उक्तलक्षणस्यैव समर्थनं कुरुतः। यः कर्ता कञ्चिदन्यं कर्तारं क्रियायां प्रवृत्तं करोति स च प्रयोजककर्त्ता इति पाणिनिः। यथा– देवदत्तः ग्रामं चैत्रं गमयति। अत्र देवदत्तः चैत्रं ग्रामं नेतुं प्रेरयति। अत एव देवदत्तः प्रयोजककर्ता इति। यस्मिन् कारके क्रियायाः निष्पत्तौ स्वातन्त्र्यं वर्तते स च कर्त्तेति वैयाकरणाः वदन्ति। अर्वाचीनवैयाकरणा स्वातन्त्र्यस्य स्वरूपं परिष्कृतवन्तः। भट्टोजिदीक्षितानुसारं "प्रधानीभूतधात्वर्थं प्रति आश्रयत्वं स्वातन्त्र्यम्"।[57] यथा देवदत्तो गच्छति इत्यत्र गम्–धातोरर्थः उत्तरदेशसंयोगानुकूलव्यापारः, तदाश्रयः देवदत्तः। अतः गमनक्रियायां देवदत्तस्य स्वातन्त्र्यात् तस्य कर्तृसंज्ञा भवति। कर्मवाच्यस्थले अस्य लक्षणस्य सदोषत्वं दुर्वारैवेति। कर्मवाच्यस्थले धातोः प्रधानमर्थः न व्यापार अपितु फलमिति। यथा "यज्ञदत्तेन पक्वस्तण्डुलः" अत्र धात्वर्थः विक्लितिः। विक्लित्याश्रयत्वात् तण्डुलस्यात्र कर्मसंज्ञा भवति। धात्वर्थाश्रयत्वात् तण्डुले कर्तृलक्षणस्यातिव्याप्तिः सम्भवति। वैयाकरणसिद्धान्तकौमुद्याः टीकाकारः वासुदेवदीक्षितः, कौण्डभट्टश्चापि उक्तलक्षणमेव स्वीकृतवन्तौ। नागेशभट्टस्तु "कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वं स्वातन्त्र्यमिति[58] उक्तवान्। अर्थात् कर्तृप्रत्ययययुक्तस्य तिङन्तपदस्य प्रयोगस्थले धात्वर्थाश्रयत्वमेव स्वातन्त्र्यमिति। यथा– 'देवदत्तः तण्डुलं पचति' इत्यत्र कर्तृवाच्यस्य प्रयोगस्थले पच्धात्वर्थः विक्लित्तिजनकव्यापारः तस्याश्रयः देवदत्त इति। अत्र पच्–धातुतः कर्तरि शप्विकरणसहिततिप्प्रत्ययो भवति। अतः पाकक्रियायां स्वतन्त्रो देवदत्तो वर्तत इति। 'देवदत्तेन तण्डुलः पच्यत' इत्यत्र कर्मवाच्यस्थले पच्धात्वर्थः व्यापारजन्यविक्लितः तदाश्रयः तण्डुलः। अत्र पच्धातूत्तरकर्मवाच्ये यगा सह त–प्रत्ययो वर्तते। अतः पच्–धातुना सह कर्तृप्रत्ययस्याभावात् धात्वर्थाश्रयस्य तण्डुलस्य स्वतन्त्राभावात् न कर्तृसंज्ञेति। वैयाकरणानां नये विवक्षाधीनानि कारकाणि भवन्ति। अत एव सभापतिशर्मोपाध्याय आह–

विवक्षाधीनत्वं कारकाणाम् 'स्थाली पचति' 'स्थाल्या पचति' "स्थाल्यां पचति" इति प्रयोगदर्शनात्।[59]

धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यत।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः।।[60]

कारकत्वं तद्व्याप्यकर्तृत्वादिषट्कञ्च न नियतं किन्तु वैवक्षिकम्। अत एव धात्वर्थव्यापाराश्रयत्वेन विवक्षितः कर्ता। यद्धातूपात्तक्रियायां यदा यस्य स्वातन्त्र्यं विवक्ष्यते तदा तत्क्रियायां स कर्त्तेति।

तथा च यस्मिन् कारके क्रियायाः निष्पत्तिं प्रति स्वातन्त्र्यं वर्तते तस्यैव कर्तृसंज्ञा भवति। कारकचक्रे भवानन्दतर्कवागीशेन लक्षणत्रयं निरूपितम्। तत्राद्य लक्षणद्वयं पूर्वपक्षरूपेणोद्धृतं तृतीयञ्च लक्षणं सिद्धान्तभूतमिति। तानि लक्षणानि निम्नोक्तानि सन्ति।

1. क्रियाश्रयत्वम् कर्तृत्वम्।[61]

2. कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वं कर्तृत्वम्।[62]

3. अनुकूलकृतिमत्त्वम् कर्तृत्वम्।[63]

क्रियाश्रयत्वं कर्तृत्वमित्यत्र यस्मिन् कारके क्रिया आश्रितत्वेन तिष्ठति स च कर्त्तेति। इदं लक्षणं वैयाकरणाः स्वीकुर्वन्तीति भवानन्दः स्वीकरोति। कारकचक्रस्य पाण्डुलिपौ[64] एका टिप्पणी विद्यते। तेन ज्ञातं भवति यद् वैयाकरणः कर्त्तृपदं यौगिकं स्वीकरोति इति केचन वदन्ति। तस्मिन् मते कृधात्वर्थः क्रिया वा व्यापारः। नागेशमते उत्पत्तिस्वरूपफलाश्रयेन[65] भिन्नाश्रयवती क्रिया कृधात्वर्थः वा उत्पत्त्यनुकूल-व्यापार इति।

नागेशमते कर्तृवाच्ये कर्मवाच्ये वा यः कृत्प्रत्ययो भवति तस्यार्थः आश्रयत्वमिति। तथा च कृधातुतः तृच्प्रत्यययोगे सति निष्पन्नोऽयं कर्तृपदं क्रियाश्रयार्थकमिति। अस्य मतस्योल्लेखं कुर्वन्नाह जयरामः-

वैयाकरणास्तु "अनभिहिते कर्तरि" इत्यनुशासनादचेतनेऽपि कर्तृपदप्रयोगात् क्रियाश्रयत्वमेव कर्तृत्वम्।[66] अर्वाचीनवैयाकरणास्तु कर्तुः स्वरूपमनेन रूपेण प्रतिपादितवन्त इति।

(क) धातूपात्तव्यापाराश्रयः कर्त्ता।[67]
(ख) व्यापाराश्रयः कर्त्ता।[68]
(ग) प्रकृतधातुवाच्यव्यापाराश्रयत्वं कर्तृत्वमिति।[69]

क्रियाश्रयत्वं कर्तृत्वमित्यत्र कालेऽतिव्याप्तिस्सम्भवति। यतोहि "जगतामाश्रयः काल: तर्हि क्रियाया अपि आश्रय: काल इति। उक्तातिव्याप्तिवारणाय कविराजदूषेण उक्तलक्षणे प्राधान्येनेत्यस्य निवेशो क्रियते। तथाच धात्वर्थस्य व्यापारस्य मुख्यरूपेण य: आश्रयो भवति स च कर्ता इति। एवञ्च 'गोपाल: गच्छति' इत्यत्र गम्धात्वर्थस्य गमनस्य वा उत्तरदेशसंयोगानुकूलव्यापारस्य मुख्याश्रय: गोपाल: एव वर्तत इति न तु काल:। यथा धात्वर्थस्याश्रय: कर्त्ता भवति, तथैव कर्म अधिकरणञ्च तत्रातिव्याप्तिर्दुवारैवेति। 'देवदत्त: तण्डुलं पचती'त्यत्र पाकक्रिया तण्डुलकर्मण्यपि जायते। अत: पाकव्यापाराश्रयत्वात् तण्डुलस्यापि कर्तृत्वं स्यादिति।

एवं 'यज्ञदत्त: विद्यालये पठति' इत्यत्र यज्ञदत्तस्य पठनस्वरूप: व्यापार: विद्यालय एव भवति। तादृशव्यापारस्य आश्रयत्वं विद्यालये सत्त्वात्तत्र भवत्यतिव्याप्तिरिति चेन्न। साक्षात्सम्बन्धेन क्रियाश्रयत्वं कर्तृत्वमिति। अत एव रामतर्कवागीशेनोक्तं साक्षात्क्रियाश्रयत्व[70] कर्तु: लक्षणमिति। क्रियाश्रयत्वं कर्तृत्वम् अस्य लक्षणस्य 'चैत्र: गच्छति' इत्यत्र चैत्रे समन्वयेऽपि 'चैत्र: ग्रामं त्यजति' इति प्रयोगकाले त्यागकर्तरि चैत्रे गमनकर्तृत्वापत्ति: तत्तु नेष्टमिति इति चेन्न। यद्धातूत्तराख्यातेन यगाद्यसमभिव्याहृतेन यद्धात्वर्थान्वितयादृशधर्मवत्त्वं बोध्यते, तादृशधर्मवत्त्वमेव, तत्क्रियाकर्त्तृत्वम्।[71] अर्थात् धातुत: यत्र यगादिप्रत्ययो न भवति शपादियुक्त: तिङ्प्रत्ययो जायते तत्र तिङा कर्तृत्वं बोध्यते। कर्तृत्वन्तु व्यापारे अनुकूलत्वसम्बन्धेन प्रथमान्तपदस्य प्रकृत्यर्थे च आश्रयत्वसम्बन्धेन चान्वयो भवति। पृथग्-पृथग् धातूनां पृथगर्थत्वात् तत्तद्धात्वर्थेषु अन्वितानि कर्तृत्वानि पृथग् पृथगेव भवन्ति। यथा 'राम: गच्छति' इत्यत्र गम्धात्वर्थ: उत्तरदेशसंयोगजनकव्यापारे कर्तृत्वमन्वेति। राम: ग्रामं त्यजतीत्यत्र कर्तृत्वं विभागजनकव्यापारेऽन्वेति। वैयाकरणानां नये तु एकत्वाश्रयरामकर्तृकं वर्तमानकालिकं गमनमिति बोध:। एवञ्च एकत्वाश्रयरामकर्तृकग्रामकर्मक पूर्वदेशविभागजनक: व्यापार इति बोधो च जायते। तत्तत्क्रियाश्रयत्वं कर्तृत्वमिति लक्षणस्य घटं जानातीत्यादौ लक्षणसमन्वयेऽपि 'देवदत्त: तण्डुलं पचति', 'घटो नश्यति' इत्यादौ[73] कर्तरि देवदत्तघटादौ पाकनाशाश्रयत्वाभावादव्याप्तिरेव। एवं विक्लित्याश्रये तण्डुले नाशाश्रये कपाले चातिव्याप्तिरिति केचित् वदन्ति। तन्न, क्रियाभेदेन कर्तृस्वरूपस्य भिन्नतया पाकादिक्रियास्थले अनुकूलव्यापारवत्त्वसम्बन्धेन नाशादिस्थले च प्रतियोगित्वसम्बन्धेनाव्याप्तिरतिव्याप्तिश्च न सम्भवति।

कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वं कर्तृत्वमित्यपि[74] केचिद् वदन्ति। अत्र सत्यन्तपदस्य प्रयोजनन्तु छेद्यसंयोगादिरूपव्यापारजनके कुठारादावति-व्याप्तिवारणाय। अप्रयोज्यत्वञ्च[75] फलानुकूलतज्जन्यव्यापारानाश्रयत्वमिति अस्यार्थ: तत्क्रियानुकूलस्वभिन्नकारकजन्यव्यापारानाश्रितत्वम्। तथाच स्वभिन्नकारकजन्यतत्का-

र्योत्पत्त्यनुकूलव्यापारानाश्रितत्वे सति स्वभिन्नकारकजन्यतत्क्रियानुकूलव्यापारजनकत्वं कर्तृत्वमिति। यद्वा कर्मत्वाद्यन्यतमशून्यत्वे सति क्रियाकारकत्वं कर्तृत्वमिति यदि यत् तत् पदस्योपादानं क्रियते तदा तत्क्रियाकर्मत्वाद्यन्यतमशून्यत्वे सति तत्क्रियाकारकत्वं तत्कर्तृत्वमिति। यदि उच्यते यत्तत्पदयोरनुगतत्वादिदं लक्षणं न साधु तर्हि उच्यते भवानन्दतर्कवागीशेन–

'अनुकूलकृतिमत्त्वं कर्तृत्वमिति'[76] अथवा तत्क्रियानुकूलकृतिमत्त्वम् तत्क्रियाकर्तृत्वमिति। अर्थात् तत्तत्क्रियानिष्ठविषयतानिरूपितानुकूलत्वविषयतानिरूपित-विषयताविशिष्टकृतिमत्त्वमिति। प्रयोगशून्यतादशायां कर्त्तृत्वव्यवहारो ग्रन्थकृतामिष्टः, तदा समवायसम्बन्धेन[77] कृतिमत्त्वमेव कर्तृत्वं बोध्यम्। यदि च शरीरादावपि कर्त्तृत्वव्यवहारो मुख्यः, तदा समवायावच्छेदकताऽन्यतरसम्बन्धेन[78] तद्वत्त्वं ज्ञेयमिति। अचेतने कर्तृपदप्रयोगस्तु लाक्षणिक इति। न च नान्तरीयककलायपाकस्थले 'कलायं पचति' इति प्रयोगः स्यात् तदनुकूलकृतिमत्त्वादिति वाच्यम्। तत्तद्विषयकत्वेनापि कृतिर्विशेषणीया। तथा च स्वनिष्ठविषयतानिरूपकत्वस्वजनकत्वोभयसम्बन्धेन तत्तत्क्रिया-विशिष्टकृतिमत्त्वं कर्त्तृत्वमिति बोध्यम्।

न च अनुकूलकृतिमत्त्वमित्यत्र कृतिः यत्नः तर्हि काष्ठस्थाल्यादेः अपि कर्तृत्वविवक्षया 'काष्ठं पचति' 'स्थाली पचति' इति प्रयोगो न स्यात्। यतोहि अचेतनादौ यत्नाभावादिति वाच्यम्। "स्वतन्त्रः कर्ता" इत्यत्र स्वतन्त्रपदं पारिभाषिकमिति अत्र गदाधरभट्टाचार्येणोच्यते "स्वतन्त्रत्वञ्च कारकान्तरव्यापारानधीनत्वे सति कारकत्वम्। 'काष्ठं पचती'त्यादौ स्वातन्त्र्यविवक्षया काष्ठादेः कर्तृत्वमिति"[79]। न च कारकान्तरव्यापारानधीनकारकत्वरूपं यत् स्वतन्त्रत्वं तादृशस्वतन्त्रत्वरूप-कर्तृत्वबोधकविभक्तीनामचेतनकाष्ठादौ पुरुषाधीनत्वेनोक्तस्वतन्त्रत्वस्यापि असम्भवादिति वाच्यम् [80]समभिव्याहृतक्रियाकारकान्तरव्यापारानधीनतत्क्रियानुकूलस्य व्यापारस्यैव तत्क्रियावाचकपदसमभिव्याहृतविभक्त्यर्थत्वात्। 'चैत्रः पचति', 'काष्ठं पचति' इत्यादौ कारकान्तरबोधकपदाभावेन कारकान्तरोपस्थित्यभावात् तेन च कारकान्तरानधीनत्व-प्रतीत्यसम्भवात् तदभावरूपकारकान्तरानधीनत्वप्रतीतेरसम्भवादिति। अत एव तत्र कारकान्तरव्यापारानधीनत्वे सति कारकत्वं स्वतन्त्रत्वमिति बोध्यम्। भवानन्दः कर्तृत्वस्य यल्लक्षणं स्वीकरोति परन्तु मुख्यकर्तृत्वे भेदं दर्शयति। गदाधरेणोच्यते "मुख्य[81] च क्रियाकर्तृत्वं न क्रियानुकूलकृतिमात्रम् एकक्रियाविषयककृतितो यत्र नान्तरीय-ककक्रियान्तरनिर्वाहस्तत्र तत्कृतिमतः तत्क्रियाकर्तृत्वाभावात्, अत एव 'मत्तो भूतं न तु मया कृतम्' इति व्यपदेश इति, किन्तु "तत्क्रियाविषयकत्वे सति तदनुकूला या कृतिस्तदेव तत्कर्तृत्वम्"।[82] क्रियानुकूलकृतिमात्रस्य मुख्यकर्तृत्वस्यास्वीकारे कारणमुक्तं गदाधरेण– यत्र कृतिस्तु केवलं गमनक्रियानुकूलैवास्ति अथ च तत्सहावश्यंभाविनः

क्रियान्तरस्य परशरीरेऽभिघातस्यापि गमनानुकूलकृत्यैवाभिघातोऽपि परस्य जातः तत्र तत्कृतिमतोऽर्थात् गमनानुकूलकृतिमतोऽभिघातक्रियाकर्तृत्वम् इष्टं नास्तीति हेतोर्न क्रियानुकूलकृतिमात्रं मुख्यं क्रियाकर्तृत्वम्, उक्तस्थले अभिघातक्रियाकर्तृत्वाभावादेव तादृशस्थले 'मत्तो भूतम् न तु मया कृतम्' इति व्यपदिशन्ति, यदि च क्रियानुकूलकृतिमात्रं मुख्यं कर्तृत्वं स्यात्तदोक्तस्थले गमनानुकूलकृत्याप्यभिघाते जाते गमनानुकूलकृतिमतोऽभिघातक्रियाकर्तृत्वमपि स्यादेव कृतिं विनाभिघातस्याप्यसम्भवेनापि अभिघातक्रियोत्पादिकाया गमनानुकूलकृतेः सत्त्वादेव न चैतदिष्टम्। तत्क्रियाविषयकत्वे सति या तत्क्रियानुकूलकृतिः सैव मुख्यं तत्क्रियाकर्तृत्वमिति।[83] तथा च गमनानुकूलकृतेः उक्तस्थलेऽभिघातक्रियाविषयकत्वं नास्ति गमनकर्तुरभिघाते तात्पर्याभावात् इति नाभिघातक्रियाकर्तृत्वम्। मृगाद्युद्देशेन बाणप्रक्षेपाद् यत्र ब्राह्मणवधो जातः तत्र बाणप्रक्षेपव्यापारस्य मरणानुकूलत्वं कृतिविषयत्वञ्च यद्यप्यस्ति तथापि बाणप्रक्षेपस्य ब्राह्मणमरणानुकूलव्यापारत्वेनाभिप्रायविषयत्वाभावात् ब्राह्मणमरणानुकूलव्यापारत्वेन रूपेण अन्योद्देशेन बाणप्रक्षेपरूपव्यापारस्य कृतिविषयत्वम् नास्तीति तादृशव्यापारकर्तुः इति न तस्य सम्पूर्णप्रायश्चित्तं भवति। अत एव तत्क्रियाविषयकत्वे सति तत्क्रियानुकूला या कृतिस्तद्वत्त्वमेव मुख्यं कर्तृत्वं वक्तव्यमिति अनुकूलकृतिमत्त्वमित्यत्र अनुकूलपरिष्कारं कुर्वन्नाह भवानन्दः– "कार्यत्वानवच्छिन्नजन्यतानिरूपितमसाधारणमनुकूलत्वमेव वा लक्षणघटकमित्याहुः।"[84] तथा च कर्तृत्वस्य लक्षणं भवति कार्यत्वानवच्छिन्नजन्यतानिरूपितासाधारणानुकूलकृतिमत्त्वं कर्तृत्वम्।

अस्य कर्तृलक्षणस्य ईश्वरे नातिव्याप्तिस्सम्भवति। उक्तमते अस्वारस्यं द्योतयन्नेव आह भवानन्दसिद्धान्तवागीशः आहुरिति। तथा च प्रतीयते यत् भवानन्दसिद्धान्तवागीशनये "अनुकूलकृतिमत्त्वमेव कर्तृत्वमिति। अत एव 'स च विश्वस्य कर्ता भुवनस्य गोप्ता"[85] इत्यादिवेदवाक्येषु यत् कर्तृत्वं विद्यते तत्रापि लक्षणसमन्वयात् लक्षणस्य दोषरहितत्वं सम्भवतीति।

न्यायकोशकारदिशा कर्म त्रिविधं भवति। प्रथमं पदार्थान्यतमं[८५], द्वितीयं पुण्यपापजनकं, तृतीयम् पाणिनिस्वीकृतकर्म इति। आद्यस्तु एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति[८६] कर्मलक्षणम्। अस्यान्यानि लक्षणानीत्थं सन्ति।

1. मूर्तमात्रद्रव्यसमवेतत्वं कर्मत्वम्।[८७]
2. संयोगाविभागानुकूलत्वम्।[८८]
3. संयोगभिन्नत्वे सति संयोगासमवायिकारणत्वं कर्मत्वमिति।[८९]
4. विभागासमवायिकारणत्वे सति संयोगहेतुत्वम् कर्मत्वम्।[90]
5. नित्यावृत्तिसत्तासाक्षाद्व्याप्यजातिरूपं कर्मत्वम्।[91]

6. नित्यावृत्तिपदार्थविभाजकोपाधिमत्त्वम् कर्मत्वम्।[92]

7. अनेकाश्रितावृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं कर्मत्वम्।[93]

द्वितीयकर्म तु क्रियते फलार्थिभिः इति कर्म धर्माधर्मात्मकं बीजाङ्कुरवत्–प्रवाहरूपेणानादिः तन्त्रशास्त्रे कर्म षड्विधम्, शान्तिकरणम्, वशीकरणम्, स्तम्भनम्, विद्वेषः, उच्चाटनम्, मारणञ्चेति। केचित्तु कर्म त्रिविधम् नित्यं, काम्यं, नित्यकाम्यञ्चेति। तत्र नित्यं कर्म सन्ध्यावन्दनादिः। केवलं काम्यं यागादिः। नित्यकाम्यञ्च एकादशीव्रतादीनि इत्याहुः। गीतायां शुक्लकृष्णकृष्णशुक्लभेदेन कर्म त्रिविधं भवति। तत्तु पुण्यपापजनकमिति। तृतीयस्तु कर्त्ता स्वक्रियया यं कारकम् अभीष्टतमं मत्वा तं प्राप्तुमिच्छति तं कर्म संज्ञा भवति। अत एव भट्टोजिदीक्षितेनोच्यते–

कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्म संज्ञं स्यात्। यथा– भाषेषु चरन्तमश्वं स बध्नाति इत्यत्र अश्वपतिः अश्वं माषक्षेत्रात् अन्यत्र बध्नाति। यतोहि भाषभक्षणेन अश्वस्य हानिर्भविष्यति। "कर्मणि द्वितीया"[94] इति सूत्रेण तस्मात् कर्मणः द्वितीया भवति। कदाचिदनिप्सिततमस्यापि कर्म संज्ञा भवति। यथा विषं भुङ्क्ते इत्यत्र विषानिप्सितमं वर्तत इति। "तथा युक्ते चानीप्सिततमम्"[95] इति सूत्रेण कर्मसंज्ञा भवति। भवानन्दतर्कवागीशः कारकचक्रे कर्मणः पञ्चलक्षणानि प्रतिपादितवान्। एतानि सर्वाणि लक्षणानि पूर्वाचार्यैः प्रतिपादितानि सन्ति। तान्यधोलिखितानि सन्ति।

1. करणव्यापार्य्यत्वं कर्मत्वम्।[96]

2. परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वम्।[97]

3. तत्तद्धात्वर्थतावच्छेदकफलशालित्वं तत्तद्धा[98]त्वर्थकर्मत्वम्

4. तत्क्रियानधिकरणत्वे सति तत्क्रियावच्छेदकफलशालित्वं कर्मत्वम्[99]

5. परसमवेततत्तद्धात्वर्थान्वयिफलविशेषशालित्वं तत्तद्धात्वर्थकर्मत्वम्।

अत्र वागीशेन प्रथम[100] द्वितीयचतुर्थलक्षणेषु दोषं दर्शयित्वा तत्खण्डितमिति। पञ्चमलक्षणस्य निर्वचनं प्राचीनानां मते कृतवानिति। तृतीयलक्षणं स्वीकृतवानिति तद्ग्रन्थस्यालोडनेन प्रतीयत इति।

करणव्यापार्य्यत्वं कर्मणः लक्षणम्–

इदं कर्मणः लक्षणन्तु प्राचीननैयायिकाः स्वीकुर्वन्ति। न्यायभाष्यकारनये चत्वारि तत्त्वान्येव भवन्ति। प्रमाता, प्रमाणं, प्रमेयं, प्रमितिश्चेति। तत्त्वशब्दस्य निर्वचने वाचस्पतिमिश्रेणोच्यते–

"तत्त्वं हि प्रमाणव्याप्यत्वं प्रमाणव्यापारविषयत्वम्"[101]

उक्तकथनमाधारीकृत्योदयनाचार्येणोक्तम्– वाचस्पतिमिश्रनये करण-व्यापारविषयत्वं कर्मणः लक्षणम्। यद्यपि उद्योतकरस्य मते यत्कर्मलक्षणं विद्यते क्रियाविषयत्वमिति तत्रैव वाचस्पतिमिश्रः उक्तवान्[102]" अनात्मसमवेत-क्रियाफलशालित्वं क्रियाविषयत्वं कर्मत्वमिति इदमेव लक्षणं मिश्रः स्वीकरोति इति प्रतीयते। करणव्यापारविषयत्वं कर्मत्वमिति लक्षणन्तु उदयनाचार्येण स्वीक्रियते इति केचन वदन्ति। उदयनाचार्यस्य परवर्ती शशधरोऽपि तदेव[103] स्वीकरोति। पूर्वोक्तकर्मलक्षणमभिलक्ष्य व पूर्वपक्षरूपेण करणव्यापार्य्यत्वं कर्मत्वमिति लक्षणं भवानन्देन प्रतिपादितम् करणव्यापार्य्यत्वं नाम करण[104]जन्यक्रियाऽनुकूलव्यापाराश्रयत्वम्। अत्र जन्यान्तं लक्षणे न दीयते तर्हि क्रियानुकूलव्यापाराश्रयः कर्ता करणञ्चापि भविष्यति तत्रातिव्याप्तिवारणाय कर्मणः लक्षणे करणजन्यत्वं दीयते। करणजन्यत्वस्य कर्मणि एव सत्त्वात् भवति लक्षणसमन्वयः। तथापि उक्तलक्षणस्य दात्रेण[105] धान्यं लुनाति" इत्यत्र छिदानुकूलहस्तादिकरणजन्यहस्तसंयोगादिरूपव्यापाराश्रये दात्रे अतिव्याप्तिर्सम्भवति। तस्य वारणं तु न केनापि प्रकारेण कर्तुं शक्यते। अस्मिन् लक्षणे दोषमुद्भावयन् आह श्रीहर्षः – [106]करणव्यापारविषयः कर्म? इति चेन्न "हस्तेन रामेण बाणेन शरेण विद्धो रावणः "इत्यादावतिप्रसङ्गात्" अत्र हस्तः शरश्च करणकारकं विवक्षितमस्ति। तथापि तस्य कर्मत्वमुक्तलक्षणेन भविष्यति। तत्रातिव्याप्तिदोषस्य सत्त्वात् तल्लक्षणं न साधु इति भवानन्दतर्कवागीशस्याभिप्रायः। कारकचक्रस्य टीकाकारः जय[107]रामोऽपि तदेव वदति।

परसमवेतक्रियाजन्यफलशालित्वं कर्मणः लक्षणमिति तु वाचस्पतिमिश्रैः उच्यते। प्रकृतलक्षणस्योल्लेखं[108] गङ्गेशोपाध्यायोऽपि अनुव्यवसायवादप्रकरणे कृतवानिति। हरिदासभट्टाचार्यः जयकृष्णतर्कालङ्कारोऽपि चेदमेव लक्षणं स्वीकुरुतः। उक्तलक्षणस्य तात्पर्यमिदं विद्यते यत् अभीप्सितकर्मकारकाद् भिन्ने कारके समवायसम्बन्धेन विद्यमाना या क्रिया, तस्याः जायमानं यत्फलं तदाश्रयस्य कर्म संज्ञा भवतीति। यथा देवदत्तः विद्यालयं गच्छति इत्यत्र विद्यालयः कर्मकारकरूपेण अभीप्सितो वर्तते। तद्भिन्ने देवदत्तकारके गमनक्रिया समवायेन विद्यते। गमनक्रियायाः यत्संयोगरूपं फलमुत्पद्यते तस्याश्रयो विद्यालयो वर्तते। अतः तस्य कर्म संज्ञा भवतीति कर्मलक्षणस्य समन्वयो भवति। परसमवेतपदस्यानुपादाने चैत्रः नगरं गच्छति इत्यत्र चैत्रेऽतिव्याप्तिर्दुवारैवेति। तथाच परसमवेतक्रियाजन्यफलशालित्वं कर्मणः लक्षणमिति। अत्रापि अव्याप्तिदोषस्योद्भावनम् आचार्याः कुर्वन्ति। यथा शशधरोऽपि[109] कथयति यत् आत्मानमात्मना जानामि इत्यत्र आत्मा ज्ञानरूपस्य फलस्य आश्रयः, अथ च ज्ञानरूपायाः क्रियायाः आश्रयः तदेवात्मा, परसमेवक्रियायाः तत्राभावात् अव्याप्तिरिति।

श्रीहर्षस्य[110] मतमिदमस्ति यदुक्तकारकलक्षणस्य अपादानकारकेऽतिव्याप्तिर्दुर्वारैव। यतोहि वृक्षात् पर्णं पततीत्यत्र पतनक्रियायाः विभागः फलमुत्पद्यते । विभागस्तु वृक्ष एव वर्तते विभागस्य जनिका क्रिया (पतनाख्या) वृक्षभिन्ने पर्णे विद्यते। पर्णनिष्ठायाः क्रियायाः उत्पद्यमानं विभागरूपं फलं, तस्याश्रयः वृक्षः। अतः वृक्षस्यैव कर्मसंज्ञा भविष्यति तत्र कर्मलक्षणस्य सत्त्वादतिव्याप्तिः आपतति। अत एव अपादानेतरत्वे सति परसमवेतक्रियाजन्यफलशालित्वम् कर्मणः लक्षणमिति। चित्सुखाचार्योऽप्याह–

"अपादानव्यतिरिक्तत्वे सति परसमवेतक्रियाफलशालिकर्म"[111] इति नदीतीरे वर्द्धते[112] इत्यत्र तीरे अधिकरणे उक्तलक्षणस्य सङ्गतत्वादतिव्याप्तिः पुनः दुर्वारैवेति। एवं संयोगावच्छिन्नक्रियायाः गम्धात्वर्थतया तज्जन्यविभागरूपफलाश्रये पूर्वदेशेऽतिव्याप्तिश्चेत्यपि बोध्यमिति। वृक्षात् पर्णं पततीत्यत्र अधःसंयोगजनिका पतनक्रिया ततः जायमानो विभागरूपफलाश्रयस्य वृक्षस्य कर्मत्वात् वृक्षः पर्णं पतति इति प्रयोगापत्तेर्दुर्वारैव इति। अनया रीत्यैवात्र अव्याप्त्यतिव्याप्तिदोषमुद्भाव्य तन्निराकृतमिति। रघुनाथशिरोमणिस्तु प्रतिपादितवान्–धात्वर्थतावच्छेदकफलशालित्वं[113] कर्मत्वमिति। "देवदत्तः गोरक्षपुरात् काशीं गच्छति" इत्यत्र काशीपदस्यैव कर्मसंज्ञा भविष्यति। यतोहि गमनक्रियातः जायमानः उत्तरदेशसंयोगरूपस्य धात्वर्थतावच्छेदक-फलस्य आश्रया काशी एव विद्यते। वायसः वृक्षं त्यजति इत्यत्रापि त्यागक्रियातः जायमानस्य विभागरूपधात्वर्थतावच्छेदकफलस्य आश्रयत्वात् वृक्षस्यैव कर्मसंज्ञा भवति न तु वायसस्य। उक्तकर्मलक्षणस्यैव कञ्चिद् परिष्कारं कुर्वन्नाह भवानन्दत-र्कवागीशः–

"तत्तद्धात्वर्थतावच्छेदकफलशालित्वं [114]तत्तद्धात्वर्थकर्मत्वम्" "नदी तीरे वर्द्धते इत्यत्र वृद्धधातोरकर्मत्वात् तत्तद्धात्वर्थतावच्छेदकफलाश्रयत्वं तीरे नास्ति अतः तीरस्य कर्मत्वापत्तिः न सम्भवति।

यदि तत्तद्धात्वर्थतावच्छेदकफलाश्रयस्यैव कर्मत्वं स्वीक्रियते तदा "वृक्षात् पर्णं भूतले पतति" इत्यत्र पत्धात्वर्थः अधःसंयोगजनिका क्रिया एवञ्च धात्वर्थतावच्छेदकफलमधःसंयोगः तस्याश्रयं भूतलं तत्र कर्मत्वापत्तिः। फलतः वृक्षात्[115] पर्णं भूतले पतति इत्यस्य स्थाने वृक्षात् पर्णं भूतलं पतति इति प्रयोगापत्तिः। अत्र भवानन्देन भणितम्– यः "वृक्षात् पर्णं भूतलं पतति" इति प्रयोगं करोति तदनुसारं पत् धातुः सकर्मको विद्यते। तत्र पत्धात्वर्थतावच्छेदकम् अधःसंयोगस्याश्रयं भूतलमस्ति। तस्य कर्मत्वविवक्षायां न कोऽपि दोष इति। "द्वितीयाश्रितातीतपतितगतात्य-स्तप्राप्तापन्नैः[116]" इति सूत्रेण नरकं पतितः इति नरकपतितः इत्यत्र द्वितीयान्तनरकपदस्य पतितपदेन समासो भवति तेन प्रतीयते यत् पत्धातुः सकर्मक इति। नागेशभट्टोऽपि[117]

तदेव स्वीकरोति। यदा धात्वर्थपतनादौ भूतलस्य अन्वयः परम्परया सम्बन्धेन भवति तदा वृक्षात् पर्णं भूतले पतति इति प्रयोगोऽपि साधु विद्यते। अत्र नागेश आह–

वृक्षाद् भूमौ पतति इत्यत्र कर्तृकर्मद्वारा तद्विवक्षाया आधारत्वमिति[118] अत्र केचन अधःसंयोगफलस्य आश्रयत्वेऽपि भूतलादेर्न द्वितीया" इति वदन्ति, अस्मिन् मते द्वितीयाविभक्त्यर्थ एव फलम्। फलस्य वा अधःसंयोगस्य वाचकं न पत् धातुरिति। रामः ग्रामं गच्छति इत्यत्र संयोगजनकगमनम् इति गम् धात्वर्थः। तत्र श्रोतुः जिज्ञासा जायते। संयोगरूपफलस्याश्रयः कः? तत्रोच्यते। संयोगाश्रयः ग्रामः अतः ग्रामस्य कर्मसंज्ञा भवति। पतति इत्यत्र अधः संयोगजनिका क्रिया पत् धात्वर्थः। अत्र श्रोतुः इयं जिज्ञासा एव न जायते यत् अधःसंयोगस्य आश्रयं भूतलमिति। यतोहि अधःसंयोगः अधोदेशात् भिन्नं प्रति निराश्रयो भवति। अतः वृक्षात् पर्णं भूतले पतति इत्येवं साधुप्रयोगः इत्यपि अपरे वदन्ति। अत्र प्राचीनाः समाधत्ते पत्धातुः अकर्मक एव भवति। सकर्मकत्वं नाम कर्तृभिन्नान्वयि-फलावच्छिन्नव्यापारबोधकत्वमिति।[119] पर्णं पततीत्यत्र पत् धात्वर्थः व्यापारः तज्जन्यं यत् अधःसंयोगरूपं फलं तस्य पर्णे कर्तृकारकेऽन्वयो भवति। अतः पत्धातुः अकर्मक[120] इति। तत्तद्धात्वर्थतावच्छेदकफलशालित्वं तत्तद्धात्वर्थकर्मत्वमिति लक्षणस्य "भूमिं प्रयाति खगः" इत्यत्र खगेऽतिव्याप्तिः[121] आपतति। अत्र धात्वर्थतावच्छेदक-संयोगस्याश्रया यथाभूमि विद्यते तथैव खगोऽपि वर्तते। यतोहि संयोगो द्विष्ठो भवति तस्याश्रया यथाभूमिः तथैव खगोऽपि भवति। अतः खगः खगं प्रयाति यद्वा खगं त्यजति खगः इति प्रयोगापत्तिः दुर्वारैवेति।

अत्र रघुनाथशिरोमणिः समादधाति–क्रियान्वयिपरसमवेतत्वमेव कर्मप्रत्ययार्थः। परसमवेतधात्वर्थजन्यधात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति दीधितिः। उक्ताशयं निरूपयन्नाह–भवानन्दतर्कवागीशः।

"एवञ्च परसमवेततत्तद्धात्वर्थान्वयिफलविशेषशालित्वं तत्तद्धात्वर्थकर्मत्वम्, अत एव गमिधातोः पूर्वदेशे न कर्मत्वम् तस्य विभागरूपफलेनानन्यत्वात्, एवं पतेरपि गुरुत्वासमवायिकारणप्रयोज्यविजातीयक्रियैवार्थः तस्य चाधः संयोगरूपफलेन नैवान्वयः।"[122] तथाच परिष्कृतं कर्मणः लक्षणन्तु–

परसमवेता या तत्तद्धात्वर्था क्रिया तज्जन्यं यत् धात्वर्थतावच्छेदकं फलं तत्शालित्वम् तत्तद्धात्वर्थकर्मत्वमिति। यद्वा परसमवेतधात्वर्थजन्यधात्वर्थता-वच्छेदकफलशालित्वं कर्मणः लक्षणमिति इदं लक्षणं भवानन्दतर्कवागीशस्य सिद्धान्तलक्षणमिति। नैयायिकास्तु प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधं स्वीकुर्वन्ति। अतः चैत्रः तण्डुलं पचति इत्यत्र तण्डुलवृत्तिविक्लित्यवच्छिन्नव्यापारानुकूलकृत्याश्रयः

चैत्र इति शाब्दबोधो जायते। कौण्डभट्टानुसारमुक्तकर्मलक्षणं गौरवदोषग्रस्तमिति।[123] क्रियाजन्यफलाश्रयत्वं[124] कर्मणः लक्षणम्। वागीशस्य यत् कर्मणः सिद्धान्तलक्षणं विद्यते तत्र परवर्तिनः वैयाकरणाः विचिकित्सां प्रदर्शयन्ति। परसमवेतपदं परित्यज्य तत्र क्रियानधिकरणत्वं विशेषणं ददति वैयाकरणाः वा दार्शनिकाश्च।

तत्क्रियानधिकरणत्वे सति तत्क्रियावच्छेदकफलशालित्वम् कर्मत्वमिति।[125] अस्यार्थः यः क्रियायाः आश्रयो न भवति अथ च क्रियाजन्यस्य धात्वर्थता-वच्छेदकफलस्य आश्रयो भवति तस्यैव कर्म संज्ञा भवति। यथा "देवदत्तः नगरं गच्छति" इत्यत्र देवदत्तः गमनक्रियायाः आश्रयोऽस्ति। अतः धात्वर्थतावच्छेदकफलस्य संयोगस्य आश्रयत्वेऽपि तस्य कर्मसंज्ञा न भवति इति। इदं लक्षणं भवानन्दतर्कवागीशः न स्वीकरोति। भिन्नभिन्नवाक्येषु प्रयुक्तानि तिङन्तपदानि तत्र धातुतः उपस्थाप्याः याः याः क्रियाः तासां दृष्ट्या द्वितीयाविभक्तेः वा कर्मप्रत्ययानां पृथग् पृथग् अर्थस्य कल्पनया अनन्तशक्तिकल्पनापत्तेः। यथा विनयगोपालः ग्रामं गच्छत्यत्यत्र द्वितीयार्थः गमनक्रियाश्रयभिन्नः। खगः वृक्षं त्यजति इत्यादौ द्वितीयार्थः त्यागक्रियाश्रयभिन्नः। इत्थं क्रियाव्यक्तिभेदेन द्वितीयार्थस्यानेकत्वापत्तिः। मल्लो मल्लं गच्छति अत्र एकः मल्लः अपरमल्लं प्रतिगच्छति अत्र अपरमल्लस्य कर्मसंज्ञा न भवितुमर्हति। यतोहि मल्लयुद्धे कर्तृसंज्ञको मल्लः कर्मसंज्ञकश्च मल्लश्चापि गमनक्रियायाः आश्रयो भवति। अतः कर्मलक्षणे "तत्क्रियानधिकरणत्वे[126] सति" पदस्योपादाने अभीष्टकर्मसंज्ञके मल्ले उक्तलक्षणस्याव्याप्तिर्भविष्यति। नागेशभट्टोऽपि अत्राव्याप्तिदोषं स्वीकरोति। तैरुच्यते– "तन्न। 'काशीं गच्छन् पथि मृतः' इत्यादौ काश्याः, काशीं गच्छति न प्रयागम् इत्यादौ प्रयागस्य, ग्रामं न गच्छति इत्यादौ ग्रामस्य च तादृशफलशालित्वाभावाद् एतस्य लक्षणस्य अत्र सर्वत्र अव्याप्तेः।"[127] तथाचेदं वक्तुं शक्यते यत् प्रकृतलक्षणमव्याप्तिदोषग्रस्तमिति।

प्राचीननैयायिकानां नये धात्वर्थः केवलव्यापारः[128] द्वितीयाविभक्त्यर्थः फलं राजगोपालः विद्यालयं गच्छतीत्यत्र गम् धात्वर्थः पादप्रक्षेपादिव्यापारः द्वितीयान्तपदं विद्यालयमित्यनेन विद्यालयवृत्तिसंयोगः इत्यस्य बोधो भवति। खगः वृक्षं त्यजति इत्यत्र त्यज् धात्वर्थः स्पन्दनम् वृक्षपदोत्तर-अम्विभक्त्यर्थः विभागः, तथा च वृक्षवृत्तिविभागजनकस्पन्दनानुकूलकृतिमान् खगः इति शाब्दबोधः। ग्रामो गम्यते, ग्रामस्त्यज्यते इत्यत्र गमनम्, त्यागश्च व्यापारः स च गम्त्यजधात्वर्थौ संयोगरूपं फलं विभागरूपं फलञ्च यक्+त=प्रत्ययार्थः। प्राचीननैयायिकानां नये फलं न धात्वर्थतावच्छेदकमिति। कुत्रचित् द्वितीयान्तपदाभावे वा कर्मप्रत्ययाभावे अनादितात्पर्यवती लक्षणा स्वीक्रियते। तया लक्षणया संयोगावच्छिन्नगमनं गमधातोः अर्थः वा विभागावच्छिन्नव्यापारः त्यज्धात्वर्थ इति। प्राचीननैयायिकानां नये तु परसमवेततत्तद्

धात्वर्थान्वयिफलविशेषशालित्वं तत्तद्धात्वर्थकर्मत्वमिति।[129]

अभीष्टकर्मकारकात् भिन्नकर्तरि समवायसम्बन्धेन वृत्तिः या क्रिया तादृशक्रियान्वयिफलविशेषस्य यः आश्रयः तस्य कर्मसंज्ञा भवति। परसमवेतक्रिया-जन्यफलशालित्वम् कर्मत्वमिति लक्षणन्तु पूर्वमुक्तमिति तल्लक्षणन्तु भिन्नमिति।

परसमवेततत्तद्धात्वर्थान्वयिफलविशेषशालित्वं कर्मणः[130] लक्षणम् अस्मिन् लक्षणे फलस्य विशेषणं धात्वर्थान्वयि विद्यते।

प्रयागात् काशीं गच्छति विनोदः इत्यत्र उत्तरदेशकाश्यामेव प्रकृतकर्मलक्षणस्य समन्वयो भवति। यतोहि प्राचीननये गम्धात्वर्थः गमनव्यापारः तस्य द्वितीयार्थे संयोगेऽन्वयो भवति। विभागरूपफलविशेषस्य उक्तव्यापारेऽन्वयो न भवति। अतः संयोगस्य आश्रया काशी एव विद्यते। तत्रैव कर्मसंज्ञा अभिहिता इति। एवं सर्वत्रैव लक्षणसमन्वयात् न कुत्रापि दोषः इति। प्रकृतकर्मलक्षणन्तु प्राचीननैयायिकाः स्वीकुर्वन्ति। प्राञ्चस्तु इत्याहुः[131] इत्यनेन अस्मिन् लक्षणे अस्वारस्यं वागीशेन द्योतितमिति।

अत्र कारकचक्रस्य टीकाकारैः जयरामैरुक्तम्–

"तन्न विभागाद्यवच्छिन्नस्पन्दशाब्दत्वस्य जन्यतावच्छेदकत्वे तादृशस्पन्दे शक्तेर्दुवारत्वादिति।"[132]

भवानन्दमते कर्म त्रिविधम्[133] प्राप्यं, विकार्य्यं, निर्वत्यञ्चेति। भर्तृहरिरपि "कर्तुरीप्सिततमं कर्म"[134] इति सूत्रमाश्रित्य निर्वर्त्यं विकार्यं प्राप्यञ्चेति त्रिविधं कर्म मन्यते। "तथायुक्तं[135] चानीप्सिततम्" इति सूत्रमाधारीकृत्य कर्मणः चतुर्थं भेदं स्वीकृतवान्–

निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम्।
तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम्।।[136]

गमनादिक्रियाजन्यं यत् संयोगादिफलं तस्याश्रयं कर्म प्राप्यकर्म इति। यथा विनयगोपालः ग्रामं गच्छति इत्यत्र विनयगोपालस्य गमनक्रियया यत् संयोगरूपं धात्वर्थतावच्छेदकं फलमुत्पद्यते तस्याश्रयो ग्रामो विद्यते। अतः ग्रामप्राप्यकर्म इति। भर्तृहरिणा उक्तम्–

क्रियागतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।।[137]

नगरमुपसर्पति इत्यत्र नगरस्य विस्तृतत्वात् अल्पपरिमाणवतः माधवगोपालः तं द्रष्टुं न शक्नोति। अतः नगरे उक्तविशेषस्य दर्शनाभावात् तत् निर्वर्त्यं वा विकार्यं

कर्म नापितु प्राप्यकर्म एव इति हेलाराजैरुक्तमिति। वागीशस्य प्राप्यकर्मणः स्वरूपं भर्तृहरिस्वीकृतप्राप्यकर्मवदेव विद्यते।

विकार्यं कर्म–

यदा काचिद् क्रिया पदार्थवृत्तिधर्मविनाशकं फलमुत्पादयति। तदा स च पदार्थो विकार्यं कर्म[138] भवति। अत एव भवानन्दैः भणितम्– "क्रिया यद्धर्मनाशकं फलं जनयति तद्विकार्यम्"। यथा "काष्ठं लुनाति" इत्यत्र लूञ् धात्वर्थः छिन्नभिन्नकरणक्रिया काष्ठे विद्यमानानामवयवानां संयोगरूपधर्मं नाशयति एवञ्च विभागरूपं फलञ्च जनयति। अतः काष्ठं विकार्यं कर्म इति। अत्र केचन आशङ्कन्ते यत् छिन्नभिन्नकरणक्रियातः काष्ठस्यैव नाशो भवति न तु तन्निष्ठस्य संयोगरूपस्य धर्मस्य। तर्हि कथं काष्ठं विकार्यं कर्म इति चेन्न। काष्ठपदमुक्तवाक्ये काष्ठावयवयेषु लाक्षणिकं, लूञ् धात्वर्थः आरम्भकसंयोगनाशकविभागजनककुठारनिष्ठव्यापारः। तथाचात्र शाब्दबोधस्याकारः काष्ठावयववृत्तिः तद् आरम्भकसंयोगः तन्नाशकविभाग-जनककुठारनिष्ठव्यापारानुकूलकृतिमान् अयमिति। यथा भवानन्दः विकार्यकर्मणः लक्षणं करोति तथैव भर्तृहरिणा अप्युक्तम्–

प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्।[139]
किञ्चित् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्॥

अर्थात् कयाचित् क्रियया कस्यचिद् द्रव्यस्य स्वरूपं नष्टो भवति अथवा कस्यचिद् द्रव्यस्य, गुणस्य वा पूर्वरूपस्य परिवर्तनं भवति तदा तद्द्रव्यं वा स च गुणः विकार्यं कर्म इति। यथा "काष्ठानि भस्म करोति" "सुवर्णं कुण्डले भवतः" इत्यत्र काष्ठं, सुवर्णं वा विकार्यं कर्म इति। भवानन्दमते प्राप्यं कर्म, विकार्यञ्च[140] कर्म मुख्यकर्म इति कारकत्वात् क्रियानिष्पत्तौ कारणं भूत्वा क्रियया सह सम्बद्धत्वात् क्रियाजन्यफलाश्रयत्वाच्च। परन्तु भर्तृहरिमते प्राप्यं कर्म, विकार्यं कर्म, निर्वत्यञ्च कर्म त्रीण्यपि मुख्यानि कर्माणि सन्ति। एतेषां कर्मणामन्तर्भावः इष्टतमेषु कारकेषु भवति। तथा च इदं वक्तुं शक्यते यत् वैयाकरणानां नये त्रयाणां कर्मणां मुख्यत्वं[141] विद्यत इति।

निर्वर्त्यं कर्म–

क्रियया यद् निष्पाद्यं[142] भवति तदेव कर्म निर्वर्त्यं कर्म इति। यथा "कटं करोति" इत्यत्र कटनिष्पाद्यं भवति अत एव तत् निर्वर्त्यं कर्म इति। भर्तृहरिणा उक्तं यत् अस्तित्ववत्यः प्रकृतेः उपादानरूपस्य विवक्षां विनैव निष्पाद्यमानस्य पदार्थस्य कथनं भवति तन्निष्पाद्यं[143] कर्म इति।

यथा कटं करोति इत्यादौ कटस्य प्रकृतेः तृणविशेषस्य काशाख्य-स्योपादनस्यास्तित्वं भवति। अत्र तृणविशेषस्योपादनत्वेन विवक्षा नास्ति। अतः तृणविशेषात् यन्निष्पन्नः कटः स च निर्वर्त्यं कर्म इति। यस्य निष्पाद्यपदार्थस्य प्रकृतेः अस्तित्वं न भवति तमपि निर्वर्त्यं कर्म मन्यते।[144] यथा "संयोगं जनयति," "विभागं जनयति" इत्यादौ संयोगविभागौ निर्वर्त्ये कर्मणी स्तः। असत्कार्यवादिनां न्यायवैशेषिकानां सत्कार्यवादिनां सांख्यानाञ्च मतयोः निर्वर्त्यस्य कर्मणः उत्पत्तेः प्राक् स्थितौ मतभेदो वर्तते। तथापि क्रियायाः जायमानं पदार्थं निर्वर्त्यं कर्म मन्यते। भवानन्दस्तु महानैयायिकः अतः असत्कार्यवादमाश्रित्यैव निर्वर्त्यं कर्म स्वीकरोति। भवानन्दमते निर्वत्यं कर्म अप्रधानकर्म[145] वर्तते। भर्तृहरिमते तत्तु प्रधानमिति।[146] "कटं करोति" अत्र "करोति" इत्यनेन कृत्याश्रयस्यैव बोधो जायते। यतोहि नैयायिकानां नये कृधात्वर्थः कृतिः, कृधातुना फलावच्छिन्नव्यापारस्य बोधो न भवति। अतः धात्वर्थतावच्छेदकफलस्याश्रयः न कट इति। कटः साध्यरूपेण कृतेः विषयो भवति अतः कटरूपं निर्वर्त्यं कर्म अप्रधानम् भवति। एवं घटं करोति इत्यत्र धात्वर्थतावच्छेदकफलाश्रयत्वाभावात् घटस्तु अप्रधानं कर्म निर्वर्त्यमिति। यदि निष्पाद्यत्वं निर्वर्त्यकर्मणः लक्षणमुच्यते तदा "घटं पश्यति" अत्र दर्शनक्रियातः घटस्य निष्पत्तिर्न भवति। अतः घटं निर्वर्त्यं कर्म इति न मन्यते। स च प्राप्यं वा विकार्यमपि कर्म न भवितुर्महति। अत्र दृश्धातुः सविषयकस्य पदार्थस्य वाचकत्वात् गौणं सकर्मकम् वर्तते। पश्यति क्रियापदस्य कर्म यत् घटो विद्यते। स च दर्शनक्रियायाः विषयत्वात् अप्रधानकर्म इति। अत्र भवानन्दः आह–

"धात्वर्थविधेयत्वे निर्वर्त्यत्वे घटं पश्यति इत्यत्रातिरिक्तकर्मत्वापत्तिः"[147] इति। यद्युच्यते धात्वर्थविषयत्वं निर्वर्त्यत्वमिति तदा कटं करोतीत्यत्र वीरणं करोतीति प्रयोगापत्तिर्सम्भवति इति चेन्न। निर्वर्त्यत्वन्तु धात्वर्थविषयत्वमेव।[148] धात्वर्थविषयत्वन्तु उद्देश्योपादानीयविषयतातिरिक्तविषयत्वावच्छिन्नत्वे सति धात्वर्थविषयत्वमिति।[149] निर्वर्त्यकर्मोत्तरद्वितीयार्थः उत्पादकत्वम्। एवञ्च "तण्डुलान् ओदनं पचति" इत्यत्र ओदनोत्पादकः यस्तण्डुलनाशकः पाकः तदनुकूलकृतिमान्[150] इति शाब्दबोधोऽत्र भवति। "कुष्माण्डं शाकं करोति" "दुग्धं दधि करोति" चेत्यादौ विकार्यकर्मोत्तर-द्वितीयार्थः नाशकत्वं निर्वर्त्यकर्मोत्तरद्वितीयार्थः उत्पादकत्वमिति तथाच शाकोत्पादिका या तण्डुलनाशिका कृतिः तदाश्रयोऽयमिति, दध्योत्पादिका दुग्धनाशिका या कृतिः तदाश्रयोऽयमिति च बोधो जायत इति। भवानन्दतर्कवागीशस्य ग्रन्थाभिप्रायोऽयं यत्–

उद्देश्यताख्य[151]कृतिविषयताभिन्नत्वे सति उपादानत्वाख्यकृतिविषयताभिन्नत्वे सति धात्वर्थविषयत्वमेव निर्वत्यकर्मणः लक्षणम्। अर्थात् निर्वर्त्यं कर्म तदेव विद्यते यस्मिन् कृत्युद्देश्यताख्या वा कृत्युपादानताख्यविषयतातिरिक्ता विषयता विद्यते।

धात्वर्थविषयता इत्यत्र धातुपदेन तदेव धातुः विवक्षितो विद्यते। यः फलावच्छिन्नव्यापारस्य बोधको नास्ति। अपितु ज्ञानम्, इच्छा, कृतिः वा द्वेषश्चेत्यादीनां सविषयकपदार्थानां वाचकं स्यात् अत एव कारकचक्रे प्रतिपादितं विद्यते।

"सविषयकपदार्थाभिधायिजानात्यादीनान्तु[152] विषयित्वरूपविभक्त्यर्थद्वारा नामार्थान्वयित्वमेव गौणसकर्मकत्वमिति।" स्तोकं पचति इत्यत्र स्तोकं क्रियाविशेषणं विद्यते तथापि धात्वर्थतावच्छेदकफलस्य आश्रयत्वाभावात् तत्र द्वितीया असाधु इति चेन्न तत्र द्वितीयाविभक्तिस्तु साधुत्वार्थकमिति। इत्थं जयरामः जगदीशतर्कालङ्कारः, जयकृष्णतर्कालङ्कारश्च अपि स्वीकुर्वन्ति। स्तोकं पचति अत्र स्तोके न कारकत्वं विद्यते। यतोहि अभेदातिरिक्तविभक्त्यर्थद्वाराक्रियान्वयित्वं मुख्यभाक्तसाधारणं कारकत्वम्। अथवा कर्तृत्वकर्मत्वादिषट्कान्यतमद्वारा क्रियान्वयित्वं कारकस्य लक्षणम्।

जगदीशेन कर्मत्वस्य स्वरूपमधोलिखितरूपेण प्रतिपादितम्

यङन्तधातोरर्थो यस्तिङा स्वार्थेऽनुभाव्यते।
यत्रासौ कर्मता नाम कारकं कर्तृतेतरः॥[153]

अर्थात् यङन्तयद्धातूपस्थाप्ययादृशार्थप्रकारकान्वयबोधो जायते कर्तृताभिन्नस्तादृशोऽर्थः तद्धातूपस्थाप्यतादृशक्रियाकर्मत्वम्। अथवा यद्धातूपस्थाप्य यद्धर्मावच्छिन्न विशेष्यकयादृशार्थप्रकारकशाब्दबोधजनिका द्वितीयाविभक्तिः, तद्धर्मवत्त्वं तादृशधात्वर्थनिरूपितकर्मत्वम्।[154] गदाधरेण स्वग्रन्थे कर्मत्वविषये यत् प्रतिपादितम्। तन्निरूप्यते– "कर्मणि द्वितीया"[155] इत्यत्र कर्मपदं धर्मपरं सप्तम्यर्थः वाचकत्वमिति।[156] एवञ्च कर्मत्ववाचिका द्वितीयाविभक्तिरिति शाब्दबोधः। कर्मत्वञ्च क्रियाजन्यफलशालित्वम्। तत्र धात्वर्थः क्रियाजन्यत्वं संसर्गमर्यादया भासते फलमात्रं द्वितीयार्थः।[157] नव्यमते तु संयोगादिरूपफलविशेषावच्छिन्नस्पन्दः गम्याद्यर्थः, द्वितीयार्थः आधेयत्वमिति।[158] न च "कर्मणि द्वितीया" इति सूत्रविरोधो भविष्यति इति वाच्यम्। अस्मिन् मते कर्मणि इत्यस्य तात्पर्यन्तु फलनिष्ठाधेयत्वान्वयिनि इति। अत्रैव कर्मणः लक्षणन्तु तद्धात्वर्थतावच्छेदकफलशालित्वमेव तद्धातुकर्मत्वमिति। परे तु मते समवायसम्बन्धावच्छिन्नाधेयता एव द्वितीयार्थ इति वृत्त्यनियामक सम्बन्धस्य अभावप्रतियोगिता वच्छेदकत्वे[159] आधेयत्वं संसर्गो विभक्तेः संख्यामात्रमर्थः[160] फलावच्छिन्नो व्यापारः धात्वर्थः इत्यप्याहुः। फलव्यापारयोः पृथग् धात्वर्थतामते आश्रयत्वमेव आख्यातार्थः[161] इति। घटं जानाति इत्यत्र प्राचीनमते[162] द्वितीयार्थः विषयत्वमिति। "पर्वते वह्निमनुमिनोति चैत्रः" इत्यत्र विधेयत्वं विधेयित्वं वा द्वितीयार्थः।[163] गदाधरभट्टाचार्येणापि कर्मणः त्रिविधत्वं प्रतिपादितम् प्राप्यं, प्रकृतिः, विकृतिश्च। क्रियाजन्यफलशालिकर्म प्राप्यं कर्म यथोक्तम्–

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते॥[164]

क्रियानिष्पाद्यत्वं यत् तद् कर्म विकृतिरूपम्। यथा पाकादेः ओदनादिः। यस्य असत्त्वरूपविकारेण ओदनादिलक्षणविकारो जायते तत् प्रकृतिकर्म। यथा पाकादेः तण्डुलादिः। कुत्रचित् नाशकत्वमेव[165] द्वितीयार्थो भवति। नव्यास्तु फलमिव भेदोऽपि द्वितीयार्थः।[166] द्वितीयार्थः आश्रयत्वमिति[167] वैयाकरणाः वदन्ति। तन्न आश्रयतात्वविशिष्टस्याश्रयत्वस्य शक्यतावच्छेदकत्वे गौरवात् आश्रतात्वावच्छिन्नाश्रयत्वस्य वाच्यत्वं न सम्भवति। केचन कर्मत्वस्याखण्डोपाधिरूपं स्वीकुर्वन्ति। तच्च परसमवेतक्रियाजन्यफलशालित्वसमनियतम्।[168] तन्न प्रकृतधात्वर्थक्रियाजन्यस्य प्रकृतधात्वर्थतावच्छेदकस्य वा फलस्याश्रयत्वेन क्लृप्तेनैव कर्मत्वव्यवहारोपपत्तेः अखण्डोपाधौ तत्र मानाभावः। पदवाक्यरत्नाकरमते परसमवेतक्रियाविशेषणीभूतधात्वर्थफलाश्रयत्वं कर्मत्वम् इति। धात्वर्थतावच्छेदकफलाश्रयतया इच्छाविषयत्वं कर्मत्वम्। इच्छार्थकधातुसमभिव्याहृतद्वितीयायाः मुख्यविशेष्यत्वरूपं कर्मत्वमर्थः।[169] एवं रीत्या विविधमतमाश्रित्य कर्मत्वस्वरूपं मया प्रतिपादितम्।

करणकारकस्य त्रीणि लक्षणानि भवानन्देन निरूपितानि इति,

1. कारकान्तरेऽचरितार्थत्वे सति हेतुत्वं करणस्य लक्षणम्।

अथवा

फलायोगव्यवच्छिन्नकारणत्वं करणस्य लक्षणम्।

2. व्यापारवत्कारणं करणम्।

3. कारकत्वे सति कर्तृव्यापारविषयत्वं करणस्य लक्षणम्।

कर्तृकरणयोस्तृतीया इति पाणिनीयानुशासनात् क्रियान्वयिकर्तृत्वं करणत्वञ्च तृतीयार्थः। कर्तृत्वं नाम कृतिः, चैत्रः पचति इत्यत्र आख्यातार्थः कृतिः सा च क्रियाविशेष्यत्वं भवति। विक्लित्यनुकूलव्यापारानुकूलकृतिमान् एकत्ववाँश्च चैत्र इति बोधो भवति। चैत्रेण तण्डुलः पच्यते इत्यत्र कर्माख्यातस्थले चैत्रवृतिकृतिजन्यपाकजन्यविक्लित्याश्रयः तण्डुलः इति शाब्दबोधो जायते। चैत्रेण शय्यते इति भावाख्यातस्थले चैत्रवृत्तिकृत्तिजन्यशयनव्यापारः इति शाब्दबोधः अत्रापि कृतेः क्रियाविशेषणत्वं प्राप्तम्। यत्तु मते कर्माख्यातस्थलेऽपि आख्यातार्थः कृतिः तृतीयार्थः आधेयत्वं तृतीयार्थभूताधेयत्वस्य कृतिविशेषणतयान्वयः कृतेश्च धात्वर्थविशेषणतयान्वयः अत्रोच्यते एवं तृतीयायाः आधेयत्वार्थकत्वकल्पनमधिकं तेन गौरवं भविष्यति इति चेन्न चैत्रेण ज्ञायते इत्यत्र तृतीयार्थः आधेयत्वं भवत्येव अत एव चैत्रवृत्तिज्ञानमिति

एवं चैत्रेण गम्यते इत्यत्रापि तृतीयार्थः आधेयत्वमत्रापि चैत्रवृत्तिसंयोगानुकूलव्यापारः इति शाब्दबोधो भवति।

चैत्रेण पच्यते इत्यत्र तृतीयार्थः एव कृतिः न तु आख्यातार्थः कृतौ चैत्रादेः सम्बन्ध एवाधेयत्वमिति स्वीकारे एव शाब्दबोधसम्भवे तृतीयायाः आधेयत्वे शक्तिस्वीकारे न किमपि मानम्। अत्रोच्यते तृतीयार्थः कृतिरिति स्वीकारे "चैत्रेण पच्यते न मैत्रेण" इत्यत्र मैत्रपदोत्तरतृतीयार्थः यदि मैत्रीयकृतिः तदभावस्य पाके एव अन्वयः स्यात्। कृतेश्च समवायेन अभावो मैत्रकर्तृकपाकेऽपि अस्त्येव यतोहि समवायेन कृतेः आत्ममात्रवृत्तित्वात्। अतः मैत्रकर्तृकपाकसत्त्वेऽपि "मैत्रेण न पच्यते" इति प्रयोगापत्तिः स्यात्। यदि चैत्रकर्तृकपाके मैत्रीयकृतेः जन्यतासम्बन्धेन अभावः उच्येत तदपि न सम्यक् जन्यतासम्बन्धस्य वृत्त्यनियामकत्वाद भावीयप्रतियोगिताच्छेदकत्वमेव न सम्भवति। तथा च न कृतिः तृतीयार्थः अपितु आधेयत्वमेव। तन्न "चैत्रेण पक्कम्" इत्यत्र आख्यातमेव नास्ति। अत्र कृत्प्रत्ययस्तु कर्मवाचकः न तु कृतिवाचकः। अतः अत्र तृतीयार्थः कृतिरिति अवश्यं स्वीकार्यं गत्यन्तराविरहात्। तथा च सर्वत्र कर्तृपदोत्तरतृतीयायाः कृतिस्वीकारे लाघवात् चैत्रेण पच्यते इत्यत्रापि तृतीयार्थः कृतिरिति। "काष्ठेन पच्यते" "स्थाल्या पच्यते" इत्यत्र अचेतनकाष्ठे अचेतनस्थाल्यां कृत्याश्रयत्वाभावात् व्यापारे एव प्राचीनमते आख्यातस्य लक्षणा स्वीक्रियते नवीनमते तु व्यापाराश्रये वा लक्षणा "चैत्रेण ज्ञायते" "चैत्रेण इष्यते" "चैत्रेण गम्यते" इत्यादौ आश्रयत्वरूपे कर्तृत्वे, आधेयत्वरूपे कर्तृमत्त्वे वा लक्षणा स्वीक्रियते, चैत्रकर्तृकज्ञानविषयताश्रयः वा चैत्रवृत्तिज्ञानविषयताश्रयः चैत्रकर्तृक इच्छाविषयताश्रयः, वा चैत्रवृत्तीच्छाविषयताश्रयः, चैत्रकर्तृकगमनव्यापारजन्यसंयोगाश्रयः, चैत्रवृत्तिगमनव्यापारजन्यसंयोगाश्रयो वेति शाब्दबोधो भवति। घटेन नश्यते इत्यत्र प्रतियोगित्वरूपे कर्तृत्वेऽनुयोगित्वरूपे कर्तृमत्त्वे वा लक्षणा। अत्र घटनिष्ठ-प्रतियोगितानिरूपको नाशः इति शाब्दबोधो भवति। केषाञ्चन मते कृतिजन्यत्वं, कृतिविषयत्वं वा तृतीयार्थः तथा च "चैत्रेण पच्यते" "चैत्रेण तण्डुलः पच्यते" इत्यत्र चैत्रवृत्तिकृतिजन्यत्वविशिष्टपाकजन्यविक्लित्याश्रयः तण्डुलः, चैत्रवृत्तिकृति-विषयताविशिष्टपाकजन्यविक्लित्याश्रयो तण्डुलो वा, चैत्रवृत्तिकृतिजन्यत्वविशिष्ट-पाकजन्यविक्लित्याश्रयः तण्डुलः यद्वा चैत्रवृत्तिकृतिजन्यत्वविशिष्टपाकजन्य-विक्लित्याश्रयः तण्डुलः इति शाब्दः। काष्ठेन पचति इत्यत्र करणत्वं तृतीयार्थः तच्च कर्तृव्यापाराधीनव्यापारवत्कारणत्वम्। एवञ्चात्र काष्ठकर्तृव्यापाराधीनव्या-पारवत्कारणकपाकानुकूलकृतिमानिति बोधः। "धनेन कुलम्" "विद्यया यशः" इत्यत्र हेतौ तृतीया भवति, अत्र धनहेतुकं कुलम्, विद्याहेतुकयशः इति बोधः इति। "पर्वतः धूमेन वह्निमान्" इत्यत्र क्रियायोगाभावात् हेतुतृतीयैव। अत्र ज्ञापकज्ञानविषयत्वरूपं हेतुत्वं, ज्ञानज्ञाप्यत्वरूपं वा हेतुमत्त्वं तृतीयार्थः।

धूमज्ञापकज्ञानविषयताक वह्निमदभिन्नः पर्वतः वा धूमज्ञानज्ञाप्यवह्निमदभिन्नः पर्वतः इति बोधः।

सहार्थयोगे साहित्यप्रतियोगिवाचकपदात् तृतीया भवति। "पुत्रेण सहागतः" अत्र पुत्रकर्तृकागमनसमानकालीनागमनकर्तृत्वं पुरुषे प्रतीयते। "दध्ना सह ओदनो भुज्यते" इत्यत्र दधिकर्मकभोजनसमानकालीनभोजनकर्मत्वमोदने प्रतीयते।

इत्थं भूतलक्षणे इत्यनेन लक्षणभूतजटादिवाचकपदात् तृतीया भवति। यथा "जटाभिस्तापसः" इत्यत्र जटोपलक्षितः तापसः इति बोधः। अत्र लक्षणत्वञ्च व्यावर्तकत्वम्, तच्च विशेष्यतावच्छेदकसमानाधिकरणाभावाऽप्रतियोगित्वम्, तदाश्रयश्च धर्मो द्विविधः विशेषणमुपलक्षणञ्च। विद्यमानं सद् व्यावर्तकं विशेषणम्। यथा गौरः चैत्रः इत्यत्र गौरवर्णः विद्यमानं सद् व्यावर्तकं भवति। अविद्यमानं सद् व्यावर्तकमुपलक्षणम् यथा तापसादेः कालान्तरीणजटादिकम्।

कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रस्य तात्पर्यमिदं वर्तते यत् कर्त्ता स्वक्रियायाः कारणभूतकर्मद्वारा यस्य कारकस्य सम्बद्धकर्तुमिच्छति तस्य सम्प्रदानसंज्ञा भवतीति भवानन्दवागीशो वदति। तदनुसारं सम्प्रदानस्येदं लक्षणं भवति।

तत्क्रियाकारणीभूतकर्मजन्यभागित्वेन उद्देश्यत्वं सम्प्रदानत्वम् यथा "विप्राय गां ददाति" इत्यत्र दातुः दानक्रियां प्रति गौः कारणमस्ति। यतोहि गोकारणेनैव दानक्रियायाः निष्पत्तिर्भवति। दानक्रियां प्रति स्वस्वत्वध्वंसपूर्वकपरस्वत्वरूपफलस्योत्पत्तिर्भवति। तत्र फलाश्रयरूपेण विप्रः दातुः उद्देश्यं भवति। अतः विप्रस्य सम्प्रदानसंज्ञा भवति।

अत्र विप्रविषयकगोजन्यफलप्रकारकेच्छापूर्वकगोवृत्तिस्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागानुकूलकृतिमान् इति शाब्दबोधः। कर्मजन्यपदे अदृष्टाद्वारकत्वविशेषणोपादाने अदृष्टाद्वारकतत्क्रियाकारणीभूतकर्मजन्यफलभागित्वेन उद्देश्यत्वं सम्प्रदानत्वम्। मतान्तरे सम्प्रदानस्य लक्षणं तत्क्रियाकारणीभूतकर्मजन्यधात्वर्थतावच्छेकफलभागित्वेन उद्देश्यत्वं सम्प्रदानत्वम्। त्यागजन्यस्वत्वजनकस्वीकाररवत्त्वं सम्प्रदानत्वम्। गदाधरभट्टाचार्यैरुच्यते 'सम्प्रदानत्वं च मुख्यभाक्तसाधारणं क्रियाकर्मसम्बन्धितया कर्त्रऽभिप्रेतत्वम्। क्रियाकर्मत्वम् क्रियाजन्यफलशालित्वम्। तद्वता सम्बन्धश्च तन्निष्ठफलभागित्वमेव, तथा च क्रियाजन्यफलभागितया कर्तुरिच्छाविषयत्वमिति।

पत्ये शेते इत्यत्र धात्वर्थः शयनं धात्वर्थतावच्छेदकशयनत्वस्य आश्रयत्वादभिन्नप्रीतिरूपफलस्याश्रयत्वं पतावेव विद्यते। अतः पतेः सम्प्रदानत्वं भवति अत्र पतेः गौणसम्प्रदानत्वं भवति। "वृक्षायोदकं सिञ्चति" इत्यत्र द्रवद्रव्यक्रियानुकूलव्यापार

एव धात्वर्थ इति वृक्षवृत्तिजलसंयोगो न धात्वर्थतावच्छेदक इति तादृशधात्वर्थता-नवच्छेदकीभूतवृक्षवृत्तिजलसंयोगरूपफलभागितया सम्प्रदानत्वमिति। एवञ्च धात्वर्थतानवच्छेदकफलभागितयोद्देश्यत्वं सम्प्रदानत्वमिति।

"रूच्यर्थानां प्रीयमाणः" इत्यनुशासनेन प्रीतिजनकतारूपरुच्यर्थघटकप्रीतिभागिनः सम्प्रदानसंज्ञा भवति। "नारदाय कलहः रोचते" इत्यत्र प्रीतिजनकतारूपो यो रुच्यर्थः तद् घटकप्रीतेः भागिनः नारदस्य सम्प्रदानसंज्ञा भवति। तथा च नारदाश्रितप्रीति-जनकताश्रयः कलहः इति शाब्दबोधः। एवं कुध्रद्रुहादिषु स्पृहे, उत्तमर्णे चेत्यादिष्वर्थेषु नमः स्वस्तिस्वाहादियोगे च चतुर्थी भवति।

ध्रुवमपायेऽपादानमिति सूत्रानुशासनात् अपायो विश्लेषः, तस्मिन् साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात्। भवानन्दतर्कवागीशेनापादानकारकस्य लक्षणद्वयं निरूपितमिति।

1. परकीयक्रियाजन्यविभागाश्रयत्वम्।
2. विभागावधित्वमपादानत्वम्

तत्राद्यलक्षणे परिष्कारं कुर्वन्नाह भवानन्दः परकीयक्रियाजन्यधात्वर्थता-वच्छेदकविभागाश्रयत्वम् अपादानत्वम्। गदाधरस्तु अपादानत्वञ्च स्वनिष्ठभेदप्रतियोगिता-वच्छेदकीभूतक्रियाजन्यविभागाश्रयत्वम्। भेदप्रतियोगितावच्छेदकत्वे विभागे च शक्तिद्वयम्। वृक्षात् पर्णं पततीत्यत्र वृक्षनिष्ठभेदप्रतियोगितावच्छेदकतन्निष्ठविभागजनकपतनाश्रयः पर्णमिति बोधः। वृक्षाद् विभजते इत्यत्र वृक्षावधिकत्वं विभागे प्रतीयते। अवधित्वादिकञ्च स्वरूपसम्बन्धविशेषः। यद्वा विभागोऽधिकरणता प्रयोजकत्वञ्च वृक्षात् पतति इत्यत्र पञ्चम्यर्थः। "भीत्रार्थानां भयहेतुः" इत्यनेन व्याघ्राद् विभेति इत्यत्र आपादानसंज्ञा भवति। भयञ्च परतोऽनिष्टसंभावना, त्राणं चानिष्टनिवृत्त्यऽनुकूलो व्यापारः, व्याघ्रप्रयोज्यानिष्टसंभावनाश्रयः इति बोधः। "यवेभ्यो गां वारयति" "कूपादन्धं वारयति" इत्यत्र वारणार्थानामित्यनेन यवकूपादेरपादानत्वम्। गवीच्छाविषयो यो गलाधस्संयोगः गवादिनिष्ठतत्तत्फलकव्यापारविशेषकर्तृत्वाभावानुकूलकृतिमान्, अभिमुखदेशगमनत्वादिना कूपगमनादेरिच्छाविषयो यः उत्तरदेशसंयोगः अन्धनिष्ठ तत्तत्फलकव्यापारविशेषकर्तृत्वाभावानुकूलकृतिमान् इति च बोधो भवति। स्वसम्बन्धविवक्षायां चैत्रस्येदं पदबोध्ये चैत्रप्रतियोगिकस्वत्वबोधकत्वं कस्यापि कारकविभक्तेः नास्ति प्रसक्तिः अतः षष्ठी भवति। जात्यादिविशेषणविशिष्ट-यद्धर्मावच्छिन्नस्य जात्यादिविशेषणशून्यतद्धर्मावच्छिन्नव्यावृत्तत्वविशिष्टविधेयवत्तया प्रतिपादनं क्रियते। तद्धर्मावच्छिन्नवाचकपदात् निर्धारणे षष्ठी विधीयते। तथाच "नराणां क्षत्रियः शूरः" इत्यत्र क्षत्रियत्वविशेषणविशिष्टनरत्वावच्छिन्नस्य

क्षत्रियत्वविशेषणशून्यनरत्वावच्छिन्नव्यावृत्तशूरत्ववत्तया प्रतिपादनं क्रियते। अत एव नरादिपदात् षष्ठी वा सप्तमी भवति। नराभिन्नशूराभिन्नः क्षत्रियः इत्यपि शाब्दबोधं केचन वर्णयन्ति। "द्रव्याणां क्षितिपाथसी रसवती" इत्यत्र व्यावृतत्त्वं षष्ठ्यर्थः रसवदन्योन्याभावे द्रव्यस्य भेदद्वयविशिष्टद्रव्यत्वादिव्यापकतामात्रसम्बन्धेनान्वयः।

आधारस्यैवाधिकरणत्वादधिकरणे च सूत्रकृता सप्तम्या विहितत्वात् गदाधेरेणोच्यते आधारसप्तम्या आधेयत्वमर्थस्तस्य क्रियायामन्वयः, आधाराधेयभावश्च न संयोगादिरूपसम्बन्धात्मकः अपितु पदार्थान्तरमेव स च सम्बन्धविशेषावच्छिन्नः भवानन्दमते अधिकरणता, आधेयता च प्रतियोगितावत् अनुयोगितावत् स्वरूपसम्बन्धविशेषः। एकदेशीमते अधिकरणता सप्तपदार्थातिरिक्तः पदार्थः इति। भर्तृहरिमते कर्तृकर्मान्यतरद्वारा क्रियाश्रयत्वे सति तत्क्रियोपकारकत्वमधिकरणत्वम्। भवानन्ददिशा परम्परया क्रियाश्रयत्वम् अधिकरणस्य लक्षणम्। "चर्मणि द्वीपिनं हन्ति" इत्यत्र "निमित्तात्कर्मयोगे" इत्यनेन सप्तमीप्रकृत्यर्थचर्मादेर्हननादिक्रियानिमित्तत्वं बोधयति।

अभिमुखीकरणेच्छाविषयत्वं सम्बोधनप्रथमार्थः। चैत्र त्वया भुज्यताम् इत्यत्र वक्तुरव्यवहितशब्दजन्यबोधाश्रयत्वेनेच्छा प्रथमार्थः तस्याः इच्छायाः विषयतासम्बन्धेन प्रकृत्यर्थविशेषणतया भानम्।

स्त्रीप्रत्यया योनिमत्त्वरूपं स्त्रीत्वं बोधयन्ति। यथा अजा अश्वा, शूद्रा, श्यामा, चपला ब्राह्मणी गौरी, सुकेशी गर्भिणी चेति। व्कचित् स्त्रीप्रत्ययः स्त्रीत्वं भार्यात्वेन प्रकृत्यर्थविशेष्यतया बोधयति। यथा आचार्याणी, मनावी शूद्री इत्यादयः। भार्यात्वं सम्बन्धविशेषः। तद्धितप्रत्यया अपि नामप्रकृतिकाः व्कचित् प्रकृत्यर्थेन स्वार्थैकदेशस्य व्कचिच्च तेन स्वार्थस्यान्वयबोधं जनयन्ति इति गदाधरः। गार्गिः इत्यत्र तज्जन्यत्वमेव तदपत्यत्वमस्तीति जन्यत्वमपत्यैकदेश एव तच्च जन्यत्वमत्र गर्गनिरूपितमेव इति तत्र निरूपकत्वेन रूपेण गर्गस्यान्वयः, गर्गनिरूपितजन्यताश्रयो गार्गिः इति बोधः। तेन रक्तमित्यर्थे तद्धितप्रत्ययो भवति। तत्सम्बन्धाधीनतदीय-रूपारोपविषयत्वं तेन रक्तत्वमिति। पौषी रात्रिः इत्यत्र नक्षत्रयुक्तकालार्थे तद्धितः। पुष्ययुक्ता हि रात्रिः पौषी। पौषो मासः इत्यत्र पौर्णमासीघटितत्वावच्छिन्नः तद्धितार्थः। कापोतम् राजतम् जनता इत्यत्र समूहार्थविहितस्य तद्धितस्य पर्याप्तसमुदायत्वा-वच्छिन्नोऽर्थः, पर्याप्तौ प्रकृत्यर्थकपोतत्वाद्यवच्छिन्नस्यान्वयः।

धातुप्रकृतिकाश्च प्रत्ययाः लकारकृत्सन्यङ्णिच् प्रभृतयः भवन्ति। तत्र केचन सार्थकाः प्रत्ययाः केचन निरर्थकाश्च भवन्ति। "लः कर्मणि च भावे चाऽकर्मकेभ्यः" इति सूत्रेण लकाराणां शक्तिः कर्तृत्वे कर्मत्वे, भावत्वे च स्वीक्रियते। सन् प्रत्ययवाच्या इच्छा भवति। विशेष्यतासमानकर्तृकत्वोभयसम्बन्धेन धात्वर्थविशिष्टेच्छा

सन् प्रत्ययार्थः। चुरादौ णिच् स्वार्थे भवति। ण्यन्तप्रकरणे णिजर्थः हेतुकर्तृत्वं, तच्च स्वतन्त्रकर्तृप्रेरणा सा च अन्यनिष्ठकर्तृत्वस्य निर्वाहकव्यापार एव भवति।

लट्स्थानीयाख्यातेन वर्तमानकालः कृतिश्च लभ्यते। वर्तमानकालश्च शब्दप्रयोगाधिकरणवृत्तिकालत्वव्याप्यधर्मोपलक्षितकाल इति। तथाच लटः शक्तिस्तु शब्दप्रयोगाधिकरणवृत्तिकालत्वव्याप्यधर्मत्वेनोपलक्षणेनानुगतीकृततत्तक्षणदिनमासवर्षत्वावच्छिन्ने काले एव। जगदीशभट्टाचार्यैः लट्निरूपणप्रसङ्गे उच्यते

स्मयोगाभावतः स्वार्थातीतत्वानवबोधिका।
लडियं पदभेदेन द्विविधान्या अपीदृशः॥

यादृशतिङः स्मशब्दोपसन्धानाभावप्रयुक्तः स्वार्थातीतत्वबोधकत्वाभावस्तादृशी तिङ् लडुच्यते। एवञ्च यादृशानुपूर्व्यवच्छिन्ननिष्ठस्वाश्रयार्थधर्मिकातीतत्वप्रकारकान्वयबोधजनकत्वानधिकरणं स्मशब्दसमभिव्याहाराभावप्रयोज्यं तादृशानुपूर्वीमत्तिङ्त्वम्। क्वचिद्वर्तमानसामीप्यमपि लटोऽर्थः, तच्च द्विविधं वर्तमानक्षणाव्यवहितोत्तरकालावच्छेद्यत्वं, तादृशक्षणाव्यवहितप्राक्कालावच्छेद्यत्वञ्च तथाच चैत्रः कदा गमिष्यति इति जिज्ञासायाम् एष गच्छति इति कथनानन्तरं वर्तमानक्षणोत्तरकालावच्छेद्यगतिमांश्चैत्रः। चैत्रः कदा समागत इति जिज्ञासायाम् एष आगच्छति इत्युत्तरस्य वर्तमानक्षणाव्यवहितप्राक्कालावच्छेद्यागमनवान् इति।

पक्ष्यति इत्यत्राख्यातार्थकृतौ लृङर्थभविष्यत्त्वस्य अन्वयो भवति। भुवः उत्पत्यर्थकतया अनागतकालोत्पत्तिकत्वं भविष्यच्छब्दार्थः। या तिङ् क्रियाया धात्वर्थस्यातिपाते विगमे भाविकालावच्छेद्यत्वस्य बोधिका तादृशी लृट्। यद्वा यादृशानुपूर्वीप्रकारकज्ञानत्वं धात्वर्थविगमधर्मिकभाविकालावच्छेद्यत्वप्रकारकबोधजनकतावच्छेदकं तादृशानुपूर्वीमत्तिङत्वं लृटत्वमिति जगदीशभट्टाचार्याः। पक्ता इत्यत्र लुटः अनद्यतन भविष्यत्त्वमर्थः। अनद्यतनभविष्यत्त्वञ्च शब्दप्रयोगाधिकरणदिवसाऽवृत्तित्वे सति शब्दप्रयोगकालीनप्रागभावप्रतियोगित्वम्, शब्दप्रयोगाधिकरणदिवसध्वंसोत्पत्तिकत्वं वा। अत्र जगदीशभट्टाचार्यस्तु "धात्वर्थे श्वस्तनत्वस्य बोधिका तिङ् लुडुच्यते" तथाच यादृशानुपूर्वीप्रकारकज्ञानत्वं धात्वर्थधर्मिकश्वस्तनत्वप्रकारकान्वयबोधजनकतावच्छेदकं तादृशानुपूर्वीमत्तिङ्त्वं श्वस्तनत्वमिति। केचित्तु भविष्यत्त्वमेव लुडर्थः तन्न अनद्यतनत्वस्य लुडर्थत्वाभावे सति भविष्यत्त्वादिकमपि नाख्यातार्थः स्यात्, स्वरूपसद् भविष्यत्त्वादिकमेव लृदादिप्रत्ययस्य साधुतानियामकम्। अपाक्षीदित्यत्र लुङोऽतीतकालोऽर्थः, लुङर्थकालस्यापि आख्यातार्थकृतौ आधेयतासम्बन्धेनान्वयः। अथवा कालविशेषणतयैवातीतत्वमेव लुङर्थः। अतीतत्वस्य च आश्रयतासम्बन्धेन कृतावन्वयः। अतीतत्वञ्च वर्तमानध्वंसप्रतियोगित्वम्। गदाधरमते वर्तमानध्वंस एव लुङाद्यर्थस्तस्य प्रतियोगितासम्बन्धेन कृतावन्वयः। लङ्लकार-

स्यातीतत्ववदनद्यतनत्वमप्यर्थः। अनद्यतनत्वम् प्रकृतशब्दप्रयोगाधिकरणादिनाऽवृत्तित्वम्। यदा स्वातन्त्र्येण अनद्यतनत्वं न लङर्थः किन्तु शब्दप्रयोगाधिकरणदिनाद्यक्षण-वृत्तिध्वंसप्रतियोगित्वरूपमनद्यतनातीतत्वं विशिष्टमेव। लङः स्वरूपं निरूपयन्नाह–

या स्मयोगे विना धातोः शबन्तस्यार्थधर्मिके।
अतीतत्वग्रहे हेतुस्तादृशी तिङ् लङुच्यते॥

अर्थात् स्मशब्दस्य योगं विना शबन्तस्य धातोरर्थेऽतीतत्वस्यान्वयधीहेतुः यादृशी तिङ् लङ् उच्यते। स्मशब्दसमभिव्याहाराभावविशिष्टयादृशानुपूर्वीप्रकारकज्ञानत्वं शबन्तधात्वर्थधर्मिकातीतत्वप्रकारकशाब्दधीजनकतावच्छेदकं तादृशानुपूर्वीमत्तिङ्त्वं लङ्त्वम्।

अतीतत्वमनद्यतनत्वं परोक्षत्वञ्च लिटोऽर्थः। परोक्षत्वञ्च वक्तुः साक्षात्काराविषयत्वम्। केचित्तु वक्तृभिन्नकर्तृकत्वमेव परोक्षत्वम् इत्याहुः। अत्र जगदीशैरुक्तम्–

द्विरुक्तभिन्नधात्वर्थे स्वार्थस्यान्वयबोधने।
या न योग्या तादृशी तिङ् लिट्पदेनाभिधीयते॥

अर्थात् यादृशानुपूर्वीप्रकारकज्ञानत्वं द्विरुक्तान्यधर्मिकस्वार्थप्रकारकान्वयबोध-जनकतावच्छेदकं तादृशानुपूर्वीमत्तिङ्त्वं लिटत्वम्। अतीतकालः लिङर्थः "मनश्चचाल" इत्यत्र अतीतकाल इव धात्वर्थनिष्ठं परोक्षत्वमपि लिटोऽर्थः। तच्चातीन्द्रियत्वम्। तथा च "अतीतकालवृत्त्यतीन्द्रियचलवन्मन" इति शाब्दबोधो भवतीति।

यादृशानुपूर्वीप्रकारकज्ञानं स्वाश्रयवक्त्रनुमतत्वप्रकारकधात्वर्थविशेष्यकान्वयबोध-जनकं तादृशानुपूर्वीमदाख्यातत्वम् लोट् इति। "करोतु" "कुरुताम्" "कुर्वन्तु" इत्यत्र चैत्राद्युक्तत्वधीसहकृताः कृत्यादौ प्रकृत्यर्थे चैत्राद्यनुमतत्वं बोधयन्ति। 'पत्नी पचतु' इत्यत्र अनुज्ञैव लोडर्थः सा च कर्त्तुरिष्टत्वे सति वक्त्रनुमतत्वम्। "शूलं विश" इत्यत्र आज्ञा एव लोडर्थः। सा च वक्त्रनुमतत्वे सति कर्त्तुरनिष्टहेतुत्वम्। "पर्वतमप्युत्पाटयानि" "समुद्रमपि शोषयाणि" इत्यत्र लोडर्थः समर्थना, सा च पराशक्यधर्मिकस्वशक्यत्वाध्यवसायः इति। क्वचिद्वक्त्राशंसनमपि लोडर्थः।

विध्यन्वयबोधं प्रति समर्था लटो लोटश्च भिन्ना तिङ् लिङुच्यते। विधिस्तु प्रवर्तकचिकीर्षायां यत्प्रकारकज्ञानस्य हेतुत्वं स तथा, तादृशञ्च कृतिसाध्यत्वमिष्टसाधनत्वं बलवदनिष्टाननुबन्धित्वञ्च प्रत्येकमेव। "पङ्गुः समुद्रं न तरेत्" इत्यत्र कृतिसाध्यत्वं लिङर्थः। यत्तु कृतिसाध्यत्वबलवदनिष्टाजनकत्वाभ्यां विशिष्टमेवेष्टसाधनत्वं लिङर्थः।

इष्टसाधनत्वं बलवदनिष्टाननुबन्धित्वं कृतिसाध्यत्वञ्चेति विध्यर्थः। अस्मद्गुरुचरणास्तु बलवदनिष्टाननुबन्धित्वविशिष्टे साधनत्वविशिष्टकृतिसाध्यत्वं विध्यर्थः इति वदन्ति। लृङश्च भूतभविष्यत्कालयोः शक्तिर्बोध्या। यथा "सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत्" इति व्युत्पत्तिवादस्यात्यल्पाशयः।

ग्रन्थोऽयं न केवलं न्यायशास्त्रविदामेवोपकारक अपितु समस्तदार्शनिकानां व्याकरणादिशास्त्रविदामपि महदुपकारकः। यद्यपि एतस्य ग्रन्थस्य विविधाः टीकाः सन्ति। तेषु मुख्याः टीकाः अधोलिखिताः सन्ति।

1. जयानामिका महामहोपाध्यायजयदेवमिश्रविरचिता।
2. गूढ़ार्थतत्त्वालोकनामिका श्रीमहामहोपाध्यायधर्मदत्तझाविरचिता।
3. प्रकाशनामिका श्रीलक्ष्मीनाथझाविरचिता।
4. नौकानामिका श्रीखुद्दीझाविरचिता।
5. शास्त्रार्थकलानामिका श्रीवेणीमाधवशुक्लविरचिता।
6. दीपिकानामिका श्रीशिवदत्तमिश्रविरचिता।

एतदेपक्षया अतिसरला सुबोधगम्या प्रकृतग्रन्थस्य तात्पर्यप्रकाशिकेयमादर्शटीका विद्यते। यद्यपि द्वितीयाकारकपर्यन्तमुपलभ्यते तथापि सम्पूणेयं टीका सुदुर्लभेति ज्ञात्वा प्रकाशनस्योपक्रमः समादृत इति। टीकेयं संस्कृतजनानां व्युत्पत्तये महदुपकारिका भविष्यतीति मे मतिः।

अस्य ग्रन्थस्य प्रकाशने साहाय्यं विदधतां राष्ट्रिय-संस्कृत-संस्थानस्य विद्वद्वरेण्यानां प्राच्यप्रतीच्यविद्यानिष्णातानां कुलपतिवर्याणां श्रद्धेयानां प्रो॰ राधावल्लभत्रिपाठिमहोदयानां कृते हृदयेन कृतज्ञतां विनिवेदयामि येषां शास्त्रप्रेम्णाऽनुग्रहेण चैष ग्रन्थः सम्प्रति प्रकाश्यते। सर्वथा नैराश्यमनुभवन्नहं कुलपतिवर्याणां त्रिपाठिमहोदयनां समुत्साहवर्धनेन प्रकाशनार्थं संलग्नोऽभवम् अस्य ग्रन्थस्य प्रकाशने सर्वथा समुत्साहं कुर्वद्भ्यः श्रद्धेयगुरुवर्येभ्यः प्रो. वशिष्ठत्रिपाठिमहोदयेभ्यः कार्तज्ञ्यं विभर्मि। मां प्रति स्नेहं कुर्वद्भ्यः राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवमहोदयेभ्यः व्याकरणादिशास्त्रनिष्णातेभ्यः आचार्यरामानुजदेवनाथमहोदयेभ्यः धन्यवादं वितीर्य विरमामि।

गुरुपूर्णिमा सं॰ 2067

–हरेरामत्रिपाठी
आचार्योऽध्यक्षश्च
सर्वदर्शनविभागस्य
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्,
नवदेहली

संदर्भः

१. शब्दशक्तिप्रकाशिका ।।६०।। पृ.सं. २८३
२. तदेव ।।६२।। पृ.सं. २८४, २८५
३. तदेव ।।६३।। पृ.सं. २८६
४. शब्दशक्तिप्रकाशिका पृ.सं. २८८
५. कृष्णकान्तीटीका पृ.सं. २८८
६. शब्दशक्तिप्रकाशिका कारिका ।।६६।।
७. कृष्णकान्तीटीका पृ.सं. २८९
८. शब्दशक्तिप्रकाशिका पृ.सं. २८९
९. शब्दशक्तिप्रकाशिका पृ.सं. २९०
१०. पदवाक्यरत्नाकरः गूढार्थदीपिकासहितः पृ. सं. ५८०
११. शब्दशक्तिप्रकाशिका पृ.सं. २९१
१२. शब्दशक्तिप्रकाशिका पृ.सं. २९२
१३. शब्दशक्तिप्रकाशिका पृ.सं. २९२
१४. कृष्णकान्तीटीका पृ.सं. २९२
१५. शब्दशक्तिप्रकाशिका ।।कारिका।।६७।। पृ. २९४
१६. न्यायवार्तिक - अध्याय २ आह्निक १ सूत्र १६ पृ. १९६
१७. कलापव्याकरणस्य वृत्तिटीकायां २-४-१५ पृ. १६
१९. न्यायवार्तिकतात्पर्यटीका २-२-६२ पृ.सं. ६६४ (कलकत्ता प्र.)
२०. शृङ्गारप्रकाश द्वितीयप्रकाश पृ. ४२
२१. वैयाकरणसिद्धान्त लघुमञ्जूषा पृ. ५४०
२२. वैयाकरणसिद्धान्त कुञ्जिकाटीका पृ. ५४१
२३. कारकचक्रम् माधवटीका पृ.सं. २
२४. तुभ्यं ददानीत्युक्ते ब्राह्मणो यदि ददस्वेति ब्रूयात् तेन ब्राह्मणस्यइच्छामन माय दाने निष्टसाधनताज्ञाननिवृत्त्या इष्टसाधनताज्ञानाद् दोननिष्पत्तिरिति अनुमतिप्रकाशनद्वारा ब्राह्मणस्य दानप्रयोजकत्वमिति माधवीटीका कारकचक्रम् पृ. २
२५. कियानिमित्तत्वं कारकत्वमिति न सामान्यलक्षणम् का.च. पृ. १
२६. सम्प्रदानादेरनुमतिप्रकाशनद्वारेव तण्डुलादिसम्पादनद्वारा सम्बन्धिनोऽपि पाकादिक्रियानिमित्तत्वेन सम्बन्धिनि चैत्रस्य तण्डुलं पचतीत्यादौ चैत्रादावतिव्याप्तेः। कारकचक्रम् पृ. २
२७. कारकवादार्थः पृ.सं. ३
२८. सा. म.पृ. ३२-३३
२९. ननु किमिदं कारकत्वम्। न तावत् क्रियाप्रयोजकत्वम्। देवदत्तस्य तण्डुलं पचतीत्यत्रानुमतिद्वारा क्रियाप्रयोजके देवदत्तेऽतिप्रसङ्गात्।
३०. कारकचक्रम् पृ. सं. ३
३१. कर्मवाच्यस्थले व्यापारजन्यफलं धात्वर्थः।
३२. कर्तृवाच्यस्थले फलावच्छिन्नव्यापारः धात्वर्थ इति।
३३. सविषयकपदार्थाभिधायिजानात्यादीनान्तु विषयित्वरूपविभक्त्यर्थद्वारा नामार्थान्वयित्वमेव गौणं सकर्मकत्वम्। कारकचक्रम् पृ.सं. २१-२२

३४. कारकचक्रम् माधवीटीका पृ. सं. ३
३५. तदेव माधवीटीका पृ.सं. ३
३६. कारकचक्रम् पृ.सं. ६
३७. कारकचक्रम् पृ.सं. १५ अत्राहुः "अनुकूलकृतिमत्त्वं कर्तृत्वम्
३८. कारकचक्रम् पृ.सं. २०
३९. कारकचक्रम् पृ.सं. १९
४०. कारकचक्रम् पृ.सं. २२
४१. व्यापारत्वकारणं करणमिति, तेन हस्तादौ कुठारादौ च नाव्याप्तिः कारकचक्रम् पृ. ५७
४२. कारकचक्रम् पृ.सं. ८२
४३. कारकचक्रम् पृ.सं. ९३
४४. कारकचक्रम् पृ.सं. ९९
45. पदवाक्यरत्नाकरः- पृ. सं. 371
46. कारकप्रकरणम् 2[3[46 पृ. सं. 765
47. अष्टाध्यायी 1[4[54 वैयाकरणसिद्धान्तकौमुदी पृ. 803
48. वैयाकरणसिद्धान्तकौमुदी, कारकप्रकरणम्, लक्ष्मीटीका पृ. सं.-803
49. तदेव पृ. सं. 803
50. तदेव पृ. सं. 804
51. तदेव पृ. सं. 804
52. तदेव पृ. सं. 804
53. वैयाकरणसिद्धान्तकौमुदी, कारकप्रकारणम्, लक्ष्मीटीका पृ. सं. 804
54. शब्दशक्तिप्रकाशिका, कारिका-75 पृ. सं. 337
55. शब्दशक्तिप्रकाशिका, टिप्पणी पृ. सं. 337
56. काशिकावृत्तिः, भागः- 1, 1[4[54 पृ. 583-84
57. प्रौढमनोरमा, तृतीयभागः- पृ. 879
58. लघुशब्देन्दुशेखरः, कारकप्रकरणम्, पृ. 476
59. वैयाकरणसिद्धान्तकौमुदी, भागः-2, कारकप्रकरणम्, पृ. 804 (लक्ष्मीटीकासहिता)
60. तदेव पृ. सं. 804
61. कारकचक्रम् पृ. सं. 7
62. कारकचक्रम् पृ. सं. 13
63. तदेव पृ. सं. 15
64. भवानन्दकृतकारकप्रयोगः, कुरुक्षेत्रविश्वविद्यालयः, पुस्तकालयप्राप्ति सं. 19879 पत्र सं. 2 इत्यत्र टिप्पणी विद्यते।
65. कृञ्-उत्पत्तिव्यधिकरणस्तदनुकूलो व्यापारोऽर्थः, परमलघुमञ्जूषा, धात्वर्थनिर्णयः पृ. 158
66. कारकचक्रम्, वा. पृ. 9
67. श. कौ. (भाग-2) 1,3,67 पृ. 81
68. वैयाकरण भूषणसार (धा. नि.) का. 2 पृ. 22
69. प. ल. म. (का. नि.) का. 2, पृ. 22
70. मुक्तबोधव्याकरणम्, भागः-1, पुस्तिका 4, सू. सं. 289, पृ. 297

71. कारकचक्रम्, पृ. सं. 9
72. कारकचक्रम्, माधवीटीका पृ. सं. 10
73. कारकचक्रम्, पृ. सृ. 13
74. कारकचक्रम्, पृ. सृ. 13
75. कारकचक्रम्, पृ. सृ. 15
76. कारकचक्रम्, माधवीटीका 15
77. कारकचक्रम्, माधवीटीका 15
78. व्युत्पत्तिवादः, तृतीयाकारकम् पृ. सं. 400,
79. तदेव, पृ. सं. 400
80. व्युत्पत्तिवादः, पृ. सं. 406
81. व्युत्पत्तिवादः, पृ. सं. 406
82. व्युत्पत्तिवादः
83. कारकचक्रम्, पृ. सं. 17
84. मुण्डकोपनिषत्, 1.1.1, पृ. 15
85. न्यायकोशः पृ. सू. 205, 206, 207
86. वैशेषिकसूत्रम् 1/1/17
87. तर्क कौ. पृ. 20
88. वाक्य. पृ. 22
89. त.दी. 1 पृ. 6
90. दि.गु.पृ. 198
91. वै. उप. 1/1/17
92. ल.व.
93. त.व. परि. 16 पृ. 240
94. अष्टाध्यायी 2/3/2 वै.सि.कौ.सू.सं. 537 मूल पृ. 59
95. अष्टाध्यायी 1/4/50 वै.सि.कौ.सू.सं. 538 मूल पृ. 60
96. कारकचक्रम् पृ. 18
97. तदेव पृ. 19
98. तदेव पृ. 20
99. तदेव पृ. 25
100. कर्मत्वन्तु न करणव्यापार्य्यत्वं, नापि परसमवेतक्रियाजन्यफलशालित्वम्, यत्ततत्क्रियाऽनधि-करणत्वे सति तत्क्रियावच्छेदकफलशालित्वं कर्मत्वम्, का. च. पृ. 18, 19, 25
101. न्या. वा. ता. टी. 1, 1, 1 पृ. 42
102. न्या. वा. ता. टी. (कलकत्ताद) 2.1.16 पृ. 437
103. न्यायसिद्धान्तदीय पृ. 25
104. कारकचक्रम् पृ. 18
105. कारकचक्रम् पृ. 19
106. खण्डनखण्डखाद्य (वनारस 1948) प्र.परि.पृ.166
107. का.च.वा. पृ. 10-11

108. परसमवेतक्रियाफलशालित्वं करणव्यापारविषयत्वं वा कर्मत्वम् त.चि. प्रत्यक्षखण्ड पृ. 795
109. न्यायसिद्धान्तदीपः (आधेयशक्तिवादः) पृ. 25
110. खण्डनखण्डखाद्यम् (बनारससं. 1948) प्र.परि. पृ. 157
111. चित्सुखाचार्य खण्डनभावदीपिका पृ. 159
112. ख.खण्ड, खा. प्र. परि. पृ. 159-160
113. कारकचक्रम् पृ.सं. 19
114. कारकचक्रम् पृ.सं. 20
115. कारकचक्रम् पृ.सं. 37
116. अष्टाध्यायी 2, 1, 24
117. वैयाकरणभूषणसारः (सुबर्थ निरूपणम् पृ. 120
118. वै.भू. सा. पृ. 120
119. कारकचक्रम् पृ. 38
120. तदेव पृ. 38
121. तदेव पृ. 67
122. कारकचक्रम् पृ.सं. 34
123. तन्न रोचयामहे, परसमवेतत्वादेगौरवेणावाच्यत्वात्। वै.भू.सार पृ. 181
124. वैयाकरणभूषणसार पृ. 169
125. कारकचक्रम् पृ. सं. 25
126. कारकचक्रम् पृ. सं. 27, 28
127. परमलघु मञ्जूषा (कारकनिरूपणम्) पृ. 341
128. वैयाकरणसिद्धान्तमञ्जूषा पृ. 35
129. कारकचक्रम् पृ. 43
130. कारकचक्रम् पृ. 34
131. कारकचक्रम् पृ. 34
132. कारकचक्रम् वा. पृ. 19-20
133. कारकचक्रम् पृ. 35
134. पाणिनीय अष्टाध्यायी-1/4/49 सिद्धान्त कौमुदी मू.पृ. 59 सि.कौ.सू. 535
135. पाणिनी अष्टाध्यायी-1/4/50 सिद्धान्तकौमुदी मू.पृ. 60 सि.कौ.सू. 538
136. वाक्यपदीयम् साधनसमुद्देशः 3, 7, 45 पृ. 266
137. वाक्यपदीयम् साधनसमुद्देशः 3, 3, 51 पृ. 269
138. कारकचक्रम् पृ. 36
139. वाक्यपदीयम् पृ. 3, 7, 50 पृ. 269
140. प्राप्यविकार्ययोः कारकत्वात् तादृशफलाश्रयत्वाच्च मुख्यं कर्मत्वम् कारकचक्रम् पृ. 36
141. वाक्यपदीयम् पृ. 266
142. कारकचक्रम् पृ. 36
143. वाक्यपदीयम् पृ. 267
144. सती वा विद्यमाना वा प्रकृतिः परिणामिनी।
145. यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते।। वाक्यपदीय, 3-7-47

146. कारकचक्रम् पृ37 निर्वत्यञ्च निष्पाद्यं– गौणं कर्मत्वम् (सा. समु.) पृ. 267
147. कारकचक्रम् पृ. 37
148. तदेव पृ. 37
149. कारकचक्रम् पृ. 37
150. प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधं नैयायिकाः स्वीकुर्वन्ति।
151. कारकचक्रम् पृ. 37 प. सुधांशुशेखरकृत टिप्पणी पृ. 48
152. तदेव पृ. 20
153. शब्दशक्ति प्रकाशिका का. 73 पृ. सं. 316
154. शब्दशक्ति प्रकाशिका का. 74 पृ. सं. 329
155. वैयाकरणसिद्धान्तकौमुदी कारकप्रकरणम् सू.सं. 537 अष्टाध्यायी 2/3/2 पृ. 59 मू.
156. व्युत्पत्तिवादः पृ. सं. 207
157. व्युत्पत्तिवादः द्वितीयाकारकः (सादर्श व्याख्यासहितः) पृ. सं. 207
158. फलान्वयिनी वृत्तिरेव द्वितीयार्थः। व्युत्पत्तिवादद्वितीयाकारक पृ. 216
159. व्युत्पत्तिवादः पृ. सं. 227
160. तदेव पृ.सं. 229
161. तदेव पृ. 264
162. तदेव पृ. 272
163. तदेव पृ. सं. 295
164. व्युत्पत्तिवादस्य आदर्शटीका 336
165. व्युत्पत्तिवादः पृ. 340
166. शाब्दबोधमीमांसा द्वितीयार्थ वि. भाग 2 पृ. 89
167. तदेव पृ. 110
168. तदेव पृ. 138
169. तदेव पृ. 300

I vol.

विषयानुक्रमणिका

विषयाः	पृ.		
प्रथमाकारकारम्भः	१	दशशतादिशब्दविचारः	241
आकाङ्क्षया भास्यः संसर्गः	१	नित्यबहुवचनान्तशब्दविचारः	244
अभेदसम्बन्धः	४	आख्यातस्य संख्यार्थताविचारः	247
स्वसमानविभक्तिकत्वम्	४	द्वितीयातृतीयाप्रयोजकसिद्धान्तः	249
अभेदान्वयाकाङ्क्षाविचारः	४	आख्यातद्विवचनादेः संख्याबोधकत्वम्	277
विशेषणविभक्त्यर्थविचारः	२३	संख्यान्वयबोधकारणम्	279
अभेदस्वरूपम्	२३-४१	गुणादिवाचकपदोत्तरविभक्त्यर्थविचारः	281
क्रियाविशेषणानामभेदान्वयाकाङ्क्षास्वरूपम्	४२	द्वितीयाकारकारम्भः	283
अभेदान्वयनियामकम्	५४	द्वितीयार्थधात्वर्थयोर्निरूपणारम्भः	283
घटो घट इति विचारः	५४	नव्यमतेन धात्वर्थः	294
अभेदान्वयविचारः	५४	धात्वर्थद्वितीयार्थयोर्नव्यप्राचीनमते	297
अभेदान्वयानुगमः	७७	कर्माख्यातार्थनिरूपणम्	303
भेदान्वयबोधविचारारम्भः	९२	हुधात्वर्थः	324
राजा पुरुषः इत्यत्र शाब्दबोधविचारः	९९	दाधात्वर्थः, प्रतिग्रहार्थः	328
षष्ठ्यर्थः	११२	पचधात्वर्थः	329
लुप्तविभक्तिस्मरणम्	139	भुजधात्वर्थः	330
ऋद्धस्य राजमातङ्गाः इत्यत्र शाब्दबोधः	139	सकर्मकधात्वर्थविचारोपसंहारः	330
भूतले न घटः, इत्यत्र शाब्दबोधः	162	द्विकर्मकधातुसमभिव्याहृतद्वितीयार्थः	330
प्रत्ययप्रत्ययार्थयोर्विचारः	168	दुहधात्वर्थः	331
एकवचनादिविचारः	169	याचधात्वर्थः	337
संख्यावाचकविचारः	172	रुणद्ध्यर्थः पृच्छत्यर्थश्च	340
प्राद्युपसर्गार्थविचारः	187	नयत्यर्थो वहत्यर्थश्च	344
संख्यासंबन्धविचारः	187	निरूपयत्यर्थः	346
पदार्थान्तरान्वयविचारः	195	ण्यन्तधातुप्रयोगविशेषाः	346
संख्यान्वयविचारः	206	णिजर्थः	350

यगन्तप्रयोगः	355	कृत्यर्थकधातुप्रयोगाः	458
भावाख्यातप्रयोगः	363	कर्मप्रभेदनिरूपणम्	461
'स्वं गच्छति' इत्यादिवारणम्	364	अधिशीङ्स्थासां प्रयोगाः	476
घ्राधात्वर्थस्तत्रत्यवादश्च	375	कालाध्वनोरत्यन्तसंयोगे	479
'आकाशं न पश्यति' इति	384	अत्यन्तसंयोगरूपाभिव्याप्तिविचारः	480
द्वितीयखण्डारम्भः	404	विनापदसमभिव्याहृतद्वितीयार्थः	504
अनुमित्यर्थकधातुः	404	यावत्पदसमभिव्याहृतद्वितीयार्थः	516
घटत्वेन वहिर्नास्ति	406	देशरूपसीमावाचकयावच्छब्दः	521
रजतत्वेन शुक्तिं जानाति	406	अभिविध्यर्थकयावच्छब्दः	522
लोहितवह्निं जानाति	417	अनुशब्दसमभिव्याहृतद्वितीयार्थः	523
इच्छार्थकधातुप्रयोगः	423	कर्मप्रवचनीयप्रतिशब्दः	523
सन्नन्तप्रयोगाः	425	अन्तराशब्दसमभिव्याहृतद्वितीयार्थः	531
नामधातुप्रकरणम्	446		

गदाधरभट्टाचार्यविरचितः

व्युत्पत्तिवादः

(सुदर्शनाचार्यविरचित आदर्शटीकासहितः)

अथ

सटीकः

व्युत्पत्तिवादः

।। हं हनुमते नमः।।

शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते।

अथ

।। व्युत्पत्तिवादादर्शः ।।

।। हं हनुमते नमः।।

आद्यं विद्यानिदानं विधिविबुधवरैर्वन्द्यमानाङ्घ्रिपद्मं
धाम्नां धामैन्दवानां दनुजभुजरुजां जन्मनां छद्म जिह्मम्।
प्रज्ञाऽऽलोकार्कमतिप्रतिकृतिममतिध्वान्तदन्त्येण शक्रं
वक्रं भक्ताघचक्रे हरिमिह तुरगग्रीवमुग्रं प्रपद्ये।।
नत्वा श्रीमद्धयग्रीवं विद्याविघ्नविनाशनम्।
स्मृत्वा स्मृत्वा पदाम्भोजं श्रीगङ्गाधरशास्त्रिणाम्।।
करोति बालबोधार्थं मूलार्थप्रतिपादिकाम्।
व्याख्यां व्युत्पत्तिवादस्य ह्याऽऽदर्शाख्यां सुदर्शनः।।

ननु न्यायमते प्रत्यक्षानुमानोपमानशब्दभेदात् प्रमाणचतुष्टयं तत्र घटप्रत्यक्षे जाते घटे यो घटत्वादीनां नीलरूपादीनां च सम्बन्धः स तु संयुक्तविशेषण-तासंसर्गेण भासते। चक्षुस्संयुक्तघटे तस्य विशेषणत्वादिति तादृशसम्बन्धनिष्ठा विषयता संयुक्तविशेषणतासंनिकर्षप्रयोज्यास्ति घटस्तु चक्षुस्संनिकृष्ट एव, वैशेषिकमते च समवायस्याप्रत्यक्षत्वाद्विशिष्टबुद्ध्या समवायानुमानं भवति तदुक्तं तैः–"इहात्मनि ज्ञातमिहाकाशे शब्द इतीहबुद्धिरुत्पद्यमाना न विना सम्बन्धमुत्पत्तुमर्हति तेनानुमीयते–अस्ति कश्चित्सम्बन्धः।" इति। अनुमितौ

च पर्वतधूमौ चक्षुस्संनिकृष्टौ वह्निनिष्ठा च विषयता व्याप्तिज्ञानप्रयोज्यास्ति पर्वतीयवह्निसंयोगनिष्ठा च विषयता पक्षधर्मताज्ञानप्रयोज्यास्ति, अर्थात्– धूमपर्वतयोः प्रत्यक्षेण ज्ञातत्वाद् वह्नेश्च व्याप्तिज्ञानेन ज्ञातत्वात् पक्षधर्मताज्ञानेन 'वह्निव्याप्यधूमवान् पर्वतः' इत्यनेन वह्निसंयोग एव ज्ञायतेऽत एव पक्षधर्मताज्ञानानन्तरं तत्कार्यभूतं 'वह्निमान् पर्वतः' इत्याकारकं ज्ञानं जायते, अत्र वह्नेर्व्याप्तिज्ञानेन ज्ञानत्वात् पारिशेष्याद्वह्निसंयोग एव विषय इति। उपमितौ च गवयनिष्ठा विषयता चक्षुस्संनिकर्षप्रयोज्यास्ति गवयगवय-पदयोर्वाच्यवाचकभावसम्बन्धनिष्ठा च विषयता सादृश्यज्ञानप्रयोज्यास्ति तत्र वाच्यवाचकभावसम्बन्धस्य सादृश्यज्ञानेन ज्ञायमानत्वात् प्रथमम् 'गोसदृशो गवयः' इत्यतिदेशवाक्यश्रवणात् तस्य गवयदर्शनकाले स्मरणात्, इत्येवं प्रत्यक्षानुमानोपमानेति प्रमाणत्रयस्थले तु येन प्रकारेण सम्बन्धज्ञानं जायते सम्बन्धनिष्ठा च विषयता यत्प्रयोज्या भवति तत्सर्वं विज्ञातम्, संप्रति 'राजपुरुषः' 'नीलघटमानय' इत्यादिवाक्यजन्यशाब्दबोधस्थले स्वत्वाऽभेदादि-सम्बन्धानां प्रतीतिः कथं भवति तादृशसम्बन्धनिष्ठा विषयता च किं प्रयोज्या भवतीति न ज्ञातमिति तद्वक्तव्यमित्याशङ्क्य श्रीमद्गदाधरभट्टाचार्यो व्युत्पत्तिवादाख्यं ग्रन्थमारभते–शाब्दबोधे चेति। 'कुम्भकारः' इतिवत् 'व्युत्पत्ती-र्वदतीति व्युत्पत्तिवादः' इति–ग्रन्थनामार्थः।

शाब्दबोध इति–चस्त्वऽर्थे, "शाब्दबोधे" इति सप्तम्यर्थो निरूपतित्वम्, "एकपदार्थे" इति सप्तम्यर्थोऽनुयोगित्वम्, "अपरपदार्थस्य" इति षष्ठ्यर्थः प्रतियोगित्वम्, संसर्गः=अभेदादिसम्बन्धः, संसर्गमर्यादया=आकाङ्क्षया, तृतीयार्थश्च प्रयोज्यत्वम्, भासधात्वर्थो विषयता, आत्मनेपदप्रत्ययार्थ आश्रयता, तथा च एकपदार्थानुयोगिकोऽपरपदार्थप्रतियोगिकोऽभेदादिसम्बन्धः शाब्दबोध-निरूपिताऽऽकाङ्क्षाप्रयोज्यविषयताश्रयः' इति वाक्यार्थः पदार्थद्वयस्य य संसर्गः स शाब्दबोधे आकाङ्क्षाबलेन भासते इति यावद् यथा– 'नीलघटमानय' इत्यत्र नीलप्रतियोगिको घटानुयोगिकश्च यो नीलघटयोरभेदसंबधः स केनापि पदेनानुपस्थितत्वादाकाङ्क्षाबलेन भासते, यथा च 'राजपुरुषः' इत्यत्र राजप्रतियोगिकः पुरुषानुयोगिकश्च यः स्वत्वसम्बन्धः स आकाङ्क्षाबलेन भासते 'राजपुरुषः' इत्यादिविशिष्टबुद्धेः सम्बन्धभानं विनोत्पत्तेरसंभवात् सम्बन्धभासकपदस्य चाभावात् तादृशस्वत्वादिसम्बन्धस्याकाङ्क्षया भानं

स च क्वचिदभेदः क्वविच्च तदतिरिक्त एवाधाराधेय-प्रतियोग्यनुयोगिविषयविषयिभावादिः।

स्वीक्रियते, आकाङ्क्षा च "यत्पदेन विना यस्याऽननुभावकता भवेत् आकाङ्क्षा" इति विज्ञेया। 'नीलघटम्' इत्यादौ पदनिष्ठा विषयता श्रावणप्रत्यक्षप्रयोज्या नीलघटादीनां च विषयता नीलादिपदघटादिपदप्रयोज्या नीलघटाद्योर्ऽभेदादिसम्बन्धस्तन्निष्ठा विषयताऽऽकाङ्क्षाज्ञानप्रयोज्या भवतीति यावत्। एवम् 'राजपुरुषः' इत्यादौ स्वत्वादिसम्बन्धनिष्ठा विषयताऽऽकाङ्क्षाज्ञानप्रयोज्या विज्ञेया। अत एव शक्तिवादेऽन्विताभिधानवादखण्डनस्थले ह्यऽभेदादिसम्बन्धे शक्तिं दूषयित्वा सम्बन्धस्याकाङ्क्षाभास्यत्वं प्रतिपादितम्। 'नीलो घटः' इत्यादिव्यासस्थले विशेषणविभक्तेरभेदार्थकत्वमते त्वऽभेदादेर्विभक्त्युपस्थापितत्वात् प्रकारत्वमेव भवति न तु संसर्गत्वम् 'नीलाभेदवान् घटः' इति च तत्र शाब्दबोधः, तस्माद् यत्र यस्य संसर्गत्वं तत्र तस्याकाङ्क्षाभास्यत्वमेव विज्ञेयम्, व्यासस्थलेऽपि विशेषणविभक्तेर्निरर्थकत्वमते ह्यभेदादेः संसर्गत्वमेव भवतीत्याकाङ्क्षाभास्यत्वमेव, तत्र विशेषणविभक्तिः साधुत्वार्था विज्ञेया 'अभेदसम्बन्धेन नीलविशिष्टो घटः' 'स्वत्वसम्बन्धेन राजविशिष्टः पुरुषः' इत्यादिश्च शाब्दबोधाकारो विज्ञेय इत्यलम्।

सम्बन्धो द्विविधः– अभेदलक्षणो भेदलक्षणश्च तत्राभेदलक्षणस्यैकत्वाद् भेदलक्षणस्य चाऽनेकरूपत्वात् प्रथममभेदसम्बन्धमाह–स चेति। सः=संसर्गः। कतिपयभेदसम्बन्धनाहक्वचिच्चेति। तदतिरिक्तः=अभेदातिरिक्तः। 'भूतले घटः' 'घटवद् भूतलम्' इत्यादावाधाराधेयभावः सम्बन्धः। 'भूतले घटो नास्ति' इत्यादौ प्रतियोग्यनुयोगिभावः सम्बन्धः। 'घटे ज्ञानम्' 'मोक्षे इच्छा' इत्यादौ घटादिविषयकज्ञानस्य मोक्षादिविषयकेच्छायाश्च प्रतीयमानत्वाद् विषयविषयिभावः सम्बन्धः– घटादीनां विषयत्वाज्ज्ञानादीनां विषयित्वादित्यर्थः। एतच्च प्राचीनमतेन, नवीनमतेन त्वनुयोगिवृत्तिधर्मस्यैव सम्बन्धत्वस्वीकारात् क्वचिदाधारतासम्बन्धो यथा घटस्य भूतले क्वचिदाधेयतासम्बन्धो यथा भूतलस्य घटे एवं क्वचित् प्रतियोगिता क्वचिदनुयोगिता क्वचिद्विषयता क्वचिद्विषयिता सम्बन्ध इति विवेकः।

अभेदश्च प्रातिपदिकार्थे स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया भासते यथा– 'नीलो घटः' 'नीलघटमानय' इत्यादौ घटादौ नीलादेः, न तु विरुद्धविभक्तिमत्पदार्थस्य– 'नीलस्य घटः' इत्यादौ नीलघटाभेदान्वयबोधस्य सर्वानुभवविरुद्धत्वात्।

स्वसमानविभक्तिकत्वं च स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वम्। साजात्यं च विभक्तिविभाजकप्रथमात्वादिना

उक्तमभेदसम्बन्धं व्युत्पादयति– अभेद श्चेति। "प्रातिपदिकार्थे" इति सप्तम्यर्थोऽनुयोगित्वम्, "उपस्थापितस्य" इति षष्ठ्यर्थः प्रतियोगित्वम्, पदार्थस्येति शेषः, यथा–'नीलो घटः' इत्यत्र प्रातिपदिकार्थे=घटे स्वसमानविभक्तिकेन= घटादिलक्षणानुयोगिवाचकघटपदादिसमानविभक्तिकेन नीलपदेनोपस्थापितस्य नीलपदार्थस्याऽभेदः संसर्गमर्यादया=आकाङ्क्षया भासते नीलपदोत्तरविभक्तेः साधुत्वमात्रार्थत्वात्। 'नीलघटमानय' इत्यत्र च स्वसमानविभक्तिकत्वाभावेप्यभेदस्य भासमानत्वेनोक्तम्– स्वाव्यवहितेति, तथा चात्र स्वं घटपदं तदव्यवहितपूर्ववर्तिना नीलपदेनोपस्थापितस्य नीलपदार्थस्य प्रातिपदिकार्थे घटेऽभेदसम्बन्धः संसर्गमर्यादया भासते, तादृशसम्बन्धोपस्थापकपदाभावात्। एवकारो भिन्नक्रम इति "स्वसमानविभक्तिकेनैव स्वाव्यवहितपूर्ववर्तिनैव च" इत्यन्वयः, एवकारव्यवच्छेद्यमाह– न त्विति, 'नीलस्य घटः' इत्यत्र नीलपदस्य घटपदसमानविभक्तिकत्वमपि नास्ति षष्ठ्या व्यवधानेन च घटपदाव्यवहितपूर्ववर्तित्वमपि नास्तीति न नीलघटयोरभेदो भासते। नीलपदोत्तरषष्ठ्यां च घटपदाव्यवहितपूर्ववर्तित्वेप्यऽयोग्यत्वान्न षष्ठ्यर्थसम्बन्धस्याभेदेन घटेऽन्वयः संभवति। स्वसमानेत्यादिनियमाभावे च 'नीलस्य घटः' इत्यत्रापि नीलघटयोरभेदान्वयबोधः प्रसज्येत स तु सर्वविज्ञानुभवविरुद्ध एवेति च विरुद्धविभक्तिमत्पदार्थस्याभेदो भासते इति मूलार्थः।

ननु 'वेदाः प्रमाणम्' इत्यादौ वेदादिपदप्रमाणादिपदयोः समानविभक्तिकत्वाभावेऽपि वेदप्रमाणादिपदार्थयोरभेदो भासते एवेत्याशङ्क्य समानविभक्तिकत्वं निर्वक्ति– स्वसमानेति, स्वम्=अनुयोगिवाचकपदम्। स्वप्रकृति-

न तु समानानुपूर्वीकत्वं साजात्यम्– 'वेदाः प्रमाणम्' 'शतं ब्राह्मणाः' इत्यादावन्वयबोधानुपपत्तेः।

ननु "विशत्याद्याः सदैकत्वे" इत्यनुशासनात् 'शतं ब्राह्मणाः' इत्यादेः साधुत्वेऽपि 'वेदाः प्रमाणम्' इत्यादयः कथं प्रयोगाः?–विशेष्यविशेषणवाचकपदयोरसति विशेषानु-

---

केति– यथा 'वेदाः प्रमाणम्' इत्यत्र स्वपदेनाऽनुयोगिवाचकं वेदपदं ग्राह्यं तत्प्रकृतिका विभक्तिर्जस्विभक्तिस्तत्सजातीयविभक्तिकत्वं प्रमाणपदेऽप्यस्त्येव तस्य प्रथमान्तत्वादिति नात्राऽभेदान्वयबोधानुपपत्तिरित्यर्थः। ननु वेदपदोत्तरं जस्विभक्तिः प्रमाणपदोत्तरं च सुविभक्तिस्तयोः कथं च किञ्च साजात्यमित्याशङ्क्य विवक्षितसाजात्यस्य स्वरूपमाह–साजात्यमिति, अत्रानुपूर्वीलक्षणं साजात्यं न ग्राह्यं किं तु प्रथमात्वादिधर्मेण तथा च सुजसोरुभयोरपि प्रथमात्वेन साजात्यमस्त्येवेति वेदपदप्रमाणपदयोः समानविभक्तिकत्वं प्राप्तं तेन चाभेदान्वयः प्राप्त इत्यर्थः। समानानुपूर्वीकत्वरूपसाजात्यस्वीकारे बाधकमाह– न त्विति, यदि समानानुपूर्वीकत्वं साजात्यं स्यात्तदा सुजसोः समानानुपूर्वीकत्वाभावात्साजात्यं न स्यात्तथा च वेदपदप्रमाणपदयोः शतपदब्राह्मणपदयोश्च सजातीयविभक्तिप्रकृतित्वाभावात् 'वेदाः प्रमाणम्' 'शतं ब्राह्मणाः' इत्यादौ वेदादेः प्रमाणादेश्चान्वयबोधः=अभेदान्वयबोधः नोपपद्येतेत्यर्थः।

ननु 'विंशत्याद्याः सदैकत्वे' इत्यनुशासनाद=विंशत्याद्याः संख्यावाचकाः शब्दा यदा संख्येयपरा भवन्ति तदा नियमेनैकवचनान्ता एव भवन्ति इति नियमात् 'शतं ब्राह्मणाः इत्यत्र ब्राह्मणशब्दस्य बहुवचनान्तत्वेऽपि शतशब्दस्यैकवचनान्तत्वमुपपद्यते, 'वेदाः प्रमाणम्' इत्यत्र वेदपदस्य बहुवचनान्तत्वेऽपि यत् प्रमाणपदस्यैकवचनान्तत्वेन विशेष्यविशेषणवाचकपदयोर्विभिन्नवचनकत्वं तत् कथमुपपद्येतेत्याशङ्कते– नन्विति। स्वाभिप्रायं शाब्दबोधव्युत्पत्त्या प्रकटयति– विशेष्येति, यथा 'नीलो घटः' इत्यादौ विशेष्यविशेषणवाचकयोर्घटपदनीलपदयोः समानवचनकत्वमस्ति तथा 'वेदाः प्रमाणम्' इत्यत्रापि विशेष्यविशेषणवाचकयोर्वेदपदप्रमाणपदयोः समानवचनकत्वेन भवितव्यं तद्बाधकस्य विशेषानुशासनस्याभावादित्यर्थः। विशेष्यविशेषणवाचकपदयोः

शासने समानवचनकत्वनियमात्, अन्यथा 'घटा नीलः' इत्यादेरपि साधुताप्रसङ्गात्।

समानलिङ्गकस्थले तथानियमोपगमेन 'वेदाः प्रमाणम्' इत्यादेः साधुत्वोपपादनेऽपि "इति हेतुस्तदुद्भवे" इति कारिकायाः "इति त्रयः समुदिता हेतुः" इति काव्यप्रकाशव्याख्याया असङ्गतिर्दुर्वारैव। एवमसमानलिङ्गकस्थले विशेष्यवाचकपदाऽसमानवचनस्यापि विशेषणपदस्य साधुत्वे तादृशस्थले

समानवचनकत्वनियमानङ्गीकारे बाधकमाह– अन्यथेति, 'घटा नीलः' इत्यादिप्रयोगाणां यदऽसाधुत्वं तत् समानवचनकत्वाभावादेवास्तीति 'वेदाः प्रमाणम्' इत्यादिप्रयोगाणां समानवचनकत्वाभावे कथं साधुत्वं स्यादित्याक्षेपः।

ननु विशेष्यविशेषणवाचकपदयोर्यत्र समानलिङ्गकत्वं भवति तत्रैव समानवचनकत्वस्य नियमोस्ति यथा–'नीलो घटः' इत्यादौ, 'वेदाः प्रमाणम्' इत्यत्र तु वेदपदप्रमाणपदयोः समानलिङ्गकत्वाभावेन समानवचनकत्वनियमोपगमेन। एवमपि "इतिहेतुस्तदुद्भवे" इत्याकारककाव्यप्रकाशकारिकाया या "इति त्रयः समुदिता हेतुः" इत्याकारकटीकास्ति तत्र तु त्रिपदहेतुपदयोर्द्वयोरपि पुँल्लिङ्गत्वेन समानलिङ्गकत्वात् समानवचनकत्वेन भवितव्यमिति कथं त्रिपदहेतुपदयोर्विभिन्नवचनकत्वे साधुत्वं स्यादित्युक्तसमानवचनकत्वनियमस्याऽव्याप्तिं प्रदर्शयन्नाक्षिपति-इति हेतुरिति। उक्तरीत्या "इति त्रयः समुदिता हेतुः" इत्यत्र समानलिङ्गकस्थलेऽपि समानवचनत्वं नास्तीत्यव्याप्तिं प्रदर्श्याऽसमानलिङ्गकस्थले समानवचनत्वस्यातिव्याप्तिं प्रदर्शयति–एवमिति, उक्तार्थानां प्रयोगो न भवतीति विशेष्यवाचकपदोत्तरवर्तिन्या विभक्त्या संख्याया उक्तत्वाद् विशेषणवाचकपदोत्तरं द्विवचनबहुवचनयोरपेक्षैव नास्तीति साधुत्वार्थमौत्सर्गिकमेकवचनमेव प्राप्नोतीति 'वेदाः प्रमाणम्' इत्यत्र प्रमाणपदोत्तरमेकवचनमेवौत्सर्गिकं यदि युक्तम्–समानवचनकत्वनियमस्य समानलिङ्गकस्थले एव स्वीकारात् तदा विशेष्यविशेषणवाचकपदयोस्तादृशस्थले= असमानलिङ्गकस्थले सर्वत्रौत्सर्गिकमेकवचनमेव विशेषणवाचकपदोत्तरं प्रयोक्तव्यमिति "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इत्यत्र प्रमाणपदोत्तरम् "पितरो देवताः" इत्यत्र च देवतापदोत्तरमेकवचनमेव प्रयोक्तव्यमासीन्न तु बहुवचनम्–

औत्सर्गिकमेकवचनमेव सर्वत्र विशेषणपदानन्तरं प्रयोक्तुमुचित-मिति "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" "पितरो देवताः" इत्यादेरनुपपत्तिः।

मैवम्– यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषय-संख्याविरुद्धसंख्याया अविवक्षितत्वं तत्र विशेष्यविशेषणपदयोः समानवचनकत्वनियमः, अत एव "पुरूरव आद्रवसौ विश्वे-देवाः" इत्यादौ द्वित्वविशिष्टयोः पुरूरव आद्रवः प्रभृत्यो-र्विशेषणतया विवक्षितत्वात् तद्वाचकस्य पदस्य द्विवचनान्तता।

विशेष्यविशेषणवाचकपदयोः समानवचनकत्वनियामकस्य समानलिङ्ग-कत्वस्याभावादित्यर्थः, तथा च समानलिङ्गकस्थले एव समानवचनकत्वं भवतीति नियमस्याऽसंभवाद् यथा "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इत्यत्र समानलिङ्गकत्वाभावेऽपि समानवचनकत्वं तथा 'वेदाः प्रमाणम्' इत्यत्रापि समानलिङ्गकत्वाभावेऽपि समानवचनकत्वं युक्तं तच्च नास्तीति कथं साधुत्वमित्याक्षेपः।

उक्तरीत्याक्षिप्य परिहरति– मैवमिति। यत्रेति– यथा 'नीला घटाः' इत्यत्र विशेष्यवाचकपदं घटपदं तदुत्तरवर्तिविभक्तिर्जस्विभक्तिस्तत्तात्पर्य-विषयीभूता संख्या बहुत्वसंख्या तद्विरुद्धसंख्याया अविवक्षितत्वान्नील-पदोत्तरमपि जसेव युक्तमिति समानवचनकत्वम्, एवम्– "प्रत्यक्षानुमानो-पमानशब्दाः प्रमाणानि" "पितरो देवताः" इत्यादावपि विशेष्यवाचकं यत् पदं पितृपदं शब्दपदं च तदुत्तरवर्तिजस्विभक्तितात्पर्यविषयीभूतबहुत्वसंख्यातो विरुद्धसंख्याया अविवक्षितत्वाद् विशेष्यविशेषणवाचकपदयोः समानवचन-कत्वमित्यर्थः। "पुरूरव आद्रवसौ विश्वेदेवाः" इत्यत्र द्वित्वविशिष्टयोरेव पुरूरव आद्रवसोर्विश्वेदेवविशेषणत्वं विवक्षितमिति विशेष्यवाचकविश्वेदेव-पदोत्तरवर्तिजस्विभक्तितात्पर्यविषयीभूतबहुत्वसंख्यातो विरुद्धाया द्वित्वसंख्याया विवक्षितत्वेनाऽविवक्षितत्वं नास्तीति न समानवचनकत्वं प्राप्तं किं तु द्वित्वसंख्याया विवक्षितत्वेन विशेषणवाचकपुरूरवआद्रवःपदोत्तरं द्वित्वबोधकं द्विवचनमेव प्रयुक्तमित्याह– अत एवेति। अत एव=यत्रेत्याद्युक्तनियमादेव।

'वेदाः प्रमाणम्' इत्यत्र च विशेषणपदोत्तरविभक्त्या बहुत्वविरुद्धमेकत्वं विवक्षितं तच्च प्रकृत्यर्थतावच्छेदके प्रमितिकरणत्वेऽन्वेति। शाब्दप्रमाकरणत्वं च शब्दत्वावच्छिन्नं यावच्छब्दनिष्ठमेकमेवेति नाऽयोग्यता।

न च "पदार्थः पदार्थेनान्वेति" इति व्युत्पत्तिविरोधः, 'संपन्नो व्रीहिः' इत्यनेकव्रीहितात्पर्यकेऽप्येकवचनदर्शनेन

तद्वाचकस्य=विशेषणीभूतपुरूरवआद्रवोवाचकस्य पुरूरवआद्रवः पदस्य। वस्तुतस्तु पुरूरवपदमाद्रवपदं चाऽकारान्तमेवेति श्रीगुरुचरणाः।

एवम् 'वेदाः प्रमाणम्' इत्यत्रापि विशेष्यवाचकवेदपदोत्तरवर्तिजस्-विभक्तितात्पर्यविषयीभूतबहुत्वसंख्यातो विरुद्धाया एकत्वसंख्याया विवक्षितत्वेन समानवचनत्वनियामकमुक्ताऽविवक्षितत्वं नास्तीति न समानवचनत्वं तत्प्राप्तिश्च किं त्वेकत्वसंख्याया विवक्षितत्वेन तद्बोधकमेकवचनमेव प्रमाणपदोत्तरं प्रयुक्तं तदेव युक्तं चेत्याह– 'वेदाः प्रमाणम्' इत्यत्रेति। ननु चत्वारो वेदास्तेषु कथमेकत्वान्वयः स्यादित्याशङ्क्याह– तच्चेति, तत्–एकत्वम्। प्रकृतिपदेन च प्रमाणपदं ग्राह्यम्, प्रमितिकरणं च प्रमाणमिति प्रकृत्यर्थतावच्छेदकं प्रमितिकरणत्वं तच्च चतुर्ष्वपि वेदेष्येकमेव विवक्षितमिति तादृशप्रमितिकरणत्वे एकत्वस्यात्रान्वयो भवति न तु प्रमितिकरणभूतेषु वेदेष्वित्यर्थः। ननु नानाभूतेषु प्रमितिकरणेषु वेदेषु कथमेकमेव प्रमितिकरणत्वं स्यादित्याशङ्क्याह– शाब्देति, यथाऽनेकेषु घटेष्वेकमेव घटत्वं तथाऽनेकेष्वपि प्रमितिकरणेषु वेदेष्वेकमेव प्रमितिकरणत्वं युक्तमिति तत्रैकत्वान्वयस्य नाऽयोग्यता, यावच्छब्दपदेन प्रमाणभूतशब्द एव ग्राह्यः– अनाप्तवाक्येषु प्रमाणत्वास्वीकारात्। "इति त्रयः समुदिता हेतुः" इत्यत्र च शक्तिनिपुणताभ्यास-समुदाये एकमेव हेतुत्वं विवक्षितमिति तादृशसमुदायनिष्ठहेतुत्वे एकत्वान्वय एकत्वस्य विवक्षितत्वाच्च न समानवचनत्वं तत्प्राप्तिश्चेत्यर्थः।

ननु 'पदार्थान्तरनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वाव-च्छिन्नं प्रत्यऽन्वयितावच्छेदकरूपेणोपस्थितिः कारणम्' इति नियमेन पदार्थस्य नीलादेः पदार्थेन घटादिनैवान्वयो भवति घटादेरन्वयितावच्छेदकरूपेण घटत्वेन रूपेणोपस्थितेर्न तु घटत्वादिना घटत्वादेर्घटत्वत्वादिरूपेणोपस्थितेरभावात्

तादृशव्युत्पत्तिसंकोचस्यावश्यकत्वात्।

यदि स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसंबन्धेन प्रकृत्यर्थ एवैकत्वान्वयः, व्रीहित्वजातेः स्वरूपत एव व्रीह्यादिपदशक्यतावच्छेदकतयाऽन्वयितावच्छेदकरूपेणाऽनुपस्थितेस्तत्र पदार्थान्तरस्याऽन्वयानुपपत्तेरिति मन्यते? तदा प्रकृतेऽपीदृश्येव गतिः।

स्वरूपत एवोपस्थितिस्वीकारात्, उक्तनियमानङ्गीकारे तु लोमलाङ्गूलादीनामपि दीर्घत्वाभिप्रायेण 'दीर्घः पशुः' इति प्रयोगः स्यात् पश्वेकदेशेन लोमादिना दीर्घत्वान्वये बाधकाभावप्रसङ्गात् न च लोमादिनात्र दीर्घत्वान्वय इष्ट इति पदार्थः पदार्थेनैवान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिः स्वीकार्या तथाच 'वेदाः प्रमाणम्' इत्यत्रापि एकत्वपदार्थस्य वेदरूपपदार्थेनैवान्वयो युक्तो न तु वेदैकदेशेन प्रमितिकरणत्वेनेति कथमेकत्वस्य प्रमितिकरणत्वेऽन्वय उक्त इत्याशङ्क्याह– न चेति। 'संपन्नो व्रीहिः' इति वाक्यस्य न ह्येकव्रीहिकणसंपन्नत्वे तात्पर्यं किं त्वनेकव्रीहिसंपन्नत्वेऽस्ति तथाप्यत्रैकवचनदर्शनेनैकत्वस्य चानेकव्रीहिषु बाधेन व्रीहित्वजातावेवान्वयोस्तीत्यसति बाधके पदार्थः पदार्थेनैवान्वेति सति बाधके तु पदार्थैकदेशेनाप्यन्वेतीति व्युत्पत्तिसंकोचे कृते 'संपन्नो व्रीहिः' इत्यत्रेव 'वेदाः प्रमाणम्' इत्यत्राप्येकत्वपदार्थस्य पदार्थैकदेशेन प्रमितिकरणत्वेनान्वये न कोऽपि दोषः वस्तुतस्त्वयं नियमः संख्यातिरिक्त स्थलार्थमस्ति संख्यायास्तु पदार्थैकदेशेनाप्यन्वयो भवति 'संपन्नो व्रीहिः' इत्यादिप्रयोगदर्शनात् तथा च 'वेदाः प्रमाणम्' इत्यत्राप्येकत्वस्य पदार्थैकदेशे प्रमितिकरणत्वेऽन्वये न दोषः।

ननु गत्यभावे एव नियमसंकोच उचितो न तु सत्यां गतावपीति न व्रीहित्वजातावेकत्वान्वयो युक्तः–व्रीहित्वं हि स्वरूपत एव व्रीहिपदस्य शक्यतावच्छेदकमस्तीति व्रीहिपदेन व्रीहित्वस्य स्वरूपत एवोपस्थितिर्भवति न त्वन्वयितावच्छेदकेन व्रीहित्वत्वेन रूपेण पदार्थान्तरान्वयं प्रति चान्वयितावच्छेदकरूपेणोपस्थितिः कारणमस्तीति न व्रीहित्वजातावत्रैकत्वान्वयः उपपद्यते किं तु स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसम्बन्धेन प्रकृत्यर्थे= व्रीहिष्वेवैकत्वान्वयः संभवतीति नोक्तनियमसंकोचस्यावश्यकतेत्याह– यदीति, स्वं एकत्वं तदाश्रयीभूतं यत् प्रकृत्यर्थतावच्छेदकं व्रीहित्वं तद्वत्त्वसम्बन्धेन,

यत्तु 'संपन्नो व्रीहिः' इत्यादावेकवचनोपस्थितानि नानैकत्वानि प्रत्येकं नानाव्रीहिष्वन्वीयन्ते इत्युक्त्यैव सामञ्जस्ये जातावेकत्वभानोपगमो निरर्थक इति, तदसत्, यतः–स्वसजातीयनिष्ठभेदप्रतियोगिताऽनवच्छेदकैकत्वरूपसजातीयद्वितीयरहितत्वमेकवचनार्थो न त्वेकत्वमात्रं तस्य वस्तुमात्र-

---

व्रीहित्ववत्त्वं सम्बन्धरूपं व्रीहिष्वस्त्येवेत्यर्थः। उत्तरमाह– तदेति, यथा 'संपन्नो व्रीहिः' इत्यत्रैकत्वस्य व्रीहिष्वेवान्वयस्त्वयोपपादितस्तथा प्रकृतेऽपि= 'वेदाः प्रमाणम्' इत्यत्रापि स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसम्बन्धेनैकत्वस्य वेदेष्वेवान्वयो ज्ञेयः। स्वम् एकत्वं तदाश्रयीभूतं यत् प्रकृत्यर्थतावच्छेदकं प्रमितिकरणत्वं तद्वत्त्वसम्बन्धेन वेदेष्वेवैकत्वस्यान्वयः। प्रमितिकरणत्ववत्त्वं चास्त्येव वेदेष्वित्यर्थः।

ननु 'संपन्नो व्रीहिः' इत्यत्रैकत्वस्य जातावन्वयो न भवति येन "पदार्थः पदार्थेन" इति नियमस्य संकोचावश्यकता स्यात्, न चापि विभक्त्या एकमेवैकत्वमुपतिष्ठति येनैकस्यैकत्वस्यानेकव्रीहिष्वन्वयबाधः स्यात्, किं त्वेकवचनविभक्त्या नाना=अनेकान्येवैकत्वान्युपतिष्ठन्ति अनेकेषां चैकत्वानामनेकेषु व्रीहिष्वन्वये न कोऽपि बाध इत्याशङ्कते– यत्त्विति। परिहरति– तदसदिति, 'संपन्नो व्रीहिः' इत्यत्रैकवचनस्यैकत्वमात्रम्= संख्यारूपमेकत्वं नार्थः– तस्य=संख्यारूपैकत्वस्य वस्तुमात्रसाधारण्येन= केवलान्वयित्वेनार्थत एव लाभात्=प्रतीतिसंभवात्। अनुपयोगाच्चेति– अत्रैकवचनस्य संख्यारूपैकत्वार्थकत्वस्वीकारे उपयोगाभावात्=व्रीहिसजातीयोप्तान्नान्तरसंपन्नत्वव्यावृत्तिर्या वक्तुरभीष्टा सा न प्राप्नुयात् एकत्वसंख्यान्वयिव्रीहीणां संपन्नत्वेऽपि व्रीहिभिन्नान्नसंपन्नत्वे बाधकाभावात् सजातीयद्वितीयराहित्यरूपैकत्वस्वीकारे तु तादृशैकत्वान्वयिव्रीहीणां संपन्नत्वे व्रीहिसजातीयोप्तान्नान्तरसंपन्नत्वव्यावृत्तिरुपलभ्यते तस्मादत्र नैकत्वमात्रमेकवचनार्थः किं तु स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपं यत्सजातीयद्वितीयरहितत्वं तदेकवचनार्थः। स्वसजातीयेति– यत्रानेके घटा वर्तन्ते तत्र स्वं पीतघटस्तत्सजातीयो द्वितीयो नीलघटः नीलघटे पीतघटभेदोऽप्यस्त्येव तस्य भेदस्य प्रतियोगी पीतघटस्तत्र यदेकत्वं तद् भेदप्रतियोगितावच्छेदकमेवेति न तदेकत्वं

साधारण्येनार्थत एव लाभात् अनुपयोगाच्च, अत एव "पशुना यजेत" इत्यादौ पशुनिष्ठतादृशैकत्वस्य विवक्षितत्वादनेक-पशुकरणकयागान्नादृष्टसिद्धिः।

साजात्यं च स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्ट-प्रकृत्यर्थतावच्छेदकवत्त्वरूपेण, अतः 'अत्र घटोऽस्ति' इत्यादौ

सजातीयद्वितीयरहितत्वरूपम्। यदा त्वेक एव घटस्तदा सजातीयद्वितीय-घटस्याभावाद् वर्तमानघटनिष्ठमेकत्वं स्वसजातीयनिष्ठभेदप्रतियोगिता-ऽनवच्छेदकमेव एतादृशाऽनवच्छेदकैकत्वरूपमेव सजातीयद्वितीयरहितत्व-मेकवचनार्थः। "संपन्नो व्रीहिः" इत्यत्र यद्यऽन्नान्तरं संपन्नं स्यात्तदा संपन्नत्वेन व्रीहिसजातीयान्नान्तरस्य सत्त्वात् तत्र वर्तमानो यो व्रीहिभेद-स्तत्प्रतियोगितावच्छेदकं व्रीहिगतैकत्वं स्यादपि यदा च नान्नान्तरं संपन्नं तदा संपन्नत्वेन रूपेण व्रीहिसजातीयस्यैवाभावात् स्वसजातीयनिष्ठभेद-प्रतियोगितानवच्छेकमेव जातं व्रीहिगतैकत्वं तदेव सजातीयद्वितीयरहितत्वम्। प्रकृतोपष्टम्भकमाह—अत एवेति, अत एव=एकवचनार्थैकत्वस्य सजातीय-द्वितीयरहितत्वरूपस्वीकारादेव "पशुना यजेत" इत्यादौ पशुनिष्ठस्य तादृशैकत्वस्य=सजातीयद्वितीयरहितत्वरूपस्यैव विवक्षितत्वादेकपशुकरणक-यागादेवादृष्टसिद्धिर्भवति नत्वनेकपशुकरणकयागादपि। एकत्वस्य सजातीय-द्वितीयराहित्यस्वरूपत्वानङ्गीकारे पश्वन्तरस्य व्यावृत्त्यऽलाभेनाऽनेकपशुकरण-कयागादप्यऽदृष्टसिद्धिरापतेद् न चैवं सिद्धान्तः। अत्र च स्वं पशुः तत्सजातीयो यदि द्वितीयः पशुर्यागे स्यात्तदा द्वितीयपशुनिष्ठस्यैतत्पशुभेदस्यैतत्पशुनिष्ठमेकत्वं भेदप्रतियोगितावच्छेदकं स्यादपि यागे पश्वन्तरस्याभावे चैतत्पशुनिष्ठमेकत्वं सजातीयपश्वन्तरनिष्ठभेदस्य प्रतियोगितानवच्छेदकमेव जातं तदेव सजातीय-द्वितीयराहित्यम्।

ननु यज्ञभूमौ कार्यान्तरार्थबद्धपशुसत्त्वे तन्निष्ठो य एतत्पशुभेदस्तादृशभेद-प्रतियोगितावच्छेदकमेवैतत्पशुनिष्ठमेकत्वं स्यात् तस्यापि पशोरेतत्पशु-सजातीयत्वात्, तथा यागसंबद्धघृतादिष्वप्येतत्पशुभेदोऽस्ति तादृशभेदप्रतियोगिता-वच्छेदकमप्येतत्पशुनिष्ठमेकत्वं स्यात् घृतादीनामपि यागसम्बन्धित्वेनतत्पशु-सजातीयत्वादेवेत्येतत्पशुनिष्ठैकत्वस्य कथं स्वसजातीयनिष्ठभेदप्रतियोगिता-

घटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वाऽप्रसिद्धावपि न क्षतिः—एतद्देशविद्यमानघटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्यैव तत्र बोधादिति तस्य च प्रसिद्धत्वात्। एतद्देशे बहुघटसत्त्वदशायां तादृशवाक्यप्रयोगस्तु जात्येकत्वादेव समर्थनीयः।

नवच्छेदकत्वं स्यादित्याशङ्क्य साजात्यं परिष्करोति—साजात्यं चेति, स्वेति—स्वं यजेतेत्यत्र वर्तमानतिङ्विभक्तिस्तत्समभिव्याहृतः पदार्थो यागपदार्थस्तत्संसर्गित्व-विशिष्टम्=यागसम्बन्धित्वसमानाधिकरणं यत्प्रकृत्यर्थतावच्छेदकं पशुत्वं तद्वत्त्वरूपेण साजात्यं ग्राह्यं तथा च कार्यान्तरार्थोक्तयागभूमिबद्धपशौ पशुत्व-सत्त्वेऽपि यागसंसर्गित्वं नास्तीति न स पशुरेतद्यागीयपशुसजातीयः, घृतादौ यागसंसर्गित्वसत्त्वेऽपि प्रकृत्यर्थतावच्छेदकस्य पशुत्वस्याभावान्न घृतादीनामपि यागीयपशुसजातीयत्वं तस्मान्नोक्तदोषः। अतः=उक्तरूपेण साजात्यस्य परिष्कारात् 'अत्र घटोऽस्ति' इत्यादौ घटानामनेकत्वेन परस्परं भेदाच्च नीलादिघटेषु पीतादिघटनिष्ठैकत्वस्याभावाद् अयं घटस्तद्घटनिष्ठै-कत्ववान्नेति प्रतीत्या चैकत्ववद्घटनिष्ठा या भेदप्रतियोगिता तदवच्छेदक-मेवैकत्ववद्घटनिष्ठमेकत्वं जातं नाऽनवच्छेदकमित्येवं रीत्या भेदप्रतियोगिता-नवच्छेदकस्यैकत्वस्याऽप्रसिद्धावपि क्षतिर्नास्ति, यतः—'अत्र घटोऽस्ति' इत्यत्राऽत्रपदेनैतद्देश उपस्थाप्यते तथा चैतद्देशविद्यमानघटसजातीयो घट एतद्देशविद्यमान एव घटो भविष्यति न तु घटमात्रम् एतद्देशे च घटान्तरस्याभावाद् देशान्तरवर्तिघटे घटत्वसत्त्वेप्येतद्देशवृत्तित्वाभावेन साजात्या-भावादेतद्देशविद्यमानघटे यदेकत्वं तद् एतद्देशविद्यमानघटनिष्ठाया भेदप्रतियोगिताया अनवच्छेदकमेव जातम् एतद्देशविद्यमानघटे सजातीयनिष्ठभेद प्रतियोगिताया एवाभावात्। एतद्देशविद्यमानत्वसमानाधिकरणघटत्ववत्त्वेन सजातीयस्याभावात्। तत्र='अत्र घटोऽस्ति' इत्यत्र चैतद्देशविद्यमान-घटनिष्ठप्रतियोगितानवच्छेदकस्यैवैकत्वस्य बोधात् तस्य= एतद्रूपैकत्वस्य चैतद्देशविद्यमानघटे प्रसिद्धत्वात्। ननु बहुघटसत्त्वदशायाम् 'अत्र घटोस्ति' इत्येकवचनान्तः प्रयोगो भवति तस्य का गतिरित्याशङ्क्याह- बहुघटेति, बहुघटसत्त्वदशायाम् 'अत्र घटोऽस्ति' इत्येतादृशवाक्यप्रयोगस्तु जात्येकत्वादेव समर्थनीयः। अर्थात् 'संपन्नो व्रीहिः' इत्यत्रेव घटत्वजातावेकत्वान्वयः

यत्तु– एकत्वाविवक्षायामपि भावाख्यातस्थले एकवचनस्य साधुत्वदर्शनात् संख्याया अविवक्षणेऽपि 'संपन्नो व्रीहिः' इत्यादावेकवचनोपपत्तेरलं जात्येकत्वपरतया तत्र समर्थनेनेति, तदप्यकिंचित्करम्–भावाख्यातस्थले गत्यन्तरविरहेण विभक्तेर्निरर्थकत्वोपगमात्, अत्र च सार्थकत्वोपगमसंभवे तत्परित्यागस्याऽनुचितत्वात्, सति तात्पर्ये तद्बोधस्याऽऽनुभविकत्वाच्चेति।

कर्तव्यः किं वा स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसम्बन्धेन घटेष्वेवान्वय कर्तव्यः स्वमेकत्वं तदाश्रयीभूतं यत् प्रकृत्यर्थतावच्छेदकं घटत्वं तद्वत्त्वं सकलघटेष्वस्त्येव तेन सम्बन्धेनानेकघटेष्वप्येकत्वान्वये न कोपि दोष इत्यर्थः।

ननु 'आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति प्रथमान्तपदजन्योपस्थितिः कारणम्' इति नियमेन 'देवदत्तः पचति' 'तण्डुलः पच्यते' इत्यादौ देवदत्ततण्डुलादिप्रथमान्तपदसत्त्वेन तत्र देवदत्ततण्डुलादावाख्यातार्थसंख्याया अन्वयेन सार्थक्येऽपि 'त्वया गम्यते' 'अन्यैर्गम्यते' इत्यादौ भावाख्यातस्थले प्रथमान्तपदाभावेनाख्यातार्थसंख्याया क्वचिदप्यन्वयाभावात् सार्थक्यं न भवति तत्कस्य हेतोः संख्याया अविवक्षणात्, तथा च यथा भावाख्यातस्थले संख्याया अविवक्षायामप्येकवचनस्य साधुत्वं भवति तथा 'संपन्नो व्रीहिः' इत्यादावपि संख्याया अविवक्षायामप्येकवचनस्य साधुत्वं संभवतीति किमर्थं व्रीहित्वजातावेकत्वान्वयेन गौरवमाश्रीयते इत्याशङ्कते–यत्त्विति। परिहरति–तदपीति, भावाख्यातस्थले प्रथमान्तपदाभावेनाख्यातार्थसंख्यायाः क्वचिदप्यन्वयासंभवाद् गत्यन्तरविरहेण निरर्थकत्वस्वीकारेऽपि सर्वत्र निरर्थकत्वाश्रयणं तु न युक्तं भवति तस्मादत्र= 'संपन्नो व्रीहिः' इत्यादौ च संख्याया जातावन्वयेन सार्थकत्वसंभवे तत्परित्यागस्य=विभक्त्यर्थसंख्यासार्थकत्वपरित्यागस्यानुचितत्वात्। प्रत्युत 'संपन्नो व्रीहिः' इत्यादावत्यावश्यकं संख्यासार्थकत्वमित्याह– सतीति। तद्बोधस्य=संख्याबोधस्यानुभविकत्वाद् वक्तुः संख्यायां तात्पर्ये सति संख्याबोधोपि भवत्येवेति प्रसिद्धमेव तथा च कथं सर्वत्र संख्याया निरर्थकत्वं

एवम् "त्रयः समुदिता हेतुः" इत्यत्र हेतुपदं कार्योत्पाद-प्रयोजकतावच्छेदकसमुदायत्वावच्छिन्नपरं तादृशसमुदाय-त्वान्वितमेकत्वमेकवचनार्थः, अत एव शक्त्यादीनां त्रयाणां तृणारणिमणिन्यायेन हेतुत्वशङ्कानिरासः, तथा सत्येषा मेकैक-समवधानदशायामपि कार्योत्पत्तेरावश्यकतया तत्त्रितयपर्याप्त-समुदायत्वस्य कार्योत्पत्तिप्रयोजकतानवच्छेदकतया तेषां त्रयाणां तथाविधैकसमुदायत्वाश्रयत्वाऽनुपपत्तेः।

स्यादित्याक्षेपः।

"त्रयः समुदिता हेतुः" इत्येकवचनस्य गतिमाह—एवमिति। कार्यं काव्यम्, उत्पादः=उत्पत्तिः, काव्योत्पत्तिप्रयोजकता च शक्तिनिपुणताभ्यासानां त्रयाणां समुदायेऽस्तीति प्रयोजकतावच्छेदकं समुदायत्वं तादृशसमुदाय-त्वावच्छिन्नसमुदायपरं चात्र हेतुपदमिति तादृशसमुदायत्वे एकत्वान्वयः। तादृशसमुदायत्वं=कार्योत्पादप्रयोजकतावच्छेदकसमुदायत्वं। एकत्वविशिष्टं यत्कार्योत्पादप्रयोजकतावच्छेदकसमुदायत्वं तद्धर्मवन्तस्त्रय इति वाक्यार्थः। अत एव=समुदायत्वे एकत्वान्वयस्वीकारादेव यथा तृणारणिमणीनां वह्निं प्रति पृथक् पृथगेव हेतुत्वमस्ति केवलतृणसत्त्वेऽपि वह्न्युत्पत्तिदर्शनात्, न तथा शक्त्यादीनां काव्यं प्रति पृथक् पृथग् हेतुत्वमस्ति शक्त्यादि-ष्वेकैकसत्त्वेऽप्यपरद्वयाभावे काव्योत्पत्त्यऽदर्शनादिति तृणारणिमणिन्यायेन हेतुत्वशङ्कानिरासः। विपक्षे बाधकमाह— तथासतीति, काव्यं प्रति शक्त्यादीनां तृणारणिमणिन्यायेन हेतुत्वे सति शक्त्यादिष्वेकैकमात्रसत्त्वदशायामपि काव्यलक्षणकार्योत्पत्तेरावश्यकतया शक्त्यादित्रितयपर्याप्तं यत्समुदायत्वं तस्य काव्यलक्षणकार्योपत्तिं प्रति प्रयोजकतावच्छेदकत्वं न स्यादिति प्रयोजकतान-वच्छेदकत्वापत्तौ तेषाम्=शक्त्यादीनां त्रयाणां तथाविधम्=कार्योत्पादप्रयोजक-तावच्छेदकं यदेकं समुदायत्वं तदाश्रयत्वं न स्यादेव तथा चैकैकसमवधान-दशायामपि काव्योत्पत्त्याऽऽपत्तौ तृणारणिमणिन्यायेनैव हेतुत्वं स्यात् तथा च "हेतुः" इत्येकवचनमनुपपन्नं स्यात्तस्माच्छक्त्यादीनां त्रयाणामपि काव्योत्पत्ति-प्रयोजकतावच्छेदकसमुदायत्वाश्रयत्वं स्वीकार्यं ततश्च तादृशसमुदायत्वे एके एकवचनार्थैकत्वस्यान्वयस्तथा च न कोपि दोष इत्यर्थः।

एवम् "जात्याकृतिव्यक्तयः पदार्थः" इत्यत्र त्रितयनिष्ठस्य पदशक्तिरूपपदार्थत्वस्यैकत्वं विवक्षितमिति तत्र विशेष्यपदस्य बहुवचनान्तत्वेऽपि विशेषणपदस्यैकवचनान्ततोपपत्तिः।

प्रत्यक्षानुमानेत्यादिसूत्रे प्रमाकरणत्वरूपप्रकृत्यर्थतावच्छेदकस्य प्रत्यक्षानुमानादिनिष्ठस्यैकताया बाधितत्वेनाऽविवक्षितत्वात् प्रमाणपदस्य बहुवचनान्ततेति।

एवम् "पितरो देवताः" इत्यत्रापि पितृपितामहादीनां सहितानामेकरूपेण देवतात्वविरहेण पितृत्वपितामहत्वादिना पृथगेव त्यागोद्देश्यत्वरूपदेवतात्वम्। उद्देश्यतावच्छेदकभेदे-

---

"जात्याकृतिव्यक्तयः पदार्थः" इत्यत्रत्यविभिन्नवचनकत्वस्य व्यवस्थां व्याकरोति—एवमिति। त्रितयनिष्ठस्य=जात्याकृतिव्यक्तिनिष्ठस्य पदार्थत्वस्यैकत्वं विवक्षितमस्ति यतः पदवाच्यत्वं तर्कमते जात्याकृतिव्यक्तित्रितयपर्याप्तमस्तीति विशेष्यपदस्य=जात्याकृतिव्यक्तिपदस्य बहुवचनान्तत्वेऽपि विशेषणपदस्य=पदार्थपदस्यैकवचनान्तत्वं युक्तमेव। पदार्थत्वं पदार्थे भवति पदशक्तिरपि निरूपकत्वसम्बन्धेन पदार्थे भवतीति पदार्थत्वस्य पदशक्तिरूपत्वमुक्तमित्यवधेयम्।

प्रत्यक्षेति—"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इत्यत्र प्रमाणानीतिबहुवचनान्तस्य प्रकृत्यर्थतावच्छेदकं यत् प्रमाकरणत्वं तस्यैकस्य प्रत्यक्षादिप्रमाणचतुष्टयेऽसंभवेन बाधितत्वात् प्रमाकरणत्वनिष्ठैकत्वस्याऽविवक्षितत्वेन प्रमाणपदस्यात्र बहुवचनान्तत्वम्। प्रत्यक्षादीनामिन्द्रियसंयोगादिलक्षणसामग्रीभेदेन तन्निष्ठप्रमाकरणत्वस्यापि भेदादित्यर्थः।

"पितरो देवताः" इत्यत्रत्यसमानवचनत्वमुपपादयति—एवमिति। पितृपितामहादिष्वेकं देवतात्वं नास्तीति पितृपितामहादिषु यद् देवतात्वं तत्रैकत्वं नास्तीत्येकत्वस्याऽविवक्षितत्वाद् बहुत्वस्य च विवक्षितत्वाद् विशेषणवाचकं देवतापदमपि बहुवचनान्तमेव। पितृपितामहादिनिष्ठदेवतात्वस्यैकत्वाभावमुपपादयति—उद्देश्यतेति, त्यागोद्देश्यत्वमेव हि देवतात्वं त्यागोद्देश्यता च

नैवोद्देश्यताभेदात्, तत्रैकत्वस्याविवक्षया देवतापदस्य बहुवचनान्ततेति दिक्।

स्वप्रकृतिकत्वं च=स्वाव्यवहितोत्तरत्वेन प्रतिसन्धीयमानत्वम्, तेन 'दधिसुन्दरम्' इत्यादौ विशेष्यपदानन्तरं विभक्तेरसत्त्वेऽपि न क्षतिः– तत्र विभक्तेरनुसंधानं विना शाब्दबोधानुपगमात्। एवं तादृशविभक्तिसजातीयविभक्तिकत्वमपि तथाविधविभक्त्यव्यवहितपूर्ववर्तितया प्रतिसंधीयमानत्वम्, तेन 'इदं दधि' इत्यादौ विशेषणपदानन्तरं विभक्तेरसत्त्वेऽपि न क्षतिः।

पित्रादौ वर्तते उद्देश्यतावच्छेदकं च पितृत्वपितामहत्वादिकं न च पितृत्वपितामहत्वादिकमेकमस्तीत्युद्देश्यतावच्छेदकस्य पितृत्वादेर्भेदेनोद्देश्यताया अवश्यं भेदात् उद्देश्यताया भेदे उद्देश्यतारूपदेवतात्वस्याऽप्यर्थाद् भेदात् तत्र=देवतात्वे एकत्वस्य बाधितत्वेनाविवक्षया देवतापदस्य बहुवचनान्तता।

यदुक्तम्–"स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वम् (पृ. ४)" इति तत्र वैयाकरणैः स्वप्रकृतिकत्वस्य "स्वनिष्ठोद्देश्यतानिरूपितविधेयतावत्त्वं स्वप्रकृतिकत्वम्" इति लक्षणमुक्तम् अत्र स्वं घटादिपदं तदुद्दिश्य विभक्तेर्विधानाद् विभक्तौ घटादिपदनिष्ठोद्देश्यतानिरूपितविधेयतावत्त्वमस्त्येव यद्यपि तथापि विभक्तिनिष्ठैतादृशस्वप्रकृतिकत्वस्याऽवैयाकरणानां ज्ञानाऽसंभवात् स्वप्रकृतिकत्वस्य स्वविवक्षितस्वरूपमाह– स्वप्रकृतिकेति, स्वं घटादिपदं तत्प्रकृतिकत्वं विभक्तौ स्वं घटादिपदं तदऽव्यवहितोत्तरत्वेन प्रतिसन्धीयमानत्वम्=स्मृतिविषयत्वमेव तथा च 'दधि सुन्दरम्' इत्यत्र दधिपदोत्तरं विभक्तेरभावेऽपि व्यासस्थले लुप्तविभक्तेः स्मरणस्वीकाराद् विभक्तौ दधिपदाव्यवहितोत्तरत्वेन प्रतिसन्धीयमानत्वमस्त्येवेत्याह– तेनेत्यादिना। तत्र= 'दधि सुन्दरम्' इत्यादौ। उत्तरत्वेनेति प्रकारत्वं तृतीयार्थस्तथा चाव्यवहितोत्तरत्वप्रकारकस्मृतिविषयत्वं किं वा उत्तरत्वनिष्ठप्रकारतानिरूपितविशेष्यताश्रयीभूतस्मृतिविषयत्वं स्वप्रकृतिकत्वमिति वाक्यार्थः। स्वप्रकृतिकेत्युक्तवाक्यस्योत्तरभागं व्याकरोति– एवमिति। तादृश=स्वप्रकृतिक। तथाविध=स्वप्रकृतिक। विशेषणवाचक पदे यत्स्वप्रकृतिकविभक्तिसजातीय-

अथ 'नीलस्य घटः' इत्यादावपि पदार्थोपस्थित्यादि-कारणसमवधानसंभवात् कथं न नीलघटाद्योरभेदान्वयबोधः— सामग्र्या कार्यजनने उक्तनियमभङ्गप्रसङ्गरुपबाधकस्या-किंचित्करत्वादितिचेत्? तथाविधान्वयबोधौपयिकाऽऽकाङ्क्षा-विरहात्। तथा हि— तादृशान्वयबोधे प्रथमाविभक्त्यन्तघटादि-पदसमभिव्याहृतप्रथमान्तनीलादिपदत्वमेवासमस्तनीलघट-पदाद्याकाङ्क्षा समासस्थले च घटादिपदाव्यवहितपूर्ववर्ति-

---

विभक्तिकत्वमस्ति तत् तथाविधविभक्त्यव्यवहितपूर्ववर्तितया प्रतिसन्धीय-मानत्वमेव यथा 'नीलो घटः' इत्यत्र घटपदोत्तरवर्तमानप्रथमाविभक्त्य-व्यवहितपूर्ववर्तितया ज्ञानविषयत्वं नीलपदेऽस्त्येव, तथा च 'इदं दधि' इत्यत्र दधिपदोत्तरं विभक्तेरभावेऽपि तस्याः प्रतिसन्धयीयमानत्वात् तत्पूर्ववर्तितया प्रतिसन्धीयमानत्वरूपं ज्ञानविषयत्वं दधिपदेऽस्त्येवेति न कोपि दोष इत्यर्थः।

ननु सत्यां सामग्र्यां कार्योपत्तिर्भवत्येव शाब्दबोधं प्रति चोपस्थित्यादिक-मेव कारणं तत्र 'नीलस्य घटः' इत्यत्र नीलपदेन नीलत्वावच्छिन्नविषया घटपदेन च घटत्वावच्छिन्नविषयोपस्थितिरप्यस्त्येव नीलघटयोरभेदस्य योग्यताज्ञानमस्त्येवेत्यऽभेदसम्बन्धावच्छिन्ननीलत्वावच्छिन्नप्रकारतानिरूपित-घटत्वावच्छिन्नविशेष्यताकज्ञानं कथं न जायते? यद्युच्येत समानविभक्तिकत्व-स्थले एवाऽभेदसम्बन्धो भासते इति 'नीलस्य घटः' इत्यत्राप्यभेदभाने समानविभक्तिकत्वनियमस्य भङ्गो भविष्यतीति, तदा सत्यां सामग्र्यां कार्योत्पत्तौ नियमविशेषभङ्गस्याकिञ्चित्करत्वेन प्रतिबन्धकत्वं न संभवतीत्याशङ्कते— अथेति। उत्तरमाह— तथाविधेति। तथाविधः= अभेदसम्बन्धप्रकारको योऽन्वयबोधः=शाब्दबोधस्तत्कारणीभूताया आकाङ्क्षाया अभावादेव 'नीलस्य घटः' इत्यत्र नीलघटयोरभेदो न भासते आकाङ्क्षां विना शाब्दबोधास्वीकारात्। उक्तमुपपादयति— तथाहीति। तादृशान्वयबोधे=अभेदसम्बन्धावच्छिन्ननील-त्वावच्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यताकशाब्दबुद्धित्वावच्छिन्नं प्रति प्रथमान्तघटपदसमभिव्याहृतप्रथमान्तनीलपदत्वं व्यासस्थले आकाङ्क्षा, समासस्थले च घटपदाव्यवहितपूर्ववर्तिनीलपदत्वं (नीलघटः) नीलपदाव्यव-

नीलादिपदत्वं नीलादिपदाव्यवहितोत्तरवर्तिघटादिपदत्वं वाऽऽकाङ्क्षा। उक्तस्थले च तादृश्या एकस्या अप्याकाङ्क्षाया विरहान्नापत्तिः। कार्यतावच्छेदककोटावव्यवहितोत्तरत्व-निवेशान्नोक्ताऽऽकाङ्क्षाज्ञानयोः परस्परबोधे व्यभिचारः।

यत्तु– समासव्यासससाधारणविशेषणपदस्य विशेष्य-वाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वरूपं विरुद्धविभक्ति-राहित्यमेव तादृशान्वयबोधौपयिकाऽऽकाङ्क्षा, विशेष्यवाचकपद-

---

हितोत्तरवर्तिघटपदत्वं वाऽऽकाङ्क्षा, एतादृशाकाङ्क्षायाश्च कारणत्वाद् उक्तस्थले= 'नीलस्य घटः' इत्यत्र चोक्तरूपा एकाप्याकाङ्क्षा नास्तीत्यभेदान्वयबोध-कारणीभूताया आकाङ्क्षाया अभावेनाऽभेदसम्बन्धप्रकारकशाब्दबोधरूपकार्यस्य सामग्र्येव नास्तीति कथमभेदसम्बन्धप्रकारकः शाब्दबोधः स्यादित्यर्थः। आपत्तिः=शाब्दबोधापत्तिः।

नन्वऽनेकविधा खल्वाकाङ्क्षा त्वयोक्ता एकस्मिन् स्थले चैकरूपैवाकाङ्क्षा संभवतीत्याऽऽकाङ्क्षाणामऽपरापराकाङ्क्षाजन्यशाब्दबोधे व्यभिचारात्कथं कारणत्वं स्याद् अव्यभिचारिण एव कारणत्वस्वीकारादित्याशङ्क्याह– कार्यतेति, यथा वह्निं प्रत्यनेकेषां तृणारण्यादीनां कारणत्वेऽपि तृणोत्तरजायमानवह्नित्वावच्छिन्नं प्रति तृणं कारणम् अरण्युत्तरत्वविशिष्टवह्निं प्रत्यरणिः कारणमित्येवं कार्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशेन न तृणादीनां व्यभिचारशङ्का तथात्रापि समासस्थले घटादिपदाव्यवहितपूर्ववर्तिनीलादिपदज्ञानानन्तर-त्वविशिष्टशाब्दबोधं प्रति घटादिपदाव्यवहितपूर्ववर्तिनीलादिपदत्वमाकाङ्क्षा नीलादिपदाव्यवहितोत्तरवर्तिघटादिपदज्ञानान्तरत्वविशिष्टशाब्दबोधं प्रति नीलादिपदाव्यवहितोत्तरवर्तिघटादिपदत्वमाकाङ्क्षा इत्येवं कार्यतावच्छेदक-कोटावव्यवहितोत्तरत्वनिवेशेनोक्तसमासस्थलीयाकाङ्क्षाज्ञानयोर्नाऽपराऽपरजन्य-शाब्दबोधे व्यभिचारः–अपरजन्यशाब्दबोधं प्रत्यऽपरस्य कारणत्वाभावादित्यर्थः।

समासव्यासयोराकाङ्क्षाया उक्तरीत्या पृथक् पृथक् स्वरूपस्वीकारापेक्षया लाघवाद् यत्केनापि समासव्यासोभयसाधारणमेकमेवाकाङ्क्षास्वरूपं प्रदर्शितं परिहाराय तदुपस्थापयति यत्त्विति। विशेषणेति–यथा 'नीलो घटः' इत्यत्र

निष्ठविशेषणवाचकपदाऽप्रकृतिकविभक्त्यप्रकृतित्वं च न तथा'नीलघटमानय' इत्यादावसंभवादिति, तदसत्– विशेष्यवाचकपदाप्रकृतिकत्वस्य तादृशपदानुत्तरत्वरूपस्य तदुत्तरत्वेनाप्रतिसन्धीयमानत्वरूपस्य वा 'नीलो घटः' इत्यादौ

विशेष्यवाचकघटपदप्रकृतिका विभक्तिः सुविभक्तिः, विशेष्यवाचकघट-पदाऽप्रकृतिकविभक्तिरम् विभक्तिः तादृशाऽम्विभक्त्यऽप्रकृतित्वरूपमेव विरुद्धविभक्तिराहित्यं तदेव तादृशान्वय=अभेदसम्बन्धावच्छिन्ननीलत्वाव-च्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्नशाब्दबोधं प्रत्याकाङ्क्षास्तीति एतादृश-विरुद्धविभक्तिराहित्यस्य 'नीलो घटः' इत्यत्र नीलपदे सत्त्वादभेदो भासते, विशेष्यवाचकपदोत्तरं या विभक्तिर्नास्ति सा विशेषणवाचकपदोत्तरं न स्यादित्यर्थः। 'नीलस्य घटः' इत्यत्र चोक्तविरुद्धविभक्तिराहित्यस्याकाङ्क्षा-रूपस्याभावाद् नीलपदे विरुद्धविभक्तेरेव सत्त्वादभेदो न भासते। ननु विशेष्यवाचकपदनिष्ठं यद् विशेषणवाचकपदाऽप्रकृतिकविभक्त्यऽप्रकृतित्वं तदेव विरुद्धविभक्तिराहित्यं किं न स्यात्? यथा– 'नीलो घटः' इत्यत्र विशेषणवाचकनीलपदप्रकृतिका विभक्तिः सुविभक्तिः नीलपदाऽप्रकृतिक-विभक्तिरम्विभक्तिस्तादृशाऽम्विभक्त्यप्रकृतित्वं विशेष्यवाचकघटपदेऽस्त्येवेति लक्षणसमन्वय इत्याशङ्कते– विशेष्येति। परिहरति– न तथेति, 'नीलघटमानय' इत्यत्राभेदसम्बन्धोदाहरणे समन्वयाऽसंभवादित्यर्थः, तथाहि– अत्र विशेषण-वाचकनीलपदोत्तरं विभक्तिरेव नास्ति समासस्थले लुप्तविभक्तिस्मरणस्य चाऽस्वीकारात् विशेषणवाचकनीलपदाऽप्रकृतिका याऽम्विभक्तिस्तत्प्रकृतित्वमेव विशेष्यवाचकघटपदेऽस्ति न तु तदऽप्रकृतित्वरूपं विरुद्धविभक्तिराहित्य-मित्यव्याप्तिर्दोषः। पूर्वोक्तमदुक्तलक्षणेन तु 'नीलघटमानय' इत्यत्रापि विशेष्यवाचकघटपदाप्रकृतिका याऽम्भिन्नस्वादिविभक्तिस्तदप्रकृतित्वं नीलपदेऽस्त्येव नीलपदोत्तरं कस्यापि विभक्तेरभावादिति न कोपि दोष इत्यर्थः।

इत्येवमाशङ्क्य परिहरति– तदसदिति। विशेष्यवाचकेत्यादिलक्षणस्य हि 'विशेषणवाचकपदोत्तरविभक्तौ विशेष्यवाचकपदाऽप्रकृतिकत्वं न स्यात्' इत्ययमेवार्थस्तथा च 'नीलो घटः' इत्यत्र नीलपदोत्तरविभक्तौ घटपदाप्रकृति-

नीलादिपदसमभिव्याहृतविभक्तौ घटपदसमभिव्याहृतविभक्ति-भिन्नतया सत्त्वात्।

अथ विशेष्यवाचकपदोत्तराऽवृत्तिविभक्तिविभाजकधर्म-वद्विभक्तिराहित्यस्य विवक्षणान्न दोष इति चेत्? तर्हि विभक्तित्वादिकमजानतः पुरुषस्य तादृशधर्मज्ञानासंभवाच्छाब्द-बोधानुपपत्तिः। 'नीलो घटः' इत्यादावपि सुपदस्याऽम्-

---

कत्वं नास्ति– उभयत्र सुविभक्तेरेव सत्त्वेन घटपदप्रकृतिकत्वस्यैव सत्त्वात् 'नीलघटम्' इत्यत्र तु नीलपदोत्तरं विभक्तिरेव नास्तीति घटपदाऽप्रकृतिकत्वं सुतरां नास्त्येवेति वक्तव्यम्। विशेष्यवाचकपदाऽप्रकृतिकत्वं च निषिध्यमानं तादृशपदानुत्तरत्वम्=विशेष्यवाचकपदानुत्तरत्वं वा तदुत्तरत्वेन=विशेष्यवाचक-पदोत्तरत्वेनाऽप्रतिसन्धीयमानत्वं वा वक्तव्यम्, तत्र हि "प्रत्युच्चारणं शब्दो भिद्यते" इति न्यायेन 'नीलो घटः' इत्यादौ नीलपदोत्तरं सुविभक्तिर्भिन्नास्ति घटपदोत्तरं च भिन्नास्तीति नीलपदोत्तरं समभिव्याहृतविभक्तौ=उच्चारित-सुविभक्तौ घटपदोत्तरसमभिव्याहृतसुविभक्त्यपेक्षया भेदस्य सत्त्वाद् निषिध्यमानं विशेष्यवाचकपदाऽप्रकृतिकत्वमेवायातमिति कथमभेदसम्बन्धभानं स्यात्? विशेष्यवाचकपदप्रकृतिकविभक्तेर्विशेष्यवाचकपदोत्तरमेव संभवादिति समास-व्याससाधारणं विरुद्धविभक्तिराहित्यं यदुक्तं तन्न युक्तमित्यर्थः।

ननु विरुद्धविभक्तिराहित्येन हि विशेष्यवाचकपदोत्तरावृत्तिविभक्ति-विभाजकधर्मवद्विभक्तिराहित्यं विवक्षितमस्ति यथा– 'नीलो घटः' इत्यत्र विशेष्यवाचकघटपदोत्तरावृत्तिविभक्तिरमादिविभक्तिस्तद्विभाजको यो धर्मो द्वितीयात्वादिस्तद्वद्विभक्तिरमादिविभक्तिस्तद्राहित्यमपेक्षितं तच्च विशेषण-वाचकनीलपदेऽस्त्येव एवम् 'नीलघटम्' इत्यत्र विशेष्यवाचकपदोत्तरा-वृत्तिविभक्तिविभाजको धर्मस्तृतीयात्वादिस्तद्वद्विभक्तिराहित्यं नीलपदेऽस्त्येव नीलपदोत्तरं कस्या अपि विभक्तेरसत्त्वादिति नोक्तदोष इत्याशङ्कते– अथेति। परिहरति–तर्हीति, विभक्तिविभाजकत्वादिधर्माणां वैयाकरणस्यैव ज्ञानं संभवति नान्यस्येत्यवैयाकरणानाम् 'नीलो घटः' इत्यादावभेदसम्बन्धप्रकारकः शाब्दबोधो न स्याद् न चैतदिष्टम्। अयं भावः– उक्तविभक्तिराहित्यमेवाकाङ्क्षा, आकाङ्क्षा च न स्वरूपसती शाब्दबोधं प्रति कारणं किन्तु ज्ञाता सत्येव

पदत्वादिभ्रमदशायां तादृशबोधस्यानुदयात् 'नीलस्य घटः' इत्यादावपि षष्ठ्यादेः सुपदत्वादिभ्रमदशायां शाब्दबोधोत्पत्त्या स्वरूपतो विरुद्धविभक्तिराहित्यस्याप्रयोजकत्वात्।

अथ 'नीलो घटः' 'नीलघटः' इत्यादिद्विविधबोधसाधारणं स्वोत्तरसुप्पदभिन्नपदानुत्तरत्वविशिष्टस्वोत्तरत्वादिरूपस्वा-

---

उक्तराहित्यरूपाया विशिष्टाया आकाङ्क्षाया ज्ञानं च तद्विशेषणीभूतविभक्ति-विभाजकधर्मादीनां ज्ञानं विना न संभवतीति विभक्तित्वादिकमजानतः पुरुषस्य तादृश=विभक्तिविभाजकधर्मज्ञानासंभवेन शाब्दबोधानुपपत्तिरिति दोषः।

ननु यदि शाब्दबोधं प्रत्याकाङ्क्षा ज्ञाता सत्येव कारणं स्यात्तदोक्तदोषः स्यादपि नैवमस्ति किन्तु स्वरूपसत्येवाकाङ्क्षा शाब्दबोधं प्रति कारणमस्ति तथा चाकाङ्क्षाज्ञानापेक्षाऽभावादाऽऽकाङ्क्षारूपस्य विशेष्यवाचकपदोत्तरावृत्ति-विभक्तिविभाजकधर्मवद्विभक्तिराहित्यस्य कुक्षिप्रविष्टविभक्तित्वादीनामपि ज्ञानापेक्षाभावाद्विभक्तित्वादिकमजानतः पुरुषस्य न शाब्दबोधानुपपत्ति-रित्याशङ्क्याह—नीलो घट इति, यद्याकाङ्क्षा स्वरूपसत्येव कारणं स्यात्तदा 'नीलो घटः' इत्यत्रोक्तविभक्तिराहित्यरूपाकाङ्क्षायाः सत्त्वात् सुपदस्या-ऽम्पदत्वादिभ्रमदशायामप्यऽभेदप्रकारकः शाब्दबोधः स्यादेव न च भवति तस्मादाकाङ्क्षाज्ञानस्यैव कारणत्वं वक्तव्यं तथा चात्राम् पदस्वादिभ्रमदशायामुक्त-विभक्तिराहित्यरूपाकाङ्क्षाज्ञानाभावान्न शाब्दबोध इत्युपपद्यते। तथा 'नीलस्य घटः' इत्यादावपि यदा षष्ठ्यादौ सुपदत्वादिभ्रमो भवति तदोक्तविभक्ति-राहित्वरूपाकाङ्क्षायाः ज्ञानसत्त्वाच्छाब्दबोध उपपद्यते जायते च, यद्याकाङ्क्षा स्वरूपसत्येव कारणं स्यात्तदा वस्तुतः 'नीलस्य घटः' इत्यत्रोक्ताकाङ्क्षाया असत्त्वात् षष्ठ्यादौ सुपदत्वभ्रमदशायामपि शाब्दबोधो न स्याद् भवति तु तस्मादाकाङ्क्षाज्ञानस्यैव कारणत्वं प्राप्तं तथा चोक्तो विभक्तित्वादिकमजानतः पुरुषस्य शाब्दबोधानुपपत्तिरूपो दोषस्तदवस्थ एवेत्यर्थः।

ननु निखिलबोधसाधारणाकाङ्क्षानिर्वचनस्याशक्यत्वेऽपि 'नीलो घटः' 'नीलघटः' 'नीलं घटम्' 'नीलघटम्' इत्यादिद्विविधबोधसाधारणं त्वाकाङ्क्षा-स्वरूपं निर्वक्तुं शक्यते तच्च स्वोत्तरसुप्पदेत्यादिः ज्ञेयम्, तथा हि स्वं

व्यवहितोत्तरत्वसंबन्धेन नीलादिपदवत्सुबन्तघटादिपदत्वमेव तथास्तु इति चेत्? न– 'नीलघटरूपम्' इत्यादिवाक्यसाधारण्यानुरोधेनाऽन्यादृश्या अपि आकाङ्क्षायाः समासस्थले उपगन्तव्य तयोपदर्शितसमासव्याससाधारणानुगताकाङ्क्षानुसरणस्याप्रयोजकत्वादिति।

विशेषणवाचकनीलपदं तदुत्तरवर्ति यत् सुपपदं विभक्तिपदं तद्भिन्नं यत् पटादिपदं तदनुत्तरत्वविशिष्टं स्वं विशेषणवाचकपदं तदुत्तरत्वादिरूपं यत् स्वाव्यवहितोत्तरत्वं तेन सम्बन्धेन नीलादिपदवत् यत्सुबन्तघटादिपदं तत्त्वमेवाकाङ्क्षा तथा चात्र घटपदे नीलपदोत्तरवर्तमानविभक्तिपदोत्तरत्वसत्त्वेऽपि तद्भिन्नपटादिपदानुत्तरत्वमप्यस्त्येव तथा नीलपदोत्तरत्वमप्यस्त्येवेत्यनेन सम्बन्धेन घटपदे नीलपदवत्त्वमुभयत्रास्त्येव तदेवाकाङ्क्षास्त्वित्याशङ्कते– अथेति। तथा नामाऽऽकाङ्क्षा। 'नीलस्य घटः' इत्यादिप्रयोगवारणाय सुप्पदभिन्नपदेनात्र विशेष्यवाचकघटादिपदोत्तरवर्तमानविभक्तिपदभिन्नपदं ग्राह्यं तथा च 'नीलस्य घटः' इत्यत्र विशेष्यवाचकघटादिपदोत्तरवर्तमानं यत् प्रथमाविभक्तिपदं तद्भिन्नं यत् षष्ठीविभक्तिपदं तदुत्तरत्वमेव घटपदेस्ति तदनुत्तरत्वं नास्तीति नात्रोक्ताकाङ्क्षा। तथा चात्र 'विशेष्यवाचकघटादिपदोत्तरविभक्तिवृत्तिविभक्तिविभाजकप्रथमात्वादिधर्मावच्छिन्नपदभिन्नपदानुत्तरत्वविशिष्टस्वोत्तरत्वादिरूपस्वाव्यहितोत्तरत्वसम्बन्धेन नीलादिपदवत्सुबन्तघटादिपदत्वमाकाङ्क्षा' इत्येवमाकाङ्क्षास्वरूपं वक्तव्यम्। परिहरति– नेति, 'नीलघटरूपम्' इत्यत्रापि शाब्दबोध इष्टः किन्तु त्वदुक्तोक्ताकाङ्क्षास्वरूपं न घटते यतो नीलं च तद् घटरूपमिति कर्मधारयेण विशेष्यवाचकरूपपदे विशेषणवाचकनीलपदाव्यवहितोत्तरत्वं नास्ति मध्ये घटपदेन व्यवधानात्, न च घटरूपमित्येकपदं तर्कमते "शक्तं पदम्" इति नियमेन घटपदस्य भिन्नत्वाद् रूपपदस्य च भिन्नत्वात्, तस्मात् 'नीलघटरूपम्' इत्यत्र जायमानशाब्दबोधनिर्वाहार्थमऽन्यादृशमाकाङ्क्षास्वरूपं वक्तव्यं तच्च– 'स्वोत्तरसुप्पदभिन्ननिराकाङ्क्षापदानुत्तरत्वविशिष्टस्वोत्तरत्वादिरूपस्वाव्यवहितोत्तरत्वसम्बन्धेन नीलादिपदवत्सुबन्तघटादिपदत्वम्' इति, लक्षणसमन्वयः पूर्ववदेव 'नीलो घटः' 'नीलघटः' इत्यादौ विशेष्यवाचकघटपदे निराकाङ्क्षपदानुत्तरत्वमस्त्येव तथा 'नीलघटरूपम्' इत्यत्र यद्यपि

अथ 'नीलं घटमानय' इत्यादौ नीलादेर्घटादावन्वयोगमे नीलादिपदोत्तरविभक्त्यर्थकर्मत्वादेः कुत्रान्वय इति चेत्? न कुत्रापि, विभक्तिपदं साधुत्वार्थमेव प्रयुज्यते। अभेद एव वा विशेषणविभक्तेरर्थः, अभेदस्य संसर्गमर्यादया भानं तु समासस्थले एव तत्र लुप्तविभक्तेरनुसंधानं विनापि शाब्दबुद्धेरानुभविकत्वादित्यपि वदन्ति।

अथैतन्मते–अभेदो यदि भेदत्वावच्छिन्नाभावस्तदाऽप्र-

नीलरूपपदयोर्मध्ये घटपदव्यवधानेन रूपपदे स्वोत्तरसुप्पदभिन्नपदानुत्तरत्वं नास्ति तथापि स्वोत्तरसुप्पदभिन्ननिराकाङ्क्षपदानुत्तरत्वं त्वस्त्येव घटपदस्य रूपपदसाकाङ्क्षत्वेन निराकाङ्क्षत्वाभावादित्येतादृश्या आकाङ्क्षाया अवश्यम-भ्युपगन्तव्यत्वे त्वदुक्ताकाङ्क्षाऽभ्युपगमस्य निरर्थकत्वादित्यर्थः।

ननु 'नीलं घटमानय' इत्यत्र नीलस्य तु घटेऽन्वयो भवतीति प्रसिद्धं किन्तु नीलपदोत्तरद्वितीयाविभक्तयर्थस्य कर्मत्वस्य कुत्रान्वयो भवतीति जिज्ञासार्थं शङ्कते– अथेति। उत्तरगर्भं प्रतिषेधमाह– न कुत्रापीति। "संभवत्यर्थसाधुत्वे पदसाधुत्वम् (विभक्तेः पदसाधुत्वार्थकत्वोपपादनम्) अन्याय्यम्" इत्यभिप्रायेण पक्षान्तरमाह– अभेदेति, 'नीलो घटः' 'नीलं घटम्' 'नीलस्य घटस्य' इत्यादौ सर्वत्र विशेषणविभक्तेरभेद एवार्थः– नीलाभिन्नो घट इति बोधादित्यर्थः। ननु ग्रन्थारम्भे एवाभेदस्य संसर्गमर्यादया भासमानत्वमुक्तं संसर्गमर्यादया भानं च पदानुपस्थितस्यैव भवति यदि विशेषणविभक्तेरेवाभेदोर्थस्तदाऽभेदस्य विभक्तिलक्षणपदेनोपस्थितौ संसर्गमर्यादया भासमानत्वं न स्यादित्याशङ्क्याह– अभेदस्येति, अभेदस्य संसर्गमर्यादया भानं समासस्थले विशेषणविभक्तेर्लोपेन लुप्तविभक्तेश्च समासेऽनुसंधाना-स्वीकारेण पदान्तरस्याभेदानुपस्थापकदत्वादगत्याऽभेदस्य संसर्गमर्यादया भानं स्वीक्रियते, 'नीलं घटम्' इत्यादौ त्वभेदोपस्थापिकाया विशेषणविभक्तेः सत्त्वेनाभेदस्य न संसर्गमर्यादया भानं किन्तु प्रकारतयेत्यर्थः।

उक्तविभक्त्यर्थरूपाऽभेदस्वरूपं पृच्छन्नाशङ्कते– अथेति। अप्रसिद्धि-रिति– घटादौ पटादीनां भेदस्य सत्त्वादेव भेदत्वावच्छिन्नस्याभावोऽप्रसिद्ध एव सर्वत्र पदार्थेषु तद्भिन्नपदार्थभेदस्य सर्वप्रमाणसिद्धत्वादित्यर्थः। ननु न

सिद्धिः, यदि च भेदप्रतियोगिकोऽभावस्तदा 'नीलं जलम्' इत्यादिवाक्यस्यापि प्रामाण्यापत्तिः– जले द्वित्वादिना नीलभेदाद्यभावस्य सत्त्वात्। नीलभेदत्वावच्छिन्नाभावस्य विभक्त्यर्थत्वे नीलादिपदार्थानन्वयप्रसङ्गः।

न च–भेदप्रतियोगिकाभाव एव विभक्त्यर्थः–नीलपद-समभिव्याहारान्नीलभेदत्वावच्छिन्नाभावः प्रतीयते इति वाच्यम्,

---

भेदत्वावच्छिन्नाभावोऽभेदो येनाऽप्रसिद्धिः स्यात् किन्तु भेदप्रतियोगिको नाम किञ्चिद्भेदव्यक्तिप्रतियोगिकोऽभावोऽभेद इत्युच्यते तथा च नीलघटे नीलभेदो नास्तीति नीलभेदप्रतियोगिकाभावरूपोऽभेदः सर्वप्रसिद्ध एवेत्या-शङ्क्याह– यदि चेति। अत्र दोषमाह– तदेति, भेदप्रतियोगिकाभावस्याऽभेदत्वे 'नीलं जलम्' इत्यादिवाक्यस्यापि प्रामाण्यमापद्येत तथा हि– जलं नीलं न भवतीति तर्कसिद्धान्तेन जले नीलभेद एव वर्तते 'नीलं जलम्' इति प्रयोगो न भवति भेदप्रतियोगिकाभावस्याऽभेदत्वे तु जले नीलभेदाभावस्याऽसत्त्वेऽपि द्वित्वादिना नाम द्वित्वावच्छिन्नप्रतियोगिताकस्य अर्थाद् घटत्वनील-भेदैतदुभयप्रतियोगिकाभावस्य सत्त्वात् 'नीलं जलम्' इत्यादिवाक्यस्यापि प्रामाण्यमापद्येतैव न चेतदिष्टमित्यर्थः। ननु द्वित्वावच्छिन्नप्रतियोगिताका-भावस्य ग्रहणेनोक्तदोषः प्रदर्शितो न च द्वित्वावच्छिन्नप्रतियोगिताकाभावं ग्रहीष्यामस्तथा च जले नीलभेदरूपप्रतियोगिन एव सत्त्वेन तदभावस्याससत्त्वान्न 'नीलं जलम्' इत्यादिवाक्यस्य प्रामाण्यापत्तिरित्याशङ्क्य दोषान्तरमाह– नीलभेदत्वेति, 'नीलो घटः' इत्यत्र नीलभेदत्वावच्छिन्नस्याऽभावो यदि विभक्त्यर्थस्तदाऽभावविशेषणीभूतो नीलपदार्थोपि विभक्त्यर्थ एवेति प्राप्तं तथा च नीलपदेनोपस्थितस्य नीलपदार्थस्याऽनन्वयप्रसङ्गो यतो विभक्त्यर्थभूत-नीलविशेष्टे घटे पुनर्नीलपदोपस्थितनीलपदार्थस्यान्वयो नैव संभवतीति।

ननु न नीलभेदत्वावच्छिन्नाभावोऽभेदो येनोक्तदोषः स्यात् किं तु 'नीलो घटः' इत्यादौ भेदप्रतियोगिकाभाव एव विभक्त्यर्थः नीलभेदत्वाव-च्छिन्नाभावस्तु नीलपदसमभिव्याहारादेव प्रतीयते तथा च नीलपदोपस्थित-नीलपदार्थस्य घटे नाऽनन्वयप्रसङ्ग इत्याशङ्क्याह– न चेति। परिहारहेतुमाह– पदार्थेति, 'नीलो घटः' इत्यत्र यो हि नीलभेदत्वावच्छिन्नाभावः प्रतीयते

पदार्थद्वयसंसर्गभानस्यैवाकाङ्क्षानियम्यत्वान्नीलभेदत्वा-वच्छिन्नप्रतियोगिताकत्वान्तर्भावेण वृत्तिं विना भेदरूप-पदार्थतावच्छेदकस्याभावे तादृशसंबन्धेन भानाऽसंभवात्।

तत्र नीलभेदस्य तदभावस्य च यो नीलभेदत्वावच्छिन्नप्रतियोगिताकत्वरूपः सम्बन्धस्तस्य कथं भानं स्यात्? न चाऽऽकाङ्क्षया संभवति– पदार्थद्वयसंसर्ग-स्यैवाकाङ्क्षाभास्यत्वात्। न चोक्तसम्बन्धः विभक्तेः शक्तिग्रहोस्ति येनोक्तसम्बन्धस्य शक्त्योपस्थितिस्यादित्याक्षेपाभिप्रायः, तथाहि 'नीलघटः' इत्यत्र नीलपदार्थस्य यो घटपदार्थेऽभेदसम्बन्धो भासते स नीलपदसमभि-व्याहाररूपाकाङ्क्षया भासते तदुपस्थापकपदान्तरस्याभावात्, 'नीलो घटः' इत्यत्र तु भेदाभावरूपोऽभेदो नीलपदोत्तरवर्तमानप्रथमाविभक्तेरेवार्थस्तत्राभेदे भेदः पदार्थतावच्छेदकः अभेदश्च पदार्थः प्रथमाविभक्तिलक्षण-पदजन्यप्रतीतिविशेष्यत्वात् तत्राभेदरूपभेदाभावे पदार्थतावच्छेदकरूपभेदस्य यो नीलभेदत्वावच्छिन्नप्रतियोगिताकत्वरूपः सम्बन्धः स पदान्तर-समभिव्याहाररूपाकाङ्क्षालभ्यो न भवति पदार्थद्वयसंसर्गस्यैवाकाङ्क्षालभ्यत्वादत्र च न भेदाभेदौ द्वावेव पदार्थौ– अभेदस्य पदार्थत्वेऽपि भेदस्य पदार्थतावच्छेदकत्वेन पदार्थत्वाभावात् किन्तु यथा 'घटः' इत्यत्र घटघटत्व-समवायेषु त्रिषु घटपदशक्तिस्वीकारात् घटे घटत्वसमवायः शक्त्यैव भासते न तु पदान्तरसमभिव्याहाररूपाकाङ्क्षया तथा प्रकृतेऽपि प्रथमाविभक्त्यर्थे भेदाभावरूपाभेदे शक्त्योपस्थिते पदार्थतावच्छेदकभूतभेदस्य नीलभेदत्वावच्छिन्नप्रतियोगिताकत्वरूपः सम्बन्धः शक्त्यैव भासते इति वक्तव्यं न चैवमपि संभवति यतो विभक्तिशक्तिर्हि भेदप्रतियोगिकाभाव-रूपाभेदे एवास्ति न तु नीलभेदत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन भेदविशिष्टे भेदप्रतियोगिकाभावे, अतो न शक्त्या भेदरूपपदार्थतावच्छेदकस्याभावे= विभक्त्यर्थाभावपदार्थे तादृशसम्बन्धेन=नीलभेदत्वावच्छिन्न प्रतियोगिता-कत्ववरूपसम्बन्धेन भानं सम्भवति, अतो नील भेदत्वावच्छिन्न प्रतियोगिताकत्वसम्बन्धेन भेदविशिष्टे एवाभावे अर्थात् नीलभेदत्वा-वच्छिन्नप्रतियोगिताकाभावे एव प्रथमाविभक्तेः शक्तिर्वक्तव्या तथा सत्युक्तरीत्या स एव नीलस्यापि विभक्त्यर्थत्वेन विभक्त्युपस्थितनीलविशिष्टे घटे नीलपदोपस्थितनीलपदार्थस्यानन्वयप्रसङ्ग इत्यवधेयम्।

मैवम्–भेदोऽभावश्च विशेषणविभक्तेरर्थो विशिष्टलाभस्त्वाकाङ्क्षादिवशात् एतेन भेदे नीलादिपदार्थान्वये एकदेशान्वयप्रसङ्ग इति निरस्तम्।

न च विशेषणविभक्तेरभेदार्थकत्वे 'नीलं घटः' इत्यादावप्यऽभेदान्वयबोधापत्तिः–'धान्येन धनवान्' इत्यादौ

परिहरति– मैवमित्यादिना। उक्ता दोषाः स्युर्यदि विशेषणविभक्तेर्विशिष्टे भेदत्वावच्छिन्नाभावे वा भेदप्रतियोगिकाभावे वा एका शक्तिः स्वीक्रियते नैवमस्ति किं तु भेदे अभावे च खण्डशः शक्तिः स्वीक्रियते, तत्र भेदोऽपि प्रसिद्ध एवाभावोपि प्रसिद्ध एव पदार्थ इति नोक्ताऽप्रसिद्ध्यादिदोषप्रसक्तिः। भेदस्याभावस्य च विशेषणविभक्तया मुख्यत्वेन पृथक् पृथगुपस्थितिर्भवति विशिष्टस्य भेदाभावस्य च नीलादिपदसमभिव्याहाररूपाकाङ्क्षाबलात् प्रतीतिर्भवतीति न कोऽपि दोषः। 'नीलं जलम्' इत्यत्र च जले नीलभेदस्यैव सत्त्वेन नीलभेदाभावस्याऽसत्त्वान्न प्रामाण्यापत्तिः। 'नीलो घटः' इत्यत्र नीलपदार्थस्य स्वनिष्ठप्रतियोगितानिरूपकत्वसम्बन्धेन नीलपदोत्तरविभक्त्यर्थभेदेऽन्वयो भवति तस्य भेदस्य च स्वनिष्ठप्रतियोगितानिरूपकत्वसम्बन्धेन नीलपदोत्तरविभक्त्यर्थाभावेऽन्वयो भवति तस्याभावस्य च विशेष्यतासम्बन्धेन घटेऽन्वयो भवतीति सिद्धान्तः। अत्र विशेषणविभक्तेर्यदि विशिष्टे भेदाभावे एकैव शक्तिः स्यात्तदा भेदस्य पदार्थैकदेशत्वेन तत्रोक्तरीत्या नीलपदार्थस्यान्वयो न स्यात् "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति नियमादिति यः केनापि दोषः प्रदर्शित इदानीं सोपि नास्ति– विशेषणविभक्तेर्भेदे अभावे च पृथगेव खण्डशः शक्तिस्वीकारेण भेदस्यापि विभक्त्या मुख्यत्वेनोपस्थित्या पदार्थत्वेन तत्र नीलपदार्थस्यान्वये विरोधाभावादित्याह– एतेनेति। एतेन=भेदे अभावे च खण्डशः शक्तिस्वीकारेण।

ननु खण्डशः शक्तिस्वीकारेऽपि विशेषणविभक्तेरभेदार्थकत्वमस्त्येव तथा च यथा 'नीलो घटः' इत्यत्राऽभेदान्वयबोधो भवति तथा 'नीलं घटः' इत्यत्रापि नीलपदस्य विशेषणवाचकत्वेन तदुत्तरविभक्तेरप्यभेदार्थकत्वप्राप्तावभेदान्वयबोधः स्यादेव नीलस्य भेदे भेदस्याऽभावे अभावस्य च घटे उक्तरीत्याऽन्वयसंभवात्। यद्युच्येताऽभेदान्वयबोधे विरुद्धविभक्तिराहित्यं कारणं

तृतीययाऽभेदबोधनात् अभेदप्रकारकबोधे विरुद्धविभक्ति-राहित्यस्याऽनपेक्षणादिति वाच्यम्, द्वितीयादिनाऽभेदबोधने द्वितीयाद्यन्तविशेष्यवाचकपदसमभिव्याहारस्य प्रयोजकत्वमि-त्युपगमात्।

अथ 'प्रमेयो घटः' इत्यादौ प्रमेयत्वावच्छिन्नभेदाऽप्रसिद्ध्या लघुधर्मसमनियतगुरुधर्मस्याऽभावप्रतियोगितानवच्छेदकत्वेन 'कम्बुग्रीवादिमान् घटः' इत्यादावपि कम्बुग्रीवादिमत्त्वावच्छिन्न-प्रतियोगिताकभेदाऽप्रसिद्ध्या विशेषणविभक्तेरभेदार्थ-कत्वाऽसंभवः। एवं नीलपटादिपरनीलादिपदघटितस्य 'नीलो

तदत्र नास्तीति नाऽभेदान्वयबोधापत्तिरिति, तदपि न युक्तम्– 'धान्येन धनवान्' इत्यत्र विरुद्धविभक्तिराहित्याभावेऽपि धान्याभिन्नधनवानित्येव-मभेदान्वयबोधो भवत्येवेत्यऽभेदान्वयबोधं प्रति किं वा अभेदस्य संसर्गतया बोधे विरुद्धविभक्तिराहित्यस्य कारणत्वेप्यऽभेदस्य प्रकारतया बोधं प्रति तु विरुद्धविभक्तिराहित्यस्य कारणत्वं नास्त्येव येन 'नीलं घटः' इत्यत्राऽभेदान्वय-बोधो न स्यादित्याशङ्क्याह– न चेति। परिहरति– द्वितीयादिनेति, 'धान्येन धनवान्' इत्याद्युपपदविभक्तिस्थले तु विरुद्धविभक्तिराहित्याभावेप्यऽभेदा-न्वयबोधस्वीकारेप्यन्यत्र त्वभेदान्वयबोधं प्रति विरुद्धविभक्तिराहित्यस्य कारणत्वमस्त्येवेति न 'नीलं घटः' इत्यत्राभेदान्वयबोधप्रसङ्गो विरुद्धविभक्ति-राहित्यस्याभावादित्यर्थः।

दोषान्तरमाह– अथेति, यदि भेदाभाव एव विशेषणविभक्तेरर्थस्तदा सर्वस्यैव पदार्थजातस्य प्रमेयत्वेन प्रमेयत्वावच्छिन्नभेदस्यैवाऽप्रसिद्ध्या 'प्रमेयो घटः' इत्यत्राऽभेदान्वयबोधो न स्यादेवेत्येको दोषः, तथा घटे घटत्वमप्यस्ति कम्बुग्रीवादिमत्त्वमप्यस्तीति तत्र लघुधर्मस्य घटत्वस्याभावीयप्रतियोगिता-वच्छेदकत्वसंभवे घटत्वसमनियतस्य=घटत्वसमानाधिकरणस्य गुरुधर्मस्य कम्बुग्रीवादिमत्त्वस्याभावीय प्रतियोगितावच्छेदकत्वं न भवतीति 'कम्बुग्रीवादि-मान् घटः' इत्यत्राप्यभेदान्वयबोधो न स्यादेव यतो विशेषणविभक्तेर्भेदाभाव एवार्थः अत्रापि कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकभेदाभाव एव

घटः' इत्यादिवाक्यस्यापि प्रामाण्यापत्तिः–नीलत्वादिना पटादेर्भेदाभावस्य नीलघटादौ सत्त्वात्।

एतेन–विशेषणतावच्छेदकीभूतनीलत्वप्रमेयत्वादिकमेव विशेषणविभक्त्यर्थः, नीलत्वादेर्नीलत्वावच्छिन्नभेदाभाव-रूपतयाऽभेदार्थकत्वप्रवादोपपत्तिरित्यपि निरस्तम्। नीलत्वादौ नीलत्वादिमतः स्ववृत्तित्वसंबन्धेनान्वये आकाङ्क्षाविरहाच्च। यथा

विशेषणविभक्तेरर्थो वक्तव्यस्तन्न संभवति– अत्र भेदप्रतियोगितावच्छेदकत्वं कम्बुग्रीवादिमत्त्वस्य प्राप्तं तच्च न युक्तं घटत्वापेक्षया कम्बुग्रीवादिमत्त्वस्य गुरुधर्मत्वादिति द्वितीयो दोष इति विशेषणविभक्तेरभेदार्थकत्वं नैव संभवतीत्यर्थः। दोषान्तरमाह– एवमिति, अयं भावः– यत्र घटे नीलत्वप्रतिपादनाय 'नीलो घटः' इत्युच्यते तत्र तु नीलाभेदप्रकारको बोध इष्ट एव यत्र च 'नीलः' इति पटतात्पर्येणोच्यते 'घटः' इत्यप्युच्यते तत्र नीलाभेदप्रकारक-घटविशेष्यकबोधो नेष्टः, विशेषणविभक्तेरभेदार्थकत्वे च नीलयोर्घटपटयोर्घटत्व-पटत्वरूपाभ्यां भेदेऽपि नीलत्वेन रूपेण तु भेदो नास्त्येवेति नीलत्वेन पटभेदाभावस्य नीलपदोत्तरविभक्त्यर्थस्य घटे सत्त्वादेव पटतात्पर्येण प्रयुक्तनील- पदघटितात् 'नीलो घटः' इति वाक्यादपि नीलाभेदप्रकारक-घटविशेष्यको बोधः स्यादेवेति नीलपटादिपरनीलादिपदघटितस्य 'नीलो घटः' इत्यादिवाक्यस्यापि प्रामाण्यापत्तिः।

केनापि– न भेदाभावो विशेषणविभक्तेरर्थो येनोक्तदोषाणां प्रसक्तिः स्यात् किं तु विशेषणतावच्छेदकीभूतं यद् नीलत्वप्रमेयत्वादिकं तदेव विशेषणविभक्तेरर्थस्तस्य चाश्रयतासम्बन्धेन विशेष्ये घटादावन्वयो भवतीति 'नीलो घटः' इत्यत्र नीलत्वाश्रयो घटः 'प्रमेयो घटः' इत्यत्र प्रमेयत्वाश्रयः (प्रमेयत्ववान्) घट इति बोधे न काप्यनुपपत्तिः, जले नीलत्वाऽभावाच्च 'नीलं जलम्' इति प्रयोगापत्तिरपि नास्ति, विशेषणविभक्तेरभेदार्थकत्वं यदुच्यते तदपि नीलत्वादेरतद्व्यावृत्तिरीत्या नीलत्वावच्छिन्नभेदाभावरूप-त्वेनैवेत्यऽभेदार्थकत्वप्रवादस्याप्यनुपपत्तिर्नास्तीति यदुक्तं तत् पराचष्टे–एतेनेति, एतेन नाम नीलपटादिपरनीलादिपदघटितस्य 'नीलो घटः' इत्यादिवाक्यस्यापि प्रामाण्यप्रसङ्गेन। अयं भावः– विशेषणविभक्तेर्यदि विशेषणतावच्छेदकी-भूतनीलत्वादिकमेवार्थस्तदा नीलत्वं त्वेकमेव सर्वत्र घटपटादिष्वस्तीति

हि तद्विशिष्टेऽधिकरणे तदधिकरणतया तदन्वयोऽनुभवविरुद्धस्तथा तद्धर्मे आधेयतया तद्धर्मवदन्वयोऽपि, अत एव 'कर्म गच्छति' इति वाक्यस्य निराकाङ्क्षता।

न चैवं संसर्गतामतेप्यनिस्तारः– 'नीलो घटः' इत्यादौ

पटवृत्तिनीलत्वस्य घटेऽपि सत्त्वात् पूर्ववद् नीलपटादिपरनीलपदघटितात् 'नीलो घटः' इत्यादिवाक्यादपि नीलाभेदप्रकारकघटविशेष्यको बोधः स्यादेव न च भवतीति विशेषणविभक्तेर्विशेषणतावच्छेदकीभूतनीलत्वाद्यर्थकत्वमपि नोपपद्यते। विशेषणविभक्तेर्विशेषणतावच्छेदकीभूतनीलत्वाद्यर्थकत्वे दोषान्तरमाह– नीलत्वादाविति, "प्रकृतिप्रत्ययार्थौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्यम्" इति न्यायेन 'नीलो घटः' इत्यत्रत्ये 'नीलः' इति पदार्थेऽपि विभक्त्यर्थस्य नीलत्वस्यैव प्राधान्येन तत्र प्रकृत्यर्थस्य नीलत्ववतो नीलस्यान्वयः स्व (नील) वृत्तित्वसम्बन्धेन कर्तव्यः स च न संभवत्याकाङ्क्षाविरहात्। स्वम्=नीलत्ववान् नीलस्तत्र वृत्तित्वं नीलत्वेऽस्त्येव। अत्र कृष्णभट्टो यथा– "आकाङ्क्षाविरहमेवोपपादयति– यथा हीत्यादिना। तद्विशिष्टे भूतले अधिकरणतया तदन्वयः=घटान्वयो विरुद्धो घटवान् घटवान् इति बोधाभावात्, तथा तद्धर्मे घटे आधेयतया तद्धर्मवतो घटवतोऽन्वयोऽपि न– घटवति घट इति बोधाभावादित्यर्थः। तथा तत्प्रत्ययार्थनीलत्वे आधेयतासम्बन्धेन प्रकृत्यर्थस्य नीलत्वादिमतोप्यन्वयो न संभवत्याकाङ्क्षाविरहादिति भावः। अत एव=तद्धर्मे तद्धर्मवत आधेयतयान्वयविरहादेव, कर्मत्वे द्वितीयार्थे कर्मत्ववतः प्रकृत्यर्थस्य कर्मण आधेयतयाऽन्वये निराकाङ्क्षतेत्यर्थः" इति। यथा घटत्ववति स्वाधिकरणत्वसम्बन्धेन घटत्वान्वयो न भवत्यनुभवविरोधाद् एकघटस्य घटत्वद्वयवत्त्वप्रसङ्गाच्च तथा घटत्वेऽपि स्वाधेयत्वसम्बन्धेन घटत्ववदन्वयो न भवत्यनुभवविरोधात् तथैव प्रकृतेऽपि विभक्त्यर्थे नीलत्वे नीलत्ववतो नीलस्यान्वयोऽनुभवविरुद्ध एवेत्यर्थः। तद्धर्मवदन्वयोऽपीत्यत्र "अनुभवविरुद्धः" इत्यनुवर्तनीयम्। कर्मेति– 'कर्म गच्छति' इत्यत्रापि द्वितीयान्तार्थे कर्मपदार्थे द्वितीयार्थस्य कर्मत्वस्य प्राधान्येन तत्र स्ववृत्तित्वसम्बन्धेन स्वाधेयत्वसम्बन्धेन वा प्रकृत्यर्थस्य कर्मपदार्थस्यान्वयो वक्तव्यः सोऽपि न संभवत्यनुभवविरोधात्। तस्मात् विशेषणविभक्तेर्विशेषणतावच्छेदकीभूतनीलत्वादावपि शक्तिर्न संभवतीत्यर्थः। न च 'ग्रामं गच्छति' इत्यत्र ग्रामवृत्तिसंयोगे आधेयतासम्बन्धेन ग्रामान्वयस्य

स्ववृत्तिनीलत्वादेः संसर्गतास्वीकारे उक्तस्थले प्रामाण्यापत्ते-र्दुर्वारत्वादिति वाच्यम्, स्ववृत्तिनीलत्वादेः स्वस्मिन्नेव संबन्धतोपगमेन पटादिवृत्तिनीलत्वादेर्घटादौ पटादिसंबन्धता-विरहेण तादृशातिप्रसङ्गाभावात्।

वक्ष्यमाणत्वाद्विरोध इति वाच्यम्, तत्रापि संयोगे ग्रामस्य ग्रामत्वेनैवान्वयस्वीकारात् संयोगवत्त्वेनान्वयास्वीकाराच्च, अन्यथा संयोगवान् संयोगवान् इति शाब्दबोधः स्यात् स नेष्ट इत्यवधेयम्।

ननु यथाऽभेदस्य प्रकारतास्वीकारे त्वया दोषाः प्रदर्शितास्तथा त एव दोषा अभेदस्य संसर्गतास्वीकारेऽपि प्रसङ्क्ष्यन्ति—अभेदस्य भेदाभावस्वरूप-त्वादेवेत्याशङ्कते— न चैवमिति, अभेदस्य संसर्गतामतेपयुक्तस्थले= नील-पटादिपर नीलादिपदघटिते 'नीलो घटः' इति वाक्ये प्रामाण्यं स्यादेव। अयं भावः— अभेदस्य संसर्गत्वस्वीकारेऽपि नीलत्वेन पटभेदाभावस्य नीलपदोत्तर-विभक्त्यर्थस्य नीलघटे सत्त्वादेव पटतात्पर्येण प्रयुक्तनीलपदघटितात् 'नीलो घटः' इति वाक्यादपि नीलाभेदसंसर्गकघटविशेष्यको बोधः स्यादेवेत्यस्य वाक्यस्य प्रामाण्यापत्तिरनिष्टा दुर्वारैव। स्ववृत्तीति— विभक्त्यर्थभूतं नीलवृत्तिः यन्नीलत्वं तस्य प्रकारत्वं वा संसर्गत्वं वा स्वीकार्यं तत्र संसर्गत्वस्वीकारे इत्यर्थः। परिहरति— स्ववृत्तीति, उक्तस्थले नीलत्वस्यैकत्वादेव दोषः प्राप्तस्तत्र समवायस्यैकत्वेऽपि यथा वायौ स्पर्शसमवायसत्त्वेऽपि रूपसमवायो नास्तीति व्यवहारस्तत्कस्य हेतोः? वायौ रूपाभावाद् रूपसमवायप्रतियोगिकत्व-वाय्वनुयोगिकत्वयोरवच्छेद्यावच्छेदकभावाभावादित्युच्यते तथा नीलत्वस्यै-कत्वेऽपि पटवृत्तिनीलत्वस्य पटे एव सम्बन्धता न तु घटादाविति पटादिवृत्ति-नीलत्वादेर्या पटादिसम्बन्धता तस्या घटादौ विरहेण तादृशातिप्रसङ्गस्य= नीलपटादिपरनीलादिपदघटितस्य 'नीलो घटः' इत्यादिवाक्यस्य प्रामाण्यप्रसङ्गस्याभावात्। स्ववृत्ति=नीलपटवृत्ति। स्वस्मिन्नेव= पटे एव सम्बन्धता न घटे। विशेषणविभक्तेरर्थोऽभेदः स एव सम्बन्धः स चाऽभेदो नीलत्वरूप एवेति नीलत्वस्य सम्बन्धतोक्तेत्यवधेयम्। तदुक्तं कृष्णभट्टेन— "नीलपटपरनीलपदघटितात् 'नीलो घटः' इति वाक्याद् घटे नीलत्वविशिष्ट-बुद्ध्यनुदयेन स्ववृत्ति (पटवृत्ति) नीलत्वादेर्घटे पटसम्बन्धता न स्वीक्रियते किन्तु पटे एव स्वीक्रियते 'नीलपटः' इति विशिष्टबुद्ध्युदयात्" इति।

वस्तुतस्तु– तत्तद्व्यक्तित्वावच्छिन्नभेदाभाव एव नीलत्वादिप्रकारेण भासमानानां तत्तद्व्यक्तीनां स्वस्मिन् संबन्धतया भासते इति न काप्यनुपपत्तिः। संबन्धता च तस्य भेदप्रतियोगिताकाभावत्वेन तत्तद्व्यक्तिभेदप्रतियोगिताकाभावत्वेन वेत्यन्यदेतत्।

न चैवं विशेषणविभक्तेरभेदार्थकत्वमतेऽपि तत्तद्–

वास्तविकपरिहारमाह– वस्तुतस्त्विति, विशेषणविभक्तेर्भेदाभाव एवार्थः स च भेदाभावस्तत्तद्व्यक्तित्वावच्छिन्नभेदाभाव एव ज्ञेयस्तथा च 'नीलो घटः' इत्यत्र नीलघटव्यक्तिगततन्नीलव्यक्तित्वावच्छिन्नभेदस्याभावो नीलत्वादिप्रकारेण भासमानानां तत्तद्व्यक्तीनाम्=नीलरूपाश्रयीभूतघटादि-व्यक्तिनां स्वस्मिन्=तद्घटादिव्यक्तावेव सम्बन्धतया भासते नान्यपटादिव्यक्तिसम्बन्धतयेति 'नीलो घटः' इत्यत्र नीलत्वावच्छिन्न-भेदाभावसंसर्गकघटविशेष्यकबोध उपपद्यते, नीलपटादिपरनीलादिपदघटितात् 'नीलो घटः' इति वाक्यात् नीलत्वावच्छिन्नभेदाभावसंसर्गकघट-विशेष्यकबोधस्य चापत्तिर्नास्त्येव नीलपटपरनीलपदबोध्यतन्नील (पटगतनील)-व्यक्तित्वावच्छिन्नभेदाभावस्य घटेऽभावान्न नीलपटादि-परनीलादिपदघटितस्य 'नीलो घटः' इति वाक्यस्य प्रामाण्यापत्तिरित्यर्थः। यथा घट इत्यत्र घटत्वप्रकारेण घटस्य भासमानत्वं तथात्रापि नीलत्वप्रकारेण नीलघटादिव्यक्तेरेव भासमानत्वं ज्ञेयम्। ननूक्तभेदाभावस्य सम्बन्धता केन रूपेण ज्ञेयेत्यत्राह– सम्बन्धतेति। तस्य=विशेषणविभक्त्यर्थभेदाभावस्य। यथा पर्वतो वह्निमानित्यत्र पर्वते यो वन्हिप्रतियोगिकः संयोगस्तस्य संयोगत्वेन वा वह्निप्रतियोगिकसंयोगत्वेन वोभयथापि सम्बन्धत्वं संभवति विशिष्ट-बुद्धिनियामकत्वाक्षतेस्तथात्रापि भेदाभावस्य भेदप्रतियोगिताकाभावत्वेन वा तद्व्यक्तित्वावच्छिन्नभेदप्रतियोगिताकाभावत्वेन वोभयथापि सम्बन्धत्वं घटते 'नीलो घटः' इत्याकारकविशिष्टबुद्धिनियामकत्वाक्षतेरित्याशयेनाह– इत्यन्यदेतदिति।

ननु यथा त्वयाऽभेदस्य संसर्गत्वमाश्रित्याऽभेदस्य तत्तद्व्यक्तित्वा-वच्छिन्नभेदाभावत्वेन तादृशनीलादितद्व्यक्त्यभेदस्य तत्तद्घटपटव्यक्तिष्वेव

व्यक्तित्वावच्छिन्नाऽभेद एव विभक्त्यर्थो वक्तव्य इति वाच्यम्, तथासत्यपूर्वव्यक्तिनिष्ठतत्तद्व्यक्तित्वस्य कथंचिदपि भानासंभवेन तदवच्छिन्नभेदाभावे शक्तिग्रहासंभवेनाऽपूर्व-व्यक्तीनामभेदान्वयबोधानुपपत्तेः। संसर्गज्ञानस्य विशिष्ट-बुद्धावहेतुत्वेनाऽनुपस्थितस्यापि संसर्गतया भानसंभवेन संसर्गता-मतेऽनुपपत्त्यभावात्।

सत्त्वेनान्यत्र चासत्त्वेन नीलपटादिपरनीलादिपदघटितस्य 'नीलो घटः' इति वाक्यस्य प्रामाण्यप्रसङ्गो निवारितस्तथा मयाप्यभेदस्य प्रकारत्वमप्याश्रित्य प्रकारीभूतोप्यभेदस्तत्तद्व्यक्तित्वावच्छिन्नभेदाभाव एवेति तस्य पटादिगतस्य घटादिष्वभावेन उक्तस्य 'नीलो घटः' इति वाक्यस्य प्रामाण्यप्रसङ्गो निवारितो भविष्यतीत्याशङ्क्याह– न चेति। अत्र चाभेदस्य विशेषणविभक्त्यर्थत्वकथनेन प्रकारत्वमेव विज्ञेयं प्रकारस्य किञ्चित्पदार्थत्वनियमात् शक्त्योपस्थितिनियमाच्च, संसर्गस्तु न कस्यचित्पदस्यार्थो भवति न वा शक्त्योपस्थितो भवतीति नियमः– आकाङ्क्षाबलेन तद्भानस्योक्तत्वादित्यवधेयम्। परिहारमाह– तया सतीति, तथासति=अभेदस्य प्रकारतामतेऽभेदस्य तत्तद्व्यक्तित्वावच्छिन्न-प्रतियोगिताकभेदाभावरूपत्वाश्रयणे सति। प्रकारीभूतपदार्थस्यान्वयं प्रति तच्छक्तिज्ञानाधीनोपस्थितिः कारणमस्ति तथा च 'नीलो घटो भविष्यति' इत्यत्र भाविनस्तद्व्यक्तित्वस्योपस्थित्यसंभवेन तदवच्छिन्नभेदाभावे च विभक्तिशक्तिग्रहासंभवाद् विभक्त्या प्रकारीभूताभेदस्योपस्थित्यसंभवाद-पूर्वव्यक्तीनां घटादीनामभेदान्वयबोधो न स्यादेवेति दोषः। तदुक्तं कृष्णभट्टेन– "नीलो घटो भविष्यतीत्यत्र तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताको यो भेदस्तादृशभेदत्वावच्छिन्नप्रतियोगिताकोऽभावो नीलपदोत्तरप्रथमार्थस्तदेकदेशे तद्व्यक्तित्वे प्रकृत्यर्थस्य नीलरूपवतोऽन्वयः (कर्तव्यः) तथा चाऽपूर्वा भविष्यति या नीलरूपाश्रयव्यक्तिस्तन्निष्ठं यद् तद्व्यक्तित्वं तस्य कथं चिदपि मानासंभवेन सामान्यलक्षणारूपभासकविरहाद्भानासंभवेन (घटादौ तु घटत्वं सकलवृत्ति तस्य सामान्यलक्षणारूपत्वं भवति तद्व्यक्तित्वं तु तद्व्यक्तिमात्रपर्याप्तमिति न तस्य सामान्यलक्षणारूपत्वम्) तदवच्छिन्न-भेदाभावे=अपूर्वव्यक्तित्वावच्छिन्नप्रतियोगिताकभेदस्याभावे शक्तिग्रहासंभवेना-ऽपूर्वव्यक्तीनामभेदान्वयानुपपत्तेः। अभावज्ञाने हि प्रतियोगिज्ञानं कारणमिति

न च विभक्त्यर्थेऽपि भेदे तत्तद्व्यक्तित्वावच्छिन्न-प्रतियोगिताकत्वसंबन्धेन नीलत्वादिना तत्तद्व्यक्तीनामन्वयः, तादृशभेदानामपि तत्तद्व्यक्तिभेदत्वावच्छिन्नप्रतियोगिता-कत्वसंबन्धेनाऽभावेऽन्वय उपेयते, तावतैव तत्तद्व्यक्ति-त्वावच्छिन्नाऽभेदलाभ इति न किञ्चिदनुपपन्नमिति वाच्यम्, विशेषणतावच्छेदकावच्छिन्नाया एव प्रतियोगिताया अभावे प्रतियोगिनः संबन्धतया भानात्, अन्यथा–विशिष्टवैशिष्ट्य-

---

प्रतियोगि(अपूर्वव्यक्ति)ज्ञानाभावाच्छक्तिग्रहासंभवादपूर्वव्यक्तीनामभेदान्वय-बोधानुपपत्तिरित्यर्थः" इति।

नन्वभेदस्य संसर्गतास्वीकारेऽपि 'नीलो घटो भविष्यति' इत्यत्रोक्तदिशा-ऽपूर्वव्यक्तीनामभेदान्वयबोधानुपपत्तिः किं न स्यादित्याशङ्क्य समाधत्ते–ससंर्गज्ञानस्येति, विशिष्टबुद्धौ संसर्गस्यैव कारणत्वमस्ति न तु संसर्गज्ञान-स्येत्यनुपस्थितस्याप्यभेदस्य संसर्गतया भानसंभवेनापूर्वव्यक्तीनामभेदान्वय-बोधेऽनुपपत्त्यभावात्, उपस्थित्यर्थमेव शक्तिज्ञानस्यापेक्षणात् न चाभेदो-पस्थित्यपेक्षा संसर्गतामते अत एव न संसर्गज्ञानस्य विशिष्टबुद्धिहेतुत्वमित्यर्थः।

ननु यदि तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदाभावो विशिष्टो विशेषणविभक्तेरर्थः स्यात्तदा एतादृशविशिष्टाभेदकुक्षिप्रविष्टतद्व्यक्ति-त्वस्याऽपूर्वस्य कथंचिदपि भानासंभवेन तत्र विभक्तिशक्तिग्रहासंभवा-च्छक्तिग्रहाभावे चाऽपूर्वतद्व्यक्तित्वस्योपस्थित्यसंभवेन 'नीलो घटो भविष्यति' इत्यत्राऽपूर्वतन्नीलव्यक्तीनामभेदान्वयबोधानुपपत्तिः स्यादपि न चोक्तविशिष्टा-भावस्य विशेषणविभक्त्यर्थत्वं वदामः किन्तु खण्डशो विभक्तिशक्तिस्वीकारेण विशेषणविभक्तेर्भेदोऽभावश्चार्थः, तत्र विभक्त्यर्थे भेदे तत्तन्नीलव्यक्तीनां नीलत्वादिना तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनान्वयस्तादृश-भेदानामपि तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनाऽभावेऽन्वय इति 'नीलो घटो भविष्यति' इत्यत्र नाऽपूर्वतत्तन्नीलव्यक्तीनामभेदान्वयबोधानुपपत्तिः–तद्व्यक्तित्वस्यात्र सम्बन्धकुक्षौ प्रवेशेन विभक्त्यर्थे प्रवेशाभावेन च तत्र विभक्तिशक्तिग्रहस्यापेक्षैव नास्ति, उक्तसम्बन्धस्य तद्व्यक्तित्वविशिष्टस्या-काङ्क्षाबलेन भानसंभवेन सम्बन्धकुक्षिप्रविष्टतद्व्यक्तित्वस्याप्याकाङ्क्षाबलेन

बुद्धित्वानुपपत्तेः। "प्रतियोगिविशेषिताभावज्ञानं च विशिष्ट-वैशिष्ट्यबोधमर्यादां नातिशेते" इति दर्शनात् केवलं विशेष्ये विशेषणमिति रीत्या न कश्चिदभ्युपैतीति चेत्?

भानसंभवादित्यर्थः। तावतैव=तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तत्तन्नीलव्यक्तीनां भेदे तादृशभेदानां चाभावेऽन्वयाङ्गीकारेणैव। सम्बन्ध-प्रणालिकया हि तद्व्यक्तित्वस्य भेदेन संबद्धत्वात् तत्तद्व्यक्तित्वा-वच्छिन्नाभेदस्य=तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताक- भेदाभावरूपस्याभेदस्य लाभः=भानं संभवत्येवेति न 'नीलो घटो भविष्यति' इत्यत्रापूर्वतत्तन्नील-व्यक्तीनामभेदान्वयबोधानुपपत्तिः, न वा नीलपटादि- परनीलादिपदघटितस्य 'नीलो घटः' इति वाक्यस्य प्रामाण्यापत्तिः— तद्व्यक्तित्वस्य निवेशात् पटगततन्नीलव्यक्तेर्घटादिष्वसत्त्वादित्यर्थस्तदाह— न किञ्चिदनुपपन्नमिति। इत्याशङ्क्याह—न चेति।

परिहरति— विशेषणतेति, त्वया तद्व्यक्तित्वावच्छिन्नप्रतियोगिता-कत्वसम्बन्धेन भेदे तत्तन्नीलव्यक्तीनामन्वय उपपादितः प्रतियोगिता चात्र सम्बन्धे प्रविष्टास्ति तस्याः प्रतियोगितायाश्चाभावे प्रतियोगिविशेषणता-वच्छेदकावच्छिन्नाया एव सम्बन्धत्वेन भानं भवति विशेषणतावच्छेदकं चात्र नीलत्वमेव न तु तन्नीलव्यक्तित्वं तथाच नीलत्वावच्छिन्नप्रतियोगितायाः सम्बन्धत्वे नीलत्वस्य सर्वत्र घटपटादिष्वेकत्वेन पुनर्नीलपटादिपरनीलादि-पदघटितस्य 'नीलो घटः' इति वाक्यस्य प्रामाण्यापत्तिर्दोषः प्राप्तः। विपक्षे बाधकमाह— अन्यथेति, यदि प्रतियोगिताया विशेषणतावच्छेदकावच्छिन्नायाः सम्बन्धत्वं न स्यात्तदाऽभावज्ञानस्य विशिष्टवैशिष्ट्यबुद्धित्वं न स्याद् नाम— अभावज्ञानेन विशिष्टवैशिष्ट्यस्यावगाहनं न स्यात् 'घटो नास्ति' इत्यत्र हि विशिष्टस्य=घटत्वविशिष्टस्यैव घटस्य स्वप्रतियोगिताकत्वसम्बन्धेनाभावे वैशिष्ट्यं भासते (स्वं घटः) अर्थात्—यथा घटस्य स्वप्रतियोगिताकत्व सम्बन्धेनाभावेऽन्वयो भवति तथा घटत्वस्यापि स्वावच्छिन्नप्रतियोगिताकत्व-सम्बन्धेनाभावेऽन्वयो भवत्येव भासते च (स्वं घटत्वम्) तन्न स्याद् यदि विशेषणतावच्छेदकावच्छिन्ना प्रतियोगिता सम्बन्धो न स्यात्, अर्थात् यदि प्रतियोगितावच्छेदकं घटत्वं विशेषणं न स्यात् किंतूपलक्षणं स्यात्तदोपलक्षणीभूत-घटत्वस्याभावे स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धनाऽन्वयोऽपि न स्यात्तदा

सत्यम्–अभेदस्तादात्म्यम्, तच्च स्ववृत्त्यऽसाधारणो धर्मः। असाधारण्यं च एकमात्रवृत्तित्वम् तच्च स्वसामानाधिकरण्यस्व-प्रतियोगिवृत्तित्वोभयसंबन्धेन भेदविशिष्टं यत् तदन्यत्वमित्ये-'विशेषणतावच्छेदकावच्छिन्नाया एव प्रतियोगितायाः सम्बन्धत्वेनाभावे भानं भवति। इति नियमोपि न स्यात्तदोक्तस्थलेऽपि नीलत्वस्य प्रतियोगिता-वच्छेकत्वाभावेन प्रामाण्यापत्तिर्न स्यादपि न चैवमस्ति विशेषणतावच्छेदका-वच्छिन्नाया एव प्रतियोगितायाः सम्बन्धत्वस्वीकारादित्यर्थः।

अभावे विशेषणतावच्छेदकावच्छिन्नाया एव प्रतियोगितायाः सम्बन्धत्वं भवतीत्यत्र विनिगमनामाह– प्रतियोगिविशेषितेति, प्रतियोगिना विशेषितं प्रतियोगिविशेषितमभावज्ञानं यथा 'घटो नास्ति' इत्यत्र घटप्रवेशात् एतादृशमभावज्ञानं विशिष्टवैशिष्ट्यस्य मर्यादाम्=अवगाहनं नातिशेते अर्थात् 'घटो नास्ति' इत्यभावज्ञानेऽभावे घटत्वविशिष्टस्यैव घटस्य स्वप्रतियोगिता-कत्वसम्बन्धेन वैशिष्ट्यम्=अन्वयो भासते तस्माद् घटविशेषणीभूतस्य घटत्वस्याप्यभावे स्वावच्छिन्न प्रतियोगिताकत्वसम्बन्धेनान्वयो भवत्येव भासते च सः, तस्मात्सम्बन्धकोवादेप्रविष्टा प्रतियोगिता विशेषणतावच्छेदकीभूत-घटत्वाद्यवच्छिन्ना भवत्येव। अभावज्ञाने चाभावस्यैव विशेष्यत्वेन तत्र प्रतियोगिनो घटिर्विशेषणत्वाद् घटत्वादीनां विशेषणतावच्छेदकं प्राप्तमिति।

ननु 'घटो नास्ति' इत्यभावज्ञाने घटत्वस्य केवलं घटविशेषणत्वमेव भविष्यति नाभावविशेषणत्वम्, अर्थात् घटत्वस्य स्वावच्छिन्नप्रतियोगिता-कत्वसम्बन्धेनाभावेऽन्वयं नाङ्गीकरिष्याम इति नोक्तदोषापत्तिरित्याशङ्क्याह– केवलमिति, 'घटो नास्ति' इत्यादौ प्रतियोगिविशेषिताभावज्ञाने त्वदुक्तां विशेष्ये विशेषणमितिरीतिं न कश्चित्स्वीकरोति किन्तु घटत्वस्य स्वावच्छिन्न-प्रतियोगिताकत्वसम्बन्धेनाभावेऽन्वयो भवत्येव भासते चेत्येव सर्वो जनः स्वीकरोतीत्यर्थः। यद्यभावज्ञाने उपलक्षणत्वेन घटत्वभानं स्यात्तदोपलक्षणत्वा-विशेषाद् द्रव्यत्वादीनामपि भानं स्यान्न चैवमस्ति तस्माद् द्रव्यत्वाद्यपेक्षया घटत्वे विशेषणत्वमेव विशेष इति प्राप्तम्। यदि च प्रतियोगिता विशेषणता-वच्छेदकेन घटत्वेनावच्छिन्ना न स्यात्तदा 'घटो नारित' इत्यत्र घटत्वावच्छिन्न-प्रतियोगिताकाभावस्याऽसिद्ध्या किञ्चिद्घटव्यक्तिसत्त्वदशायामपि किञ्चिद्-घटव्यक्तिसत्त्वे' 'घटो नास्ति' इति प्रयोगस्य प्रामाण्यं स्यात् न च

कमात्रवृत्तिधर्म एव विशेषणविभक्तेरर्थः। वृत्तिश्च तत्र प्रकृत्यर्थस्य संसर्गमर्यादया भासते, तादृशधर्मस्तत्त्द्व्यक्ति-त्वादिरूप एव। अपूर्वव्यक्तिनिष्ठतादृशधर्मस्य विशिष्य ज्ञातुमशक्यत्वेऽप्येकमात्रवृत्तिधर्मत्वादिना सामान्यप्रत्यासत्तितः सुग्रहत्वमेव।

किञ्चिद्घटव्यक्तिसत्त्वे 'घटो नास्ति' इति प्रयोगो भवति, तस्मात् प्रतियोगिता विशेषणतावच्छेदकघटत्वादिनाऽवच्छिन्ना भवति तथा सति च किञ्चिद्घटसत्त्वे घटत्वावच्छिन्नप्रतियोगिताकाभावस्य बाधात् 'घटो नास्ति' इति प्रयोगो न भवति। प्रकृते च 'नीलो घटः' इत्यत्र विभक्त्यर्थाभावसम्बन्धभूतायाः प्रतियोगिताया विशेषणतावच्छेदकनीलत्वेनावच्छिन्नत्वात् नीलत्वस्य च सर्वत्र नीलघटपटेष्वेकत्वेनाभावाद् नीलपटादिपरनीलादिपदघटितस्यापि 'नीलो घटः' इति वाक्यस्य प्रामाण्यं स्यादिति दोषः।

इत्येवं प्रकारतावादे प्राप्तं दोषं स्वीकुर्वन् प्रकारतावाद्याह– सत्यमिति। विशेषणविभक्त्यर्थभूताभेदं निर्वक्ति– अभेद इति। तादात्म्यमेवाभेदस्तथा च 'नीलो घटः' इत्यत्र घटे नीलतादात्म्यं भासते नीलतादात्म्यवान् घट इति नीलपदोत्तरविभक्तेस्तदेवार्थः। तादात्म्यस्वरूपमाह– स्ववृत्तीति। तत्=तादात्म्यम्। स्वं घटः। घटवृत्ति यन्नीलतादात्म्यं तद् घटस्यासाधारणो धर्मस्तस्य नीलतादात्म्यस्य तद्घटव्यक्तिमात्रवृत्तित्वात्। असाधारण्यस्वरूपमाह– असाधारण्यमिति, एकव्यक्तिमात्रवृत्तिधर्मोऽसाधारणो धर्म इति फलितम्। एकमात्रवृत्तित्वस्वरूपमप्याह– स्वसामानेति। तत्=एकमात्रवृत्तित्वम्। अत्र कृष्णभट्टो यथा– स्वं नीलघटव्यक्तिभेदस्तत्सामानाधिकरण्यं द्रव्यत्वे अथ च स्वं नीलघटव्यक्तिभेदस्तत्प्रतियोगिनी नीलघटव्यक्तिस्तद्वृत्तित्वमपि द्रव्यत्वे इत्युभयसम्बन्धेन भेदविशिष्टं द्रव्यत्वमेव तदन्यत्वं तद्व्यक्तित्वे (तन्नीलघट-व्यक्तिवृत्तितद्व्यक्तित्वे) इत्यर्थः। स्वप्रतियोगिवृत्तित्वस्यैव सम्बन्धत्वे– स्वं नीलव्यक्तिभेदस्तत्प्रतियोगिनी नीलघटव्यक्तिस्तद्वृत्तित्वं तद्व्यक्तित्वे इत्यनेन सम्बन्धेन भेदविशिष्टमेव तत्तद्व्यक्तित्वमतो द्वितीयसम्बन्धनिवेशः तथा च स्वं नीलव्यक्तिभेदस्तत्सामानाधिकरण्यं तत्तद्व्यक्तित्वे नास्ति नीलघटव्यक्ति- भेदवति पटे तत्तद्व्यक्तित्वस्याभावात्। स्वसामानाधिकरण्यस्यैव सम्बन्धत्वे च स्वपदेन पटादिभेदस्तत्सामानाधिकरण्यं तत्तद्व्यक्तित्वे इति

अभेदस्य संसर्गतामतेऽप्येतादृशाऽनुगताऽभेदस्यैव तथात्वमुचितम्। तत्तद्व्यक्तित्वावच्छिन्नभेदाभावकूटस्य विशिष्य तथात्वे 'घटो न नीलः' इत्यादिवाक्यजन्यबोधे "प्रतियोग्यऽभावान्वयौ तुल्ययोगक्षेमौ" इति न्यायेन तादृशा-ननुगतसंबन्धावच्छिन्नप्रतियोगिताकाऽननुगताऽभावा एव भासेरन्

भेदविशिष्टमेव भवतीति स्वप्रतियोगिवृत्तित्वनिवेशः, तथा च स्वंपटादिभेदस्तत्प्रतियोगिपटादिस्तद्वृत्तित्वं तद्व्यक्तित्वे नास्तीत्यर्थः।" इति। एवं चैतदुभयसम्बन्धेन तद्व्यक्तित्वं विना भेदविशिष्टं सर्वं घटत्वादिकं धर्मजातं भविष्यति तदन्यत्वं तद्व्यक्तित्वे प्राप्तम्। "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः" इति न्यायेन विभक्त्यर्थस्योक्तैकमात्रवृत्तिधर्मस्य प्राधान्येन तत्र प्रकृत्यर्थस्य नीलस्यान्वयः केन सम्बन्धेन कर्तव्य इत्यत्राह– वृत्तिश्चेति। तत्र=विभक्त्यर्थे तादात्म्ये, प्रकृत्यर्थस्य= नीलस्य, वृत्तिः=अन्वयः संसर्गमर्यादया भासते। स्ववृत्तित्वसम्बन्धेन नीलस्य तादात्म्येऽन्वयः। तादात्म्यस्य च नीलविशिष्टस्य घटे आश्रयत्वसम्बन्धेन विज्ञेयः स चापि सम्बन्धः संसर्गमर्यादया भासते नीलघटयोर्यस्तादात्म्यलक्षणः सम्बन्धस्तस्य प्रकारत्वस्वीकारेण विभक्त्यर्थत्वाद् विशेषणवविभक्त्यैवोपस्थितिस्वीकाराच्च। तादृशधर्मः= एकमात्रवृत्तिधर्मः। 'नीलो घटो भविष्यति' इत्यत्राऽभेदान्वयकबोधानुपपत्तिपरिहारमाह– अपूर्वेति। तादृशधर्मस्य=तद्व्यक्तित्वरूपधर्मस्य, विशिष्य=तद्व्यक्तित्वत्वेन रूपेण ज्ञातुमशक्यत्वं हि तस्य भावित्वेन वर्तमानत्वाभावात्। तद्व्यक्तित्वस्य तद्व्यक्तित्वत्वेन रूपेण ज्ञातुमशक्यत्वेप्येकमात्रवृत्तिधर्मत्वेन रूपेण सामान्यप्रत्यासत्त्या ज्ञातुं शक्यत्वात्=एकमात्रवृत्तित्वधर्मस्य वर्तमाननीलादि-व्यक्तिस्थस्य ज्ञानसंभवेन तद्रूपेण भाविव्यक्तिस्थस्यापि ज्ञानसंभवादित्यर्थः।

अभेदस्येति–अभेदसंसर्गतावादेऽप्येतादृशानुगताऽभेदस्यैव=एकमात्रवृत्तिधर्मत्वेन रूपेणानुगतस्य=सकलतद्व्यक्तित्वरूपधर्मेष्वनुगतस्यैव तादात्म्यलक्षणस्या-भेदस्य तथात्वम्=संसर्गत्वमुचितम्। अननुगताभेदस्य संसर्गत्वे बाधकमाह= तत्तद्व्यक्तित्वेति, तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदाभावसमूहस्य विशिष्य=तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदाभावत्वेन रूपेण तथात्वे= संसर्गत्वे 'घटो न नीलः' इति वाक्यजन्यबोधे तादृशः=तत्तद्व्यक्तित्वादिरूपो योऽननुगतः सम्बन्धस्तदवच्छिन्नप्रतियोगिताका अननुगता एव नीलाभावा

न तु नीलवृत्तिरेकोऽभावः, तथा सति यत् किंचित्तादृशाभावतात्पर्येण प्रयुक्तस्य नीलेऽपि 'न नीलः' इत्यादिवाक्यस्य प्रामाण्यं स्यात्।

भासेरन् अर्थात् सम्बन्धभूतस्य तद्व्यक्तित्वस्यैकमात्रनीलव्यक्तिस्थत्वेन प्रतियोगितायास्तदवच्छिन्नत्वे हि सकलनीलव्यक्तीनामेकोऽभावो घटे न प्रत्येतुं शक्यते किन्तु प्रतियोगितावच्छेदकस्य तद्व्यक्तित्वस्यानेकत्वेनानेके एव नीलाभावा घटेऽत्र प्राप्तास्ते पृथक् पृथगेव भासेरन्। अत्र प्रमाणमाह– प्रतियोगीति, प्रतियोग्यन्वयस्तदभावान्वयश्च तुल्ययोगक्षेमौ=सम्बन्धादिषु तुल्यसापेक्षौ भवतः, अन्वयः शाब्दबोधः, अर्थात् नञसत्त्वे येन सम्बन्धेन यत्र यस्य येन रूपेण सत्त्वं प्रतीयते नञ्सत्त्वेऽपि तेनैव सम्बन्धेन तत्रैव तस्यैव तेनैव रूपेणासत्वं प्रतीयते तथा च नञऽसमभिव्याहारस्थले यत्सम्बन्धावच्छिन्नयद्धर्मावच्छिन्नप्रकारताकयद्विशेष्यकः शाब्दबोधो भवति नञ्समभिव्याहारस्थलेऽपि तत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकतदऽभावविशेष्यकः शाब्दबोधो यथा–भूतलं घटोऽस्ति इत्यत्रसंयोगसंबन्धावच्छिन्नधाटत्वावछिन्नविशेष्यताकः शाब्दबोधो भवतीति घटो नास्तीत्यत्रापि संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकघटाभावविशेष्यकः शाब्दबोधः भवति तथा च 'घटो नीलः' इत्यत्र घटे नीलसत्त्वं अननुगततद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदाभावरूपाभेदसम्बन्धेन प्रतीयते इति 'घटो न नीलः' इत्यत्रापि घटे नीलासत्त्वं तैनैवाननुगततद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदाभावरूपाऽभेदाभावरूपाऽभेदसम्बन्धेन प्रतीयेतेति प्राप्तं तत्र सम्बन्धभूतस्याननुगतस्य तद्व्यक्तित्वस्य तत्तन्नीलव्यक्तीनामानन्त्येनानन्त्यात् तदवच्छिन्नप्रतियोगिताकानां नीलाभावानामनन्तानां संग्राहकरूपाभावेनानन्त्यादऽनन्ता एव नीलाऽभावा भासेरन् न तु नीलवृत्तिः=नीलघटवृत्तिरेको नीलाभावः प्रत्येतुं शक्यते इत्यर्थः। उपसंहरति– तथा सतीति, यदि 'घटो नीलः' इत्यत्र तन्नीलव्यक्तित्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नप्रतियोगिताकाभावरूपैकसम्बन्धावच्छिन्नप्रतियोगिताक एक एव नीलाभावः प्रतीयेत तदा नीले घटे किञ्चिन्नीलरूपव्यक्तिसत्त्वेऽपि किञ्चिन्नीलरूपव्यक्तेरसत्त्वेन तदभावाभिप्रायेण नीलेऽपि घटे 'घटो न नीलः' इति प्रयोगः स्यात्तस्य च प्रामाण्यमपि

इदं तु बोध्यम्– विशेषणविभक्तेरभेदार्थकत्वे 'घटो न नीलः' इत्यादौ नञा नीलाद्यऽभेदाभाव एव प्रत्याययिष्यते न तु नीलादिभेदः, यादृशसमभिव्याहारस्थले येन संबन्धेन यत्र धर्मिणि येन रूपेण यद्वत्त्वं नञऽसत्त्वे प्रतीयते तादृशस्थले नञा तद्धर्मिणि तादृशसंबन्धावच्छिन्नतादृशधर्मावच्छिन्न-प्रतियोगिताकतदऽभावबोधस्य व्युत्पत्तिसिद्धत्वात्। "प्रतियोग्य-भावान्वयौ च" इत्यादेरप्ययमेवार्थः। एवं च नञो भेदबोधकत्वं न कुत्रापि संभवति– 'अनीलं घटमानय' इत्यादौ घटपद-सामानाधिकरण्यानुरोधेनाऽनीलपदस्य नीलभिन्नपरतया नञो भेदवत्येव लक्षणाया उपगन्तव्यत्वात्।

इदं त्वत्रावधेयम्– अभेदस्य प्रकारतामतेऽपि 'घटो न नीलः' इत्यादिवाक्यस्य नीलाभेदाभावबोधकत्वेऽपि

स्यात् न चैवं भवति तस्मात् 'घटो न नीलः' इत्यत्रोक्तदिशा नीलाभावा अनन्ता एव भासन्ते इति वक्तव्यम्, अनन्ताभावानां च ज्ञानासंभव इति संसर्गतामतेऽप्येकमात्रवृत्तिधर्मत्वेन रूपेणानुगतस्यैव तद्व्यक्तित्वस्योक्त-तादात्म्यरूपस्य संसर्गत्वं वक्तव्यमिति प्राप्तमित्यर्थः। एवं च प्रतियोगिताया एकमात्रवृत्तिधर्मत्वेन रूपेण तद्व्यक्तित्वेनावच्छिन्नत्वेन पटगततन्नीलव्यक्तेश्च घटादौ बाधादुक्तदिशा नीलपटादिपरनीलादिपदघटितस्य 'नीलो घटः' इति वाक्यस्यापि प्रामाण्यापत्तिर्नास्त्येव।

नञसत्त्वे यस्य प्रतीतिभवति नञ्सत्त्वे तदभावस्य प्रतीतिर्भवतीति नियमोऽस्ति प्रकृते च यदि 'नीलो घटः' इत्यत्र विशेषणविभक्तेरभेद एवार्थस्तदा 'घटो न नीलः' इत्यत्र नञा नीलाऽभेदाऽभावस्यैव प्रतीतिर्भविष्यति न तु नीलभेदस्येत्याह– इदमित्यादिना। व्याख्यातप्रायोऽयं ग्रन्थः। उपसंहरति– एवं चेति। ननु 'अनीलं घटम्' इत्यत्र तु नञो भेदबोधकत्वं भविष्यतीत्या-शङ्क्याह– अनीलमिति, अत्रापि नञो भेदवति लक्षणैव न तु शक्त्या भेदबोधकत्वमित्यर्थः।

इद त्वत्रेति– यद्यप्यभेदस्य प्रकारतामते उक्तरीत्या 'घटो न नीलः'

तृतीयाऽभावस्य प्रतियोगिस्वरूपतया नञो भेदबोधकत्वं नानुपपन्नं परं तु भेदत्वप्रकारेण भेदबोधो भवति न वेत्यन्यदेतत्।

इदं तु तत्त्वम्– 'नीलो घटः' इत्याद्यसमासस्थलेऽभेदस्य संसर्गतोपगमेऽपि गौरवविरहात् तत्र विशेषणविभक्तेर्वृत्तिकल्पनमनुचितम्।

न चाऽभेदे यत्र विशेषणविभक्तेः शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा तत्र सर्वमते एवाऽभेदप्रकारकबोधस्य 'नीलो

इत्यत्र नञो नीलाभेदाभावबोधकत्वमेव तथापि तृतीयाभावस्य प्रतियोगिस्वरूपत्वाद् यथा घटाभावाभावो घटस्वरूपमेव तथात्राप्यभेदो नाम भेदाभाव इति नीलाभेदाभाव इत्यनेन नीलभेदाभावाभाव इति प्राप्तं तत्र नीलभेदाभावाभावो हि नीलभेदस्वरूपमेवेति नञो नीलाभेदाभावबोधकत्वे प्राप्ते नीलभेदबोधकत्वं प्राप्तमेवेति भेदबोधकत्वं नानुपन्नं किन्त्वेवं नञो भेदत्वप्रकारेण=भेदत्वेन रूपेण भेदबोधकत्वं न संभवति किन्त्वऽभेदाभावत्वेनैव रूपेण भेदबोधकत्वं संभवति यथा क्वचिद् घटादिपदानां द्रव्यत्वादिना घटादिबोधकत्वं भवति तथेत्यर्थः।

इदं तु तत्त्वमिति– 'नीलघटम्' इत्यादिसमासस्थले त्वभेदोपस्थापिकाया नीलादिविशेषणपदोत्तरं विभक्तेरभावेन तदनुसंधानस्याप्यनङ्गीकाराच्च विभक्त्याऽभेदस्योपस्थित्यसंभवेन प्रकारत्वं नैव संभवति केनचित्पदेन वृत्योपस्थितस्यैव प्रकारत्वनियमादित्युक्तसमस्तस्थले त्वभेदस्य संसर्गतयैव भानं भवतीति निर्विवादम्। 'नीलो घटः' इत्यत्र त्वभेदोपस्थापकविशेषणविभक्तेः सत्त्वेन तया वृत्त्याऽभेदस्योपस्थितिः संभवतीत्यभेदस्यात्र यद्यपि प्रकारत्वमपि संभवति तथापि संसर्गतामतेऽपि=अभेदस्य संसर्गत्वस्वीकारेऽपि किमपि गौरवं नास्तीति तत्र=अभेदे विशेषणविभक्तेः वृत्तिकल्पनम्=शक्तिकल्पनमनुचितमेव। प्रत्युत प्रकारतामते एवाभेदे विशेषणविभक्तेः शक्तिकल्पनरूपं गौरवमस्तीत्यर्थः।

ननु यदि कस्यचित् पुरुषस्याभेदे एकत्वादिसंख्यावाचिकाया विशेषणविभक्तेः शक्तिभ्रमौ जातः किं वा विशेषणविभक्तेरेकत्वे शक्तिरस्तीत्यभेदे

घटः' इत्यादिवाक्यादुत्पत्त्या तादृशसमभिव्याहारज्ञानस्य द्विविधबोधे हेतुताद्वयं कल्पनीयमभेदस्य संसर्गतावादिनेति गौरवम्। एवं तादृशसमभिव्याहारज्ञानघटितसामग्र्या भिन्नयोग्यताज्ञानघटितत्वेन द्वैविध्यमिति भिन्नविषयकप्रत्यक्षादिकं प्रति तादृश- शाब्दसामग्रीप्रतिबन्धकताया अप्याधिक्यमिति वाच्यम्, संसर्गतावादिनोक्तस्थलेऽपि तत्संसर्गकबोधस्यैवोपगतादिति दिक्।

स्वासिकलक्षणाग्रहः स्यात्तदा तु 'नीलो घटः' इति वाक्येनाभेदप्रकारक एव बोधो भवतीति सर्वसम्मतम्, तथा च– तादृशसमभिव्याहारज्ञानस्य='नीलो घटः' इत्यादिप्रथमान्तनीलपदप्रथमान्तघटपदसमभिव्याहारज्ञानस्य द्विविधबोधे= अभेदप्रकारकबोधे अभेदसंसर्गकबोधे च हेतुताद्वयं संसर्गतावादिना कल्पनीयमिति गौरवं तया हि 'नीलो घटः' इति वाक्यस्य स्वसिद्धान्तेनाभेदसंसर्गकबोधे एका हेतुता विशेषणविभक्तेरभेदे शक्तिभ्रमे लक्षणाग्रहे चोक्तरीत्या वृत्त्योपस्थिताभेदस्य प्रकारत्वसंभवेनाभेद- प्रकारकबोधे द्वितीया हेतुतेत्यर्थः। प्रकारतामते तु शक्तिभ्रमे लक्षणाग्रहे तथा सिद्धान्ते चाऽभेदप्रकारक एव बोधो भवतीति नोक्तवाक्यस्य हेतुताद्वयं कल्पनीयमिति न गौरवम्। एवम्– यत्र प्रत्यक्षसामग्री शाब्दसामग्री च समानविषया भवति तत्र प्रत्यक्षसामाग्र्याः प्राबल्येन शाब्दबोधं प्रति प्रत्यक्षसामग्री प्रतिबन्धिका भवति यत्र भिन्नविषया भवति तत्र तु शाब्दसामग्र्या प्राबल्यं भवतीति तादृशसमभिव्याहारज्ञान- घटितसामग्र्याः= 'नीलो घटः' इत्यादिप्रथमान्तनीलपदप्रथमान्तघटपद- समभिव्याहारज्ञानघटितसामग्र्या भिन्नयोग्यताज्ञानघटितत्वेन सिद्धान्ते संसर्गविषयकयोग्यताज्ञानघटितत्वेन तथाऽभेदे शक्तिभ्रमे लक्षणाग्रहे वाऽभेदप्रकारताविषयकयोग्यताज्ञानघटितत्वेन द्वैविध्यं जातमिति भिन्नविषयक- प्रत्यक्षं प्रति तादृशद्विविधशाब्दबोधसामग्र्याः प्रतिबन्धकत्वं कल्पनीयमित्यपि संसर्गतामते गौरवम्। प्रकारतामते तु सर्वत्राभेदप्रकारक एव बोधो भवतीति एकविधयोग्यताज्ञानघटितत्वेनोक्तशाब्दसामग्र्या द्वैविध्यमेव नास्ति येन द्विविधं प्रतिबन्धकत्वं स्यादिति न गौरवमित्याशङ्क्य परिहरति– न चेति। परिहारहेतुमाह– संसर्गतेति, उक्तस्थले=शक्तिभ्रमस्थले लक्षणाग्रहस्थलेऽपि चोपस्थितस्याभेदस्य संसर्गतयैव भानं भवतीति स्वीकाराद् हेतुताद्वयस्य

'स्तोकं पचति' 'मृदु पचति' इत्यादौ विरुद्धविभक्त्यऽवरुद्धपदोपस्थापितस्यापि स्तोकमृद्वादेर्धात्वर्थपाकादावऽभेदान्वयो व्युत्पत्तिसिद्धः तदनुरोधेन च द्वितीयान्तपदधातुपदयोः समभिव्याहारस्याप्यभेदान्वयबोधौपयिकाऽऽकाङ्क्षात्वमुपगम्यते क्रियाविशेषणस्थले च न द्वितीयातिरिक्तविभक्तिरुत्पद्यते "क्रियाविशेषणानां क्लीबत्वं कर्मत्वं च" इत्यनुशासनेन तत्र कर्मत्वातिदेशात्।

प्रतिबन्धकताद्वयस्य च न कल्पनापत्तिरिति न गौरवम्। अयं भावः यथाऽननुभूतस्य स्मरणं न भवतीति नियमसत्त्वेऽप्यनुभूतस्य स्मरणं भवत्येवेति नियमो नास्ति तथा केनचित्पदेन वृत्त्याऽनुपस्थितस्य प्रकारत्वं न भवतीति नियमसत्त्वेऽप्युपस्थितस्य प्रकारत्वं भवत्येवेति नियमो नास्ति तथा च शक्तिभ्रमे लक्षणाग्रहे च विशेषणविभक्त्या वृत्त्योपस्थितस्याप्यभेदस्य संसर्गत्वमेव स्वीक्रियते न प्रकारत्वं येन गौरवं स्यात्।

'नीलो घटः' इत्यादावभेदान्वयबोधौपयिकाकाङ्क्षास्वरूपमुक्त्वा संप्रति 'स्तोकं पचति' इत्यादावभेदान्वयबोधौपयिकाकाङ्क्षां निर्वक्ति– स्तोकमित्यादिना। यद्यपि 'नीलो घटः' इत्यादौ सुबन्तप्रयोगे तु विशेष्यविशेषणवाचकपदयोर्विरुद्धविभक्त्यन्तत्वे ह्यभेदान्वयबोधो न भवति तथापि 'स्तोकं पचति' इत्यादौ तिङन्तप्रयोगे तु विशेष्यविशेषणवाचकपदयोर्विरुद्धविभक्त्यन्तत्वेऽप्यभेदान्वयबोधो भवतीति पचतीतिङ्विभक्त्यपेक्षया विरुद्धविभक्त्या द्वितीययाऽवरुद्धेन स्तोकमिति पदेनोपस्थापितस्यापि स्तोकपदार्थस्य धात्वर्थीभूतपाकादाव भेदेनान्वयो भवति–स्तोकाभिन्नः पाक इति, अभेदसम्बन्धावच्छिन्नस्तोकत्वावच्छिन्नप्रकारतानिरूपितपाकत्वावच्छिन्नविशेष्यताकः शाब्दबोधः। तथा च यथा 'नीलो घटः' इत्यत्राभेदान्वये प्रथमान्तघटपदप्रथमान्तनीलपदयोः समभिव्याहारस्याकाङ्क्षात्वं तथा 'स्तोकं पचति' इत्यत्र द्वितीयान्तविशेषणवाचकस्तोकादिपदधातुपदयोः समभिव्याहारस्याकाङ्क्षात्वं ज्ञेयम्। ननु क्रियाजन्यफलाश्रयत्वमेव कर्मत्वम् एतादृशकर्मवाचकपदादेव द्वितीया भवति अत्र च स्तोकपदार्थस्य पाकक्रियाजन्यफलाश्रयत्वमेव नास्ति धात्वर्थपाकेऽभेदेनान्वयस्वीकारादिति स्तोकपदाद् द्वितीया कथमत्र प्राप्तेत्याशङ्क्याह–

न चैवम्– 'स्तोकः पाकः' इत्यादावपि द्वितीयाप्रसङ्गः तत्रापि स्तोकादेः क्रियायामेव विशेषणत्वात् भावकृतां प्रयोगसाधुत्वमात्रार्थकतया धातुनैव तत्र पाकादिप्रतिपादना-दिति वाच्यम्, क्रियापदस्य तत्र सार्थकप्रत्ययान्तधातूपस्था-

---

क्रियाविशेषणेति तत्र='स्तोकं पचति' इत्यादिवाक्यघटकस्तोकपदस्यार्थे कर्मत्वातिदेशात्=कर्मत्वोपचारात्, औपचारिकं यत् कर्मत्वं तदाश्रित्य द्वितीया जायते इत्यर्थः।

नन्वेवम् 'स्तोकः पाकः' इत्यत्रापि स्तोकपदात् द्वितीया स्यात् स्तोकपदार्थ स्यात्रापि पाकेन धात्वर्थेनाभेदान्वयस्वीकारात्। ननु प्रत्ययार्थस्यात्र प्राधान्येन तत्रैव स्तोकपदार्थान्वयो भविष्यति न धात्वर्थे, क्रियाविशेषणवाचकपदाद् द्वितीया तु तत्र भवति यत्र क्रियाविशेषणस्य धात्वर्थेऽभेदान्वयः स्यादित्या-शङ्क्याह– भावेति, भाववाचककृदन्तप्रत्ययानां साधुत्वमात्रार्थकत्वेन तत्र='स्तोकः पाकः' इत्यादावपि धातुनैव पाकाद्यर्थः प्रतिपाद्यते न तु प्रत्ययेन येन प्रत्ययार्थपाकादौ विशेषणस्यान्वयः स्यात्। अयं भावः– 'पाकः' इत्यत्र धातुनापि पाकक्रियैव प्रतिपाद्यते भावार्थकघञापि पाकक्रियैव प्रतिपादनीया "उक्तार्थानामप्रयोगः" इति न्यायेनैकस्यैव पाकस्य द्विरभिधानं तु न संभवतीति धातुनैव पाकः प्रतिपाद्यते प्रत्ययस्य साधुत्वार्थकत्वमेव स्वीक्रियते, न च विनिगमनाविरहात् प्रत्ययेनैव पाकः प्रतिपाद्यते न धातुनेति वाच्यम्, अनेकभावार्थकप्रत्ययानां प्रकृतिभूतधात्वर्थक्रियायां शक्तिकल्पने गौरवात् धातोस्त्वगत्या क्रियायां शक्तिः स्वीकार्यैवेति भावार्थप्रत्ययस्थलेऽपि धातोरेव पाकादिक्रियाबोधकत्वं युक्तं न प्रत्ययस्येति 'स्तोकः पाकः' इत्यत्रापि स्तोकपदार्थस्य धात्वर्थे एवाभेदान्वयात् स्तोकपदाद् द्वितीया स्यादेवेत्याशङ्क्याह– न चैवमिति। परिहारहेतुमाह– क्रियापदस्येति। तत्र="क्रियाविशेषणानां क्लीबत्वं कर्मत्वं च" इत्यनुशासने क्रियापदस्य सार्थकप्रत्ययान्तधातूपस्थाप्य-क्रियापरत्वादत्र च घञः साधुत्वमात्रार्थकत्वेन सार्थकत्वाभावात् तदन्तधातूपस्था-प्यपाकक्रियायां स्तोकपदार्थस्य विशेषणत्वेऽपि न स्तोकपदाद् द्वितीया भवति 'स्तोकं पचति' इत्यादौ तु तिप्प्रत्ययस्य सार्थकत्वेन तदन्तधातूपस्था-प्यपाकक्रियायां स्तोकपदार्थस्य विशेषणत्वेन स्तोकपदाद् द्वितीया भवतीत्यर्थः। ननु यदि भावार्थकप्रत्ययानां न सार्थकत्वं तदा 'स्तोकं स्थीयते' इत्यत्राऽऽख्यात-

प्यार्थपरत्वात्। 'स्तोकं स्थीयते' इत्यादावाख्यातस्यापि वर्तमानत्वार्थकतया सार्थकत्वात्। न च वर्तमानत्वाद्यविवक्षायां द्वितीयानुपपत्तिरिति वाच्यम् वर्तमानत्वादिविवक्षास्थल इवाऽर्थबोधप्रयोजकाकाङ्क्षाशालित्वेनैव तदविवक्षास्थलेऽपि भावाख्यातस्यार्थवत्त्वात्।

केचित्तु– धातोरिव घञन्तस्यापि पाकादौ शक्तिरुपेयते, अन्यथा सुब्विभक्त्यर्थसंख्याकर्मत्वादीनां तत्र पाकादावन्वयानुपपत्तेः–"प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम्"

प्रत्ययस्यापि भावार्थकत्वेन सार्थकत्वं न स्यादिति स्तोकपदात् कथं द्वितीया प्राप्तेत्याशङ्क्याह– स्तोकमिति, 'स्तोकं स्थीयते' इत्यादावप्याख्यातप्रत्ययस्य वर्तमानकालबोधकत्वेन सार्थकत्वमस्त्वेति न द्वितीयानुपपत्तिरित्यर्थः। ननु यत्र कालविवक्षा न भवति तत्रापि भावाख्यातप्रत्ययो भवतीति वर्तमानकालाविवक्षायां 'स्तोकं स्थीयते' इत्यादौ भावाख्यातस्य सार्थकत्वं न सम्भवतीति द्वितीयापि न स्यादित्याशङ्क्याह– न चेति। परिहारहेतुमाह– वर्तमानत्वादीति, तिङ्भावाख्यातप्रत्यये वर्तमानत्वादीति, तिङ्भावाख्यातप्रत्यये वर्तमानत्वबोधनस्य स्वरूपयोग्यता त्वस्त्वेव विवक्षायां सत्यां वर्तमानत्वविषयकबोधोदयादिति तादृशस्वरूपयोग्यतामादायैव सार्थकत्वोपपत्तेरित्यर्थः। तद्=वर्तमानत्वादि। एवञ्चार्थबोधानुकूलाकाङ्क्षापर्याप्त्यधिकरणीभूतप्रत्ययप्रकृतिभूतधातुवाच्यक्रियानिष्ठविशेष्यता निरूपिता अभेदसम्बन्धावच्छिन्न कर्मत्वप्रयोजकपदाद् द्वितीया भवति इति नियमः प्राप्तस्तथा च 'स्तोकं पचति' स्तोकं स्थीयते इत्यादौ तिप्प्रत्ययस्य सार्थकत्वेनार्थबोधानुकूलाकाङ्क्षापर्याप्त्यधिकरणत्वात् तत्प्रकृतिभूतधातुवाच्यपाकक्रियानिष्ठविशेष्यतानिरूपिताभेदसम्बन्धावच्छिन्नकर्मत्वस्य प्रयोजकं स्तोकपदमिति स्तोकपदादत्र द्वितीया प्राप्ता। 'स्तोकः पाकः' इत्यत्र च घञ्प्रत्ययस्य सार्थकत्वाभावान्न स्तोकपदाद् द्वितीया संभवति।

भावार्थकृत्प्रत्ययानां यत्प्रयोगसाधुत्वमात्रार्थकत्वमुपगम्यानर्थकत्वमुक्तं तत्र कस्यचिन्मुखेन प्रत्यवतिष्ठते– केचिदित्यादिना, (38) वदन्तीतिपर्यन्तम्। यथा धातोः पाकादौ शक्तिस्तथा 'पाकः' इत्यत्र घञन्तस्यापि पाके शक्तिः

इति व्युत्पत्तेः, धातूनां च सुब्विभक्त्यप्रकृतित्वात्। प्रकृत्येकदेशार्थेऽपि प्रत्ययार्थान्वयोपगमे? 'पचन्तं पश्यति' इत्यादितः 'पचमानं पश्यति' इत्यादितश्च पाकादौ द्वितीयाद्यर्थकर्मत्वाद्यन्वयबोधप्रसङ्गात्।

एकविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणत्वेनान्वयस्या-

स्वीकार्यैव। विपक्षे बाधकमाह– अन्यथेति, यदि घञन्तपाकपदस्य पाके शक्तिर्न स्यात्तदा तत्र='पाकः' इति घञन्तप्रयोगे पाकादौ सुव्विभक्त्यर्थभूत-संख्याकर्मत्वादीनामन्वयो न स्यात्। अत्र हेतुमाह– प्रकृत्यर्थेति– प्रत्ययानां स्वप्रकृत्यर्थविशिष्टस्वार्थबोधकत्वमस्ति "प्रकृतिप्रत्ययौ सहार्थे ब्रूतः" इतियावद् यथा 'घटं कुरु' इत्यत्र द्वितीयायाः स्वप्रकृत्यर्थघटविशिष्टकर्मत्वबोधकत्वमस्ति न तु घटाऽनन्वितकर्मत्वबोधकत्वमित्यर्थः, तथा च यदि घञन्तपाकपदस्य पाके शक्तिर्न स्यात् किं तु घञः साधुत्वमात्रार्थकत्वं स्यात् केवलस्य धातोरेव पाके शक्तिः स्यात्तदा सुब्बिभक्त्यर्थसंख्याकर्मत्वादीनां पाकेनान्वयो न स्याद् यतः प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमोस्तीति सुपप्रत्ययेनापि स्वप्रकृत्यर्थान्वितानामेव स्वार्थभूतसंख्याकर्मत्वादीनां बोधनं कर्तव्यं प्रकृतित्वं चाव्यवधानेन पूर्ववर्तित्वं च न पचादिधातूनां सुब्विभक्तिप्रकृतित्वमस्ति घञादिना व्यवधानात् यस्य च घञः सुब्बिभक्तिप्रकृतित्वं तस्यानर्थकत्वाश्रयणादित्यर्थः। ननु प्रत्ययानामनुभवबलात् प्रकृतितदेकदेशार्थान्यतरान्वितस्वार्थबोधकत्वं कल्पयामस्तथा च 'पाक' इत्यत्र सुब्विभक्तिप्रकृत्येकदेशार्थभूतेपि धात्वर्थे पाके संख्याकर्मत्वादीनामन्वयो भविष्यतीत्याशङ्क्याह– प्रकृत्येकदेशार्थेपीति, एवं हि 'पचन्तं पश्यति' इत्यत्रापि विवक्षासत्त्वे प्रकृत्येकदेशार्थे पाके द्वितीयार्थकर्मत्वस्यान्वयः स्यान्न तु प्रत्ययार्थे पाककर्तरीति पाककर्मकमेव दर्शनं स्यान्न तु पाककर्तृकर्मकम्, न चैतदिष्टमिति न प्रकृत्येकदेशार्थे प्रत्ययार्थान्वयो भवति तथा च पाक इत्यत्रापि धात्वर्थपाके कर्मत्वाद्यन्वयोऽनुपपन्न इति तदन्वयार्थं घञन्तस्य विशिष्टस्य पाके शक्ति स्वीकार्या तथा च 'पाकः' इत्यत्र घञन्तपाकपदस्य सुब्विभक्तिप्रकृतित्वेन तदर्थीभूतपाके सुब्विभक्त्यर्थसंख्याकर्मत्वादीनामन्वये न कोऽपि विरोधः।

व्युत्पन्नतया तत्र प्रत्ययार्थविशेषणपाकादेर्न कर्मत्वे विशेषणतयाऽन्वय इति चेत्? तथापि पाकादिविशेषणतया सुबर्थसंख्याया अन्वयसंभवात् यत्र पाककर्त्रादेर्द्वित्वादिकं बाधितं पाकादेश्च तदबाधितं तत्र 'पचन्तौ पश्यति' 'पचमानो पश्यति' इत्यादिप्रयोगप्रसङ्गस्य दुर्वारत्वात्। धातूपस्थाप्यार्थे सुबर्थान्वयबोधं प्रति तत्तद्धातूत्तरप्रत्ययधर्मिक-किंचिदर्थपरत्वज्ञानस्य

ननु 'पचन्तं पश्यति' इत्यादौ शतृप्रत्ययार्थे कर्तरि पाकस्य विशेषणत्वेनान्वयो जातोस्ति एकत्र विशेषणत्वेनोपस्थितस्य चान्यत्र विशेषणत्वेनान्वयो नैव भवतीति पाकस्य कथं सुब्विभक्त्यर्थकर्मत्वेऽन्वयः स्यादित्याशङ्कते—एकेति। तत्र='पचन्तं पश्यति' इत्यादिसार्थकप्रत्ययान्तप्रयोगे। कर्मत्वस्य प्रत्ययार्थत्वेन प्राधान्यात् तत्र प्रकृत्यर्थपाकादीनामन्वयस्य योग्यत्वात् तत्परिहारः कृत इति भावः। उक्तरीत्या पाकादौ कर्मत्वान्वयवारणे कृतेऽपि संख्याद्यन्वयापत्तिंप्रतिपादयति— तथापीति, प्रकृत्येकदेशार्थे प्रत्ययार्थान्वयोपगमे एकदेशार्थे पाकादौ सुबर्थसंख्याया अन्वयो भविष्यत्येव तथा च यत्रैक एव पाककर्त्ता पाकद्वयं करोति तत्र द्वित्वसंख्यायाः प्रकृत्येकदेशार्थे पाकेऽन्वयसंभवात् 'पचन्तौ पश्यति' इत्यादिप्रयोगः स्यादेव। न चैवं भवति किन्तु यत्र द्वौ पाककर्तारौ भवतस्तत्रैव 'पचन्तौ पश्यति' इति प्रयोगो भवति तस्मात् प्रकृत्येकदेशार्थे प्रत्ययार्थान्वयो न भवतीति घञन्तस्य विशिष्टस्य पाकादौ शक्तिरुपेया तथा च घञन्तस्य विभक्तिप्रकृतित्वेन विशिष्टार्थभूते पाके सुव्विभक्त्यर्थसंख्याकर्मत्वादीनामन्वयः संभवत्येव। ननु प्रत्ययार्थनिष्ठप्रकारतानिरूपितधात्वर्थनिष्ठविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति तत्तद्धातूत्तरप्रत्ययधर्मिक-किञ्चिदर्थपरत्वज्ञानं प्रतिबन्धकमित्येवं प्रतिबध्यप्रतिबन्धकभावं कल्पयिष्यामस्तया च 'पचन्तं पश्यति' 'पचन्तौ पश्यति' इत्यादौ पच्धातूत्तरवर्तमानस्य शतृप्रत्ययस्य कर्तरि शक्तत्वेन तदर्थकतया शतृप्रत्ययस्य कर्तृत्वरूपार्थपरत्वज्ञानमेव प्रत्ययार्थसंख्यादीनां धात्वर्थपाकादौ विशेषणतयान्वयबोधे प्रतिबन्धकं भविष्यतीति नात्र प्रकृत्येकदेशार्थपाकादौ प्रत्ययार्थसंख्यादीनामन्वयापत्तिर्दोषः 'पाकः' इत्यादि भावार्थकृत्प्रत्ययस्थले तु भावार्थकृत्प्रत्ययानां साधुत्वमात्रार्थकत्वेन निरर्थकत्वाश्रयणात् किञ्चिदर्थपरत्वज्ञानमेव न जायते इति प्रतिबन्धकाभावात् प्रत्ययार्थसंख्याकर्मत्वादीनां धात्वर्थपाकादौ विशेषणतया-

प्रतिबन्धकतामुपगम्यैतादृशातिप्रसङ्गवारणे च गौरवात्।

एवम्– 'शोभनं पचनम्' इत्यादौ धातुमात्रेण पाकाद्युपस्थितौ च तत्र शोभनाद्यभेदान्वयबोधानुपपत्तिः विशेषणविभक्ति-सजातीयविभक्तिप्रकृत्यनुपस्थाप्यत्वात्।

प्रकृत्येकदेशसाधारणतादृशविभक्तिप्रकृतित्वस्य प्रयोज-

ऽन्वययबोधे न काचिदनुपपत्तिरिति कृतं घञन्तस्य पाकादौ शक्तिस्वीकारेणे-त्याशङ्क्याह– धातूपस्थाप्येति, एवं नवीनप्रतिबध्यप्रतिबन्धकभावकल्पनरूपमेव गौरवं भविष्यति तस्माद् घञन्तस्य पाकादौ शक्तिः स्वीकार्या। प्रत्ययार्थानां प्रकृत्येकदेशार्थान्वयश्च न स्वीकार्य इत्यर्थः।

यथा 'पाकः' इत्यत्र घञन्तस्य पाके शक्तिः स्वीकार्या तथा 'पचनम्' इत्यत्रापि ल्युडन्तस्यैव पाके शक्तिः स्वीकार्या न तु धातुमात्रस्येत्याह– एवमिति, यदि ल्युडन्तस्य पाके शक्तिर्न स्वीक्रियेत किन्तु धातुमात्रेण पाकोपस्थितिः स्यात्तदा यथा 'पाकः' इत्यत्र धातुमात्रेणोपस्थितपाके संख्याकर्मत्वाद्यन्वयस्यानुपपत्तिरस्ति तथात्रापि धातुमात्रोपस्थितपाके अभेदसम्बन्धेन शोभनपदार्थान्वयो न स्यादेवेत्यर्थः। उक्ते हेतुमाह– विशेषणेति, विशेष्यविशेषणयोरभेदसम्बन्धेन शाब्दबोधं प्रति सजातीयविभक्तिप्रकृत्युपस्था-प्यत्वं हेतुरस्ति तथा च विशेष्यस्य विशेषणविभक्तिसजातीयविभक्तिप्रकृत्यु-पस्याप्यत्वमपेक्ष्यते अत्र च पाकपदार्थस्य न विभक्तिप्रकृत्युपस्थाप्यत्वम् 'पचनम्' इत्यत्र पचनेति ल्युडन्तस्यैव विभक्तिप्रकृतित्वेन पाकोपस्थापकस्य धातुमात्रस्य विभक्त्यप्रकृतित्वात् ल्युटा व्यवधानात् विभक्त्यप्रकृति-भूतपच्धातुना पाकस्योपस्थापितत्वादित्यर्थः।

ननु प्रत्ययविधावुद्देश्यत्वं हि प्रकृतित्वं तच्च पचनमित्यत्र प्रत्ययभागे इव धातुभागेऽप्यस्त्येवेति प्रकृतितदेकदेशसाधारणं यत् तादृश=विशेषण विभक्तिसजातीयविभक्तिप्रकृतित्वं तदेव विशेष्यविशेषणयोरभेदान्वयप्रयोजकं तथा चात्र धातुभागेऽप्युक्तप्रकृतित्वस्य सत्त्वेन प्रकृतिभूतधातूपस्थाप्यपाके शोभनपदार्थाभेदान्वये न काचिदनुपपत्तिरित्याशङ्क्याह– प्रकृत्येकेति। अत्र दोषमाह– तत्रेति। तत्र='शोभनं पचनम्' इत्यत्र यद्यधिकरणार्थकं ल्युट्

कत्वे? तत्र ल्युडादेरधिकरणपरत्वेऽपि तथाविधान्वयबोधापत्तेः। कस्यचित् प्रतिबन्धकतां कल्पयित्वा तद्वारणे च गौरवात्।

न चैवम्– उपकुम्भार्धपिप्पल्यादिरूपपूर्वपदार्थप्रधान-समासपदात् कुम्भसमीपपिप्पल्यर्धादौ विभत्यर्थान्वयस्य प्रातिपदिकान्तरार्थाऽभेदान्वयस्य चानुपपत्तिः। पूर्वपदस्य समासोत्तर-

---

स्यात्तदापि तथाविधान्वयः=पाकेन शोभनपदार्थभेदान्वयः स्यात् न त्वधिकरणेनेत्यर्थः, इष्टं च तदाधिकरणेनैव शोभनपदार्थान्वय इति ल्युडन्तस्यैव पाके शक्तिः स्वीकार्या तथा चाधिकरणार्थकल्युट्स्थले ल्युडन्तस्याधिकरणे एव शक्तिस्वीकाराधकरणेनैव शोभनपदार्थान्वयो भविष्यति न पाकादौ। नन्वत्रापि पूर्ववत् 'पदान्तरार्थनिष्ठप्रकारतानिरूपितधात्वर्थनिष्ठविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रतितत्तद्धातूत्तरप्रत्ययधर्मिककिञ्चिदर्थपरत्वज्ञानस्य प्रतिबन्धकत्वं कल्पयिष्यामस्तथा चाधिकरणल्युट्स्थले ल्युटोऽधिकरणार्थपरत्वज्ञानं शोभनपदार्थस्य धात्वर्थपाकादावभेदान्वये प्रतिबन्धकं भविष्यति, भावार्थल्युट्स्थले तु भावकृतां निरर्थकत्वाश्रयणेन धातूत्तरवर्तिल्युटोऽर्थपरत्वज्ञानस्य प्रतिबन्धकस्याभावात् शोभनपदार्थस्य धात्वर्थपाकेनाभेदान्वये न काचिदनुपपत्तिरित्याशङ्क्याह– कस्यचिदिति। एवं हि नवीनप्रतिबध्यप्रतिबन्धकभावकल्पनरूपमेव गौरवं प्राप्तमित्यर्थः। तथा च पचनमिति ल्युडन्तस्यैव पाके शक्तिः स्वीकार्या।

ननु एवम्=प्रत्ययानां स्वप्रकृत्यर्थविशिष्टस्वार्थबोधकत्वनियमे तथा स्वाव्यविहतपूर्ववर्तित्वमेव प्रकृतित्वमिति स्वीकारे च 'उपकुम्भम् अर्धपिप्पली' इत्यादिपूर्वपदार्थप्रधानसमासप्रयोगे पूर्वपदार्थेन समीपार्धादिना विभक्त्यर्थकर्मत्वादीनां तथा 'सुन्दरमुपकुम्भम्' इत्यादौ पूर्वपदार्थेन प्रातिपदिकान्तरार्थस्य सुन्दराभेदसम्बन्धेनान्वयो न स्यात्, अत्र हेतुमाह–पूर्वपदस्येति, पूर्वपदस्य=उपपदस्याऽर्धपदस्य च समासोत्तरविभक्तिप्रकृतित्वं नास्ति कुम्भादिपदेन व्यवधानात्, प्रकृतित्वं चाव्यवहितपूर्ववर्तिन एव, प्रत्ययेन च स्वार्थकर्मत्वादीनां स्वप्रकृत्यर्थेनैव वैशिष्ट्यं बोधनीयमति पूर्वपदार्थे प्रत्ययार्थान्वयानुपपत्तिः, "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति नियमेन च सुन्दरपदार्थस्य पूर्वपदार्थेऽप्यऽन्वयो न संभवति–तस्य पदार्थैकदेशत्वादिति' उपकुम्भम्'

विभक्तयऽप्रकृतित्वादिति वाच्यम्, तदनुरोधेनैव तत्र कुम्भ-पिप्पल्यादिपदानामेव कुम्भसमीपपिप्पल्यर्धादौ लक्षणायाः पूर्वपदस्य तात्पर्यग्रहमात्रोपयोगितायाश्च स्वीकारात्।

वस्तुतस्तु– तत्रोत्तरपदार्थविशेषितपूर्वपदार्थसमीपार्धादौ प्रत्ययार्थान्वयबोधे तादृशसमस्तपदप्रत्ययपदयोरव्यवहित-पूर्वापरीभावोऽप्याकाङ्क्षा। एवं तत्र प्रातिपदिकान्तरार्थाऽभे-

---

इत्यादौ तु विशिष्टस्यैव समासस्य कुम्भसमीपादौ शक्तिः स्वीकार्या तथा च कुम्भसमीपस्य पदार्थत्वेन तत्राभेदेन पदार्थान्तरस्य सुन्दरपदार्थस्यान्वये नानुपपत्तिः, तथा प्रत्ययार्थान्वयेऽपि नानुपपत्तिः– उपकुम्भ- पदस्य विशिष्टस्य विभक्तिप्रकृतित्वाद् विशिष्टस्यैव कुम्भसमीपार्थो- पस्थापकत्वादित्याशङ्क्याह– न चैवमिति। परिहारहेतुमाह– तदनुरोधेनेति, उक्तदोषप्राप्त्यनुरोधेनैव तत्र= 'उपकुम्भम्' इत्यादौ कुम्भपदस्य कुम्भसमीपे लक्षणा उपेतिपूर्वपदं तात्पर्यग्राहकमिति स्वीक्रियते, तथा चात्र कुम्भपदस्य विभक्तिप्रकृतित्व-मस्त्येवाव्यवधानेन पूर्ववर्तित्वात् कुम्भसमीपोपि तदर्थ एवेति तत्र प्रत्ययार्थान्वये न काप्यनुपपत्तिरिति कृतं समासे=समस्तस्य विशिष्टस्य शक्तिस्वीकारेणेत्यर्थः एवम् 'अर्धपिप्पली' इत्यत्रापि। इदानीं कुम्भसमीपार्थस्य पदार्थत्वमेव न तु पदार्थैकदेशत्वमिति तत्र सुन्दरादिपदार्थान्तरान्वयेऽप्यनुपपत्तिर्नास्तीत्यर्थः।

शाब्दबोधौपयिकाकाङ्क्षासत्त्वे शाब्दबोधानुपपत्तिर्न भवतीति 'उपकुम्भम्' इत्यादौ प्रत्ययार्थस्य पदार्थान्तरस्य चान्वयबोधौपयिकाकाङ्क्षास्वरूपमाह– वस्तुत इत्यादिना। उत्तरपदार्थेन कुम्भादिना विशिष्टो यः पूर्वपदार्थः समीपादिस्तत्र प्रत्ययार्थान्वयबोधे तादृश='उपकुम्भम्' इत्यादिसमस्तपदप्रत्ययपदयोश्च यः पूर्वापरीभावः स एवाकाङ्क्षा, तस्य चात्र सत्त्वेन पूर्वपदार्थे प्रत्ययार्थान्वये न काप्यनुपपत्तिः, तथा चात्र 'प्रत्ययार्थनिष्ठप्रकारतानिरूपितपूर्वपदार्थनिष्ठ-विशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विभक्त्यव्यवहितपूर्ववर्तिकुम्भ-पदाव्यवहितपूर्ववर्त्युपपदज्ञानं कारणम् (आकाङ्क्षा)' इति वक्तव्यम्। पदार्थान्तरान्वयप्रकारमाह– एवमिति। तत्र=पूर्वपदार्थे। अत्र च 'अभेदसम्बन्धा-वच्छिन्नसुन्दरत्वाद्यवच्छिन्नप्रकारतानिरूपितसमस्तोपकुम्भादिपदार्थनिष्ठविशेष्यता-सम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति समानविभक्तिकयोः सुन्दरादिपदोप-

दान्वयबोधे समानविभक्तिकयोस्तादृशसमस्तपदपदान्तर-योश्च समभिव्याहारोप्याकाङ्क्षा तथा सत्यतिप्रसङ्गविरहात्।

धात्वर्थपाकादौ प्रत्ययार्थान्वयबोधे प्रातिपदिकान्तरार्था-ऽभेदान्वयबोधे च ल्युड्धञाद्यन्तसमुदायप्रत्यययोरानु-पूर्वीरूपाऽव्यवहितपूर्वापरीभावस्य समानविभक्तिकयोस्ता-दृशसमुदायपदपदान्तरयोः समभिव्याहारस्य चाकाङ्क्षत्वोपगमे?

कुम्भादिपदयोः समभिव्याहार आकाङ्क्षा' इत्येवमाकाङ्क्षास्वरूपं वक्तव्यम्। समानविभक्तिकयोस्तादृशसमस्तपदपदान्तरयोः='सुन्दरमुपकुम्भम्' इत्यनयोः। तथासति=उक्तस्वरूपाकाङ्क्षयोर्नियमाकत्वस्वीकारे सति, अतिप्रसङ्गस्य=पूर्वपदार्थे प्रत्ययार्थान्वयस्य पदान्तरार्थान्वयस्यानुपपत्तेरभावात्। किं वाऽतिप्रसङ्गस्य नाम विशिष्टे समासे शक्तिस्वीकाररूपातिप्रसङ्गस्याभावादित्यर्थः।

ननु यथा त्वया 'उपकुम्भम्' इत्यादौ विशिष्टे समासे शक्तिम-स्वीकृत्योक्ताकाङ्क्षास्वरूपं च परिकल्प्य तेन पूर्वपदार्थे प्रत्ययार्थस्य पदान्तरार्थस्य चान्वय उपपादितरतथा 'पाकः' इत्यादावपि भावार्थकृदन्तस्थले विशिष्टे घञन्ते स्वीकार्या किन्तु घञो निरर्थकत्वमाश्रित्य धातोरेव पाकादौ शक्तिः स्वीकार्या तत्र च धात्वर्थपाकादौ प्रत्ययार्थान्वयबोधे ल्युड्घञाद्यन्तसमुदायस्य 'पाकः पचनम्' इत्यस्य प्रत्ययस्य च=विभक्तेर्यः पूर्वापरीभावः स एवाकाङ्क्षा, पदार्थान्तरान्वयबोधे च समानविभक्तिकयोस्तादृशसमुदायपदपदान्तरयोः='शोभनः पाकः' 'शोभनं पचनम्' इत्याद्योः समभिव्याहार एवाकाङ्क्षा, उक्तप्रयोगेषु चैतादृशाकाङ्क्षयोः सत्त्वेन धात्वर्थपाकादौ प्रत्ययार्थान्वयस्य पदार्थान्तरान्वयस्य च न काप्यनुपपत्तिरिति कृतं घञाद्यन्तस्य पाकादौ शक्तिस्वीकारेण तथा च– 'प्रत्ययार्थनिष्ठप्रकारतानिरूपितधात्वर्थपाकादिनिष्ठविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति ल्युड्घञाद्यन्तसमुदायस्य विभक्त्यव्यवहित-पूर्ववर्तित्वज्ञानमाकाङ्क्षारूपं कारणम्' 'अभेदसम्बन्धावच्छिन्नपदार्थान्तरत्वा (सुन्दरत्वा)-वच्छिन्नप्रकारतानिरूपितधात्वर्थपाकादिनिष्ठविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति ल्युड्घञाद्यन्तसमुदायस्य पाक इत्यादेर्विशेषण-वाचकसुन्दरादिपदस्य च समानविभक्तित्वज्ञानमाकाङ्क्षास्वरूपं कारणम्' इति वक्तव्यमित्याशङ्क्याह– धात्वर्थेति। उक्ते दोषमाह– दर्शितेति, उक्तस्य

दर्शिताधिकरणार्थकल्युट्प्रत्ययस्थलीयातिप्रसङ्गस्य दुरुद्धरतया न तत्संभवः।

अथ घञन्तसमुदायस्य पाकाद्यर्थकत्वे घञन्तसमुदायस्य संयोगविभागत्वादिविशिष्टाऽवाचकत्वं व्युत्पाद्य संयोगविभागादिपदानां नैमित्तिकसंज्ञात्वनिराकरणं दीधितिकृतां विरुद्ध-

पूर्वापरीभावस्य समभिव्याहारस्य च धात्वर्थपाकादौ प्रत्ययार्थान्वयबोधे पदार्थान्तरान्वयबोधे चाकाङ्क्षात्वोपगमे हि यत्राधिकरणार्थको ल्युट् भवेत्तत्राप्युक्ताकाङ्क्षास्वरूपसत्त्वेन प्रत्ययार्थस्य पदार्थान्तरस्य च धात्वर्थपाकादावेवान्वययापत्तिः स्यान्न तु प्रत्ययार्थे पाकाधिकरणे, इष्टश्च तत्र पाकाधिकरणे एवान्वय इति न तत्संभवः–'पाकः' इत्यादौ उक्तस्य पूर्वापरीभावस्य समभिव्याहारस्य चाऽऽकाङ्क्षात्वसंभवः। तथा च 'पाकः' इत्यादौ तु घञाद्यन्तस्यैव पाकादौ शक्तिस्वीकारेणाऽधिकरणार्थकल्युट्स्थले पाकाधिकरणे प्रत्ययार्थादीनामन्वये न काप्यनुपपत्तिः। 'उपकुम्भम्' इत्यत्र च कुम्भपदस्यैव कुम्भसमीपे लक्षणास्वीकारेण तत्र प्रत्ययार्थादीनामन्वये न काप्यनुपपत्तिरित्यर्थः।

'पाकः' इत्यादौ घञन्तस्यैव पाकादौ शक्तिस्वीकारे दीधितिग्रन्थविरोधं प्रदर्शयति– अथेति दीधितिकारेण हि घञन्तस्य संयोगपदस्य विभागपदस्य च संयोगत्वविभागत्वविशिष्टवाचकत्वं नास्तीति व्युत्पाद्य संयोगविभागादिपदानां नैमित्तिकसंज्ञात्वं निराकृतम्, डित्थकपित्थाद्या संज्ञा यदृच्छासंज्ञा, घटपटाद्या संज्ञा नैमित्तिकसंज्ञास्ति घटत्वपटत्वादिकं प्रवृत्तिनिमित्तं कृत्वा प्रवृत्तत्वात्, एवं यदि घञन्तसंयोगविभागादिपदानामपि संयोगत्वविभागत्वाद्यवच्छिन्ने शक्तिः स्यात्तदा संयोगत्वविभागत्वादिकं प्रवृत्तिनिमित्तं कृत्वा प्रवृत्तत्वाद् नैमित्तिकसंज्ञात्वं स्यात् न च संयोगविभागादिपदानां संयोगविभागत्वाद्यवच्छिन्नं शक्तिरस्ति, अन्यथा– 'संयुनक्ति संयुज्यते विभजते' इत्यादौ संयोगविभागपदयोरभावेन संयोगविभागरूपार्थयोरुपस्थितिर्न स्यात् भवति चात्रापि संयोगविभागरूपार्थोपस्थितिरिति 'संयुनक्ति संयोगः विभजते विभागः' इत्यादौ सर्वत्रानुगतस्य धातोरेव लाघवात् संयोगविभागादौ शक्तिः स्वीकार्या न घञन्तसंयोगविभागपदयोरिति घञः साधुत्वमात्रार्थकत्वेन निरर्थकत्वमेवेति दीधितिकारस्यैतद्ग्रन्थस्य चाभिप्रायस्तथा च घञन्तस्य पाकादौ शक्तिस्वीकारे

मिति चेत्? का क्षतिः– न हि कस्यचिद् ग्रन्थकृतो विपरीतलेखनं युक्तिबलाद्वस्तुसिद्धौ बाधकम्।

एवं च यत्र धातुमात्रस्यैव पाकादौ तात्पर्यं तत्र तद्विशेषण-वाचकपदाद् द्वितीयैव। यत्र तु कृदन्तसमुदायस्य पाकादौ तात्पर्यं तत्र तादृशपदं तथाविधकृदन्तसमुदायसमान-विभक्तिकमेव। तदुक्तं कातन्त्रपरिशिष्टकृता–"कथं स्तोकः पाकः? कृदन्तविशेषणत्वात्", धात्वर्थैकाधिकरण्ये तु 'स्तोकमोदनस्य पाकः' इति स्यादेवेति वदन्ति।

उक्ताभिप्रायकदीधितिग्रन्थस्य विरोधः स्यात् संयोगादिपदानां पाकादिपदतुल्य-त्वादित्यर्थः। उक्तविरोधे स्वक्षत्यभावमाह– केति। हेतुमाह– न हीति। युक्तिबलादिति पदस्य वस्तुसिद्धौ इति पदेनान्वयः, मया हि युक्तिबलेन घञन्तसमुदायस्यैव पाकादौ शक्तिः स्वीकार्येति साधितमिति तत्र दीधितिकारस्य संयोगादिपदानां नैमित्तिकसंज्ञात्वनिराकरणं बाधकं भवितुं नार्हतीत्यर्थः। एवं संयोगादिपदेष्वपि घञन्तस्यैव संयोगाद्यर्थे शक्तिः स्वीकार्या। धातोरेव पाकादौ शक्तिर्न घञाद्यन्तस्येति स्वीकारे ह्यधिकरणल्युट्स्थले विशेषणीभूत-शोभनादिपदार्थस्य पाके एवान्वयः स्यान्नाधिकरणे इति दोषः पूर्वमुक्तः स्मरणीयः।

ननु यदि घञन्तसमुदायस्यैव पाकादौ शक्तिस्तदा विशेषणवाचक-स्तोकादिपदात् विशेष्यवाचकपदोत्तरविभक्तिसजातीयविभक्तिप्राप्तिप्रसङ्गेन द्वितीयानुपपत्त्या 'स्तोकं पाकः इति नैव स्याद् भवति चेत्याशङ्क्य क्व द्वितीया भवति क्व च न भवतीति निर्वक्ति– एवं चेति। 'स्तोकं पाकः' इत्यत्र धातोरेव पाके तात्पर्यम्=पाकोपस्थापकत्वमिति तद्विशेषणवाचक-पदात्=धात्वर्थविशेषणवाचकस्तोकपदाद् द्वितीया प्राप्तेत्यर्थः। यत्र च कृदन्तसमुदायस्य पाक इत्यादिपदस्य पाकोपस्थापकत्वं तत्र तादृशपदम्= विशेषणवाचकस्तोकादिपदं तथाविध=पाकाद्यर्थोपस्थापको यः कृदन्तसमुदायः 'पाकः' इति तत्समानविभक्तिकं भवति यथा– 'स्तोकः पाकः इति तदाह– यत्र त्विति। अत्र प्रमाणमाह– तदुक्तमिति, स्तोकपदस्य कृदन्त-पाकपदविशेषणत्वात् 'स्तोकः' इति प्रथमान्तप्रयोगो जात इत्यर्थः। धात्वर्थै-

तदर्थकपदोत्तरविभक्त्या संख्याबोधनेऽभेदसंसर्गावच्छिन्न-प्रकारताभिन्नतदर्थविषयताशालिशाब्दबोधसामग्री अपेक्षिता, तादृशश्च बोधस्तदर्थविशेष्यकः तदर्थनिरूपितभेदान्वयविषय-

---

काधिकरण्ये=धात्वर्थसामानाधिकरण्ये=धात्वर्थीभूतपाकादिविशेषणत्वे तु (धातुमात्रेण पाकोपस्थितौ तु) द्वितीयापत्त्या 'स्तोकः पाकः' इत्यपि भवत्येवेत्याह– धात्वर्थैकेति।

"केचित्तु" इत्यारभ्य "इति वदन्ति" इति पर्यन्तं परमतं प्रदर्श्य यत् (पृ. १७) विशेषणविभक्तेः साधुत्वमात्रार्थकत्वोक्त्या विशेषणवाचक-पदोत्तरविभक्त्यर्थसंख्यायाः शाब्दबोधेभानं न भवतीति व्यञ्जिते तस्य वचनमात्रेण सिद्ध्यसंभवात् कार्यकारणभावमाह– तदर्थकेत्यादिना। यथा– 'घटोस्ति' इत्यत्र तदर्थकं घटार्थकं पदम् 'घटः' इति पदं तज्जन्यशाब्दबोधे घटे या विषयता भासते सा अभेदसम्बन्धावच्छिन्नप्रकारताभिन्नैव भासते नीलादिवद् घटस्य क्वचिदप्यभेदसम्बन्धेन प्रकारत्वाभावादिति घटपदोत्तर-विभक्त्यर्थसंख्यायाः शाब्दबोधे भानं भवति 'एको घटः' 'द्वौ घटौ' इत्यादि। 'नीलो घटः' इत्यत्र च नीले प्रकारता वर्तते साप्यभेदसम्बन्धावच्छिन्नैव नीलस्याभेदसम्बन्धेन घटे प्रकारत्वादिति 'नीलो घटः' इति वाक्यजन्यशाब्दबोधे भासमाना नीलविषयता ह्यभेदसम्बन्धावच्छिन्नप्रकारताभिन्ना नास्तीति नीलपदोत्तरविभक्त्यर्थसंख्यायाः शाब्दबोधे भानं न भवतीत्यर्थः। तथा च– 'किञ्चिदर्थनिष्ठविशेष्यतानिरूपिताभेदसम्बन्धावच्छिन्नप्रकारताश्रयत्वज्ञानं तद्वाचकपदोत्तरविभक्त्यर्थसंख्याबोधे प्रतिबन्धकम्' इति वक्तव्यम्। बोध-स्वरूपमाह– तादृशश्चेति। तादृशः=विभक्त्यर्थसंख्यावगाहनशीलः। तदर्थ-विशेष्यकः=संख्याबोधकविभक्तिप्रकृत्यर्थविशेष्यको भवति यथा– 'घटः' इत्यत्र, 'नीलो घटः' इत्यत्र च घटपदजन्यो घटविशेष्यकः। द्वितीयं बोधस्वरूपमाह– तदर्थनिरूपितेति, संख्याबोधकविभक्तिप्रकृत्यर्थनिरूपितोयो भेदस्तदन्वयविषयक इत्यर्थः। यथा राज्ञः पुरुषः इत्यत्र यद्यपि पुरुष निष्ठविशेष्यता निरूपिता प्रकारतैव राज्ञि वर्तते तथापि राजनिष्ठा सा प्रकारताऽभेदसम्बन्धावच्छिन्ना नास्ति भेदसम्बन्धेनैव राज्ञः पुरुषविशेषणत्वादिति राजपदोत्तरङस्विभक्त्यर्थैकत्वसंख्यायाः शाब्दबोधे भानं भवत्येव यथा– 'एकराजनिरूपितस्वत्ववान् पुरुषः' इति। तथा च 'राज्ञः पुरुषः' इति

कश्च। 'नीलौ घटौ' इत्यादौ च विशेष्यवाचकपदोत्तरविभक्त्यैव द्वित्वादिकं प्रत्याय्यते एवं च– क्रियाविशेषणवाचकपदोत्तर-विभक्त्याऽबाधितयोरपि द्वित्वबहुत्वयोः प्रत्यायनाऽसंभवात् तादृशपदोत्तरमौत्सर्गिकमेकवचनमेव भावाख्यातस्थलवदित्य-वधेयम्।

अभेदान्वयबोधश्च विरूपोपस्थितयोरेवेति व्युत्पत्तिः– 'घटो घटः' 'दण्डवान् दण्डवान्' 'पाकं पचति' इत्यादौ घटत्व-

---

वाक्यजन्यबोधो भेदसम्बन्धविषयक एव– राजपुरुषयोरभेदभानाभावात्। प्रत्युदाहरणमाह– 'नीलौ घटौ' इति, अत्र नीलनिष्ठप्रकारतया अभेदसम्बन्धा-वच्छिन्नत्वान्नीलपदोत्तरविभक्त्या द्वित्वं न प्रत्याय्यते किन्तु घटपदोत्तर-विभक्त्यैव। एवं चेति–संख्याबोधने ह्यभेदसम्बन्धावच्छिन्नप्रकारताभिन्न-विषयताज्ञानस्य कारणत्वस्वीकारे क्रियाविशेषणानां च स्तोकादीनां क्रियायामभेद-सम्बन्धेनैव प्रकारत्वोपगमेन तन्निष्ठप्रकारताया अभेदसम्बन्धावच्छिन्नत्वात् क्रियाविशेषणवाचकस्तोकपदोत्तरविभक्त्यर्थसंख्यायाः शाब्दबोधे भानं नैव भवतीति तादृशपदोत्तरम्=क्रियाविशेषणवाचकस्तोकादिपदोत्तरं साधुत्वार्थ-मौत्सर्गिकमेकवचनमेव 'स्तोकं स्थीयते' इति भावख्यातस्थलवत् 'स्तोकं पाकः' 'स्तोकं पचति' इत्येवं प्रयोक्तव्यमित्यर्थः। अबाधितयोरिति– यत्रैक एव कर्ता पाकद्वयं पाकत्रयं वा करोति तत्र पाके यद्यपि द्वित्वबहुत्वयोर्बाधो न भवति तथापि पाकादिक्रियाविशेषणवाचकस्तोकादिपदोत्तरद्विवचनादिविभक्त्या केनापि प्रकारेण पाकादिक्रियागतद्वित्वबहुत्वयोः प्रत्यायनं न संभवत्यनुभव-विरोधादिति क्रियाविशेषणवाचकपदोत्तरमेकवचनमेव साधुत्वार्थं प्रयुज्यते।

ननु यद्यभेदसम्बन्धेनान्वये समानविभक्तिकत्वमेव प्रयोजकं तदा यथा 'नीलो घटः' इति प्रयोगो भवति नीलघटयोश्चाभेदसम्बन्धेनान्वयो भवति तथा 'घटो घटः' इत्यपि प्रयोगः स्याद् घटस्य स्वात्मन्यभेदसम्बन्धेनान्वयोऽपि स्यात्तत्र घटस्य स्वात्मना भेदाभावाद् योग्यताप्यस्त्येवेत्याशङ्क्याह– अभेदान्वयेति। विरूपोपस्थितयोः=विरुद्धधर्माभ्यामुपस्थितयोरेवाऽभेदान्वयो भवति यथा–'नीलो घटः' इत्यत्र नीलत्वघटत्वाभ्यां विरुद्धधर्माभ्यामुपस्थित-योर्नीलघटयोः। तत्तद्रूपावच्छिन्नस्य=घटत्वाद्यवच्छिन्नस्य। तथाविधयान्वयः=

दण्डवत्त्वपाकत्वाद्यवच्छिन्ने तत्तद्रूपावच्छिन्नस्य तथाविधान्वयबोधानुदयात्।

अथ तत्प्रयोजकसमानविभक्तिकत्वादेः सत्त्वात् कथं न तादृशबोधः? अत्राहुः—यादृशं फलं क्वचित् प्रसिद्ध्यति तादृशस्यैवापत्तिः संभवति क्लृप्तसामग्रीबलात्। यादृशं च सर्वथैवाप्रसिद्धं तादृशस्य चाऽऽपादकाऽप्रसिद्धेरापत्तिरशक्यैवेति घटत्वाद्यवच्छिन्नविशेष्यताकाऽभेदसंसर्गकघट-

---

अभेदान्वयः। तथा च— घटत्वावच्छिन्ने घटत्वावच्छिन्नस्याभेदसम्बन्धेन शाब्दबोधो न भवतीति लब्धम्। एवं दण्डवत्त्वावच्छिन्ने दण्डवत्त्वावच्छिन्नस्य पाकत्वावच्छिन्ने पाकत्वावच्छिन्नस्य चाभेदान्वयबोधाभावो विज्ञेयः। 'पाकं पचति' इत्यत्र पाकपदेनापि पाकत्वे पाकतेनैव रूपेणोपस्थितिर्भवति पचतिपदेनापि कर्तृविशेषणतया पाकस्वोपस्थितिर्भवति सा पाकत्वेनैव रूपेण भवति पाकत्वेनोपस्थिते च पाकत्वेनोपस्थितस्याभेदान्वयबोधासंभवात् 'पाकं पचति' इति प्रयोगोऽपि न भवति।

नन्वभेदान्वयप्रयोजकस्य समानविभक्तिकत्वादेः सत्त्वात् कथं नाभेदान्वयबोधः कारणसामग्रीसत्त्वे कार्यावश्यंभावादित्याशङ्कते—अथेति। तत्प्रयोजक=अभेदान्वयप्रयोजक। तादृशबोधः=अभेदान्वयबोधः। उत्तरमाह—यादृशमिति। यथा तन्तुभ्यः पटस्योत्पत्तिरूपफलं संभवतीति तन्त्वादिपटोत्पादकसामग्रीबलात् पटरूपं फलं संभवति यादृशं च शशविषाणादिकं क्वचिदपि न प्रसिद्धं तदापादकस्याप्यप्रसिद्धेः तस्य शशविषाणादेरापत्तिरशक्यैव तथा चाभेदसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यताकः शाब्दबोधः कदापि क्वचिदपि न दृष्ट इति तदापत्तिरपि कथं स्यादित्यर्थः। अत्रापत्तिर्नाम तदभावप्रयोजकीभूताभावप्रतियोगिविषया जिज्ञासा यथा दण्डाभावे घटाभावो भवतीति घटाभावप्रयोजकीभूतो यो दण्डाभावस्तत्प्रतियोगिनो दण्डस्य जिज्ञासापत्तिः। एवमत्र घटत्वावच्छिन्नप्रकारताकघटत्वावच्छिन्नविशेष्यताकशाब्दबोधस्यासंभवाद् योऽभाव उक्तस्तत्प्रयोजकीभूताभावस्य यः प्रतियोगी तद्विषया या जिज्ञासा सैवापत्तिपदार्थः। किमभावप्रयुक्तः उक्तशाब्दबोधाभाव इति पूर्वपक्षिजिज्ञासा, सा च जिज्ञासा न संभवत्युक्तशाब्दबोधस्य

त्वाद्यवच्छिन्नप्रकारताकशाब्दबोधस्य क्वचिदप्यनुदयात् कथं तदापत्तिः।

अथ 'घटो नीलघटः' 'दण्डवान् रक्तदण्डवान्' इत्यादौ तादृशशाब्दबोधस्य प्रसिद्धिः– विधेयकोटावधिकावगाहिनः शाब्दबोधस्य नवीनैः स्वीकारादिति चेत्? तर्हि घटाद्यंशे विशेषणतावच्छेदकविधया नीलादिभाननियामकनीलाद्युपस्थितितात्पर्यज्ञानविशेषादिघटितैव सामग्री घटत्वावच्छिन्न–

सर्वथाप्रसिद्धत्वेन तत्कारणस्याप्यप्रसिद्धत्वात् सद्विषयाया एव जिज्ञासायाः संभवादित्यर्थः।

ननु 'घटो नीलघटः' 'दण्डवान् रक्तदण्डवान्' इत्यादौ नीलघटाभेदान्वयावगाहनेन दण्डवति रक्तदण्डवदभेदान्वयावगाहनेन नवीनैर्विधेयकोटौ= विशेषणकोटावधिकावगाहिनः शाब्दबोधस्य स्वीकारात् यथा– 'घटो नीलघटः' इत्यत्राभेदसम्बन्धावच्छिन्ननीलत्वावच्छिन्नघटत्वावच्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यताकः शाब्दबोधो भवति तत्र प्रकारतावच्छेदकं विशेष्यतावच्छेदकं चैकं घटत्वमेव तथा 'घटो घटः' इत्यत्रापि घटत्वमेव प्रकारतावच्छेदकं विशेष्यतावच्छेदकं चेति। घटो घटः इत्यनेनाप्यभेदसम्बन्धावच्छिन्न घटत्वावच्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यताकः शाब्दबोधः कथं न भवति, यथा च– 'दण्डवान् रक्तदण्डवान्' इत्यत्राऽभेदसम्बन्धावच्छिन्नरक्तत्वावच्छिन्नदण्डवत्त्वावच्छिन्नप्रकारतानिरूपितदण्डवत्त्वावच्छिन्नविशेष्यताकः शाब्दबोधो भवति प्रकारतावच्छेदकं विशेष्यतावच्छेदकं चैकं दण्डवत्त्वमेवेत्यादौ तादृशशाब्दबोधस्य= एकधर्मप्रकारताकविशेष्यताकशाब्दबोधस्य (एकधर्मेणोप- स्थितयोरप्यभेदान्वयबोधस्य) प्रसिद्धिरस्त्येव तथा 'दण्डवान् दण्डवान्' इत्यत्रापि दण्डवत्वमेव प्रकारतावच्छेदकं विशेष्यतावच्छेदकं चेति 'दण्डवान् दण्डवान्' इत्यनेनाऽभेदसम्बन्धावच्छिन्नदण्डवत्त्वावच्छिन्नप्रकारतानिरूपितदण्डवत्त्वावच्छिन्नविशेष्यताकः शाब्दबोधः कथं न भवतीत्याशङ्कते– अथेति। उत्तरमाह– तर्हीति, 'घटो नीलघटः' इत्यत्र न घटे शुद्धघटस्याभेदान्वयः किन्तु नीलघटस्यैव तथा च घटे विशेषणीभूतो यो घटस्तत्र विशेषणीभूतो नीलपदार्थ इति

विशेष्यकनीलघटत्वाद्यवच्छिन्नाभेदान्वयबोधप्रयोजिका, तदभावादेव 'घटो घटः' इत्यादिषु न तादृशशाब्दबोधापत्तिरिति केचित्।

अथ द्रव्यत्वादौ धर्मितावच्छेदकतासंसर्गेण प्रसिद्धस्य

विशेषणतावच्छेदकत्वेन नीलभानं भवति नीलपदार्थभानस्य नियामकं च नीलपदजन्यनीलोपस्थितिर्नीलविषयकतात्पर्यज्ञानं च एतादृशनील-भाननियामकसामग्रीसत्त्वे एव घटत्वावच्छिन्ने नीलघटत्वावच्छिन्नस्याभेद-सम्बन्धेनान्वयो भवति तस्य मूलं च नीलपदसमभिव्याहार एव, 'घटो घटः' इत्यत्र च नीलपदाभावेन नीलभाननियामकसामग्र्यभावात् तादृश=अभेदान्वयबोधो न भवति। एवमेव 'दण्डवान् दण्डवान्' इत्यत्रापि रक्तपदाभावेन रक्तभाननियामकसामग्र्यभावाद्भेदान्वयबोधो न भवतीत्यर्थः।

ननु यदि नीलपदसत्त्वे एवाभेदान्वयबोधो भवति तदा 'घटो रक्तघटः' 'घटः पीतघटः' इत्यादावप्यभेदान्वयबोधो न स्यात्– नीलपदाभावादिति चेत् तर्हि–घटत्वेतरधर्मोपस्थापकसामग्रीसत्त्वेऽभेदान्वयो भवति घटत्वेतर-धर्मोपस्थापकसामग्र्यभावे चाभेदान्वयबोधो न भवति तथा च 'घटो नीलघटः' 'घटो रक्तघटः' 'घटः पीतघटः' इत्यादौ घटत्वेतरस्य नीलत्वरक्तत्व पीतत्वादिधर्मस्योपस्थापकसामग्रीनीलादिपदसत्त्वादभेदान्वयबोधो भवति। 'घटो घटः' इत्यत्र च घटेतरनीलादिपदाभावेन घटत्वेतरधर्मोपस्थापकसामग्र्यभावाद-भेदान्वयबोधो न भवतीत्यवधेयम्।

उक्तरीत्या 'घटो घटः' इत्यत्राभेदान्वयशाब्दबोधापत्तिवारणे कृतेऽपि पूर्वपक्षी 'द्रव्यं घटः' इत्यस्य दृष्टान्तेन 'घटो घटः' इत्यत्राभेदान्वयबोधापत्तिं प्रदर्शयति–अथेति। कार्यतावच्छेदककोटौ धर्मितावच्छेदकाऽनिवेशप्रयुक्तलाघवेन विषयनिष्ठप्रत्यासत्त्या शाब्दबोधतत्कारणयोः कार्यकारणभावमाह– धर्मितेति, अयं भावः– शाब्दबोधतत्कारणयोर्द्विधा कार्यकारणभावोऽस्ति–आत्मनिष्ठ-प्रत्यासत्त्या विषयनिष्ठप्रत्यासत्त्या च, तत्रात्मनिष्ठप्रत्यासत्त्या नाम शाब्दबोधस्य तत्कारणीभूतोपस्थितियोग्यताज्ञानतात्पर्यज्ञानानां च ज्ञानरूपत्वेन समवायसम्बन्धे-नात्मनि स्थितिर्भवतीति शाब्दबोधादिप्रतियोगिके नात्मनिष्ठेन समवायेन कार्यकारणभावः। प्रत्यासत्तिः=सम्बन्धस्तथा च समवायसम्बन्धेन शाब्दबोध-

शुद्धघटत्वाद्यवच्छिन्नप्रकारकाऽभेदान्वयबोधस्य घटत्वादावापत्तिः संभवात्।

कारणान्यात्मनि भवतीति समवायसम्बन्धेन शाब्दबोधरूपकार्यमप्यात्मन्येवोत्पद्यते तथा च– समवायसम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति समवायसम्बन्धेनोपस्थित्यादिकं कारणमिति वक्तव्यम्। अत्र च समवायेन पटविषयकोपस्थितिसत्त्वेऽपि समवायेनात्मनि घटत्वावच्छिन्नविषयकशाब्दबोधापत्तिः स्यात् तद्वारणाय विषयप्रवेशः कर्त्तव्यः। समवायसम्बन्धेन घटत्वावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति समवायसम्बन्धेन घटत्वावच्छिन्नविषयावेकोपस्थितिः कारणमिति, अत्रानन्तधर्मितावच्छेदकानां वाऽनन्तविषयाणां वा प्रवेशाद् गौरवम्।

यथा समवायसम्बन्धेन ज्ञानमात्मनि तिष्ठति तथा विषयतासम्बन्धेन ज्ञानं विषयेऽपि तिष्ठतीति ज्ञानस्वरूपाणां शाब्दबोधतत्कारणानां विषयतासम्बन्धेन विषयेऽपि संभवाद् विषयनिष्ठप्रत्यासत्त्या=विषयनिष्ठा या विषयता तल्लक्षणप्रत्यासत्त्या=सम्बन्धेन शाब्दबोधतत्कारणयोः कार्यकारणभावः। एषा च विषयता विविधस्वरूपा भवति यथा 'नीलो घटः' इत्यत्र घटनिष्ठा विषयता विशेष्यतारूपा धर्मितारूपा वा, घटत्वनिष्ठा च धर्मितावच्छेदकतारूपा, घटघटत्वयोः समवायनिष्ठा धर्मितावच्छेदकतावच्छेदकसम्बन्धरूपा, नीलनिष्ठा प्रकारतारूपा, नीलत्वनिष्ठा प्रकारतावच्छेदकतारूपा, नीलनीलत्वयोः समवायनिष्ठा प्रकारतावच्छेदकसम्बन्धरूपा किं वा प्रकारतावच्छेदकतावच्छेदकतारूपा– समवायसम्बन्धस्यैवात्र प्रकारतावच्छेदकतावच्छेदकत्वात्, नीलघटोभयनिष्ठा चाभेदसंसर्गरूपा, इति। तत्र 'नीलो घटः' इति शाब्दबोधो धर्मितारूपविषयतासम्बन्धेन घटे जायते, धर्मितावच्छेदकतारूपविषयतासम्बन्धेन घटत्वे जायते, धर्मितावच्छेदकतारूपविषयतासम्बन्धेन घटघटत्वयोः समवाये जायते, प्रकारताख्यविषयतासम्बन्धेन नीले जायते, प्रकारतावच्छेदकतारूपविषयतासम्बन्धेन नीलत्वे जायते, प्रकारतावच्छेदकतावच्छेदकतारूपविषयतया नीलनीलत्वयोः। समवाये जायते, अभेदसंसर्गाख्यविषयतासम्बन्धेन च नीलस्य घटस्य चाभेदसंसर्गे जायते, घटघटत्वतत्समवायनीलनीलत्वतत्समवायघटनीलाभेदसंसर्गाणामेषां सर्वेषामेव 'नीलो घटः' इति शाब्दबोध– विषयत्वादित्यवधेयम्। एवमन्यत्रापि कार्यकारणभावो विज्ञेयः।

तथा च विषयतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विषयतासम्बन्धेनोपस्थित्यादिकं कारणमिति वक्तव्यम्। अत्र च समवायेन देवदत्तात्मन्युपस्थित्यादिसत्त्वे यज्ञदत्तस्यापि शाब्दबोधः स्यादिति तद्वारणाय तत्पुरुषीयत्वनिवेशः कर्तव्यः— यज्ञदत्तीयघटत्वावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति यज्ञदत्तीयप्रतिविषयकोपस्थित्यादिकं कारणमिति।

आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावे हि तत्पुरुषीयत्वप्रवेशस्यापेक्षा नास्ति कार्यकारणयोः सामानाधिरण्यनियमस्य सर्वप्रसिद्धत्वात् समवायेनात्मन्येवोवस्थित्यादिकं सम्भवतीत्यात्मन्येव शाब्दबोधस्य सम्भवादात्मनां च नानात्वेन यदात्मन्युपस्थित्यादिकं कारणं तदात्मन्येव शाब्दबोधकार्यस्यापि सम्भवसदिति विषयनिष्ठप्रत्यासत्यपेक्षया लाघवम्। किन्तु समवायेन यज्ञदत्तात्मनि घटत्वावच्छिन्नविशकोवस्थितिसत्त्वेऽपि पटत्वावच्छिन्नविषयकशाब्दबोधावत्तिरस्तीति तद्वारणाय विषयनिवेशः कर्त्तव्यः। पटत्वावच्छिन्नविषयकशाब्दबुद्धित्वाच्छिन्नं प्रति पटत्वावच्छिन्नविषयकोवस्थितिः कारणमिति विषयनिष्ठप्रत्यासत्यपेक्षया गौरवम्।

विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावे हि विषयप्रवेशस्यापेक्षा नास्ति विषयतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विषयतासम्बन्धेनोपस्थित्यादिकं कारणमित्युक्ते विषयस्य घटादेर्विषयताख्यसम्बन्धान्तःप्रवेशेन पृथक् निवेशापेक्षाऽभावात् कार्यकारणयोः सामानाधिकरण्यनियमेन च यदा कारणीभूतमुपस्थित्यादिकं विषयतासम्बन्धेन घटे तदा तत्कार्यस्य शाब्दबोधस्यापि विषयतासम्बन्धेन घटे एव संभवात् विषयभेदेन विषयनिष्ठविषयतानामपि भिन्नत्वाद् यस्मिन्नेव घटे विषयतासम्बन्धेनोपस्थित्यादिकं तस्मिन्नेव घटे तत्कार्यस्य शाब्दबोधस्यापि संभवात् पटादौ चासंभवादिति विषयनिवेक्षापेक्षाभाव इत्यात्मनिष्ठप्रत्यासत्त्यपेक्षया लाघवम्। किन्तु विषयस्य घटादेरेकत्वेन देवदत्तयज्ञदत्तादिसकलपुरुषसाधारणत्वात् सम्बन्धभूताया विषयताया अप्येकत्वेन सर्वसाधारणत्वाद् य एव घटो देवदत्तज्ञानविषयः स एव यज्ञदत्तज्ञानविषयोऽपि भवितुमर्हत्येवेति विषयतासम्बन्धेन यज्ञदत्तस्योपस्थित्यादिसत्त्वे देवदत्तस्यापि शाब्दबोधः स्यात् कार्यकारणयोरुपस्थितिशाब्दबोधयोर्विषयतासम्बन्धेन घटे एव सत्त्वेन सामानाधिकरण्यस्याक्षुणत्वाद् उपस्थितिशाब्दबोधसमवायिनोर्यज्ञदत्तदेवदत्तयोर्भेदस्याऽकिञ्चित्करत्वाद् विषयतासम्बन्धेन तयोरुप-

स्थितिशाब्दबोधानधिकरणत्वाद् संप्रति विषयनिष्ठप्रत्यासत्त्या कार्यकारण-भावपक्षस्वीकारेण विषयतासम्बन्धेन घटादेर्विषयस्यैवोपस्थितिशाब्दबोधाधिकरण-त्वात् तथा च यज्ञदत्तस्य पटत्वावच्छिन्नविषयकोपस्थित्यादिसत्त्वे देवदत्तस्यापि पटत्वावच्छिन्नविषयकशाब्दबोधः स्यादेवेति तद्वारणाय तत्पुरुषीयत्वनिवेशः कर्तव्यः— विषयतासम्बन्धेन देवदत्तीयपटत्वावच्छिन्नविषयकशाब्दबुद्धि-त्वावच्छिन्नं प्रति विषयतासम्बन्धेन देवदत्तीयपटत्वावच्छिन्नविषयकोप-स्थित्यादिकं कारणमिति तत्तत्पुरुषाणां नानात्वेन तेषां निवेशादात्मनिष्ठ-प्रत्यात्त्यपेक्षया गौरवं तत्र तत्पुरुषीयत्वनिवेशापेक्षाभावात्।

तथा च यत्र विशेषणविशेष्ययोः समानसंख्याकत्वं भवति यथा— 'नीलो घटः' इत्यत्रैकमेव विशेषणमेकमेव च विशेष्यमिति तत्रात्मनिष्ठ-प्रत्यासत्त्या वा विषयनिष्ठप्रत्यासत्त्या वा शाब्दबोधो भवतु विशेषोनास्ति यतोऽत्रात्मनिष्ठप्रत्यासत्त्या। शाब्दबोधपक्षे तत्पुरुषीयत्वप्रवेशाभाव-प्रयुक्तलाघवसत्त्वेऽपि विषयप्रवेशेन गौरवमस्त्येव, विषयनिष्ठप्रत्यासत्त्या शाब्दबोधपक्षे च विषयप्रवेशाभावप्रयुक्तलाघवसत्त्वेऽपि तत्पुरुषीयत्वप्रवेशेन गौरवमस्त्येवेत्युभयप्रत्यासत्त्योस्तुल्यत्वमेव। किन्तु यत्र विशेषणविशेष्ययोः समसंख्याकत्वं न भवति तत्रात्मनिष्ठप्रयासत्त्या शाब्दबोधापेक्षया विषयनिष्ठ-प्रत्यासत्त्या शाब्दबोधे लाघवं भवति, तथा हि— यथा— 'नीलो घटः पीतो घटः सुन्दरो घटः' इत्यत्र विशेषणानि बहूनि विशेष्यं चैकमेव, अत्रात्मनिष्ठ-प्रत्यासत्त्या शाब्दबोधस्वीकारे समवायेन अभेदसम्बन्धावच्छिन्ननीलत्वावच्छिन्न-प्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यताकशाब्दबुद्धित्वावच्छिन्नं प्रति समवायेन अभेदसम्बन्धावच्छिन्ननीलत्वावच्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यताकोप-स्थित्यादिकं कारणम्, एवं अभेदसम्बन्धावच्छिन्नपीतत्वावच्छिन्नप्रकारता-निरूपित घटत्वावच्छिन्न विशेष्यताकशाब्दबुद्धित्वावच्छिन्नं प्रति अभेदसम्बन्धा-वच्छिन्नपीतत्वावच्छिन्न प्रकारताघटत्वावच्छिन्नविशेष्यताकोपस्थित्यादिकं कारणमित्येवं पृथक् पृथक् कार्यकारणभावस्य वक्तव्यत्वेन महद् गौरवम् भवति, विषयनिष्ठप्रत्यासत्त्या शाब्दबोधपक्षे च+घटत्वावच्छिन्नविशेष्यता-निरूपिताऽभेदसम्बन्धावच्छिन्नप्रकारतावच्छेदकतासम्बन्धेन तत्पुरुषीयोप-स्थित्यादिकं कारणमित्येवमेकेनैव वाक्येन 'नीलो घटः' 'पीतो घटः' इत्यादीनामेकघटविशेष्यकवाक्यानां सर्वेषामपि शाब्दबोधतत्कारणयोः

कार्यकारणभावस्यानुगमः संभवति यतो यत्र यत्र नीलत्वपीतत्वसुन्दरत्वादौ प्रकारतावच्छेदकतासम्बन्धेन शाब्दबोधकारणमुपस्थित्यादिकं भविष्यति तत्र तत्रैव प्रकारतावच्छेदकतासम्बन्धेन शाब्दबोधोऽपि भविष्यतीति बहूनां विशेषणीभूतानां नीलपीतादीनां नामग्रहणापेक्षा नास्ति विशेष्यस्यैकत्वात् तस्यैव नामग्रहणं कृतं घटत्वावच्छिन्नेति इत्यात्मनिष्ठप्रत्यासत्त्यपेक्षया लाघवम्, तत्र समवायसम्बन्धेन कार्यकारणभावनियमाद् विषयतासम्बन्धेन च कार्यकारण-भावाऽसंभवेनैवं प्रकारेण लाघवासंभवात्।

एवम्='पटो नीलः' 'घटो नीलः' 'मठो नीलः' इत्यत्र विशेष्याणि बहूनि विशेषणं चैकमेव, अत्राप्यात्मनिष्ठप्रत्यासत्त्या शाब्दबोधपक्षे समवायेना-भेदसम्बन्धावच्छिन्ननीलत्वावच्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यता-कशाब्दबुद्धित्वावच्छिन्नं प्रति समवायेनाभेदसम्बन्धावच्छिन्ननीलत्वावच्छिन्न-प्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यताकोपस्थित्यादिकं कारणमित्येवं पूर्ववत् पृथक् पृथगेवोक्तवाक्यानां शाब्दबोधतत्कारणयोः कार्यकारणभावो वक्तव्य इति महद् गौरवम्। विषयनिष्ठप्रत्यासत्त्या शाब्दबोधपक्षे च अभेदसम्बन्धा-वच्छिन्ननीलत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन तत्पुरुषीयशाब्दबुद्धित्वावच्छिन्नं प्रति अभेदसम्बन्धावच्छिन्ननीलत्वावच्छिन्न-प्रकारतानिरूपितविषयता (धर्मितावच्छेदकता) सम्बन्धेन तत्पुरुषीयो-पस्थित्यादिकं कारणमित्येवमेकेनैव वाक्येन 'पटो नीलः' 'घटो नीलः' 'मठो नीलः' इत्यादीनामेकनीलविशेषणकानां सर्वेषामपि वाक्यानां शाब्दबोधतत्कारणयोः कार्यकारणभावस्यानुगमः संभवति यतो यत्र यत्र पटत्वघटत्वमठत्वादौ धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधकारणीभूत-मुपस्थित्यादिकं भविष्यति तत्र तत्रैव धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधोऽपि भविष्यति बहूनां विशेष्यभूतानां घटपटमठादीनां नामग्रहणापेक्षा नास्ति विशेषणस्यैकत्वात्तस्यैव नामग्रहणं कृतम्– नीलत्वावच्छिन्नेति इत्यात्मनिष्ठ-प्रत्यासत्त्यपेक्षया लाघवम्, तत्र समवायसम्बन्धेन कार्यकारणभावनियमाद् विषयतासम्बन्धेन च कार्यकारणभावसंभवेनैवं प्रकारेण लाघवाऽसंभवात्।

एवमन्यत्रापि विशेषणविशेष्ययोर्विषमसंख्याकत्वे ज्ञेयम्– यत्र विशेषणानि बहूनि तत्र प्रकारतावच्छेदकतासम्बन्धेन कार्यकारणभावो वक्तव्यो बहूनां विशेषणानां नामग्रहणं न कर्तव्यम्। यत्र च विशेष्याणि बहूनि तत्र

न च तत्रापादकाभावः– तात्पर्यज्ञानविशेषादिघटिताया धर्मितावच्छेदकतया द्रव्यत्वादौ तदुत्पादनियामकसामग्र्या एवापादकत्वात्।

न च धर्मितावच्छेदकतासंबन्धेन द्रव्यत्वादौ तादृशान्वय-बोधोत्पत्तिप्रयोजिका द्रव्यपदजन्यद्रव्यत्वाद्यवच्छिन्नविशेष्यको-

धर्मितावच्छेदकतासम्बन्धेन कार्यकारणभावो वक्तव्यो बहूनां विशेष्याणां नामग्रहणं न कर्तव्यमिति लाघवं स्यादेवेति यावत्।

आत्मनिष्ठप्रयासत्त्या कार्यकारणभावे विषयप्रवेशोऽप्यस्त्येव 'कृष्णोहं गौरोहम्' इत्यादावात्मनो विषयत्वेनात्मप्रवेशापेक्षाप्यस्त्येवेत्युभयप्रवेशेन गौरवं विषयनिष्ठप्रत्यासत्तौ तूभयप्रवेशापेक्षा नास्ति केवलमात्ममात्र प्रवेशस्यावश्यक-त्वादिति लाघवमित्यपि केचित्।

प्रकृते च यद्यात्मनिष्ठप्रत्यासत्त्या शाब्दबोध उच्येत तदा विषयप्रवेशस्याऽवश्यंभावात् 'द्रव्यं घटः' इत्यत्र द्रव्यपदेन द्रव्यत्वेन घटपेदन च घटत्वेनोपस्थितिरस्ति एवम्– 'घटो घटः' इत्यत्र तु नास्ति किन्तूभाभ्यामेव घटपदाभ्यां घटत्वेनैवोपस्थितिरिति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् 'द्रव्यं घटः' इति दृष्टान्तेन 'घटो घटः' इत्यत्राभेदान्वयबोधापत्तिर्न सम्भवति इत्यात्मनिष्ठ-प्रत्यासत्तिं त्यक्त्वा विषयनिष्ठप्रत्यासत्त्या शाब्दबोधमाहधर्मितेति। अत्र च दृष्टान्तद्राष्ट्रान्तिकयोर्वैषस्यसत्त्वेऽपि कार्यकारणभावे विषयप्रवेशाभावेन तन्न प्रतीयते तथा च यथा "द्रव्यं घटः" इत्यत्रं धर्मितावच्छेदकतासम्बन्धेन द्रव्यत्वेऽभेदसम्बन्धेन घटप्रकारको बोधोभवति तथा "घटो घटः" इत्यत्रापि धर्मितावच्छेदकतासम्बन्धेन घटत्वे घटप्रकारकाभेदान्वयबोधस्यैव मदिष्टत्वात् स कथं न स्यात्, 'द्रव्यं घटः' इत्यत्र या घटप्रकारकबोधसामग्री तस्याः 'घटो घटः' इत्यत्रापि सत्त्वात्, घटस्य स्वात्मनाऽभेदस्यापि सत्त्वेन योग्यताज्ञानसत्त्वात् 'घटो घटः' इत्यत्र घटत्वावच्छिन्नप्रकारतानिरूपित-घटत्वावच्छिन्नविशेष्यताकशाब्दबोधस्यापत्तिरस्त्येवेति पूवपक्षाभिप्रायः।

'द्रव्यं घटः' इत्यत्र द्रव्यं धर्मी द्रव्यत्वं धर्मितावच्छेदकं द्रव्यत्वनिष्ठा च विषयता धर्मितावच्छेदकतारूपा सैव सम्बन्धस्तेन सम्बन्धेन शाब्दबोधो द्रव्यत्वे वर्तते तथा च 'द्रव्यं घटः' इत्यत्र धर्मितावच्छेदकतासम्बन्धेन

पस्थितितदवच्छिन्नविशेष्यकयोग्यताज्ञानादिघटितसामग्र्येव–धर्मितावच्छेदकतायास्तत्कार्यतावच्छेदकसंबन्धताविरहेऽपि द्रव्यत्वादिनिष्ठायास्तस्यास्तत्कार्यतावच्छेदकधर्मघटकत्वात् तादृशसामग्र्याश्चात्मनिष्ठप्रत्यासत्त्या द्रव्यत्वाद्यवच्छिन्न–

द्रव्यत्वे प्रसिद्धो यथा शुद्धघटत्वावच्छिन्नप्रकारकाभेदान्वयबोधस्तथा 'घटो घटः' इत्यत्रापि घटत्वे धर्मितावच्छेदकतासम्बन्धेन शुद्धघटत्वावच्छिन्न–प्रकारकाभेदान्वयबोधस्यापत्तिः संभवतीत्याह– द्रव्यत्वादाविति।

ननु 'द्रव्यं घटः' इत्यत्राभेदान्वयविषयकतात्पर्यज्ञानादिघटितसामाग्र्याः सत्त्वात् तत्कार्यभूतो घटत्वावच्छिन्नप्रकारकाभेदान्वयबोधो भवति 'घटो घटः' इत्यत्र वस्तुगत्याऽभेदस्य सत्त्वेऽपि तद्बोधानुकूलसामग्र्यभावात् कथमभेदान्वयबोधः स्यादित्याशङ्क्याह– न चेति। तत्र='घटो घटः' इत्यत्र। आपादकाभावः=कारणीभूतसामग्र्यभावः। परिहारहेतुमाह– तात्पर्यज्ञानेति, धर्मितावच्छेदकतया=धर्मितावच्छेदकतासम्बन्धेन द्रव्यत्वे तदुत्पादनियामक–सामग्र्याः=अभेदान्वय–बोधोत्पतेर्नियामिकायास्तात्पर्यज्ञानविशेषादिघटिताया: सामग्र्या एव 'घटो घटः' इत्यत्रापि घटत्वावच्छिन्नप्रकारकाभेदान्वय–बोधापादकत्वात्। यया तात्पर्यज्ञानादिघटितसामग्र्या 'द्रव्यं घटः' इत्यत्र घटत्वावच्छिन्नप्रकारकाभेदान्वयबोधस्तयैव 'घटो घटः' इत्यत्रापि घटत्वा–वच्छिन्नप्रकारकाभेदान्वयबोधो भविष्यतीत्यर्थः। तात्पर्यज्ञानं चात्र– 'घटपदं द्रव्यपदार्थान्वितस्वार्थं बोधयतु' इति। योग्यताज्ञानं च 'द्रव्यपदार्थो घटत्वा–वच्छिन्नाभेदसंसर्गवान्' इति, द्रव्यत्वे योग्यताज्ञानं तु धर्मितावच्छेदकता–सम्बन्धेन वर्तते। तात्पर्यज्ञानं च– 'द्रव्यं घट इत्येतद्वाक्यजन्यकिञ्चिद्धर्मा–वच्छिन्नप्रकारककिञ्चिद्धर्मावच्छिन्नविशेष्यताशालिशाब्दबोधविषयकेच्छा–वानयम्' इति, एतादृशज्ञानीया या इच्छानिष्ठाविषयता तन्निरूपिता या बोधनिष्ठा विषयता तन्निरूपिता या विशेष्यतानिष्ठा विषयता तन्निरूपिता या अवच्छिन्नत्वनिष्ठा विषयता तन्निरूपितविषयतासम्बन्धेन (एषा विषयता विशेष्यतावच्छेदके द्रव्यत्वादौ वर्त्तते) द्रव्यत्वे वर्तते।

ननु 'द्रव्यं घटः' इत्यत्र द्रव्यत्वे तादृशान्वयबोधोत्पत्तिप्रयोजिका= अभेदान्वयबोधोत्पत्तिप्रयोजिका तु धर्मितावच्देकतासम्बन्धेन द्रव्यपदजन्यद्रव्य–त्वावच्छिन्नविशेष्यकोपस्थितिघटिता तथा तदवच्छिन्न=द्रव्यत्वावच्छिन्न–

विशेष्यकघटत्वाद्यवच्छिन्नाद्यभेदबुद्धित्वरूपस्वीकार्यतावच्छेदकावच्छिन्नोत्पत्तेरेव व्याप्यतया घटत्वादौ धर्मितावच्छेदकतासंबन्धेन घटत्वावच्छिन्नाभेदबोधापादकत्वं न

विशेष्यकयोग्यताज्ञानादिघटितैव सामग्री भवतीति वक्तुमारभते—न चेत्यादिना। ननु त्वयाऽऽत्मनिष्ठप्रत्यासत्तेरेव कार्यतावच्छेदकसम्बन्धत्वमाश्रित्य 'घटो घटः' इत्यत्राभेदान्वयबोधः परिह्रियते इति कथमत्रेदानीं वा धर्मितावच्छेदकतासम्बन्धेन द्रव्यत्वेऽभेदान्वया बोधप्रयोजकत्वं सामग्र्या उक्तमिति पूर्वपक्ष्यांशङ्कामालोच्य सिद्धान्त्याहधर्मितावच्छेदकताया इति, धर्मितावच्छेदकतायास्तत्कार्यतावच्छेदकसम्बन्धताविरहेऽपि=उक्तसामग्रीजन्यं यच्छाब्दबोधरूपं कार्यं तादृशकार्यतावच्छेदकसम्बन्धताविरहेऽपि आत्मनिष्ठप्रत्यासत्तेः=समवायस्यैव तादृशकार्यतावच्छेदकसम्बन्धत्वात्, द्रव्यत्वादिनिष्ठायास्तस्याः=धर्मितावच्छेदकतायास्तत्कार्यतावच्छेदकधर्मघटकत्वात्=उक्तसामग्रीकार्यतावच्छेदकधर्मघटकत्वाद्धेतोः द्रव्यत्वादौ धर्मितावच्छेदकतासम्बन्धेन तादृशान्वयबोधोत्पत्तिप्रयोजिका द्रव्यपदजन्यद्रव्यत्वावच्छिन्नविशेष्यकोपस्थितितदवच्छिन्नविशेष्यकयोग्यताज्ञानादिघटिता सामग्र्येवेत्यन्वयः।

अयं भावः— यथा वह्न्यवयवेषु वह्निप्रतियोगिकसंयोगविशिष्टवह्नौ जननीये यादृशीन्धनादिसामग्री प्रयोजिका भवति तादृश्येव सामग्री महानसादौ संयोगेन वह्नौ जननीये प्रयोजिका भवति। किं चात्र वह्न्यवयवेषु वह्न्युत्पत्तौ समवाय एव कार्यतावच्छेदकसम्बन्धो भवति न तु संयोग इति संयोगस्य कार्यतावच्छेदकसम्बन्धत्वाभावेपि कार्यतावच्छेदकधर्मघटकत्वं त्वस्त्येववह्निप्रतियोगिकसंयोगविशिष्टे उत्पाद्यमानवह्नौ वह्नित्वस्येव वह्निप्रतियोगिकसंयोगवैशिष्ट्यस्यापि सत्त्वाद् वह्निप्रतियोगिकसंयोगिविशिष्टवह्नित्वस्य कार्यतावच्छेकत्वात् संयोगस्यापि तद्घटकत्वाद् यदि चात्र संयोगः कार्यतावच्छेदक धर्मघटको न स्यात्तदा समवायेन वह्न्युत्पत्तिं प्रति यादृशी सामग्री प्रयोजिका भवति तादृशी सामग्री संयोगेन वह्न्युत्पत्तिं प्रति प्रयोजिका न स्यात् कारणाभावात् यदा च संयोगः कार्यतावच्छेदकधर्मघटको भवति तदा तु यादृशी सामग्री संयोगविशिष्टवह्निप्रयोजिका भवति तादृश्येव संयोगेन वह्निप्रयोजिका भवति संयोगस्यापि वह्निना सह कार्यत्वात्। किं चात्र समवायेन वह्न्युत्पतौसंयोगस्य कार्यतावच्छेदकसंबन्धत्वाभावेप्यऽन्यत्र पर्वतादौ

संभवतीति वाच्यम्, योग्यताज्ञानस्य धर्मितावच्छेदकं निवेश्य तद्भेदेनाऽनन्तकारणताकल्पनमपेक्ष्य लाघवाद् धर्मितावच्छेद-

---

वह्न्युत्पत्तौ तु पर्वतानुयोगिकवह्निप्रतियोगिक- कार्यतावच्छेदकसम्बन्धत्वं भवत्येव।

तथा प्रकृतेप्यात्मनिष्ठप्रत्यासत्त्या 'द्रव्यं घटः' इत्यत्राऽभेदान्वयबोधे जननीये समवायस्यैव कार्यतावच्छेदकसम्बन्धत्वेन धर्मितावच्छेदकतायाः कार्यतावच्छेदकसम्बन्धत्वाभावेऽपि द्रव्यत्वनिष्ठाया धर्मितावच्छेदकतायाः कार्यतावच्छेदकधर्मघटकत्वं त्वस्त्येव- द्रव्यत्वनिष्ठाप्येषा विषयतारूपा धर्मितावच्छेदकता स्वनिरूपितविषयितासम्बन्धेन शाब्दबोधे वर्तते इति शाब्दबोधत्वस्येवोक्तधर्मितावच्छेदकतावैशिष्ट्यस्यापि शाब्दबोधे सत्त्वाद् अभेदसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारतानिरूपितद्रव्यत्वावच्छिन्नविशेष्यताक-शाब्दबोधत्वस्य कार्यतावच्छेदकत्वाद् उक्तधर्मितावच्छेदकताया अपि तद्घटकत्वात् स्वनिरूपितविषयितासम्बन्धेन तत्र वर्तमानत्वात्। तादृशधर्मिता-वच्छेदकताविशिष्टशाब्दबोधे समवायेनात्मनि जननीये यादृशी द्रव्यपदजन्य-द्रव्यत्वच्छिन्नविशेष्यकोपस्थितितदवच्छिन्नविशेष्यकयोग्यताज्ञानादिघटित-सामग्री प्रयोजिका भवति तादृश्येव सामग्री धर्मितावच्छेदकतासम्बन्धेन द्रव्यत्वादौ तादृशशाब्दबोधप्रयोजिका भवति। यदि चात्र धर्मितावच्छेदकता कार्यतावच्छेदकधर्मघटिका न स्यात्तदात्मनिष्ठप्रत्यासत्त्या=समवायेनात्म-न्युक्तशाब्दबोधे जननीये यादृश्युक्तसामग्री प्रयोजिका भवति तादृशी सामग्री धर्मितावच्छेदकतासम्बन्धेन द्रव्यत्वे उक्तशाब्दबोधे जननीये प्रयोजिका न स्यात् कारणाभावात्- समवायेनात्मन्युक्तशाब्दबोधे जननीये धर्मिता-वच्छेदकतायाः कार्यतावच्छेदकधर्मघटकत्वाभावात्। अस्ति चात्र धर्मितावच्छेदकतायाः कार्यतावच्छेदकधर्मघटकत्वमिति यादृश्युक्तसामग्री आत्मनिष्ठप्रत्यासत्त्या धर्मितावच्छेदकताविशिष्ट शाब्दबोधप्रयोजिका तादृश्येवोक्तसामग्री धर्मितावच्छेदकतासम्बन्धेन द्रव्यत्वे शाब्दबोधप्रयोजिका भवति-धर्मितावच्छेदकताविशिष्टस्य शाब्दबोधस्य कार्यत्वे तेन सह धर्मितावच्छेदकताया अपि कार्यत्वापत्त्या तया सामग्र्या विना धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधोत्पत्त्यनुपपत्तेः। द्रव्यत्वनिष्ठाया धर्मितावच्छेदकताया आत्मनिष्ठप्रत्यासत्त्याऽऽत्मनि शाब्दबोधोत्पत्तौ कार्यता-

कतासंबन्धेन शाब्दबुद्धौ तादृशसंबन्धेन तस्य धर्मितावच्छे-दकमनिवेश्य हेतुताकल्पनस्यैव युक्तत्वात्, घटत्वादिधर्मिता-

---

वच्छेदकसम्बन्धत्वाभावेऽपि उक्तसंयोगस्यैव द्रव्यत्वे उक्तशाब्दबोधे जननीये तु कार्यतावच्छेदकतासम्बन्धत्वं भवत्येव (नानुपपन्नम्) कार्यभूतशाब्दबोधाधि-करणद्रव्यत्वनिष्ठत्वादिति धर्मितावच्छेदकतासम्बन्धेन द्रव्यत्वे तादृशान्वय-बोधोत्पत्तिप्रयोजिका द्रव्यपदजन्येत्पयाद्युक्तसामग्र्येव, तादृशसामग्र्धयाश्चात्म-निष्ठप्रत्यासत्त्या (समवायेन) द्रव्यत्वाद्यवच्छिन्नविशेष्यकघटत्वाद्य-वच्छिन्नाद्यऽभेदबुद्धित्वरूपस्वीकार्यतावच्छेदकावच्छिन्नोत्वतेरेव अभेद-सम्बन्धावच्छिन्नप्रकारतानिरूपितद्रव्यत्वावच्छिन्नविशेष्यकशाब्दबोधत्वावच्छिन्नो (शाब्दबोधो) त्पत्तेरेव (द्रव्यं घट इति स्थले) व्याप्यतया=प्रयोजकतया घटत्वादौ धर्मितावच्छेदकतासम्बन्धेन घटत्वावच्छिन्नाभेदबोधापादकत्वं न संभवति किं वोक्तसामग्र्या घटत्वे घटत्वावच्छिन्नाभेदबोधापादकत्वं धर्मितावच्छेदकतासम्बन्धेनापि न संभवति किमुतात्मनिष्ठप्रत्यासत्त्या आत्मनिष्ठप्रत्यासत्त्या हि बोधापादकत्वं सामग्र्या आत्मन्येव संभवति नान्यत्र सम्बन्धभूतस्य बोधसमवायस्यात्ममात्रनिष्ठत्वात्, धर्मितावच्छेदकतापि यात्र सम्बन्धरूपास्ति तस्या द्रव्यत्वमात्रनिष्ठत्वात् तादृशधर्मितावच्छेद-कतासम्बन्धेन च सामग्र्या द्रव्यत्वे एव शाब्दबोधापादकत्वं संभवति न घटत्वादावित्यर्थः। किञ्च द्रव्यत्वावच्छिन्नविशेष्यकशाब्दबोधं प्रति द्रव्यत्वावच्छिन्नविशेष्यकयोग्यताज्ञानस्यैव कारणत्वात् तादृशयोग्यताज्ञानस्य च द्रव्यत्वनिष्ठधर्मितावच्छेदकतासम्बन्धेन द्रव्यत्वे एव संभवात् घटत्वे चासंभवात् न केवलं घटत्वे शाब्दबोधापत्त्यऽसंभव एव किन्तु तादृशशाब्दबोधकारणीभूतयोग्यताज्ञानस्याप्यऽसंभव एव योग्यताज्ञानस्वरूपेऽपि द्रव्यत्वविशेष्यकत्वप्रवेशात् कारणाभावे कार्यासम्भवाच्चेत्यलम्।

पूर्वपक्षी उक्तं परिहरन् अभेदसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारता-कशाब्दबोधकारणीभूतयोग्यताज्ञानमात्रं घटत्वे आपादयति– योग्यताज्ञानस्येति, धर्मितावच्छेदकं द्रव्यत्वं निवेश्य=द्रव्यत्वावच्छिन्नविशेष्यकयोग्यताज्ञानस्वीकारे हि तद्भेदेन=धर्मितावच्छेदकभेदेन यथा–'घटः प्रमेयः' इत्यत्र प्रमेयत्वं धर्मितावच्छेदकम् 'घटो द्रव्यम्' इत्यत्र द्रव्यत्वं धर्मितावच्छेदकमिति तत्स्थलीय-धर्मितावच्छेदकभेदेन तद्घटितयोग्यताज्ञानस्यापि भेदप्राप्त्या तत्तत्स्थलीय-

वच्छेदककघटत्वाद्यवच्छिन्नप्रकारकयोग्यताज्ञानबलादेव घटत्वादौ धर्मितावच्छेदकतासंबन्धेन तदापत्तेः।

न च योग्यताज्ञानस्य धर्मितावच्छेदकनिष्ठप्रत्यासत्त्या हेतुत्वोपगमे द्रव्यत्वाद्यवच्छिन्नस्य पदादनुपस्थितत्वेऽपि द्रव्यत्वादौ तादृशप्रत्यासत्त्या प्रत्यासन्नयोग्यताज्ञानात् तत्र

भिन्नभिन्नधर्मितावच्छेदकघटितभिन्नभिन्नयोग्यताज्ञानानां कारणताकल्पने-नाऽनन्तकारणताकल्पनं स्यादिति तदपेक्षया लाघवाद् धर्मितावच्छेदकं द्रव्यत्वमनिवेश्य धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधं प्रति तादृशसम्बन्धेन= धर्मितावच्छेदकतासम्बन्धेन तस्य=योग्यताज्ञानस्य (अभेदसम्बन्धावच्छिन्न-घटत्वावच्छिन्नप्रकारताकयोग्यताज्ञानस्य द्रव्यत्वावच्छिन्नविशेष्यकत्व-निवेशरहितस्य च) हेतुताकल्पनं युक्तम्, तथा च घटत्वादिधर्मितावच्छेदक-कघटत्वाद्यवच्छिन्नप्रकारकयोग्यताज्ञानबलादेव=घटत्वं धर्मितावच्छेदकतायस्य तद् घटत्वधर्मितावच्छेदककं घटत्वावच्छिन्न प्रकारां च यद् योग्यताज्ञानं तस्य धर्मितावच्छेदकतासम्बन्धेन घटत्वे संभवाद् घटत्वे धर्मितावच्छेद-कतासम्बन्धेन तदापत्तेः= अभेदसम्बन्धावच्छिन्नघटत्वावच्छिन्न-प्रकारतकशाब्दबोधापत्तेः संभवात् तथा च 'द्रव्यं घटः' इत्यत्रेव 'घटो घटः' इत्यत्राप्यभेदान्वयबोधानुपपत्तिर्नास्त्येवेत्यर्थः। अत्र च "धर्मितावच्छेदकम-निवेश्य" इत्यनेन योग्यताज्ञाने धर्मितावच्छेदकनिवेशो न कर्तव्य इति यदुक्तं तस्य धर्मितावच्छेदकविशेष्यकत्वस्योच्चारणमात्रं न कर्तव्यमित्येवार्थो वस्तुतो योग्यताज्ञाने धर्मितावच्छेदकविशेष्यकत्वस्य सत्त्वादेव तदेव केवलं प्रदर्शितम्– घटत्वादिधर्मितावच्छेदककेति, उच्चारणं तु– अभेदसम्बन्धा-वच्छिन्नघटत्वावच्छिन्नप्रकारकयोग्यताज्ञानस्य घटत्वेऽपि सत्त्वादित्येव कर्तव्यमित्यवधेयम्। तथेदानीं सम्बन्धत्वमपि शुद्धाया एव धर्मितावच्छेदकताया ज्ञेयं न तु द्रव्यत्वनिष्ठायाः द्रव्यत्वनिष्ठाया धर्मितावच्छेदकताया द्रव्यत्वमात्रे एव संभवाद् घटत्वे चासंभवात् द्रव्यत्वनिष्ठत्वनिवेशरहितायास्तु शुद्धाया धर्मितावच्छेदकतायाः सम्बन्धभूताया घटत्वेऽप्यनुपपत्त्यभावादित्यवधेयम्।

ननु यद्येवं योग्यताज्ञानबलादेव शाब्दबोधः स्यात्तदा "धर्मितावच्छेदकता-सम्बन्धेन द्रव्यत्वादौ तादृशान्वयबोधोत्पत्तिप्रयोजिका द्रव्यपदजन्यद्रव्यत्वाद्य-

तादृशप्रत्यासत्त्या शाब्दबोधापत्तिः, आत्मनिष्ठप्रत्यासत्त्या हेतुभूतां द्रव्यत्वाद्यवच्छिन्नोपस्थितिमन्तरेणापि तादृशप्रमेयत्वाद्य-वच्छिन्नोपस्थित्यादिदशायां प्रमेयत्वादौ धर्मितावच्छेदकता-

---

वच्छिन्नविशेष्यकोपस्थितितदवच्छिन्नविशेष्यकयोग्यताज्ञानादिघटितसामग्र्येव (पृ. ४६)" इत्यनेन यदुपस्थिते। शाब्दबोधकारणत्वमुक्तं तन्न युक्तं योग्यता-ज्ञानबलादेव शाब्दबोधसंभवात्, उपस्थितेर्व्यभिचारित्वाच्चेत्यभिप्रायेणाशङ्कते योग्यताज्ञानकारणतावादी– न चेति, योग्यताज्ञानस्य धर्मितावच्छेदकनिष्ठ-प्रत्यासत्त्या=धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधं प्रति हेतुत्वस्वीकारे द्रव्यत्वाद्यवच्छिन्नस्य पदादनुपस्थितत्वेऽपि=द्रव्यपदजन्यद्रव्यत्वा-वच्छिन्नविषयकोपस्थितेरभावेऽपि द्रव्यत्वादौ तादृशप्रत्यासत्त्या=धर्मिता-वच्छेदकतासम्बन्धेन प्रत्यासन्नात्=संबद्धात् (वर्तमानात्) योग्यताज्ञानात् तत्र=द्रव्यत्वे तादृशप्रत्यासत्त्या धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधापत्तिः संभवतीत्युपस्थितयऽभावेऽपि शाब्दबोधसंभवे कथमुपस्थितेः कारणत्वं स्यात्? कार्यकारणभावस्यान्वयव्यतिरेकाभ्यामेवावधार्यत्वात्, किञ्च– उपस्थितिर्हि प्रकारविशेष्यभूतपदार्थयोः स्वरूपमात्रविषया भवति न तु कमपि पदार्थ धर्मिता (विशेष्यता) वच्छेदकत्वेनावगाहते, यथा–'द्रव्यं घटः' इत्यत्र घटपदेन घटघटत्वयोरुपस्थितिर्भवति द्रव्यपदेन च द्रव्यद्रव्यत्वयोरुपस्थितिर्भवति स्वरूपेणैव न हि द्रव्यत्वादौ धर्मितावच्छेदकत्वं भासते तथा चोपस्थितौ धर्मितावच्छेदकत्वेन कस्यापि पदार्थस्याऽभानात् कथमुपस्थितिः क्वचिदपि द्रव्यत्वादौ धर्मितावच्छेदकतासम्बन्धेन वर्तेत? तस्माद् धर्मितावच्छेदकतासम्बन्धेन तूपस्थितेः कारणत्वमेव नास्त्यसंभवात्, यद्वा–आत्मनिष्ठप्रत्यासत्त्योप-स्थितिरात्मन्युत्पद्यते इत्यात्मनिष्ठप्रत्यासत्त्या उपस्थितेः कारणत्वे संभवत्यपि सति द्रव्यपदजन्यद्रव्यत्वावच्छिन्नविषयकोपस्थितेस्त्वात्मनिष्ठप्रत्यासत्त्याऽप्यत्र कारणत्वं न संभवति– उक्तव्यभिचारादित्याह– आत्मनिष्ठेति, आत्मनिष्ठ-प्रत्यासत्त्या=समवायेन हेतुभूताम्=हेतुत्वेन संभाव्यमानां द्रव्यत्वावच्छिन्नोपस्थितिं विनापि तादृश=आत्मनिष्ठप्रत्यासत्त्या हेतुभूतप्रमेयत्वावच्छिन्नोपस्थितिदशायाम् (सत्त्वे) प्रमेयत्वे धर्मितावच्छेदकतासम्बन्धेन ज्ञानस्य=योग्यताज्ञानस्य फलजनकत्वात्=शाब्दबोधजनकत्वात् (योग्यताज्ञानेन शाब्दबोधे संभवति) तादृश=आत्मनिष्ठप्रत्यासत्त्या हेतुभूतद्रव्यत्वावच्छिन्नोपस्थितेरभावस्या-

संबन्धेन ज्ञानस्य फलजनकत्वात् तादृशद्रव्यत्वाद्यवच्छिन्नोपस्थितिविरहस्याऽकिंचित्करत्वादिति वाच्यम्, समानप्रकारताप्रत्यासत्त्या पदार्थोपस्थितेः शाब्दबोधे हेतुत्वोपगमात्।

ऽकिञ्चित्करत्वात्=शाब्दबोधाऽप्रतिबन्धकत्वान्न द्रव्यत्वावच्छिन्नोपस्थितेः कारणत्वम्, एवम्–द्रव्यपदजन्यद्रव्यत्वावच्छिन्नविषयकोपस्थितिदशायां प्रमेयत्वे शाब्दबोधो जायत एवेति प्रमेयत्वावच्छिन्नविषयकोपस्थितेरपि न कारणत्वं व्यभिचारात्, चालनीयन्यायेनोपस्थितिमात्रस्य व्यभिचारित्वादित्यर्थः। योग्यताज्ञाने तु द्रव्यत्वादीनां धर्मितावच्छेदकविधया भानाद् योग्यताज्ञानं तादृशद्रव्यत्वादिनिष्ठधर्मितावच्छेदकताख्यसम्बन्धेन द्रव्यत्वादौ संभवत्येवेति योग्यताज्ञानस्यैव धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधं प्रति कारणत्वं वक्तव्यम्, यदा चोपस्थितेर्व्यभिचारित्वात्कारणत्वमेव नास्ति तदा तादृश=आत्मनिष्ठप्रत्यासत्त्या हेतुभूताया द्रव्यत्वावच्छिन्नोपस्थितेरभावस्याकिञ्चित्करत्वम्=शाब्दबोधप्रतिबन्धकत्वं न संभवतीति उक्तयोग्यताज्ञानबलादेव शाब्दबोधो जायते स्वीकर्तव्यश्चेत्यभिप्रायः। अत्र 'घटो घटः' इत्यत्र शाब्दबोधापत्तिरस्ति नास्तीति वा न विचार्यते किन्तूपस्थितेः धर्मिता- वच्छेदकतासम्बन्धेन तयात्मनिष्ठप्रत्यासत्त्या कारणत्वं न संभवतीति पूर्वपक्षतात्पर्यम्। अत एवोत्तरपक्षे प्रकारतासम्बन्धेनोपस्थितेः कारणत्वं व्यवस्थाप्यते इत्यवधेयम्।

परिहारहेतुमाह– समानेति, योग्यताज्ञाने द्रव्यत्वं धर्मितावच्छेदकविधया भासते इति योग्यताज्ञानं शाब्दबोधं प्रति धर्मितावच्छेदकतासम्बन्धेन कारणमिति समानधर्मितावच्छेदकतासम्बन्धेन शाब्दबोधयोग्यताज्ञानयोः कार्यकारणभावः। उपस्थितौ च कस्यचिदपि द्रव्यत्वादेर्धर्मितावच्छेदकतया भानाभावादुपस्थितेर्धर्मितावच्छेदकतासम्बन्धेन कारणत्वासंभवेऽपि समानप्रकारताप्रत्यासत्त्या=समानप्रकारतासम्बन्धेन कारणत्वं संभवत्येव, अयं भावः– 'द्रव्यं घटः' इति वाक्यजन्योपस्थितौ घटत्वं घटे प्रकारो घटश्च द्रव्ये प्रकारो द्रव्यत्वं च द्रव्ये प्रकारो द्रव्यमेकं विशेष्यम्, यद्यप्यत्रोपस्थितौ प्रकारताया विशेष्यतायाश्च निरवच्छिन्नत्वात्–प्रकारतावच्छेदकतया विशेष्यतावच्छेदकतया च कस्यचिदपि भानं न भवति तथापि द्रव्यत्वस्य प्रकारतया भानं तु भवत्येव द्रव्यप्रकारतयोपस्थितत्वात् तच्च द्रव्यत्वं शाब्दबोधेऽपि द्रव्यप्रकारतया 'द्रव्यं घटः' इत्यत्र भासत एवेति द्रव्यत्वनिष्ठा प्रकारता समानप्रकारता प्राप्ता तादृशसमानप्रकारता-

येन संबन्धेन यद्धर्मावच्छिन्नकार्यं प्रति येन संबन्धेन यद्धर्मावच्छिन्नकार्यस्य व्यापकता तेन संबन्धेन तद्धर्मावच्छिन्न-कार्योत्पादकसामग्र्या अपि तेन संबन्धेन तद्धर्मावच्छिन्न-कार्योत्पत्तावपेक्षिततया प्रकारतासंबन्धेन द्रव्यत्वादौ द्रव्यपद-

---

सम्बन्धेनोपस्थितेः कारणत्वमस्ति– द्रव्यत्वे प्रकारतासम्बन्धेनोपस्थिति-शाब्दबोधयोरुभयोरपि सत्त्वादवेति नोपस्थितेरकारणत्वमुपस्थितिविरहस्या-ऽकिञ्चित्करत्वं चेति।

ननु धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधे जननीये प्रकारतासम्बन्धेनोप-स्थितेर्द्रव्यत्वादौ संभवेऽपि कथमुपयोगः स्यादित्याशङ्क्य प्रकारतासम्बन्धेनोप-स्थितेर्धर्मितावच्छेदकतासम्बन्धावच्छिन्नशाब्दबोधं प्रति कारणत्वमुपपादयति– येनेति, यथा– येन सम्बन्धेन=समवायसम्बन्धेन यद्धर्मावच्छिन्नकार्यं प्रति= घटत्वावच्छिन्नकार्यं प्रति येन सम्बन्धेन=तादात्म्यसम्बन्धेन यद्धर्मावच्छिन्न-कार्यस्य=द्रव्यत्वावच्छिन्नकार्यस्य व्यापकतास्तीति तेन सम्बन्धेन= तादात्म्य-सम्बन्धेन तद्धर्मावच्छिन्नकार्योत्पादकतामग्र्याः=द्रव्यत्वावच्छिन्नकार्यो-त्पादकसमवायिकारणादिसमवधानादिरूपसामग्र्या अपि तेन सम्बन्धेन= समवायसम्बन्धेन तद्धर्मावच्छिन्नकार्योत्पत्तौ=घटत्वावच्छिन्नकार्योत्पत्तौ अपेक्षितत्वं भवति– व्याप्यधर्मावच्छिन्नकार्योपत्तेः व्यापकधर्मावच्छिन्न-कार्योत्पादकसामग्रीसापेक्षत्वेन समवायिकारणनिमित्तकारणादि– समवधानादिरूपां द्रव्योत्पादकसामग्रीं विना द्रव्यव्याप्यस्य घटस्योत्पत्तेरसम्भवात् (समवायसम्बन्धेन कार्यत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन द्रव्यत्वेन द्रव्यं समवायिकारणमिति व्यापककार्यष्कारणभावः। समवायसम्बन्धेन घटत्वावच्छिन्नकार्यं प्रति तादात्म्यसम्बन्धेन कपालत्वेन कपालः समवायिकारणमिति व्याप्यकार्यकारण-भावः) तथा– प्रकृतेऽपि येन सम्बन्धेन=धर्मितावच्छेदकतासम्बन्धेन यद्धर्मा-वच्छिन्नकार्यं प्रति=घटत्वाच्छिन्नप्रकारकाऽभेदसंसर्गकशाब्दबोधत्वावच्छिन्नकार्यं प्रति येन सम्बन्धेन=प्रकारतासम्बन्धेन यद्धर्मावच्छिन्नकार्यस्य शाब्दबोधत्वरूप-सामान्यधर्मावच्छिन्नकार्यस्य व्यापकता=अधिकदेशवृत्तित्वं तेन सम्बन्धेन प्रकारतासम्बन्धेन तद्धर्मावच्छिन्नकार्योत्पादकसामाग्र्याः=शाब्दबोधत्वरूप-सामान्यधर्मावच्छिन्नकार्योत्पादकसामग्र्या अपि तेन सम्बन्धेन=धर्मिता-

जन्यपदार्थोपस्थित्यसत्त्वे तत्र धर्मितावच्छेदकतासंबन्धेन शाब्दबोधापत्तेरयोगात्।

वच्छेदकतासम्बन्धेन तद्धर्मावच्छिन्नकार्योत्पत्तौ=घटत्वावच्छिन्नप्रकारताका-भेदसंसर्गकशाब्दबोधत्वावच्छिन्नकार्योत्पत्तौ अपेक्षितत्वं भवतीति प्रकारता-सम्बन्धेन द्रव्यत्वादौ द्रव्यपदजन्यपदार्थोपस्थित्यभावे तत्र=द्रव्यत्वादौ धर्मिता-वच्छेदकतासम्बन्धेनापि शाब्दबोधापत्तेः=शाब्दबोधोत्पत्तेरसंभवादित्यन्वयः।

अयं भावः– अधिकदेशवृत्तित्वं हि व्यापकत्वम् 'द्रव्यं घटः' इत्यत्र च विशेष्यता तु केवलं द्रव्ये एव वर्तते प्रकारता च घटघटत्वद्रव्यत्वेषु त्रिषु वर्तते इति प्रकारताया विशदत्वात् प्रकारतासम्बन्धेन शाब्दबोधस्य घटघटत्व-द्रव्यत्वेषु संभवादधिकदेशवृत्तित्वमस्तीति व्यापकत्वम्, धर्मितावच्छेदकता-सम्बन्धेन तु शाब्दबोधो द्रव्यत्वमात्रे एव वर्तते इति तस्य व्याप्यत्वम्। तथा शाब्दबोधत्वरूपसामान्यधर्मावच्छिन्नस्य व्यापकत्वम्, घटत्वावच्छिन्नप्रकारका-ऽभेदसंसर्गकशाब्दबोधत्वावच्छिन्नस्य व्याप्यत्वम्। व्याप्यधर्मावच्छिन्ने च कार्ये जननीये व्यापकधर्मावच्छिन्नकार्योत्पादकसामग्री अपेक्ष्यते यथा– करीपजन्यत्वविशिष्टवह्नित्वरूपव्याप्यधर्मावच्छिन्नवह्नौ जननीये शुद्धवह्नित्व-रूपव्यापकधर्मावच्छिन्नवह्न्युत्पादकसामग्री इन्धनादिरूपाऽपेक्षिता भवति तदभावे वह्न्युत्पत्त्यसंभवात्, यथा च घटत्वरूपव्याप्यधर्मावच्छिन्ने घटे जननीये द्रव्यत्वरूपव्यापकधर्मावच्छिन्नकार्योत्पादिका समवायिकारणादिसमवधानादिरूपा सामग्र्यऽपेक्षिता भवति, तथा– प्रकृतेऽपि घटत्वावच्छिन्नप्रकारकाऽभेदसंसर्गक-शाब्दबोधत्वरूपव्याप्यधर्मावच्छिन्ने शाब्दबोधे जननीये शुद्धशाब्दबोधत्वरूप-व्यापकधर्मावच्छिन्नशाब्दबोधोत्पादिका या प्रकारतासम्बन्धेनोपस्थितिःतस्या अवश्यमपेक्षा भवत्येवेति प्रकारतासम्बन्धेन द्रव्यत्वे द्रव्यपदजन्योपस्थित्यसत्त्वे द्रव्यत्वे धर्मितावच्छेदकतासम्बन्धेनापि शाब्दबोधोत्पत्तिर्न संभवतीति प्रकारता-सम्बन्धेनोपस्थितेः शाब्दबोधकारणत्वमवश्यमभ्युपगन्तव्यम्।

न चेति– यदि समानप्रकारताप्रत्यासत्त्योपस्थितेः शाब्दबोधं प्रति कारणत्वं स्वीक्रियते तदा यत्र प्रमेयपदेन प्रमेयत्वावच्छिन्नविषयकोपस्थितिः स्याद् उद्बोधकान्तराच्च द्रव्यत्वावच्छिन्नविषयकोपस्थितिः स्यात्तत्र तादृश-समूहालम्बनात्मकप्रमेयद्रव्ययोरुपस्थितौ प्रमेयपदजन्यत्वेन पदजन्यत्वमप्यस्त्येव तत्र प्रमेयस्यैव विशेष्यत्वेन द्रव्यस्य प्रकारत्वाच्च उद्बोधकान्तरादुपस्थितद्रव्ये

न च यत्र प्रमेयत्वाद्यवच्छिन्नविशेष्यकवृत्तिज्ञानजन्यप्रमेयत्वाद्यवच्छिन्नविशेष्यकोपस्थितावेव उद्बोधकान्तराद् द्रव्यत्वाद्यवच्छिन्नस्य भानं तत्र द्रव्यत्वाद्यवच्छिन्नविषयक-

प्रकारतासम्बन्धेनोपस्थितेः सत्त्वाद् द्रव्ये शाब्दबोधोऽपि स्यादेव कारणसत्त्वे कार्यावश्यंभावात्, न चैवमुद्बोधकान्तरादुपस्थितपदार्थे उद्बोधकान्तरजन्योपस्थितिसत्त्वेऽपि शाब्दबोध इष्ट इत्युक्तस्थले तद्वारणाय=शाब्दबोधापत्तिवारणाय तद्धर्मावच्छिन्नविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्नविशेष्यकं यद् 'द्रव्यं द्रव्यपदशक्यम्' इत्याकारकं वृत्तिज्ञानं तादृशवृत्तिज्ञानजन्यतद्धर्मप्रकारकपदार्थोपस्थितेर्हेतुत्वं वक्तव्यं तथा चोक्तस्थले द्रव्यस्य योपस्थितिर्जाता सोद्बोधकान्तरादेव जाता न तु द्रव्यपदवृत्तिज्ञानजन्यास्तीति तादृशोद्बोधकान्तरजन्योपस्थितेः शाब्दबोधं प्रति कारणत्वमेव नास्ति येनोद्बोधकान्तरादुपस्थितद्रव्ये शाब्दबोधापत्तिः स्यादित्यर्थः। तथा चेति– तथा च 'तद्धर्मावच्छिन्नविशेष्यकशाब्दबोधं प्रति तद्धर्मावच्छिन्नविशेष्यकवृत्तिज्ञानजन्यतद्धर्मप्रकारकपदार्थोपस्थितेर्हेतुत्वम्' इत्येवं कार्यकारणभावे स्वीकृते कार्यकारणभावे प्रकारविशेष्ययोर्निवेशस्यावश्यकत्वे प्राप्ते विषयनिष्ठप्रत्यासत्त्या हेतुताकल्पनमयुक्तमेवेत्यर्थः। अयं भावः– शाब्दबोधतत्कारणयोश्च कार्यकारणभाव आत्मनिष्ठप्रत्यासत्यापि भवति विषयनिष्ठप्रत्यासत्त्यापि च भवति तत्रात्मनिष्ठप्रत्यासत्त्या यादात्मन्युपस्थित्यादिकं कारणं भवति तदात्मन्येव शाब्दबोधोऽप्यर्थादेव जायते नान्यत्र प्रसङ्ग इति तत्पुरुषीयत्वप्रवेशापेक्षा न भवति किन्तु पटाद्युपस्थित्यादिसत्त्वे घटादिविषयकोऽपि शाब्दबोधः स्यादिति तद्वारणाय विषयनिवेशापेक्षा भवत्येव यथा– घटत्वा- वच्छिन्नविषयकशाब्दबोधं प्रति घटत्वावच्छिन्नविषयकोपस्थितेः कारणत्वमिति, विषयनिष्ठप्रत्यासत्त्या च यस्मिन् विषये उपस्थित्यादिकं भवति तत्रैव शाब्दबोधोऽपि संभवति नाऽन्यत्रेति विषयनिवेशापेक्षा नास्ति किन्तु तत्पुरुषीयत्वनिवेशापेक्षा भवत्येव यथा– यज्ञदत्तीयशाब्दबोधं प्रति यज्ञदत्तीयोपस्थित्यादिकं कारणमिति, अन्यथा देवदत्तस्योपस्थित्यादिसत्त्वे यज्ञदत्तस्यापि शाब्दबोधः स्यादित्येवं स्थिते उक्तोद्बोधकान्तरजन्योपस्थितेर्द्रव्यादौ प्रकारतासम्बन्धेन सत्त्वे तत्र द्रव्ये शाब्दबोधोऽपि स्यादेवेति तद्वारणाय यदि विषयनिष्ठप्रत्यासत्त्या (प्रकारतासम्बन्धेनापि) उपस्थितेः कारणत्वाश्रयणयुक्तमेव यतो विषयनिष्ठप्रत्यासत्त्या कारणत्वं हि विषयप्रवेशप्रयुक्तगौरवपरिहारार्थमेवाश्रीयते विषयप्रवेशापेक्षा

शाब्दापत्तिवारणाय तद्धर्मावच्छिन्नविशेष्यकशाब्दबोधं प्रति तद्धर्मावच्छिन्नविशेष्यकवृत्तिज्ञानजन्यतद्धर्मप्रकारकपदार्थोपस्थितेर्हेतुता वाच्या तथा च प्रकारविशेष्यनिवेशस्यावश्यकत्वे विषयनिष्ठ-

---

तूक्तरीत्या प्राप्तैव पुरुषान्तरस्य शाब्दबोधवारणाय तत्पुरुषीयत्वनिवेशोऽपि कर्तव्य एवेति विषयनिष्ठप्रत्यासत्त्या हेतुताकल्पनमयुक्तमेव तथा चात्मनिष्ठप्रत्यासत्त्यैवोपस्थितेर्हेतुत्वं स्वीकार्यम्, आत्मनिष्ठप्रत्यासत्त्या-हेतुत्वोपगमे विषयप्रवेशापेक्षासत्त्वेऽपि तत्पुरुषीयत्वप्रवेशापेक्षाभावेन लाघवात्, एतदेवाह– तथा सतीति। तथा सति=विषयनिष्ठप्रत्यासत्त्या हेतुत्वोपगमे सति तत्पुरुषीयत्वप्रवेशापेक्षया देवदत्तादिपुरुषभेदेनाऽनन्तकार्यकारणभाव-कल्पनाप्रसङ्गः, उक्तोद्बोधकान्तरजन्योपस्थित्या शाब्दबोधवारणाय विषयप्रवेशा-पेक्षाऽप्यस्त्येवेति महद् गौरवम्। आत्मनिष्ठसमवायप्रत्यासत्त्या च द्रव्यत्वा-वच्छिन्नधर्मिकघटत्वावच्छिन्नप्रकारकाभेदसंसर्गकशाब्दबोधं प्रति क्लृप्ता या द्रव्यत्वावच्छिन्नधर्मिकयोग्यताज्ञानरूपा सामग्री तदऽभावान्न 'घटो घटः' इत्यत्र शाब्दबोधापत्तिः– अत्र द्रव्यत्वस्य धर्मितावच्छेदकत्वाभावादिति भावः।

परिहारमाह– स्वजनकज्ञानीयेति, यद्युद्बोधकान्तरजन्योपस्थित्या शाब्द-बोधवारणाय विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावस्वीकारेऽपि 'तद्धर्मावच्छिन्न-विशेष्यकशाब्दबोधं प्रति तद्धर्मावच्छिन्नविशेष्यकवृत्तिज्ञानजन्यतद्धर्मप्रकारको-पस्थितेर्हेतुत्वम्' इत्येवं कार्यकारणभावे विषयप्रवेशापेक्षा स्याद् विषयप्रवेशेन गौरवापत्त्या विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावस्त्यक्तः स्यादात्मनिष्ठ-प्रत्यासत्त्या च स्वीकृतिः स्यात् तदात्मनिष्ठप्रत्यासत्त्या कार्यकारणभावे। विषयप्रवेशावश्यंभावेन 'द्रव्यं घटः' इत्यत्र शाब्दबोधकारणं या द्रव्यत्वावच्छिन्न धर्मिकयोग्यताज्ञानादिरूपा सामग्री तस्याः "घटो घटः" इत्यत्र द्रव्यत्वस्य धर्मितावच्छेदकत्वाभावेनाऽभावात् शाब्दबोधापत्तिर्न स्यादपि न चैवमस्ति यतः– स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्ट-प्रकारतासम्बन्धेनोपस्थितेः कारणत्वं स्वीक्रियते (स्वं उपस्थितिः)। प्रकारता-सम्बन्धश्च विषयनिष्ठप्रत्यासत्तिरेव, तथा च 'द्रव्यं घटः' इत्यत्र स्वं द्रव्य-पदजन्योपस्थितिस्तज्जनकं यत् 'द्रव्यं द्रव्यपदशक्तिमत्' इति शक्तिरूपवृत्तिज्ञानं तादृशज्ञाननिरूपिता या शक्तिरूपवृत्तिनिष्ठा प्रकारता (उक्तशक्तिज्ञाने शक्तेरेव प्रकारत्वात्) तन्निरूपिता विशेष्यता द्रव्ये वर्तते (उक्तशक्तिज्ञाने द्रव्यस्यैव

प्रत्यासत्त्या हेतुताकल्पनमयुक्तम्, तथा सति पुरुषभेदेन कार्य-कारणभावबाहुल्यप्रसङ्ग इति वाच्यम्, स्वजनकज्ञानीयवृत्ति-निष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारता-संबन्धेनोपस्थितेर्हेतुतां स्वीकृत्य तादृशापत्तेर्वारणात्।

विशेष्यत्वात्) विशेष्यतावच्छेदकता च द्रव्यत्वे वर्तते अथ च तत्र द्रव्यत्वे द्रव्यपदजन्यद्रव्यपदार्थोपस्थितिनिरूपिता प्रकारतापि वर्तते (उपस्थितौ द्रव्यस्य विशेष्यत्वेन तत्र द्रव्यत्वस्य प्रकारत्वेन भानाद् उपस्थितिनिरूपिता द्रव्यत्वे प्रकारतास्ति) इति द्रव्यत्वे स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यता-वच्छेकताप्यस्ति उपस्थितीयप्रकारताप्यस्तीत्येषा प्रकारता सामानाधिकरण्य-सम्बन्धेन स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्टा जातेति स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्ट-प्रकारतासम्बन्धेनोपस्थितेः शाब्दबोधं प्रति कारणत्वं स्वीक्रियते, एतादृशप्रकारता-सम्बन्धेन च 'द्रव्यं घटः' इत्यत्र द्रव्यत्वे उपस्थितेः सत्त्वेन तत्र द्रव्यत्वे शाब्दबोधोऽपि जायते, उद्बोधकान्तरेण द्रव्योपस्थितिकाले च द्रव्ये नैतादृश-प्रकारतासम्बन्धेनोपस्थितिर्जायते– तस्या उपस्थितेः वृत्तिज्ञानजन्यत्वाभावाद् उद्बोधकान्तरजन्योपस्थितिनिरूपितद्रव्यनिष्ठप्रकारतायाश्च स्व (उपस्थिति) जनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्टत्वाभावादिति कारणीभूताया उक्तप्रकारतासम्बन्धेनोपस्थितेरभावादेव शाब्दबोधो न संभवतीत्येवं रीत्या तादृशापत्तेः=उक्तोद्बोधकान्तरजन्योपस्थित्या शाब्दबोधापत्तेर्वारणात्, तथा चोक्तोद्बोधकान्तरजन्योपस्थित्या शाब्दबोधापत्तिवारणार्थं विषयप्रवेशापेक्षा नास्तीति विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावे उक्तदोषस्याभावात् 'द्रव्यं घटः' इत्यत्र विषयनिष्ठप्रत्यासत्त्या घटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यता-ज्ञानस्य यस्य शाब्दबोधकारणत्वमस्ति तादृशयोग्यताज्ञानस्य 'घटो घटः' इत्यत्रापि सत्त्वाच्छाब्दबोधापत्तिरस्त्येव विषयनिष्ठप्रत्यासत्त्या कारणत्वस्वीकारेण द्रव्यत्वावच्छिन्नधर्मिकत्वस्य प्रवेशापेक्षाभावादित्यर्थः।

ननु कार्यकारणभावस्यान्वयव्यतिरेकाभ्यामवधार्यत्वादुक्तप्रकारता-सम्बन्धेनोपस्थितेः कारणत्वमेव न संभवति व्यभिचारादित्याशङ्कते– न चेति 'द्रव्यं घटः' इत्यत्र द्रव्यं विशेष्यं घटश्च प्रकार इति यथा द्रव्ये

न च पदार्थेऽपि प्रकारतासंबन्धेन शाब्दबोधोत्पत्त्या तत्र तादृशप्रकारतासंबन्धेन पदार्थोपस्थितेरभावात् प्रकारनिष्ठ-प्रत्यासत्त्या पदार्थोपस्थितेर्हेतुता व्यभिचारेण कल्पयितुमशक्येति

विशेष्यतासम्बन्धेन द्रव्यत्वे च विशेष्यतावच्छेदकतासम्बन्धेन शाब्दबोधो जायते तथा पदार्थेऽपि= घटेऽपि प्रकारतासम्बन्धेन शाब्दबोधो जायते एव तत्र=घटे च तादृशप्रकारतासम्बन्धेन=उक्तप्रकारतासम्बन्धेन पदार्थोपस्थितिः= घटोपस्थितिस्तु नास्त्येव यतः– घटपदजन्यघटोपस्थितौ घटो विशेष्यतयैव भासते न तु प्रकारतयेति घटे घटपदजन्योपस्थितीयप्रकारतैव नास्तीति कथं प्रकारतासम्बन्धेन घटे उपस्थितिः स्यादिति घटे प्रकारतासम्बन्धेनोपस्थित्य-भावेऽपि 'द्रव्यं घटः' इति वाक्यजन्यशाब्दबोधस्तु प्रकारतासम्बन्धेन घटे उत्पद्यते एवेत्युपस्थितेस्तादृशप्रकारतासम्बन्धेन व्यभिचारित्वात्कारणत्वं न संभवति। तथा चात्मनिष्ठप्रत्यासत्त्या योग्यताज्ञानस्य कारणत्वं वक्तव्यं आत्मनिष्ठप्रत्यासत्त्या योग्यताज्ञानं च द्रव्यत्वावच्छिन्नधर्मिकमेव 'द्रव्यं घटः' इत्यत्रोक्तरीत्या कारणं तस्य च 'घटो घटः' इत्यत्राऽसंभवान्न शाब्दबोधापत्तिरित्यर्थः। घटपदजन्योपस्थितौ घटस्य विशेष्यत्वेन पदार्थत्वादुक्तं– पदार्थेऽपीति। घटेऽपि 'द्रव्यं घटः' इति वाक्यजन्यशाब्दबोधीया प्रकारतास्त्येव घटस्य द्रव्ये विशेषणत्वादिति घटे प्रकारतासम्बन्धेन शाब्दबोधसंभवः। उपस्थितिश्चोपस्थितीयप्रकारतासम्बन्धेनैव घटादौ शाब्दबोधाधिकरणेऽपेक्ष्यते न त्वन्यदीयप्रकारतासम्बन्धेन घटे उपस्थितीयप्रकारता तु नास्त्येव– उपस्थितौ घटस्य विशेष्यत्वेनोपस्थितीयविशेष्यताया एव घटे वर्तमानत्वादित्युक्तं तादृशप्रकारतेति। द्रव्यत्वं तु द्रव्यप्रकारतयैव द्रव्यपदजन्योपस्थितौ भासते इति द्रव्यत्वे प्रकारतासम्बन्धेन द्रव्यपदजन्योपस्थितिरस्त्येवेति द्रव्यत्वे शाब्दबोधोत्पत्तौ न कोऽपि दोष इत्यवधेयम्। प्रकारनिष्ठप्रत्यासत्त्या= प्रकारनिष्ठा या प्रकारता तल्लक्षणप्रत्यासत्त्या।

परिहारमाह– परामर्शेति, यथा वह्न्यनुमितिं प्रति धूमपरामर्शस्यापि कारणत्वमस्त्यालोकपरामर्शस्यापि कारणत्वमस्ति तयोश्च परामर्शयोः परस्परजन्यानुमितौ व्यभिचारे प्राप्ते धूमपरामर्शाव्यवहितोत्तरत्वविशिष्टानुमितिं प्रत्येव धूमपरामर्शस्य कारणत्वमालोकपरामर्शाव्यवहितोत्तरत्वविशिष्टानुमितिं प्रत्येवालोकपरामर्शस्य कारणत्वमित्येवं कार्यतावच्छेदककोटौ कारण-

वाच्यम्, परामर्शकारणताविचारदर्शितदिशा व्यभिचारस्य वारणीयत्वादिति चेत्? तर्हि तद्धर्मावच्छिन्नाऽभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबन्धेन

व्यवहितोत्तरत्वनिवेशेन व्यभिचारो निवारितस्तथात्रापि कार्यतावच्छेदककोटौ कारणाव्यवहितोत्तरत्वनिवेशेन व्यभिचारौ निवारणीयस्तथा च स्वजनकज्ञानीय-वृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारतासम्बन्धेनोपस्थित्य-व्यवहितोत्तरत्वविशिष्टशाब्दबोधं प्रति स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारता-निरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारतासम्बन्धेनोपस्थितेः कारणत्वं यथा 'द्रव्यं घटः' इति वाक्यजन्यं द्रव्यत्वे जायमानशाब्दबोधं प्रति। घटे जायमान-शाब्दबोधं प्रति तूक्तप्रकारतासम्बन्धेनोपस्थितेः कारणत्वमेव नास्ति येन घटेऽसत्त्वाद् व्यभिचारित्वं स्यात् किन्तु घटे यादृशप्रकारतासम्बन्धेनोप-स्थित्यनन्तरं शाब्दबोधो जायते तादृशप्रकारतासम्बन्धेनैवोपस्थितेः कारणत्वमिति न व्यभिचारः। तथा च विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावे दोषाभावाद् योग्यताज्ञाने द्रव्यत्वावच्छिन्नधर्मिकत्वस्य प्रवेशापेक्षाभावेन 'द्रव्यं घटः' इत्यत्र यद् घटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानं शाब्दबोधजनकं तस्य 'घटो घटः' इत्यत्रापि सत्त्वाद् घटत्वावच्छिन्नप्रकारकाभेदसंसर्गक-शाब्दबोधः स्यादेव कारणसत्त्वे कार्यावश्यंभावादित्यर्थः।

अथेत्यादिनाशङ्कितं सिद्धान्ती परिहरति—तर्हीति। तद्धर्मपदेन प्रकारतावच्छेदकधर्मो घटत्वादिर्ग्राह्यः। तद्धर्मावच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारता-निरूपितविशेष्यतावच्छेदकतासम्बन्धेन शाब्दबोधोत्पतिं प्रति तद्धर्मभेदस्य= प्रकारतावच्छेदकधर्मभेदस्य हेतुत्वम्। यत्र विशेष्यतावच्छेदकप्रकारता-वच्छेदकधर्मयोर्भेदो भवति तत्रैवाऽभेदान्वयबोधो भवति यथा 'द्रव्यं घटः' इत्यत्र विशेष्यतावच्छेदकं द्रव्यत्वं प्रकारतावच्छेदकं च तद्भिन्नं घटत्वमिति। 'घटो घटः' इत्यत्र तु घटत्वमेव विशेष्यतावच्छेदकं प्रकारतावच्छेदकं चेति विशेष्यतावच्छेदकप्रकारतावच्छेदकयोर्भेदाभावान्नाऽभेदान्वयबोधो भवतीत्यर्थः। अत्र— "तद्धर्मावच्छिन्नाऽभेदसंसर्गावच्छिन्ना च या घटनिष्ठा प्रकारता तन्निरूपिता विशेष्यता द्रव्ये तदवच्छेदकता विशेष्यतावच्छेदकता सम्बन्धेन 'द्रव्यं घटः' इति शाब्दत्वावच्छिन्नं द्रव्यत्वे जायते तत्र द्रव्यत्वे तद्धर्मभेदो घटत्वभेदो हेतुरस्ति, 'घटो घटः' इत्यत्र तु न शाब्दबोधापत्तिः— घटत्वे

शाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मभेदस्यापि हेतुतायाः स्वीकरणीयतया न 'घटो घटः' इत्यादिस्थले शाब्दबोधापत्तिः

घटत्वभेदाभावादित्यर्थः" इति कृष्णंभट्टाः।

किञ्च 'द्रव्यं घटः' इत्यत्र घटमुद्दिश्य द्रव्यत्वविधानाद् द्रव्यमुद्दिश्य घटत्वविधानासंभवाच्च घटविशेष्यक एव शाब्दबोधो युक्तो न तु घटप्रकारको येन 'द्रव्यं घटः' इति दृष्टान्तेन 'घटो घटः' इत्यत्र घटप्रकारकशाब्दबोधापत्तिः स्यादित्यपि विज्ञेयम्।

ननु यद्युक्तरीत्याऽभेदसंसर्गकशाब्दबोधं प्रति तद्धर्मभेदस्य नाम विशेष्यतावच्छेदकप्रकारतावच्छेदकधर्मयोर्भेदस्य हेतुत्वं स्वीक्रियते तदा 'स घटः' 'घटः सः' इत्यादौ योऽभेदसंसर्गकशाब्दबोध इष्टः स नोपपद्येत– विशेष्यतावच्छेदकप्रकारतावच्छेदकधर्मयोर्भेदाभावात्, यतः– 'यः खल्वत्र जातिमानस्ति स घट आनेतव्यः' इति वाक्यघटके 'स घटः' इति वाक्ये तत्पदेन जातिमान् बोध्यते इति जात्यवच्छिन्नेऽत्र तत्पदस्य शक्तिः तत्पदवाच्यो जातिमानेव विशेष्य उद्देश्यत्वात् घटश्च प्रकारो घटे प्रकारतावच्छेदकधर्मो घटत्वं तत्पदवाच्ये जातिमति विशेष्ये च विशेष्यतावच्छेदकधर्मो जातिरेव जातौ च घटत्वभेदो नास्त्येव जातेर्घटत्वादिरूपत्वात् अत्रापि वस्तुतो विशेष्यतावच्छेदकधर्मो घटत्वमेव तत्पदस्य घटबोधकत्वादेव किन्तु तस्य घटत्वस्य घटत्वत्वेन रूपेण प्रतीतिर्न भवति किन्तु जातित्वेन प्रतीतिर्भवति तत्पदस्यात्र जातिमति शक्तत्वात्, जातिमद्रूपेणैव घटबोधकत्वात् तयोश्च विशेष्यतावच्छेदकप्रकारतावच्छेदकधर्मयोर्जातिघटत्वयोर्भेदाभावादत्राभेदसंसर्गक–शाब्दबोधो न स्यादेव, तथा 'घटः सः' इत्यत्रापि तत्पदस्योक्तरीत्या जातिमति शक्तत्वात् विशेष्यतावच्छेकप्रकारतावच्छेदकधर्मयोर्घटत्वजात्योर्भेदाभावादिष्टो–ऽभेदसंसर्गकशाब्दबोधो न स्यादेवेत्याशङ्क्याह– स घट इत्यादीति।

'स घटः' 'घटः सः' इत्यादावभेदसंसर्गकविवक्षितशाब्दबोधस्योपपत्तये विशेष्यत्वप्रकारत्वयोरवच्छेदकत्वे निरवच्छिन्नत्वेन विशेषणीये अर्थात्–यत्र विशेष्यतावच्छेदकता प्रकारतावच्छेदकता च निरवच्छिन्ना भासते तादृश–शाब्दबोधं प्रत्येव तद्धर्मभेदस्य हेतुत्वमस्ति तथा च–निरवच्छिन्नावच्छेदकता–कविशेष्यताकम् (निरवच्छिन्नविशेष्यतावच्छेदकताकम्) निरवच्छिन्ना–

'स घटः' इत्यादिवाक्याज्जातित्वादिना घटत्वादिधर्मिता-वच्छेदकस्य स्वरूपतो घटत्वादिप्रकारतावच्छेदककस्य, 'घटः सः' इत्यादिवाक्यात् स्वरूपतो घटत्वादिधर्मितावच्छेदककस्य

वच्छेदकताकप्रकारताकम् (निरवच्छिन्नप्रकारतावच्छेदकताकम्) च शाब्दबोधं प्रति तद्धर्मभेदस्य हेतुत्वम्, 'द्रव्यं घटः' इत्यत्र द्रव्यत्वनिष्ठा या विशेष्यता-वच्छेदकतास्ति सा निरवच्छिन्नास्ति द्रव्यत्वस्य स्वरूपणैव भासमानत्वात् तथा घटत्वनिष्ठा प्रकारतावच्छेदकतापि निरवच्छिन्नास्ति घटत्वस्यापि स्वरूपेणैव भासमानत्वादिति तादृशशाब्दबोधं प्रति तद्धर्मभेदस्योक्तरीत्या हेतुत्वमस्ति अस्ति च तत्र द्रव्यत्वघटत्वयोर्भेदः। अत्र तु 'स घटः' इत्यस्य 'जातिमान् घटः' इत्यर्थः जातिमानेव च विशेष्यः विशेष्यतावच्छेदकता जातौ वर्तते जातेश्च जातित्वेन रूपेण भासमानत्वात् जातिनिष्ठा विशेष्यता-वच्छेदकता जातित्वावच्छिन्नास्ति तथा चात्र शाब्दबोधः सावच्छिन्नविशेष्यता-वच्छेदकताको जायते न तु निरवच्छिन्नविशेष्यतावच्छेदकताकः सावच्छिन्न विशेष्यतावच्छेदकताकशाब्दबोधं प्रति तु तद्धर्मभेदस्य हेतुत्वमेव नास्ति इत्यत्र विशेष्यतावच्छेदकप्रकारतावच्छेदकधर्मयोर्जातिघटत्वयोर्भेदाभावेऽपि नाभेदसंसर्गकशाब्दबोधस्यानुपपत्तिः। एवम्–'घटः सः' इत्यस्य 'घटो जातिमान्' इत्यर्थः जातिमानेव च प्रकारः प्रकारतावच्छेदकतात्र जातौ वर्तते जातेश्च जातित्वेन रूपेण भासमानत्वात् जातिनिष्ठा प्रकारतावच्छेदकता (प्रकारता जातिमतीति जातिमद्विशेषणीभूतजातौ प्रकारतावच्छेदकता) जातित्वावच्छिन्नास्ति तथा चात्र शाब्दबोधः सावच्छिन्नप्रकारतावच्छेदकताको जायते न तु निरवच्छिन्नप्रकारतावच्छेदकताकः सावच्छिन्नप्रकारतावच्छेदकताकशाब्दबोधं प्रति च तद्धर्मभेदस्य हेतुत्वमेव नास्तीत्यत्र विशेष्यतावच्छेदकप्रकारता-वच्छेदकधर्मयोर्घटत्वजात्योर्भेदाभावेऽपि नाऽभेदसंसर्गकशाब्दबोधस्यानुपपत्तिः।

'स घटः' इत्यस्य शाब्दबोधस्वरूपमाह– जातित्वादिनेति। अत्र धर्मितावच्छेदकतया घटत्वमेव जातित्वेन रूपेण भासते इत्युक्तं जातित्वादिनेति, जातित्वेन भासमानं घटत्वं धर्मितावच्छेदकं यस्य तस्य तथा स्वरूपतः=स्वरूपेण भासमानं च घटत्वं प्रकारतावच्छेदकं यस्य तस्य (घटे प्रकारतास्ति) एवंभूतस्य शाब्दबोधस्योपपत्तये। 'घटः सः' इत्यत्र च स्वरूपतः=स्वरूपेण भासमानं घटत्वं धर्मितावच्छेदकं यस्य तस्य तथा जातित्वविशिष्टं जातित्वेन

जातित्वादिविशिष्टघटत्वावच्छिन्नप्रकारताकस्य शाब्दबोधस्योपपत्तये विशेष्यत्वप्रकारत्वयोरवच्छेदकत्वे निरवच्छिन्नत्वेन विशेषणीये।

'घटो नीलघटः' इत्याद्यन्वयबोधस्य प्रामाणिकत्वेऽन्यत्र दर्शितरीत्या सोऽप्युपपादनीयः।

भासमानं च यद् घटत्वं तदवच्छिन्ना प्रकारता यस्य (जातित्वावच्छिन्ना घटत्वनिष्ठा प्रकारतावच्छेदकता यस्य) तस्यैवंभूतस्य शाब्दबोधस्योपपत्तये इत्यन्वयस्तथा च 'स घटः' इत्यत्र 'जातित्वावच्छिन्नघटत्वनिष्ठावच्छेदकता-निरूपिता या विशेष्यता तन्निरूपिता याऽभेदसम्बन्धावच्छिन्ना घटत्वावच्छिन्ना प्रकारता तादृशप्रकारताशालिशाब्दबोधः। 'घटः सः' इत्यत्र घटत्वनिष्ठ-निरवच्छिन्नावच्छेदकतानिरूपिता या विशेष्यता तादृशविशेष्यतानिरूपिता या जातित्वावच्छिन्नघटत्वनिष्ठावच्छेदकतानिरूपिता घटनिष्ठा प्रकारता तादृशप्रकारताशालिशाब्दबोधः। 'स घटः' इत्यत्र विशेष्यतावच्छेदकता जातिनिष्ठा सावच्छिन्ना जातित्वावच्छिन्नत्वात्, 'घटः सः' इत्यत्र च तथैव प्रकारतावच्छेदकता जातिनिष्ठा सावच्छिन्नास्तीति व्यतिरेकः।

'घटो नीलघटः' इति– 'घटो नीलघटः' इत्यत्र कस्यचिन्मते घटत्वापेक्षया नीलघटत्वस्य भिन्नत्वेन विशेष्यतावच्छेदकप्रकारतावच्छेदकयोर्घटत्व-नीलघटत्वयोर्भेदादभेदसंसर्गकशाब्दबोधस्य नानुपपत्तिः 'द्रव्यं घटः' इत्यनेन तुल्यत्वात्। नवीनमते चात्र विधेयांशेऽधिकावगाहिशाब्दबोधस्वीकाराद् उद्देश्य (विशेष्य)-कोटौ केवलं घटस्यैव प्रवेशाद् विधेय-(विशेषण) कोटौ घटापेक्षयाधिकस्य नीलस्यापि प्रवेशाद् भानाच्च नाऽभेदान्वयबोधे काचिदनुप-पत्तिः। न चैवम् 'घटो घटः' इत्यत्राप्यभेदान्वयापत्तिरिति वाच्यम्, 'घटो घटः' इत्यत्र उद्देश्यकोटौ विधेयकोटौ च केवलं घटस्यैव प्रवेशाद् घटातिरिक्त-नीलादेरप्रवेशेनाधिकावगाहित्वाभावात्। किं वा यत्र विशेष्यतावच्छेदकता-प्रकारतावच्छेदकता चैकधर्मपर्याप्ता स्यात्तत्राऽभेदान्वयबोधं प्रति तद्धर्मभेदस्य हेतुत्वमस्ति नान्यत्र यथा– 'द्रव्यं घटः' इत्यत्र विशेष्यतावच्छेदकता केवलं द्रव्यत्वे पर्याप्तास्ति प्रकारतावच्छेदकता च केवलं घटत्वे पर्याप्तास्तीति तत्राभेदान्वयबोधं प्रति तद्धर्मभेदस्य हेतुत्वमस्ति अस्ति च तत्र द्रव्यत्वघटत्वयोः

एवं 'स सः' इत्यादिवाक्याज्जातित्वाद्यवच्छिन्न-

परस्परं भेद इति नाऽभेदान्वयबोधानुपपत्तिः। 'घटो नीलघटः' इत्यत्र तु प्रकारतावच्छेदकता नैकधर्मपर्याप्तास्ति किन्तु नीलत्वघटत्वैतदुभयधर्मपर्याप्तास्तीत्यत्राऽभेदान्वयबोधं प्रति तद्धर्मभेदस्य हेतुत्वाभावाद् विशेष्यतावच्छेदकीभूतस्य घटत्वस्य प्रकारतावच्छेदकीभूतस्य च नीलघटत्वस्य भेदाभावेऽप्यऽभेदान्वयबोधे न काप्यनुपपत्तिरित्याह– अन्यत्र दर्शितरीत्येति। किं वा–तद्धर्मवृत्तिर्याऽभेदसम्बन्धावच्छिन्ना प्रकारता तादृशप्रकारतानिरूपितविशेष्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मभेदः कारणम्, तद्धर्मवृत्तित्वं च प्रकारतायां स्वनिरूपितावच्छेदकतावावच्छिन्नप्रतियोगिताकपर्याप्यनुयोगितावच्छेदकत्वसम्बन्धेन, स्वं अभेदसम्बन्धावच्छिन्ना प्रकारता, 'घटो घटः' इत्यत्र तद्धर्मः= घटत्वगतैकत्वं तद्वृत्तिर्या स्वरूपसम्बन्धेन घटनिष्ठा अभेदसम्बन्धावच्छिन्ना प्रकारता (घटे या स्वरूपसम्बन्धेनाभेदसम्बन्धावच्छिन्ना प्रकारता वर्तते सोक्तसम्बन्धेन तद्धर्मे घटत्वगतैकत्वेऽपि वर्तते) तादृशप्रकारता निरूपिता या घटनिष्ठा विशेष्यता (घटो घट इत्यत्र प्रकारत्वं विशेष्यत्वं च घटस्यैव–घटप्रकारकघटविशेष्यकबोधस्यैवापाद्यमानत्वात्) तादृशविशेष्यतावच्छेदकता घटत्वे, विवक्षिततपर्याप्तिसम्बन्धस्य प्रतियोगिता तादृशविशेष्यतावच्छेदकतायां वर्तते तत्र विशेष्यतावच्छेदकतात्वमपि वर्तते इति सा प्रतियोगिता विशेष्यतावच्छेदकतात्वावच्छिन्ना जाता तथा चोक्तविशेष्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्तेरनुयोगितावच्छेदकं घटत्वगतैकत्वम् (विशेष्यतावच्छेदकतायाः पर्याप्तिर्घटत्वे विवक्षिता घटत्वमनुयोगी अनुयोगितावच्छेदकं घटत्वगतैकत्वं ग्राह्यम्) इति तन्निष्ठानुयोगितावच्छेदकत्वसम्बन्धेन (तद्= घटत्वगतैकत्वम्) शाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मभेदस्य कारणत्वमस्ति तच्च 'घटो घटः' इत्यत्र नास्त्येव– विशेष्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकमपि घटत्वगतैकत्वमेव प्रकारतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकमपि घटत्वगतैकत्वमेव न 'घटो घटः' इत्यत्राभेदान्वय- बोधापत्तिः– घटत्वगतैकत्वयोः पर्याप्त्यनुयोगितावच्छेदकयोः परस्परं भेदाभावात्, एकत्वाश्रयीभूतघटत्वस्य भेदाभावात्। 'घटो नीलघटः' इत्यत्र तु विशेष्यतावच्छेदकतात्वावच्छिन्न-

धर्मितावच्छेदकताकतद्धर्मावच्छिन्नप्रकारतावच्छेदकताकाऽभेदान्वयबोधस्य वारणाय तद्धर्मावच्छिन्नावच्छेदकता-

प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं घटत्वगतैकत्वम्, प्रकारतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं च नीलत्वघटत्वैतदुभयगतं द्वित्वमिति एकत्वद्वित्वयोश्च परस्परं भेदात् तद्धर्मभेदस्य सत्त्वादभेदान्वयबोध उपपद्यते इत्याशयेनाह– अन्यत्र दर्शितरीत्येति।

ननु यदि 'स घटः' इत्यादावभेदान्वयबोधोपपत्तये 'यत्र विशेष्यतावच्छेदकता प्रकारतावच्छेदकता च निवच्छिन्ना स्यात्तत्रैवाऽभेदान्वयबोधं प्रति तद्धर्मभेदस्य कारणत्वम्' इति स्वीक्रियते यथा 'द्रव्यं घटः' इत्यादौ, तदा 'स सः' इत्यत्र तत्पदयोर्जातिमति शक्तत्वाद् विशेष्यतावच्छेदिका प्रकारतावच्छेदिका च जातिरेव जातिनिष्ठा हि विशेष्यतावच्छेदकता प्रकारतावच्छेदकता च जातित्वावच्छिन्नास्ति न तु निरवच्छिन्नेत्यत्राभेदान्वयबोधं प्रति तद्धर्मभेदस्य=विशेष्यतावच्छेदकप्रकारतावच्छेदकधर्मयोः किं वा विशेष्यतावच्छेदकतावच्छेदकप्रकारतावच्छेदकतावच्छेदकधर्मयोर्भेदस्य हेतुत्वाभावाद् विशेष्यतावच्छेकीभूतायाः प्रकारतावच्छेदकीभूतायाश्च जातेः किं वा विशेष्यतावच्छेदकतावच्छेदकस्य प्रकारतावच्छेदकतावच्छेदकस्य जातित्वस्य भेदाभावेऽप्यऽभेदान्वयबोधः स्यादेवेत्याशङ्क्याह– स स इति। स स इति वाक्यान्निवार्यमाणशाब्दबोधस्य स्वरूपमाह– जातित्वादीति। 'स सः' इत्यस्य 'जातिमान् जातिमान्' इत्यर्थः, तत्र जातिमान् धर्मी धर्मितावच्छेदिका जातिः सा च जातित्वावच्छिन्नेति जातित्वावच्छिन्ना धर्मितावच्छेदकता यस्य स जातित्वाद्यवच्छिन्नधर्मितावच्छेदकताकः तथा तद्धर्मावच्छिन्ना=जातित्वधर्मावच्छिन्ना प्रकारतावच्छेदकता यस्य तस्य जातित्वाद्यवच्छिन्नधर्मितावच्छेदकताकतद्धर्मावच्छिन्नप्रकारतावच्छेदकताकस्याभेदान्वयबोधस्य 'स सः' इति वाक्यात्संभाव्यमानस्य वारणाय, तद्धर्मावच्छिन्नावच्छेदकताप्रकारतानिरूपितधर्मितावच्छेदकतावच्छेदकत्वप्रत्यासत्त्या शाब्दबोधं प्रत्यपि तद्धर्मभेदस्य कारणत्वं पृथक् कल्पनीयम्, तद्धर्मावच्छिन्नावच्छेदकतेति–तद्धर्मः=जातित्वं जातित्वावच्छिन्नावच्छेदकता जातौ तादृशावच्छेदकताका=तादृशावच्छेदकतानिरूपिता प्रकारता द्वितीयतत्पदबोध्ये घटे तादृशप्रकारतानिरूपितधर्मिता प्रथमतत्पदबोध्ये घटे धर्मितावच्छेदकत्वं घटत्वरूपजातौ धर्मितावच्छेदकता–

कप्रकारतानिरूपितधर्मितावच्छेदकतावच्छेदकत्वप्रत्यासत्त्या शाब्दबोधं प्रति तद्धर्मभेदस्यापि पृथक् कारणत्वं कल्पनीयम्।

वच्छेदकत्वं च जातित्वे, तथाच जातित्वे जातित्वनिष्ठं यत् तद्धर्मावच्छिन्नावच्छेदकताकप्रकारतानिरूपितधर्मितावच्छेदकतावच्छेदकत्वं तेन सम्बन्धेन शाब्दबोधे जननीये तद्धर्मभेदः=प्रकारतावच्छेदकतावच्छेदकभेदः कारणमस्ति तच्च 'स सः' इत्यत्र नास्ति, अत्र विशेष्यतावच्छेदकतावच्छेदकं तथा प्रकारतावच्छेदकतावच्छेदकं एकं जातित्वमेव तथा विशेष्यतावच्छेदिका प्रकारतावच्छेदिका चैका जातिरिति तद्धर्मभेदस्य कारणीभूतस्याभावादेव 'स सः' इत्यत्र नाऽभेदान्वयबोधापत्तिरित्यर्थः। अपि भिन्नक्रम इति प्रत्यासत्त्यापीत्यन्वयः।

अस्य कार्यकारणभावस्योदाहरणं तु 'जातिमान् प्रमेयवान्' इति, अत्र विशेष्यतावच्छेदिका जातिः प्रकारतावच्छेदकं प्रमेयम् प्रमेयवतः प्रकारत्वात् तयोः परस्परं भेदाभेदान्वयबोधो जायत एव, किं वा विशेष्यतावच्छेदकतावच्छेदकं जातित्वं प्रकारतावच्छेदकतावच्छेदकं च प्रमेयत्वं तयोः परस्परं भेदादभेदान्वयबोधो जायते इति। वस्तुतस्तु यत्र प्रकारतावच्छेदकताविशेष्यतावच्छेदकते उभे अपि निरवच्छिन्ने वा स्यातां सावच्छिन्ने वा स्यातां तत्राभेदान्वयबोधं प्रति तद्धर्मभेदस्य कारणत्वं तथा च 'द्रव्यं घटः' इत्यत्र विशेष्यतावच्छेदकप्रकारतावच्छेदकयोर्द्रव्यत्वघटत्वयोरुभयोरपि निरवच्छिन्नत्वात् तद्धर्मभेदस्य कारणत्वमस्ति, अस्ति च तद्धर्मभेदो द्रव्यत्वघटत्वयोरुभयोरपि निरवच्छिन्नत्वात् तद्धर्मभेदस्य कारणत्वमस्ति, अस्ति च तद्धर्मभेदो द्रव्यत्वघटत्वयोर्भिन्नत्वादित्यभेदान्वयबोधे न काप्यनुपपत्तिः, 'जातिमान् प्रमेयवान्' इत्यत्र च विशेष्यतावच्छेदकप्रकारतावच्छेदकयोरुभयोरपि जातिप्रमेयोर्जातित्वप्रमेयत्वाभ्यां सावच्छिन्नत्वाद् अभेदान्वयबोधं प्रति तद्धर्मभेदस्य कारणत्वमस्ति, अस्ति चोक्तरीत्या तद्धर्मभेद इति नाऽभेदान्वयबोधानुपपत्तिः। 'स सः' इत्यत्र च विशेष्यतावच्छेदकता प्रकारतावच्छेदकते जातिनिष्ठे उभेऽपि जातित्वेन सावच्छिन्ने सतः चात्र विशेष्यतावच्छेदकप्रकारतावच्छेदकयोर्भेदोऽस्ति जातेरेवैकाया विशेष्यतावच्छेदकत्वात् प्रकारतावच्छेदकत्वाच्चेति कारणीभूतस्य तद्धर्मभेदस्याभावान्नाभेदान्वयबोधापत्तिः।

एवम्– 'दण्डवान् दण्डवान्' इत्यादिवाक्याद् दण्ड-संयोगत्वाद्यवच्छिन्नवति तदवच्छिन्नवदभेदान्वयबोधस्य वारणाय दण्डसंयोगत्वाद्यवच्छिन्नावच्छेदकताकप्रकारता-निरूपितविशेष्यतानिरूपितसंयोगत्वाद्यवच्छिन्नावच्छेदकतानि-रूपितावच्छेदकतावच्छेदकत्वसंबन्धेन शाब्दबोधे दण्डत्वादि-

'स घटः' इत्यत्र चोक्तरीत्या केवलं विशेष्यतावच्छेदकतैव सावच्छिन्नास्ति 'घटः सः' इत्यत्र चोक्तरीत्या केवलं प्रकारतावच्छेदकतैव सावच्छिन्नास्ति, न तु विशेष्यतावच्छेदकताप्रकारतावच्छेदकते उभे सावच्छिन्ने स्तः इति 'स घटः' 'घटः सः' इत्यादौ तद्धर्मभेदाभावेप्यऽभेदान्वयबोधे न काचिद-नुपपत्तिः। 'घटो घटः' इत्यत्र विशेष्यतावच्छेदकताप्रकारतावच्छेदकते घटत्वनिष्ठे उभे अपि निरवच्छिन्ने स्तः अतोऽत्राभेदान्वयबोधं प्रति तद्धर्मभेदस्य कारणत्वमस्ति नास्ति चात्र तद्धर्मभेदो घटत्वस्यैकत्वादिति नात्राभेदान्वय-बोधापत्तिरित्यवधेयम्।

यथा 'स सः' इत्यत्राभेदान्वयबोधो नेष्टस्तथा 'दण्डवान् दण्डवान्' इत्यत्राप्यऽभेदान्वयबोधो नेष्ट इति तद्वारणोपायमाह– एवमिति। पूर्वोक्तापेक्षयात्रैकावच्छेदकताया अधिकायाः प्रवेशाद् बुद्धिवैशद्यार्थं च पृथक् प्रतिपादनम्। 'दण्डवान् दण्डवान्' इत्यस्य मतुपः सम्बन्धिनि शक्तेः 'दण्डसंयोगवान् दण्डसंयोगवान्' इत्यर्थः तत्र प्रथमे 'दण्डसंयोगवान्' तथा दण्डवान् इति पदे 'दण्डसंयोगवान्' पुरुषो विशेष्यस्तत्र दण्डसंयोगः प्रकारः (विशेषणम्) दण्डसंयोगे दण्डः प्रकारो दण्डे दण्डत्वं प्रकारः। द्वितीये 'दण्डसंयोगवान्' तथा 'दण्डवान्' इति पदे दण्डसंयोगवान् पुरुषः प्रकारस्तत्र दण्डसंयोगः प्रकारस्तत्र दण्डः प्रकारस्तत्र दण्डत्वं प्रकारः तथा च दण्डत्वावच्छिन्ना या दण्डनिष्ठाऽवच्छेदकता (प्रकारतावच्छेदकता) तन्निरूपिता या संयोगत्वावच्छिन्ना संयोगनिष्ठाऽवच्छेद्यता तन्निरूपिता याऽभेदसम्बन्धावच्छिन्ना पुरुषनिष्ठा प्रकारता तन्निरूपिता या पुरुषनिष्ठा विशेष्यता तन्निरूपिता या संयोगनिष्ठावच्छेदकता विशेष्यतावच्छेदकता तन्निरूपिता या दण्डनिष्ठावच्छेदकता तन्निरूपिता या दण्डत्वनिष्ठा-ऽवच्छेदकता तादृशावच्छेदतासम्बन्धेन दण्डत्वे शाब्दबोधे जननीये तद्धर्मस्य= प्रकारतावच्छेदकतावच्छेदकस्य प्रकारता पुरुषे पुरुषनिष्ठप्रकारतावच्छेदकता

भेदस्यापि पृथक् कारणत्वं कल्पनीयम्। अवच्छेदकतायां निरवच्छिन्नत्वनिवेशोऽपि पूर्ववद् बोध्यः।

दण्डसंयोगे तदवच्छेदकता दण्डे तदवच्छेदकं दण्डत्वमिति दण्डत्वादेर्धर्मस्य भेदः पृथक्=पूर्वापेक्षया पृथक् कारणमस्ति तच्चात्र नास्त्येवविशेष्यतावच्छेदकतावच्छेदकमपि दण्डत्वमेव तथा प्रकारतावच्छेदकतावच्छेदकमपि दण्डत्वमेव दण्डत्वस्यैक्येन परस्परं भेदाभावात् 'दण्डवान् दण्डवान्' इत्यत्र दण्डसंयोगत्वाद्यवच्छिन्नवति=दण्डसंयोगत्वावच्छिन्नो दण्डसंयोगस्तद्वति पुरुषे तदवच्छिन्नवत्=दण्डसंयोगत्वावच्छिन्नो यो दण्डसंयोगस्तद्वतः पुरुषस्याऽभेदान्वयबोधस्यापत्तिर्नास्ति तद्धर्मभेदरूपकारणाभावादित्यर्थः। दण्डसंयोगत्वाद्यवच्छिन्नावच्छेदकताकेति— दण्डसंयोगत्वावच्छिन्नो दण्डसंयोगस्तन्निष्ठा याऽवच्छेदकता तादृशावच्छेकताका=दण्डसंयोगनिष्ठावच्छेदकतानिरूपिता या प्रकारता पुरुषनिष्ठा प्रकारता तादृशप्रकारतानिरूपिता विशेष्यता पुरुषनिष्ठा विशेष्यता तादृशविशेष्यतानिरूपिता या संयोगत्वाद्यवच्छिन्नावच्छेदकता= दण्डसंयोगनिष्ठाऽवच्छेदकता तादृशावच्छेदकतानिरूपिता याऽवच्छेदकता दण्डनिष्ठाऽवच्छेदकता तदवच्छेदकत्वं दण्डत्वे तेन सम्बन्धेनेत्यन्वयः।

'जातिमद्वान् दण्डवान्', 'दण्डवान् जातिमद्वान्' इत्यादावभेदान्वयबोधस्येष्टत्वादाह— अवच्छेदकतायामिति। अवच्छेदकतायाम्=विशेष्यतावच्छेदकतावच्छेदकतायां तथा प्रकारतावच्छेदकतावच्छेदकतायां निरवच्छिन्नत्वनिवेशः कर्तव्यस्तथा च 'दण्डवान् दण्डवान्' इत्यत्र दण्डत्वे या विशेष्यतावच्छेदकतावच्छेदकतावच्छेदकतास्ति तथा या प्रकारतावच्छेदकतावच्छेदकतास्ति सा निरवच्छिन्नास्ति दण्डत्वस्य स्वरूपेणैव भासमानत्वादिति तत्र विशेष्यतावच्छेदकतावच्छेदकतावच्छेदकप्रकारतावच्छेदकतावच्छेदकतावच्छेदकधर्मयोर्भेदस्याभेदान्वयबोधं प्रति कारणत्वमस्ति न चास्ति तादृशधर्मयोर्भेदो विशेष्यतावच्छेदकतावच्छेदकतावच्छेदकस्य प्रकारतावच्छेदकतावच्छेदकतावच्छेदकस्य दण्डत्वस्याऽभिन्नत्वादिति न तत्राभेदान्वयबोधापत्तिः। 'जातिमद्वान् दण्डवान्' इत्यत्र जातिमद्वान्=दण्डसंयोगवान् पुरुषो विशेष्यस्तत्र दण्डसंयोगस्तत्र दण्डस्तत्र जातिः प्रकारः जातिश्च जातित्वेन रूपेण भासते इति जातित्वावच्छिन्नास्ति तथा चात्र जातिनिष्ठा विशेष्यतावच्छेदकतावच्छेदकतावच्छेदकता सावच्छिन्नास्ति नात्र तद्धर्मभेदस्य कारणत्वमिति जातेर्दण्डत्व-

वस्तुतस्तु तद्धर्मान्यवृत्तिविषयतासंबन्धेन ज्ञानं प्रति तद्धर्मभेदत्वेन हेतुता लाघवात्।

रूपत्वेन प्रकारतावच्छेदकतावच्छेदकतावच्छेदकस्य दण्डत्वस्य विशेष्यता-वच्छेदकतावच्छेदकतावच्छेदिकाया जातेश्च परस्परं भेदाभावेऽपि नाभेदान्वयबोधानुपपत्तिः, तथा दण्डवान् जातिमद्वान् इत्यत्र च जाति निष्ठाप्रकारतावच्छेदकतावच्छेदकतावच्छेदकता जातित्वावच्छिन्नास्तीति विशेष्यतावच्छेदकतावच्छेदकतावच्छेदकस्य दण्डत्वस्य प्रकारतावच्छेद-कतावच्छेदकतावच्छेदिकाया जातेश्च परस्परं भेदाभावेऽपि नाऽभेदान्वय-बोधानुपपत्तिरित्यर्थः। जातिमद्वानित्यत्र जातिः दण्डत्वं तद्वान् दण्डस्तद्वान् पुरुषः, मतुपश्च सम्बन्धिनि शक्तेर्दण्डवत्पुरुषे दण्डसंयोगः प्रकारस्तत्र दण्डस्तत्र दण्डे दण्डत्वरूपा जातिर्जातौ च जातित्वं प्रकार इति।

पृथक् पृथक् कार्यकारणभावानुक्त्वा संप्रति सर्वानुगतं कार्यकारण-भावमाह– वस्तुतस्त्विति। व्याप्यधर्मावच्छिन्ने कार्ये जननीये व्यापक-धर्मावच्छिन्नकार्यस्य सामग्री अपेक्षिता भवतीत्याशयेन यत्र यत्र शाब्दबोधस्तत्र तत्र ज्ञानं भवत्येवेति ज्ञानस्य शाब्दबोधव्यापकत्वात् ज्ञानस्यैव कार्यकारणभाव-माह– तद्धर्मेति, तद्धर्मपदेन विशेषणकोटिप्रविष्टपदार्थगतधर्मो ग्राह्यो यथा– प्रकारतावच्छेदकः प्रकारतावच्छेदकतावच्छेदकः प्रकारतावच्छेदकतावच्छेदक-तावच्छेदक इत्यादि, तदन्यपदेन विशेष्यकोटिप्रविष्टपदार्थगतधर्मो ग्राह्यो यथा– विशेष्यतावच्छेदको विशेष्यतावच्छेदकतावच्छेदको विशेष्यतावच्छेदक-तावच्छेदकतावच्छेदक इत्यादि। वस्तुतस्तु यस्मिन् धर्मे द्रव्यत्वादौ तद्गतविषयताविशेषसम्बन्धेन शाब्दबोध उत्पादनीयस्तदन्यधर्मो घटत्वादि-स्तद्धर्मपदेन ग्राह्यः तदन्यश्च शाब्दबोधाधिकरणं द्रव्यत्वादिकमन्यपदेन ग्राह्यम्, एवं च प्रकारताख्यविषयतासम्बन्धेन 'द्रव्यं घटः' इत्यत्र घटत्वे शाब्दबोधे जननीये तद्धर्मपदेन घटत्वान्यद् द्रव्यत्वं ग्राह्यमऽन्यपदेन द्रव्यत्वान्यद् घटत्वं ग्राह्यम्। विषयतापदेन च शाब्दबोधाधिकरणीभूतपदार्थे यादृशी विषयता स्यात् सा ग्राह्या यथा– विशेष्यतारूपा विशेष्यतावच्छेदकतारूपा विशेष्यता-वच्छेदकतावच्छेदकतारूपा इत्यादि तथा प्रकारतारूपा प्रकारतावच्छेदकतारूपा प्रकारतावच्छेदकतावच्छेदकतारूपा इत्यादि। तथा च 'द्रव्यं घटः' इत्यत्र घटत्वान्यद् यद् द्रव्यत्वं तस्मिन् तन्निष्ठविशेष्यतावच्छेदकताख्यविषय-

एवञ्च घटत्वाद्यवच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबन्धेन शाब्दबोधं प्रति घटत्वाद्यन्यवृत्तिविषयतासंबन्धेन ज्ञानत्वाद्यवच्छिन्नस्य व्यापकतया घटत्वादौ तादृशविषयतासंबन्धेन ज्ञानत्वावच्छिन्नोत्पादकसामग्रीविरहेण न तत्र तादृशविशेष्यतावच्छेदकतासंबन्धेन शाब्दबोधापत्तिः।

तासम्बन्धेन शाब्दबोधे जननीये तद्धर्मभेदस्य घटत्वभेदस्य हेतुत्वं प्राप्तमस्ति चात्र घटत्वद्रव्यत्वयोर्भेद इत्यभेदान्वयबोधे न काप्यनुपपत्तिः। तथा प्रकारतावच्छेदकताख्यविषयतासम्बन्धेन घटत्वेऽप्यभेदान्वयबोधेऽनुपपत्तिर्नास्ति–द्रव्यत्वघटत्वयोर्भेदात्। 'घटो नीलघटः' इत्यत्रापि घटत्वनीलघटत्वयोः भेदस्वीकारे त्वभेदान्वयबोधोऽनेन नियमेनापि संभवति, भेदास्वीकारे पूर्वं शाब्दबोधप्रकार उपपादित एव। 'घटो घटः' इत्यत्र घटत्वेऽभेदान्वयबोधस्तु न संभवति तद्धर्मभेदाभावात्–घटत्वस्येव प्रकारतावच्छेदकत्वाद् विशेष्यतावच्छेदकत्वाच्चेति सर्वं सुस्थम्।

स्वयमपि 'घटो घटः' इत्यत्रोक्तनियमेनाभेदान्वयबोधापत्त्यभावमाह–एवं चेति। एवं च="तद्धर्मान्यवृत्तिविषयतासम्बन्धेन" इति नियमे कृते। 'घटो घटः' इत्यत्र घटस्यैव प्रकारत्वाद् विशेष्यत्वाच्च घटत्वावच्छिन्ना या घटनिष्ठा प्रकारता तन्निरूपिता या घटनिष्ठा विशेष्यता तदवच्छेदकत्वं घटत्वे इति घटत्वनिष्ठविशेष्यतावच्छेदकतासम्बन्धेन शाब्दबोधे जननीये शाब्दबोधव्यापकस्य ज्ञानत्वावच्छिन्नज्ञानस्य सामग्री अपेक्षिता भवति सा च सामग्री तद्धर्मभेद एव, 'घटो घटः' इत्यत्र च तद्धर्मभेदरूपा सामग्री नास्तीति नाऽभेदान्वयबोधापत्तिरित्यर्थः। यत्र घटत्वे विशेष्यतावच्छेदकतासम्बन्धेन शाब्दबोध आपादनीयस्तत्र घटत्वे घटत्वान्यत्वमेव नास्ति येन तद्धर्मान्यवृत्तिविषयतायाः सम्बन्धत्वं तादृशसम्बन्धेन शाब्दबोधश्च स्यादिति भावः। तादृशविषयतासम्बन्धेन=घटत्वान्यवृत्तिविषयतासम्बन्धेन। ज्ञानत्वावच्छिन्नोत्पादकसामग्री=तद्धर्मभेदः, ज्ञानाधिकरणीभूतपदार्थे तदन्यत्वं चेति। तत्र='घटो घटः' इत्यत्र। तादृशविशेष्यतावच्छेदकतासम्बन्धेन=घटत्वनिष्ठविशेष्यतावच्छेदकतासम्बन्धेन।

'तद्धर्मान्यवृत्तिविषयतासम्बन्धेन शाब्दबोधं प्रति तद्धर्मभेदस्य कारणत्वम्'

एवञ्च 'घटवान् घटवान्' इत्यादिशाब्दबोधवारणानुरोधेन धर्मितावच्छेदकतावच्छेदकादिनिष्ठप्रत्यासत्त्या कारणत्वान्तरमपि न कल्प्यते।

एवमुद्देश्यतावच्छेदकविधेययोरैक्येन 'एकः 'द्वौ' इत्यादि-वाक्यादेकत्वद्वित्वाद्यवच्छिन्ने एकत्वद्वित्वादीनां भेदान्वय-बोधानुदयाद् एकत्वत्वद्वित्वत्वाद्यवच्छिन्नसमवायादिसंसर्गा-

---

इत्युक्ते 'घटो घटः' इत्यत्र तद्धर्मान्यवृत्तिविषयतासम्बन्धेन शाब्दबोधस्येष्टत्वाभावात् तद्धर्मभेदाभावेऽपि पुनरप्यभेदान्वयबोधापत्तिः स्यादेवेति शाब्दबोधव्यापकीभूतज्ञानं प्रति तद्धर्मभेदस्य हेतुत्वमुक्तं तथा च व्याप्यकार्यं प्रति व्यापककार्यसामग्र्या अपेक्षानियमात् 'घटो घटः' इत्यत्राभेदान्वयबोधे जननीये तद्धर्मान्यवृत्तिविषयतासम्बन्धेन व्यापकीभूतज्ञानस्य सामग्र्या अपेक्षा प्राप्ता सा च सामग्र्यत्र नास्त्येवेति नाऽभेदान्वयबोधापत्तिः। तद्धर्मान्यवृत्ति-विषयतासम्बन्धेन ज्ञानसामग्री च न केवलं तद्धर्मभेद एव किन्तु सम्बन्ध-भूतविषयतायास्तद्धर्मान्यवृत्तित्वमपीति ज्ञेयम्। अयं भावः— तद्धर्मान्य-वृत्तिविषयतासम्बन्धेन ज्ञानं प्रति केवलतद्धर्मभेदस्य सामग्रीत्वस्वीकारे यत्र तद्धर्मान्यवृत्तिविषयतासम्बन्धेन ज्ञानमापादनीयं भविष्यति तत्रैव तद्धर्मभेदस्य हेतुत्वं भविष्यति यथा— 'द्रव्यं घटः' इत्यादौ 'घटो घटः' इत्यत्र तु तद्धर्मान्यवृत्तिविषयतासम्बन्धेन ज्ञानमापादनीयमेव नास्ति येनाऽभेदान्वयबोधा-नुपपत्तिः स्यात् किन्तु तद्धर्मवृत्तिविषयतासम्बन्धेनैव ज्ञानमापादनीयमस्तीति 'घटो घटः' इत्यत्राऽभेदान्वयबोधं प्रति तद्धर्मभेदस्यापेक्षाभावात् तद्धर्म-भेदाभावेऽप्यभेदान्वयबोधः स्यादेवेति तदापत्तिपरिहाराय ज्ञानसम्बन्धभूताया विषयतायास्तद्धर्मान्यवृत्तित्वमपि सामग्रीकुक्षौ निवेशनीयं तथाच 'घटो घटः' इत्यत्र घटत्वे एव ज्ञानमापादनीयं घटत्वनिष्ठायाश्च विशेष्यतावच्छेदकता-ख्यविषयताया ज्ञानसम्बन्धभूतायास्तद्धर्मान्यवृत्तित्वं हेतुभूतं नास्त्येव— प्रकारतावच्छेदकघटत्ववृत्तित्वेन तदन्यवृत्तित्वाभावादिति नात्र ज्ञानस्य तद्व्याप्याभेदान्वयबोधस्य चापत्तिः।

उक्तनियमेन लाघवान्तरमाह—एवं चेति। एवं च=तद्धर्मान्यवृत्ति-विषयतासम्बन्धेन ज्ञानं प्रति तद्धर्मभेदत्वेन हेतुत्वाङ्गीकारे च 'घटवान्

वच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितसमवायादि-संसर्गावच्छिन्नावच्छेदकतावच्छेदकत्वादिसंबन्धेन शाब्दबुद्धौ एकत्वत्वद्वित्वत्वादिभेदस्य, एवम् 'कर्म गच्छति' इत्यादौ च कर्मत्वत्वाद्यवच्छिन्ने आधेयतासंबन्धेन तद्वतोऽन्वयबोधवारणाय

घटवान्' इत्यत्राभेदान्वयबोधवारणायाभेदान्वयबोधं प्रति तद्धर्मभेदस्य पृथग् हेतुत्वकल्पनापेक्षा नास्ति,–अत्र हि घटवानेव विशेष्यः प्रकारश्च, तत्र घटवान् धर्मी धर्मितावच्छेदको घटः धर्मितावच्छेदकतावच्छेदकं घटत्वमिति धर्मितावच्छेदकतावच्छेदकं यद् घटत्वं तन्निष्ठा या धर्मितावच्छेदकता-वच्छेदकतारूपा प्रत्यासत्तिः=सम्बन्धस्तेन घटत्वे शाब्दबोधे जननीये तद्धर्मभेदस्य हेतुत्वमस्ति नास्ति चात्र तद्धर्मभेद एकस्य घटत्वस्यैव विशेष्यता (धर्मिता) वच्छेदकतावच्छेदकत्वात् प्रकारतावच्छेदकतावच्छेदकत्वाच्चेत्यर्थः। एवम् 'दण्डवान् दण्डवान्' इत्यत्रापि दण्डत्वे विशेष्यतावच्छेदकतावच्छेदकता-वच्छेदकत्वप्रत्यासत्त्या शाब्दबोधे जननीये तद्धर्मभेदस्य हेतुत्वमस्ति नास्ति चात्र तद्धर्मभेदः– एकस्य दण्डत्वस्यैव विशेष्यतावच्छेदकतावच्छेदकता-वच्छेदकत्वात् प्रकारतावच्छेदकतावच्छेदकतावच्छेदकत्वाच्चेत्यर्थः।

एवमिति– 'एकः' इत्यत्रैकपदवाच्या एकत्वेन घटादिव्यक्तिरेव एकपदोत्तरवर्तमानविभक्तेरप्येकत्वमर्थ इति विभक्तेः सार्थकत्वे 'एकः' इत्यस्य 'एकत्ववान् एकत्ववान्' इत्यर्थः स्यात् (प्रथम एकत्ववानिति प्रकृतेरर्थो द्वितीय एकत्ववान् इति विभक्तेरर्थः) तत्रैकत्ववर्ती घटव्यक्ति-मुद्दिश्यैकत्वविधानाद् उद्देश्या एकव्यक्तिरुद्देश्यतावच्छेदकमेकत्वं विधेय-मप्येकत्वमेव स्यात् तथा चात्रोद्देश्यतावच्छेदकस्य विधेयस्य चैक्यं प्राप्तं उद्देश्यभूतव्यक्तावेकत्वादिसंख्याया अन्वयश्च समवायसम्बन्धेन भवति समवायश्च भेदसम्बन्ध एव, एवं च 'एकः' इति वाक्यात् प्रकृति-भूतैकपदवाच्ये एकत्वावच्छिन्ने एकव्यक्तिभूतघटादौ एकपदोत्तरप्रथमार्थै-कत्वरूपसंख्याया भेदान्वयः स्यादित्यत्रोद्देश्यतावच्छेदकविधेययोरैक्येन एकत्वावच्छिन्ने एकत्वस्य यो भेदान्वयबोधः प्राप्तस्तस्यानुदयात्=तादृश-भेदान्वयबोधोत्पत्तेरनिष्टत्वात् तद्वारणायेदानीं एकत्वत्वनिष्ठेन एकत्वत्वा-वच्छिन्नसमवायसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितसमवाय-सम्बन्धावच्छिन्नावच्छेदकतावच्छेदकत्वलक्षणसम्बन्धेन शाब्दबोधं प्रति

कर्मत्वत्वाद्यवच्छिन्नावच्छेदकताकाऽऽधेयतासंबन्धावच्छिन्न-प्रकारतानिरूपितधर्मितावच्छेदकतासंबन्धेन शाब्दबोधे कर्मत्व-त्वादिभेदस्य, 'घटो न घटः' इत्याद्यनुमितेः शाब्दबोधस्य च

एकत्वत्वभेदस्य पृथग् हेतुत्वकल्पनापेक्षा नास्ति– उक्तनियमेनैवोक्तशाब्दबोधा-वारणसंभवात्, एकत्वत्वस्य परस्परभेदाभावात्। वस्तुतस्तु शाब्दबोधसम्बन्धस्यैव एकत्वत्वान्यवृत्तित्वं नास्ति–एकत्ववृत्तित्वादेवेति नात्र एकत्वावच्छिन्नव्यक्तौ प्रथमार्थैकत्वस्य समवायेनान्वयबोधापत्तिः, भवति च 'एकः' इति प्रयोग इति संख्यावाचकैकादिपदोत्तरवर्तमानविभक्तेर्निरर्थकत्वमेव (इदं चाग्रे संख्यान्वयविचारस्थले द्रष्टव्यम्) तथा च प्रकृतिभूतैकपदेनैवैकत्वेन रूपेण घटादिव्यक्तेरुपस्थितिर्भवतीति विज्ञेयम्। एवम् 'द्वौ' इत्यत्रापि उद्देश्यतावच्छेदकं द्वित्वं विधेयमपि द्वित्वं विभक्त्यर्थः 'द्वित्ववान् द्वित्ववान्' इत्यर्थस्तत्रोद्देश्यता-वच्छेदकविधेययोरैक्येन द्वित्वावच्छिन्ने व्यक्तिद्वये द्विवचनार्थद्वित्वसंख्याया यो भेदान्वयबोधः प्राप्तस्तस्यानुदयात्=तादृशभेदान्वयबोधोत्पत्तेरनिष्टत्वात् तद्वारणाय द्वित्वत्वनिष्ठेन द्वित्वत्वावच्छिन्नसमवायसम्बन्धावच्छिन्नप्रकारता-निरूपितविशेष्यतानिरूपितसमवायसम्बन्धावच्छिन्नावच्छेदकतावच्छेदकत्व-लक्षणसम्बन्धेन शाब्दबोधं प्रति द्वित्वत्वभेदस्य पृथग् हेतुत्वकल्पनापेक्षा नास्ति– उक्तनियमेनैवोक्तशाब्दबोधवारणसंभवात्, द्वित्वत्वस्य परस्परं भेदाभावादेकत्वादिति नात्र द्वित्वावच्छिन्नव्यक्तौ द्विवचनार्थद्वित्वस्य समवाये-नान्वयबोधापत्तिः, भवति च 'द्वौ' इति प्रयोग इति द्विवचनं निरर्थकमेव तथा च प्रकृतिभूतद्विपदेनैव द्वित्वेन रूपेण द्वित्वविशिष्टरूपेण वा घटादिव्यक्ते-रुपस्थितिर्भवति। एकत्वत्वेति– एकत्वत्वावच्छिन्ना तथा समवायसम्बन्धा-वच्छिन्ना या विभक्त्यर्थैकत्वनिष्ठा प्रकारता तादृशप्रकारतानिरूपिता या एकपदवाच्यव्यक्तिनिष्ठा विशेष्यता तादृशविशेष्यतानिरूपिता तथा समवाय-सम्बन्धावच्छिन्ना या एकत्वनिष्ठा अवच्छेदकता (उक्तविशेष्यतावच्छेदकता) तदवच्छेदकत्वं एकत्वत्वे इत्येकत्वत्वनिष्ठं यद्विशेष्यतावच्छेदकतावच्छेदकत्वं तेन सम्बन्धेनेत्यन्वयः। एवम् 'द्वौ' इत्यत्र एकपदस्थाने द्विपदं निवेश्यान्वयो विज्ञेयः। "एकत्वत्वद्वित्वत्वादिभेदस्य" इत्यस्य "हेतुत्वान्तरकल्पनमनादेयमेव" इत्यग्रिमवाक्येन सहान्वयः।

'ग्रामं गच्छति' इत्यत्र शाब्दबोध इष्टस्तत्र ग्राम आधेयतासम्बन्धेन

वारणाय घटत्वावच्छिन्नभेदप्रकारतानिरूपितधर्मितावच्छेदकता-संबन्धेनानुमितौ शाब्दबोधे च घटत्वादिभेदस्य हेतुत्वान्तर-कल्पनमनादेयमेव–तद्धर्मभेदस्यैककारणतयैव सकलाति-

---

द्वितीयार्थकर्मतायां प्रकारः, प्रकारतावच्छेदकं ग्रामत्वम्, कर्मता विशेष्यः विशेष्यतावच्छेदकं कर्मतात्वम्। ग्रामस्य कर्मपदार्थत्वेन कर्मपदवाच्यत्वेऽपि 'कर्म गच्छति' इति प्रयोगस्तु नेष्ट इत्याशयेनाह–एवमिति, 'कर्म गच्छति' इत्यत्र प्रकृतिभूतकर्मपदस्य कर्मत्वावच्छिन्ने शक्तिः कर्मपदोत्तरलुप्तद्वितीयायाः कर्मत्वावच्छिन्ने कर्मत्वे शक्तिस्तथा च प्रत्ययार्थस्य प्राधान्यात् कर्मत्वावच्छिन्ने द्वितीयार्थकर्मत्वे आधेयतासम्बन्धेन कर्मत्वे आधेयत्वमस्ति। तद्वतः=कर्मत्ववतः=कर्मत्वावच्छिन्नकर्मपदवाच्यकर्मपदार्थस्य भेदान्वयबोधवारणाय कर्मत्वत्वावच्छिन्नावछेदकताकाधेयतासम्बन्धावच्छिन्नप्रकारतानिरूपित-धर्मितावच्छेदकतालक्षणसम्बन्धेन कर्मत्वत्वनिष्ठेन शाब्दबोधं प्रति कर्मत्वत्व-भेदस्य पृथग् हेतुत्वकल्पनापेक्षा नास्ति– उक्तनियमेनैवोक्तशाब्दबोध-वारणसंभवात् शाब्दबोधाश्रयत्वेनाभिमतधर्मितावच्छेदकस्य प्रकारतावच्छेदकता-वच्छेदकस्य कर्मत्वत्वस्य प्रकारतावच्छेदकतावच्छेदकस्य च कर्मत्वस्यैक्येन भेदाभावात्। यथा एकः इत्यत्रोद्देश्यतावच्छेदकस्य विधेयस्य चैकत्वस्यैक्या-न्नोक्तशाब्दबोध इष्टस्तथात्र विशेष्यतावच्छेदकस्य प्रकारतावच्छेदकता-वच्छेदकस्य कर्मत्वत्वस्यैक्येन भेदाभावादुक्तशाब्दबोधापत्तिवारणं कृतम्। कर्मत्वत्वेति–कर्मत्वत्वावच्छिन्ना या कर्मत्वनिष्ठाऽवच्छेदकता तादृशावच्छेदकेनावच्छिन्ना याऽऽधेयत्वसम्बन्धावच्छिन्ना कर्मनिष्ठा प्रकारता तादृशप्रकारतानिरूपिता या कर्मतानिष्ठाधर्मिता तादृशधर्मितानिरूपिता या कर्मतात्वनिष्ठा अवच्छेदकता तादृशावच्छेदकतासम्बन्धेन कर्मतात्वे शाब्दबोधे जननीये इत्यन्वयः। "कर्मत्वत्वादिभेदस्य" इत्यस्यापि "हेतुत्वान्तर-कल्पनमनादेयम्" इत्यग्रिमवाक्येन सहान्वयः।

'घटो न घटः' इत्यत्र धर्मी घटस्तत्र प्रकारो घटभेदः प्रकारतावच्छेदको घटः प्रकारतावच्छेदकतावच्छेदकं घटत्वं धर्मितावच्छेकमपि घटत्वमेव। घटे समवायेन घटत्वं प्रकारः घटभेदे घटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन घटः प्रकारः स च भेदः स्वरूपसम्बन्धेन घटे विशेष्ये प्रकार इति पदार्थनिर्देशः। घटे च घटभेदो न भवतीत्यत्र शाब्दबोधस्यानुमितेश्च घटे

प्रसङ्गवारणसंभवादिति कृतं पल्लवितेन।। इत्यभेद-व्युत्पत्तिवादः।।

घटभेदानुमितेः वारणाय घटत्वनिष्ठेन घटत्वावच्छिन्नभेदनिष्ठप्रकारता-निरूपितधर्मितावच्छेदकतालक्षणसम्बन्धेन शाब्दबोधं प्रति घटत्वभेदस्य पृथग् हेतुत्वकल्पनापेक्षा नास्ति–उक्तनियमेनैव वारणसंभवाद् धर्मितावच्छेदकं प्रकारतावच्छेदकतावच्छेदकं चैकं घटत्वमेव घटत्वे च घटत्वभेदाभावात् तद्धर्मान्यवृत्तिविषयतासम्बन्धेन ज्ञानसामान्यं प्रति तद्धर्मभेदस्य हेतुत्वादनुमितेरपि वारणं जातमित्यर्थः। घटत्वावच्छिन्नेति– घटत्वावच्छिन्नभेदः=घटत्वावच्छिन्न-प्रतियोगिताकभेदस्तन्निष्ठा या प्रकारता तादृशप्रकारतानिरूपिता या घटनिष्ठा धर्मिता तादृशधर्मितावच्छेदकं घटत्वं घटत्वनिष्ठा यैषा धर्मितावच्छेदकता तादृशसम्बन्धेनेत्यन्वयः। हेतुत्वान्तरकल्पनमनादेयम्=पृथक् हेतुत्वकल्पनापेक्षा नास्ति। अत्र हेतुमाह– तद्धर्मभेदस्येति, तद्धर्मभेदनिष्ठया एककारणतयैव= "तद्धर्मान्यवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति तद्धर्मभेदस्य हेतुत्वात्" इत्युक्ते-नैकेनैव कार्यकारणभावेन सकलातिप्रसङ्गानाम्='घटो घटः' 'दण्डवान् दण्डवान्' इत्यादौ शाब्दबोधापत्तीनां वारणसंभवादित्यर्थः।

।। इत्यऽभेदान्वयव्युत्पत्तिवादादर्शः समाप्तः ।।

भेदान्वयबोधः

भेदान्वयबोधश्च प्रातिपदिकार्थधात्वर्थयोः प्रत्ययार्थेन क्वचिन्निपातार्थेन च सममेव जायते न त्वन्येन। सत्यपि पदार्थोपस्थितियोग्यताज्ञानादिरूपकारणकलापे 'राजा पुरुषः' 'भूतलं घटः' इत्यादौ पुरुषघटाद्यंशे राजभूतलादेः स्वत्वाधेयता-

---

अभेदान्वयबोधप्रकारं निरूप्य संप्रति भेदान्वयबोधप्रकारं वक्तुमुपक्रमते– भेदान्वयेत्यादिना। भेदसंसर्गावच्छिन्ननामार्थनिष्ठप्रकारतानिरूपितविशेष्यता-सम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विभक्तिनिपातान्यतरजन्योपस्थितिः कारणं तथा च 'राज्ञः पुरुषः' इत्यत्र राजपुरुषयोर्भेदलक्षणः स्वस्वामिभावः सम्बन्धः किं वा राज्ञः पुरुषे भेदलक्षणः स्वत्वसम्बन्ध इति भेदसम्बन्धा-वच्छिन्नराजत्वावच्छिन्नप्रकारतानिरूपितपुरुषत्वावच्छिन्नविशेष्यताकशाब्दबोधं प्रति ङ्सविभक्तिजन्यतदर्थोपस्थितिः कारणमस्ति अत एव 'राजा पुरुषः' इत्यत्र ङसभावेन तदर्थोपस्थित्यभावान्न तादृशो भेदसंसर्गकः शाब्दबोधः। एवम् 'घटो न पटः' इत्यत्र घटपटयोः प्रतियोग्यनुयोगिभावलक्षणो भेदसम्बन्धोऽस्ति, किं वा घटे पटस्य स्वप्रतियोगिकभेदविशिष्टत्वं सम्बन्धोऽस्ति पटप्रतियोगिकभेदवान् घट इति चार्थस्तथा चात्र भेदसम्बन्धावच्छिन्न-पटत्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्न-विशेष्यताकशाब्दबोधं प्रति नञ्पदजन्यतदर्थोपस्थितिः कारणमस्तीति कार्यकारणभावमभिप्रेत्याह– प्रातिपदिकेत्यादिना।

प्रातिपदिकार्थस्य प्रत्ययार्थेन क्वचिन्निपातार्थेनैव च सह भेदान्वयो जायते यथा– तण्डुलं पचति, इत्यत्र प्रातिपदिकार्थतण्डुलस्याम् प्रत्ययार्थकर्मत्वे आधेयतालक्षणेन भेदसम्बन्धेनान्वय 'आधेयतासम्बन्धेन तण्डुलवती कर्मता' इति बोधात्। 'चन्द्र इव मुखम्' इत्यत्र च निरूपितत्वलक्षणेन भेदसम्बन्धेन

संबन्धेन, 'तण्डुलः पचति' 'चैत्रः पच्यते' इत्यादौ कर्मत्व-कर्तृत्वादिसंबन्धेन तण्डुलचैत्रादौ पाकादेः, स्वकर्मकत्व-स्वकर्तृकत्वादिसंबन्धेन पाकाद्यंशे वा तण्डुलचैत्रादेरन्व-

प्रातिपदिकार्थस्य चन्द्रस्य इव निपातार्थसादृश्येन सहान्वयः, सादृश्यस्य चाधारणतासम्बन्धेन मुखेन सहान्वयः—चन्द्रनिरूपितसादृशयवन्मुखमिति बोधात्। एवं धात्वर्थस्यापि प्रत्ययार्थेन क्वचिन्निपातार्थेनैव च सह भेदान्वयो जायते यथा— 'तण्डुलं पचति' इत्यत्र धात्वर्थपाकस्यानुकूलतासम्बन्धेनाख्यातार्थ (प्रत्ययार्थ) कृत्या सहान्वयः— पाकानुकूलकृतिमान् देवदत्त इति। 'न कलञ्जं भक्षयेत्' इत्यत्र च धात्वर्थभक्षणे विध्यर्थभूतं यद्बलदनिष्टाननुबन्धि-त्वविशिष्टेष्टसाधनत्वं तदभावस्य निपातनञर्थस्यानुयोगितासम्बन्धेनान्वयः— बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वाभाववत्कलञ्जभक्षणमिति बोधात्। गुरुमते तु— कलञ्जभक्षणाभाववत् पण्डापूर्वमुत्पादयेदिति बोधः। नत्वऽन्येन= प्रत्ययनिपातार्थातिरिक्तेन प्रातिपदिकार्थेन धात्वर्थेन चेत्यर्थः। विभक्त्यर्थ-मन्तराकरणं विना प्रातिपदिकार्थयोः साक्षाद् भेदान्वयो न भवति किं त्वभेदान्वय एव यथा— 'नीलो घटः' इत्यत्र। विभक्त्यर्थमन्तराकृत्य तु भेदान्वयोऽपि भवति यथा— 'राज्ञः पुरुषः' इत्यत्र ङसर्थस्वत्वमन्तराकृत्य राजपुरुषयोः। एवं विभक्त्यर्थमन्तराकरणं विना प्रातिपदिकधात्वर्थयोरपि साक्षाद् भेदान्वयो न भवति किं त्वभेदान्वय एव यथा— 'स्तोकं पचति' इत्यत्र स्तोकपाकयोरभेदान्वयः— स्तोकाभिन्नः पाक इति। विभक्त्यर्थ-मन्तराकृत्य तु भेदान्वयोऽपि भवति यथा— 'तण्डुलं पचति' इत्यत्र विभक्त्यर्थकर्मत्वद्वारा कर्मणस्तण्डुलस्य पाके स्वकर्मकत्वसम्बन्धेनान्वयः।

विपक्षे बाधकमाह— सत्यपीति। 'राजा पुरुषः' इत्यत्र राजपदजन्य-राजोपस्थितिपुरुषपदजन्यपुरुषोपस्थितियोग्यताज्ञानादिसत्त्वेऽपि ङस्प्रत्ययाभावेन तदर्थोपस्थित्यभावात् पुरुषविषयकराजनिरूपितस्वसम्बन्धान्वयबोधो न भवति। 'भूतलं घटः' इत्यत्र भूतलपदजन्यभूतलोपस्थितिघटपदजन्यघटोपस्थिति-योग्यताज्ञानादिसत्त्वेऽपि ङिप्रत्ययाभावेन तदर्थोपस्थित्यभावाद् घटविषयकभूतल-निरूपिताधेयतासम्बन्धयान्वयबोधः (आधेयतासम्बन्धेन भूतलवान् घट इति बोधः) न भवति। 'तण्डुलः पचति' इत्यत्र तण्डुलपदजन्यतण्डुलोपस्थिति-धातुपदजन्यपाकोपस्थितियोग्यताज्ञानादिसत्त्वेऽपि कर्मत्वबोधकाऽम्प्रत्ययाभावेन

याऽबोधान्निपातातिरिक्तप्रातिपदिकार्थयोः क्रियातादृशप्रातिपदिकार्थयोश्च भेदेन साक्षादन्वयबोधस्याऽव्युत्पन्नत्वात्।

विभक्त्यर्थमन्तराकृत्य तयोरप्यन्वयबोधात् साक्षादिति।

तदर्थोपस्थित्यभावात् कर्मत्वसम्बन्धेन तण्डुले पाकान्वयो न भवति, अम्प्रत्यय-सत्त्वे तु तदर्थोपस्थितिसंभवाद् भवत्येव यथा– 'तण्डुलं पचति' इत्यत्र। 'चैत्रः पच्यते' इत्यत्र चैत्रपदजन्यचैत्रोपस्थितिधातुपदजन्यपाकोपस्थिति-योग्यताज्ञानादिसत्त्वेऽपि कर्तृत्वबोधकतृतीयाविभक्त्यभावेन तदर्थोपस्थित्यभावात् कर्तृत्वसम्बन्धेन चैत्रे पाकान्वयो न भवति, तृतीयासत्त्वे तु भवत्येव यथा– 'चैत्रेण पच्यते' इत्यत्र। स्वकर्मकत्वेति– 'तण्डुलः पचति' इत्यत्रोक्तोपस्थिति-योग्यताज्ञानादिसत्त्वेऽपि द्वितीयाविभक्तिजन्यतदर्थोपस्थित्यभावात् स्वकर्मकत्व-सम्बन्धेन पाके तण्डुलान्वयोऽपि न भवति, द्वितीयासत्त्वे तु भवत्येव यथा–'तण्डुलं पचति' इत्यत्र। 'चैत्रः पच्यते' इत्यत्राप्युक्तोपस्थितियोग्यता-ज्ञानादिसत्त्वेऽपि तृतीयाविभक्तिजन्यतदर्थोपस्थित्यभावात् स्वकर्तृकत्व-सम्बन्धेन पाके चैत्रान्वयोऽपि न भवति, तृतीयासत्त्वे तु भवत्येव यथा– 'चैत्रेण पच्यते' इत्यत्र चैत्रकर्तृकत्वसम्बन्धेन चैत्रवान् पाक इत्यन्वयः।

एवम् 'राजा पुरुषः' इत्यादौ भेदलक्षणेन स्वत्वादिसम्बन्धेनान्वय-बोधानुत्पत्तेर्भेदान्वयबोधाभावनियामकस्वरूपमाह– निपातातिरिक्तेति, निपातातिरिक्तेति व्युत्पत्तिः 'राजा पुरुषः' इत्यादौ स्वत्वादिसम्बन्धेन शाब्दबोधवारणाय, क्रियेत्यादिव्युत्पत्तिश्च 'तण्डुलः पचति' इत्यादौ कर्मत्वादिसम्बन्धेन शाब्दबोध-वारणाय, तथा च निपातातिरिक्तप्रातिपदिकार्थयोर्द्वयोः परस्परं साक्षाद् भेदेनान्वयो न भवति यथा– 'राजा पुरुषः' इत्यत्र राजपुरुषयोः स्वत्वसम्बन्धेन साक्षादन्वयो न भवति। क्रिया=धात्वर्थः। तादृशः=निपातातिरिक्तः। धात्वर्थनिपातातिरिक्त-प्रातिपदिकार्थयोरपि परस्परं साक्षाद् भेदसम्बन्धेनान्वयो न भवति यथा– 'तण्डुलः पचति' इत्यत्र तण्डुलपाकयोः कर्मत्वसम्बन्धेनान्वयो न भवतीत्यर्थः।

स्वत्वादिसम्बन्धबोधकङसादिप्रत्ययसत्त्वे तूपस्थिततदर्थद्वारा भेदसम्बन्धे-नान्वयो भवत्येवेति साक्षादित्युक्तं तदेवाह– विभक्त्यर्थेति। तथा च 'राज्ञः पुरुषः' इत्यत्र ङसर्थं स्वत्वमन्तराकृत्य तद्द्वारा राजपुरुषयोर्भेदसम्बन्धेनान्वयो

निपातातिरिक्तत्वादिविशेषणात्–'भूतले न घटः' 'घटो न पटः' इत्यादौ घटादेर्नञर्थाभावेन, 'मुखं चन्द्र इव' इत्यादौ मुखचन्द्रादीनामिवार्थसादृश्यादिना, 'न कलञ्जं भक्षयेत्' इत्यादौ नैयायिकमते नञुपस्थाप्येन बलवदऽनिष्टाननुबन्धित्व-विशिष्टसाधनत्वादिरूपविध्यर्थाऽभावेन धात्वर्थभक्षणादेर-नुयोगितया गुरुमते तु विध्यर्थापूर्वांशे विशेषणतयान्वितेन

भवत्येव राज्ञो निरूपितत्वसम्बन्धेन स्वत्वे स्वत्वस्याधारतासम्बन्धेन पुरुषेऽन्वयः– राजनिरूपितस्वत्ववान् पुरुष इति। एवम् 'भूतले घटः' इत्यत्र। 'तण्डुलं पचति' 'चैत्रेण पच्यते' इत्यादावपि विभक्त्यर्थद्वारा धात्वर्थ-प्रातिपदिकार्थयोर्भेदसंबन्धेनान्वयो भवत्येव।

निपातातिरिक्तेति विशेषणसार्थक्यमाह– निपातातिरिक्तत्वेति, निपाता-तिरिक्तप्रातिपदिकार्थयोर्निपातारिक्तप्रातिपदिकार्थधात्वर्थयोश्च भेदेन साक्षादन्वय-बोधस्याऽव्युत्पन्नत्वेऽपि निपातार्थप्रातिपदिकार्थयोर्धात्वर्थनिपातार्थयोश्च तु भेदसम्बन्धेन साक्षादन्वयो भवत्येवेत्यर्थः। तथाहि– 'भूतले न घटः' इत्यत्र नञर्थाभावेन घटस्य स्वप्रतियोगिकत्वसम्बन्धेनान्वयः– नञोनिपातत्वात्, घटप्रतियोगिकाभावो भूतलवृत्तिरित्यर्थः। 'घटो न पटः' इत्यस्य पटप्रतियोगिक-भेदवान् घट इत्यर्थः, अत्र च स्वानुयोगिकत्वसम्बन्धेन घटस्य स्वप्रतियोगिकत्व-सम्बन्धेन च पटस्याभावेन साक्षादेवान्वयः। इव पदस्यापि निपातत्वात् 'मुखं चन्द्र इव' इत्यत्रेवार्थसादृश्येन मुखचन्द्रयोः साक्षादेवान्वयो भवति तत्र चन्द्रस्य स्वप्रतियोगिकत्वसम्बन्धेन मुखस्य स्वानुयोगिकत्वसम्बन्धेन चान्वयः, चन्द्रप्रतियोगिकसादृश्यानुयोगिमुखमितिबोधः। एवं निपातार्थ-प्रातिपदिकार्थयोर्भेदसम्बन्धेन साक्षादन्वयमुक्त्वा धात्वर्थनिपातार्थयोर्भेदसम्बन्धेन साक्षादन्वयमुदाहरति– न कलञ्जेति, 'न कलक्षं भक्षयेत्' इत्यत्र नैयायिकमते बलवदनिष्टाऽननुबन्धित्वविशिष्टसाधनत्वरूपविध्यर्थाऽभावेन नञुपस्थाप्येन सह धात्वर्थभक्षणस्यानुयोगित्वेन रूपेण साक्षादेवान्वयः– 'कलञ्जकर्मकं भक्षणं बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वाभाववत्' इति बोधोदयात् अत्र च धात्वर्थभक्षणस्यैवाभावानुयोगित्वात्। प्रभाकरमते तु विध्यर्थापूर्वांशे विशेषणतयान्वितेन नञुपस्थाप्याभावेन सह धात्वर्थभक्षणस्य प्रतियोगित्वरूपेण

नञुपस्थाप्याभावेन धात्वर्थभक्षणादेः प्रतियोगितयान्वयेऽपि न क्षतिः।

'राजपुरुषः' इत्यादिसमासस्थले तु पुरुषादिपदार्थेन समं राजादिपदार्थस्य न भेदान्वयबोधः किं तु तेन समं विभक्त्यन्तार्थविशिष्टलाक्षणिकराजादिपदोपस्थाप्यराजसंबन्ध्यादेरभेदान्वयबोध एवेति न दोषः। एवम्– 'मुखं चन्द्रः' इत्यादिरूपकस्थले चन्द्रादिपदस्य चन्द्रादिसदृशे लक्षणया

साक्षादेवान्वयः– 'कलञ्जभक्षणप्रतियोगिकाभाववदपूर्वमुत्पादयेत्' इति बोधोदयात् अत्र च धात्वर्थभक्षणस्याभावप्रतियोगित्वेन भानात्, तथा चात्र धात्वर्थस्य निपातरूपनञर्थाभावस्य च परस्परं साक्षादेव भेदसम्बन्धेनान्वयस्येष्टत्वान्निपातातिरिक्तेति विशेषणं चरितार्थम्। विध्यर्थश्चापूर्वमिति प्राभाकराणां सङ्केतस्तदुक्तं तैः– "क्रियाक्षणविनाशिनी न कालान्तरभाविनः स्वर्गादेः साधनायोपपद्यते इति कालान्तरस्थायिक्रियातो भिन्नं कार्यमपूर्वं लिङादयो बोधयन्तीति स्थितम्। न च कार्याभिधानं कृतिमनभिदधतां लिङादीनामुपपद्यते इति कृतिमप्यभिदधति, अपूर्वं च।" इति। न क्षतिरिति–भेदसम्बन्धेन नामार्थयोर्नामार्थधात्वर्थयोश्च साक्षादन्वयभावो निपातातिरिक्तेति विशेषणात्, निपातार्थेन तु भेदसम्बन्धेनापि साक्षादन्वयो भवत्येवेति प्राप्त्या 'भूतले न घटः' इत्यादौ निपातार्थनामार्थयोः 'न कलञ्जं भक्षयेत्' इत्यादौ धात्वर्थनिपातार्थयोः प्रदर्शितरीत्या भेदसम्बन्धेन साक्षादप्यन्वये न क्षतिः=न दोषः=नोक्तनिपातातिरिक्तेत्यादिकस्य भेदसम्बन्धेनान्वयाभावनियामकस्याऽव्याप्तिरित्यर्थः।

ननु भेदसंसर्गावच्छिन्ननामार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विभक्तिनिपातान्यतरजन्योपस्थितेः कारणत्वात् 'राजपुरुषः' इत्यत्र च ङसविभक्त्यभावेन तज्जन्यतदर्थोपस्थित्यभावात् कथं भेद (स्वत्व) सम्बन्धेन राजप्रकारकपुरुषविशेष्यकबोधः स्यादित्याशङ्क्य समासस्थले भेदान्वयबोधं पराचष्टे–राजपुरुषेति। तर्हि कथमत्रान्वयबोधः? इत्याशङ्क्याह– किं त्विति, तेन=पुरुषपदार्थेन सह। विभक्त्येति–विभक्त्यन्तस्य राज्ञ इति पदस्य योऽर्थः=राजसम्बन्धस्तद्विशिष्टे=राजसम्बन्धविशिष्टे राजसम्बन्धिनि लाक्षणिकं यद्राजपदं तदुपस्थाप्यो ये लक्षणया राजसम्बन्धी

चन्द्रादिसदृशाभेदान्वयबोध एव, न तु सादृश्यादिसंबन्धेन चन्द्रादेर्मुखादावन्वय इति न तत्र व्यभिचारः।

केचित्तु रूपकस्थले चन्द्रादिपदस्य चन्द्रादिसदृशे न लक्षणा किं तु तत्र मुख्यार्थचन्द्रादेरेवाऽभेदभ्रमो मुखादौ। 'मुखं न चन्द्रः' इत्यादिविशेषदर्शनदशायाञ्च न तत्र शाब्दोऽभेदप्रत्ययः अपि तु शब्दजन्यविशकलितपदार्थोपस्थितिमूलको मानस एवाऽऽहार्याऽभेदभ्रम इत्याहुः।

तस्य पुरुषपदार्थे नाभेदान्वय एवात्र–राजसंबन्ध्यऽभिन्नः पुरुष इति न दोषः=ङस्प्रत्ययजन्योपस्थित्यभावादत्र भेदान्वयबोधस्यापत्तिर्नास्त्येव येन दोषः स्यादित्यर्थः। 'मुखं चन्द्र इव' इत्यत्र तु इवपदजन्योपस्थितिसत्त्वेन भेदान्वयबोधो भवति 'मुखं चन्द्रः' इत्यादिरूपकस्थले तु इव पदजन्योपस्थित्य-भावेनाऽभेदान्वयबोध एव भवति, अत्र चन्द्रपदस्य चन्द्रसदृशे लक्षणा तथा च चन्द्रसदृशाऽभिन्नं मुखमित्यऽभेदान्वयबोध एव न तु स्वप्रतियोगिक-सादृश्यसम्बन्धेन चन्द्रस्य मुखे भेदान्वयो येन इव पदजन्योपस्थित्यभावेऽपि भेदान्वयापत्त्या व्यभिचारः स्यादित्यर्थः।

आलङ्कारिकमतमाह– केचित्त्विति, 'मुखं चन्द्रः' इत्यादिरूपकस्थले चन्द्रादिसादृश्यं न प्रतीयते किन्तु चन्द्राद्यऽभेद एव प्रतीयते– चन्द्राभिन्नं मुखमिति, अतो न चन्द्रादिपदस्य चन्द्रादिसदृशे लक्षणा किन्तु तत्र=रूपकस्थले मुखादौ मुख्यार्थस्य चन्द्रादेरेवाऽभेदस्य भ्रमो भवति वस्तुतश्चन्द्रमुखयोर्भिन्नत्वात्। यदि च रूपकस्थले चन्द्रपदस्य चन्द्रसदृशे लक्षणा स्यात्तदा मुखे चन्द्रसादृश्यमात्रप्राप्तौ रूपकोपमयोर्भेदो न स्यादुपमायामपि चन्द्रादिसादृश्यस्य लाभादिति रूपके उपमानोपमेयोरभेद एव प्रतीयते इत्यर्थः। यदा च 'मुखं न चन्द्रः' इत्याकारकविशेषदर्शनम्=भेदज्ञानं वर्तते तदा तत्र=रूपकस्थले उपमानोपमेययोरभेदप्रत्ययोऽपि न शाब्दो भवति किन्तु शाब्दजन्यविशकलित-पदार्थोपस्थितिमूलकः=मुखचन्द्रशब्दाभ्यां विशकलिता–परस्परं सम्बन्धरहिता मुखचन्द्रपदार्थयोरुपस्थितिर्जायते तन्मूलको मानस एवाऽऽहार्याभेदभ्रमो जायते। बाधज्ञानकालीनेच्छाजन्यं ज्ञानमाहार्यम्, सामान्यतो बाधज्ञानकाले भ्रमो न भवति यस्तु भ्रमो बाधज्ञानकालेऽपि वर्तते स आहार्यभ्रम इत्यर्थः।

परे तु– तादात्म्यातिरिक्तसंबन्धेन नामार्थयोर्नान्वयबोधः, तादात्म्यं च प्रकृते तद्वृत्तिधर्मवत्त्वम्, एवं च 'नीलो घटः' इत्यादौ स्ववृत्तिनीलत्वादिमत्त्वसंबन्धेन घटाद्यंशे नीलपदार्थस्येव 'मुखं चन्द्रः' इत्यादौ स्ववृत्त्याह्लादकत्वादिमत्त्वसंबन्धेन मुखादौ चन्द्रादेरन्वयबोधः, तादृशान्वयबोधेऽपि समानविभक्तिकत्त्वं तन्त्रमित्यतो नातिप्रसङ्ग इति वदन्ति।

परे त्विति–नामार्थयोः=प्रातिपदिकार्थयोः परस्परं साक्षात् तादात्म्य-सम्बन्धेनैवाऽन्वयो भवति न तु तादात्म्यातिरिक्तसम्बन्धेन। तादात्म्यातिरिक्तेन कर्मत्वादिरूपेण भेदसम्बन्धेन तु प्रत्ययार्थमन्तराकृत्यैवान्वयो भवति सः तु न साक्षाद् भवति प्रत्ययार्थस्य मध्यपातित्वात् तथा चोक्तायाः "निपातातिरिक्त-प्रातिपदिकार्थयोः क्रियातादृशप्रातिपदिकार्थयोश्च भेदेन साक्षादन्वयबोध-स्याव्युत्पन्नत्वात् (पृ. ६८)" इति व्युत्पत्तेरप्यमेवार्थ इत्यर्थः। तादात्म्यस्व-रूपमाह– तादात्म्यमिति। तद्वृत्तिः=प्रतियोगिवृत्तिः। तथा च 'नीलो घटः' इत्यत्र स्ववृत्तिनीलत्ववत्त्वसम्बन्धेन घटे नीलपदार्थस्यान्वयो भवति स्ववृत्तिनील-त्ववत्त्वमेवात्र तद्वृत्तिधर्मवत्त्वं तदेव तादात्म्यरूपः सम्बन्धः– स्वं नीलपदार्थः तद्वृत्तिनीलत्वं च गुणरूपं नीलरूपमेव– गुणवाचकनीलादिपदस्य गुणिपरत्वे तादृशनीलादिपदार्थनिष्ठस्य नीलत्वादेर्गुणरूपत्वाद् गुणत्वरूपनीलत्वादेर्गुणमात्र-वृत्तित्वेन गुणिनि द्रव्ये बाधात्, अथ च नीलोऽपि घट एवेति नीलवृत्ति नीलत्वं घटवृत्त्येवेति नीलत्ववत्त्वं घटे वर्तते तेन सम्बन्धेन घटे यथा नीलपदार्थस्याभेदान्वयस्तथा 'मुखं चन्द्रः' इत्यत्रापि स्ववृत्त्याह्लादक-त्ववत्त्वलक्षणेन तादात्म्यसम्बन्धेन मुखे चन्द्रस्याभेदान्वयः, स्वं चन्द्रः चन्द्रवृत्त्याह्लादकत्ववत्त्वं च मुखेऽस्त्येव। नन्वेवं गुणरूपनीलत्वं घटेऽस्त्येवेति तेन सम्बन्धेन 'नीलस्य घटः' इत्यत्राऽप्यभेदान्वयबोधः स्यादित्याशङ्क्याह– तादृशेति, उक्ततादात्म्यसम्बन्धेनाप्यभेदान्वयबोधे समानविभक्तिकत्वं प्रयोजक-मस्तीति 'नीलस्य घटः' इत्यत्र समानविभक्तिकत्वाभावादेवाभेदान्वयबोधो न भवतीति नातिप्रसङ्गः। 'नीलो घटः' 'मुखं चन्द्रः' इत्यादौ च समानविभक्ति-कत्वस्य सत्त्वादभेदान्वयबोधो भवत्येवेत्यर्थः।

ननु 'राजा पुरुषः' इत्यत्रापि राजपदजन्यराजोपस्थितिः पुरुषजन्य-पुरुषोपस्थितिरस्ति पुरुषे राजसम्बन्धयोग्यतासत्त्वाद् योग्यताज्ञानमप्यस्ति

अथ 'राजा पुरुषः' इत्यादौ पदार्थोपस्थित्यादिसत्त्वेन कथं न भेदान्वयबोधः?, सामग्र्या कार्यजनने उक्तनियमभङ्गरूपायाः प्रयोजनक्षतेरकिञ्चित्करत्वात्, सामग्रीसत्त्वेऽवश्यं कार्यमिति-नियमात्।

न च तत्र भेदान्वयबोधौपयिकाकाङ्क्षाविरहाच्छाब्द-सामग्र्येवासिद्धेति वाच्यम्, समभिव्याहाररूपाकाङ्क्षायास्तत्रापि सत्त्वात्। न च तादृशाकाङ्क्षायास्तत्र सत्त्वेऽपि, राजादिपदार्थ-प्रकारकभेदान्वयबोधे राजादिपदाऽव्यवहितोत्तरङस्पदत्व-रूपानुपूर्वीविशेषरूपाया आकाङ्क्षाया अपि प्रयोजकत्वात्

राजसम्बन्धिपुरुषविषयकबोधो भवत्विति तात्पर्यज्ञानमप्यस्त्येवेति भेदान्वय-बोधकसामग्रीसत्त्वे भेदान्वयबोधस्यावश्यंभावात् 'निपातातिरिक्तनामार्थयोः साक्षाद् भेदान्वयो न भवति' इत्युक्तनियमभङ्गरूपायाः प्रयोजनक्षतेः=प्रयोजकक्षतेर-बाधकत्वादित्याशङ्कते– अथेति।

ननु शाब्दबोधं प्रत्याकाङ्क्षाया अपि कारणत्वमस्ति भेदान्वयबोधं प्रति च ङस्पदसमभिव्याहाररूपाया ङसन्तराजादिपदसमभिव्याहाररूपाया वा आकाङ्क्षायाः कारणत्वादेतादृशाकाङ्क्षायाः 'राजा पुरुषः' इत्यत्राभावाद् भेदान्वय-बोधौपयिकसामग्र्येव नास्तीति कथं भेदान्वयबोधः स्यादित्याशङ्क्याह– न चेति। परिहारमाह–समभिव्याहारेति, राजपदपुरुषपदसमभिव्याहाररूपा-काङ्क्षायास्तत्र='राजा पुरुषः' इत्यत्रापि सत्त्वादेव भेदान्वयबोधः स्यादेवेत्यर्थः। ननु तादृशायाः राजपद पुरुषपदसमभिव्याहाररूपाया आकाखायास्तत्र 'राजा पुरुषः' इत्यत्र सत्त्वेऽपि या खलु राजादिपदार्थप्रकारकभेदान्वयबोधप्रयोजिका राजादिपदाव्यवहितोत्तरङस्पदत्वरूपानुपूर्वीरूपाऽऽकाङ्क्षा तस्या अभावादेव न तत्र='राजा पुरुषः' इत्यत्र भेदान्वयशाब्दसामग्रीति कथं भेदान्वयबोधः स्यादित्याशङ्क्याह–न चेति। परिहारमाह–सम्बन्धादीति, राजपदार्थप्रकारक-षष्ठ्यर्थस्वत्वसम्बन्धविशेष्यकशाब्दबोधं प्रत्येव तादृशाकाङ्क्षाज्ञानस्य= राजपदोत्तरङस्पदाकाङ्क्षाज्ञानस्य हेतुत्वमस्ति न तु राजपदार्थप्रकारक-पुरुषविशेष्यकशाब्दबोधं प्रत्यपि, मया च 'राजा पुरुषः' इत्यत्र न राजप्रकारक-स्वत्वसम्बन्धविशेष्यकबोधापत्तिरुच्यते किन्तु पुरुषविशेष्यकशाब्दबोधापत्तिः,

तदभावादेव न तत्र शाब्दसामग्रीति वाच्यम्, संबन्धादिविशेष्यकराजादिप्रकारकान्वयबोधे एव तादृशाकाङ्क्षाज्ञानस्य हेतुतया पुरुषादौ राजादिपदार्थप्रकारकान्वयबोधोत्पत्तौ तादृशाकाङ्क्षाज्ञानरूपकारणविरहस्याकिञ्चित्करत्वात्।

अत्र केचित्—नामार्थप्रकारकभेदान्वयबोधं प्रति समानविशेष्यताप्रत्यासत्त्या प्रत्ययजन्योपस्थितेर्हेतुत्वकल्पनान्नामार्थप्रकारकभेदान्वयबोधे विशेष्यतया प्रत्ययार्थस्यैव भानं न तु

पुरुषविशेष्यकशाब्दबोधं प्रति तु ङसन्तराजपदसमभिव्याहाररूपाया आकाङ्क्षायाः कारणत्वमेव नास्ति, अन्यथा 'राजपुरुषः' इत्यत्रापि पुरुषविशेष्यको बोधो न स्यादेव तथा च तादृश=ङसन्तराजपदसमभिव्याहाररूपाकाङ्क्षाऽभावस्याऽकिञ्चित्करत्वात्=पुरुषविशेष्यकशाब्दबोधाप्रतिबन्धकत्वात् 'राजा पुरुषः' इत्यत्र राजप्रकारकपुरुषविशेष्यको भेदान्वयबोधः स्यादेवेत्यर्थः। किं वा भेदलक्षणस्वत्वसम्बन्धस्य प्रकारतया शाब्दबोधे ङसन्तराजपदसमभिव्याहारस्य कारणत्वमस्ति स्वत्वोपस्थापकङसऽभावे स्वत्वानुपस्थितौ स्वत्वस्य प्रकारतया भानासंभवादुपस्थितस्यैव प्रकारतया भाननियमात्, मया तु स्वत्वसम्बन्धस्य संसर्गतया भानमुच्यते संसर्गतया भानं त्वनुपस्थितस्याप्याकाङ्क्षाबलाद् भवत्येवेति 'राजा पुरुषः' इत्यत्र पुरुषविशेष्यकः स्वत्वसंसर्गकः कथं न शाब्दबोधो भवतीति पूर्वपक्षाभिप्रायः।

अत्र केचिदिति, नामार्थप्रकारकभेदान्वयबोधं प्रति समानविशेष्यताप्रत्यासत्त्या प्रत्ययजन्योपस्थितेर्हेतुत्वकल्पनान्न 'राजा पुरुषः' इत्यत्र राजप्रकारकपुरुषविशेष्यकभेदान्वयबोधस्यापत्तिरित्यन्वयः। नामार्थयोस्साक्षाद् भेदान्वयबोधो नैव भवति किं वा साक्षाद्नामार्थप्रकारकनामार्थविशेष्यकभेदान्वयबोधो नैव भवतीति सिद्धान्तः—नामार्थस्य प्रत्ययार्थेन वा निपातार्थेन वा भेदान्वयबोधस्वीकारात्। 'नीलो घटः' इत्यादौ त्वभेदान्वयबोध एवेति न नीलघटयोर्नामार्थयोर्भेदान्वयबोधः। 'राज्ञः पुरुषः' इत्यादौ च नामार्थपुरुषे न साक्षाद्राजपदार्थान्वयः किन्तु राजा निरूपितत्वसम्बन्धेन स्वत्वे प्रकारः षष्ठ्यर्थभूतं तादृशस्वत्वं चाश्रयत्वसम्बन्धेन पुरुषे प्रकारस्तथा चात्र=निरूपितत्वसम्बन्धावच्छिन्नराजत्वावच्छिन्नप्रकारतानिरूपिताश्रयत्वसम्बन्धावच्छिन्न-

नामार्थान्तरस्य तत्र विशेष्यतासंबन्धेन प्रत्ययजन्योपस्थिते रसत्त्वात्।

न च संबन्धादेरपि नामार्थतया तत्प्रकारकान्वयबोधे पुरुषादिपदार्थस्य विशेष्यतया भानानुपपत्तिः, तत्तन्नाम-

---

स्वत्वत्वावच्छिन्नप्रकारतानिरूपितपुरुषत्वावच्छिन्न विशेष्यताकः शाब्दबोधः किं वा निरूपितत्वसम्बन्धावच्छिन्न राजत्वावच्छिन्न प्रकारतानिरूपितस्वत्व-निष्ठविशेष्यतासमानाधिकरणप्रकारतानिरूपितपुरुषत्वावच्छिन्नविशेष्यताकः शाब्दबोधो भवति। नामार्थप्रकारकभेदान्वयबोधश्च प्रत्ययार्थस्य भवति तत्र प्रत्ययार्थे विशेष्यतासम्बन्धेन शाब्दबोधो यदा भवति तदा विशेष्यतासम्बन्धेन तत्र प्रत्ययजन्योपस्थितिरपि भवत्येव यथा 'राज्ञः' इत्यत्र राजपदेन राजोपस्थितिर्भवति ङस्पदेन च स्वत्वोपस्थितिर्भवति राजपदार्थस्य स्वत्वे भेदलक्षणेन निरूपितत्वसम्बन्धेनान्वयो भवतीति नामार्थराजप्रकारस्वत्वविशेष्य-कभेदान्वयबोधं प्रति प्रत्ययजन्योपस्थितेः कारणत्वमुक्तमत्र च स्वत्वस्य ङस्प्रत्ययजन्योपस्थितिरप्यस्तीति सर्वं सुस्थम्। 'राजा पुरुषः' इत्यत्र च पुरुषस्य पुरुषजन्योपस्थित्या प्रत्ययजन्योपस्थित्यभावाद् न राजप्रकारको भेदान्वयबोधः संभवतीत्यर्थः। तथा च नामार्थप्रकारकभेदान्वयबोधे प्रत्ययार्थस्यैव विशेष्यतया भानं भवति प्रत्ययजन्योपस्थितिविषयत्वात्, नामार्थप्रकारक-भेदान्यबोधे नामार्थान्तरस्य तु विशेष्यतया भानं नैव भवति तत्र=नामार्थान्तरे विशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितेरसंभवादित्येवाह– नामार्थेति।

ननु यदि नामार्थप्रकारकभेदान्वयबोधं प्रति प्रत्ययजन्योपस्थितेर्हेतुत्वं तदा 'राज्ञः पुरुषः' इत्यत्र षष्ठ्यर्थस्वत्वप्रकारकपुरुषविशेष्यकबोधोऽपि न स्यात्– सम्बन्धभूतं यत् षष्ठ्यर्थस्वत्वं तदपि यथा ङस्प्रत्ययस्यार्थस्तथा स्वत्वरूपनाम्नः सम्बन्धरूपनाम्नश्चार्थो भवत्येवेति स्वत्वरूपसम्बन्धस्यापि नामार्थतया स्वत्वप्रकारकबोधेऽपि पुरुषस्य विशेष्यतया भानं न स्यात्– प्रत्ययजन्योपस्थितिविषयत्वाभावादित्याशङ्कते– न चेति। ननु यन्नामार्थप्रकारकः शाब्दबोधः इष्टः स यदा प्रकारीभूतनामार्थवाचकनामपदजन्यो भवति तदा तादृशशाब्दबोधं प्रत्येव प्रत्ययजन्योपस्थितेर्हेतुत्वमुच्यते यथा 'राज्ञः' इत्यत्र षष्ठ्यर्थस्वत्वविशेष्यकबोधे नामार्थस्य राजपदार्थस्य निरूपितत्वसम्बन्धेन

पदजन्यतत्तन्नामार्थप्रकारकशाब्दबोधत्वावच्छिन्नं प्रति प्रत्ययजन्योपस्थितित्वेन हेतुत्वेऽपि 'राजसंबन्धः प्रमेयः' 'राज्ञः पुरुषः' इत्येतादृशवाक्यद्वयजन्यवाक्यार्थद्वयान्वयबोधे पुरुषस्य राजसंबन्धविशेष्यतया भानानुपपत्तिरिति वाच्यम्, प्रत्ययाधीनतत्तत्पदार्थोपस्थित्यजन्यतदर्थप्रकारकशाब्दत्वावच्छिन्नं प्रत्येव प्रत्ययजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्या हेतुत्वोपगमात्।

अथैवमपि यत्र 'राजा पुरुषः' इत्यत्र पुरुषपदाधीनपुरुषोपस्थितौ प्रत्ययवशात् कश्चित्प्रत्ययार्थोऽपि विषयीभूतस्तत्र प्रत्ययजन्यतथाविधसमूहालम्बनोपस्थितेर्विशेष्यतासंबन्धेन

स्वत्वे प्रकारत्वमस्ति, अथ चायं शाब्दबोधो राजनामपदजन्योप्यस्त्येवेत्येतादृशशाब्दबोधं प्रति प्रत्ययजन्योपस्थितिः कारणत्वमस्ति अत्र च स्वत्वस्य विशेष्यस्य ङस्प्रत्ययेनैवोपस्थितिरस्त्वेवेति न काप्यनुपपत्तिः 'राज्ञः पुरुषः' इत्यत्र तु पुरुषविशेष्यकबोधे पुरुषे प्रकारीभूतस्य स्वत्वस्य यद्यपि नामार्थत्वमस्त्येव नामार्थत्वस्य केवलान्वयित्वात् तथापि स्वत्वस्योपस्थितिर्नात्र नामजन्या किं तु ङस्प्रत्ययजन्यैवेति शाब्दबोधस्य प्रकारीभूतं यत्स्वत्वं तस्य तद्वाचकस्वत्वादिनामपदजन्यत्वाभावान्नात्र प्रत्ययजन्योपस्थितेः कारणत्वमिति पुरुषस्य प्रत्ययजन्योपस्थित्यविषयत्वेऽपि विशेष्यतया भाने न काप्यनुपपत्तिरित्याशङ्क्याह– तत्तन्नामपदेति। अत्रापि दोषमाह– राजसम्बन्धेति, तत्तन्नामपदजन्येत्यादिनियमे कृतेऽपि 'राजसम्बन्धः प्रमेयः' 'राज्ञः पुरुषः' इत्येतादृशवाक्यद्वयजन्यो यः समूहालम्बनात्मको बोधस्तत्र पुरुषस्य राजसम्बन्धविशेष्यतया यदिष्टं भानं तन्न स्यात्, अत्र षष्ठ्यर्थस्वत्वस्य यथा ङस्पदेनोपस्थितिरस्ति तथा 'राजसम्बन्धः' इति सम्बन्धपदेनाप्यस्त्येवेत्यत्र नामपदजन्यनामार्थप्रकारकशाब्दबोधो जायते सम्बन्धेति नामपदजन्यत्वात् सम्बन्धेति नामार्थस्वत्वप्रकारत्वाच्च पुरुषस्य च प्रत्ययजन्योपस्थितिर्नास्तीति राजसम्बन्धविशेष्यतया भानानुपपत्तिरिति पूर्वपक्षः।

परिहारमाह– प्रत्ययाधीनेति, अर्थात्– यदर्थप्रकारकः शाब्दबोध इष्टः स यदि प्रकारीभूतपदार्थविषयकप्रत्ययजन्योपस्थितिजन्यो न भवति तदा तादृशशाब्दबोधं प्रत्येव विशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितेः कारणत्वमुच्यते

पुरुषेऽपि सत्त्वात् तस्य राजप्रकारकान्वयबोधे विशेष्यतया भानापत्तिर्दुर्वारैव।

यदा शाब्दबोधे प्रकारीभूतपदार्थस्य प्रत्ययेनोपस्थितिर्भवति तदा तादृशशाब्दबोधे विशेष्यस्य विशेष्यतया भानं प्रति प्रत्ययजन्योपस्थितेः कारणत्वं नास्त्येव, तथा च 'राजसम्बन्धः प्रमेयः' 'राज्ञः पुरुषः' इति वाक्यद्वयजन्यसमूहालम्बनात्मकबोधे पुरुषे प्रकारीभूतस्य राजसम्बन्धस्य=षष्ठ्यर्थस्वत्वस्य यद्यपि राजसम्बन्धपदेनाप्युपस्थितिरस्ति तथापि 'राज्ञः' इत्यत्रत्य ङस्प्रत्ययेनाप्युस्थितिरस्त्येवेत्येतादृशसमूहालम्बनात्मकशाब्दबोधस्य प्रकारीभूतस्वत्वपदार्थविषयकप्रत्ययजन्योपस्थित्यजन्यत्वं नास्तीति नैतादृशशाब्दबोधं प्रति विशेष्यस्य पुरुषादेः प्रत्ययजन्योपस्थितेः कारणत्वं येन प्रत्ययजन्योपस्थित्यभावादत्र पुरुषस्य राजसम्बन्धविशेष्यतया भानं न स्यात्, 'राज्ञः' इत्यत्र च राजप्रकारकस्वत्वविशेष्यकः शाब्दबोधो जायते तत्र स्वत्वे प्रकारीभूतस्य राजपदार्थस्य केवलं राजेति नाम्नैवोपस्थितिरस्ति न तु प्रत्ययेनेति प्रत्ययाधीनराजपदार्थोपस्थित्यजन्यराजपदार्थप्रकारकशाब्दबोधत्वाद् एतादृशशाब्दबोधं प्रति विशेष्यपदार्थस्य प्रत्ययजन्योपस्थितेः कारणत्वमस्ति अत्र च विशेष्यस्य स्वत्वस्य ङस्प्रत्ययेनैवोपस्थितिरप्यस्त्येवेति राजपदार्थप्रकारकस्वत्वविशेष्यकशाब्दबोधस्य नानुपपत्तिरित्यर्थः। एवम् 'राजा पुरुषः' इत्यत्रापि पुरुषविशेष्यकराजप्रकारकशाब्दबोधे त्वयाऽऽपाद्यमाने प्रकारीभूतराजपदार्थस्य राजेति नाम्नैवोपस्थितिरस्ति न तु प्रत्ययेनेति प्रकारीभूतराजपदार्थविषयकप्रत्ययजन्योपस्थित्यऽजन्यत्वादत्र विशेष्यभूतपुरुषपपदार्थविषयकप्रत्ययजन्योपस्थितेः कारणत्वं प्राप्तं चात्र विशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितिर्नास्त्येव पुरुषस्य पुरुषेति नाम्नैवोपस्थितत्वादिति नात्र पुरुषविशेष्यकराजप्रकारकभेदान्वयबोधः संभवति।

ननूक्तरीत्या 'राजा पुरुषः' इत्यत्र राजप्रकारकभेदान्वयबोधस्य निवारणे कृतेऽपि यत्र=यदा 'राजा पुरुषः' इत्यत्र पुरुषपदेन पुरुषोपस्थितिर्जाता पुरुषपदोत्तरवर्तमानसुप्रत्ययेन चैकत्वस्योपस्थितिर्जाता तत्र=तदा 'पुरुष एकत्वं च' इत्येतादृशी या समूहालम्बनात्मिकोपस्थितिरस्ति सा यथा पुरुषपदजन्यास्ति तथा सुप्रत्ययजन्याप्यस्त्येव एतादृशप्रत्ययजन्योपस्थितिविषयत्वं यथा प्रत्ययार्थैकत्वस्यास्ति तथा पुरुषस्याप्यस्त्येवेत्येवंरीत्या प्रत्ययजन्योपस्थितेरत्र

न च प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासंबन्धेनोपस्थितेर्हेतुत्वोपगमान्नाऽऽपत्तिः– तादृशसमूहालम्बनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यताया नाम्न एव जन्यतावच्छेदकत्वादिति वाच्यम्, ज्ञानभेदेन विशेष्यताभेदाभावाद् यत्र कुत्रचित्

विशेष्यतासम्बन्धेन पुरुषेऽपि सत्त्वात् तस्य=पुरुषस्य राजप्रकारकभेदान्वयबोधे विशेष्यतया भानं स्यादेवअर्थादेवंरीत्या 'राजा पुरुषः' इत्यत्र राजपदार्थप्रकारकपुरुषविशेष्यकभेदान्वयबोधापत्तिस्तदवस्थैवास्तीत्याशङ्कते– अथैवमपीति।

पुनः राजा पुरुषः' इत्यत्र भेदान्वयबोधापत्तिं निवारयति– न चेत्यादिना, नामार्थप्रकारकभेदान्वयबोधं प्रति प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासम्बन्धेनोपस्थितेर्हेतुत्वमस्तीत्यन्वयः। अयमर्थः– यत्र प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासम्बन्धेन विशेष्यपदार्थे प्रत्ययजन्योपस्थितिर्भवति तत्रैव तत्पदार्थविशेष्यककिञ्चिन्नामार्थप्रकारकभेदान्वयबोधो भवतीति नियमः। प्रत्ययजन्येति– प्रत्ययजन्या या उपस्थितिस्तन्निष्ठा या प्रत्ययजन्यता तदवच्छेदकत्वं चात्र विशेष्यनिष्ठविशेष्यताया ज्ञेयम्–विशेष्यनिष्ठापि विशेष्यता स्वनिरूपितविषयितासम्बन्धेनोपस्थितौ वर्तते– स्वम्=आश्रयतासम्बन्धेन विशेष्यनिष्ठा विषयतारूपा विशेष्यता विशेष्ये उपस्थितिनिरूपितविषयतायाः सत्त्वात् उपस्थितेश्च ज्ञानरूपत्वेन विषयित्वादुपस्थितौ उपस्थितिविषयीभूतपदार्थनिष्ठविषयतानिरूपितविषयिता वर्तते तथा च शाब्दबोधे विशेष्यतया भासमानपदार्थनिष्ठापि विशेष्यता स्वनिरूपितविषयितासम्बन्धेनोपस्थितौ वर्तते तादृशोपस्थितौ प्रत्ययजन्यतापि वर्तते इत्येषा विशेष्यता उपस्थितिनिष्ठप्रत्ययजन्यतायाः सामानाधिकरण्यसम्बन्धेनावच्छेदिका जातेति। एतादृशप्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासम्बन्धेनोपस्थितेर्नामार्थप्रकारकभेदान्वयबोधं प्रति कारणत्वमस्ति यथा– 'राज्ञः' इत्यत्र ङसर्थस्वत्वविशेष्यकराजपदार्थप्रकारकभेदान्वयबोधो भवति– स्वत्वे राजपदार्थस्य निरूपितत्वलक्षणभेदसम्बन्धस्य सत्त्वाद् निरूपितत्वसम्बन्धेन राजवत्स्वत्वमिति बोधात्, अत्र हि स्वत्वस्य ङस्प्रत्ययेनोपस्थितिर्भवतीति स्वत्वविषयकोपस्थितौ ङस्प्रत्ययजन्यता वर्तते अथ च स्वत्वे योपस्थितीयविषयता वर्तते तादृशविषयतानिरूपितविषयिता स्वत्वविषयकोपस्थितौ वर्तते स्वत्वनिष्ठा च विषयता विशेष्यतारूपैव विज्ञेया तथा च– एषा स्वत्वनिष्ठापि विशेष्यता स्व (स्वत्वनिष्ठविशेष्यता)

प्रत्ययादेव लक्षणादिना पुरुषाद्युपस्थितिस्तत्र तादृशोपस्थिति-

निरूपितविषयितासम्बन्धेन स्वत्वविषयकोपस्थितौ वर्तते इति स्वत्वविषयकोपस्थितौ या प्रत्ययजन्यता वर्तते तस्या अवच्छेदिका जातेति स्वत्वनिष्ठा विशेष्यता प्रत्ययजन्यतावच्छेदिकास्ति एतादृशी च प्रत्ययजन्यतावच्छेदकीभूतविशेष्यता विशेष्यभूते स्वत्वेप्याश्रयतासम्बन्धेन वर्तत एवेति प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासम्बन्धेन सा ङस्प्रत्ययजन्यास्वत्वोपस्थितिः स्वत्वेऽपि प्रत्ययार्थे वर्तते एवेति नामार्थप्रकारकभेदान्वयबोधकारणीभूतायाः प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासम्बन्धेनोपस्थितेः स्वत्वे सत्त्वात् 'राज्ञः' इत्यत्र स्वत्वविशेष्यकराजपदार्थप्रकारकभेदान्वय उपपद्यते इति कार्यकारणभावसमन्वयः।

'राजा पुरुषः' इत्यत्र तु पुरुषस्य योपस्थितिरस्ति सा पुरुषेतिनामपदजन्यास्ति नास्तु प्रत्ययजन्येति पुरुषविषयकोपस्थितौ प्रत्ययजन्यतैव नास्तीति पुरुषनिष्ठा विशेष्यता स्वनिरूपितविषयितासम्बन्धेनोपस्थितौ वर्तमानापि प्रत्ययजन्यतावच्छेदिका कथं स्यात्? इति पुरुषे प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतैव सम्बन्धरूपा यदा नास्ति तदा पुरुषे प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासम्बन्धेन पुरुषोपस्थितिरपि कथं वर्तेत सम्बन्धिसत्तायाः सम्बन्धसत्ताधीनत्वात् तथा चात्र पुरुषे प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासम्बन्धेनोपस्थितेरभावादेव तत्कार्यभूतः पुरुषपदार्थविशेष्यकराजपदार्थप्रकारकभेदान्वयबोधो न संभवतीत्याह– नापत्तिरिति, 'राजा पुरुषः' इत्यत्र पुरुषविशेष्यकराजप्रकारकभेदान्वयबोधस्यापत्तिर्नास्तीत्यर्थः। उक्ते आपत्त्यभावे हेतुमाह– तादृशेति, पुरुषपदाधीनेत्याद्युक्तसमूहालम्बनोपस्थितिनिरूपिता या पुरुषनिष्ठा विशेष्यता तस्याः प्रत्ययजन्यतावच्छदेकत्वमुक्तरीत्या नास्ति किन्तु नाम्न एव जन्यतावच्छेदकत्वमस्ति– नाम्न इति निरूपितत्वं षष्ठ्यर्थः पुरुषेति नामनिरूपिता या पुरुषोपस्थितौ जन्यता तदवच्छेदकत्वादित्यर्थः। 'राजा पुरुषः' इत्यत्र पुरुषपदार्थस्य योपस्थितिरस्ति सा पुरुषेति नामपदजन्यास्यातीति पुरुषनिष्ठा विशेष्यता पुरुषविषयकोपस्थितिनिष्ठायाः पुरुषेति नामपदजन्यताया एवावच्छेदिकास्ति न तु प्रत्ययजन्यताया अवच्छेदिका पुरुषविषयकोपस्थितौ प्रत्ययजन्यताया एवाभावादित्यर्थः, तथा च कारणीभूतायाः प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासम्बन्धेनोपस्थितेरभावात् कथं तत्कार्यभूतः पुरुषविशेष्यकराजप्रकारकभेदान्वयबोधः स्यात्?।

निरूपितप्रत्ययजन्यतावच्छेदकीभूतविशेष्यतातः पुरुषादिपद-जन्यपुरुषाद्युपस्थितिविशेष्यताया अभिन्नतया तावताप्युक्तातिः

एवम् 'राज्ञः पुरुषः' इत्यत्रापि पुरुषस्य प्रत्ययाधीनोपस्थितेरभावात् उपस्थितौ प्रत्ययजन्यत्वाभावाच्च पुरुषनिष्ठा विशेष्यता प्रत्ययजन्यतावच्छेदिका नास्तीति प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासम्बन्धेन पुरुषे उपस्थितेरभावाद् राजप्रकारकपुरुषविशेष्यकभेदान्वयबोधो नैव जायते किन्तु प्रत्ययार्थस्वत्व-प्रकारकभेदान्वयवोधो जायते—आश्रयत्वसम्बन्धेन राजनिरूपितस्वत्ववान पुरुष इति एतादृशप्रत्ययार्थप्रकारकनामार्थविशेष्यकभेदान्वयबोधं प्रति तु प्रत्ययजन्यता-वच्छेदकीभूतविशेष्यतासम्बन्धेनोपस्थितेः कारणत्वमपि नास्त्येवेति पुरुषनिष्ठ-विशेष्यतायाः प्रत्ययजन्यतावच्छेदकत्वाभावेऽपि ङस्प्रत्ययार्थस्वत्वप्रकारक-पुरुषेति नामार्थविशेष्यकभेदान्वयबोधस्यापि नानुपपत्तिरिति सर्वं समञ्जसम्।

पुनः प्रतिवादी परिहरन् 'राजा पुरुषः' इत्यत्र पुरुषविशेष्यकराज-प्रकारकस्वत्वसंसर्गकभेदान्वयबोधमापादयति— ज्ञानभेदेनेत्यादिना। "ज्ञानभेदेन विशेष्यताभेदाभावात्" इति "विशेष्यताया अभिन्नतया" इत्यत्र हेतुः। अयमर्थः— देवदत्तादिभिरनेकैरपि पुरुषैरेकस्मिन्नेव ज्ञाते घटे देवदत्ताद्यनेकपुरुष-समवेतैकघटविषयकज्ञानस्य देवदत्तादिभेदेन भेदेऽपि यथा घटभेदो न भवति तथा ज्ञानभेदेन घटनिष्ठविशेष्यताया अपि भेदो न भवति विशेष्यभेदेनैव विशेष्यताभेदनियमात्, तथा च यदा कदाचित् 'राज्ञः' इत्यत्र केन चित् ङस्प्रत्ययस्य पुरुषपदार्थे लक्षणावृत्तिर्ज्ञाता तदा ङसप्रत्ययेन स्वारसिक-लक्षणावृत्या पुरुषस्योपस्थितिर्भविष्यत्येव तत्र पुरुषोपस्थितेः ङस्प्रत्ययेन जातत्वात् तादृशपुरुषोपस्थितौ प्रत्ययजन्यतापि प्राप्तैव तादृशप्रत्ययजन्यपुरुष-विषयकोपस्थितिनिरूपिता विषयताख्या विशेष्यता पुरुषेऽपि वर्तत एव पुरुषनिष्ठा चैषा विशेष्यतोक्तरीत्या स्वनिरूपितविषयितासम्बन्धेन पुरुषोप-स्थितावपि वर्तते तत्र पुरुषोपस्थितौ प्रत्ययजन्यतापि वर्तते इति पुरुषनिष्ठा विशेष्यता उपस्थितिनिष्ठप्रत्ययजन्यताया अवच्छेदिका जातैव, अथ च विषयभेदेनैव विशेष्यताभेदनियमेन ज्ञानभेदेन विशेष्यताभेदाऽभावात् पुरुषे 'राज्ञः' इत्यत्र लक्षणाधीनङस्प्रत्ययजन्यपुरुषोपस्थितिनिरूपितविशेष्यता 'राजा पुरुषः' इत्यत्र शक्त्यधीनपुरुषेति नामपदजन्यपुरुषोपस्थितिनिरूपिताविशेष्यता च वर्तते तयोरुभयोरपि विशेष्यतयोर्विशेष्यभूतपुरुषपदार्थस्य भेदाभावाद्

प्रसङ्गवारणाऽसंभवादिति चेत्?

न, स्वजनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यता-

भेदो नास्तीत्यैक्यं प्राप्तं तथा च 'राज्ञः' इत्यत्र लक्षणाधीनडस्प्रत्ययजन्य-पुरुषोपस्थितिनिरूपितो पुरुषनिष्ठा विशेष्यता पुरुषोपस्थितिनिष्ठप्रत्ययजन्यताया अवच्छेदिकास्तीति 'राजा पुरुषः' इत्यत्रापि शक्त्यधीनपुरुषेतिनामपदजन्य-पुरुषोपस्थितिनिरूपिता पुरुषनिष्ठा विशेष्यता प्रत्ययजन्यतावच्छेदिका जातैव उक्तपुरुषनिष्ठाविशेष्यतयोक्तरीत्या ऐक्यात् तथा च 'राजा पुरुषः' इत्यत्रापि पुरुषे प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतायाः सत्त्वात् तादृशप्रत्ययजन्यता-वच्छेदकीभूतविशेष्यतासम्बन्धेन पुरुषे पुरुषपदजन्योपस्थितिर्वर्तत एवेति प्राप्तमिति तत्कार्यभूतः पुरुषविशेष्यकराजप्रकारभेदान्वयः (स्वत्वसंसर्गक) बोधः कथं न स्यादित्यर्थस्तदाह—तादृशोपस्थितीति। ज्ञानभेदेन विशेष्यता-भेदाभावात् तादृशा='राज्ञः' इत्यत्र लक्षणाधीनङस्प्रत्ययजन्या। तादृशोपस्थि-तिनिरूपिता या प्रत्ययजन्यतावच्छेदकीभूत पुरुषनिष्ठा विशेष्यता तादृश-विशेष्यतातः 'राजा पुरुषः' इत्यत्र शक्त्यधीनपुरुषपदजन्यपुरुषोपस्थिति-निरूपितायाः पुरुषनिष्ठविशेष्यताया अभिन्नतया तावतपि=प्रत्ययजन्यता-वच्छेदकीभूतविशेष्यतासम्बन्धेनोपस्थितेः नामार्थप्रकारकभेदान्वयबोधं प्रति कारणतास्वीकारेऽपि उक्तातिप्रसङ्गस्य='राजा पुरुषः' इत्यत्र राजपदार्थप्रकारक-पुरुषविशेष्यकभेदान्वयबोधप्रसङ्गस्य (आपत्तेः) वारणसम्भवादित्यर्थः। उक्तरीत्या "राजा पुरुषः" इत्यत्र भेदान्वयबोधस्य प्रदर्शितत्वात्। "ज्ञानभेदेन विशेष्यताभेदाभावात्" इत्यादिना "पुरुषपदाधीन" इत्यादिपूर्वोक्तभेदान्वयप्रकार-स्यैव समर्थनं कृतं न तु प्रकारान्तरेण भेदान्वयापत्तिः प्रदर्शितेत्यवधेयम्।

उक्तरीत्या प्रतिवादिना 'राजा पुरुषः' इत्यत्रापादितं नामार्थप्रकारकनामार्थ-विशेष्यकभेदान्वयबोधं परिहरति—नेति, स्वजकेति—नामार्थप्रकारकभेदान्वयबोधं प्रति स्वजनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यताविशिष्टविशेष्यता-सम्बन्धेनोपस्थितेः कारणत्वमुच्यते, स्वम्=उपस्थितिः उपस्थितिजनकं यदर्थविशेष्यकशक्तिज्ञानं तादृशशक्तिज्ञानविषयभूता या प्रत्ययवृत्तिप्रकारता (प्रत्ययार्थविशेष्यकशक्तिज्ञाने प्रत्ययस्य प्रकारतया भानात्) तादृशप्रकारता-निरूपिता या प्रत्ययार्थनिष्ठा विशेष्यता (शक्तिज्ञानीयविशेष्यता— प्रत्ययार्थ-विशेष्यकशक्तिज्ञाने प्रत्ययार्थस्य विशेष्यतया भानात्) तादृशविशेष्यताविशिष्टाया

विशिष्टविशेष्यतासंबन्धेनैवोपस्थितेर्हेतुतया उक्तसमूहालम्बनोप-स्थितिनिरूपितपुरुषनिष्ठविशेष्यतायाश्च तादृशोपस्थिति-

प्रत्ययार्थनिष्ठैवोपस्थितीयविशेष्यता– तादृशेन विशेष्यताविशिष्टविशेष्यता-सम्बन्धेनोपस्थितेर्नामार्थप्रकारकभेदान्वयबोधं प्रति कारणत्वमुच्यते इत्यन्वयः।

यथा–'राज्ञः' इत्यत्र या ङस्प्रत्ययजन्या स्वत्वोपस्थितिस्तज्जनकं यत् ङस्प्रत्ययार्थस्वत्वविशेष्यकं शक्तिज्ञानम्–ङस्प्रत्ययशक्यं स्वत्वं शक्ति-सम्बन्धेन ङस्प्रत्ययवदितिज्ञानं तादृशशक्तिज्ञानविषयभूता या ङस्प्रत्ययनिष्ठा प्रकारता (उक्तार्थविशेष्यकशक्तिज्ञाने ङस्प्रत्ययस्य प्रकारतया भानात्) तादृशप्रकारतानिरूपिता डस्प्रत्ययार्थस्वत्वे विशेष्यता (शक्तिज्ञानीयविशेष्यता–उक्तशक्तिज्ञाने ङस्प्रत्ययार्थस्वत्वस्य विशेष्यतया भानात्) वर्तते अथ च ङस्प्रत्ययार्थभूते स्वत्वे ङस्प्रत्ययजन्योपस्थितीयापि विशेष्यता वर्तते इत्येषा स्वत्वनिष्ठोपस्थितीयविशेष्यता उक्तप्रथमया स्वत्वनिष्ठया शक्तिज्ञानीय-विशेष्यतया विशिष्टा जाता–उभयोर्विशेष्यतयोः सामानाधिकरण्यादिति स्वजनकज्ञानीयप्रत्ययवृत्तिप्रकारतनिरूपितविशेष्यताविशिष्टविशेष्यता ङस्प्रत्ययार्थस्वत्वेऽत्र वर्तते एवेति एतादृश विशेष्यताविशिष्टविशेष्यता-सम्बन्धेनोपस्थिति (ङस् प्रत्ययजन्यस्वत्वोपरिस्थिति) रपि स्वत्वे वर्तते एवेति। तत्कार्यभूतो राजपदार्थप्रकारकस्वत्वविशेष्यकनिरूपतित्वलक्षणाभेद-संसर्गकशाब्दबोधोऽपि जायते इति कार्यकारणाभावसमन्वयः।

'राजा पुरुषः' इत्यत्र च पुरुषपदाधीनपुरुषोपस्थितिः पुरुषपदोत्तरवर्तमान-सुप्रत्ययवशाच्चैकत्वादिप्रत्ययार्थोपस्थितिर्जाता तत्र प्रत्ययजन्यतथाविधसमूहा-लम्बनोपस्थितेर्विशेष्यतासम्बन्धेन पुरुषेपि सत्त्वात् पुनश्च "ज्ञानभेदेन विशेष्यता-भेदाभावात्" इत्यादिना विशेष्यतयोरैक्यं प्रतिपाद्य पुरुषनिष्ठायाः पुरुषपद-जन्योपस्थितीयविशेष्यताया अप्युक्तप्रकारेण प्रत्ययजन्यतावच्छेदकी-भूतविशेष्यतात्वमुपपाद्य यात्र पुरुषविशेष्यकराजप्रकारकभेदान्वयापत्तिः प्रदर्शिता सा नेदानीं संभवतीत्याह–उक्तसमूहालम्बनेत्यादिना। उक्ता या समूहा-लम्बनोपस्थितिस्तादृशोपस्थितिनिरूपिता यात्र पुरुषनिष्ठा विशेष्यता तस्यास्तादृशोपस्थितिजनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यतया सह सामानाधिकरण्येव नास्ति– प्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यतायाः प्रत्ययार्थमात्रवृत्तित्वात् पुरुषे चासत्त्वादिति पुरुषोपस्थितिनिरूपित-

जनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यतासामाना-

पुरुषनिष्ठविशेष्यता प्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यताविशिष्टैव नास्तीति सम्बन्धरूपाया विवक्षितविशेष्यताविशिष्टविशेष्यतायाः पुरुषे अभावात् तादृशविशेष्यताविशिष्टविशेष्यतासम्बन्धेनोपस्थितिरपि पुरुषे कथं वर्तेतेति कथं पुरुषविशेष्यकराजप्रकारकभेदान्वयबोधः स्यादित्यन्वयः।

अयमर्थः– 'राजा पुरुषः' इत्यत्र पुरुषपदेन पुरुषोपस्थितिर्भवति पुरुषपदोत्तरवर्तमानसुप्रत्ययेन चैकत्वोपस्थितिर्भवति– पुरुष एकत्वं चेति रूपा, एतादृशसमूहालम्बनोपस्थितीयविशेष्यता पुरुषे वर्तते 'राज्ञः' इत्यत्र च कस्यचित्स्वारसिकलक्षणावशात् ङस्प्रत्ययेन पुरुषोपस्थितिर्जातेति ङस्प्रत्यय-जन्योवेपस्थितीयविशेष्यतापि पुरुषे वर्तते ज्ञाने (अत्रोभयोपस्थिति) भेदेन विशेष्यताभेदाभावाच्चोक्तोभयोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यतयोरैक्यात् पुरुषनिष्ठोपस्थितीयविशेष्यतायाः स्वनिरूपितविषयितासम्बन्धेन पुरुषविषयक-प्रत्ययजन्योपस्थितौ वर्तमानत्वाच्च पुरुषनिष्ठा विशेष्यता उपस्थितिनिष्ठ-प्रत्ययजन्यतावच्छेदिका जातेति तादृशप्रत्ययजन्यतावच्छेदकीभूतविशेष्यता-सम्बन्धेनोपस्थितिः पुरुषे वर्तते एवेति तत्कार्यभूतः पुरुषविशेष्यकराजप्रकारक-भेदान्वयबोधः संभवत्येवेति प्रतिवादिना यत् प्रतिपादितम्, तन्न संभवति– 'राजा पुरुषः' इत्यत्रोक्तसमूहालम्बनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यता पुरुषे वर्तते तादृश=उक्तसमूहालम्बनोपस्थितिजनकं यच्छक्तिज्ञानं सुप्रत्ययशक्यमेकत्वं शक्तिसम्बन्धेन सुप्रत्ययवदिति ज्ञानं तादृशशक्तिज्ञाननिरूपिता या प्रत्ययनिष्ठा प्रकारता (प्रत्ययार्थविशेष्यकशक्तिज्ञाने प्रत्ययस्य प्रकारत्वात्) तादृश-प्रकारतानिरूपिता विशेष्यता तु सुप्रत्ययार्थैकत्वे एव वर्तते न तु पुरुषेऽपीत्युक्त-समूहालम्बनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यताया उक्तसमूहालम्बनोपस्थिति-जनकज्ञानीय (शक्तिज्ञानीय) प्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यतायाश्च वैयधिकरण्येन सामानाधिकरण्याभावादुक्तसमूहालम्बनोपस्थितिनिरूपित-पुरुषनिष्ठविशेष्यता उक्तसमूहालम्बनोपस्थितिजनकज्ञानीयप्रत्ययवृत्तिप्रकारता-निरूपितविशेष्यताविशिष्टैव न भवतीति सम्बन्धत्वेन विवक्षिताया: स्व (उपस्थिति) जनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यताविशिष्ट-विशेष्यताया: पुरुषेऽभावादेवैवतादृशविशेष्यताविशिष्टविशेष्यतासम्बन्धेनात्र पुरुषे उपस्थितिरपि न वर्तते इति तत्कार्यभूतस्य पुरुषविशेष्यकराजप्रकारक-

धिकरण्यविरहान्नातिप्रसङ्ग इति वदन्ति।

तदसत्–प्रत्ययत्वस्याऽनुगतस्याऽनतिप्रसक्तस्य दुर्वचतया उक्तकार्यकारणभावकल्पनाया असंभवात्। 'राजसंबन्धः पुरुषः' स्वत्वसंसर्गकभेदान्वयबोधस्यापि प्रसङ्गः=आपत्तिर्नास्त्येवेति वदन्ति।

एवम्– 'राज्ञः पुरुषः' इत्यत्रापि प्रत्ययजन्योपस्थितिजनकज्ञानीय-प्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यता प्रत्ययार्थे एव वर्तते न पुरुषे इति पुरुषे स्वजनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यताविशिष्टविशेष्यताया अभावेन तादृशविशेष्यताविशिष्टविशेष्यतासम्बन्धेन पुरुषे उपस्थितेरप्यऽभावाद् राजप्रकारकपुरुषविशेष्यकभेदान्वयबोधो न जायते। यश्च ङस्प्रत्ययार्थ-स्वत्वप्रकारकपुरुषविशेष्यकभेदान्वयबोधो जायते तादृशप्रत्ययार्थप्रकारकनामार्थ-विशेष्यकभेदान्वयबोधं प्रति स्वजनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपित-विशेष्यताविशिष्टविशेष्यतासम्बन्धेनोपस्थितेर्हेतुत्वमेव नास्तीति एतादृशविशेष्यता-विशिष्टविशेष्यतासम्बन्धेनोपस्थितेरभावेऽपि आश्रयत्वसंसर्गकप्रत्ययार्थस्वत्व-प्रकारकपुरुषविशेष्यकभेदान्वयबोधस्य नानुपपत्तिः। 'राज्ञः पुरुषः' इत्यत्र निरूपितत्वसम्बन्धेन राजा ङसर्थे स्वत्वे प्रकारः स्वत्वस्य राजनिरूपितत्वात् स्वत्वं चाश्रयतासम्बन्धेन पुरुषे प्रकार इत्यवधेयम्।

'राज्ञः' इत्यत्र च नामार्थप्रकारकभेदान्वयबोधो जायते तादृशभेदान्वयबोधं प्रति स्वजनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यताविशिष्टविशेष्यता-सम्बन्धेनोपस्थितेः कारणत्वमस्तीति 'राज्ञः'इत्यत्र स्वजनकज्ञानीयप्रत्यय-वृत्तिप्रकारतानिर्सपितविशेष्यताविशिष्टविशेष्यतासम्बन्धनोवस्थितिरपितिरपि ङसर्थस्वत्वे वर्तत एवेति नामार्थराजप्रकारकप्रत्ययार्थस्वत्वविशेष्यकनिरूपितत्व-लक्षणभेदसंसर्गकभेदान्वयबोधोऽपि जायते एवेति सर्वं समञ्जसम्।

उक्तकार्यकारणभावं सिद्धान्ती परिहरति–तदसदिति, उक्तकार्यकारणभावे प्रत्ययस्य प्रवेशोऽस्ति प्रत्ययत्वं च सकलप्रत्ययानुगतं प्रत्ययातिरिक्ते चानतिप्रसक्तं न निर्वक्तुं शक्यते प्रत्ययत्वनिर्वचनासंभवे च प्रत्ययज्ञानासंभवात् प्रत्ययविशिष्टोक्तकार्यकारणभावोऽपि नावधारयितुं शक्यते इत्यर्थः। किञ्चोक्तप्रत्ययविशिष्टकार्यकारणभावस्वीकारे यदा 'राजसबन्धः पुरुषः' इत्यत्र कस्यचित् संबन्धपदे ङस्पदत्वभ्रमो जायते तदात्र 'राजसम्बन्धः'

इत्यादौ संबन्धादिपदे ङस्पदत्वादिभ्रमदशायां संबन्धादि-विशेष्यकराजादिपदार्थप्रकारकान्वयबोधानुपत्तेः। 'राज्ञः पुरुषः' इत्यादौ ङस्पदादिषु संबन्धादिपदत्वभ्रमदशायां संबन्धांशे राजादिप्रकारकान्वयबोधापत्तेश्च।

न च प्रत्ययत्वेन ज्ञातं यत्पदं तत्पदजन्योपस्थितेः कारणत्वादेतद्दोषद्वयस्य नावकाश इति वाच्यम्, 'राज्ञः पुरुषः' इत्यादौ षष्ठ्यादेः प्रत्ययत्वाद्यनुपस्थितिदशायामपि आनुपूर्वी-विशेषप्रकारकज्ञानधीनतदर्थोपस्थितिसत्त्वे शाब्दबोधोत्पत्त्या

इति भागे ङस्प्रत्ययार्थस्वत्वसम्बन्धविशेष्यकराजपदार्थप्रकारकभेदान्वयबोध इष्टोस्ति स न स्यात्—वस्तुतोऽत्र राजपदोत्तरं ङस्प्रत्ययाऽभावात् कार्यकारणभावे च प्रत्ययत्वनिवेशात्। 'राज्ञः पुरुषः' इत्यत्र च यदा ङस्प्रत्यये सम्बन्धपदत्वभ्रमो जायते तदा ङस्प्रत्ययार्थस्वत्वविशेष्यकराजप्रकारक-भेदान्वयबोध इष्टो नास्ति उक्तकार्यकारणभावस्वीकारे चापद्येतैव वस्तुतोऽत्र राजपदोत्तरं ङस्प्रत्ययस्य सत्त्वादिति नोक्तकार्यकारणभावः समञ्जसः।

ननु प्रत्ययत्वेन ज्ञातं यत्पदं तत्पदजन्योपस्थितेः नामार्थप्रकारक-भेदान्वयबोधं प्रति कारणत्वमुच्यते तथा च 'राजसम्बन्धः पुरुषः' इत्यत्र सम्बन्धपदे ङस्पदत्वभ्रमदशायां सम्बन्धपदं प्रत्ययत्वेन ज्ञातमिति प्रत्ययत्वेन ज्ञातसम्बन्धपदजन्योपस्थितेर्नामार्थप्रकारकभेदान्वयबोधं प्रति कारणत्वस्वीकारात् प्रत्ययार्थसम्बन्धविशेष्यकराजप्रकारकभेदान्वयबोधस्यानुपपत्तिर्नास्ति तत्कारणी-भूतायाः प्रत्ययत्वेन ज्ञातपदजन्योपस्थितेः सत्त्वात्। 'राज्ञः पुरुषः' इत्यत्र ङस्पदे सम्बन्धपदत्वभ्रमदशायां वस्तुतो विद्यमानमपि डस्प्रत्ययपदं प्रत्ययत्वेन न ज्ञातमिति प्रत्ययत्वेन ज्ञातपदजन्योपस्थितेरभावात् तत्कार्यभूतस्य सम्बन्ध-विशेष्यकराजपदार्थप्रकारकभेदान्वयबोधस्यापत्तिर्नास्तीत्याशङ्क्याह— न चेति। परिहारमाह— राज्ञ इति, 'राज्ञः' इत्यत्र यदा षष्ठ्याः प्रत्ययत्वेनोपस्थितिः= ज्ञानं न भवति तदापि 'राज्ञः' इत्याकारकानुपूर्वीविशेषप्रकारकम् 'राज्ञः' इत्यानुपूर्वीमात्रविषयकं यज्ज्ञानं तज्जन्या या तदर्थोपस्थितिः=षष्ठ्यर्थ-स्वत्वविषयकोपस्थितिः तत्सत्त्वेऽपि राजप्रकारकषष्ठ्यर्थस्वत्वविशेष्यक-भेदान्वयबोधो जायते एव इष्टश्च तन्न स्यादिति कार्यकारणभावे

प्रत्ययत्वप्रकारकज्ञाननिवेशासंभवात्।

इदं पुनरत्र तत्त्वम्– 'राजा पुरुषः' इत्यादौ पुरुषादि-विशेष्यकराजादिप्रकारकभेदान्वयबोधस्याऽप्रसिद्ध्यैव नापत्ति-संभवः। यत्र षष्ठ्यादिविभक्तेरेव स्वारसिकलक्षणया शक्तिभ्रमेण वा पुरुषाद्युपस्थितिस्तत्र तद्विशेष्यक-राजादिपदार्थप्रकारकभेदान्वयबोधः प्रसिद्ध इति चेत्? तर्हि तादृशबोधे तथाविधप्रकृतिप्रत्ययानुपूर्वीविशेषरूपाकाङ्क्षाज्ञान-सहकृततत्तद्विभक्तिजन्यपुरुषाद्युपस्थितिघटितसामग्र्या एव तादृशबोधोत्पत्तिनियामकतया तदभावादेव न तदापत्तिः।

प्रत्ययत्वप्रकारकज्ञाननिवेशो न युक्तः। प्रत्ययत्वज्ञाननिवेशाभावे च 'राज्ञः' इत्यत्र षष्ठ्याः प्रत्ययत्वेनानुपस्थितिदशायामपि राजप्रकारकस्वत्वविशेष्यक-भेदान्वयबोधस्य नानुपपत्तिरित्यर्थः। प्रत्ययत्वाद्यनुपस्थितिदशायाम्=प्रत्ययत्वादिना रूपेणानुपस्थितिदशायाम्।

क्वचित् प्रसिद्धस्यैव पदार्थस्यान्यत्रापत्तिः संभवति यथा घटादेर्न त्वप्रसिद्धस्य यथा शशविपाणादेरिति यदि नामार्थप्रकारकनामार्थ-विशेष्यकभेदान्वयबोधः क्वचिदपि प्रसिद्धः स्यात्तदा 'राजा पुरुषः' इत्यत्रा-प्यापद्येतेत्याह– इदमित्यादिना। नामार्थयोः साक्षाद् भेदान्वयबोधस्याऽव्युत्पन्न-त्वादित्यर्थः। नामार्थस्य साक्षात्तु प्रत्ययार्थेन वा निपातार्थेन वा एव भेदान्वयबोधो जायते न निपातातिरिक्तनामार्थेन, तथा च राजपदार्थस्य पुरुषपदार्थेन सह साक्षात्कथं भेदान्वयबोधः स्यादित्यर्थः।

ननु यत्र 'राज्ञः' इति षष्ठ्यैव स्वारसिकलक्षणया शक्तिभ्रमेण वा पुरुषोपस्थितिर्जायते तत्र तु तद्विशेष्यक=पुरुषविशेष्यकराजप्रकारकभेदान्वयबोधः प्रसिद्ध इति तस्यैव 'राजा पुरुषः' इत्यत्राप्यापत्तिरित्याशङ्कते– यत्रेति। उत्तरमाह– तर्हीति, कार्यकारणभावो ह्यन्वयव्यतिरेकाभ्यामवधार्यते इति 'राज्ञः' इत्यत्र यदि लक्षणया शक्तिभ्रमेण वा षष्ठ्या पुरुषोपस्थितौ राजप्रकारकपुरुषविशेष्यकभेदान्वयबोधो जायते तदा स बोधः कया सामग्र्या जायते इति विवेके कर्तव्ये 'राज्ञः' इत्यत्र तादृशबोधे=राजप्रकारकपुरुष-

अत एव स्वत्वादिसंबन्धेन राजादिविशिष्टपुरुषादि-तात्पर्यकतदादिपदघटितात् 'स सुन्दरः' इति वाक्यात् पुरुषादिविशेष्यकस्वत्वादिसंसर्गकराजादिप्रकारकशाब्दबोधस्य च प्रसिद्ध्या 'राजा पुरुषः सुन्दरः' इत्यादौ पदार्थोपस्थिति-योग्यताज्ञानादिबलात् तादृशशाब्दबोधापत्तिरित्यपि निरस्तम्— 'स सुन्दरः' इत्यादिवाक्याधीनशाब्दबोधसामग्र्यास्तत्पदत्वाद्य-वच्छिन्नविशेष्यकसुन्दरादिपदसमभिव्याहारज्ञानसहकृततदादि-पदजन्यतादृशविशिष्टार्थोपस्थितिघटिततया तदभावादेवा-पत्त्यभावात्।

विशेष्यकभेदान्वयबोधे तथाविध=राज्ञ इत्याकारकप्रकृतिप्रत्ययानुपूर्वीविशेषरूपा-काङ्क्षासहकृतङस्विभक्तिजन्यपुरुषोपस्थितियुक्तसामग्र्या एव तादृशबोधोत्पत्ति-नियामकतया तदभावादेव=एतादृशसामग्र्यभावादेव 'राजा पुरुषः' इत्यत्र राजप्रकारकपुरुषविशेष्यकभेदान्वयबोधस्य नापत्तिः—कारणसत्त्वे एव कार्यसंभवादित्यर्थः। "षष्ठ्यादिविभक्तेः" इति पञ्चम्यन्तम्।

यादृशशाब्दबोधसामग्री भवति तादृश एव शाब्दबोधो भवति न त्वन्यादृश इत्याह— अत एवेति, 'स सुन्दरः' इत्यत्र स्वत्वसम्बन्धेन राजविशिष्ट-पुरुषतात्पर्येण स इति तत्पदं प्रयुक्तमिति 'स सुन्दरः' इति वाक्येन पुरुषविशेष्यकस्वत्वसंसर्गकराजप्रकारकः शाब्दबोधो जायते इति तत्प्रसिद्ध्या 'राजा पुरुषः सुन्दरः' इत्यत्रापि पदार्थोपस्थितियोग्यताबलात् स्वत्वसम्बन्धेन राजप्रकारकपुरुषविशेष्यकबोधः स्यादेवेत्यपि निरस्तम्। यतः— 'स सुन्दरः' इत्यत्र तत्पदविशेष्यकं यत्सुन्दरपदसमभिव्याहारज्ञानं तादृशज्ञानसहकृता या तत्पदजन्या तादृश=स्वत्वसम्बन्धेन राजविशिष्टपुरुषविषयकोपस्थिति-स्तद्घटितसामग्र्या एव पुरुषविशेष्यकस्वत्वसंसर्गकराजप्रकारकशाब्दबोधो जायते 'राजा पुरुषः सुन्दरः' इत्यत्र च तदभावादेव=तत्पदाभावेन तत्पदविशेष्यकसुन्दरपदसमभिव्याहारज्ञानसहकृततत्पदजन्यतादृशविशिष्टार्थो-पस्थितिघटितसामग्र्यऽभावादेव आपत्त्यभावात्=तत्कार्य भूतस्य पुरुषविशेष्यक-स्वत्वसंसर्गकराजप्रकारकशाब्दबोधस्यापत्त्यभावादित्यर्थः।

अथैतादृशरीत्यापत्तिवारणे 'राज्ञः पुरुषः' इत्यादौ स्वत्वादिसंबन्धेन पुरुषादौ राजाद्यन्वयबोधस्वीकारेऽपि क्षतिविरहादुक्तव्युत्पत्तिर्निर्युक्तिका। विभक्तीनां संबन्धादिवाचकत्वमपि निर्युक्तिकम्, 'नीलो घटः' इत्यादौ विशेषणवाचकपदसमभिव्याहृतविभक्तेरिव सर्वविभक्तीनां साधुत्वमात्रार्थकत्वस्यैवोचित्वात्, न हि तत्र तथाविधान्वयबोधोपगमे तत्स्थलीयसामग्रीबलात् 'राजा पुरुषः' इत्यादिष्वपि तथाविधान्वयबोध-

---

अथेति– यादृशशाब्दबोधसामग्री भवति तादृश एव शाब्दबोधो भवतीत्येतादृशोक्तरीत्या 'राज्ञः पुरुषः' इति वाक्याज्जायमानशाब्दबोधस्य 'राजा पुरुषः' इत्यत्रापत्तिवारणे कृते तथा 'स सुन्दरः' इति वाक्याज्जायमानशाब्दबोधस्य 'राजा पुरुषः सुन्दरः' इत्यत्रापत्तिवारणे कृते 'राज्ञः पुरुषः' इत्यत्र स्वत्वसंसर्गकराजप्रकारकपुरुषविशेष्यकबोधस्यापि ङसन्तराजपदप्रथमान्तपुरुषपदसमभिव्याहाररूपाकाङ्क्षाज्ञानघटितोपस्थित्यादिसामग्रीवशादेव स्वीकारे क्षतिविरहात्='राजा पुरुषः' इत्यत्र ङ्सन्तराजपदाभावेन 'राज्ञः पुरुषः' इत्यत्रत्यसामग्र्यभावात् स्वत्वसंसर्गकराजप्रकारकपुरुषविशेष्यकशाब्दबोधापत्तिर्न संभवतीति उक्तव्युत्पत्तिः=नामार्थप्रकारकभेदान्वयबोधं प्रति प्रत्ययजन्योपस्थितिः कारणमिति व्युत्पत्तिर्निर्युक्तिका=पृथक्पृथगाकाङ्क्षादिघटितविलक्षणसामग्रीवशादेव पृथक्पृथक्स्वरूपशाब्दबोधोत्पत्तिनियमसंभवाद् व्यर्थैवेत्यर्थः। एवं विशेषणवाचकपदोत्तरवर्तमानविभक्तेरिव सर्वविभक्तीनाम्=विशेष्यवाचकपदोत्तरवर्तमानविभक्तीनामपि साधुत्वमात्रार्थकत्वौचित्यात्सम्बन्धादिवाचकत्वमपि निर्युक्तिकम्– तत्र तत्र जायमानतादृशसम्बन्धादिविषयकशाब्दबोधं प्रति तत्र तत्र वर्तमानाकाङ्क्षादिघटितसामग्रीविशेषस्यैव कारणत्वस्वीकारे तादृशसामग्र्यभावान्नान्यत्र तादृशशाब्दबोधातिप्रसङ्गो यथा 'नीलो घटः' इत्यत्रत्यायाः प्रथमान्तनीलपदघटपदाकाङ्क्षाया विरहात् 'नीलस्य घटः' इत्यादौ न नीलघटयोरभेदान्वयबोधापत्तिरित्यर्थः। तत्रत्यशाब्दबोधविशेषं प्रति तत्रत्यसामग्रीविशेषस्य कारणत्वमित्येकस्यैव कार्यकारणभावस्य सकलशाब्दसाधारणत्वेन लाघवात्। पृथक्पृथग् व्युत्पत्तीनां कार्यकारणभावनियामकत्वे ह्यऽनेककार्यकारणभावानां स्वीकारापत्त्या गौरवाञ्चेत्यर्थः। स्वाभिप्रायं प्रकटयति– न हीति। तत्र='राज्ञः पुरुषः' इत्यत्र। तत्स्थलीयसामग्रीबलात्='राज्ञः

प्रसङ्गः संभवति– तत्स्थलीयसामग्र्याः षष्ठ्यन्तराजपदत्वाद्यव-च्छिन्नधर्मिकपुरुषादिपदसमभिव्याहाररूपाकाङ्क्षाज्ञानघटि-ततया तदभावादेव तत्र तादृशसामग्र्या अभावात्।

एवं च 'राजपुरुषः' इत्यादिसमासे राजादिपदस्य राजसंबन्ध्यादिलक्षणास्वीकारोऽपि व्यर्थः– अत्र भेदान्व-यबोधस्वीकारेऽपि क्षतिविरहात्। न च तत्र भेदान्वयबोधाभ्युपगमे

पुरुषः' इत्यत्र वर्तमानङसन्तराजपदप्रथमान्तपुरुषपदघटितसामग्रीबलात् तथा-विधान्वयबोधोपगमे=निरूपितत्वसम्बन्धेन राजविशिष्टस्वत्वप्रकारकपुरुष-विशेष्यकबोधस्वीकारेऽपि 'राजा पुरुषः' इत्यत्र उक्तस्वत्वप्रकारक-पुरुषविशेष्यकबोधापत्तेरभावात् षष्ठ्यन्तराजपदाभावात्, एतदेवाह–तत्स्थलीयेति। तत्स्थलीयसामग्र्याः='राज्ञः पुरुषः' इत्यत्रत्य सामग्र्याः षष्ठ्यन्तं यद्राजपदं तद्विशेष्यकं यत् पुरुषपदसमभिव्याहाररूपाकाङ्क्षाज्ञानं तद्घटितत्वेन, तत्र='राजा पुरुषः' इत्यत्र च तदभावात्=षष्ठ्यन्तराजपदत्वावच्छिन्न- विशेष्यकपुरुषपद-समभिव्याहाररूपाकाङ्क्षाज्ञानाभावादेव तादृशसामग्र्याः=स्वत्वप्रकारक-पुरुषविशेष्यकशाब्दबोधजनकसामग्र्या अभावान्न स्वत्वप्रकारक-पुरुषविशेष्यकशाब्दबोधापत्तिरित्यर्थः।

एवं चेति–यथा 'राज्ञः पुरुषः' इत्यत्र भेदान्वयबोधो भवति तथा 'राजपुरुषः' इत्यत्रापि भेदान्वयबोधः स्वीकर्तव्यः– यतोऽत्र राजपदस्य राजसम्बन्धिनि लक्षणां स्वीकृत्याभेदान्वयबोधे राजपुरुषयोर्यः स्वस्वामिभासम्बन्धः प्रतीयते तस्य भेदान्वयबोधस्वीकारेऽप्यनुपपत्तिर्नास्तीति राजपदस्य राजसम्बन्धिनि लक्षणास्वीकारो व्यर्थो गौरवादित्यर्थः। ननु यदि 'राजपुरुषः' इत्यत्र भेदान्वयः स्वीक्रियेत तदात्र भेदान्वयं प्रति षष्ठ्यन्तत्वमनिवेश्य केवलं राजपदपुरुषपदयोः समभिव्याहाररूपाकाङ्क्षाज्ञानस्य कारणत्वं वक्तव्यं तथा च राजपदपुरुषपदसमभिव्याहाररूपाकाङ्क्षाज्ञानस्य 'राजा पुरुषः' इत्यत्रापि सत्त्वात् 'राजपुरुषः' इति दृष्टान्तेन 'राजा पुरुषः' इत्यत्रापि भेदान्वयबोधापत्तिः स्यादिति तद्वारणाय 'राजपुरुषः' इत्यत्र न भेदान्वयबोधः स्वीकार्यः किं तु राजपदस्य राजसम्बन्धिनि लक्षणाद्वाराऽभेदान्वयबोध एव स्वीकार्य इत्याशङ्क्याह– न चेति। तत्र= 'राजपुरुषः' इत्यत्र। तत्स्थलीयसामग्रीबलात्=

तत्स्थलीयसामग्रीबलात् 'राजा पुरुषः' इत्यादावपि तादृशान्वयबोधापत्तिरिति वाच्यम्, तत्स्थलीयशाब्दबोधे राजपदाव्यवहितोत्तरपुरुषादिपदत्वरूपानुपूर्वीविशेषज्ञानस्य हेतुतयाऽसमासस्थले पुरुषादिपदस्य विभक्त्या राजादिपदव्यवहितत्वात् तादृशानुपूर्वीविशेषज्ञानाऽसंभवेन तत्र तादृशबोधसामग्र्या असिद्धेः।

न च प्रकृतिप्रत्यययोरानुपूर्वीविशेषरूपस्यासाकाङ्क्षात्वात् प्रातिपदिकद्वयाव्यवधानघटितोक्तानुपूर्वीविशेषज्ञानस्य हेतुत्वमेव निष्प्रामाणिकमिति वाच्यम्, भवन्मतेऽपि 'राजपुरुषः' इत्यादौ तादृशसामग्रीबलाद् राजपदार्थराजसंबन्धिपुरुषपदार्थयोर-

---

'राजपुरुषः' इत्यत्र वर्तमानसामग्रीसदृशसामग्रीबलात्। तादृशान्वयबोधापत्तिः=भेदान्वयबोधापत्तिः। परिहारहेतुमाह—तत्स्थलीयेति, राजपुरुषः' इत्यत्र भेदान्वयस्वीकारेऽपि तादृशभेदान्वयबोधं प्रति राजपदाव्यवहितोत्तरपुरुषपदसमभिव्याहाररूपाकाङ्क्षाज्ञानस्य हेतुत्वं वक्ष्याम एतादृशाकाङ्क्षाज्ञानम् 'राजा पुरुषः' इत्यत्र तु नास्त्येव राजपदपुरुषपदयोर्मध्ये प्रथमाविभक्त्या व्यवधानादिति न 'राजपुरुषः' इत्यस्य दृष्टान्तेन 'राजा पुरुषः' इत्यत्र भेदान्वयबोधापत्तिः संभवतीत्यर्थः। तादृशानुपूर्वी=राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वी। तत्र='राजा पुरुषः' इत्यत्र। तादृशबोधसामग्र्याः=भेदान्वयबोधस्योक्तसामग्र्याः।

न चेति। निष्प्रामाणिकमिति— प्रातिपदिकद्वयस्याव्यवधानमेव न सर्वत्र संभवति मध्ये विभक्तिव्यवधानसंभवादिति प्रातिपदिकद्वयाव्यवधानघटितोक्तानुपूर्वीविशेषस्य कथं शाब्दबोधविशेषं प्रति हेतुत्वं स्यात्? तस्मादव्यवहितप्रकृतिप्रत्ययानुपूर्वीविशेषस्यैव हेतुत्वं वक्तव्यं प्रकृतिप्रत्ययोः सर्वत्राव्यवधानसंभवात् सर्वत्रानुगतस्यैव च कारणत्वौचित्यात् तथा च—आनुपूर्वीज्ञानस्याऽकारणत्वे 'राजपुरुषः' इति समासे या सामग्री वर्तते सा 'राजा पुरुषः' इत्यत्रापि राजपदपुरुषपदजन्योपस्थितिघटितयोग्यताज्ञानादिसामग्र्यस्तीति 'राजपुरुषः' इत्यत्र भेदान्वयबोधस्वीकारे तद्दृष्टान्तेन 'राजा पुरुषः' इत्यत्रापि राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकभेदान्वयबोधस्यापत्तिरस्त्येवेति तद्वारणाय आनुपूर्वीविशेषस्य (राजपदाव्यवहितपुरुषपदत्वानुपूर्वीविशेषस्य) कारणत्वकल्पनप्रयुक्तं गौरवं पूर्वपक्षिमतेऽतिरिच्यते

भेदान्वयबोधः तादृशसामग्रीबलात् 'राज्ञः पुरुषः' इत्यादावपि राजादिपदस्य राजसंबन्ध्यादौ लक्षणाग्रहसत्त्वे तादृशाऽभेदान्वयबोधप्रसङ्गवारणाय तथाविधानुपूर्वीविशेषज्ञानस्य समासजन्यबोधे हेतुताकल्पनस्यावश्यकत्वात्। अस्माभिर्भेदान्वयबोधे एव तादृशानुपूर्वीविशेषज्ञानस्य हेतुतायाः कल्पनीयत्वात्।

'राजपुरुषः' इत्यत्राभेदान्वयवादिसिद्धान्तिपक्षे त्वत्राभेदान्वयस्य राजपदस्य राजसम्बन्धिनि लक्षणैव नियामिका तदभावादेव 'राजा पुरुषः' इत्यत्र नाऽभेदान्वयापत्तिरित्यत्राभेदान्वयापत्तिवारणाय राजपदपुरुषपदयोरव्यवधानघटितानुपूर्वीज्ञानस्य कारणत्वकल्पनापेक्षाऽभावेनोक्तगौरवाभावाल्लाघवमितिभाव इतिकृष्णभट्टाभिप्रायः। परिहरति—भवन्मतेऽपीति, सिद्धान्तिमतेऽपि यथा 'राजपुरुषः' इत्यत्र तादृशसामग्रीबलात्=लक्षणाघटितसामग्रीबलादभेदान्वयबोधो जायते तथा 'राज्ञः पुरुषः' इत्यत्रापि राजपदस्य राजसम्बन्धिनि लक्षणाग्रह ेजाते तादृशसामग्रीबलात्=लक्षणाघटितसामग्रीबलादभेदान्वयबोधापत्तिरस्त्येति 'राज्ञः पुरुषः' इत्यत्राभेदान्वयबोधापत्तिवारणाय समासजन्यबोधे='राजपुरुषः' इति समस्तपदजन्याभेदान्वयबोधे तथाविधानुपूर्वीविशेषज्ञानस्य=राजपदाव्यवहितोत्तरपुरुषपदानुपूर्वी विशेषरूपाकाङ्क्षाज्ञानस्य कारणत्वकल्पनमावश्यकमेव (तथा च 'राज्ञः पुरुषः' इत्यत्र राजपदपुरुषपदयोरव्यवहितानुपूर्व्यऽभावादेवाऽभेदान्वयबोधापत्तिर्न स्यात्) तथा च यथा त्वया तथाविधानुपूर्वीविशेषज्ञानस्य 'राजपुरुषः' इत्यत्राभेदान्वयबोधं प्रति कारणत्वं कल्प्यते तथा मया भेदान्वयबोधं प्रत्येव कारणत्वं कल्प्यते तथा च भेदान्वयबोधकारणस्य तादृशानुपूर्वीविशेषज्ञानस्य=राजपदाव्यवहितपुरुषपदानुपूर्वीविशेषज्ञानस्य 'राजपुरुषः' इत्यत्र सत्त्वाद् भेदान्वयबोध एव स्वीकार्यो नाभेदान्वयबोधस्तत्र राजपदस्य राजसम्बन्धिनि लक्षणापत्त्या गौरवादित्यर्थः। न चैवम् 'राज्ञः पुरुषः' इत्यत्र भेदान्वयबोधो न स्याद् भेदान्वयकारणीभूतोक्तराजपदाव्यवहितपुरुषपदानुपूर्वीविशेषज्ञानस्याभावात् षष्ठ्या व्यवधानादिति वाच्यम्, उक्तकार्यकारणभावस्य समासस्थलार्थमेव कल्पितत्वात् असमासस्थले 'राज्ञः पुरुषः' इत्यादौ तु भेदान्वयबोधं प्रति षष्ठ्यन्तराजादिपदसमभिव्याहारस्य वा विरुद्धविभक्त्यन्तपदयोः समभिव्याहारज्ञानस्य वा कारणत्वादिति न काप्यनुपपत्तिरिति सूचितम्—"समासजन्यबोधे" इत्यनेन।

न चोभयमते एव राजसंबन्धिनि राजपदस्य स्वारसिकलक्षणाग्रहेण 'राजपुरुषः' इत्यत्र राजसंबन्धिपुरुषयोरभेदान्वयबोधो भवति, इयांस्तु विशेषः—यदस्मन्मतेऽसौ समासः षष्ठीतत्पुरुषो भवन्मते कर्मधारय इति एवञ्च पुरुषविशेष्यकाऽभेदसंसर्गकराजसंबन्धिप्रकारकबोधे राजपदाव्यवहितोत्तरवर्तिपुरुषपदत्वप्रकारकज्ञानत्वेन हेतुत्वमुभयवादि-

---

पुनः सिद्धान्ती 'राजपुरुषः' इत्यत्र भेदान्वयबोधस्वीकर्तृपूर्वपक्षिमते गौरवं प्रदर्शयति— न चेत्यादिना। 'राजपुरुषः' इत्यत्र राजपदस्य यदि कस्यचित् राजसम्बन्धिनि स्वारसिकलक्षणग्रहः स्यात्तदा राजपदाल्लक्षणयोपस्थितराजसम्बन्धिनः पुरुषेऽभेदान्वयस्य ममेव तवापि स्वीकारावश्यकत्वादभेदान्वयबोधं प्रति राजपदाव्यवहितोत्तरवर्तिपुरुषपदत्वप्रकारकं यदानुपूर्वीज्ञानं तस्य कारणत्वमुभयवादि (तव मम च) सिद्धमेव त्वया तु तादृशाव्यवहितानुपूर्वीज्ञानस्य राजपदस्य राजसम्बन्धिनि लक्षणाग्रहाभावकाले भेदान्वयबोधं प्रत्यपि कारणत्वं कल्पनीयमिति गौरवमित्यर्थः। किञ्च लक्षणाग्रहनिवेशे ततोप्यधिकं गौरवम्, केवलक्षणाया एवाभेदान्वयबोधनियामकत्वे मदीयमतस्वीकारापत्तिरित्यवधेयम्। 'राजपुरुषः' इत्यत्र राजपदस्य राजसम्बन्धिनि स्वारसिकलक्षणाग्रहकालिकः स्वस्य प्रतिवादिनश्च यावान् भेदस्तमाह— इयांस्त्विति, 'राजपुरुषः' इत्यत्र लक्षणाग्रहे सत्यभेदान्वयबोधकालेऽसौ समासो मम मते षष्ठीतत्पुरुषः 'राज्ञः पुरुषः' इति विग्रहस्वीकारात् ङसन्तराजपदस्य राजसंबंधविशिष्टे लक्षणास्वीकारात्, तव मते चासौ समासः कर्मधारय एव 'राजाा चासौ पुरुषो राजपुरुषः' इति विग्रहस्वीकारात् प्रथमान्तराजपदस्यैव राजसम्बन्धिनि लक्षणास्वीकारात् राजसम्बन्धित्वपुरुषत्वेति विभिन्नप्रवृत्तिनिमित्तधर्माभ्यां पदाभ्यामेकधर्मिबोधनादित्यर्थः। पूर्वपक्षी परिहरति— उक्तेति, 'राजपुरुषः' इत्यत्र राजप्रकारकपुरुषविशेष्यकाभेदान्वयबोधं प्रति तथाविधानुपूर्वीज्ञानहेतुतायाम्=राजपदाव्यवहितोत्तरपुरुषपदानुपूर्वीज्ञानस्य हेतुत्वे यत्र 'नृपपुरुषः' 'नृपति नरः' इत्यादौ राजपुरुषपदपर्यायशब्दान्तरघटितानुपूर्वीज्ञानभेदान्वयबोधो भवति तत्र राजपदाव्यवहितोत्तरपुरुषपदज्ञानस्यासत्त्वाद् अभेदान्वयबोधरूपकार्यस्य च सत्त्वाद् व्यभिचारः प्राप्त इति तादृशव्यभिचारवारणाय तत्तदनुपूर्वीज्ञानानन्तर्यस्य कार्यतावच्छेदककोटौ निवेशः कर्तव्यो यथाराजपदाव्यवहितोत्तर-

सिद्धमेव भेदान्वयबोधे तादृशानुपूर्वीज्ञानहेतुताकल्पनमधिकमिति वाच्यम्, उक्ताऽभेदान्वयबोधे तथाविधानुपूर्वीज्ञानहेतुतायां पर्यायशब्दान्तरघटितानुपूर्वीज्ञानजन्यतथाविधान्वयबोधे व्यभिचारवारणाय तादृशानुपूर्वीज्ञानानन्तर्यस्य कार्यतावच्छेदककोटाववश्यं निवेशनीयतया तत्र विषयनिवेशे प्रयोजनाभावेन तादृशकार्यतावच्छेदकस्यैव भेदान्वयबोधसाधारण्येनानुपूर्वीज्ञानस्य भेदान्वयबोधे हेतुताया अनाधिक्यात्।

पुरुषपदानुपूर्वीज्ञानोत्तरत्वविशिष्टराजप्रकारकपुरुषविशेष्यकभेदान्वयबोधं प्रति राजपदाव्यवहितपुरुषपदानुपूर्वीज्ञानस्य हेतुत्वम् नृपतिपदाव्यवहितोत्तरनरपदानुपूर्वीज्ञानोत्तरत्वविशिष्टराजप्रकारकपुरुषविशेष्यकाभेदान्वयबोधं प्रति नृपतिपदाव्यवहितोत्तरनरपदानुपूर्वीज्ञानस्य कारणत्वमित्यादि, एवं हि कार्यतावच्छेदककोटौ तत्तदानुपूर्वीज्ञानानन्तर्यस्य निवेशे कृते विषयनिवेशे= सम्बन्धरूपविषयनिवेशस्य प्रयोजनं नास्त्येव कारणानन्तर्यनिवेशेन तादृशशाब्दबोधं प्रत्येव तादृशानुपूर्वीज्ञानस्यैव हेतुत्वप्राप्तौ व्यभिचारासंभवाद् व्यभिचारवारणार्थमेव विषयसनिवेशस्यावश्यकत्वात् तथा च राजपदाव्यहितोत्तरपुरुषपदानुपूर्वीज्ञानानन्तरजायमान राजप्रकारकपुरुषविशेष्यकशाब्दबोधं प्रति राजपदाव्यहितोत्तरपुरुषपदानुपूर्वीज्ञानस्य हेतुत्वमित्येवं भेदान्वयबोधाऽभेदान्वयबोधसाधारणं कार्यकारणभावं वक्ष्याम इति न भेदान्वयबोधं प्रत्युक्तानुपूर्वीज्ञानस्य पृथग् हेतुत्वकल्पनापेक्षेति नाधिक्यमित्यर्थः। तादृशकार्येति, राजप्रकारकपुरुषविशेष्यकशाब्दबोधत्वस्य कार्यतावच्छेदकस्य भेदान्वयबोधसाधारण्यात्– 'राज पुरुषः' इत्यत्र भेदान्वयबोधो वा भवत्वभेदान्वयबोधो वा भवतु राजप्रकारकपुरुषविशेष्यकबोधस्योभयत्रैव जायमानत्वाद् राजप्रकारकपुरुषविशेष्यकबोधत्वस्योभयविधबोधसाधारणत्वात्तादृशोभयबोधसाधारणराजप्रकारकत्वपुरुषविशेष्यकत्व प्रत्येव राजपदाव्यवहितोत्तरपुरुषपदानुपूर्वीज्ञानस्य हेतुत्वकल्पनान्नाधिक्यम्।

यथा 'राज्ञः पुरुषः' इत्यत्र स्वत्वस्योक्तरीत्या संसर्गत्वमेव युक्तं न प्रकारत्वं तथा 'तण्डुलं पचति' इत्यत्र द्वितीयार्थकर्मत्वस्यापि संसर्गत्वमेवोचितं न तु प्रकारत्वमित्याह–एवमित्यादिना। तथा चात्र कर्मत्वसम्बन्धेन

एवम् 'तण्डुलं पचति' इत्यादावपि पाकादिरूपधात्वर्थे कर्मत्वादिसंबन्धेन तण्डुलादेरन्वयबोधः स्वीकर्तुमुचितः। कर्मत्वस्य पाकाद्यंशे प्रकारत्वे तत्र तत्र द्वितीयादेः शक्तिकल्पने तादृशवाक्यजन्यशाब्दबोधे कर्मत्वादिसंसर्गस्याधिकस्य विषयताकल्पने च गौरवात्। 'तण्डुलं पचति' इत्यादिवाक्यजन्य-शाब्दबोधसामग्रीबलात् 'तण्डुलः पचति' इत्यादावपि तथाविधान्वयबोधापत्तिस्तु न संभवति– तादृशान्वयबोधे द्वितीयान्ततण्डुलपदत्वाद्यवच्छिन्नधर्मिकपचतीत्यादिसमभि-व्याहारज्ञानस्य हेतुतया 'तण्डुलः पचति' इत्यादौ तादृश-सामग्र्या अप्रसिद्धेः।

पाकादिधात्वर्थे तण्डुलाद्यन्वयः कर्तव्य इत्यर्थः। विपक्षे बाधकमाह– कर्मत्वस्येति, कर्मत्वस्य प्रकारत्वस्वीकारे ह्यनुपस्थितस्य प्रकारतया भानं न भवति, उपस्थितिश्च शक्तिग्रहं विना न भवतीति तत्र तत्र=कर्मत्वादिषु द्वितीयादिविभक्तीनां शक्तिकल्पनापेक्षा प्राप्ता तथा तादृश='तण्डुलं पचति' इत्यादिवाक्यजन्यशाब्दबोधे प्रकारभूतकर्मत्वादेरपि सम्बन्धस्याश्रयत्वादिरूपस्य विषयताकल्पना प्राप्तेति गौरवं स्यात्, कर्मत्वस्य संसर्गत्वस्वीकारे त्वेतद् गौरवं नास्त्येव– अनुपस्थितस्यापि संसर्गतया भानसंभवेन कर्मत्वादौ द्वितीयादिविभक्तिशक्तिकल्पनापेक्षाभावात् संसर्गत्वेन भासमानकर्मत्वादीनां सम्बन्धान्तरस्याश्रयत्वादेः शाब्दबोधविषयत्वकल्पनापेक्षाभावाच्चेति संसर्गतावादे लाघवमित्यर्थः।

ननु कर्मत्वस्य संसर्गत्वे वृत्त्या तदुपस्थित्यपेक्षाभावेन यथा 'तण्डुलं पचति' इत्यत्र कर्मत्वसम्बन्धेन पाके तण्डुलान्वयबोधस्तथा 'तण्डुलः पचति' इत्यत्रापि बोधः स्यात् प्रकारत्वस्वीकारे त्वनुपस्थितस्य प्रकारतया भानाभावनियमेन 'तण्डुलः पचति' इत्यत्र कर्मत्वोपस्थापकद्वितीयाऽभावादेव न तादृशान्वयबोधः प्रथमायाः कर्मत्वे शक्त्यभावादित्याशङ्क्याह– तण्डुलमित्यादिना। न संभवतीत्युक्ते हेतुमाह– तादृशेति, कर्मत्वसम्बन्धेन पाके तण्डुलान्वयबोधं प्रति द्वितीयान्ततण्डुलपदसमभिव्याहारस्य कारणत्वात् 'तण्डुलः पचति' इत्यत्र द्वितीयान्ततण्डुलपदाभावाच्च न तादृशान्वय-

एवम् 'पचति चैत्रः' इत्यादावपि कृतिसंबन्धेन पाकादेश्चैत्राद्यंशेऽन्वयबोधस्वीकार उचितः, अन्यथा–उक्तरीत्या गौरवात्। तत्र तादृशान्वयबोधस्वीकारे तत्स्थलीयसामग्रीबलात् 'पच्यते चैत्रः' 'पाकश्चैत्रः' इत्यादौ तथाविधान्वयबोधापत्तेरप्युक्तरीत्या वारणसंभवादिति।

मैवम्– 'राज्ञः पुरुषः' इत्यादौ षष्ठ्यादेः स्वत्वादिवाचकत्वमावश्यकम्, अन्यथा– 'पुरुषो न राज्ञः' इत्यादौ पुरुषे

बोधापत्तिरित्यर्थः।

एवम् 'पचति चैत्रः' इत्यत्र कृतिसम्बन्धेन पाकादेश्चैत्रादावन्वयबोधस्तत्रापि कृतेः संसर्गत्वमेवोचितं न प्रकारत्वमित्याह–एवमिति। विपक्षे बाधकमाह–अन्यथेति, अन्यथा=कृतेः प्रकारत्वस्वीकारे, उक्तरीत्या=यथा 'तण्डुलं पचति' इत्यत्र कर्मत्वादौ द्वितीयादेः शक्तिकल्पनापेक्षा स्यात् प्रकारत्वे तथात्रापि कृतावाख्यातस्य शक्तिकल्पनापेक्षा स्यात् प्रकारीभूतकृतेश्चाश्रयतारूपसम्बन्धकल्पनापेक्षा स्यादिति गौरवम्। कृतेः संसर्गत्वस्वीकारे चैतादृशं गौरवं नास्ति– अनुपस्थितस्यापि संसर्गतया भानसंभवात् कृतावाख्यातस्य शक्तिकल्पनापेक्षाभावाद् संसर्गभूतकृतिप्रतीत्यर्थं सम्बन्धान्तरापेक्षाभावादाश्रताख्यसम्बन्धकल्पनाभावाच्चेत्यर्थः। ननु कृतेः संसर्गत्वे तदुपस्थित्यपेक्षाभावेन तदुपस्थापकापेक्षाभावात् 'पच्यते चैत्रः' 'पाकश्चैत्रः' इत्यादावपि कृतिसम्बन्धेन पाकादेश्चैत्रादावन्वयबोधः स्यात्, प्रकारत्वस्वीकारे त्वनुपस्थितस्य प्रकारत्वासंभवात्तदुपस्थापकशब्विकरणविशिष्टाख्यातस्यात्राभावान्न 'कृतिसम्बन्धेन पाकवांश्चैत्रः' इतिबोधः। उक्तरीत्या वारणसंभवात्=कृतेः संसर्गत्वस्वीकारे उक्तान्वयबोधं प्रति शर्ब्विकरणविशिष्टाख्यातान्तधातुपदसमभिव्याहारस्य कारणत्वस्वीकारात् 'पच्यते चैत्रः' इत्यादौ च शब्विकरणविशिष्टाख्यातान्तधातुपदाभावान्न 'कृतिसम्बन्धेन पाकवांश्चैत्रः' इत्यन्वयबोधापत्तिरित्यर्थः।

प्रकारतावादी संसर्गतावादं परिहरति– मैवमित्यादिना, अनुपस्थितस्य प्रकारतया भानासंभवेन तदुपस्थित्यर्थम् 'राज्ञः पुरुषः' इत्यत्र स्वत्वे षष्ठ्याः शक्तिकल्पनं कर्तव्यं षष्ठयाद्यर्थभूतस्वत्वादीनां प्रकारत्वमेवोचितमित्यर्थः।

राजस्वत्वाद्यभावबोधानुपपत्तेः। न हि तत्र स्वत्वादिसंबन्धावच्छिन्नप्रतियोगिताकराजाद्यभाव एव प्रतीयते न तु राजस्वत्वाद्यभाव इति संभवति। स्वत्वादिसंबन्धस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वेन तत्संबन्धावच्छिन्नप्रतियोगिताकाऽभावाऽप्रसिद्धेः।

अत एव स्वामित्वादिकं परित्यज्य स्वत्वादेः षष्ठ्यर्थत्वं नवीनाः स्वीकुर्वन्ति–स्वामित्वादेः षष्ठ्यर्थत्वे तस्य निरूपकता–

विपक्षे बाधकमाह– अन्यथेति। अन्यथा=स्वत्वादेः संसर्गत्वे 'पुरुषो न राज्ञः' इत्यत्र राजस्वत्वप्रतियोगिकाभावबोधो न स्यात्– स्वत्वस्य संसर्गत्वेन प्रतियोगितावच्छेदकसम्बन्धत्वेनैव भानसंभवात्। प्रकारत्वे तु तस्यापि शक्यत्वेन पदार्थत्वात् स्वत्वप्रतियोगिकाभावप्रतीतिः संभवति तथा च 'राज्ञः पुरुषः' इत्यत्र राजनिरूपितस्वत्ववान् पुरुष इत्येव बोधो न तु स्वत्वसम्बन्धेन राजवान् पुरुष इति बोध इत्यर्थः। ननु 'पुरुषो न राज्ञः' इत्यत्र स्वत्वस्य प्रतियोगितावच्छेदकसम्बन्धत्वेनैव भानं भवति न तु प्रतियोगित्वेन येन स्वत्वस्य प्रकारत्वं स्यादित्याशङ्क्याह– न हीति। तत्र='पुरुषो न राज्ञः' इत्यत्र। राजस्वत्वाद्यभावः=राजनिरूपितस्वत्वप्रतियोगिकाभावः। 'पुरुषो न राज्ञः' इत्यत्र। स्वत्वस्य प्रतियोगितावच्छेदकसम्बन्धत्वे बाधकमाह– स्वत्वादीति आश्रयत्वसंयोगादीनामेव वृत्तिनियामकसम्बन्धानां प्रतियोगितावच्छेदकसम्बन्धत्वं भवति– येन सम्बन्धेन यः पदार्थो यत्र वर्तते तेनैव सम्बन्धेन तत्रैव तत्पदार्थस्याभावोऽपि नञा प्रत्याय्यते स्वत्वसम्बन्धेन तु न कस्यचित् पदार्थस्य राजादेः पुरुषादौ स्थितिः संभवति, न हि 'राज्ञः पुरुषः' इत्युक्ते स्वत्वसम्बन्धेन राज्ञः पुरुषे स्थितिः प्रतीयते येन स्वत्वस्य वृत्तिनियामकत्वं स्यात्, वृत्तिनियामकत्वाभावेन स्वत्वस्य प्रतियोगितावच्छेदकसम्बन्धत्वाभावात् तत्=स्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य क्वचिदपि प्रसिद्धत्वाभावाच्च न 'पुरुषो न राज्ञः' इत्यत्रापि स्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभावः प्रतीयते किन्तु राजस्वत्वाभाव एव, तस्मात् स्वत्वस्य प्रकारत्वमेव युक्तं न संसर्गत्वमित्यर्थः।

अत एव=वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकसम्बन्धत्वा–

संबन्धेन पुरुषांशेऽन्वयसंभवेपि तादृशसंबन्धस्य वृत्त्यनियामकतया संसर्गाभावप्रतियोगितानवच्छेदकत्वेन तत्संबन्धावच्छिन्नाभावस्य नञा प्रत्यायनासंभवात्। आश्रयतासंबन्धाद्यवच्छिन्नाभावबोधस्यैतादृशसमभिव्याहारस्थलेऽभ्युपगमे चैत्रादिसंबन्धिनि धनेऽप्याश्रयतासंबन्धावच्छिन्नप्रतियोगिताकचैत्रवृत्तिस्वामित्वाभावसत्त्वात् 'नेदं चैत्रस्य' इति प्रयोगापत्तिः।

भावादेव। यदि स्वामित्वं षष्ठ्यर्थः स्यात्तदा पुरुषस्य स्वामित्वनिरूपकत्वाद् निरूपकत्वसम्बन्धेन स्वामित्वस्य पुरुषेऽन्वयसंभवाच्च 'राज्ञः पुरुषः इत्यत्र निरूपकतासम्बन्धेन राजनिष्ठस्वामित्ववान् पुरुष इति पुरुषविशेष्यकबोधसंभवेऽपि तादृशसम्बन्धस्य=निरूपकतासम्बन्धस्य वृत्त्यनियामकत्वेन संसर्गाभावप्रतियोगितावच्छेदकसम्बन्धत्वासंभवात् 'पुरुषो न राज्ञः' इत्यत्र नञा तत्सम्बन्धावच्छिन्नाभावस्य=निरूपकत्वसम्बन्धावच्छिन्नप्रतियोगिताकस्वामित्वाभावस्य प्रतीतिर्न संभवतीति न स्वामित्वं षष्ठ्यर्थः, स्वत्वस्य षष्ठ्यर्थत्वे तु स्वत्वं हि पुरुषे आश्रयतासम्बन्धेन वर्तते, आश्रयतासम्बन्धश्च वृत्तिनियामक एवेति आश्रयतासम्बन्धेन पुरुषे राजस्वत्वाभावप्रतीतिः संभवत्येव– आश्रयत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजनिरूपितस्वत्वाभाववान् पुरुष इति बोधसंभवादित्यर्थः। ननु स्वामित्वमेव षष्ठ्यर्थ एतादृशसमभिव्याहार स्थले='पुरुषो न राज्ञः' इति नञ्समभिव्याहारस्थले आश्रयतासम्बन्धावच्छिन्नप्रतियोगिताकाभावस्यैव बोधो भवतीति स्वीकरिष्यामः– आश्रयतासम्बन्धस्य वृत्तिनियामकत्वेन संसर्गाभावप्रतियोगितावच्छेदकत्वसंभवादित्याशङ्क्याह– आश्रयतेति, एवं हि आश्रयतासम्बन्धेन स्वामित्वस्य पुरुषे सदैवाऽभावाद् राजपुरुषेऽपि 'पुरुषो न राज्ञः' इति प्रतीतिः स्यादेव तथा चैत्रसम्बन्धिन्यपि धने आश्रयतासम्बन्धेन स्वामित्वस्यासत्त्वात् 'नेदं चैत्रस्य' इति प्रतीत्यापत्तिः किं वा प्रयोगापत्तिः स्यादेव । न आश्रयतासम्बन्धेन स्वकीये धनपुरुषादौ स्वामित्वं वर्तते किन्तु स्वामिन्येव। तथा च निरूपकतासम्बन्धेन धनपुरुषादौ नञ्सत्त्वे स्वामित्वाभावो वक्तव्यः निरूपकतासम्बन्धस्य च संसर्गाभावप्रतियोगितावच्छेदकत्वं न संभवति वृत्त्यनियामकत्वादिति न स्वामित्वं षष्ठ्यर्थः किं तु स्वत्वमेवेत्यर्थः।

न च नञसमभिव्याहारस्थलानुरोधेन षष्ठ्यादेः स्वत्वादिवाचकत्वेऽपि 'राज्ञः पुरुषः' इत्यादौ षष्ठ्याद्यर्थस्य संसर्गमर्यादया भानमुचितम्– तस्य प्रकारत्वोपगमे तत्संबन्धस्याधिकस्य भानकल्पनेन गौरवात्। नञ्समभिव्याहारस्यैव तत्प्रकारकबोधनियामकत्वाभ्युपगमेन सामग्रीविरहात् तत्प्रकारकबोधस्य तदऽसमभिव्याहारस्थलेऽसंभवादिति वाच्यम्, एवं सति नञ्पदं

न चेति–स्वामित्वस्य षष्ठ्यर्थत्वे 'पुरुषो न राज्ञः' इत्यत्र निरूपकत्वसम्बन्धेनापि पुरुषे स्वामित्वाभावो नञा न प्रत्यायितुं शक्यते निरूपकत्वसम्बन्धस्य वृत्त्यनियामकत्वात् आश्रयतासम्बन्धस्य वृत्तिनियामकत्वेन तेन स्वामित्वाभावः प्रत्याययितुं तु शक्यते किं तूक्तरीत्या चैत्रधनेऽपि 'नेदं चैत्रस्य' इति प्रयोगः स्यादिति यदि षष्ठ्यर्थः स्वामित्वं न संभवति नञ्समभिव्याहारस्थलानुरोधेन तदा स्वत्वमेवास्तु षष्ठ्यर्थः किन्तु षष्ठ्यर्थस्यापि स्वत्वस्य संसर्गत्वमेवोचितं न तु प्रकारत्वमित्यर्थः। स्वत्वस्य प्रकारत्वे बाधकमाह– तस्येति तस्य=स्वत्वस्य प्रकारत्वे तत्सम्बन्धस्याप्यधिकस्य भानापत्त्या गौरवात् यथात्र पुरुषे स्वत्वमाश्रयतासम्बन्धेन भासेत। राजनिरूपितस्वत्वाश्रयः पुरुष इति, प्रकारीभूतपदार्थस्य सम्बन्धान्तरं विना भानासंभवात्। ससंर्गभूतपदार्थभानार्थं तु सम्बन्धान्तरस्यापेक्षाभावात् तस्य स्वयमेव संसर्गत्वाद् यथात्र स्वत्वसम्बन्धेन राजवान् पुरुष इति संसर्गतामते बोध इत्यर्थः। नन्वेवं नञ्समभिव्याहारस्थलेऽपि स्वत्वस्यैव प्रतियोगितावच्छेदकसम्बन्धत्वं वक्तव्यं तच्चोक्तरीत्या न संभवति स्वत्वस्य वृत्त्यनियामकत्वादित्याशङ्क्याह– नञ्समभिव्याहारस्येति, 'पुरुषो न राज्ञः' इत्यादिनञ्समभिव्याहारस्थले स्वत्वस्य संसर्गत्वं नोपपद्यते इति प्रकारत्वमेव, नञऽसमभिव्याहारस्थले 'राज्ञः पुरुषः' इत्यादौ तु स्वत्वस्य संसर्गत्वमेव, तथा च नञ्समभिव्याहारस्यैव स्वत्वप्रकारकबोधनियामकतया नञऽसमभिव्याहारस्थले 'राज्ञः पुरुषः' इत्यादौ सामग्रीविरहात्=नञ्पदसमभिव्याहाराभावात् तत्प्रकारकबोधस्य=स्वत्वप्रकारकबोधस्यासंभवात् स्वत्वसंसर्गकबोधोपपत्त्या स्वत्वस्य संसर्गत्वमेवोचितमित्यर्थः।

परिहरति– एवं सतीति, 'राज्ञः पुरुषः' इत्यत्र स्वत्वस्य संसर्गत्वम् 'पुरुषो न राज्ञः' इत्यत्र च स्वत्वस्य प्रकारत्वमिति वैषम्यं न संभवति यतः

विना यादृशसमभिव्याहारस्थले यत्र धर्मिणि येन संबन्धेन यस्य विशेषणतया भानं तत्र नञ्समभिव्याहारे तत्र धर्मिणि तत्संबन्धावच्छिन्नप्रतियोगिताकतदभावः प्रतीयते इति सर्वजनानुभवस्याऽपलापापत्तेः। 'राज्ञः पुरुषः' इति वाक्यजन्याऽप्रामाण्यज्ञानानास्कन्दितबोधदशायाम् 'पुरुषो न राज्ञः'

प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ भवतः। नञ्पदं विनेति– यथा 'घटवद् भूतलम्' इत्यत्र यत्र धर्मिणि=भूतले येन सम्बन्धेन=संयोगसम्बन्धेन यस्य=घटस्य विशेषणतया भानं भवति तत्र=तत्स्थले 'घटवद् भूतलम्' इति वाक्ये नञ्समभिव्याहारे 'भूतलं न घटवत्' इत्यत्र तत्र धर्मिणि तत्सम्बन्धावच्छिन्न-प्रतियोगिताकतदभावः=संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावः प्रतीयते, एवं प्रकृतेऽपि यदि 'राज्ञः पुरुषः' इत्यत्र नञऽसमभिव्याहारे पुरुषे स्वत्वसम्बन्धेन राजपदार्थस्य विशेषणतया भानं स्यात्तदा 'पुरुषो न राज्ञः' इत्यत्र नञ्समभिव्याहारेऽपि पुरुषे स्वत्वसम्बन्धेन राजपदार्थाभाव-स्यैव=स्वत्वसम्बन्धावच्छिन्नराजत्वावच्छिन्नप्रतियोगिताकाभावस्यैव भानं स्यात् तच्च न संभवति– स्वत्वस्य वृत्त्यनियामकत्वेन प्रतियोगितावच्छेदक-त्वासंभवात्। 'राज्ञः पुरुषः' इत्यत्र स्वत्वस्य संसर्गत्वम् 'पुरुषो न राज्ञः' इत्यत्र च स्वत्वस्य कारत्वमिति वैषम्ये दोषान्तरमाह– 'राज्ञः पुरुषः' इति, त्वन्मते 'राज्ञः पुरुषः' इति वाक्यजन्यो योऽप्रामाण्यज्ञानाऽनास्कन्दितो बोधस्तादृशबोधदशायामपि 'पुरुषो न राज्ञः' इति वाक्यादपि शाब्दबोधः स्यादेव, अत्र हेतुमाह– स्वत्वाभावेति, यथा 'घटवद् भूतलम्' 'पटाभाववद् भूतलम्' इति वाक्यद्वयजन्यज्ञानयोर्न परस्परं विरोधो भिन्नविषयत्वात् समानप्रकारकसमानसंसर्गकज्ञानस्यैव विरोधित्वात् तथा स्वत्वाभावबुद्धौ= आश्रयतासम्बन्धावच्छिन्नस्वत्वत्वावच्छिन्नप्रतियोगिताकाभावबुद्धौ, 'राज्ञः पुरुषः' इत्यत्र हि तव मते स्वत्वसंसर्गको बोधो भवति– 'स्वत्वसम्बन्धेन राजवान् पुरुषः' इति 'पुरुषो न राज्ञः' इत्यत्र च तव मते स्वत्वस्य प्रकारत्वमेव– 'आश्रयतासम्बन्धेन स्वत्वाभाववान् पुरुषः' इति बोधः संसर्गप्रकारयोश्च परस्परं भेदेनोक्तबोधयोरपि भेदात् 'राज्ञः पुरुषः' इत्यत्र संसर्गभूतस्वत्वसत्त्वस्य प्रतीयमानत्वात् 'पुरुषो न राज्ञः' इत्यत्र च प्रकारीभूतस्वत्वासत्त्वस्य प्रतीयमानत्वात् परस्परं प्रतिबध्यप्रतिबन्धकभावो न स्यादिति 'राज्ञः पुरुषः'

इत्यादिवाक्यादपि शाब्दबोधापत्तेः–स्वत्वाभावबुद्धौ स्वत्व-संसर्गकज्ञानस्य विरोधित्वे मानाभावात्।

वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितावच्छेदकत्वेऽपि 'राज्ञः पुरुषः' इत्यादौ राजस्वत्वादेः प्रकारताभ्युपगमः समुचितः, अन्यथा– तादृशसमभिव्याहारज्ञानघटितशाब्दसामग्रीकाले 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इत्याकारकविशिष्टवैशि-

---

इति वाक्यजन्यबोधकालेऽपि 'पुरुषो न राज्ञः' इति प्रयोगापत्तिः स्यादेव तत्तु न युक्तमित्यर्थः।

ननु वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वं न भवतीति नात्र श्रुतिरस्ति येन 'पुरुषो न राज्ञः' इत्यत्र वृत्त्यनियामकस्य स्वत्वस्य पुरुषे राजाभावप्रतियोगितावच्छेदकसम्बन्धत्वं न स्यात्तथा च 'पुरुषो न राज्ञः' इत्यत्र स्वत्वस्यैवाभावप्रतियोगितावच्छेदकत्वेन संसर्गत्वमेवेति नोक्तसर्व-जनानुभवस्यापलापत्तिस्तथा च वृत्त्यनियामकस्यापि स्वत्वस्य प्रतियोगिता-वच्छेदकसम्बन्धत्वस्वीकारेण 'पुरुषो न राज्ञः' इत्यस्य स्वत्वसम्बन्धेन राजाभाववान् पुरुष इति बोधः 'राज्ञः पुरुषः' इत्यस्य च स्वत्वसम्बन्धेन राजवान् पुरुष इति बोधः अनयोश्च बोधयोर्भावााभावविषयकत्वेन परस्पर विरोधात् 'राज्ञः पुरुषः' इति वाक्यजन्याऽप्रामाण्यज्ञानानास्कन्दितबोधदशायां न 'पुरुषो न राज्ञः' इति वाक्यस्य शाब्दबोधापत्तिः प्रयोगापत्तिश्च– स्वत्वसंसर्गकराजाभाववत्त्वबुद्धिं प्रति स्वत्वसंसर्गकराजवत्त्वबुद्धेः प्रतिबन्धकत्वादित्येवमुक्तदोषद्वयस्य परिहारमभ्युपगम्यापि संसर्गतामते दोषमाह– वृत्त्यनियामकेति, वृत्त्यनियामकस्य स्वत्वस्याभावप्रतियोगितावच्छेदक-सम्बन्धत्वस्वीकारेपि तस्य स्वत्वस्य प्रकारत्वमेव युक्तं न संसर्गत्वमित्यर्थः। विपक्षे बाधकमाह– अन्यथेति विभिन्नविषयकप्रत्यक्षं प्रति शाब्दबोधसामग्र्याः प्रतिबन्धकत्वमुभयवादिसिद्धमस्ति, 'राज्ञः पुरुषः' 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इति ज्ञानयोः परस्परं विभिन्नविषयत्वमप्यस्ति 'राजस्वत्वाभववान् पुरुषः सुन्दरः' इति च राजस्वत्वाभावविशिष्टे पुरुषे सुन्दरत्ववैशिष्ट्यमिति विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षम्, तत्र तादृशसमभिव्याहारज्ञानघटित-सामग्रीकाले='राज्ञः पुरुषः' इत्याकारकषष्ठ्यन्तराजपदप्रथमान्तपुरुषपद-

ष्ट्यावगाहिप्रत्यक्षवारणाय तत्र तादृशसामग्र्याः प्रतिबन्धकता-कल्पनाधिक्येन गौरवात्। अस्मन्मते तादृशसमभिव्याहार-घटितसामग्र्याः 'राजस्वत्वाभाववान् पुरुषः' इत्यादिबाधाभाव-

समभिव्याहारज्ञानघटितयोग्यतासत्तिज्ञानादिरूपशाब्दबोधसामग्रीकाले 'राजस्वत्वा-भाववान् पुरुषः सुन्दरः' इत्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं नेष्टमिति तद्वारणाय तत्र=उक्तविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे= उक्तविशिष्टवैशिष्ट्या-वगाहिप्रत्यक्षं प्रति तादृशसामग्र्याः='राज्ञः पुरुषः' इत्याकारकषष्ठ्यन्तराज-पदप्रथमान्तपुरुषपदसमभिव्याहारज्ञानघटितयोग्यतासत्तिज्ञानादिरूपशाब्दबोध-सामग्र्याः प्रतिबन्धकत्वकल्पनाधिक्येन संसर्गतामते गौरवम्। उक्त-शाब्दबोधप्रत्यक्षयोः विभिन्नविषयकत्वेऽपि परस्परं विरोधो नास्ति यतः– 'राज्ञः पुरुषः' इत्यनेन स्वत्वसम्बन्धेन राजवान् पुरुष इति बोधो जायते प्रत्यक्षं च 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इत्याकारकमिति उक्तशाब्दबोध-स्यापि सामग्री संपन्ना उक्तप्रत्यक्षस्यापि सामग्री संपन्नेति तत्र तत्कार्यभूत-शाब्दबोधप्रत्यक्षयोरापत्तिः समानबलत्वेन प्राप्तेत्युक्तप्रत्यक्षवारणाय 'राज्ञः पुरुषः' इत्यत्रत्यशाब्दसामग्र्याः प्रतिबन्धकत्वं संसर्गतावादिनाकल्पनीयमिति गौरवम्। यद्युक्तशाब्दबोधप्रत्यक्षयोः परस्परं विरोधः स्यात्तदा शाब्दबोध-सामग्र्याः प्राबल्येन प्रत्यक्षसामग्रीसंपत्तिरेव न स्यादिति प्रत्यक्षकारणा-भावादेव प्रत्यक्षं स्वयमेव निवर्तेतेति तद्वारणाय शाब्दसामग्र्याः प्रतिबन्धकत्व-कल्पनं न स्यादपि न चैवमस्ति संसर्गतामते उक्तशाब्दबोधप्रत्यक्षयोः परस्परं विरोधाभावादित्यर्थः।

नन्विदं गौरवं प्रकारतामतेऽपि स्यादित्याशङ्क्य प्रकारतावादी स्वमते उक्तगौरवाभावमुपपादयति–अस्मन्मते इति, स्वत्वस्य प्रकारतास्वीकारे तु 'राज्ञः पुरुषः' इत्यनेन राजनिरूपितस्वत्ववान् पुरुष इति शाब्दबोधो जायते इति शाब्दबोधे राजस्वत्ववत्त्वस्य विषयत्वाद् उक्तविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे च राजस्वत्वाभाववत्त्वस्य विषयत्वादुक्तशाब्दबोधप्रत्यक्षयोः परस्परं विरोधोऽस्त्येव अथ च 'राज्ञः पुरुषः' इति वाक्यजन्यशाब्दबोधसामग्री योग्यतारूपेण 'राजस्वत्वाभाववान् पुरुषः' इत्याकारकबाधस्याभावेन घटितास्ति तथा च तत्सत्त्वे='राजस्वत्वाभाववान् पुरुषः' इत्याकारको यो बाधस्तदऽभाव-घटितषष्ठ्यन्तराजपदप्रथमान्तपुरुषपदसमभिव्याहारज्ञानघटितयोग्यताज्ञानादिरूप-

घटिततया तत्सत्त्वे विशेष्यतावच्छेदकादिप्रकारकनिश्चय-रूपकारणविरहादेव तथाविधविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षो-त्पत्त्यसंभवेन तादृशसामग्र्यास्तत्र प्रतिबन्धकत्वस्याकल्पनात्।

अन्यादृशप्रत्यक्षस्थलीयप्रतिबन्धकतया च न त्वन्मते निर्वाहः। अन्यत्रान्यविधप्रत्यक्षेच्छानामुत्तेजकतया तादृशेच्छा-यामसत्यां चोपदर्शितविशिष्टवैशिष्ट्यबोधत्वप्रकारकेच्छा-

---

सामग्रीसत्त्वे, 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इत्याकारकविशिष्टवैशिष्ट्य-प्रत्यक्षं प्रति च तद्विशेषणीभूतस्य 'राजस्वत्वाभाववान् पुरुषः' इत्याकारक-विशिष्टस्य यज्ज्ञानं तस्य कारणत्वमस्ति विशेष्यतावच्छेदकस्य राजस्वत्वा-भावस्य चात्र निश्चयो नास्त्येव शाब्दसामग्र्या 'राजस्वत्वाभाववान् पुरुषः' इत्याकारकबाधस्याभावेन घटितत्वात् तथा चोक्तप्रत्यक्षकारणस्य 'राजस्वत्वा-भाववान् पुरुषः' इत्याकारकस्य विशेष्यतावच्छेदकप्रकारकनिश्चयस्या-भावादेवोक्तविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षस्योत्पत्तिः स्वयमेव न संभवतीति नोक्तप्रत्यक्षं प्रत्युक्तशाब्दबोधसामग्र्याः प्रतिबन्धकत्वं कल्पनीयमिति न तत्कल्पनाप्रयुक्तं प्रकारतामते गौरवमित्यर्थः। कारणसत्त्वे एव कार्यसत्त्व-संभवादुक्तप्रत्यक्षकारणभावे उक्तप्रत्यक्षोत्पत्त्यऽसंभवः। तादृशसमभिव्याहार-घटितसामग्र्याः='राज्ञः पुरुषः' इतिषष्ठ्यन्तराजपदप्रथमान्तपुरुष-पदसमभिव्याहारघटितसामग्र्याः। तथाविधम्='राजस्वत्वाभाववान् पुरुषः सुन्दरः' इत्याकारकम्। तादृशसामग्र्याः= 'राज्ञः पुरुषः' इति शाब्दबोधसामग्र्याः। तत्र=उक्तप्रत्यक्षे=उक्तप्रत्यक्षं प्रति।

ननु विभिन्नविषयकप्रत्यक्षं प्रति शाब्दबोधसामाग्र्याः प्रतिबन्धकत्वं क्लृप्तमेवास्तीति नात्र 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इत्याकारकप्रत्यक्षं प्रति 'राज्ञः पुरुषः' इत्याकारकशाब्दबोधसामग्र्या इदानीं नूतनप्रतिबन्ध-कत्वकल्पनापत्तिरित्याशङ्क्याह– अन्यादृशेति। अन्यादृशप्रत्यक्षस्थलीय-प्रतिबन्धकतया=घटादिप्रत्यक्षनिष्ठप्रतिबध्यतानिरूपितेन 'राज्ञः पुरुषः' इति शाब्दबोधसामग्रीनिष्ठेन प्रतिबन्धकत्वेन त्वन्मते=संसर्गतामते नात्र निर्वाहः संभवति। अत्र हेतु माह– अन्यत्रेति, अयं भावः– विभिन्नविषयकप्रत्यक्षं प्रति शाब्दबोधसामग्र्याः प्रतिबन्धकत्वमस्त्येव किन्तु यदि प्रत्यक्षं मे

बलादुपदर्शितविशिष्टवैशिष्ट्यबोधोपपत्तयेऽन्यादृशविषयतायाः एव प्रतिबध्यतावच्छेदकत्वोपगमावश्यकत्वात्।

जायतामित्याकारा प्रत्यक्षेच्छा जायते तदा तु प्रत्यक्षमेव भवति इच्छाया उत्तेजकत्वाद् यथा दाहप्रतिबन्धकमणौ सत्यामप्युत्तेजकमणिसंनिधाने दाहो भवत्येव तथा च यदा राजपुरुषविषयकस्य 'राज्ञः पुरुषः' इति शाब्दबोधस्य सामग्री प्राप्ता घटविषयकस्य च प्रत्यक्षस्य सामग्री प्राप्ता तत्राऽन्यविध-प्रत्यक्षेच्छानाम्=घटप्रत्यक्षं मे जायतामित्याकरकेच्छाया उत्तेजकतया घटप्रत्यक्षं जायते, यदीदृशीच्छा न भवति किन्तु 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इति विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षत्वप्रकारकेच्छा जायते तदोक्तस्य 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इत्याकारकविशिष्टवैशिष्ट्यप्रत्यक्ष-स्योपपत्तये=उत्पत्त्युपपत्तये अन्यादृशविषयतायाः=घटादिप्रत्यक्षनिष्ठाया घटादिप्रत्यक्षविषयकेच्छानिरूपिताया एव विषयतायाः प्रतिबध्यतावच्छेदकत्वं स्वीकार्यम्। घटादिप्रत्यक्षे विषयतापि वर्तते प्रतिबध्यत्वमपि वर्तत इति प्रतिबध्यतावच्छेदकत्वं विषयताया ज्ञेयम्।

अर्थात्– 'राज्ञः पुरुषः' इत्यादिशाब्दबोधसामग्र्यां सत्यामपि घटप्रत्यक्षसामग्र्यां सत्यां यदि घटप्रत्यक्षेच्छा जायते तदा घटप्रत्यक्षं जायते शाब्दबोधो न जायते किन्तु तदापि घटप्रत्यक्षमेव जायते पटादिप्रत्यक्षं तु नैव जायते तथा च घटप्रत्यक्षेच्छाविरहविशिष्टशाब्दबोधसामग्र्या घटप्रत्यक्षं प्रति प्रतिबन्धकत्वं घटप्रत्यक्षस्य च प्रतिबध्यत्वम्, पटप्रत्यक्षेच्छाविरहविशिष्ट-शाब्दबोधसामग्र्याः पटप्रत्यक्षं प्रति प्रतिबन्धकत्वं पटप्रत्यक्षस्य च प्रतिबध्यत्वम्, इत्येवं पृथक् पृथगेव विशिष्य प्रतिबध्यप्रतिबन्धकभावो वक्तव्य इति 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इत्याकारकप्रत्यक्षेच्छाविरहविशिष्ट-शाब्दबोधसामग्र्या एतत्प्रत्यक्षं प्रति प्रतिबन्धकत्वं एतत्प्रत्यक्षस्य च प्रतिबध्यत्वमिति पृथगेव प्रतिबध्यप्रतिबन्धकभावे वक्तव्ये नान्यादृशप्रत्यक्ष-स्थलीयप्रतिबन्धकत्वेन त्वन्मते निर्वाह इत्यत्र नवीनप्रतिबध्यप्रतिबन्धक-भावकल्पनया त्वन्मते गौरवमस्त्येव। प्रकारतामते त्वत्र शाब्दबोधसामग्र्याः प्रतिबन्धकत्वकल्पनाभावः प्रथममेव प्रदर्शितः।

न च स्वत्वादेः प्रकारतामतेऽपि स्वत्वादिसंबन्धावच्छिन्नप्रतियोगिताकराजाद्यभावविशिष्टपुरुषादिवैशिष्ट्यबोधे तथाविधसामग्र्याः प्रतिबन्धकताधिक्येन गौरवम्, तत्संसर्गतामते तादृशसामग्र्याः स्वत्वादिसंबन्धावच्छिन्नप्रतियोगिताकराजाद्यभाववत्तानिश्चयाभावघटिततया तत्सत्त्वे कारणविरहादेव तथाविधप्रत्यक्षवारणसंभवादिति वाच्यम्,

---

उपदर्शितविशिष्टवैशिष्ट्यबोध (प्रत्यक्षत्व) प्रकारकेच्छाबलादुपदर्शितविशिष्टवैशिष्ट्यबोधोपपत्तये अन्यत्रान्यविधप्रत्यक्षेच्छानामुत्तेजकतया तादृशेच्छायामसत्यां चान्यादृशविषयताया एव प्रतिबध्यतावच्छेदकत्वोपगमावश्यकत्वादित्यन्वयः। घटप्रत्यक्षेच्छाया घटप्रत्यक्षमात्रोत्तेजकत्वं भवति न तु पटादिप्रत्यक्षोत्तेजकत्वमपि तथा चोक्तवैशिष्ट्यप्रत्यक्षेच्छायां सत्यां घटप्रत्यक्षेच्छायां चाऽसत्याम् उक्तवैशिष्ट्यप्रत्यक्षमेव भवति न घटप्रत्यक्षमिति घटप्रत्यक्षस्य प्रतिबध्यत्वं घटप्रत्यक्षनिष्ठविषयतायाश्च प्रतिबध्यतावच्छेदकत्वं न तूक्तवैशिष्ट्यप्रत्यक्षस्य प्रतिबध्यत्वं तन्निष्ठविषयतायाश्च प्रतिबध्यतावच्छेदकत्वमिति स्वीकार्यम्, तथा चात्र पृथगेव प्रतिबध्यप्रतिबन्धकभावापत्त्या संसर्गतामते गौरवमनिवार्यम्।

संसर्गतावादी प्रतिबन्द्या प्रकारतामते दोषमुपपादयति– न चेति, यथा मम संसर्गतावादिनः 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इत्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं प्रति 'राज्ञः पुरुषः' इत्याकारकशाब्दबोधसामग्र्याः पृथक् प्रतिबन्धकत्वाल्पनापत्त्या गौरवमस्ति। तथा तव प्रकारतावादिनोऽपि स्वत्वसम्बन्धावच्छिन्नप्रतियोगिताको यो राजाभावस्तद्विशिष्टे पुरुषे सुन्दरत्ववैशिष्ट्यावगाहिनम्= 'स्वत्वसम्बन्धेन राजाभाववान् पुरुषः सुन्दरः' इत्याकारकविशिष्टवैशिष्ट्यावगाहिनं प्रत्यक्षं प्रति तथाविधसामग्र्याः='राज्ञः पुरुषः' इत्याकारकशाब्दबोधसामग्र्याः पृथगेव प्रतिबन्धकत्वकल्पनापत्त्या गौरवमस्त्येवेति साम्यम्। मम संसर्गतामते तु नात्र प्रतिबन्धकत्वकल्पनापत्तिरित्याह– तत्संसर्गतामत इति। तत्संसर्गतामते=स्वत्वस्य संसर्गतामते तु 'राज्ञः पुरुषः' इत्यनेन 'स्वत्वसम्बन्धेन राजवान् पुरुषः' इत्येव बोधो जायते एतच्छाब्दबोधं प्रति च 'स्वत्वसम्बन्धेन राजाभाववान् पुरुषः' इत्येव बोधोऽस्ति,

मन्यते तादृशप्रत्यक्षं प्रति तथाविधसामग्र्याः प्रतिबन्धकताधिक्येऽपि निरूपितत्वादिसंबन्धावच्छिन्नप्रतियोगिताकराजाद्यभावविशिष्टस्वत्वादिवैशिष्ट्यबोधे तथाविधसामग्र्याः प्रतिबन्धकताकल्पनेन तदंशे साम्यात्, तथा च पूर्वोक्तराजस्वत्वाभाववान् पुरुषः सुन्दर इत्यादिविशिष्टवैशिष्ट्यप्रत्यक्षं

बोधसामग्र्याश्च बाधाभावघटितत्वमपेक्ष्यते एवेति तादृशसामग्र्याः='राज्ञः पुरुषः' इत्याकारकशाब्दबोधसामग्र्याः स्वत्वादिसम्बन्धावच्छिन्नप्रतियोगिताकराजाद्यभाववत्तानिश्चयाभावघटिततया='स्वत्वसम्बन्धेन राजाभाववान् पुरुषः' इत्याकारकबाधनिश्चयस्याभावेन घटिततया तत्सत्त्वे='राज्ञः पुरुषः' इत्याकारकशाब्दबोधसामग्र्या उक्तबाधाभावघटिताया: सत्त्वे कारणविरहादेव='स्वत्वसम्बन्धेन राजाभाववान् पुरुषः सुन्दरः' इत्याकारकवैशिष्ट्यप्रत्यक्षं प्रति 'स्वत्वसम्बन्धेन राजाभाववान् पुरुषः' इत्याकारकविशिष्टविशेषणज्ञानस्य कारणत्वमस्ति तत्तु नास्ति उक्तशाब्दबोधसामग्र्या एतद्विशिष्टविशेषणज्ञानाभावघटितत्वादिति कारणाभावात्स्वयमेव तथाविधप्रत्यक्षस्य='स्वत्वसम्बन्धेन राजाभाववान् पुरुषः सुन्दरः' इति प्रत्यक्षस्य वारणसंभवात्=अनुत्पत्तिसंभवात् न शाब्दबोधसामग्र्याः प्रतिबन्धकत्वकल्पनापत्तिः। यद्युक्तप्रत्यक्षोत्पत्तिः संभवेत् तदोक्तप्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनापत्तिः स्यादपि नैवमस्तीत्यर्थः।

प्रकारतावादी प्रत्युत्तरमाह– मन्मत इति, उक्तरीत्या प्रकारतामते तादृशप्रत्यक्षं प्रति='स्वत्वसम्बन्धेन राजाभाववान् पुरुषः सुन्दरः' इति प्रत्यक्षं प्रति तथाविधसामग्र्याः='राज्ञः पुरुषः' इति शाब्दबोधसामग्र्याः प्रतिबन्धकत्वाधिक्येऽपि निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाद्यभावविशिष्टस्वत्वादिवैशिष्ट्यबोधे='निरूपितत्वसम्बन्धेन राजाभाववत्स्वत्वं प्रमयेम्' इति निरूपितत्वसम्बन्धेन राजाभावविशिष्टे स्वत्वे प्रमेयत्ववैशिष्ट्यावगाहिप्रत्यक्षं प्रति तथाविधसामग्र्याः='राज्ञः पुरुषः' इति शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनापत्तिर्नास्ति यतः– 'राज्ञः पुरुषः' इत्यत्र प्रकारतामते स्वत्वस्याश्रयतासम्बन्धेन पुरुषेऽन्वयः स्वत्वे च निरूपितत्वसम्बन्धेन राजान्वयोस्तीति निरूपितत्वसम्बन्धेन राजविशिष्टं स्वत्वं पुरुषवृत्तित्वेन भासते निरूपितत्वसम्बन्धेन राजविशिष्टस्वत्वज्ञानस्य च 'निरूपितत्वसम्बन्धेन

प्रति 'राज्ञः पुरुषः' इत्यादिसामग्र्याः प्रतिबन्धकत्वकल्पनं संसर्गतावादिनां मतेऽधिकमिति।

न च स्वत्वादेः प्रकारतामते घटप्रत्यक्षादिकं प्रति तादृशसामग्रीप्रतिबन्धकतायां विभक्तिजन्यस्वत्वाद्युपस्थिति-निवेशाधिक्येन 'राजस्वत्वाभाववान् पुरुषः' इत्यादिबाधाद्यभाव-निवेशाधिक्येन च गौरवम्, अस्मन्मते तादृशोपस्थिति-तथाविधबाधाभावादीनां तथाविधवाक्यजन्यशाब्दबोधं प्रत्यऽहे-

राजाभाववत्स्वत्वम्' इतिज्ञानमेव बाधः 'राज्ञः पुरुषः' इति शाब्दसामग्री चोक्तबाधाभावेन घटितास्ति 'निरूपितत्वसम्बन्धेन राजाभाववत्स्वत्वं प्रमेयम्' इति प्रत्यक्षे च 'निरूपितत्वसम्बन्धेन राजाभाववत्स्वत्वं प्रमेयम्' इति प्रत्यक्षस्योत्पत्तिर्न संभवतीति नेदृशप्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्व-कल्पनापत्तिरिति तदंशे साम्यात्=यथा तव 'स्वत्वसम्बन्धेन राजाभाववान् पुरुषः सुन्दरः' इति प्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनापत्तिर्नास्ति मम चास्ति तथा 'निरूपितत्वसम्बन्धेन राजाभाववत्स्वत्वं प्रमेयम्' इति प्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनापत्तिर्मम नास्ति तव चास्तीत्येतदंशे साम्यात्=साम्येऽपि 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इति प्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनापत्तिर्मम नास्ति तव त्वस्त्येवेत्येतत्प्रयुक्तं गौरवं तव मतेऽधिकमेवेत्याह– तथा चेति।

पुनः संसर्गतावादी प्रकारतामते गौरवं प्रदर्शयति– न चेति। स्वत्वादेः प्रकारत्वस्वीकारेऽनुपस्थितस्य प्रकारत्वासंभवात् ङसादिपदेनोपस्थितिः स्वीकार्या। शाब्दसामग्र्याः प्रतिबन्धकत्वे शाब्दसामग्रीघटकसर्वेषामेव पदार्थानां प्रतिबन्धकत्वं प्राप्नोतीति 'राज्ञः पुरुषः' इति वाक्यजन्यशाब्दसामग्रीघटकत्वेन राजपदजन्यराजोपस्थितेर्ङस्पदजन्यस्वत्वोपस्थितेः पुरुषपदजन्यपुरुषोपस्थितेश्च प्रतिबन्धकत्वं प्राप्तं तथा बाधाभावरूपयोग्यताज्ञानस्यापि शाब्दसामग्रीघटकत्वेन 'निरूपितत्वसम्बन्धेन राजाभाववत्स्वत्वम्' इत्याकारको यो बाधस्तदभावज्ञान-स्यापि प्रतिबन्धकत्वम् 'आश्रयत्वसम्बन्धेन राजस्वत्वाभाववान् पुरुषः' इत्याकारकश्च यो बाधस्तदभावज्ञानस्यापि प्रतिबन्धकत्वं प्राप्तमिति उपस्थितित्रयस्य बाधाभावद्वयस्य च प्रत्यक्षप्रतिबन्धकत्वं प्राप्तं मिलित्वा

तुतया तादृशवाक्यघटितसामग्रीप्रतिबन्धकतायां तेषाम-निवेशादिति वाच्यम्, भवन्मतेपि 'स्वत्वसंबन्धावच्छिन्नप्रति-योगिताकराजाभावव्याप्यराजस्वत्वाभाववान् पुरुषः' इत्यादि-

---

पञ्चानां पदार्थानां प्रकारतामते प्रतिबन्धकत्वं प्राप्नोतीति गौरवमित्यर्थः। राजपदजन्यराजोपस्थितेः पुरुषपदजन्यपुरुषोपस्थितेश्च प्रतिबन्धकत्वं तु संसर्गतावादेऽप्यस्त्येव ङसपदजन्यस्वत्वोपस्थितेः प्रतिबन्धकत्वं नास्ति शाब्दबोधे स्वत्वोपस्थित्यपेक्षाभावादनुपस्थितस्यापि संसर्गतया भानसंभवादिति प्रकारतामते यदधिकं स्वत्वोपस्थितेः प्रतिबन्धकत्वं तदेव प्रदर्शितम्– विभक्तीति। संसर्गतामतेऽपि 'राजाभाववान् पुरुषः' इत्याकारको यो बाधस्तदभावस्य कारणत्वेन प्रत्यक्षप्रतिबन्धकत्वमस्त्येवेति प्रकारतामते यदधिकं बाधाभावस्य प्रतिबन्धकत्वं तदेव प्रदर्शितम्–राजस्वत्वाभाववानिति। तथा च प्रकारतामते पञ्चानां पदार्थानां प्रत्यक्षप्रतिबन्धकत्वं प्राप्तम्। संसर्गतामते च द्विविधोप-स्थितेरेकविधबाधाभावस्य च प्रत्यक्षप्रतिबन्धकत्वेन त्रयाणामेव पदार्थानां प्रतिबन्धकत्वं प्राप्नोतीति विवेकः। संसर्गतावादी स्वमते लाघवं प्रदर्शयति– असन्मत इति। संसर्गतावादे हि 'राज्ञः पुरुषः' इति वाक्यात् 'स्वत्वसम्बन्धेन राजवान् पुरुषः' इति बोधस्वीकाराद् एतद्बोधं प्रति राजपदजन्यराजोपस्थितेः पुरुषपदजन्यपुरुषोपस्थितेः 'स्वत्वसंबन्धेन राजाभाववान् पुरुषः' इत्याकारक-बाधस्याभावस्य च कारणत्वमस्तीति प्रत्यक्षं प्रत्येतत्पदार्थत्रयस्यैव प्रतिबन्धकत्वं प्राप्नोतीति, तादृशोपस्थितेः=ङस्पदजन्यस्वत्वोपस्थितेः तथाविधबाधाभावस्य= 'राजस्वत्वाभाववान् पुरुषः' इत्याकारकबाधस्याभावस्य च तथाविधवाक्य-जन्यशाब्दबोधं प्रति='राज्ञः पुरुषः' इति वाक्यजन्यशाब्दबोधं प्रति कारणत्वा-भावात् प्रत्यक्षप्रतिबन्धकत्वकल्पनापत्तिर्नास्तीति लाघवम्। तादृशवाक्येति– 'राज्ञः पुरुषः' इत्येतद्वाक्यघटित (एतद्वाक्यसमभिव्याहारघटित) सामग्रीनिष्ठ-प्रतिबन्धकतायां तेषाम्=स्वत्वोपस्थितेः 'राजस्वत्वाभाववान् पुरुषः' इत्याकारक-बाधस्याभावस्य चानिवेशादित्यर्थः।

प्रकारतावादी प्रत्युत्तरमाह– भवन्मतेऽपीति, यथा प्रकारतामते उक्तरीत्या पञ्चपदार्थानां प्रत्यक्षप्रतिबन्धकत्वकल्पनापत्त्या गौरवं तथा संसर्गतामतेऽपि प्रतिबन्धकत्वकल्पनाधिक्येनास्त्येव गौरवमिति तात्पर्यम्। एतदेवोपपादयति– स्वत्वेत्यादिना। तद्वत्ताबुद्धिं प्रति तदभाववत्ताज्ञानस्य तदभावव्याप्यवत्ताज्ञानस्य

निश्चयस्य तदभावव्याप्यवत्तानिश्चयमुद्रया तादृशवाक्यजन्य-शाब्दधीविरोधितया तादृशनिश्चयाभावस्य तथाविधसामग्री-प्रतिबन्धकतायां निवेशस्याधिक्येन लाघवानवकाशात्। मन्मते

च प्रतिबन्धकत्वं सर्वसम्मतं यथा वह्निमानिति ज्ञानं प्रति वह्न्यभावनिश्चयस्य-वह्न्यऽभावव्याप्यजलवत्तानिश्चयस्य च प्रतिबन्धकत्वमस्ति तथा संसर्गतामते 'राज्ञः पुरुषः' इति वाक्यजन्यम् 'स्वत्वसम्बन्धेन राजवान् पुरुषः' इति शाब्दबोधं प्रति स्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभावनिश्चयस्य तथा स्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभावव्याप्यराजस्वत्वाभावनिश्चयस्य च प्रतिबन्धकत्वमस्त्येव यत्र स्वत्वसम्बन्धेन पुरुषादौ राजा वर्तते तत्र राजस्वत्वमपि वर्तते तथा यत्र स्वत्वसम्बन्धेन राजाभावो वर्तते तत्र राजस्वत्वाभावोऽपि वर्तते एवेति समनियतत्वेन स्वत्वसम्बन्धेन राजाभावस्य राजस्वत्वाभावो व्याप्योऽस्ति तथा च 'स्वत्वसम्बन्धेन राजाभाववान् पुरुषः' इत्याकारकबाध-निश्चयाभावस्य 'राज्ञः पुरुषः' इति वाक्याज्जायमानशाब्दसामग्र्यां निवेशात् 'स्वत्वसम्बन्धेन राजाभाववान् पुरुषः सुन्दरः' इति प्रत्यक्षस्य कारणाभावा-देवोत्पत्त्यसंभवात् शाब्दसामग्र्याः प्रतिबन्धकत्वाभावेऽपि 'स्वत्वसम्बन्धा-वच्छिन्नप्रतियोगिताकराजाभावव्याप्यस्वत्वाभाववान् पुरुषः' इत्याकारक प्रत्यक्षं प्रति तु शाब्दसामग्र्याः प्रतिबन्धकत्वमस्येवेत्येतत्प्रतिबन्धकत्वकल्पनापत्त्या-गौरवमित्यर्थः। मुद्रा=रीतिः। स्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभाव-व्याप्यस्वत्वाभाववान पुरुषः इति निश्चयस्य तदभावव्याप्यवत्तानिश्चयमुद्रया= स्वत्वसम्बन्धेन राजवत्त्वाभावव्याप्यराजस्वत्वाभाववत्तानिश्चयत्वरूपेण तादृशवाक्यजन्यशाब्दधीविरोधितया='राज्ञः पुरुषः' इति वाक्यजन्यशाब्दबोध-विरोधित्वेन तादृशनिश्चयाभावस्य 'स्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजा-भावव्याप्यस्वत्वाभाववान् पुरुषः' इति निश्चयाभावस्य तथाविधसामग्री-प्रतिबन्धकतायाम्='राज्ञः पुरुषः' इति शाब्दबोधसामग्रीनिष्ठायां विभिन्न-विषयकोक्तप्रत्यक्षनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतायां निवेशाधिक्येन लाघवाऽसंभवादित्यन्वयः।

एतत्प्रतिबन्धकत्वकल्पनापत्तिः प्रकारतामते नास्तीत्याह– मन्मते इति। प्रकारतामते हि 'राज्ञः पुरुषः' इत्यत्र 'राजस्वत्ववान् पुरुषः' इत्येष बोधो जायते एतद्बोधे च 'राजस्वत्वाभाववान् पुरुषः' इत्येव बाधोऽस्ति, अस्यैव

'राजस्वत्वाभाववान् पुरुषः' इत्यादिबाधकाभावनिवेशेनैव तादृशनिश्चयकाले प्रत्यक्षाभ्युपपत्तेस्तदभावानिवेशात्।

यत्तु 'राज्ञः पुरुषः' इत्यादौ 'राजस्वत्ववान् पुरुषः इत्याद्यन्वयबोधोपगमे 'राजकीयं स्वत्वम्' 'राजस्वत्ववान् पुरुषः'

च बाधस्य तदभावव्याप्यवत्तानिश्चयमुद्रया 'राज्ञः पुरुषः' इति शाब्दधी-प्रतिबन्धकत्वं संसर्गतामते प्रदर्शितं तत्र 'राज्ञः पुरुषः' इति वाक्यजन्यस्य 'राजस्वत्ववान् पुरुषः' इति शाब्दस्य सामग्री यदा 'राजस्वत्वाभाववान् पुरुषः' इति बाधस्याभावेन घटिता भवति तदा शाब्दबोध एव जायते प्रत्यक्षस्य च स्वकारणाभावादेवोत्पत्तिर्न संभवतीति न तद्वारणाय शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनापत्तिः। यदा च 'राजस्वत्वाभाववान् पुरुषः' इति बाधस्य निश्चयो भवति तदा बाधाभावरूपयोग्यताज्ञानस्याभावाच्छाब्दबोधो न जायते किन्तु प्रत्यक्षाभ्युपपत्तेः=प्रत्यक्षमेव जायते प्रतिबन्धकीभूत-शाब्दसामग्र्यऽभावादिति स्वीकारेण तदभावाऽनिवेशात्=शाब्दसामग्र्यां ग्राह्याभावगाहितया 'राजस्वत्वाभाववान् पुरुषः' इत्यादिबाधस्याभावस्य निवेशेऽपि तदभावाव्याप्यवत्तामुद्रया संसर्गतावादे इव प्रकारतावादे 'राजाभावव्याप्य-राजस्वत्वाभाववान् पुरुषः' इति बाधस्याभावस्य शाब्दसामग्रीनिष्ठ-प्रतिबन्धकतायामनिवेशाल्लाघवम्, संसर्गतामते च प्रवेशाद् गौरवमित्यर्थः।

पुनरपि संसर्गतावादिना प्रकारतामते प्रदर्शितं दोषमनुवदति—यत्त्विति, यथा विभिन्नविषयकप्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वमस्ति तथा समानविषयकानुमितिं प्रत्यपि शाब्दसामग्र्याः प्रतिबन्धकत्वमस्ति विभिन्न-विषयकानुमतेश्च शाब्दबोधप्रतिबन्धकत्वमस्तीत्युभयमतसिद्धम्। तत्र प्रकारतामते 'राज्ञः पुरुषः' इति वाक्यात्' राजनिरूपितस्वत्ववान् पुरुषः' इति शाब्दबोधो जायते तत्स्वीकारे, यदा 'राजकीयं स्वत्वम्' 'राजस्वत्ववान् पुरुषः' इत्याकारकानुमितिद्वयं प्राप्नुयात् तदा 'राज्ञः पुरुषः' इत्येद्वाक्यघटकस्य 'राज्ञः' इति भागस्य 'राजकीयं स्वत्वम्' इत्येवार्थः, प्रथमानुमितिरपि 'राजकीयं स्वत्वम्' इत्येतद्रूपेत्युभयोः समानविषयत्वम्, 'राजस्वत्ववान् पुरुषः' इति शाब्दबोधस्तत्समानविषयैव द्वितीयानुमितिः— 'राजस्वत्ववान् पुरुषः' इति तथा चोक्तद्विविधानुमितिरेव=उक्तानुमितिद्वयस्यापि तदितिरिक्ताविषयकत्वेन=

इत्याकारकद्विविधानुमितिरेव तदतिरिक्ताविषयकत्वेन तादृशानुमितिं प्रति प्रत्येकं तादृशवाक्यघटितसामग्र्याः प्रतिबन्धकत्वद्वयम्। अस्मन्मते च तादृशानुमित्योस्तथाविधवाक्यजन्यात् 'राजकीयः पुरुषः' इत्येतादृशबोधादतिरिक्तविषयकतया तत्र तादृशसामग्र्याः प्रतिबन्धकत्वकल्पनं नास्ति– तथाविधानुमितितथाविधशाब्दसामग्र्योश्च सत्योरनुमितेरेवोत्पत्तेः, अपि तु 'राजकीयः पुरुषः' इत्याकार-

---

उक्तशाब्दबोधसमानविषयकत्वेन तादृशानुमितिं प्रति प्रत्येकम्=उक्तद्विविधानुमितिं प्रत्येव तादृशवाक्यघटितसामग्र्याः='राज्ञः पुरुषः' इत्याकारकवाक्यघटकसामग्र्याः प्रतिबन्धकत्वद्वयं कल्पनीयं प्रतिबध्यभेदेन प्रतिबन्धकताभेदादित्यर्थः। अस्मन्मते इति– संसर्गतामते च 'राज्ञः पुरुषः' इतिवाक्यात् 'राजस्वत्ववान् पुरुषः' इति शाब्दबोध एव न जायते येनोक्तानुमितिद्वयस्य समानविषयत्वं स्यात्तेन च शाब्दसामग्र्याः प्रतिबन्धकत्वद्वयं कल्पनीयं स्यात् किन्तु 'स्वत्वसम्बन्धेन राजवान् पुरुषः' इत्येव शाब्दबोधो जायते तदेवोक्तम्– 'राजकीयः पुरुषः' इति, अस्य शाब्दबोधस्योक्तानुमितिद्वयस्य चातिरिक्तविषयकतया=विभिन्नविषयकत्वेनोक्तानुमितिद्वयं प्रति शाब्दबोधसामग्र्याः प्रतिबन्धकत्वकल्पनापत्तिर्नास्तीति लाघवम्। उक्तानुमितिद्वयस्य 'राजकीयः पुरुषः' इति शाब्दबोधस्य च विभिन्नविषयकत्वेनानुमितिद्वयस्य शाब्दबोधस्य च सामग्र्यां सत्यामनुमितिरेवोत्पद्यते इति कथं शाब्दसामग्र्याः प्रतिबन्धकत्वं स्यात्, यदि शाब्दसामग्र्या अत्र प्रतिबन्धकत्वं स्यात्तदा कथमनुमितिद्वयमुत्पद्यतेत्याह–तथाविधेति। किमिदानीं संसर्गतावादेऽनुमितिं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वं नास्त्येवेत्याशङ्क्याह– अपि त्विति, संसर्गतामते 'राज्ञः पुरुषः' इति वाक्यात् 'राजकीयः पुरुषः' इत्येव शाब्दबोधो जायते तत्समानविषया च 'राजकीयः पुरुषः' इत्येकैवानुमितिः संभवतीत्येतादृशैकानुमितिं प्रत्येकमेव शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयम्, न तु प्रकारतामते इव उक्तरीत्या प्रतिबन्धकताद्वयं कल्पनीयमिति संसर्गतामते लाघवमित्यर्थः।

प्रकारतावादी परिहरति– तदपीति, यत्र संसर्गतावादिनाऽनुमितिः

स्वत्वसंसर्गकैकविधानुमितिं प्रत्येव तादृशसामग्र्याः प्रतिबन्धकत्वमेकं कल्पनीयमिति लाघवमिति।

तदप्यकिञ्चित्करम्– भवन्मते यत्र यादृशानुमितिः स्वीक्रियते अस्मन्मतेऽपि तत्र तादृशानुमितेः स्वीकरणीयतयाऽनुमितौ शाब्दसामग्र्याः प्रतिबन्धकत्वसाम्यात्–उपदर्शित-

---

स्वीक्रियते न शाब्दबोधस्तत्र प्रकारतावादिनाप्यनुमितिरेव स्वीक्रियते इत्युभयमते प्रतिबध्यप्रतिबन्धकभावः समान एवेत्यर्थः। एतदेव स्पष्टयति– उपदर्शितेति। उपदर्शितस्थले='राजकीयं स्वत्वम्' 'राजस्वत्ववान् पुरुषः' इति स्थले। यद्युक्तानुमितिद्वयस्योत्पत्तिर्न स्वीक्रियेत तदानुमितिद्वयप्रतिबन्धे सति शाब्दसामग्र्याः प्रतिबन्धकत्वद्वयकल्पनापत्तिः स्यादपि नैवमस्ति तत्रोक्तानुमित्युत्पत्तेः स्वीकारादेवेत्याह– कुत इति। ननु किञ्चिद्विचार्य दोषः परिहर्तव्यः– 'राजकीयं स्वत्वम्' 'राजस्वत्ववान् पुरुषः' इत्यनुमितिद्वयस्य 'राज्ञः पुरुषः' इति वाक्यजन्यस्य 'राजस्वत्ववान् पुरुषः' इति शाब्दबोधस्य च समानविषयत्वान्नानुमितिः स्वीकर्तुं शक्यते शाब्दसामग्र्याः समानविषयकानुमितिं प्रति प्रतिबन्धकत्वादित्याशङ्क्य यथार्थमुत्तरमाह– भवतापीति, यथात्र मन्मते शाब्दसामग्र्यां प्रतिबन्धकताद्वयस्य कल्पनापत्तिरुक्ता तथा तव संसर्गतामते 'राज्ञः पुरुषः' इति वाक्यजन्यस्य 'स्वत्वसम्बन्धेन राजवान् पुरुषः' इति शाब्दबोधस्य 'राजकीयं स्वत्वम्' 'राजस्वत्ववान् पुरुषः' इत्युक्तानुमितिद्वयस्य च विभिन्नविषयकत्वात् शाब्दबोधं प्रति उक्तानुमितिद्वयस्य यत्सामग्रीद्वयं तस्य प्रतिबन्धकत्वं कल्पनीयमिति प्रतिबन्धकत्वद्वयकल्पनापत्तिस्तवमतेऽप्यस्त्येवेति तव मम च साम्यमेव विभिन्नविषयकशाब्दबोधं प्रत्यनुमितेः प्रतिबन्धकत्वस्योभयवादसिद्धत्वादित्यर्थः।

यच्च संसर्गतावादिनोक्तम्– यथा 'राज्ञः पुरुषः' इत्यत्र 'स्वत्वसम्बन्धेन राजवान् पुरुषः' इति स्वत्वसंसर्गकभेदान्वयबोधस्तथा राजपुरुष इत्यत्रापि स्वत्व सम्बन्धेन 'राजवान् पुरुषः' इति स्वत्वसंसर्गकभेदान्वयबोध स्वीकार्यो न तु राजपदस्य राजसम्बन्धिनि लक्षणां स्वीकृत्य राजसम्बन्धाभिन्नः पुरुषः' इत्यभेदान्वयः (पृ. ८४) इति तत्परिहरति प्रकारतावादी– एवमिति, 'राजपुरुषः' इति समासे 'स्वत्वसम्बन्धेन राजवान् पुरुषः' इत्येवं

स्थले भवद्भिरनुमितिः स्वीक्रियते अस्माभिरपि स्वीक्रियते कुतः प्रतिबन्धकताद्वयकल्पनमिति। भवतापि तादृशशाब्दं प्रति तादृशानुमितिद्वयसामग्रीद्वयस्य प्रतिबन्धकताया वाच्यतया साम्याच्च।

एवम् 'राजपुरुषः' इत्यादिसमासवाक्यात् स्वत्वसंसर्गक-शाब्दबोधस्वीकारे तादृशशाब्दबोधसामग्र्याः स्वत्वसंसर्गेण राजविशिष्टपुरुषतात्पर्यज्ञानादिघटिताया भिन्नविषयकप्रत्य-क्षादिकं प्रति प्रतिबन्धकत्वाधिक्येन गौरवात् तत्र राजसंबन्धि-प्रकारकभेदान्वयबोधस्वीकार एवोचितः।

स्वत्वसंसर्गकभेदान्वयबोधस्वीकारे तादृशशाब्दबोधसामग्र्याः='राजपुरुषः' इति राजपदाव्यवहितोत्तरपुरुषपदसमभिव्याहारसामग्र्याः 'स्वत्वसम्बन्धेन राजवान् पुरुषः' इत्येवं स्वत्वसंसर्गेण राजविशिष्टो यः पुरुषस्तद्विषयक-तात्पर्यज्ञानादिघटिताया विभिन्नविषयकप्रत्यक्षं प्रति प्रतिबन्धकत्वकल्पनापत्त्या गौरवम्। विभिन्नविषयकप्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वस्योभय वादिसिद्धत्वात्। तस्मादेतद्गौरवपरिहाराय तत्र='राजपुरुषः' इति समासे राजपदस्य राजसम्बन्धिनि लक्षणां स्वीकृत्य 'राजसंबन्ध्यभिन्नः पुरुषः' इत्येवं राजसम्बन्धिप्रकारकाऽभेदान्वयबोध एवोचित इत्यर्थः।

ननु विभिन्नविषयकप्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वेन भवन्मतेऽपि=प्रकारतावादेऽपि तादृशाभेदान्वयबोधसामग्र्याः 'राज पुरुषः' इत्यत्र राजसम्बन्ध्यभिन्नः पुरुषः इत्येवं राजसम्बन्धिप्रकारकाभेदान्वयबोध सामग्र्याः अभेदसम्बन्धेन राजसम्बन्धिविशिष्टपुरुषविषयकतात्पर्यज्ञानादि-घटिताया विभिन्नविषयकप्रत्यक्षं प्रति प्रतिबन्धकताकल्पनापत्त्या गौरवमस्त्येवेत्याशङ्क्याह– न चेति। परिहारहेतुमाह– राजपदस्येति, 'राजपुरुषः' इत्यत्र त्वया भेदान्वये स्वीकृतेऽपि यदा कस्यचिद् राजपदस्य राजसम्बन्धिनि स्वारसिकलक्षणाग्रहेणाऽभेदसम्बन्धेन राजसम्बन्धिविशिष्टपुरुषे तात्पर्यग्रहो भवति तदात्र त्वया 'राजपुरुषः' इत्यत्र कर्मधारयत्वम् (राजसम्बन्धी चासौ पुरुष इति) स्वीकृत्य तथाविधसमासवाक्यात्='राजपुरुषः' इति समासवाक्यात् तादृशशाब्दबोधस्य='राजसंबन्ध्यभिन्नः पुरुषः' इत्यभेदान्वयबोधस्य

न च भवन्मतेऽपि तादृशाभेदान्वयबोधसामग्र्याः प्रतिबन्धकताधिक्येन गौरवमिति वाच्यम्, राजपदस्य राजसंबन्धिनि स्वारसिकलक्षणाग्रहदशायामभेदसंबन्धेन राजसंबन्धिविशिष्टपुरुषे तात्पर्यग्रहसत्त्वे भवन्मतेपि कर्मधारयत्वेनाभिमतात् तथाविधसमासवाक्यात् तादृशशाब्दबोधस्वीकारस्यावश्यकतया तादृशसामग्रीप्रतिबन्धकताया उभयमतसिद्धत्वात्।

यत्तु– 'दधि पश्य' इत्यादौ लुप्तद्वितीयाविभक्तिस्मरणेन दधिकर्मकदर्शनबोधवत् 'राजपुरुषः' इत्यादावपि लुप्तषष्ठीविभक्तिस्मरणेन राजसंबन्धप्रकारकभेदान्वयबोधनिर्वाहे राजसंबन्धिनि निरूढलक्षणां स्वीकृत्याभेदान्वयबोधोपगमो निरर्थकः, न च षष्ठीतत्पुरुषादिस्थलेऽपि लुप्तविभक्तिस्मरणे चेदन्वयबोधः? तदा 'ऋद्धस्य राजमातङ्गाः' इत्यादि–

स्वीकार्यत्वात् 'राजपुरुषः' इत्यत्राभेदान्वयबोधसामग्र्या विभिन्नविषयकप्रत्यक्षं प्रति प्रतिबन्धकत्वं यथा मम मते तथा तव मतेऽपि प्राप्तमेव किन्तु तव मते 'राजपुरुषः' इत्यत्र भेदान्वयबोधसामग्र्या अपि विभिन्न विषयकप्रत्यक्षं प्रति प्रतिबन्धकत्वकल्पनं कर्तव्यं तदेवाधिकं गौरवमित्यर्थः।

पुनः परिहाराय संसर्गतावादिवचनमनुवदति–यत्त्विति, 'दधि पश्य' इत्यत्र प्रकारतामतेऽपि दधिपदोत्तरलुप्तविभक्तेः स्मरणं यथा भवति तेन च 'दधिकर्मकं दर्शनम्' इति भेदान्वयबोधश्च भवति दध्नः स्वकर्मकत्वसम्बन्धेन धात्वर्थे दर्शनेऽन्वयस्वीकारात् तथा 'राजपुरुषः' इत्यत्रापि लुप्तषष्ठीविभक्तिस्मरणेन राजसम्बन्धप्रकारकभेदान्वयबोधनिर्वाहे='राजसम्बन्धवान्=राजनिरूपितस्वत्ववान् पुरुषः' इत्येवं राजसम्बन्धप्रकारकस्य भेदान्वयबोधस्य 'राज्ञः पुरुषः' इत्यत्रेव निर्वाहे संभवति सति राजपदस्य राजसम्बन्धिनि लक्षणां स्वीकृत्याऽभेदान्वयबोधस्वीकारो व्यर्थः। एवं हि 'राज्ञः पुरुषः' 'राजपुरुषः' इति समासाऽसमासवाक्ययोरेकगत्या लाघवमपि स्यादित्यर्थः। ननु 'राजपुरुषः' इत्यत्रापि यदि लुप्तषष्ठीस्मरणे सत्येवान्वयबोधः स्यात् तदात्र राजपदस्य स्मृतिविषयीभूतषष्ठ्यन्तत्वप्राप्त्या यथा 'ऋद्धस्य राज्ञो

प्रयोगापत्तिः– तत्र मातङ्गादौ राजादीनामन्वयबोधोपपत्तये राजादिपदोत्तरषष्ठ्यादिविभक्त्यनुसंधानस्यावश्यकत्वेन समान-विभक्तिकतया राजादौ ऋद्धादिपदार्थस्याऽभेदान्वयबोध-संभवादिति वाच्यम्, यतस्तत्र ऋद्धराजादीनामभेदान्वय-बोधानुपपत्त्या नाभियुक्तानामप्रयोगः, अपि तु समासाघट-कपदसापेक्षतया राजपदस्यासामर्थ्याऽतिदेशात् समासासा-

---

मातङ्गाः' इति प्रयोगो भवति तथा 'ऋद्धस्य राजमातङ्गाः' इत्यपि प्रयोगः स्यात्। अत्र हेतुमाह–तत्रेति, त्वन्मतेनोक्तेन 'राजपुरुषः' इत्यत्रेव तत्र='राजमातङ्गाः' इत्यत्रापि 'स्वत्वसम्बन्धेन राजवन्तो मातङ्गाः' इत्येवं मातङ्गेषु राजान्वयबोधोपपत्तये राजपदोत्तरं लुप्तषष्ठ्या अनुसंधाने कृते राजपदस्य षष्ठ्यन्तत्वं प्राप्तमिति 'ऋद्धस्य' 'राज्ञः' इति पदयोः समानविभक्तिकत्वापत्त्या 'नीलो घटः' इत्यत्रेवात्रापि राजपदार्थे ऋद्धपदार्थस्याऽभेदान्वयः संभवतीति 'ऋद्धस्य राजमातङ्गाः' इति प्रयोगः स्यादेव तस्मात् समासे लुप्तविभक्तिस्मरणं न युक्तं लुप्तविभक्तेरस्मरणे च 'राजमातङ्गाः' इत्यत्रापि राजपदस्य षष्ठ्यन्तत्वाभावेन समानविभक्तिकत्वाभावाद् ऋद्धपदार्थराजपदार्थयोर-भेदान्वयाऽसंभवात् 'ऋद्धस्य राजमातङ्गाः' इति प्रयोगापत्तिर्नास्ति, तथा च 'राजपुरुषः' इत्यत्रापि लुप्तषष्ठीस्मरणं न युक्तमित्याशङ्क्याह– न चेति। संसर्गतावादी परिहारहेतुमाह– यत इति। तत्र=ऋद्धस्य राजमातङ्गाः इत्यत्र यदि ऋद्धराजपदार्थयोरभेदान्वयः संभवेत्तदा 'ऋद्धस्य राजमातङ्गाः' इति प्रयोगः स्यादेवात्र च ऋद्धराजपदार्थयोरभेदान्वयबोधो नैव संभवतीत्यभेदान्वय-बोधानुपपत्तिमुद्दिश्याऽभियुक्तानाम्= प्रामाणिकवृद्धानाम् 'ऋद्धस्य राजमातङ्गाः' इति प्रयोगस्य परिहारो नास्ति येन त्वदुक्तरीत्या ऋद्धराजपदार्थयोरभेदान्वयापत्त्या लुप्तषष्ठीस्मरणं न स्यात्। 'ऋद्धस्य राजमातङ्गाः' इत्यप्रयोगे हेतुमाह– अपि त्विति– "समर्थः पदविधिः" इत्यत्र समर्थः समर्थेन सह समस्यते इति नियमेन "सापेक्षमसमर्थवद् भवति" इति नियमेन च 'ऋद्धस्य राजमातङ्गाः' इत्यत्र राजपदस्य समासघटकऋद्धपदसापेक्षतया समर्थत्वाभावाद् मातङ्गपदेन समास एव न संभवतीति 'ऋद्धस्य राजमातङ्गाः' इत्यत्र 'राजमातङ्गाः' इति समासस्याऽसाधुत्वं स्यादित्यभिप्रायेणैवाभियुक्तानाम् 'ऋद्धस्य राजमातङ्गाः' इति प्रयोगपरिहारोऽस्तीत्यर्थः। किं वा "सविशेषणानां

धुत्वेन। तत्सापेक्षत्वं च=तदर्थान्वितस्वार्थपरत्वम्, स्वार्थश्च= स्वीयवृत्तिग्रहविशेष्यः। अत एव 'शरैः शातितपत्रः' 'चैत्रस्य दासभार्या' इत्यादौ न समस्यमानशातितदासपदादेः सापेक्षता– तदर्थैकदेशशातनदासत्वादावेव शरकरणकत्वचैत्रनिरूपितत्वा- दीनामन्वयात्। तदर्थान्वितेत्यत्राऽभेदान्वयो वा निवेशनीय इति।

वृत्तिर्न" इति नियमेन समाघटकपदार्थस्य विशेषणत्वे तद्विशेष्यवाचकपदस्य पदान्तरेण समासो न भवतीति नियमेन 'ऋद्धस्य राजमातङ्गाः' इति प्रयोगाऽभावो विज्ञेयः। समासाघटकपदसापेक्षत्वं निरूपयति– तत्सापेक्षत्वमिति। तत्सापेक्षत्वम्= विशेषणसापेक्षत्वम्। तदर्थान्वितस्वार्थपरत्वम्= विशेषणान्वित- स्वार्थबोधकत्वम्, यथा ऋद्धस्य राजमातङ्गाः' इत्यत्र राजपदस्य ऋद्धपदार्थान्वितराजपदार्थबोधकत्वात्सापेक्षत्वं सापेक्षत्वादसमर्थत्वमसमर्थत्वा- त्समासासाधुत्वम्। स्वार्थपदार्थमाह–स्वार्थश्चेति। स्वीयेति– स्वनिष्ठवृत्ति- ग्रहविशेष्यः स्वार्थः इत्यर्थः यथा स्वं राजपदं तन्निष्ठा या वृत्ती राजा राजपदशक्य इति तादृशवृत्तिग्रहे विशेष्यतया भासमानत्वाद् राजपदस्य राजपदार्थः स्वार्थः। अत एवेति– अत एव=समासघटकपदस्य समासाऽघटकपदवाच्य- पदार्थान्वितस्वार्थपरत्वे सापेक्षत्वादेव। तथा च 'ऋद्धस्य राजमातङ्गाः' इत्यत्र समासघटकराजपदस्य स्वीयवृत्तिग्रहविशेष्यभूतराजपदार्थवाचकस्य समासाऽघटकर्द्ध(ऋद्ध) पदवाच्यार्थान्वितराजपदार्थपरत्वेन सापेक्षत्वात् समासासाधुत्वम्। 'शरैः शातितपत्रः' इत्यत्र समासघटकशातितपदस्य सापेक्षत्वं नास्ति शातितपदस्य शरकरणकत्वरूपार्थान्वितस्वार्थपरत्वाभावात्, तथा 'चैत्रस्य दासभार्या' इत्यत्रापि समासघटकदासपदस्य सापेक्षत्वं नास्ति– चैत्रनिरूपितत्व- रूपार्थान्वितस्वार्थपरत्वाभावात्, तथा च नात्र समासानुपपत्तिरित्यर्थः। उक्ते हेतुमाह–तदर्थेति। तदर्थैकदेशे=शातितपदार्थैकदेशे शातने दासपदार्थैकदेशदासत्वे चैव शरकरणकत्वस्य चैत्रनिरूपितत्वस्य चान्वयात्। विनिगमनान्तरमाह– तदर्थान्वितेति, एवं हि– अभेदान्वयस्वार्थपरत्वं सापेक्षत्वमिति लब्धम्– समासाऽघटकपदवाच्यार्थेन सहाऽभेदसम्बन्धेनान्वितस्वार्थबोधकत्वं सापेक्षत्व- मित्यर्थः। तथा च 'ऋद्धस्य राजमातङ्गाः' इत्यत्र राजपदार्थर्द्धपदार्थयोर- भेदान्वयबोधे तात्पर्यसत्त्वात् सापेक्षत्वं तेन च समासासाधुत्वम्। 'शरैः शातितपत्रः' इत्यत्र तु समासाघटकपदवाच्यार्थेन शरेण समासघटक-

तदसत्– स्वारसिकलक्षणाग्रहस्थलानुरोधेन तादृशसमभि-व्याहारज्ञानादेस्तथाविधबोधजनकतायाः क्लृप्तत्वात् तत्र निरूढलक्षणास्वीकारे गौरवाभावात्। यत्र राजपदस्य राज-संबन्धिनि स्वारसिकलक्षणाग्रहस्तत्र तादृशबोधस्योभय-मतसिद्धतया तादृशसमभिव्याहारज्ञानस्य राजसंबन्ध्यऽभिन्न-

---

शातितपदार्थस्य नाऽभेदान्वये तात्पर्यं किन्तु शराणां शातितपदार्थे स्वकरणकशातनफलशालित्वेन भेदसम्बन्धेनान्वये तात्पर्यमिति नात्र सापेक्षत्वापत्तिर्येन समासाऽसाधुत्वं स्यात्, 'चैत्रस्य दासभार्या' इत्यत्र च समासाघटकचैत्रपदार्थस्य समासघटकदासपदार्थे स्वनिरूपितस्वत्वरूप-भेदसम्बन्धेनान्वय इति न समासानुपपत्तिरित्यर्थः।

अत्र कृष्णंभट्टो यथा– "तदुक्तम्– "सविशेषणानां वृत्तिर्न वृत्तस्य विशेषणयोगो न" इति, विशेषणसहितानां विशेष्याणामेव वृत्तिर्न लुप्तविशेषणानां विशेष्याणामपि तेन सविशेषणानां मातङ्गानां राजरूपविशेषणेन सह समास उपपन्नः। एवं वृत्तस्य विशेषणस्य विशेषणयोगो नेत्यर्थस्तेन 'सुन्दरा राजमातङ्गाः' इत्यत्र सुन्दरविशेषणस्य राजमातङ्गे विशेष्येऽन्वयः। समासघट-केत्येतदभिप्रायकमेव। ऋद्धविशेषणयुक्तस्य विशेषणस्य राज्ञः समासरूपा वृत्तिर्न एवञ्च वृत्तस्य=समस्तस्य राज्ञो विशेषणस्य ऋद्धस्येति विशेषणयोगोपि नेति तदर्थः। तत्सापेक्षत्वं तदर्थान्वितस्वार्थपरत्वम्–समासाऽघटकऋद्ध-पदार्थान्वितो यः स्वार्थो राजपदार्थस्तत्परं तात्पर्यं यस्य तत् तदर्थान्वितस्वार्थपरं राजपदं तत्त्वं राजपदेऽस्ति, स्वार्थश्च स्वीयवृत्तिग्रहविशेष्यः–स्वं राजपदं तच्छक्तिग्रहो 'राजा राजपदशक्यः' इत्याकारकस्तद्विशेष्यो राजा तदर्थान्वितः स्वार्थो राजपदार्थः स च राजपदशक्तिग्रहविशेष्य इत्यर्थकरणादेव।" "शरैः शातितपत्रश्चैत्रस्य दासभार्येत्यादौ न समस्यमानशातितदासपदादेः सापेक्षता तदर्थैकदेशशातनदासत्वादावेव शरकरणकत्वचैत्रनिरूपितत्वादीनामन्वयादिति मूलम्–तत्पदं समासाऽघटकं तृतीयापदं तदर्थः शरकरणकत्वं तदन्वितस्वार्थः शातितपदशक्तिग्रहविशेष्यं शातनकर्म पत्रादिकं न भवति किन्तु शातितपदार्थैकदेशशातनक्रियैव भवति शरकरणकत्ववती या शातनक्रिया तत्कर्म पत्रं यस्येत्यर्थात्। एवम् 'चैत्रस्य दासभर्या' इत्यत्र तत्पदं समासाऽघटकं चैत्रस्येति षष्ठीपदं तदर्थो निरूपितत्वं तदन्वितः स्वार्थो दासपदशक्तिग्रहविशेष्यो

पुरुषबोधे कारणतायाः क्लृप्तत्वात् तयैव निर्वाहेण सर्वत्र लुप्तविभक्तिस्मरणकल्पने मानाभावात्।

न च स्वारसिकलक्षणाग्रहस्थले तत्र तादृशान्वयबोधस्योभयवादिसिद्धत्वेऽपि निरूढलक्षणामते संबन्धितात्पर्यस्यानादित्वकल्पनागौरवम्, अनादितात्पर्यविषयीभूतार्थनिष्ठ-

दासो न भवति किन्तु दासपदार्थैकदेशः सेवारूपचैत्रनिरूपितत्ववद्दासत्वं तद्वती भार्येत्यर्थात् तेन न समस्यमानशातितदासपदादेः समासाऽघटकशरै रिति चैत्रस्येति पदसापेक्षत्वं येनाऽसमर्थत्वात् समासो न स्यादित्यर्थः।" इति।

प्रकारतावादी परिहरति–तदसदिति, यदा 'राजपुरुषः' इत्यत्र कस्य चिद् राजपदस्य राजसम्बन्धिनि स्वारसिकलक्षणाग्रहो भवति तदा तादृशसमभिव्याहारज्ञानादेः=राजपदाव्यवहितोत्तरपुरुषपदसमभिव्याहारज्ञानस्य तथाविधशाब्दबोधजनकतायाः='राजसंबन्ध्यभिन्नः पुरुषः' इति बोधजनकताया उभयमतक्लृप्तत्वात् तत्र=राजसम्बन्धिनि राजपदस्य निरूढलक्षणास्वीकारे गौरवाभावात्– स्वारसिकलक्षणास्वीकारस्य गले पतितत्वादित्यर्थः। उक्तमेव विशदयति– यत्रेति। तत्र=स्वारसिकलक्षणाग्रहस्थले। तादृशबोधस्य='राजसंबन्ध्यभिन्नः पुरुषः' इति बोधस्य। तादृशसमभिव्याहारज्ञानस्य=राजपदाव्यवहितोत्तरपुरुषपदसमभिव्याहारज्ञानस्य। तयैव=लक्षणयैव। सर्वत्र='दधि पश्य' इत्यत्रेव 'राजपुरुषः' इत्यादौ लुप्तविभक्तिकल्पने मानाभावात्, युक्त्यभावाच्चेत्यर्थः।

नन्वऽनादितात्पर्यवती लक्षणा हि निरूढलक्षणेत्युच्यते 'राजपुरुषः' इत्यत्र च निरूढलक्षणास्वीकारे राजसम्बन्धिनि राजपदस्यानादितात्पर्यकल्पनेन किं वा तात्पर्यस्यानादित्वकल्पनेन गौरवं स्यात् स्वारसिकलक्षणास्थले तु तात्पर्यस्यानादित्वकल्पना नास्तीति गौरवाभावात् स्वारसिकलक्षणादृष्टान्तेन निरूढलक्षणास्वीकारो नोचित इत्याशङ्क्याह– न चेति। परिहारहेतुमाह– राजेति, 'राजपुरुषः' इत्यादौ राजसम्बन्धिनि राजपदस्याऽनादितात्पर्यकल्पना त्वेकदैव कर्तव्या न वारं वारं लुप्तविभक्तिस्मरणं तु प्रतिवाक्यश्रवणं कर्तव्यमिति लुप्तविभक्तिस्मरणकल्पनायामेवाधिकं गौरवमित्यर्थः।

लक्षणाया एव निरूढलक्षणात्वादिति वाच्यम्, 'राजपुरुषः' इत्यादिवाक्यजन्यशाब्दबोधात् पूर्वं नियमतो लुप्तविभक्ति-स्मरणकल्पनापेक्षया तात्पर्यस्याऽनादित्वकल्पनायां गौरव-विरहादिति।

न चैवम्– 'दधि पश्यति' इत्यादावपि दध्यादिपदस्य दधिकर्मकादौ लक्षणां स्वीकृत्य धात्वर्थेन समं तस्याऽभेदान्वय-बोधोपपादनसंभवात् तत्रापि लुप्तविभक्तिस्मरणकल्पन-मनुचितमिति वाच्यम्, दध्यादिपदस्य दधिकर्मकादौ लक्षणा-

---

ननु यदि 'राजपुरुषः' इत्यादौ लक्षणां स्वीकृत्योक्तरीत्या लुप्तविभक्तिस्मरणं न स्वीक्रियते तदा 'दधि पश्यति' इत्यादावपि लुप्तविभक्तिस्मरणं न कर्तव्यं किन्तु दध्यादिपदस्य दधिकर्मकादौ लक्षणा स्वीकर्तव्या तस्य=दधिकर्मकस्य धात्वर्थेन दर्शनेन सह 'दधिकर्मकं दर्शनम्' इत्येवमभेदान्वयस्य संभवेनाभेदान्वयबोधसंभवादित्याशङ्क्याह– न चेति। परिहारहेतुमाह– दध्यादीति। तस्य=दधिपदस्य। 'दधि पश्यति' इत्यत्र दधिपदस्य दधिकर्मके लक्षणाग्रहदशायामपि यदा कस्यचित् दधीतिपदे प्रथमाविभक्त्-यन्तत्वस्य तृतीयाविभक्त्यन्तत्वस्य वा भ्रमो जायते तदा दधिकर्मकस्य धात्वर्थेनाऽभेदान्वयबोधासंभवात् 'दधिकर्मकः पश्यति' 'दधिकर्मकेण पश्यति' इत्येव बोधो भवति न त्वभेदान्वयबोधस्तथोक्तस्थलेऽपि='दधि पश्यति' इत्यत्र दधिपदे द्वितीयेतरविभक्त्यन्तत्वभ्रमाभावदशायामप्यऽभेदसम्बन्धेन दधिकर्मकदर्शनान्वयबोधो न संभवति विनिगमनाविरहादिति हेतोरभेदान्वयबोधं प्रति द्वितीयान्तदधिपदोत्तरपश्यतिपदसमभिव्याहारस्य कारणत्वं वक्तव्यं तथा च लुप्तविभक्तिस्मरणमावश्यकमेव। एतदेवोपपादयति दोषान्तरं प्रदर्शयन्– भवन्मत इति। किञ्च भवन्मते लुप्तविभक्तिस्मरणास्वीकारे ह्यऽभेदान्वयबोधं प्रति द्वितीयान्तदधिपदोत्तरपश्यतिपदसमभिव्याहारज्ञानस्य तु हेतुता न वक्तुं शक्यते लुप्तद्वितीयानुसंधानापत्तेः, तस्मादऽभेदान्वयबोधं प्रति दधिपदोत्तर-पश्यतिपदसमभिव्याहारज्ञानस्य कारणत्वं वक्तव्यं तत्तु यथा 'दधि पश्यति' इत्यत्रास्ति तथा 'दधिकर्मकः पश्यति' इत्यत्राप्यस्त्येवेति 'दधिकर्मकः पश्यति' इत्यत्राप्यभेदान्वयापत्तिः प्राप्ता तद्वारणाय द्वितीयान्तदधिपदोत्तर-

ग्रहदशायामपि तस्य द्वितीयेतरविभक्त्यन्त- त्वभ्रमदशायाम् 'दधिकर्मकः पश्यति' 'दधिकर्मकेण पश्यति' इत्यादावि- वोक्तस्थलेऽपि दधिकर्मकदर्शनान्वयबोधानुदयात्। भवन्मते 'दधिकर्मकः पश्यति' इत्यत्र 'दधि पश्यति' इति स्थलीयदधि- पदोत्तरपश्यतिपदत्वरूपाकाङ्क्षाज्ञानादिघटितसामग्री- सत्त्वाद् दधिकर्मकदर्शनान्वयस्यापत्तेर्द्वितीयान्तदध्यादिपदत्वावच्छिन्न- धर्मिकतादृशधात्वादिसमभिव्याहारज्ञानस्य तादृशान्वयबोधे हेतुताया आवश्यकत्वात्, 'दधि पश्यति' इत्यादौ लुप्तद्वितीया- नुसंधानस्यावश्यकत्वात्।

राजसंबन्धिपुरुषाद्यन्वयबोधे च राजादिपदाऽव्यवहितोत्तर- पुरुषादिपदत्वप्रकारकज्ञानस्य हेतुतायाः स्वारसिकलक्षणाग्रह- स्थलानुरोधेनावश्यकल्पनीयतया 'राजपुरुषः' इत्यादौ राजा- दिपदस्य तृतीयाद्यन्तत्वभ्रमदशायां राजसंबन्धिपुरुषाद्यन्वय- बोधापत्त्यऽसंभवात् तृतीयादिविभक्त्या व्यवधानात्। 'दधि पश्यति' इत्यादौ दधिपदाव्यवहितोत्तरत्वप्रकारकधातुपदज्ञानस्य हेतुताया अक्लृप्तत्वात्। 'पश्यति दधि' 'पश्यति चैत्रो दधि'

पश्यतिपदसमभिव्याहारज्ञानस्याऽभेदान्वयबोधं प्रति कारणत्वं वक्तव्यं तथा च 'दधि पश्यति' इत्यादौ लुप्तद्वितीयादिस्मरणं प्राप्तमेवेत्यर्थः। तादृशान्वयबोधे= अभेदान्वयबोधे।

ननु 'दधि पश्यति' इत्यत्रेव 'राजपुरुषः' इत्यत्रापि लुप्तविभक्तिस्मरणं कथं न स्वीक्रियते? इत्याशङ्क्य 'राजपुरुषः' 'इत्यस्य वैषम्यमुपपादयति– राजसम्बन्धीति, राजपदस्य राजसम्बन्धिनि स्वासिकलक्षणाग्रहस्थलानुरोधेन 'राजपुरुषः' इत्यत्र राजसम्बन्धिपुरुषयोरभेदान्वयबोधं प्रति राजपदाव्यवहितोत्तर- पुरुषपदसमभिव्याहारज्ञानस्य कारणत्वमस्तीति तस्य 'राजपुरुषः' इत्यत्र सत्त्वादभेदान्वयबोधो जायते, 'राजपुरुषः' इत्यत्र राजपदस्य तृतीयाद्यन्तत्वभ्रमदशायां च भ्रमविषयीभूततृतीयादीनां राजपदार्थस्मरणेन तेन तृतीयादिना व्यवधानात् राजपदाव्यवहितोत्तरपुष्पपदसमभिव्याहारज्ञानस्या–

इत्यादावपि दधिकर्मकदर्शनान्वयबोधात् तादृशज्ञानहेतुताया अशक्यकल्पनीयत्वाच्चेति।

'तण्डुलं पचति इत्यादौ तण्डुलादिपदस्यैव तण्डुलादिकर्मके लक्षणा विभक्तिस्तु साधुत्वार्था। एवम्– 'राज्ञः पुरुषः' इत्यादावपि राजादिपदस्य संबन्ध्यादौ लक्षणा विभक्तिः साधुत्वार्था। तत्तद्विभक्त्यन्तसमभिव्याहारस्य तत्तल्लाक्षणिकार्थ-

---

भावादभेदान्वयबोधापत्तिर्नास्तीति नातिप्रसङ्गो न वा 'राजपुरुषः' इत्यत्र लुप्तविभक्तिस्मरणापेक्षेत्यर्थः। नन्वेवम् 'दधि पश्यति' इत्यादावप्यभेदान्वयबोधं प्रति दधिपदाव्यवहितोत्तरपश्यतिपदसमभिव्याहारस्य कारणत्वं वक्ष्याम इति 'दधिकर्मकः पश्यति' इत्यत्र मध्ये कर्मकपदेन व्यवधानात्कारणाभावान्ना-भेदान्वयबोधापत्तिरित्याशङ्क्याह– दधि पश्यतीति। 'पश्यति दधि' 'पश्यति चैत्रो दधि' इत्यादौ दधिपदाव्यवहितोत्तरपश्यतिपदसमभिव्याहाराभाव-प्यभेदान्वयबोधस्वीकारादभेदान्वयबोधं प्रति तादृशज्ञानहेतुतायाः=दधिपदाव्यव-हितोत्तरपश्यतिपदसमभिव्याहारज्ञानस्य हेतुत्वं नैव वक्तुं शक्यते इति द्वितीयान्तदधिपदसमभिव्याहारसहकृतपश्यतिपदसमभिव्याहारज्ञानस्य हेतुत्वं वक्तव्यं तथा च लुप्तद्वितीयादिस्मरणमावश्यकमेवेत्यसमासस्थले लुप्तविभक्तिस्मरणं भवति समासस्थले च न भवतीति स्वीकार्यमित्यर्थः।

पुनः पूर्वपक्षिमतमनुवदति– तण्डुलमिति। यदुच्यते– 'तण्डुलं पचति' इत्यत्र तण्डुलपदस्य तण्डुलकर्मके लक्षणयाभेदान्वयबोधः संभवति 'तण्डुलकर्मकः पाकः' इति, विभक्तिस्तु साधुत्वार्था निरर्थकैवेति तच्चिन्तनीयम्। तथा यदुच्यते– यथा– 'राजपुरुषः' इत्यत्र राजपदस्य राजसम्बन्धिनि लक्षणां स्वीकृत्याभेदान्वयबोधः स्वीक्रियते तथा 'राज्ञः पुरुषः' इत्यत्रापि राजपदस्य राजसम्बन्धिनि लक्षणां स्वीकृत्याभेदान्वयबोध एव स्वीकार्यो न तु ङसपदोपस्थितस्वत्वद्वारा भेदान्वयः– विभक्तेः साधुत्वार्थत्वेन निरर्थकत्वादिति तदपि चिन्तनीयमित्यन्वयः। नन्वेवं तण्डुलादिपदस्यैव तण्डुलकर्मके लक्षणास्वीकारे विभक्तेश्च निरर्थकत्वस्वीकारे 'तण्डुलः पचति' इत्यादावपि तण्डुलादिपदस्य तण्डुलकर्मके लक्षणापत्त्याभेदान्वयबोधापत्तिः स्यादित्याशङ्क्याह– तत्तद्विभक्त्यन्तेति,

बोधनियामकत्वान्नातिप्रसङ्गः। विभक्तेरेव प्रकृत्यर्थविशेषित-स्वार्थे लक्षणेति तु न संभवति– विभक्तेः कुत्रापि शक्तेर-क्लृप्ततया तत्र शक्यसंबन्धरूपलक्षणाया असंभवात्। 'तण्डुलः प्रमेयः' इत्यादौ विभक्त्यर्थाऽमिश्रितस्यैव प्रकृत्यर्थस्य भानात् प्रकृतिशक्तेः स्वार्थे क्लृप्ततया तत्र लक्षणासंभवादिति तु चिन्तनीयम्।

राजादिपदस्य राजसंबन्ध्यादौ शक्तत्वभ्रमदशायामिव तदर्थलक्षणाग्रहदशायामपि 'राजसंबन्धिसंबन्धी पुरुषः'

विभक्तेर्निरर्थकत्वेऽपि स्वरूपेण स्थितिसंभवाद् द्वितीयान्ततण्डुलपदस्यैव तण्डुलकर्मके लक्षणास्वीकारात् तण्डुलकर्मकाभेदान्वयबोधं प्रति द्वितीयासमभिव्याहारज्ञानस्य कारणत्वान्नातिप्रसङ्गः='तण्डुलः पचति' इत्यत्र नाभेदान्वयबोधापत्तिरित्यर्थः। ननु प्रकृतेः किमर्थं लक्षणा स्वीक्रियते? विभक्तेरेव प्रकृत्यर्थविशेषितस्वार्थे= तण्डुलकर्मकादौ लक्षणा किं न स्यादित्याशङ्क्याह– विभक्तेरेवेति। परिहारहेतुमाह– विभक्तेरिति, यदि विभक्तेः क्वचिदप्यर्थे शक्तिः स्यात्तदा विभक्तिशक्यस्य सत्त्वात् शक्यसम्बन्धरूपा लक्षणापि क्वचिदर्थे विभक्तेः स्यात् न चैवमस्ति–विभक्तेः क्वचिदप्यर्थे शक्तेरक्लृप्तत्वात्। तत्र=विभक्तौ। ननु 'तण्डुलं पचति इत्यत्र विभक्तिप्रकृत्योरुभयोरपि सत्त्वात् तण्डुलकर्मके प्रकृतिभूततण्डुलपदस्यैव लक्षणा न विभक्तेरित्यत्र विनिगमनाविरह इत्याशङ्क्य विनिगमनामाह– तण्डुल इति, 'तण्डुलः प्रमेयः' इत्यत्र तत्र मते प्रथमायाः प्रातिपदिक-मात्रार्थकत्वात् तदर्थस्तु कर्मत्वादिकोऽपि न संभवति विभक्त्यर्था-मिश्रितस्तण्डुलपदार्थस्तु भासते एवेति तव प्रकृतिशक्तेरवश्यं स्वीकर्तव्यत्वात् प्रकृतेरेव तण्डुलकर्मकादौ लक्षणास्वीकार उचितो न विभक्तेरित्यर्थः। तत्र=प्रकृतौ। स्वार्थे=तण्डुलपदार्थादौ।

यत् (८३ पृ.) "अथैतादृशरीत्यापत्तिवारणेऽपि" इत्यादिना 'राज्ञः पुरुषः' इत्यत्र विभक्तेः सम्बन्धवाचकत्वं न स्वीकार्यमित्युक्तं तत् परिहरति– राजादिपदस्येति, 'राज्ञः पुरुषः' इत्यत्र राजपदस्य राजनि वस्तुतः शक्तत्वेऽपि यदा राजसम्बन्धिनि शक्तत्वभ्रमः स्यात्तदा यथा 'राजसम्बन्धिसम्बन्धीपुरुषः'

इत्याद्यन्वयबोधस्य सर्वजनानामनुभवसिद्धत्वात्।

'पचति चैत्रः' इत्यादावपि कृतिसंबन्धेन पाकादेश्चैत्राद्यंशे विशेषणत्वोपगमे 'चैत्रो न पचति' इत्यादावन्वयबोधानुपपत्तिर्द्रष्टव्या—कृतिसंबन्धस्यापि वृत्त्यनियामकतया तत्संबन्धावच्छिन्नप्रतियोगिताकाभावस्याऽप्रसिद्ध्या तद्बोधनासंभवात्।

इत्येव बोधो भवति तथा राजपदस्य राजसम्बन्धिनि लक्षणाग्रहदशायामपि 'राजसम्बन्धिसम्बन्धी (राजसम्बन्धिसम्बन्धवान्) पुरुषः' इत्यन्वयबोधः सर्वानुभवसिद्ध एव तत्र राजपदस्य राजसम्बन्धी अर्थः, षष्ठ्या एव सम्बन्धरूपोऽर्थो भासते इति न विभक्तेर्निरर्थकत्वमित्यर्थः।

यत् (८८ पृ.) "एवम् 'पचति चैत्रः' इत्यादावपि कृतिसम्बन्धेन पाकादेश्चैत्राद्यंशेऽन्वयबोधस्वीकार उचितः" इत्युक्तम्, तत्परिहरति— पचतीति। नञऽसत्त्वे य एव सम्बन्धः प्रकारतावच्छेदको भवति नञ्सत्त्वे स एव सम्बन्धः प्रतियोगितावच्छेदको भवतीति "प्रतियोग्यऽभावान्वयो तुल्ययोगक्षेमौ" इत्यत्र व्युत्पादितं तथा च 'पचति चैत्रः' इत्यत्र कृतिसम्बन्धेन पाकस्य चैत्रे प्रकारत्वोपगमे 'चैत्रो न पचति' इति नञ्घटितवाक्यस्थले शाब्दबोधानुपपत्तिः स्याद् यतः 'चैत्रो न पचति' इत्यत्र प्रतियोगितावच्छेदकसम्बन्धत्वं कृतेर्वक्तव्यं तत्तु न संभवति कृतिरूपसम्बन्धस्य वृत्त्यऽनियामकतया प्रतियोगितावच्छेदकसम्बन्धत्वासंभवात्, तत्सम्बन्धावच्छिन्न=कृतिसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धत्वेन नञा तद्बोधनासम्भवात्=कृतिसम्बन्धावच्छिन्नप्रतियोगिताकाभावबोधनासंभवादिति न 'पचति चैत्रः' इत्यत्र कृतिसम्बन्धेन पाकादेश्चैत्रादावन्वयः संभवतीत्यर्थः किन्तु पाकस्यानुकूलत्वसम्बन्धेन वा निरूपितत्वसम्बन्धेन वा कृतावन्वयस्तादृशकृतेश्चाश्रयतासम्बन्धेन चैत्रादावन्वयः स्वीकार्यः, आश्रयतासम्बन्धस्य च वृत्तिनियामकत्वेन प्रतियोगितावच्छेदकत्वात् 'चैत्रो न पचति' इत्यत्रान्वयबोधानुपपत्तिर्नास्ति— आश्रयतासम्बन्धेन कृत्यभावस्य प्रत्येतुं शक्यत्वात्। आख्यातस्यापि कृत्यर्थकत्वान्नाऽऽनर्थक्यमित्यर्थः।

अथैवमपि 'चैत्रो जानाति' इत्यादौ चैत्राद्यंशे ज्ञानादेराश्रयतासंबन्धेनान्वयबोधोपगमे क्षतिविरहः। आश्रयतासंबन्धस्याभावप्रतियोगितावच्छेदकतया 'न जानाति चैत्रः' इत्यादावाश्रयतासंबन्धावच्छिन्नप्रतियोगिताकज्ञानाद्यभावस्यैव भानसंभवात्। तथा च तत्राख्यातस्याश्रयत्वार्थकत्वं निर्युक्तिकम्।

न च धात्वर्थज्ञानादेराश्रयतासंबन्धेन चैत्रादिरूपप्रातिपदिकार्थे साक्षात् प्रकारत्वोपगमे 'ज्ञानं चैत्रः' इत्यादावपि तथान्वयबोधापत्तिरिति वाच्यम्, तादृशान्वयबोधे आख्यातान्तधातुसमभिव्याहारज्ञानस्य हेतुत्वात्। भवतोप्याश्रयताप्रकारकबोधे तादृशसमभिव्याहारज्ञानस्य हेतुताया आवश्यकत्वात्।

नन्वेवमपि=कृतिसम्बन्धस्य वृत्त्यनियामकतया 'न पचति चैत्रः' इत्यत्र शाब्दबोधानुपपत्त्याऽऽख्यातस्य कृत्यर्थकतया सार्थक्योपपादनेऽपि आश्रयतासम्बन्धस्य वृत्तिनियामकत्वेन 'चैत्रो न जानाति' इत्यादौ 'आश्रयतासम्बन्धावच्छिन्नप्रतियोगिताकज्ञानाभाववांश्चैत्रः' इति बोधसम्भवादाख्यातस्याश्रयत्वार्थकत्वकल्पनं निर्युक्तिकमित्याशङ्कते—अथैवमपीति। ११५ इतिचेदित्यन्तं शङ्काग्रन्थः। क्षतिविरहः='न जानाति चैत्रः' इत्यत्रान्वयबोधानुपपत्तिर्नास्ति—आश्रयतासम्बन्धेन चैत्रे ज्ञानाभावस्य प्रत्येतुं शक्यत्वात्, आश्रयतासम्बन्धस्य वृत्तिनियामकत्वेनाऽभावीयप्रतियोगितावच्छेदकसम्बन्धत्वोपपत्तेः। तत्र='चैत्रो जानाति' इत्यादौ। आश्रयतायाः संसर्गत्वाश्रयणादिति भावः।

ननु यदि 'चैत्रो जानाति' इत्यत्र धात्वर्थज्ञानस्य चैत्रे आश्रयतासम्बन्धेन साक्षादेवान्वयः स्यात्तदा 'ज्ञानं चैत्रः' इत्यत्रापि तथान्वयबोधापत्तिः=संसर्गविधयाऽऽकाङ्क्षादिबलेन भासमानाश्रयतासम्बन्धेन धात्वर्थज्ञानस्य चैत्रे साक्षादेवान्वयः स्यान्न चैतदिष्टमित्याख्यातस्याश्रयत्वार्थकत्वं स्वीकार्यं तथा चाश्रयत्वोपस्थापकस्याख्यातस्य 'ज्ञानं चैत्रः' इत्यत्राभावादाश्रयतासम्बन्धेन चैत्रे धात्वर्थज्ञानस्यान्वयापत्तिर्नास्तीत्याशङ्क्याह— न चेति। परिहारहेतुमाह—तादृशेति। तादृशान्वयबोधे=आश्रयतासम्बन्धेनान्वयबोधे आख्यातान्तधातुपदसमभिव्याहारज्ञानस्य कारणत्वात् 'ज्ञानं चैत्रः' इत्यत्र चाख्यातान्तधातुपदसमभिव्याहाराभावान्नाश्रयतासम्बन्धेन चैत्रे धात्वर्थज्ञानस्यान्वयापत्तिरित्यर्थः।

यत्तु– 'पचति चैत्रः' इत्यादौ 'पाककृतिमांश्चैत्रः' इत्याकारकाख्यातार्थप्रकारकशाब्दबोधोत्पत्त्या तत्राख्यातजन्यकृत्युपस्थितेर्हेतुत्वकल्पनमावश्यकम्, तथा च तत्तदर्थविशेषान् निवेश्यात्मनिष्ठप्रत्यासत्त्या पदार्थोपस्थितेर्हेतुत्वकल्पने शक्यलक्ष्यसहस्रार्थभेदेनाख्यातजन्योपस्थितेः कारणताबाहुल्यमित्यर्थ–

भवतः=प्रकारतावादिनोऽप्याऽऽश्रयताप्रकारकबोधे='ज्ञानाश्रयत्ववांश्चैत्रः' इति बोधे तादृशसमभिव्याहारज्ञानस्य='जानाति चैत्रः' इत्याकारकाख्यातैकवचनान्तज्ञाधातुसमभिव्याहृतप्रथमैकवचनान्तचैत्रपदज्ञानस्य हेतुताया आवश्यकत्वात् अन्यथा 'ज्ञानं चैत्रः' इत्यत्राश्रयतोपस्थापकाख्याताभावेनाश्रयतासम्बन्धप्रकारकान्वयबोधस्य वारणे कृतेऽपि 'जानन्ति चैत्रः। इत्यत्राश्रयताप्रकारकः 'ज्ञानाश्रयत्ववांश्चैत्रः' इत्यन्वयबोधापत्तिः स्यादेवाश्रयतोपस्थापकस्याख्यातस्य सत्त्वात् तद्वारणार्थं तवाप्युक्तरीत्योक्तमसमभिव्याहारज्ञानस्य हेतुत्वस्वीकारे आवश्यके आख्यातस्याश्रयत्वार्थकत्वकल्पनं निर्युक्तिकमेव उक्तसमभिव्याहरज्ञानेनैव कारणीभूतेन सर्वाऽनिष्टनिवारणसम्भवादित्यर्थः।

पुनरपि 'जानाति' इत्यादावाख्यातस्य सार्थकतामुपपादयति– यत्त्विति (तदप्यसदित्यन्तम्)। 'पचति चैत्रः' इति वाक्यात् 'पाककृतिमांश्चैत्रः' इत्याकारकः शाब्दबोधो जायते अत्र चैत्रे कृतिः प्रकारतया भासते प्रकारतया भानं च पदेनोपस्थितस्यैव भवतीत्यत्राख्यातकृतेरुपस्थितिः स्वीकार्या कृत्युपस्थितेश्च शाब्दबोधं प्रति हेतुत्वमवश्यं स्वीकार्यमन्यथात्र कृतेः प्रकारत्वं न स्यात्, तथा च शाब्दबोधोपस्थित्योः स्थलभेदेन भिन्नत्वाद् आत्मनिष्ठप्रत्यासत्त्या हेतुत्वे हि 'पचति' इत्यत्र पाककृत्युपस्थितित्वेन कारणता 'जानाति' इत्यत्राश्रयत्वोपस्थितित्वेन कारणता 'नश्यति' इत्यत्र नाशप्रतियोगित्वोपस्थितित्वेन कारणतेत्येवं तत्तदर्थविशेष (पाककृत्यादि) प्रवेशः स्यादिति तत्तदर्थविशेषान्निवेश्यात्मनिष्ठप्रत्यासत्त्या पदार्थोपस्थितेर्हेतुत्वे 'पचति' इत्यादावाख्यातजन्यकृत्याद्युपस्थितेर्हेतुत्वं प्राप्तं तत्राख्यातस्याप्यनेके शक्यार्था लक्ष्यार्था भवन्तीति शक्यलक्ष्यसहस्रा (अनेका)र्थभेदेन तत्तद्विषयकाख्यातजन्योपस्थितेरपि भेदात् कारणताबाहुल्यम्=अनन्तकार्यकारणभावकल्पनेन गौरवं स्याद् यथा– 'पचति' इत्यत्र पाककृतिप्रकारकशाब्दबोधं प्त्याऽऽख्यातजन्यकृत्युपस्थितेः कारणत्वम् 'जानाति' इत्यत्राश्रयताप्रकारकशाब्दबोधं

विशेषाननिवेश्य धात्वर्थप्रकारकान्वयबोधं प्रति प्रत्ययजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्यैव हेतुत्वमुपेयते तथा च तादृशकारणबाधेन चैत्रादेर्धात्वर्थज्ञानविशेष्यतया 'चैत्रो जानाति' इत्यादौ भानं न संभवति।

प्रत्याऽऽख्यातजन्यकृत्युपस्थितेः कारणत्वमित्याऽऽत्मनिष्ठप्रत्यासत्त्या न कारणत्वमुपस्थितेः स्वीकार्यं किन्तु विषयनिष्ठप्रत्यासत्त्या तथा चोक्तरीत्याऽऽख्यातोपस्थिताख्यातार्थकृत्यादिप्रवेशस्यापेक्षाभावेन कारणताबाहुल्यं न स्यात् तथाचार्थविशेषानऽनिवेश्य 'धात्वर्थप्रकारकान्वयबोधं प्रति समानविशेष्यताप्रत्यासत्त्या प्रत्ययजन्योपस्थितेः कारणत्वम्' इत्येवमनुगतः एकः कार्यकारणभावः स्वीक्रियते 'पचति' इत्यादौ च 'अनुकूलतासम्बन्धेन पाकवती कृतिः' इत्येवं धात्वर्थप्रकारककृतिविशेष्यक एव शाब्दबोधः स्वीक्रियते अत्र च धात्वर्थः पाकः कृतौ प्रकारः कृतौ च विशेष्यता वर्तते तादृशकृतिनिष्ठविशेष्यतासम्बन्धेन शाब्दबोध आख्यातरूपप्रत्ययजन्यकृतिविषयकोपस्थितिश्च कृतौ वर्तते एव कृतेः प्रत्ययेनोपस्थितत्वाद्विशेष्यत्वाच्चेत्यर्थः। तथा च=धात्वर्थप्रकारकान्वयबोधं प्रति प्रत्ययजन्योपस्थितेः कारणत्वस्वीकारे च तादृशकारणबाधेन='चैत्रो जानाति' इत्यत्र चैत्रस्य प्रत्ययेनोपस्थित्यभावात् चैत्रे समानविशेष्यतासम्बन्धेनोपस्थित्यभावेन धात्वर्थज्ञानप्रकारकचैत्रविशेष्यकबोधासम्भवात् चैत्रादेर्धात्वर्थज्ञानविशेष्यतयाभानं न संभवतीति 'जानाति इत्यत्राख्यातस्याश्रयत्वार्थकत्वं स्वीकार्यम् अथ च 'पचति' इत्यत्र यथा 'अनुकूलतासम्बन्धेन पाकवती कृतिः' इत्येवमाख्यातार्थकृतिविशेष्यकबोधो जायते तथा 'चैत्रो जानाति' इत्यत्रापि 'स्वरूपसम्बन्धेन चैत्रनिष्ठा निरूपितसम्बन्धेन ज्ञानवत्याऽऽश्रयता' इत्येवाख्यातार्थाश्रयताविशेष्यकधात्वर्थप्रकारकः शाब्दबोधः स्वीकार्य इति 'पचति' इत्यादाविव 'जानाति' इत्यादावप्याख्यातस्य सार्थकत्वं प्राप्तमेवेत्यर्थः। अत्र चाश्रयताया विशेष्यत्वेन विशेष्यतासम्बन्धेनाख्यातरूपप्रत्ययजन्योपस्थितिरप्याश्रयतायां वर्तत (आश्रयताया आख्यातप्रत्ययेनोपस्थितत्वात्) शाब्दबोधोऽपि वर्तते एव (शाब्दबोधेऽप्याश्रयताया एव विशेष्यत्वात्) इत्येषैव समानविशेष्यताप्रत्यासत्तिः, धात्वर्थो ज्ञानं चाश्रयतायामेव प्रकार इति 'धात्वर्थप्रकारकान्वयबोधं प्रति प्रत्ययजन्योपस्थितेः समानविशेष्यतासम्बन्धेन कारणत्वम्' इति कार्यकारणभावोप्युपपन्नः, आख्यातस्य 'जानाति' इत्यादौ सार्थकत्वमप्युपपन्नमित्यर्थः।

यदि च धातुत्वप्रत्ययत्वादीनामनुगतानां दुर्निर्वचतया नैतादृशानुगतकार्यकारणभावकल्पनं संभवतीति मन्यते? तदापि यत्र ज्ञाधातोरेव पाकादौ लक्षणा तत्र 'जानाति' इत्यादिवाक्यात् पाककृत्यादिप्रकारकान्वयबोधोत्पत्त्या ज्ञाधात्वर्थप्रकारकान्वय-

यदि चेति– ननु यदि धातुत्वप्रत्ययत्वादीनामनुगतत्वेन निर्वचनमुपपद्येत तदा 'धात्वर्थप्रकारकान्वयबोधं प्रति प्रत्ययजन्योपस्थितेः कारणत्वम्' इति कार्यकारणभावोऽप्युपपद्येत नैवमस्तीति नोक्तकार्यकारणभावकल्पनं सम्भवतीति (यदि मन्यते?) उक्तकार्यकारणभावानुपपत्त्या धात्वर्थप्रकारकान्वयबोधे प्रत्ययजन्योपस्थितेरकारणत्वात् 'जानाति' इत्यत्राख्यातप्रत्ययेनाश्रयतोपस्थितेर-पेक्षाभावादनुपस्थितस्य च प्रकारत्वविशेष्यत्वे न संभवत इत्याश्रयताविशेष्यक-शाब्दबोधं त्यक्त्वा 'चैत्रो जानाति' इत्यत्र 'आश्रयतासम्बन्धेन ज्ञानवांश्चैत्रः' इत्येवं चैत्रविशेष्यक एव बोधः स्वीकार्यो न त्वाश्रयताविशेष्यक इत्युक्तबोधे आश्रयतायाः संसर्गत्वेन भानेन प्रकारतया विशेष्यतया वा भानाभावात् तत्राख्यातस्य वृत्तिकल्पनं व्यर्थमेवेति 'जानाति' इत्यादावाख्यातस्य निरर्थकत्वमेव 'आश्रयतासम्बन्धेन ज्ञानवांश्चैत्रः' इत्यत्राश्रयतायाः संसर्गमात्रत्वेन संसर्गस्या-काङ्क्षाबलेन भानसम्भवादाख्यातेन तदुपस्थितेरपेक्षैव नास्ति येनात्राख्यातस्याश्रय-तार्थकत्वं कल्पनीयं स्यादिति यदि मन्यते इत्यर्थः।

एवमाक्षिप्य पुनरपि 'जानाति' इत्यादावाख्यातस्य सार्थक्यमुपपादयति– तदापीति। तदापि=धातुत्वप्रत्ययत्वादीनामननुगततया धात्वर्थप्रकारकान्वयबोधे प्रत्ययजन्योपस्थितेरकारणत्वेऽपि यत्र ज्ञाधातोः पाके लक्षणा तत्र 'जानाति' इति वाक्यात् 'अनुकूलतासम्बन्धेन पाकविशिष्टकृतिमांश्चैत्रः' इत्येवं पाककृतिप्रकारकान्वयबोधोत्पत्त्या ज्ञाधात्वर्थप्रकारकान्वयबोधे=कृतिनिष्ठ-विशेष्यतानिरूपितज्ञाधात्वर्थप्रकारताकान्वयबोधं प्रति ज्ञाधात्वऽव्यवहितोत्तर-तिप्त्वादिप्रकारकतिबादिज्ञानजन्यतिबर्थकृतिविशेष्यकोपस्थितेः समानविशेष्यता-प्रत्यासत्त्यास्तत्र=लक्षणास्थले हेतुता कल्पनीया ज्ञाधातुत्वतिप्त्वादीनामनुगततया च नैतत्कार्यकारणभावकल्पने काचिदनुपपत्तिरित्यर्थः। तथा च– ज्ञाधातुत्वति-प्त्वादीनामनुगततयोक्तलक्षणास्थले इव मुख्यार्थज्ञानपरज्ञाधातुप्रयोगस्थलेऽपि 'ज्ञाधात्वर्थज्ञानप्रकारकान्वयबोधे ज्ञाधात्वव्यवहितोत्तरतिप्त्वादिप्रकारकतिबादि-ज्ञानजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्या हेतुत्वम्' इत्येवं कार्यकारणभावस्य

बोधे तदव्यवहितोत्तरतिप्त्वादिप्रकारकज्ञानजन्योपस्थितेः समान-विशेष्यत्वप्रत्यासत्त्या हेतुतायास्तत्र कल्पनीयतया तादृशकारण-बाधात् 'चैत्रो जानाति' इत्यादौ चैत्रादेर्ज्ञानविशेष्यतया भानानुप-पत्तिर्दुर्वारैवेति।

तदप्यसत्– प्रत्ययान्तरार्थविशेष्यकशाब्दबोधे व्यभिचार-वारणाय तादृशोपस्थितिवैशिष्ट्यस्य तादृशोपस्थितिजन्यता-वच्छेदककोटाववश्यं निवेशनीयतया तदनुत्तरशाब्दबोधे

सम्भवेन स्वीकर्तव्यत्वात् चैत्रे च तादृशकारणबाधात्=तिप्जन्योपस्थितेरसत्त्वात् चैत्रस्य तिबर्थत्वाभावात् चैत्रस्य ज्ञानविशेष्यतया भानानुपपत्तिस्तदवस्थैव मुख्यार्थपरप्रयोगस्थलेऽन्यादृशकार्यकारणभावाश्रयणे गौरवात्। यतश्चोक्तरीत्या चैत्रे विशेष्यतासम्बन्धेन प्रत्यय तिप् जन्योपस्थितेरसत्त्वेन चैत्रस्य धात्वर्थ-निष्ठप्रकारतानिरूपितविशेष्यता न संभवति तिबर्थस्य च संभवत्यतः 'जानाति' इत्यादावाख्यातस्याश्रयत्वार्थकत्वं स्वीकार्यं तथा च 'जानाति' इत्यत्राख्यातेना-श्रयताया उपस्थितौ तस्यामाश्रयतायां विशेष्यतासत्त्वेन तादृशविशेष्यता-सम्बन्धेनोपस्थितिरप्यऽस्ति शाब्दबोधोप्यस्तीत्युक्तकार्यकारणभावोप्युपपन्नः 'निरूपितत्वसम्बन्धेन ज्ञानवत्याश्रयता' इत्येवं धात्वर्थप्रकारकाख्यातार्थाश्रयता-विशेष्यकश्च शाब्दबोधः स्वीकार्य इति 'पचति' इत्यादाविव 'जानाति' इत्यादावप्याख्यातस्य सार्थक्यं प्राप्तमेवेति सर्वं सुस्थमित्यर्थः।

आख्यातस्य निरर्थकत्वप्रतिपादनाय संसर्गतावादी 'जानाति' इत्यादौ धात्वर्थज्ञानप्रकारकचैत्रविशेष्यकबोधं प्रतिपिपादयिषुरुक्तं परिहरति तदप्यसदिति। 'ज्ञाधात्वर्थप्रकारकान्वयबोधं प्रति ज्ञाधात्वव्यवहितोत्तरतिप्त्वादि-प्रकारकज्ञानजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्या हेतुत्वम्' इत्येवमुक्तरीत्या सामान्यतः कार्यकारणभावो न सम्भवति– 'जानन् ज्ञाता' इत्यादौ ज्ञाधात्वर्थज्ञानप्रकारकचैत्रविशेष्यको बोधो विशेष्यतासम्बन्धेन शत्राद्यर्थे चैत्ररूपाश्रये जायते चैत्रस्य प्रत्ययार्थत्वेन विशेष्यत्वात् तत्र चैत्रे तिप्ज्ञानजन्योपस्थितिस्तु नास्त्येव 'जानन्' इत्यादौ तिबोऽभावादिति व्यभिचारः प्राप्त इति तादृशव्यभिचारवारणाय तादृशोपस्थितिवैशिष्ट्यस्य (कारणा-व्यहितोत्तरत्वस्य) तादृशोपस्थितिजन्यतावच्छेककोटौ (कार्यतावच्छेदककोटौ)

चैत्रादेर्ज्ञानादिविशेष्यतया भाने तादृशकारणबाधस्याकिंचित्करत्वात् तादृशानुपूर्वीघटकज्ञादिधातुजन्यज्ञानाद्युपस्थितिचैत्रादिरूपविशेष्योपस्थितियोग्यताज्ञानादिघटितसामग्र्या आश्रयतासंसर्गकशाब्दबोधजनने बाधकाभावात्।

न चैतन्मते आश्रयतासंबन्धेन ज्ञानादिप्रकारकशाब्दबोधे तादृशयोग्यताज्ञानहेतुत्वान्तरकल्पनाधिक्यम्, आश्रयतासंबन्धेन

निवेशः कर्तव्यो यथा– ज्ञाधातोः पाकादौ लक्षणास्थले 'आख्यातार्थकृत्युपस्थित्यव्यवहितोत्तरत्वविशिष्टज्ञाधात्वर्थपाकादि- प्रकारकशाब्दबोधत्वावच्छिन्नं प्रति ज्ञाधातूत्तरवर्तमानाख्यातजन्यकृत्युपस्थितिः कारणम्' इत्येवं विशिष्य कार्यकारणभावो वक्तव्यस्तथा च 'जानन्' इत्यादिवाक्यजन्यबोधे न व्यभिचार आख्यातार्थकृत्युपस्थित्युत्तरत्वाभावाद् आख्यातजन्यकृत्युपस्थितिजन्यत्वाभावाच्च, एवम् 'जानाति चैत्रः' इत्यत्र 'आश्रयतासम्बन्धेन ज्ञानवांश्चैत्रः' इत्याकारके तदनुत्तरशाब्दबोधे=तिप्ज्ञानजन्यकृत्युपस्थित्यनुत्तरशाब्दबोधे चैत्रस्य ज्ञानविशेष्यतया भाने तादृशकारणबाधस्य= ज्ञाधातूत्तरतिप्ज्ञानजन्योपस्थितिरूपकारणबाधस्याऽकिञ्चित्करत्वात्– तिप्ज्ञानजन्योपपस्थितेस्तिबर्थकृतिविशेष्यकशाब्दबोधं प्रति कारणत्वेऽपि चैत्रविशेष्यकशाब्दबोधं प्रति कारणत्वमेव नास्ति येनात्र चैत्रस्य तिपोपस्थित्यभावे ज्ञाधात्वर्थज्ञानविशेष्यतया भानं न स्यात् किन्तु तादृश='चैत्रो जानाति' इत्यानुपूर्वीघटकज्ञाधातुजन्यज्ञानोपस्थितिचैत्ररूपविशेष्योपस्थितियोग्यताज्ञानादि- घटितसामग्र्या 'आश्रयतासम्बन्धेन ज्ञानवांश्चैत्रः' इत्येवमाश्रयतासंसर्गकबोधो बाधकाभावाज्जायते एव अत्र च चैत्रादेर्ज्ञाधात्वर्थज्ञानविशेष्यतया भानं भवत्येवेत्येवं चैत्रस्य धात्वर्थज्ञानविशेष्यतया भानसंभवेनाश्रयतायाः संसर्गतया भानसम्भवे तत्राख्यातस्य वृत्तिकल्पनं व्यर्थमेव अन्यथाश्रयताया आख्यातार्थत्वे तदुपस्थितिकल्पनापत्त्या गौरवं स्यादिति 'जानाति' इत्यादावाख्यातं निरर्थकमेवेत्यर्थः।

नन्वाख्यातस्याश्रयतार्थकत्वे आश्रयतायाश्च प्रकारत्वे यथा ज्ञाधातोः पाकादौ लक्षणादशायां ज्ञाधात्वर्थनिष्ठप्रकारतानिरूपितज्ञाधातूत्तरवर्तमानतिबर्थनिष्ठविशेष्यताकयोग्यताज्ञानस्य ज्ञाधात्वर्थप्रकारकशाब्दबोधं प्रति हेतुत्वमस्ति तथा तस्यैव योग्यताज्ञानस्य मुख्यार्थपरवाक्यजन्यशाब्दबोधेऽपि

ज्ञानविशिष्टचैत्रादितात्पर्यकात् सर्वनाम्नः सांकेतिकशब्दान्तराद्वा तादृशसंबन्धेन ज्ञानादिप्रकारकचैत्रादिविशेष्यकशाब्दबोधस्य सर्वमते एव प्रसिद्धावपि तादृशशाब्दबोधे पदार्थान्तर- भाननैयत्येन तन्मिश्रितयोग्यताज्ञानस्य तत्र हेतुताया आवश्य- कत्वात्, ज्ञानादिविशिष्टचैत्रादिमात्रविषयकयोग्य- ताज्ञानस्य ज्ञानादिविशिष्टचैत्रादिविषयकशाब्दबो धे हे तुताया: कुत्राप्यक्लृप्तत्वादिति वाच्यम्, भवन्मतेऽपि ज्ञानाश्रयता-

---

कारणत्वमस्ति, लक्षणास्थले ज्ञाधात्वर्थः पाकः तिबर्थश्च कृतिः मुख्यार्थपर- प्रयोगस्थले च धात्वर्थो ज्ञानं तिबर्थश्चाश्रयतेत्यन्यदेतत् तथोभयत्र कार्यकारणभावोऽप्येकविध एव– धात्वर्थप्रकारकतिबर्थविशेष्यककार्यकारण- भावस्याश्रयणात्। तव संसर्गतावादिनस्तु मते नैवं सम्भवति किन्तु ज्ञाधातोः पाकादौ लक्षणादशायामाख्यातस्य कृत्यर्थकत्वाश्रयणेन तत्र 'जानाति' इत्यत्राख्यातार्थकृतिप्रकारकयोग्यताज्ञानस्य 'पाकानुकूलकृतिमांश्चैत्रः' इति शाब्दबोधे हेतुत्वम् मुख्यार्थपरे 'जानाति' इति प्रयोगे च 'आश्रयतासम्बन्धेन ज्ञानवांश्चैत्रः' इत्याकारकाऽऽश्रयतासम्बन्धेन ज्ञानप्रकारकशाब्दबोधे तादृश= आश्रयतासम्बन्धेन ज्ञानप्रकारकयोग्यताज्ञानस्य हेतुत्वमाख्यातस्यात्र निरर्थकत्वा- श्रयणाद् आश्रयतायाश्च संसर्गत्वाश्रयणादित्येकस्मिन्नेव 'जानाति' इति प्रयोगस्थले द्विविधयोग्यताज्ञानस्य हेतुत्वापत्त्या तत्राश्रयतासंसर्गकयोग्यताज्ञानस्य यद्धेतुत्वकल्पनं तदधिकमित्याशङ्कते– न चेति। एतन्मते–संसर्गतावादे।

ननु नाश्रयतासंसर्गकयोग्यताज्ञानस्य हेतुत्वकल्पनमधिकं यतः– यदा 'आश्रयतासम्बन्धेन ज्ञानविशिष्टश्चैत्रोऽस्ति तमानय' इत्येवं केनचिदुक्तं तत्र तत्पदस्य बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने शक्तत्वेन आश्रयतासम्बन्धेन ज्ञानविशिष्टचैत्रबोधकत्वात् तत्र तादृशबोधं प्रत्याऽऽश्रयता- संसर्गकज्ञानप्रकारकयोग्यताज्ञानस्य हेतुत्वं क्लृप्तमस्ति तथा यदा केनचित् 'यथा मणिघण्ट इत्युक्ते त्वया आश्रयतासम्बन्धेन ज्ञानविशिष्टश्चैत्रो बोद्धव्यः' इति सङ्केतः कृतस्तदा तस्य मणिघण्टशब्दस्याश्रयता संसर्गकज्ञानप्रकारकचैत्र- विशेष्यकशाब्दबोधजनकत्वात्तत्राश्रयतासंसर्गकज्ञानप्रकारकयोग्यताज्ञानस्य हेतुत्वं सर्वमतक्लृप्तमेवेति तेनैव योग्यताज्ञानेन 'जानाति' इति मुख्यार्थपरप्रयोग-

प्रकारकचैत्रादिविशेष्यकशाब्दबोधे तथाविधयोग्यताज्ञानहेतुताया आधिक्यात्। आश्रयतासंसर्गकज्ञानीयकारणतावच्छेदकस्य तदीयसंसर्गविषयताघटिततत्प्रकारकज्ञानत्वरूपकारणता-वच्छेदकापेक्षया लघुशरीरतयाऽऽश्रयतायाः संसर्गतामतस्यैव लघुत्वात्।

स्थलेऽप्याऽऽश्रयतासंसर्गकज्ञानप्रकारकजायमानशाब्दबोधं प्रति हेतुत्वस्य निर्वाहेण न नवीनहेतुत्वकल्पनापत्तिरित्याशङ्क्याह– आश्रयतासम्बन्धेनेति। आश्रयता-सम्बन्धेन ज्ञानविशिष्टचैत्रादितात्पर्यकात् सर्वनाम्नः सांकेतिकशब्दान्तराद्वा तादृशसम्बन्धेन=आश्रयतासम्बन्धेन ज्ञानादिप्रकारकचैत्रादिविशेष्यकशाब्दबोधस्य सर्वमते एव प्रसिद्धावपि तत्र यादृशयोग्यताज्ञानस्य हेतुत्वं नात्र तादृशयोग्यताज्ञानेन निर्वाहो यतः– शाब्दबोधे ह्यपरपदार्थवैशिष्ट्यं तदन्यपदार्थे भासते इति नियमः अपरपदार्थवैशिष्ट्यभानं विना पदार्थस्य शाब्दबोधविषयत्वमेव न भवति किं तूपस्थितिमात्रविषयत्वं भवतीति तादृशशाब्दबोधे=आश्रयतासम्बन्धेन ज्ञानादिविशिष्टतात्पर्यकात् सर्वनाम्नः सांकेतिकशब्दान्तराद्वा जायमाने शाब्दबोधे पदार्थान्तरभाननैयत्येन='सः' 'तम्' 'मणिघण्टः' इत्यादावाऽश्रयता- सम्बन्धेन ज्ञानविशिष्टचैत्रस्तु पदार्थ एवेति तस्मिन् तद्बोधकसर्वनामादिपदोत्तर-वर्तमानविभक्त्यर्थैकत्वादेवैशिष्ट्यस्य भानमवश्यं स्वीकार्यम्– 'आश्रयता-सम्बन्धेन ज्ञानविशिष्टचैत्र एकः' इति तथा चात्र त्वेकत्ववैशिष्ट्यं योग्यताज्ञाने भासते इति तन्मिश्रम्=एकत्वविषयकं यद् योग्यताज्ञानं तस्यैव हेतुत्वमस्ति 'जानाति' इति मुख्यार्थपरप्रयोगजन्यशाब्दबोधे त्वेकत्वविषयकयोग्यताज्ञानस्य हेतुत्वं नास्ति शुद्धचैत्रमात्रस्य पदार्थत्वेन तत्र धात्वर्थवैशिष्ट्यस्य भासमानत्वादिति 'जानाति' इति मुख्यार्थपरप्रयोगजन्यशाब्दबोधं प्रत्युक्तरीत्या यदाश्रयतासंसर्गक-योग्यताज्ञानस्य हेतुत्वं तदधिकमेव संसर्गतावादे इत्यर्थः।

नन्वाश्रयतासम्बन्धेन ज्ञानविशिष्टचैत्रादितात्पर्यकात् सर्वनाम्नः सांकेतिक-शब्दान्तराद्वा जायमाने उक्ते शाब्दबोधं नैकत्वादिविशिष्टविषयकयोग्यताज्ञानस्य हेतुत्वं किन्तु ज्ञानविशिष्टचैत्रमात्रविषयकयोग्यताज्ञानस्य हेतुत्वं वक्ष्यामस्तथा च तेनैव योग्यताज्ञानेन 'जानाति' इति मुख्यार्थपरप्रयोगजन्यशाब्दबोधस्यापि निर्वाहो भविष्यतीत्याशङ्क्याह– ज्ञानादिविशिष्टचैत्रादिमात्रेति। ज्ञानादिविशिष्ट-

न च यत्राश्रयत्वे ज्ञाधातुसमभिव्याहृताख्यातस्य शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा तत्र ज्ञानाश्रयताप्रकारकशाब्द-बोधस्योभयमतसिद्धतया तत्र तादृशयोग्यताज्ञानहेतुत्वमुभयमत-

चैत्रादिविषयकशाब्दबोधं प्रति पदार्थान्तरैकत्वादिवैशिष्ट्यशून्यज्ञानादि-विशिष्टचैत्रावेकपदार्थमात्रविषयकयोग्यताज्ञानस्य क्वचिदपि लोके हेतुत्वं क्लृप्तं नास्ति येन तेनैव 'जानाति' इत्यत्र निर्वाहः स्यादिति 'जानाति' इति मुख्यार्थपरप्रयोगजन्यशाब्दबोधे आश्रयतासंसर्गकयोग्यताज्ञानस्य यद्धेतुत्वकल्पनं तदुक्तरीत्याधिकमेवेत्यर्थः। तथा च 'जानाति' इत्यत्राख्यातस्याश्रयत्वार्थकत्वं स्वीक्रियतामिति भावः।

परिहारहेतुमाह– भवन्मतेऽपीति। भवन्मते='जानाति' इत्यादावाख्यातस्या-श्रयत्वार्थकत्वमतेऽपि ज्ञाधातोः पाकादौ लक्षणस्थले तु पाकानुकूलकृतिप्रकारक-योग्यताज्ञानस्य हेतुत्वं स्वीकार्यं तेन च योग्यताज्ञानेन 'जानाति' इत्यादौ मुख्यार्थस्थले आख्यातस्याश्रयत्वार्थकत्वाश्रयणे निर्वाहाभावाद् यथा मन्मते आश्रयतासंसर्गकयोग्यताज्ञानस्य हेतुत्वकल्पनमधिकं तथा तव मतेऽपि ज्ञानाश्रयताप्रकारकचैत्रादिविशेष्यकशाब्दबोधं प्रति तथाविध=ज्ञानाश्रयता-प्रकारकचैत्रादिविशेष्यकयोग्यताज्ञानस्य हेतुत्वकल्पनमधिकमस्त्येवेति तव मम चात्र साम्यमेवेत्यर्थः। स्वसंसर्गतावादे लाघवं प्रदर्शयति– आश्रयतेति, आश्रयतासंसर्गकज्ञानं शाब्दबोधस्तदीयं यत्कारणतावच्छेदकं योग्यताज्ञानस्या-वच्छेदकम् (योग्यताज्ञानत्वं किं वा संसर्गभूताश्रयत्वादिविषयकत्वम्) तस्य तदीयसंसर्ग=आश्रयतासंसर्गविषयताघटितं यत् तत्प्रकारकज्ञानम्=आश्रयता-प्रकारकशाब्दबोधस्तस्य यद् योग्यताज्ञानत्वरूपमाश्रयताप्रतियोगिक-संसर्गविषयकत्वं रूपं वा कारणतावच्छेदकं तदपेक्षया लघुशरीरतया= लघुभूतत्वेन=आश्रयतायाः संसर्गतामतस्यैव लघुत्वात्=आश्रयतायाः संसर्गत्वे एव लाघवादित्यन्वयः। आश्रयतासंसर्गकयोग्यताज्ञाने हि 'ज्ञानं चैत्र आश्रयता' इति त्रयो विषयाः– ज्ञानस्य प्रकारत्वात् चैत्रस्य विशेष्यत्वाद् आश्रयताया उभयसंसर्गत्वात्। आश्रयताप्रकारकयोग्यता– ज्ञाने हि 'ज्ञानं चैत्रः आश्रयता, आश्रयतायाश्च स्वरूपसम्बन्धः, ज्ञानस्य निरूपितसम्बन्धः' इति पञ्च विषयाः– ज्ञानस्य निरूपितत्वसम्बन्धेनाश्रयतायामन्वयस्तादृशाश्रयतायाश्च स्वरूपसम्बन्धेन चैत्रेऽन्वयः ज्ञानाश्रयतावांश्चैत्रः इति बोधः प्रकारीभूताया

सिद्धमेवेति वाच्यम्, आश्रयतायाः संसर्गतावादिना तत्राप्याश्रयताप्रकारकबोधस्यानभ्युपगन्तव्यत्वादिति चेत्?

आश्रयताया सम्बन्धान्तरं विना चैत्रेऽन्वयानुपपत्तेरिति प्रकारतावादापेक्षया संसर्गतावादे लाघवम्, एवमुपस्थितावपि लाघवगौरवे ज्ञातव्ये इति भावः। तदेवोक्तम्– तदीयेति– प्रकारीभूताश्रयताया यः संसर्गः=स्वरूपसम्बन्धस्तद्विषयताघटितमित्यर्थः प्रकारतामते योग्यताज्ञानस्य आश्रयतासंसर्ग आश्रयतायाः स्वरूपसम्बन्धः) विषयकत्वाद् आश्रयतासंसर्गविषयताघटितत्वम्। किं वात्र ज्ञानपदाभ्यां योग्यताज्ञानमेव ग्राह्यम्।

ननु यत्त्वया "भवन्मते" इत्यादिनाश्रयताप्रकारकयोग्यताज्ञानस्य हेतुताधिक्यं मे प्रदर्शितं तन्नास्ति यतः यत्र ज्ञाधातूत्तरवर्तमानाख्यातस्य कस्यचित् पुंस आश्रयत्वे शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा स्यात् तत्र ज्ञानाश्रयताप्रकारक एव शाब्दबोधो जायते स च तादृश=आश्रयताप्रकारकयोग्यताज्ञानेनैव जायते इत्युभयमतसिद्धमेव तथा चाश्रयताप्रकारकयोग्यताज्ञानस्यात्र हेतुत्वं सिद्धमेवेति तेनैवाश्रयताप्रकारकयोग्यताज्ञानेन 'जानाति' इति मुख्यार्थपरप्रयोगाज्जायमानाश्रयताप्रकारकशाब्दबोधस्यापि निर्वाहो भविष्यतीत्याशङ्क्याह– न चेति। परिहारहेतुं हठेनाह–आश्रयताया इति। तत्रापि=आख्यातस्याश्रयत्वे शक्तिभ्रमस्थलेऽपि तथा स्वारसिकलक्षणास्थलेऽपि संसर्गतावादिनाश्रयताप्रकारकबोधो न स्वीक्रियते किं त्वाश्रयतासंसर्गक एव बोधः स्वीक्रियते इति नोभयमतसिद्धः शक्तिभ्रमादावप्याश्रयताप्रकारकशाब्दबोधो येनोक्तरीत्या प्रकारतावादे आश्रयताप्रकारकयोग्यताज्ञानस्य हेतुत्वकल्पनमधिकं न स्यात् तत्प्रयुक्तं गौरवं च न स्यादित्यर्थः। यथा कस्यचिन्मते विभक्त्यर्थः कर्मत्वमपि संसर्ग एव 'कर्मतासम्बन्धेनौदनवान् पाकः' इति बोधस्वीकारात् यथा च 'राज्ञः पुरुषः' इत्यत्र षष्ठ्यर्थस्वत्वमपि संसर्ग एव 'स्वत्वसम्बन्धेन राजवान् पुरुषः' इति बोधस्वीकारात् तथा 'जानाति' इत्यादावाख्यातार्थ आश्रयतापि संसर्ग एव न तु प्रकारः 'आश्रयतासम्बन्धेन ज्ञानवांश्चैत्रः' इति च बोधः स्वीक्रियते, अनुपस्थितस्य प्रकारत्वासंभवेऽप्युपस्थितस्य संसर्गत्वे बाधकाभावादाख्यातेन शक्त्योपस्थितस्याप्याश्रयत्वस्य संसर्गत्वमेव प्रकारत्वे हि तत्संसर्गभानावश्यंभावाद् गौरवं स्यादिति भावः।

सत्यम्– एतदभिप्रायेणैव 'जानाति' इत्यादावाख्यातस्य निरर्थकतां मणिकार उररीचकार। तत्राश्रयत्वे निरूढलक्षणा-मभ्युपगच्छतां दीधिकाराणां पुनरेष आशयः–यत्र ज्ञाधातोर्ज्ञाना-श्रयत्वे शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा तत्र चैत्राद्यंशे धात्वर्थैकदेशस्य ज्ञानादेरन्वयानुपपत्त्या स्वरूपसंबन्धेन ज्ञानाश्रयताप्रकारकचैत्रादिविशेष्यकान्वयबोध एव तत्र मणिकृता स्वीकरणीयः। तथा च तत्र ज्ञानाश्रयताप्रकारकशाब्दबोधे

'जानाति' इत्यादावाश्रयत्वस्य संसर्गतयैव भानं भवति न प्रकारतयेत्यत्र चिन्तामणिकारं प्रमाणयति–सत्यमिति। एतदभिप्रायेणैवेति–यद्याश्रयतायाः प्रकारत्वं स्यात्तदा पदादनुपस्थितस्य प्रकारत्वासंभवेनाख्यातस्याश्रयत्वे शक्तिर्वा लक्षणा वा स्वीक्रियते तथा चाश्रयत्वोपस्थापकत्वादाख्यातस्य 'जानाति' इत्यादौ सार्थक्यं स्यादपि नैवमस्ति, आश्रयत्वस्य संसर्गत्वस्वीकारात् संसर्गतया भानं च पदादनुपस्थितस्यापि संभवतीत्याश्रयत्वे आख्यातस्य वृत्तिकल्पनापेक्षा-ऽभावादाख्यातस्य 'जानाति' इत्यादौ निरर्थकत्वमेवेत्यर्थः। दीधितिकारेण त्वाश्रयत्वस्य प्रकारत्वं स्वीकृत्य 'जानाति' इत्यादावाख्यातस्याश्रयत्वे निरूढलक्षणा (अनादितात्पर्यवती लक्षणा) स्वीकृतेत्याह–तत्रेति। तत्र='जानाति' इत्यादौ। दीधितिकाराशयं वर्णयति– यत्रेति, यदा हि कस्यचित् 'जानाति' इत्यत्र प्रकृतिमात्रज्ञाधातोरेव ज्ञानाश्रयत्वे शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा जातस्तत्र ज्ञानाश्रयत्वं धात्वर्थस्तदेकदेश एव ज्ञानमिति धात्वर्थैकदेशस्य ज्ञानस्य चैत्रेऽन्वयो न संभवति– "एकत्र विशेषणत्वेनान्वितस्यान्यत्र विशेषणत्वेनान्वयाऽयोगात्" इति नियमेनोक्तस्थले आश्रयत्वे विशेषणतयान्वि-तस्य ज्ञानस्य चैत्रादावन्वयासंभवात् तेन च 'आश्रयतासम्बन्धेन ज्ञानवांश्चैत्रः' इति शाब्दबोधासंभवात् तत्र स्वरूपसम्बन्धेन ज्ञानाश्रयत्वप्रकारकचैत्रादिविशेष्यक एव 'ज्ञानाश्रयत्ववांश्चैत्रः' इति बोधः संसर्गतावादिनापि मणिकारेण स्वीकर्तव्यः, तथा चोक्तस्थले ज्ञाधातोरेव ज्ञानाश्रयत्वे शक्तिभ्रमस्थले स्वारसिकलक्षणाग्रहस्थले चोक्तरीत्या ज्ञानाश्रयत्वप्रकारकशाब्दबोधं प्रति तत्प्रकारक=ज्ञानाश्रयत्वप्रकारक-योग्यताज्ञानस्य हेतुता स्वीकरणीया अन्यत्राश्रयत्वसंसर्गकशाब्दबोधं प्रति तादृश=आश्रयतासंसर्गकयोग्यताज्ञानस्य हेतुता स्वीकरणीया अन्यत्राश्रयत्व-संसर्गकशाब्दबोधं प्रति तादृश=आश्रयतासंसर्गकयोग्यताज्ञानस्य च हेतुता

तत्प्रकारकयोग्यताज्ञानहेतुतायाः क्लृप्तत्वादाऽऽश्रयतासंसर्ग-कशाब्दबोधे तादृशयोग्यताज्ञानहेतुताकल्पनमधिकमेव मणिकृन्मते।

न च दीधितिकृन्मते तादृशयोग्यताज्ञानहेतुत्वाकल्पन-लाघवेऽपि 'जानाति' इत्याद्यानुपूर्वीज्ञानघटितज्ञाधातुशक्ति-ज्ञानजन्यज्ञानोपस्थितिघटितशाब्दसामग्र्या भिन्नविषयकप्रत्यक्षं प्रति प्रतिबन्धकतायामाख्यात जन्याश्रयत्वोपस्थितेर्निवेश-

स्वीकार्येति द्विविधकार्यकारणभावकल्पनापत्त्या संसर्गतावादे गौरवम्। प्रकारतावादे तु ज्ञानाश्रयत्वंप्रकारकयोग्यताज्ञानस्यैव हेतुत्वमित्येककार्यकारण-भावकल्पनेन लाघवमित्यर्थः।

ननु दीधितिकृन्मते=आश्रयत्वस्य प्रकारतावादे तादृश=आश्रयत्व-संसर्गकयोग्यताज्ञानस्य हेतुत्वकल्पनापत्तिर्यद्यपि नास्ति सर्वत्राश्रयत्वप्रकारक-योग्यताज्ञानस्यैव हेतुत्वात्तेनैव च ज्ञाधातोर्ज्ञानाश्रयत्वे शक्तिभ्रमस्थले स्वारसिकलक्षणाग्रहस्थले च निर्वाहादिति लाघवमस्ति तथापि विभिन्नविषयक-प्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वं सर्वसंमतमस्ति तत्र 'जानाति' इत्यादावाऽऽश्रयत्वस्य प्रकारत्वे आश्रयत्वस्याख्यातेनोपस्थितिः स्वीकार्या तथा चात्र जानातीत्यानुपूर्वीज्ञानघटिता तथा ज्ञाधातुशक्तिज्ञानजन्य-ज्ञानोपस्थितिघटिता या शाब्दसामग्री तस्याः प्रतिबन्धकत्वे प्राप्ते तादृशप्रति-बन्धकतायामाख्यातजन्याश्रयत्वोपस्थितेर्निवेशस्य=आख्यातजन्याश्रयत्वोपस्थितेरपि प्रतिबन्धकत्वं कल्पनीयमिति गौरवम्। संसर्गतावादे चाख्यातस्यात्र निरर्थक-त्वादाश्रयत्वस्य च संसर्गविधया भानादाख्यातजन्याश्रयत्वोपस्थितिरेव न भवति येन तस्याः प्रतिबन्धकत्वकल्पनापत्तिः स्यात् तथा चाऽऽश्रयत्वोपस्थितेः प्रतिबन्धकत्वकल्पनापत्त्यऽभावात्संसर्गतावादे लाघवमित्याशङ्क्याह– न चेति। प्रतिबन्द्या परिहारहेतुमाह– भवन्मतेऽपीति। भवन्मते=आश्रयत्वस्य संसर्गता-मतेऽपि। संसर्गतामते हि 'जानाति चैत्रः' इति वाक्येन 'आश्रयतासम्बन्धेन ज्ञानवांश्चैत्रः' इत्येव बोधो जायते विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं च 'ज्ञानाश्रयत्वाभाववांश्चैत्रः सुन्दरः' इति अत्र च ज्ञानाश्रयत्वाभावश्चैत्रे विशेषणं न तु ज्ञानाभाव इत्युक्तशाब्दबोधप्रत्यक्षयोः परस्परं विरोधाभावाद्

स्याधिक्याद् गौरवमिति वाच्यम्, भवन्मतेऽपि 'ज्ञानाश्रयत्वाभाववांश्चैत्रः सुन्दरः' इत्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे 'जानाति चैत्रः' इत्याद्यनुपूर्वीज्ञानघटितज्ञाधातुजन्यज्ञानोपस्थितिघटितसामग्र्याः प्रतिबन्धकताधिक्येन गौरवात्।

मन्मते च तादृशसामग्र्या विरोधिज्ञानाश्रयत्वाभाववत्तानिश्चयघटिततया तथाविधविशिष्टवैशिष्ट्यबोधसामग्र्यास्तादृशशाब्दसामग्र्या समं युगपदऽवस्थानासंभवेन तादृशप्रतिबन्धकत्वकल्पनाविरहादित्यधिकं दर्शितदिशाऽवसेयम्॥

विभिन्नविषयकत्वाच्चोभयप्रयोजकसामग्र्योर्युगपदापत्तिः संभवतीत्युक्तविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं प्रति 'जानाति चैत्रः' इति शाब्दबोधसामग्र्या ज्ञाधातुजन्यज्ञानोपस्थितिघटितायाः प्रतिबन्धकताकल्पनाधिक्येन गौरवमित्यर्थः। ज्ञानाश्रयत्वाभावविशिष्टे चैत्रे सुन्दरत्ववैशिष्ट्यमिति प्रत्यक्षस्य विशिष्टवैशिष्ट्यावगाहित्वम्।

प्रकारतावादी स्वमते उक्तगौरवाभावमुपपादयति—मन्मत इति। 'जानाति' इत्यत्राख्यातस्याश्रयत्वार्थकत्वादाश्रयत्वस्य प्रकारत्वस्वीकाराच्च 'जानाति चैत्रः' इति वाक्येन 'ज्ञानाश्रयत्ववांश्चैत्रः' इति बोधो जायते इति शाब्दबोधे चैत्रे ज्ञानाश्रयत्वस्य विशेषणत्वाद् उक्तविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे च चैत्रे ज्ञानाश्रयत्वाभावस्य विशेषणत्वात् शाब्दबोधप्रत्यक्षयोः परस्परं विरोधः प्राप्त इति शाब्दबोधप्रत्यक्षसामग्र्योर्युगपदवस्थानमेव न संभवति येनैकसामग्र्याः प्रतिबन्धकत्वकल्पनापत्तिः स्यात् तथा च तादृशसामग्र्याः='जानाति चैत्रः' इति शाब्दबोधीयसामग्र्या ज्ञानाश्रयत्वप्रकारकयोग्यताज्ञानघटितायाः यो विरोधी ज्ञानाश्रयत्वाभाववत्तानिश्चयस्तेन तथाविध=उक्तविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षसामग्र्याः घटिततया तस्याः प्रत्यक्षसामग्र्यास्तादृश=उक्तशाब्दबोधसामग्र्या सहावस्थानमेव न संभवति, अर्थात् ज्ञानाश्रयत्वाभाववत्ताया निश्चयेनोक्तप्रत्यक्षमेव भवति शाब्दबोधश्च ज्ञानाश्रयत्वनिश्चयरूपस्वकारणाभावात्स्वयमेवानुत्पन्नं तिष्ठतीति न प्रतिबन्धकत्वकल्पनाधिक्यमित्यर्थः। प्रकृतवादविस्तरमुपसंहरति—इत्यधिकमिति, वादग्रन्थानां दिक्प्रदर्शकत्वादधिकमेवमेव प्रदर्शितरीत्या स्वयं कल्पनीयमित्यर्थः।।

अथैवं रीत्या 'भूतले न घटः' इत्यादौ घटादिपदस्य घटप्रतियोगिकादौ तदुत्तरसुब्विभक्तेरेव वा प्रतियोगितायां लक्षणामभ्युपेत्य तत्र 'घटप्रतियोगिकाभावो भूतलवृत्तिः' इत्याद्याकारकप्रतियोगिताप्रकारकशाब्दबोधोपगम एव समुचितः, तथा सति तथाविधसमभिव्याहारज्ञानघटितसामग्र्याः 'घटप्रति-

---

एवंरीत्या=यथा 'जानाति' इत्यादावाख्यातार्थाश्रयत्वप्रकारकबोधः, स्वीकृतस्तथा 'भूतले न घटः' इत्यादावपि प्रतियोगिताप्रकारक एव शाब्दबोधः स्वीकर्तव्य इत्यन्वयः। प्रतियोगिताप्रकारकशाब्दबोधप्रकारमाह– भूतल इति। 'भूतले न घटः' इत्यत्र घटपदस्य घटप्रतियोगिके लक्षणा तेन नञर्थाऽभावेन चाभेदान्वयेन सप्तम्यन्तभूतलपदस्य च भूतलवृत्तित्वार्थपरत्वेन 'घटप्रतियोगिकाभावो भूतलवृत्तिः' इति शाब्दबोधो जायते, किं चात्र घटपदस्य घट एवार्थस्तदुत्तर= घटपदोत्तरवर्तमानविभक्तेरेव प्रतियोगितायां लक्षणा तत्र घटस्याऽऽधेयत्वसम्बन्धेन प्रतियोगितायां प्रतियोगितायाश्च निरूपकत्वसम्बन्धेन नञर्थाभावे भेदान्वयः 'घटत्वावच्छिन्नप्रतियोगिताकाभावो भूतलवृत्तिः' इति शाब्दबोधः। अत्र चाभावे प्रतियोगिता प्रकारतया भासते इति प्रतियोगिताप्रकारकः शाब्दबोधः। एवं रूपप्रतियोगिताप्रकारकशाब्दबोधस्वीकारस्योपयोगमाह– तथा सतीति, प्रतियोगिताप्रकारकशाब्दबोधस्वीकारे सति तथाविध='भूतले न घटः' इत्याकारकसमभिव्याहारज्ञानघटितशाब्दसामग्र्याः 'घटप्रतियोगिकत्वाभाववानभावः प्रमेयः' इति विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं प्रति प्रतिबन्धकत्वकल्पनापत्तिर्नास्ति तथा हि–प्रतियोगिताप्रकारकशाब्दबोधस्वीकारे 'भूतले न घटः' इति वाक्यात् 'घटप्रतियोगिकाभावो भूतलवृत्तिः' इति शाब्दबोधो जायते तत्र प्रतियोगिता प्रकारः, 'घटप्रतियोगिकत्वाभाववानभावः प्रमेयः' इति प्रत्यक्षे चाभावे घटप्रतियोगिकत्वाभावः प्रकार इति प्रत्यक्षशाब्दबोधयोः परस्परं विरोधे प्राप्ते उक्तशाब्दबोधस्य च 'घटप्रतियोगिकत्वाभाववानभावः' इत्येवं बाधस्तादृशबाधस्याभावस्य 'घटप्रतियोगिकत्वाभावाभाववानभावः' इत्येवमुक्तशाब्दसामग्र्या निश्चये जाते प्रत्यक्षं विशेषणज्ञानरूपस्वकारणाभावात् स्वयमेव नोत्पद्यते इति न शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनापत्तिः। तथा चैतल्लाघवार्थं प्रतियोगिताप्रकारकशाब्दबोधे स्वीकृतेऽत्र घटप्रतियोगिकेति–घटनामार्थेन नञर्थाभावेन च परस्परभेदान्वये जाते निपातातिरिक्तनामार्थयोर–

योगिकत्वाभाववानभावः प्रमेयः' इत्यादिविशिष्टवैशिष्ट्यबोधं प्रति प्रतिबन्धकत्वाकल्पनेन लाघवादित्युक्तनियमे निपाता-तिरिक्तत्वविशेषणवैयर्थ्यमिति चेत्?

न, 'भूतले न घटः' इत्यादौ घटाद्यभावे भूतलाद्यन्वित-सप्तम्यर्थाधेयत्वस्येव तात्पर्यवशाद् घटादौ सप्तम्यन्तार्थ-

---

भेदेनैवान्वयो भवति निपातार्थनिपातातिरिक्तनामार्थयोस्तु भेदान्वयोऽपि भवतीति नियमस्य तदर्थं निपातातिरिक्तत्वविशेषणस्य चापेक्षा नास्त्येव। उक्तरीत्या निपातार्थरूपनञर्थाभावस्य नामार्थस्य घटस्य चाभेदान्वयस्य प्रदर्शितत्वादित्यर्थः। अयं भावः– उक्तनियमे निपातातिरिक्तत्वविशेषणस्य निपातार्थनिपातातिरिक्त-नामार्थयोर्भेदान्वय एव फलमस्ति तत्रोक्तरीत्या निपातार्थनिपातातिरिक्त-नामार्थयोरभेदान्वये संभवति सति भेदान्वयप्रतिपादनं निष्फलमेव किञ्च निपातातिरिक्तनामार्थयोरभेदान्वयो निपातार्थनिपातातिरिक्तनामार्थयोश्च भेदान्वय इति वैषम्ये गौरवमपीति तदर्थं निपातातिरिक्तत्वविशेषणमपि व्यर्थमेव निपातातिरिक्तत्वविशेषणाभावे हि निपातातिरिक्तनामार्थयोरभेदान्वयः प्राप्नोति स च प्रदर्शित एव, एवम् 'चन्द्र इव मुखम्' इत्यत्रापि चन्द्रपदस्य चन्द्रप्रतियोगिके लक्षणया चन्द्रप्रतियोगिकं यत्सादृश्यं तद्वन्मुखमित्येवं निपातार्थसादृश्यस्य निपातातिरिक्तनामार्थचन्द्रस्य चाभेदान्वयो द्रष्टव्यः, एवमन्यत्राप्यूह्यमिति। उक्तनियमे=निपातातिरिक्तनामार्थयोः (६८) इति नियमे।

प्राचीनमते तु प्रतियोगितायाः प्रकारत्वानभ्युपगमात् 'भूतले न घटः' इति वाक्यात् 'प्रतियोगितासम्बन्धेन घटवान भावः' इति शाब्दबोधो जायते इत्यभावे घट एव प्रकार उक्तप्रत्यक्षे चाभावे घटप्रतियोगिकत्वाभावः प्रकारो न तु घटाभावो येनोक्तशाब्दबोधप्रत्यक्षयोर्विरोधः स्यात्, विरोधाभावे चोभयसामग्र्योर्युगपदवस्थानसंभवात् प्रत्यक्षस्य विभिन्नविषयकत्वाच्च तत्प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनापत्त्या गौरवं स्यादेवेति प्रतियोगिताप्रकारक एव शाब्दबोधः समुचित इत्यर्थः।

उक्तं परिहरति– नेति। परिहारहेतुमाह– भूतल इति। भूतलाद्यन्वितः= भूतलनिरूपितो यः सप्तम्यर्थ आधेयत्वम्=वृत्तित्वम् (भूतलवृत्तित्वम्) तस्येव, यथोक्तरीत्या 'भूतले न घटः', इत्यत्र घटाभावे भूतलवृत्तित्वस्यान्वयः–

भूतलादिवृत्तित्वाभावस्यान्वयबोधोप्यनुभवसिद्धः, अन्यथा– तादृश– वाक्यजन्यस्याऽप्रामाण्यज्ञानानास्कन्दितबोधस्य 'भूतले घटः' इत्यादिवाक्यजन्यघटादिविशेष्यकभूतलाद्याधेयत्व– प्रकारकबोध– विरोधितायाः सर्वानुभवसिद्धाया अनुपपत्तेः। नञ्पदं विना यत्र धर्मिणि यस्य विशेषणतया भानं यादृश– समभिव्याहाराद् भवति तादृशसमभिव्याहारस्थले नञ्सत्त्वे तत्र

'घटप्रतियोगिकाभावो भूतलवृत्तिः' इत्येवमस्ति तथा तात्पर्यवशाद् घटादौ सप्तम्यर्थो यद् भूतलवृत्तित्वं तदभावस्याप्यन्वयबोधः 'घटो भूतलवृत्तित्वा– भाववान्' इत्येवं बोधोऽनुभवसिद्ध एवेति कथं प्रतियोगिताप्रकारक एव शाब्दबोधः सर्वत्र स्वीक्रियते। विपक्षे बाधकमाह– अन्यथेति। अन्यथा– 'भूतले न घटः' इति वाक्यात् 'घटो भूतलवृत्तित्वाभाववान्' इत्येवं घटविशेष्यकभूतलवृत्तित्वाभावप्रकारकशाब्दबोधानङ्गीकारे त्वदुक्तरीत्या तादृशवाक्यजन्यस्य='भूतले न घटः' इति वाक्यजन्यस्य बोधस्य 'भूतले घटः' इति वाक्यजन्यस्य च बोधस्य परस्परं सर्वानुभवसिद्धो विरोधो नोपपद्येत, अयं भावः– प्रतियोगिताप्रकारकशाब्दबोधस्वीकर्तृमते उक्तरीत्या 'भूतले न घटः' इति वाक्यात् 'घटप्रतियोगिकाभावो भूतलवृत्तिः' इत्येवं भूतलवृत्तित्वप्रकारकप्रतियोगिताप्रकारकाभावविशेष्यक एव शाब्दबोधो जायते 'भूतले घटः' इति वाक्याच्च भूतलवृत्तिप्रकारकघटविशेष्यकशाब्दबोधो जायते तयोश्च परस्परं विरोधो नोपपद्यते– न हि घटाभावविशेष्यकं भूतलवृत्तिप्रकारकं प्रतियोगिताप्रकारकं च ज्ञानं घटविशेष्यकभूतलवृत्तित्व– प्रकारकज्ञानं विरुणद्धि घटविशेष्यकभूतलवृत्तित्वप्रकारकज्ञानं घटविशेष्यक– भूतलवृत्तित्वाभावप्रकारकमेव ज्ञानं विरुणद्धि तस्मात् 'भूतले घटः' 'भूतले न घटः' इत्युभयवाक्यजन्यशाब्दबोधयोः परस्परं सर्वानुभवसिद्धविरोधस्योपपत्तये 'भूतले न घटः' इति वाक्यात् 'घटौ भूतलवृत्तित्वाभाववान्' इत्येवं घटे सप्तम्यन्तार्थभूतलवृत्तित्वाभावस्यान्वयः स्वीकर्तव्य एव अन्यथा–नञ्पदं विनेत्यादिसर्वानुभवापलापश्च स्यात्। नञ्पदमिति– नञ्पदं विना यादृश– समभिव्याहारात्='भूतले घटः' इति समभिव्याहारात् यत्र धर्मिणि=घटे यस्य=भूतलवृत्तित्वस्य विशेषणतया भानं भवति समभिव्याहारस्थले नञ्सत्त्वे='भूतले न घटः' इत्यत्र तत्र धर्मिणि=घटे तदभावः=भूतलवृत्तित्वाभावः

धर्मिणि तदभावः प्रतीयते इत्यनुभवाऽपलापप्रसङ्गाच्च। एवं च नञर्था- भावेऽनुयोगितया घटाद्यन्वयबोधोपपत्तये निपातातिरिक्तत्वविशेषणमावश्यकम्।

एवम् 'न पचति चैत्रः' 'चैत्रस्य न धनम्' इत्यादौ पाककृति-चैत्रस्वत्वाद्यभावस्य नञर्थस्य चैत्रधनादावन्वयबोधोपपत्तये च तदावश्यकम्।

प्रतीयते इति सर्वानुभवः "प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ" इत्यनेनोक्तः तथाच "भूतले न घटः" इत्यस्माद् 'भूतलवृत्तित्ववान्' इति बोधो जायते इति 'भूतले न घटः' इत्यस्मात् 'भूतलवृत्तित्वाभाववान् घटः' इति शाब्दबोधः स्वीकर्तव्य एव अत्र भूतलवृत्तित्वाभावेऽनुयोगित्वरूपेण घटस्यान्वयोस्ति- घटस्यैवात्र भूतलवृत्तित्वाभावानुयोगित्वात्। अनुयोगितारूपेण चान्वयो भेदान्वय एव भेदेन च नामार्थयोरन्वयो न भवतीत्यत्र नञर्थे भूतलवृत्तित्वाभावे घटस्याप्यनुयोगित्वेन रूपेण भेदान्वयो न स्यादिति तदुपपत्तये उक्तनियमे निपातातिरिक्तत्वविशेषणं देयमेव तथा च निपातातिरिक्तनामार्थ-योर्भेदेनान्वयासंभवेऽपि निपातार्थनिपातातिरिक्तनामार्थयोस्तु भेदेनान्वयः संभवतीति नञो निपातत्वात् तदर्थस्याभावस्य घटस्य च भेदेनाप्यन्वयो न विरुद्ध इत्याह- एवं चेति।

एवमिति- यथोक्तस्थले नञर्थाभावस्य घटस्य च भेदेनान्वयोपपत्त्यर्थ-मुक्तनियमे निपातातिरिक्तत्वविशेषणमावश्यकमेवम् 'न पचति चैत्रः' इत्यत्र नञर्थस्य पाककृत्यऽभावस्य चैत्रे विशेष्यत्वादिलक्षणभेदसम्बन्धेनान्वयोपपत्त्यर्थम् 'चैत्रस्य न धनम्' इत्यत्र नञर्थस्य चैत्रस्वत्वाभावस्य धने भेदसम्बन्धेनान्वयोप-पत्त्यर्थं च तत्=निपातातिरिक्तत्वविशेषणमावश्यकम्। अन्यथात्र नञर्थाभावस्य चैत्रादौ भेदेनान्वयो न भवेदित्यर्थः।

ननु यद्युक्तस्थलेषूक्तरीत्या भेदेनैवान्वयः संभवेन्नाऽभेदेन तदोक्तनियमे निपातातिरिक्तत्वविशेषणमावश्यकं स्यादपि नैवमस्ति किन्तु तूक्तस्थलेषु नञोऽभाववति लक्षणा तेनाभाववता चानुयोगिनोऽभेदान्वयोऽपि संभवति यथा- 'भूतले न घटः' इत्यत्र घटाभाववदभिन्नं भूतलम्। 'न पचति चैत्रः'

न चोक्तस्थलेषु नञोऽभाववल्लाक्षणिकतयाऽभाववता सममनुयोगिनोऽभेदान्वयबोध एव तत्रोपेयते इति वाच्यम्, तथा सति सर्वत्राऽभाववत एव नञर्थतया मुख्यार्थपरनञो दुर्लभत्वापत्तेः। अभावस्य भेदान्वयोपगमेऽपि कार्यकारणभावकल्पनाधिक्यविरहेणाऽभाववति लक्षणाऽनौचित्यात्। अभाववतोऽभेदान्वयबोधापगमे 'भूतले घटः' इत्यादिवाक्यजन्यबोधे

इत्यत्र पाककृत्यभाववदभिन्नश्चैत्रः 'चैत्रस्य न धनम्' इत्यत्र चैत्रस्वत्वाभाववदभिन्नं धनमित्येवमभेदान्वयबोधो भविष्यतीत्याशङ्क्याह—न चेति। परिहारहेतुमाह— तथा सतीति, एवं हि सर्वत्र नञोऽभाववति लक्षणापत्त्या नञः स्वमुख्यार्थाभावबोधकत्वं क्वचिदपि नोपलभ्येत विनिगमनाविरहात् सर्वत्रैव लक्षणाप्रसङ्गात्। मुख्यार्थाभावे च लक्षणापि न स्यात् लक्षणायाः शक्यसम्बन्धरूपत्वात्। नञश्चोक्तस्थलेष्वभावबोधकत्वे स्वीकृते उक्तानुपपत्त्या उक्तनियमे निपातातिरिक्तत्वविशेषणमावश्यकमित्यर्थः।

ननूक्तस्थलेषु सर्वत्रैव वाऽभावस्य भेदान्वयोपगमे नञोऽभावार्थकत्वं स्वीकार्यं तथा च नञोऽभाववति लक्षणाऽनङ्गीकारेणाऽभावपरत्वाश्रयणे नञ्पदघटितवाक्यस्थले नञाऽभावस्योपस्थितिः स्वीकार्या तादृशनञ्पदजन्याभावोपस्थितेरपि शाब्दबोधं प्रति कारणत्वापत्त्या कार्यकारणभावकल्पनाधिक्येन गौरवं स्यात्, मन्मते च नञोऽभाववति लाक्षणिकतयाऽभावोपस्थितेरपेक्षैव नास्ति येनाभावोपस्थितेः कारणत्वं स्यादिति न तादृशं गौरवमित्याशङ्क्याह— अभावस्येति, अभावस्य भेदान्वयोपगमार्थं नञोऽभावार्थकत्वस्वीकारेऽपि कार्यकारणभावकल्पनायामाधिक्यं नास्त्येव यतः— नञोऽभावार्थकत्वस्वीकारे यथा नञ्पदघटितवाक्यजन्यशाब्दबोधं प्रति नञ्पदजन्याऽभावोपस्थितेः कारणत्वमस्ति तथा नञोऽभाववति लक्षणास्वीकारे नञपदजन्याभाववदुपस्थितेः कारणत्वमस्त्येवेत्युभयमते कार्यकारणभावे साम्यमेव नाधिक्यमिति न नञोऽभाववति लक्षणास्वीकारः समुचित इत्यर्थः।

विपक्षे बाधकमाह— अभाववत इति, नञोऽभाववति लक्षणास्वीकारे तस्याभाववतोऽनुयोगिपदार्थेनाभेदान्वयस्वीकारे 'भूतले घटः' 'भूतले न घटः' इति वाक्यजन्यशाब्दबोधयोर्य खलु सर्वानुभवसिद्धो विरोधः न नोपपद्येत,

'भूतले न घटः' इत्यादिवाक्यजन्यबोधस्याऽविरोधितापत्तेश्च लाघवात् स्वरूपसंबन्धेन ग्राह्याभावनिश्चयस्यैव विशिष्टबुद्धि-विरोधित्वात् न त्वभेदसंसर्गकग्राह्याभावाश्रयप्रकारक-निश्चयस्येति। 'नीलो घटः' इत्यादौ विशेषणविभक्तेर-

यतः– 'भूतले घटः' इति वाक्यात् 'भूतलवृत्तिर्घटः' इति बोधो जायते नञोऽभाववति लक्षणया 'भूतले न घटः' इत्यस्माच्च 'घटाभाववदभिन्नं भूतलम्' इति बोधो जायते इति प्रथमवाक्येन घटे भूतलवृत्तित्वस्य द्वितीयवाक्येन च भूतले घटाभाववदभिन्नत्वस्य बोधनात् परस्परं न विरोध उपपद्यते। घटे भूतलवृत्तित्वबोधस्य घटे भूतलवृत्तित्वाभावबोधेनैव प्रतिपक्षिणा विरोधसंभवात्। स्वयमपि विरुद्धाविरुद्धस्वरूपमाह– 'लाघवादिति, अन्यप्रकारेण विरोधस्वीकारे गौरवल्लाघवात् 'भूतले घटः' इत्यत्र ग्राह्यं यद् भूतलवृत्तित्वं स्वरूपसम्बन्धेन= अभावीयविशेषणतासम्बन्धेन तदभावनिश्चयस्य= भूतलवृत्तित्वाभावनिश्चय-स्यैव= घटो भूतलवृत्तित्वाभाववानित्यस्यैव बोधस्य विशिष्टबुद्धिविरोधित्वात्=घटो भूतलवृत्तिरित्येवं घटे भूतलवृत्तित्वलक्षणा या विशिष्टबुद्धिस्तां प्रति विरोधित्वमुपपद्यते, न त्वऽभेदसंसर्गकग्राह्याभावाश्रयप्रकारकनिश्चयस्य नाम ग्राह्याभावो यो भूतलवृत्तिर्घटाभावस्तदाश्रयो यत् घटाभाववद् अभेदसम्बन्धेन यस्तत्प्रकारकनिश्चयः=घटाभाववदभिन्नं भूतलमिति तस्य तु विरोधित्वं नोपपद्यते इत्यर्थः।

नीलो घट इति, अत्र कृष्णभट्टो यथा– "यथा 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इति प्रत्यक्षं प्रति षष्ठी स्वत्वार्थिकेति नव्यमते 'राज्ञः पुरुषः' इति शाब्दसामग्र्याः प्रतिबन्धकत्वं न कल्प्यते– 'राजस्वत्वाभाववान् पुरुषः' इति विशेष्यतावच्छेदकप्रकारकनिर्णयः (निश्चयः) प्रत्यक्षे कारणं स एव निर्णयः शाब्दबोधे बाधः तादृशबाधाभावः शाब्दबोधे कारणं तथा च बाधतदभावयोर्युगपदवस्थानासंभवात् सामग्र्योर्मेलनं न संभवतीति न शाब्दसामग्री प्रत्यक्षे प्रतिबन्धिका, तथा– 'नीलाभेदाभाववान् घटः प्रमेयः' इति प्रत्यक्षेऽपि 'नीलाभेदाभाववान् घटः' इति विशेष्यतावच्छेदकप्रकारकनिर्णयः कारणं स एव च नीलो घटः इति वाक्यजन्ये 'नीलाभेदवान् घटः' इति शाब्दबोधे बाधः तस्य बाधस्याभावः शाब्दबोधे कारणमिति प्रत्यक्षशाब्दसामग्र्योर्बाधतदभाव-घटितयोर्यौगपद्यासंभवात् न शाब्दसामग्री प्रत्यक्षे प्रतिबन्धिकेत्युक्तरीत्येत्यर्थः।

भेदार्थकत्वमतेऽपि यद्यप्युक्तरीत्या लाघवं संभवति तथापि तत्रापि न नो विद्वेष इति दिक्॥

प्रत्ययाश्च विभक्तिकृतद्धितादिभेदेन नानाविधाः। विभक्तिश्च सुप्तिङ्भेदेन द्विविधा। सुब्विभक्तयः प्रथमा-द्वितीयादयः सप्त। तत्र प्रथमार्थः प्रकृत्यर्थे विशेषण-विधयाऽन्वयिनी संख्यैव, अत एव यत्र विशेष्यवाचक-समानविभक्तिकपदं निपातपदं वा नास्ति तत्र प्रथमान्तार्थस्य

तथा च 'नीलो घटः' इत्यत्रापि विशेषणविभक्तिरभेदबोधकतया षष्ठीवत्सार्थिकेत्यर्थः। इष्टापत्त्या समाधते– तथापि तत्रापि न नो विद्वेष इति दिगिति, तथापि प्रतिबध्यप्रतिबन्धकभावस्थले उक्तरीत्या लाघवसंभवेऽपि तत्रापि=प्रतिबन्धकतालाघवलभ्ये विशेषणविभक्त्यभेदार्थकत्वेऽपि नः= अभेदसंसर्गतावादिनामस्माकं युक्तिबलाद्वस्तुसिद्धौ न विद्वेष इति भावः। इति व्युत्पत्तिवादे नामार्थान्वयबोधविवरणम्" इति॥

पूर्वं प्रत्ययजन्योपस्थितेः शाब्दबोधं प्रति कारणत्वमुक्तमिति संप्रति प्रत्ययं निरूपयति– प्रत्ययाश्चेति। स्पष्टोऽयं ग्रन्थः। प्रथमं प्रथमा-विभक्त्यर्थमाह– तत्रेति। प्रथमया कर्मत्वादीनां बोधो न भवतीति संख्यैव प्रथमार्थः। सा च संख्या प्रकृत्यर्थे विशेषणं भवतीत्यर्थः। "संख्यैवेत्येवकारेण संख्यातिरिक्तार्थव्यवच्छेदः, अन्यथा 'तण्डुलं पचति' इत्यत्र द्वितीयार्थ एकत्वं कर्मत्वं च तत्र 'एकत्वविशिष्टतण्डुलनिष्ठा कर्मता' इति बोधाद् यथैकत्वं प्रकार एव न तु विशेष्यं तथा संख्यातिरिक्तार्थस्वीकारे तस्यैव विशेष्यतया भानं स्यान्न त्वेकत्वस्य 'घटः' इत्यत्र नीलादिपदान्तरा-ऽसमभिव्याहारे 'घटवृत्त्येकत्वम्' इत्येवानुभूयते न तु 'एकत्ववान् घटः' इति तथा सति घटत्वादिवदेकत्वस्यापि प्रकृत्यर्थत्वं स्यादिति प्रथमा निरर्थकैव स्यादिति वैयाकरणमतप्रवेश इति भावः" इति कृष्णंभट्टाः। प्रथमार्थत्वं संख्यायाः शाब्दबोधे विशेष्यत्वेऽपि प्रकृत्यर्थे नीलादिवदन्वयित्वादुक्तम्– विशेषणविधयेति। अत एव= संख्यामात्रस्यैव प्रथमार्थत्वादेव। 'नीलो घटः' इत्यत्र विशेष्यवाचकसमानविभक्तिकं नीलपदमस्तीति घट एव विशेष्यतयाव-भासते। 'चन्द्र इव मुखम् इत्यत्र इवेति निपातस्य सादृश्यार्थकस्य सत्त्वात्

विशेष्यभासकसामग्र्यऽभावादसौ मुख्यविशेष्यतयैव भासते। संख्यावाचकानां चैकवचनद्विवचनबहुवचनानामेकत्वत्वद्वित्वत्वबहुत्वत्वावच्छिन्नेषु शक्तिः। शक्तता च सुत्वौत्वजस्त्वादिना न तु स्वादितिबादिसाधारणैकवचनत्वादिना एकंवचनत्वादेर्दुर्वचत्वात्। न चैकत्वादिवाचकत्वं तत्-वाचकतायाः शक्ततारूपत्वे आत्माश्रयप्रसङ्गात्, बोधकतारूपत्वे शक्तिभ्रमेण द्विवचनादीनामप्येकत्वबोधकतयाऽतिप्रसक्तत्वात्। न चैकंवचनत्वादिकं जातिविशेषः– सुत्वादिना साङ्कर्यात्।

चन्द्रप्रतियोगिकसादृश्यविशेष्यतया किं वा चन्द्रविशेष्यतया मुखमेव भासते न प्रथमार्थः संख्या। 'घटः' इत्यत्र च प्रथमान्तार्थस्य=घटस्योक्तविशेष्यभासकसामग्र्ययाभावादसौ=प्रथमार्थः संख्येय मुख्यविशेष्यतया भासते 'घटवृत्येकत्वं' 'घटौ' इत्यत्र 'घटवृत्तिद्वित्वम्' 'घटाः' इत्यत्र 'घटवृत्ति बहुत्वम्' इति बोधोदयात्। शक्तेति–सु इत्येकवचनस्यैकत्वं शक्यमित्येकत्वे एकवचनसुपदस्य शक्तिः शक्ततावच्छेदकं च सुत्वमेव नैकवचनत्वम्, एवं द्वित्वे औ इति द्विवचनपदं शक्तं शक्तावच्छेदकमौत्वमेव न द्विवचनत्वम्, बहुत्वे जसिति बहुवचनपदं शक्तं शक्ततावच्छेदकं च जस्त्वमेव न तु बहुवचनत्वमित्यन्वयः। एकवचनत्वादेः शक्ततावच्छेदकत्वाऽसंभवे हेतुमाह– एकवचनत्वादेरिति। नन्वेकत्वादिवाचकत्वमेव तत्=एकवचनत्वादि ज्ञेयमित्याशङ्क्याह– न चेति। परिहारमाह– वाचकताया इति, 'एकत्ववाचकत्वमेकवचनत्वम्' इत्यत्र या वाचकता सा यदि शक्ततारूपा गृह्यते तदा 'केन रूपेण शक्तता' इति निरूपणे किं वा शक्ततावच्छेदकनिरूपणे शक्तताज्ञानापेक्षा प्राप्तेत्यात्माश्रयदोषापत्तिः। यदि च वाचकतात्र बोधकतारूपा गृह्यते तदा शक्तिभ्रमेण औइयादिद्विवचनस्याप्येकत्वबोधकत्वेन द्विवचनस्याप्येकवचनत्वं स्यादित्यन्वयः। साङ्कर्यादिति– सुगन्धपदघटकसुपदे सुत्वमस्त्येकवचनत्वं नास्ति अम्विभक्तावेकवचनत्वमस्ति सुत्वं नास्ति सुत्वमेकवचनत्वं च सुविभक्तावस्तीति साङ्कर्यम्। सुप्तवादिनेति पाठे तु सुप्त्वं सुब्बहुवचनेष्वस्ति तत्रैकवचनत्वं नास्ति, एकवचनत्वं च तिङेकवचनेष्वस्ति तत्र सुप्त्वं नास्ति सुप्त्वमेकवचनत्वं च सुबेकवचनेष्वस्तीति साङ्कर्यं विज्ञेयम्।

न च शक्तिसंबन्धेनैकवचनादिपदवत्त्वं तत्, तादृशाज्ञानदशायां च सुत्वादिना शक्तिभ्रमादेव शाब्दबोधः, एकवचनादिशब्दस्य पदद्वयात्मकतया तादृशसमुदायशक्तेरेवाप्रसिद्धिरिति तु नाशङ्कनीयम्—एकं वक्तीत्यादिव्युत्पत्त्या एकवचनादिशब्दस्य स्वादिबोधकत्वे एकादिशब्देऽपि तादृशव्यवहारापत्तेः। एकवचनादिशब्दस्य स्वादौ रूढिस्वीकारस्यावश्यकत्वादिति वाच्यम्, ग्रन्थकारीयसङ्केतेनैवोपपत्तावेक-

---

शङ्कते— न चेति। अयमर्थः— एकत्वादिबोधकं स्वादिकं तादृशस्वादिबोधकं चैकवचनादिपदम्— "तान्येकवचन" इत्यादिसङ्केतात् तत्रैकवचनादिपदनिष्ठायाः शक्तेर्निरूपकत्वं स्वादिष्वऽस्तीति तादृशनिरूपकत्वसम्बन्धेन स्वादिषु शक्तिर्वर्तत इति तादृशशक्तिसम्बन्धेन स्वादिष्वेकवचनादिपदं वर्तते इति तादृशं शक्तिसम्बन्धेनैकवचनादिपदवत्त्वमेवेकत्वादिनिरूपितशक्तताया अवच्छेदकं न तु सुत्वादिकमित्यर्थः। किं वा तत्पदेनात्रोक्तैकवचनत्वं ग्राह्यं तच्च शक्ततावच्छेदकमेव। नन्वेतादृशशक्ततावच्छेदकज्ञानाभावे स्वादिनैकत्वादिबोधो न स्यादित्याशङ्क्याह— तादृशेति, उक्तशक्ततावच्छेदकाऽज्ञानदशायामपि स्वादीनां सुत्वादिरूपेणैकत्वादिषु शक्तिभ्रमः संभवतीति तादृशशक्तिभ्रमादेवैकत्वादिबोधः संभवतीत्यर्थः। नन्वेकस्मिन्नर्थे एकस्य पदस्य शक्तिर्भवति न त्वनेकपदानामत एव वाक्यस्य वाक्यार्थे शक्तिर्न स्वीक्रियते तथा च 'एकवचनम्' इति पदं पदद्वयात्मकमस्तीति तादृशपदसमुदायस्य शक्तिरेव स्वीक्रियते तथा च 'एकवचनम्' इति पदं पदद्वयात्मकमस्तीति तादृशपदसमुदायस्य शक्तिरेव प्रसिद्धा नास्ति यस्या उक्तरूपेण सम्बन्धत्वं स्यादित्याशङ्क्याह— एकवचनादिशब्दस्येति, एकवचनादिशब्दानां स्वादिबोधकत्वस्य प्रसिद्धत्वात् स्वादिषु शक्तिरस्त्येव तत्रापि रूढ्यैव बोधकत्वं स्वीकार्यं यदि चैकवचनादिपदस्यैकं वक्तीति व्युत्पत्त्या स्वादिबोधकत्वं स्यात्तदैकशब्दस्याप्येकत्वबोधकत्वेन 'एकं वक्ति' इति योगार्थत्त्वात् किं वा स्वादिबोधकैकवचनपदघटकत्वात् स्वादिबोधकत्वमापद्येत तस्मादेकवचनादिपदस्य स्वादिषु रूढिरेवास्तीति स्वीकार्यं स्वादिष्वेकपदस्य तु रूढिर्नास्त्येवेत्यभिप्रायेणाह— एकमिति। तादृश-

वचनादिपदे शक्तेरप्रामाणिकत्वात्। "तान्येकवचनद्विवचन" इत्यादिपाणिनिसूत्रस्य तदीयसङ्केतग्रहपरतयाप्युपपत्तेः। न हि "यूस्त्र्याख्यौ नदी" इत्यनुशासनात् स्त्र्याख्येदूदन्तादिशब्दे नद्यादिपदस्य शक्तिः सिद्ध्यति, किं तु तदीयसङ्केत एव। अत एव नद्यादिसंज्ञाऽऽधुनिकसङ्केतशालित्वात् पारिभाषिक्येव न त्वौपाधिकी।

अथैवमपि पाणिनिसङ्केतसंबन्धेन तादृशपदवत्त्वमेवैकत्वादिशक्ततावच्छेदकमस्त्विति चेत्? न। तादृशसङ्केतस्य केन रूपेण संबन्धता? संकेतत्वेनेति चेत्? तर्हि कस्यचित् पुंस

व्यवहारापत्तेः=स्वादिवाचकत्वव्यवहारापत्तेः। परिहारमाह– ग्रन्थकारीयेति, एकवचनादिपदं स्वादिबोधकमिति पाणिनिसङ्केत एव न तु शक्तिः शक्तेरीश्वरेच्छारूपत्वात्, पाणिनिसङ्केतेनाप्येकवचनादिपदानां स्वादिबोधकत्वमुपपद्यते एवेति तत्र शक्तिस्वीकारो व्यर्थ एवेत्यर्थः। न हीति– यथा– "यूस्त्र्याख्यौ नदी" इत्यत्र स्त्र्याख्येदूदन्तादिशब्देषु नदीपदस्य पाणिनिसङ्केत एव न तु शक्तिस्तथैकवचनादिपदस्यापि स्वादिषु पाणिनिसङ्केत एव न तु शक्तिरित्यर्थः। उक्ते विनिगमनामाह– अत एवेति, नद्यादिसंज्ञा पाणिनिकृताधुनिकसङ्केतशालित्वात् पारिभाषिक्येव न त्वौपाधिकी=उपाधिभूतं घटत्वादिकं प्रवृत्तिनिमित्तं कृत्वा प्रवृत्तसंज्ञा औपाधिकी भवति यथा घटे घट इति नद्यां च नदीति न ह्येवमीदूदन्तशब्देषु नदीत्वं वर्तते येन नदीसंज्ञा औपाधिकी स्यात्, एवं प्रकृतेऽप्येकवचनादिपदं स्वादिषु पारिभाषिकमेवेति शक्तेरभावान्नोक्तं युक्तमित्यर्थः। शक्तिर्नास्त्येव यस्याः सम्बन्धत्वं स्यादिति यावत्।

ननु "तान्येकवचनद्विवचन" इति सङ्केतेन 'एकवचनपदशक्यं सुअमादिकम्, द्विवचनपदशक्यं औ इत्यादिकम्, बहुवचनपदशक्यं जसादिकम्' इति बोध्यते तथा च निरूपकत्वसम्बन्धेन पाणिन्युक्तसङ्केतः सुअमादिषु वर्तते तादृशसङ्केतसम्बन्धेन च सुअमादिषु एकवचनपदं वर्तते इति सुअमादिनामेकवचनपदवत्त्वं प्राप्तमिति तादृशपदवत्त्वमेव=एकवचनपदत्त्वमेव सुअमादिषु या एकत्वनिरूपिता शक्तता तादृशशक्ततया अवच्छेदकं ज्ञेयम्,

एकवचनपदात् स्वौजसादिर्बोद्धव्य इत्याकारकसंकेतस्यापि संभवादतिप्रसक्तिर्दुर्वारैव। पाणिनिसंकेतत्वेनेति चेत्?, तर्हि व्याकरणप्रणेतुः पुरुषान्तरस्यापि तादृशसंकेतस्य सम्भवात् तदीयसङ्केतसंबन्धेन तत्पदवत्त्वस्य डित्थादिपदात् स्वौजसादिर्बोद्धव्य इत्याकारकपुरुषसंकेतसंबन्धेन डित्थादिपदवत्त्वस्य वा विनिगमनाविरहेण शक्ततावच्छेदकताप्रसङ्गस्तथा चागत्या आनुपूर्वीविशेष एव शक्ततावच्छेदक इति।

यत्तु संख्यापि प्रकृतेरर्थः, एकवचनादिकं चैकत्वाद्यर्थे तात्पर्यग्राहकमेव, न चैवमेकप्रकृत्युपस्थाप्ययोरर्थयोः परस्परमन्वये

एवम्– औ इत्यत्र पाणिनिसङ्केतसम्बन्धेन द्विवचनपदवत्त्वं द्वित्वशक्तता-वच्छेदकम्, जसादौ च बहुवचनपदवत्त्वं बहुत्वशक्ततावच्छेदकमित्याशङ्कते– अथेति। परिहरति– नेति। परिहारमुपपादयति–तादृशेति। तादृशसङ्केतस्य= पाणिनिसङ्केतस्य। यदि पाणिनिसङ्केतस्यात्र केवलं सङ्केतत्वरूपेणैव सम्बन्धता तदा केनचित्पुरुषेण 'एकवचनपदात् स्वौजसादिर्बोद्धव्यः' इति सङ्केते कृते तादृशसङ्केतसम्बन्धेन एकवचनपदवत्त्वं औजसादिनिष्ठाया द्वित्वबहुत्वशक्तताया अपि अवच्छेकं स्यादित्यतिप्रसङ्गः स्यात्। यदि च पाणिनीसङ्केतस्य पाणिनिसङ्केतत्वेनैव सम्बन्धत्वम् तदा चन्द्रादीनामपि व्याकरणप्रणेतृत्वेन चन्द्रादिसङ्केतसम्बन्धेनैकवचनपदवत्त्वस्याप्येकत्वादिशक्ततावच्छेदकत्वं स्यात् तथा केनचित् 'डित्थपदात् स्वौजसादिर्बोद्धव्यः' इति सङ्केते कृते तादृशसङ्केत-सम्बन्धेन डित्थपदवत्त्वस्याप्येकत्वादिशक्ततावच्छेदकत्वं स्यादिति विनिगमनाविरहः=कस्य शक्ततावच्छेदकत्वं स्वीकार्यमिति निश्चयो न स्यादित्यगत्याऽऽनुपूर्वीविशेषः=सुत्वौत्वजस्त्वादिकमेव शक्ततावच्छेदकमिति स्वीकार्यमित्यर्थः।

यत्तु केनचिदर्धवैयाकरणेनोक्तम्– 'प्रथमाविभक्त्यर्थः संख्यापि 'घटः' इत्यादौ प्रकृतेरेवार्थो न तु विभक्तेः, न चापि विभक्तेः सर्वथा नैरर्थक्यम्? एकवचनादीनामेकत्वादौ तात्पर्यग्राहकत्वेन सार्थक्यात्' इति तदनुवदति– यत्त्विति। ननु संख्याया अपि प्रकृत्यर्थत्वे 'घटः' इत्यादौ घटपदेनैव

आकाङ्क्षाविरहाद् घटादावेकत्वाद्यन्वयानुपपत्तिः, अन्यथा हर्यादिपदादुपस्थितयोरश्वसूर्ययोराधाराधेयभावेनान्वयापत्तिः, घटादिपदस्यैकत्वादिविशिष्टघटादौ च न शक्तिसंभवः 'घटरूपं पश्य' इत्यादौ संख्यानवच्छिन्नघटादेरेवाऽन्वयबोधादिति वाच्यम्, आकाङ्क्षावैचित्र्यादेकप्रकृत्युपस्थाप्ययोरपि घटैकत्वयोः परस्परमन्वयसंभवात्, अत एव खण्डशक्त्यैवकाराद्युपस्थाप्ययोरन्ययोगव्यवच्छेदाद्योः परस्परमन्वयबोधः।

संख्याया घटस्य चोपस्थितिः स्यादित्येकप्रकृत्युपस्थाप्यत्वाद् घटादौ संख्याया अन्वयो न स्यात्तादृशाकाङ्क्षाविरहादित्याशङ्कते– न चेति। विपक्षे बाधकमाह– अन्यथेति। अन्यथा=एकप्रकृत्युपस्थाप्ययोरपि परस्परमन्वये हरिपदेनोपस्थितयोरश्वसूर्ययोरप्याधाराधेयभावेनान्वयः स्यात् न चैव भवतीत्यर्थः। ननु यथैकघटपदेनोपस्थितयोरपि घटघटत्वयोः परस्परमन्वयो भवति तथात्राप्येक (घटपदरूप) प्रकृत्युपस्थितयोर्घटैकत्वयोः परस्परमन्वयो भविष्यतीत्याशङ्क्याह– घटादिपदस्येति। तत्र घटपदस्य घटत्वविशिष्टे एव घटे शक्तिरस्तीति संभवत्यन्वयः, अत्रत्वेकत्वविशिष्टे घटे घटपदस्य शक्तिर्न संभवति अन्यथा एकत्वावच्छिन्नस्यैव घटस्य सर्वत्र बोधः स्यान्न त्वेकत्वानवच्छिन्नस्य भवति च संख्याऽनवच्छिन्नस्यापि घटस्य 'घटरूपं पश्य' इत्यादौ बोधः, 'घटरूपम्' इत्यादौ रूपे एव संख्यान्वयस्य प्रतीयमानत्वादित्याह– घटरूपमिति। परिहारहेतुमाह– आकाङ्क्षेति। आकाङ्क्षावैचित्र्यात्=शक्तिवैचित्र्यात् (अत्राकाङ्क्षापदं शक्तिपरमेवात्र ज्ञेयम्) अत एव=आकाङ्क्षा (शक्ति) वैचित्र्यादेकप्रकृत्युपस्थाप्ययोरप्यर्थयोः परस्परमन्वयसंभवादेव एकेनाप्येवकारपदेन खण्डशक्त्योपस्थितयोरन्ययोगव्यवच्छेदयोः परस्परमन्वयो भवत्येव, तत्रान्ययोगप्रतियोगिकस्य व्यवच्छेदस्य=अभावस्य प्रतीयमानत्वेन स्वप्रतियोगिकत्वसम्बन्धेन व्यवच्छेदेऽन्ययोगस्यान्वयो भवति। तथा प्रकृतेऽपि संख्यायां घटादौ च घटादिपदानां खण्डशक्तिस्वीकारेण परस्परमन्वयसंभवान्न काचिदनुपपत्तिरित्यर्थः।

ननु यथा संख्या प्रकृत्यर्थस्तथा कर्मत्वादिकमपि 'घटं करोति' इत्यादौ प्रकृत्यर्थ एव भवतु द्वितीयादिविभक्तिश्च तात्पर्यग्राहिका भविष्यती–

न चैवं कर्मत्वादिकमपि प्रकृत्यर्थ एवास्तु किं तत्र द्वितीयादिशक्त्येति वाच्यम्, नामार्थधात्वर्थयोः साक्षाद्भेदान्वयबोधस्याव्युत्पन्नतया कर्मत्वादेर्नामार्थत्वे तेन समं धात्वर्थान्वयाऽसंभवात्।

न च संख्यायाः प्रातिपदिकार्थत्वे सति तात्पर्यज्ञाने विनैव शक्तिभ्रमं लक्षणाग्रहं च द्विवचनाद्यन्तपदादेकत्वा- दिबोधसंभवात्—एकत्वादितात्पर्येणैकवचनान्तस्येव द्विवचनान्तस्यापि पदस्य स्वारसिकप्रयोगापत्तिरिति वाच्यम्, अनादितात्पर्यस्यैव स्वारसिकप्रयोगमूलत्वात् एकवच- नाद्यन्तपदस्यैवैकत्वादावनादितात्पर्योपगमेनातिप्रसङ्गविरहात्। "द्व्येकयोर्द्विवचनैकवचने" इत्याद्यनुशासनं च तादृशतात्पर्यग्राहकमेवेति वैयाकरणमतम्।

त्याशङ्क्याह— न चैवमिति। परिहारहेतुमाह— नामार्थेति, नामार्थधात्वर्थयोः साक्षाद् भेदेनान्वयो न भवतीति कर्मत्वादेरपि प्रकृत्यर्थत्वेन नामार्थत्वे प्राप्ते तेन=कर्मत्वादिना सह धात्वर्थस्य साक्षाद् भेदेनान्वयो न स्यादिति न कर्मत्वादीनां प्रकृत्यर्थत्वं स्वीकर्तुं शक्यते— कर्मत्वादेर्धात्वर्थेन सह साक्षाद्भेदान्वयस्यैवेष्टत्वात् कर्मत्वादेर्द्वितीयाद्यर्थत्वस्वीकारे तु प्रत्ययार्थधात्वर्थयोः साक्षाद् भेदान्वयस्येष्टत्वात् निरूपकत्वसम्बन्धेन कर्मत्वादेर्धात्वर्थेन सह साक्षादभेदान्वयः संभवति।

ननु संख्यायाः प्रातिपदिकार्थत्वे=प्रकृत्यर्थत्वस्वीकारे शक्तिभ्रमं लक्षणाग्रहं च विनैव 'घटौ' इति पदमेकत्वविशिष्टं बोधयत्विति तात्पर्यज्ञाने सति द्विवचनाद्यन्तपदादेकत्वादिबोधसंभवादेकत्वादितात्पर्येणैकवचनान्तस्येव द्विवचनान्तस्यापि पदस्य प्रयोगः स्यादेव प्रकृतेरेवैकत्वादिसंख्याबोधकत्व स्वीकारात् तादृशप्रकृतेश्च द्विवचनान्तप्रयोगेऽपि सत्त्वादित्याशङ्क्याह— न चेति। संख्याया विभक्त्यर्थत्वे तु द्विवचनान्तप्रयोगे एकत्वबोधकैकवचनस्याभावान्न द्विवचनान्तपदेनैकत्वबोधापत्तिः, एकत्वतात्पर्येण द्विवचनान्तप्रयोगापत्तिर्वेति भावः। परिहारहेतुमाह— अनादीति, अनादितात्पर्ये सत्येव

तदसत्–अनन्तानां प्रकृत्यानुपूर्वीणां शक्ततावच्छेदकत्वापेक्षयाऽल्पतरविभक्त्याद्यानुपूर्वीणामेकत्वादिशक्ततावच्छेदकत्वस्यैवोचितत्वात्।

न च प्रातिपदिकत्वमेव शक्ततावच्छेदकं न तु घटपदत्वादिकमिति न शक्त्यानन्त्यमिति वाच्यम्, प्रातिपदिकत्वस्य दुर्वचत्वात्। तदज्ञानेप्येकत्वादिज्ञानस्याऽऽनुभविकत्वात्। पदत्वेन वर्णत्वेन वा शक्तत्वे विभक्तेरपि तद्वाचकतासिद्धेः। एकत्वादिशाब्दबोधात् पूर्वं वर्णत्वाद्युपस्थितेरप्यनावश्य-

---

स्वारसिकप्रयोगो भवति, एकत्वादौ चैकवचनाद्यन्तपदस्यैवानादितात्पर्यस्वीकारेण नैकत्वतात्पर्येण द्विवचनान्तपदप्रयोगापत्तिरिति नातिप्रसङ्ग इति संख्यायाः प्रकृत्यर्थत्वस्वीकारेऽपि न दोष इत्यर्थः। नन्वेकवचनान्तपदस्य वैकत्वादावनादितात्पर्यमस्ति न द्विवचनाद्यन्तपदस्येत्यत्र किं मानमित्याशङ्क्याह– द्व्येकयोरिति। तादृशतात्पर्यग्राहकम्=अनादितात्पर्यग्राहकम्।

यत्त्वित्यादिनोक्तं वैयाकरणमतं निराचष्टे– तदसदिति, संख्यायाः प्रकृत्यर्थत्वे प्रकृतेरेव संख्यायां शक्तत्वं स्यादिति घटपटादिप्रकृत्यानुपूर्वीणामनन्तानां शक्ततावच्छेदकत्वं स्यादिति महद् गौरवं स्यात् तस्मात् सुत्वोत्वजस्त्वादिरूपाणां विभक्त्यानुपूर्वीणामेव लाघवाच्छक्ततावच्छेदकत्वं युक्तं विभक्त्यानुपूर्वीणामल्पतरत्वादिति विभक्तेरेव संख्यार्थकत्वं न प्रकृतेरित्यर्थः।

ननु यदि घटपदत्वादिकमेकत्वादिकमेकत्वादिशक्ततावच्छेदकं स्यात्तदा घटादिपदत्वरूपाऽऽनुपूर्वीणामनन्तत्वादनन्तशक्ततावच्छेदकस्वीकारापत्तिः स्यादपि नैवमस्ति किन्तु प्रातिपदिकत्वमेव शक्ततावच्छेदकम्, प्रातिपदिकत्वं च प्रकृतिभूताखिलपदेष्वेकमेवेति न शक्ततावच्छेदकानन्त्यं न वा शक्त्यानन्त्यम्– प्रातिपदिकस्यैव संख्यायां शक्तिस्वीकारादित्याशङ्क्याह– न चेति। परिहारहेतुमाह– प्रातिपदिकत्वस्येति, प्रकृतिभूतसकलपदसाधारणस्य प्रातिपदिकत्वस्य निरूपयितुमशक्यत्वादित्यर्थः किञ्च यदि प्रातिपदिकत्वमेकत्वादिशक्ततावच्छेदकं स्यात्तदा 'घटपदं प्रातिपदिकम्' इत्येवं

कत्वाच्च। फलानुरोधेन तत्कल्पने च कल्पनागौरवात्।

एवमानुपूर्वीभिन्नधर्मस्य वाचकतावच्छेदकत्वे घटपदं सुपदं च न संख्यावाचकमिति विपरीतनिश्चयकालेऽपि तादृशधर्मावच्छिन्नस्य वाचकताग्रहसंभवाद् 'घटः' इत्यादौ संख्याया बोधापत्तिः।

प्रातिपदिकत्वज्ञानं विनैकत्वबोधो न स्यात् न चैवमस्ति किन्तु तदज्ञानेऽपि= प्रातिपदिकत्वाज्ञानेऽप्येकत्वविषयकबोधो भवत्येवेति न प्रातिपदिकत्वमेकत्वादि-शक्ततावच्छेदकमित्याह– तदज्ञानेऽपीति। यदि च संख्यायां पदस्य शक्तिः शक्ततावच्छेदकं च पदत्वम् किं वा संख्यायां वर्णस्य शक्तिः शक्ततावच्छेदकं च वर्णत्वमित्युच्यते तदा विभक्तेरपि पदरूपत्वाद्वर्णरूपत्वाच्च तद्वाचकता= संख्यावाचकत्वं प्राप्तमेवेत्याह=पदत्वेनेति। यदि पदत्वं वा वर्णत्वं वा शक्ततावच्छेदकं स्यात्तदा एकत्वादिसंख्याशाब्दबोधात्पूर्वं वर्णत्वाद्युपस्थिते-रप्यपेक्षा स्याद् न चैवमस्ति वर्णत्वाद्युपस्थितिं विनाप्येकत्वबोधसंभवादिति न वर्णत्वादिकं शक्ततावच्छेदकमित्याह– एकत्वादीति। फलानुरोधेनेति– शक्ततावच्छेदकोपस्थितिं विना शक्यार्थबोधो न भवतीति नियमाश्रित्य यद्येकत्वशाब्दबोधे फलरूपे जाते तत्पूर्वं हेतुभूतायाः शक्ततावच्छेदक-वर्णत्वाद्युपस्थितेः कल्पना क्रियेत तदा गौरवं स्यादेव– लोके वर्णत्वाद्युपस्थिति-मन्तरेणैवैकत्वादिबोधस्य प्रसिद्धत्वादित्यर्थः।

दोषान्तरमाह– एवमिति, सुत्वाद्यानुपूर्वीभिन्नस्य धर्मस्य प्रातिपदिक-त्वादेर्यद्येकत्वादिसंख्यानिरूपितशक्ततावच्छेदकत्वं स्यात्तदा 'घटपदं सुपदं च न संख्यावाचकम्' इत्याकारकबाधनिश्चयकालेऽपि तादृशधर्मावच्छिन्नस्य= प्रातिपदिकत्वादिधर्मावच्छिन्नस्य संख्यावाचकत्वग्रहस्य सम्भवात् 'घटः' इत्यादौ संख्याया बोधः स्यादेव– 'घटपदं सुपदं च न संख्यावाचकम्' इति ज्ञानेन घटपदसुपदयोः संख्यावाचकत्वग्रहप्रतिबन्धेऽपि प्रातिपदिकस्य संख्यावाचकत्वग्रहप्रतिबन्धासंभवात्। न च 'घटपदं सुपदं च न संख्यावाचकम्' इति ज्ञाने सति 'घटः' इत्यादौ संख्याबोधो भवतीति न सुत्वाद्यानुपूर्वीभिन्नधर्मस्य प्रातिपदिकत्वादेः शक्ततावच्छेदकत्वं किन्तु सुत्वादेरेवेत्यर्थः।

अथ विभक्तीनां सार्थकतामते प्रकृतिविभक्त्योरेकवाक्यताविरहनिश्चयदशायां विभक्त्युपस्थाप्यैकत्वादेः प्रकृत्यर्थेऽन्वयबोधवारणाय तयोः समभिव्याहारज्ञानस्य घटादिविशेष्यकैकत्वान्वयबोधं प्रति कारणत्वमधिकं कल्पनीयम्। एकपदोपस्थापितयोर्घटैकत्वाद्योरन्वयबोधोपगमे च न समभिव्याहारज्ञानस्य तत्र हेतुता कल्प्यते इति लाघवात् प्रकृत्याद्यानुपूर्वीणां संख्यावाचकतावच्छेदकत्वमुपेयते इति चेत्? न आकाङ्क्षाविचारे समभिव्याहाराकाङ्क्षाज्ञानस्य हेतुताया निराकृतत्वात्।

ननु यदि विभक्तेरेव संख्यार्थत्वं स्यात्तदा प्रकृतिविभक्त्योरेकवाक्यताविरहनिश्चयदशायां नाम यदा 'घटः' इत्यत्र घटपदेन घटोपस्थितिर्जाता 'पटः' इति पटपदोत्तरसुविभक्तया चैकत्वोपस्थितिर्जाता तदा प्रकृतिविभक्त्योरेकवाक्यत्वं नास्तीत्येकवाक्यत्वाभावेऽपि विभक्त्युपस्थितैकत्वस्य प्रकृत्यर्थे=प्रातिपदिकार्थे घटेऽन्वयः स्यादेव बाधकाभावाद् विभिन्नपदोपस्थितयोः परस्परमन्वयस्य लोकप्रसिद्धत्वात्, न चैवं प्रकृतिविभक्त्योरेकवाक्यताविरहे पटपदोत्तरविभक्त्यर्थसंख्याया घटादावन्वयो भवतीति तादृशान्वयबोधवारणाय तयोः=प्रकृतिविभक्त्योः समभिव्याहारज्ञानस्य='घटः' इत्येवं घटपदोत्तरसुत्वरूपसमभिव्याहाराकाङ्क्षाज्ञानस्य घटविशेष्यकैकत्वान्वयबोधं प्रति कारणत्वमधिकं कल्पनीयम्, तथा विभक्तिज्ञानजन्यैकत्वोपस्थितेरपि कारणत्वं कल्पनीयं स्यादित्याऽऽशङ्कते– अथेति। स्वमते लाघवमाह– एकेति, विभक्तेः संख्यार्थत्वास्वीकारेण प्रकृतेरेव संख्यार्थत्वस्वीकारे तु घटपदेनैव घटैकत्वयोरुपस्थितिर्भवतीति तयोरन्वयबोधोपगमे न तत्र=घटविशेष्यकैकत्वान्वयबोधे समभिव्याहारज्ञानस्य=घटपदोत्तरसुत्वरूपसमभिव्याहारज्ञानस्य हेतुता कल्प्यते– घटपदेनैव घटैकत्वयोरुपस्थितिस्वीकारात् विभक्तेः संख्यार्थत्वाभावाच्च संख्याप्रकारकान्वयबोधं प्रति विभक्तिसमभिव्याहारस्याऽकारणत्वादिति संख्यायाः प्रकृत्यर्थत्वे एतादृशलाघवात् प्रकृतेरेव संख्यावाचकत्वं प्रकृत्यानुपूर्व्या एव च संख्यानिरूपितशक्ततावच्छेदकत्वं स्वीक्रियते। अत्र च मते विभक्तिज्ञानजन्यैकत्वादिसंख्योपस्थितेरप्यपेक्षा नास्त्येव प्रकृत्यैव संख्योपस्थितेः

अथैवमपि विभक्तेः संख्यार्थकत्वे विनिगमनाविरहेण प्रकृतिधर्मिकस्य विभक्तिधर्मिकस्य च संख्याप्रकारकान्वयबोधपरत्वज्ञानस्य हेतुता कल्पनीया, विभक्तेर्द्योतकत्वमते तु विभक्तितात्पर्यविरहेण प्रकृतिधर्मिकमेव तात्पर्यज्ञानं तादृशान्वयबोधहेतुरिति लाघवमिति चेत्?, न–विभक्तेः संख्यावाचकताविरहेऽपि प्रकृतिविभक्त्योरानुपूर्वीज्ञानस्य तादृशान्वयबोधहेतुताया निर्विभक्तिकादिपदज्ञानादन्वयबोधवारणायावश्यकल्पनीयतया संख्यावाचकप्रकृतेरिव तदवाचकविभक्तेरपि संख्यान्वयबोधकत्वप्रकारकेच्छाविषयत्वरूपतादृशबोधपरत्वसंभवेन विभक्तिधर्मिकतज्ज्ञानहेतुताया विनिगमनाविरहेणाऽऽवश्यकत्वात्।

संभवादित्यर्थः। परिहरति– नेति। परिहारहेतुमाह– आकाङ्क्षेति, अत्र– "यत्पदार्थस्य यत्पदार्थेन सहान्वयबोधो विवक्षितस्तयोः पदयोः परस्परसमभिव्याहार आकाङ्क्षेति तात्पर्यगर्भाऽऽकाङ्क्षा सा च तात्पर्यघटितेति तात्पर्यज्ञानकारणतयैव शाब्दबोधनिर्वाहे घट इत्यादौ घटपदोत्तरसुप्त्वरूपसमभिव्याहाराकाङ्क्षाज्ञानहेतुतया निराकृतत्वादित्यर्थः" इति कृष्णंभट्टाः। एकपदोपस्थापितयोः= घटाद्येकपदोपस्थापितयोः।

नन्वेवमपि=तात्पर्यज्ञानस्य कारणत्वमाश्रित्य समभिव्याहाररूपाकाङ्क्षाज्ञानस्य कारणत्वास्वीकारेऽपि विभक्तेः संख्यार्थकत्वे घटादिविशेष्यकसंख्याप्रकारकान्वयबोधं प्रति प्रकृतिधर्मिकस्य=विभक्तिसमभिव्याहृता प्रकृतिः संख्याप्रकारकान्वयबोधपरा इत्यस्य, विभक्तिधर्मिकस्य=प्रकृतिसमभिव्याहृता विभक्तिः संख्याप्रकारकान्वयबोधपरेत्यस्य च तात्पर्यज्ञानस्य विनिगमनाविरहेण हेतुता प्राप्तेति द्विविधतात्पर्यज्ञानस्य कारणत्वं कल्पनीयमिति गौरवं स्यादित्याशङ्कते–अथेति स्वमते लाघवमाह– विभक्तेरिति। द्योतकत्वमते=संख्या तु प्रकृत्यर्थ एव विभक्तेस्तात्पर्यग्राहकत्वमिति मते तु विभक्तितात्पर्यविरहेण= विभक्तिः संख्याप्रकारकान्वयबोधं जनयतु इत्याकारकतात्पर्यस्य विभक्ता (विभक्तिविषयकस्य) वभावात् केवलं प्रकृतिधर्मिकस्यैव=प्रकृतिः

अथ स्वादीनां संख्यावाचकत्वकल्पनापेक्षया प्रकृतेस्तत्र लक्षणैवोचिता शक्यलक्ष्ययोः परस्परमन्वयोपगमे क्षतिविरहात्, प्रथमाविभक्तेः कुत्रापि शक्तेरक्लृप्ततया तस्याः शक्यसंबन्धरूपा लक्षणा न संभवति, द्वितीयादेः कर्मत्वादौ शक्तत्वेऽपि तादृशविभक्तेस्तत्समभिव्याहृतप्रकृतेर्वा संख्यायां लक्षणेत्यत्र विनिगमकं दुर्लभम्।

न चैकत्वाद्यन्वयबोधे घटपदादिज्ञानजन्योपस्थिति-त्वेनाऽनन्तहेतुताकल्पनमपेक्ष्य स्वादिपदज्ञानजन्यतदुपस्थितित्वेन कतिपयहेतुताकल्पनायां लाघवात् कतिपयशक्तिकल्पने

संख्याप्रकारकान्वयबोधं जनयतु इत्यस्यैवैकस्य तात्पर्यज्ञानस्य घटादिविशेष्यक-संख्याप्रकारकान्वयबोधं प्रति हेतुत्वमस्तीति लाघवमित्यर्थः। परिहरति-नेति, यदि प्रकृतिविभक्त्योः 'घटः' इत्येवमव्यवहितानुपूर्वीज्ञानस्य घटादि-विशेष्यकसंख्याप्रकारकान्वयबोधं प्रति हेतुत्वं न स्यात्तदा 'घटरूपम्' इत्यादौ निर्विभक्तिकं यद् घटपदं तज्ज्ञानादपि घटे संख्यान्वयस्य बोधः स्यादेव बाधकाभावात्, न चैवं भवतीति निर्विभक्तिकपदज्ञानात्संख्यान्वयबोधवारणाय प्रकृतिविभक्त्योरव्यवहितानुपूर्वीज्ञानस्य हेतुता विभक्तेः संख्यावाचकत्वा-स्वीकारेऽपि कल्पनीया तथा च संख्यावाचकप्रकृतेरिव तदवाचक=संख्या-ऽवाचकविभक्तेरपि प्रकृतिसमभिव्याहृता विभक्तिः संख्याप्रकारकान्वयं बोधयतु इत्याकारिका या संख्यान्वयबोधकत्वप्रकारकेच्छा तादृशेच्छाविषयत्वरूपं यत्तादृशबोधपरत्वम्संख्याप्रकारकबोधपरत्वं तत्सम्भवेन विभक्तिधर्मिक-तज्ज्ञानहेतुतायाः=विभक्तिधर्मिकस्य संख्याप्रकारकान्वयबोधतात्पर्यज्ञानस्य हेतुताया विनिगमनाविरहेणावश्यं कल्पनीयत्वात् तव मतेऽप्युक्तलाघवं न सम्भवतीति तव मम चात्र साम्यमेवेत्यर्थः। किं वा प्रकृतिधर्मिकस्येत्यस्य स्वादिविभक्तिपदाऽव्यवहितपूर्ववर्तिघटादिपदत्वज्ञानस्य विभक्तिधर्मिकस्येत्यस्य च घटादिपदाव्यवहितोत्तरवर्तिस्वादिविभक्तिपदत्वज्ञानस्येत्यर्थः। संख्या-प्रकारकान्वयबोधं प्रति विनिगमनाविरहादेतादृशोभयविधतात्पर्यज्ञानस्य कारणत्वापत्तिः प्रतिपादितैव।

ननु स्वादीनामपि संख्यावाचकत्वं न युक्तं तथा प्रकृतेरपि संख्यावाचकत्वं

गौरवमकिञ्चित्करम्, सामान्यतः पदवृत्तिज्ञानजन्यतदुपस्थितित्वेनैककरणताकल्पनं तु न सम्यक् निर्विभक्तिककुम्भपदादितः संख्योपस्थितौ तदगृहीतवृत्तिकघटादिपदे तत्तद्विभक्त्यन्तत्वज्ञानवतः पुंसो घटादौ संख्यान्वयबोधप्रसङ्गाद्, घटपदा-

---

न युक्तं किं तु संख्यायां प्रकृतेर्लक्षणैव स्वीकार्येत्याशङ्कते– अथेति। नन्वेवम् 'घटः' इत्यादौ घटपदेन शक्त्या घटोपस्थितिर्लक्षणायाः चैकत्वोपस्थितिः स्यात्तत्र शक्यलक्ष्योर्घटकत्वयोः कथं परस्परान्वयः स्यात् एकेन घटपदेनैककाले व्यापारद्वयासंभवेन शक्त्या घटस्य लक्षणया चैकत्वस्योपस्थितेरसंभवादित्याशङ्क्याह–शक्येति, यथा 'गङ्गायां घोषः 'इत्यनेन' 'गङ्गातीरे घोषः' इति बोधस्वीकारे गङ्गापदेन शक्त्या प्रवाहस्य लक्षणया च तीरस्योपस्थितिर्जायते तथात्रापि शक्त्या घटस्य लक्षणया चैकत्वस्योपस्थितिसंभवाद् घटैकत्वयोः परस्परान्वये न काप्यनुपपत्तिर्न वा कापि क्षतिरित्यर्थः। ननु संख्यायां प्रकृतेर्लक्षणास्वीकारापेक्षया विभक्तेरेव लक्षणा किं न स्यादित्याशङ्क्याह–प्रथमाविभक्तेरिति। नन्वेवं द्वितीयादेस्तु कर्मत्वादौ शक्तिरस्तीति संख्यायां शक्यसम्बन्धरूपा लक्षणा संभवत्येवेति 'घटं करोति' इत्यादौ विभक्तेरेव संख्यायां लक्षणा स्वीकार्या न तु प्रकृतेरित्याशङ्क्याह– द्वितीयादेरिति, द्वितीयादेः कर्मत्वादौ शक्तिरस्ति प्रकृतेरपि प्रकृत्यर्थे शक्तिरस्तीति प्रकृतिविभक्त्योरुभयोरपि संख्यायां शक्यसम्बन्धरूपा लक्षणा सम्भवत्येवेति द्वितीयादिविभक्तेरेव संख्यायां लक्षणा स्यात् किं वा द्वितीयादिप्रकृतेरेव संख्यायां लक्षणा स्यादित्यत्र विनिगमकं किमपि नोपलभ्यते इत्यर्थः। तादृशविभक्तेः=द्वितीयादिविभक्तेः। तत्समभिव्याहृतप्रकृतेः=द्वितीयादिविभक्तिसमभिव्याहृतप्रकृतेः। यद्यप्युक्तरीत्या द्वितीयाद्यन्तप्रयोगस्थले संख्यायां विभक्तेर्वा प्रकृतेर्वा लक्षणेत्यत्र विनिगमकं दुर्लभं तथापि प्रथमान्तप्रयोगस्थले संख्यायां प्रकृतेरेव लक्षणाया उक्तरीत्या समाश्रयणाद् द्वितीयाद्यन्तप्रयोगस्थलेऽपि प्रकृतेरेव संख्यायां लक्षणा स्वीकार्या, अन्यथा प्रथमान्तप्रयोगस्थले संख्यायां प्रकृतेर्लक्षणा द्वितीयाद्यन्तप्रयोगस्थले च संख्यायां विभक्तेर्लक्षणेति वैषम्यं स्यादित्यवधेयम्।

ननु संख्यायां प्रकृतेर्लक्षणास्वीकारे प्रकृतीनां घटपटादिपदानामन्त-

दिज्ञानजन्यैकत्वाद्युपस्थित्वेनैकत्वादिविषयकशाब्दबोधे हेतुतां कल्पयित्वा विभक्तिघटादिपदानुपूर्वीज्ञानतादृशोपस्थित्योः परस्परसहकारेण फलजनकताया अवश्याभ्युपेयत्वादिति

त्वेनैकत्वादिसंख्याप्रकारकान्वयबोधं प्रति 'घटः' इत्यत्र घटपदजन्यैकत्वोपस्थितेः कारणता 'पटः' इत्यत्र च पटपदजन्यैकत्वोपस्थितेः कारणतेत्यन्तकार्यकारणभावकल्पनापत्त्या महद् गौरवं स्यादिति तदपेक्षया लाघवार्थं विभक्तेरेव संख्यार्थकत्वं स्वीकार्यं तथा च प्रकृतीनामपेक्षया स्वादिविभक्तीनामल्पत्वाद् एकत्वादिसंख्याप्रकारकान्वयबोधं प्रति स्वादिविभक्तिपदजन्यैकत्वादिसंख्योपस्थितेः कारणत्वलाभाच्च लाघवं स्यात्, एवं हि यद्यपि संख्यायां प्रथमाविभक्तेः शक्तिकल्पनप्रयुक्तगौरवमस्ति तथापि लक्षणयाऽनन्तप्रकृतिजन्याऽनन्तसंख्योपस्थितीनां कारणत्वस्वीकारापेक्षया संख्यायां विभक्तिशक्तिकल्पनप्रयुक्तं गौरवमकिञ्चित्करम्=तुच्छमेवास्तीति विभक्तेरेव संख्यायां शक्तिरेव स्वीकर्तव्येत्याशङ्कते– न चेति। नन्वेकत्वादिसंख्याप्रकारकान्वयबोधं प्रति 'घटः' इत्यत्र घटपदजन्यैकत्वोपस्थितेः कारणता 'पटः' इत्यत्र पटपदजन्यैकत्वोपस्थितेः कारणतेत्येवं न वक्ष्यामो येन तत्तत्पदनिवेशेनानन्तकारणताकल्पनं स्यात्, किन्तु सामान्यतः पदवृत्तिज्ञानजन्यतदुपस्थितित्वेन=पदनिष्ठसंख्याविषयकवृत्तिज्ञानजन्यसंख्योपस्थितेः (लक्षणावृत्त्या प्रकृतिभूतपदजन्यसंख्योपस्थितेः) कारणतेत्येवमेककारणतामेव कल्पयाम इति नोक्तगौरवम्, पदवृत्तिज्ञानजन्यसंख्योपस्थितित्वं च घटादिसकलपदजन्यसंख्योपस्थितावस्त्येवेति प्रकृतेरेव संख्यायां लक्षणा न विभक्तेः शक्तिरित्याशङ्क्याह– सामान्यत इति। अस्य परिहारमाह– निर्विभक्तिकेति, एवं सामान्यतः पदजन्यसंख्योपस्थितेः संख्याप्रकारकशाब्दबोधं प्रति कारणत्वस्वीकारे यदा कस्यचित् पुंसः 'कुम्भरूपम्' इत्यत्र निर्विभक्तिककुम्भपदात्संख्योपस्थितिर्जाता तदगृहीतवृत्तिकघटादिपदे='घटः' इत्यत्र घटपदस्य च संख्यायां लक्षणाग्रहो न जातः किन्तु विभक्त्यन्तत्वमात्रज्ञानं जातं तदा कुम्भपदादुपस्थितसंख्याया अपि घटेऽन्वयबोधः स्यादेव संख्योपस्थितेः घटपदेनाजातत्वेऽपि कुम्भपदेन जातत्वात् सामान्यतः पदजन्यसंख्योपस्थितेरेव कारणत्वस्वीकारात्, न च कुम्भपदादुपस्थितसंख्याया घटादावन्वयो भवतीत्यर्थः। तथा चोक्तदोषवारणाय

वाच्यम्, घटादिपदस्यैकत्वादौ लक्षणाग्रहसत्त्वे 'घटः प्रमेयः' इत्यादिवाक्यात् 'एकत्वं प्रमेयम्' इत्याद्यन्वयबोधस्य सर्वसंमततया तदनुरोधेनैकत्वादिविषयकशाब्दबोधे घटादि-पदजन्यैकत्वाद्युपस्थितित्वेन हेतुतायाः सर्वसंमतत्वात्।

घटविशेष्यकसंख्याप्रकारकशाब्दबोधं प्रति घटपदजन्यैकत्वादिसंख्योपस्थितेः कारणत्वं कल्पनीयं तत्रापि 'घटरूपम्' इत्यादौ घटपदेन संख्योपस्थितौ तादृशसंख्याया घटेऽन्वयबोधवारणाय विभक्तिघटादिपदानुपूर्वीज्ञानतादृशोपस्थित्योः=अव्यवधानेन घटपदविभक्तिपदानुपूर्वीज्ञानजन्ययोः (विभक्त्यन्तघटादिपदज्ञानजन्ययोः तादृशोपस्थित्योः=प्रकृत्यर्थघटादिविषयक-संख्याविषयकोपस्थित्योः परस्परसहकारेण फलजनकतायाः=घटादिविशेष्यक-संख्याप्रकारकशाब्दबोधजनकतायाः स्वीकार्यत्वात् तत्र विभक्तिज्ञानस्यापि प्रविष्टत्वाल्लाघवात् संख्याया विभक्त्यर्थत्वमेवोक्तरीत्या युक्तं न प्रकृत्यर्थत्वमित्याह– घटपदादीति। प्रकृत्यर्थोपस्थितिं विनापि संख्याप्रकारक-शाब्दबोधो न संभवति संख्योपस्थितिं विनापि न संभवतीत्युक्तम्– परस्परसहकारेणेति।

न चेत्यादिना शङ्कितं परिहरति– घटादिपदस्येति, त्वया ह्येकत्वादि-संख्यान्वयबोधे घटादिपदज्ञानजन्यसंख्योपस्थितेः कारणत्वे संख्योपस्थापक-प्रकृतिभूतघटादिपदानामनन्तत्वेन तज्जन्यसंख्योपस्थितीनामप्यनन्तत्वाद-नन्तकारणताकल्पनप्रयुक्तं संख्यायाः प्रकृत्यर्थस्वीकारे गौरवं प्रदर्शितं तन्नूतनं नास्ति यतः– घटपदस्यैकत्वादौ लक्षणाग्रहसत्त्वे 'घटः प्रमेयः' इति वाक्यात् 'एकत्वं प्रमेयम्' इत्याकारकशाब्दबोधः सर्वसम्मत एव तत्र लक्षणया घटपदेनैवैकत्वस्योपस्थितिर्भवतीति घटपदजन्यैकत्वोपस्थितिः कारणत्वमपि सर्वैः स्वीकर्तव्यमिति तदनुरोधेन=यथा तत्र घटपदजन्यैकत्वोपस्थितेः कारणत्वं तथान्यत्र 'घटः' इत्यादौ घटपदस्य घटे शक्तिग्रहदशायामप्येकत्वादि-संख्याविषयकशाब्दबोधे घटपदजन्यैकत्वादिसंख्योपस्थितेः कारणत्वं युक्तमेवेति न नूतनं घटपदजन्यसंख्योपस्थितेः कारणत्वकल्पनमस्ति येन गौरवं स्यादिति संख्यायाः प्रकृत्यर्थत्वमेव युक्तमित्यर्थः। प्रत्युक्तोक्तलक्षणाग्रहस्थले घटपद-जन्यसंख्योपस्थितेः कारणत्वमन्यत्र विभक्तिजन्यसंख्योपस्थितेः कारणत्वमिति द्विविधकार्यकारणभावकल्पनप्रयुक्तं गौरवं संख्याया विभक्त्यर्थत्वस्वीकारे

मैवम्– यादृशयादृशपदानां लक्षणयैकत्वादिशाब्दधीजनकत्वं नोभयवादिसिद्धं तादृशानन्तपदज्ञानजन्यैकत्वाद्युपस्थितीनां तच्छाब्दहेतुत्वकल्पनं प्रकृतेः संख्यावाचकतावादिनामधिकमिति तत्कल्पनापेक्षया चाल्पतरस्वादिपदजन्यैकत्वाद्युपस्थितिहेतुताकल्पन एव लाघवम्।

एतेन– संख्याविशेषावच्छिन्नघटादिर्लक्षणया प्रकृतेरर्थो न तु संख्या विभक्त्यर्थः शाब्दबोधे विभक्तिजन्यसंख्योपस्थितिहेतुताकल्पनाधिक्येन गौरवात्। घटादिपद–

एवास्तीत्यभिप्रायः। घटपदस्यैकत्वे लक्षणाग्रहसत्त्वे घटपदेनैकत्वस्यैवोपस्थितिर्भवति प्रमेयपदेन च प्रमेयस्येति 'घटः प्रमेयः' इति वाक्यात् 'एकत्वं प्रमेयम्' इति शाब्दबोधो जायत इत्युक्तम्– घटादिपदस्येति।

अथेत्यादिनोक्तं लक्षणावादं परिहरति– मैवमिति, येषां पदानां लक्षणयैकत्वादिसंख्याविषयकशाब्दबोधजनकत्वमुभयमतसिद्धं तत्र गौरवाभावेऽपि येषां पदानां लक्षणयैकत्वादिशाब्दबोधजनकत्वमुभयमतसिद्धं नास्ति तेषामप्यनन्तत्वात् तज्जन्यसंख्योपस्थितीनामप्यनन्तत्वेनानन्तकारणताकल्पनं संख्यायाः प्रकृत्यर्थत्वमतेऽधिकमेव स्यादिति तदपेक्षया लाघवात् स्वादिविभक्तीनामेव संख्यायां शक्तिः स्वीकार्या स्वादिविभक्तिपदजन्यैकत्वादिसंख्योपस्थितेरेव लाघवार्थं संख्याविषयकशाब्दबोधं प्रति हेतुत्वं स्वीकार्यमित्यर्थः। तच्छाब्दहेतुत्वकल्पनम्=संख्याविषयकशाब्दबोधहेतुत्वकल्पनम्।

एतेनेति– यच्चोक्तं घटपदस्य शुद्धघटे शक्तिरेकत्वादिसंख्याविशिष्टे घटे एव प्रकृतेर्लक्षणा न तु प्रकृत्यापि लक्षणया केवलसंख्याया बोधो जायते न वा संख्या विभक्त्यर्थः– संख्याया विभक्त्यर्थत्वे संख्याप्रकारकशाब्दबोधं प्रति विभक्तिजन्यसंख्योपस्थितेरपि हेतुत्वापत्त्या गौरवं स्यात्। अत्र विनिगमनामाह– घटादिपदस्येति, यदा कस्यचित् पुंसो घटादिपदस्यैकत्वविशिष्टघटादौ लक्षणाग्रहो जातस्तदा सर्वैरेव तज्जन्यविशिष्टविषयकोपस्थित्या=घटपदजन्यैकत्वविशिष्टघटविषयकोपस्थित्या विशिष्टविषयकशाब्दधीजननात्=एकत्वविशिष्टघटविषयकशाब्दबोधोत्पत्तेः स्वीकृतत्वात् नैकत्वविशिष्टपदार्थ–

स्यैकत्वादिविशिष्टघटादौ लक्षणाग्रहदशायां सर्वमत एव तज्जन्यविशिष्टविषयकोपस्थित्या विशिष्टविषयकशाब्द-धीजननात् तथाविधोपस्थितिहेतुतायाः सर्वानुमतत्वात्। पदान्त-रासमभिव्याहृतात् 'घटः' इत्यादिपदादेकत्वादिविशिष्ट-घटादिशाब्दबोधस्त्वलीक एव—तद्विषयकस्मरणस्य तत्रोपगमात् तथा चोक्तम्—"सर्वं हि वाक्यं क्रियायां परिसमाप्यते" इत्यपि निरस्तम्। यादृशपदानां लक्षणयैकत्वादिविशिष्टस्वार्थ-बोधहेतुत्वं नोभयवादिसिद्धं तादृशानन्तपदजन्यविशिष्टोप-स्थितीनां शाब्दधीहेतुताकल्पनमपेक्ष्य विभक्तिजन्यसंख्यो-पस्थितीनामल्पानां तत्कल्पने लाघवात्।

विषयकोपस्थितिशाब्दबोधयोः कार्यकारणभावो नूतनः कल्प्यते इत्येकत्वादि-संख्याविशिष्टे घटादिपदानां सर्वानुमतलक्षणग्रहस्थले इवान्यत्रापि घटादि-पदादेकत्वादिसंख्याविशिष्टघटादिविषयकोपस्थितिशाब्दबोधयोः संभवात् सर्वैः स्वीकर्तव्यत्वाच्च। ननु शाब्दबोधे ह्येकपदार्थेऽपरपदार्थस्य संसर्गो भासते इति नियमोऽस्ति तत्र संख्याया विभक्त्यर्थत्वे 'घटः' इत्यत्र घटपदार्थे विभक्त्यर्थसंख्यायाः संसर्गभानेन शाब्दबोध उपपद्यते तव मते ह्येकत्वविशिष्टो घटो घटपदस्यार्थो विभक्तिश्च निरर्थकैवेति 'घटः' इत्यत्र पदार्थान्तरसंसर्ग-भानाभावाच्छाब्दबोधो न स्यादित्याशङ्क्याह— पदान्तरेति, 'घटः' इत्येकपदादे-कत्वविशिष्टघटविषयकोपस्थितिरेव भवति न तु शाब्दबोधोपीत्यर्थः। अत्र प्रमाणमाह— सर्वमिति। क्रियायां परिसमाप्यते=क्रियाविशेष्यक एव शाब्दबोधो भवतीति 'अस्ति' इत्यादिक्रियापदसहितादेव वाक्याच्छाब्दबोधो जायते न तु 'घटः' इत्याद्येकपदादित्यर्थः। इत्येवं निरसनीयमतमनुद्य निरसति— इत्यपि निरस्तमिति। निरस्तत्वे उक्तहेतुं स्मारयति— यादृशेति। पदानामनन्तत्वे-नैकत्वादिसंख्याविशिष्टेऽगृहीतवृत्तिकपदानामप्यनन्तत्वात् तज्जन्येकत्वादि-संख्याविशिष्टविषयकोपस्थितीनां संख्याविशिष्टविषयकशाब्दबोधं प्रति हेतुत्वकल्पनापेक्षयाऽल्पानां विभक्तिजन्यसंख्योपस्थितीनां तत्कल्पने= संख्याप्रकारकशाब्दबोधहेतुत्वकल्पने लाघवादित्यर्थः। अत्र एतेन= मैवमित्याद्युक्तेन इत्यपि=संख्याविशेषावच्छिन्नेत्याद्युक्तमपि निरस्तमित्यन्वयः।

इदं पुनरिहावधेयम्– विभक्तेः संख्याबोधकत्वे समान-विषयकानुमित्यादिकं प्रति शाब्दसामग्रीप्रतिबन्धकतायां या प्रातिपदिकजन्या घटाद्युपस्थितिर्या च विभक्तिजन्या संख्यो-पस्थितिः प्रवेश्या तयोश्च मिथो विशेष्यविशेषणभावे विनिगमनाविरहात् प्रतिबन्धकताबाहुल्यम्। प्रकृतेर्विशिष्ट-लाक्षणिकत्वे तु तदुभयस्थलीयविशिष्टविषयकोपस्थितिरेकैव सामग्र्यामन्तर्भवतीति लाघवम्।

न च विशिष्टविषयकोपस्थितेरप्येकत्वादिप्रकारता-निरूपितघटादिविशेष्यताशालित्वेन घटादिविशेष्यतानिरूपितै-

---

उक्ते विभक्तेः संख्याबोधकत्वमते गौरवदोषं प्रदर्शयति– इदमित्यादिना, विभिन्नविषयक प्रत्यक्षं प्रति समानविषयकानुमितिं प्रति च शाब्दबोधसामग्र्याः प्रतिबन्धकत्वं भवति विभक्तेः संख्याबोधकत्वस्वीकारे च संख्याप्रकारक-शाब्दबोधसामग्र्यां प्रातिपदिक=प्रकृतिभूतघटादिपदजन्यघटाद्युपस्थिते-र्विभक्तिजन्यसंख्योपस्थितेश्च प्रवेशादुपस्थितिद्वयस्य प्रतिबन्धकत्वं प्राप्तं किं चोक्तोपस्थित्योः परस्परं विशेष्यविशेषणभावे विनिगमनाविरहाद् घटपदजन्यघटोपस्थितिविशिष्टविभक्तिजन्यसंख्योपस्थितेः प्रतिबन्धकत्वं तथा विभक्तिजन्यसंख्योपस्थितिविशिष्टघटपदजन्यघटोपस्थितेरपि प्रतिबन्धकत्व-मित्येवं बहुविधोपस्थितीनां प्रतिबन्धकत्वकल्पनया गौरवं स्यादेवेत्यर्थः। प्रकृतेरेव संख्याविशिष्टप्रकृत्यर्थघटादौ लक्षणास्वीकारे तु तदुभयस्थलीय-विशिष्टविषयकोपस्थितिः=उक्तघटादिप्रकृत्यर्थविषयकसंख्याविषयकोभयोपस्थिति-स्थानीया संख्याविशिष्टप्रकृत्यर्थविषयकोपस्थितिरेकैवास्तीति तस्या एकस्या एव विशिष्टोपस्थितेः संख्याप्रकारकशाब्दबोधसामग्र्यामन्तर्भावात् तस्या एकस्या एव समानविषयकानुमित्यादिकं प्रति प्रतिबन्धकत्वकल्पनाल्लाघवमित्याह– प्रकृतेरिति।

ननु प्रकृत्या संख्याविशिष्टविषयकोपस्थितेरपि लक्षणया स्वीकारे तादृशो-पस्थितेरप्येकत्वादिसंख्याप्रकारकघटादिविशेष्यकत्वेन घटादिविशेष्यकसंख्या-प्रकारकत्वेन च द्वैविध्यात् तादृशोभयोरुपस्थित्योः प्रतिबन्धकताकल्पनापत्त्या पूर्वोक्तमतेन साम्यमेवेत्याशङ्क्याह– न चेति। परिहारहेतुमाह– भवन्मते

कत्वादिविषयताशालित्वेन वा प्रवेश इति विनिगमनाविरहात्साम्यमिति वाच्यम्, भवन्मते योग्यताज्ञानघटोपस्थित्येकत्वोपस्थितीनां तिसृणां विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबध्यप्रतिबन्धकभावषट्कम्। मन्मते तत्र योग्यताज्ञाने विशिष्टविषयकोपस्थितेः प्रत्येकं दर्शितोभयरूपेण वैशिष्ट्यं निवेश्य तदुभयम् प्रत्येकं तादृशरूपद्वयावच्छिन्ना-

इति, भवन्मते=संख्याया विभक्त्यर्थत्वमते शाब्दबोधसामग्र्यां योग्यताज्ञानस्य घटपदजन्यघटोपस्थितेर्विभक्तिजन्यैकत्वादिसंख्योपस्थितेश्च प्रवेशात् तेषां त्रयाणां विशेष्यविशेषणभावे विनिगमनाविरहाच्च षट् प्रतिबन्ध्यप्रतिबन्धकभावा भवन्ति यथा– १ योग्यताज्ञानविशिष्टा वा घटोपस्थितिस्तादृशघटोपस्थितिविशिष्टैकत्वोपस्थितेः प्रतिबन्धकत्वम्, २ योग्यताज्ञानविशिष्टा या एकत्वोपस्थितिस्तादृशैकत्वोपस्थितिविशिष्टघटोपस्थितेः प्रतिबन्धकत्वम्, ३ घटोपस्थितिविशिष्टं यद् योग्यताज्ञानं तादृशयोग्यताज्ञानविशिष्टैकत्वोपस्थितेः प्रतिबन्धकत्वम्, ४ घटोपस्थितिविशिष्टा या एकत्वोपस्थितिस्तादृशैकत्वोपस्थितिविशिष्टयोग्यताज्ञानस्य प्रतिबन्धकत्वम्, ५ एकत्वोपस्थितिविशिष्टा या घटोपस्थितिस्तादृशघटोपस्थितिविशिष्टयोग्यताज्ञानस्य प्रतिबन्धकत्वम्, ६ एकत्वोपस्थितिविशिष्टं यद् योग्यताज्ञानं तादृशयोग्यताज्ञानविशिष्टघटोपस्थितेश्च प्रतिबन्धकत्वमिति। स्वमते लाघवमाह– मन्मते इति, मन्मते प्रकृतेः संख्याविशिष्टप्रकृत्यर्थे लक्षणास्वीकारेण शाब्दबोधसामग्र्यां योग्यताज्ञानस्य प्रकृतिभूतपदजन्यसंख्याविशिष्टप्रकृत्यर्थविषयकोपस्थितेश्चैकस्या एव प्रवेशात् तयोर्द्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहाच्च प्रत्येक दर्शितोभयरूपेण=संख्याविशिष्टप्रकृत्यर्थोपस्थितेर्यद्रूपद्वयं प्रदर्शितं तस्य प्रत्येकस्य योग्यताज्ञाने वैशिष्ट्यनिवेशेन तदुभयम्=प्रतिबन्धकताद्वयम्, तथा प्रत्येकं तादृशरूपद्वयावच्छिन्नायामुपस्थितौ=या द्विविधरूपा संख्याविशिष्टार्थोपस्थितिः प्रदर्शिता तस्याः प्रत्येकरूपे योग्यताज्ञानस्य वैशिष्ट्यनिवेशेन च द्वयम्=प्रतिबन्धकत्वद्वयमिति मिलित्वा तच्चतुष्टयम्=प्रतिबन्धकत्वचतुष्टमिति अल्पतरतत्कल्पने=भवदपेक्षयाऽल्पसंख्याकप्रतिबन्धकत्वकल्पनापत्त्या महालाघवम्। यथा– १ एकत्वादिप्रकारतानिरूपितघटादिविशेष्यकोपस्थितिविशिष्टयोग्यताज्ञानस्य, २ घटादिविशेष्यतानिरूपितैकत्वादिप्रकारताकोपस्थिति–

यामुपस्थितौ योग्यताज्ञानस्य वैशिष्ट्यं निवेश्य च द्वयमिति तच्चतुष्टयमात्रमिति रीत्याऽस्माकमल्पतरतत्कल्पने महालाघवम्।

तादृशरीत्यैव च 'प्रणमति' इत्यादौ प्रकर्षविशिष्टनति-र्धातूनामेवार्थः, प्रादयो द्योतका एव न तु प्रकर्षादिवाचका इति सर्वानुमतः पन्थाः परिष्कर्तुं शक्यते, अन्यथा– अनन्तधातुजन्यप्रकर्षादिविशिष्टतत्तत्स्वार्थोपस्थितीनां शाब्द-धीजनकतामपेक्ष्य कतिपयोपसर्गाधीनप्रकर्षाद्युपस्थितीनां तज्जनकताकल्पने लाघवात् स्वादीनामिव प्रादीनामपि वाचकता निराबाधा सिद्ध्येतेति।

संख्यायाश्च प्रकृत्यर्थे पर्याप्तिसंबन्धेनैव विशेषणत्वं न तु

विशिष्टयोग्यताज्ञानस्य ३ योग्यताज्ञानविशिष्टैकत्वादिप्रकारतानिरूपित-घटादिविशेष्यकोपस्थितेः, ४ योग्यताज्ञानविशिष्टघटादिविशेष्यतानिरूपितैक-त्वादिप्रकारताकोपस्थितेश्च प्रतिबन्धकत्वमिति।

उक्तन्यायं प्रादिष्वतिदिशति– तादृशरीत्यैवेति, 'प्रणमति' इत्यादौ लक्षणया प्रकर्षविशिष्टैव नतिर्धात्वर्थ एव, प्रादीनां प्रकर्षादिद्योतकत्वम्=प्रकर्षादितात्पर्य-मात्रग्राहकत्वमेव न तु प्रकर्षादिवाचकत्वमिति मतमप्युक्तरीत्या परिष्कर्तुं शक्यते। प्रादीनां प्रकर्षादिवाचकत्वे शाब्दबोधसामग्र्यां प्रादिजन्यप्रकर्षाद्युपस्थितेः प्रवेशात् तस्याश्च विभिन्नविषयकप्रत्यक्षं प्रति समानविषयकानुमितिं प्रति च प्रतिबन्धकत्वे योग्यताज्ञानेन सह विशेष्यविशेषणभावविनिगमनाविरहाच्च प्रतिबध्यप्रतिबन्धकभावसंख्याधिक्यापत्त्या गौरवं स्यादिति धातोरेव प्रकर्षादिविशिष्टधात्वर्थे लक्षणा युक्तेत्यर्थः। विपक्षे बाधकमाह– अन्यथेति, यद्युक्तलाघवं न स्वीक्रियेत तदा धातूनामनन्तत्वेन प्रकर्षादिविशिष्टधात्वर्थ-विषयकानन्तोपस्थितीनां शाब्दबोधकारणत्वापेक्षया कतिपयोपसर्गाणामेव प्रकर्षादिवाचकत्वमाश्रित्य प्रादिजन्यप्रकर्षाद्युपस्थितीनां प्रकर्षादिप्रकारक-शाब्दबोधकारणताकल्पने लाघवात् स्वादिविभक्तीनां संख्यावाचकत्वमिव प्राद्युपसर्गाणामपि प्रकर्षादिवाचकत्वं निराबाधं सिद्ध्येदेवेत्यर्थः।

संख्यायाः प्रकृत्यर्थे=संख्येयपदार्थे समवायस्तु वृत्तिनियामक एव सम्बन्ध

समवायादिना, तथा सति–एकव्यक्तिबोधपरादाकाश-शब्दादपि द्विवचनबहुवचनाद्यापत्तेः– तत्तदर्थयोर्द्वित्वबहुत्वयोः समवायादिनाऽऽकाशाद्यन्वययोग्यत्वात्।

न च पर्याप्तेः संसर्गत्वेऽपि तद्दोषतादवस्थ्यम्– घटाकाशादौ द्वित्वादेः पर्याप्तिसत्त्वे प्रत्येकमाकाशादौ तत्पर्याप्तिर्नास्तीति वक्तुमशक्यत्वात् प्रत्येकस्योभयाऽनतिरिक्तत्वादिति वाच्यम्,

---

इति संख्येये संख्या गुणरूपत्वात्समवायेनैव वर्तते शाब्दबोधे च भासमान-विशेष्यविशेषणभावावच्छेदकस्तु पर्याप्तिसम्बन्ध एवेत्यभिप्रायेणाह–संख्यायाश्चेति। तथासति=संख्यायाः प्रकृत्यर्थे समवायेन विशेषणत्वे सति समवायस्यैकत्वेन द्वित्वबहुत्वसमवायस्याप्याकाशे सत्त्वात् तेन समवायेन च तत्तदर्थयोर्द्वित्वबहुत्वयोरप्याकाशेऽन्वयसंभवादेकव्यक्तिविषयकबोध-जनकादप्याकाशपदाद् द्विवचनबहुवचनयोरापत्तिः स्यादिति न समवायादिना संख्याया विशेषणत्वं किन्तु पर्याप्तिसम्बन्धेनैव, द्वित्वबहुत्वपर्याप्तेश्चानेक-व्यक्तिकपदार्थेष्वेव सत्त्वेनाकाशेऽभावात्तादृशपर्याप्तिसम्बन्धेन द्वित्वबहुत्व-योरप्याकाशेऽसंभवान्नाकाशपदाद् द्विवचनबहुवचनापत्तिः, एकत्वपर्याप्तेश्च सत्त्वादेकवचनं भवत्येवेत्यर्थः। तत्तदर्थयोरिति। संख्यायाः प्रकृत्यर्थत्वमते प्रकृत्यर्थभूतयोः संख्यायाः विभक्त्यर्थत्वमते विभक्त्यर्थभूतयोरित्यर्थः। किं वा द्विवचनबहुवचनार्थयोर्घटाकाशादिगतद्वित्वबहुत्वयोरित्यर्थः। न च वायौ रूपसमवाये सत्यपि रूपाभावेन रूपवत्त्वप्रसक्त्यऽभाववदाकाशेऽपि द्वित्वसमवाये सत्यपि द्वित्वाभावेन द्विवचनाद्यापत्त्यभाव इति वाच्यम्, घटाकाशोभयगतद्वित्वस्याकाशेऽपि सत्त्वादेव।

ननु संख्यायाः प्रकृत्यर्थे पर्याप्तिसम्बन्धेनापि विशेषणत्वोपगमे तद्दोषता-दवस्थ्यम्=आकाशपदाद् द्विवचनबहुवचनयोरापत्तिरस्त्येव यतः– घटाकाशोभय-पदार्थे द्वित्वपर्याप्तिरस्त्येव प्रत्येकमाकाशादौ घटाकाशाद्युभयभेदाभावेन प्रत्येकस्योभयानतिरिक्तत्वात् प्रत्येकमाकाशादौ तत्पर्याप्तिः=द्वित्वपर्याप्तिर्नास्तीति वक्तुमशक्यत्वादित्याशङ्क्याह–न चेति। घटपटोभयस्य प्रत्येकरूपत्वमेव–प्रत्येकं त्यक्त्वा घटपटोभयस्वरूपासंभवादित्युभयस्मिन् प्रत्येकस्य भेदो न स्वीक्रियते प्रत्येकं तूभयभेदः स्वीक्रियते– प्रत्येकस्योभयस्वरूपत्वाभावादन्यथा

उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेरेव संसर्गतोपगमात्, आकाशत्वादिव्याप्यताया द्वित्वादिपर्याप्तावऽसत्त्वेनाति-प्रसङ्गविरहात्। वैशिष्ट्यम् च वैज्ञानिकं न तु वास्तवं तेन यत्र योग्यताभ्रमजन्यः 'अत्राकाशौ' इत्यादिवाक्यजन्यद्वित्वादि-

---

प्रत्येकेनाप्युभयकार्यापत्तिः स्यादिति सिद्धान्त इति अत्र यत् "प्रत्येकस्योभया-नतिरिक्तत्वात्" इत्यनेन प्रत्येकस्योभयानतिरिक्तत्वस्य=उभयस्वरूपत्वस्य प्रतिपादनद्वारा तद् यद्यपि सिद्धान्तविरुद्धमेव सिद्धान्ते प्रत्येकस्योभयस्वरूपत्वा-भावात्तथाप्यस्य शङ्काग्रन्थत्वान्न दोषः। सिद्धान्तानुकूलं कथञ्चित्तद्वाक्यव्याख्यान-संभवेऽपि शङ्काग्रन्थसमन्वयो न स्यात्। परिहारहेतुमाह– उद्देश्यतेति, यथा 'आकाशम्' इत्यत्रोद्देश्यतावच्छेकं यदाकाशत्वं तद्व्याप्यत्वविशिष्टा=तद्व्याप्या या पर्याप्तिस्तस्या एव सम्बन्धत्वस्वीकाराद् आकाशत्वव्याप्या चैकत्वपर्याप्तिरेव न द्वित्वपर्याप्तिर्यतः– व्याप्यत्वं हि व्यापकाभाववदऽवृत्तित्वं द्वित्वपर्याप्तिस्त्वा-ऽऽकाशत्वाभाववति घटादावप्यस्त्येवेति तस्याः सम्बन्धत्वाभावान्नाकाशपदाद् द्विवचनबहुवचनयोरापत्तिरित्यर्थः, एतदेवाह– आकाशत्वादीति। द्वित्वादिपर्याप्ता-वाकाशत्वव्याप्यताया अभावान्न तस्याः सम्बन्धत्वम्। अतिप्रसङ्गविरहात्= द्वित्वादिपर्याप्तेराकाशेऽसत्त्वेनाकाशपदाद् द्विवचनाद्यापत्तिर्नास्तीत्यर्थः। अत्र पर्याप्तावुद्देश्यतावच्छेदकव्याप्यत्ववैशिष्ट्यं च वैज्ञानिकमेव न तु वास्तवं विवक्षितम्, वैशिष्ट्यस्य ज्ञानमात्रमपेक्ष्यत इत्याह– वैशिष्ट्यं चेति। तथा चाऽऽकाशे वस्तुतो विशिष्टसंसर्गाप्रसिद्धावपि=उद्देश्यतावच्छेदकव्याप्य-त्वविशिष्टद्वित्वपर्याप्तेः सम्बन्धभूताया असत्त्वेऽपि यदि कस्यचित् पुंस आकाशे द्वित्वभ्रान्तिः स्यात्तदा द्वित्वपर्याप्तावप्युद्देश्यतावच्छेदकाकाशत्वव्याप्य-त्ववैशिष्ट्यस्य भ्रमसत्त्वेन 'अत्राकाशौ' इति द्विवचनान्तप्रयोगसम्भवात् न क्षतिः='अत्राकाशौ' इति प्रयोगस्यानुपपत्तिर्नास्ति, यदि चात्र वैशिष्ट्यं वास्तवं विवक्षितं स्यात्तदा वस्तुतो द्वित्वपर्याप्तावाकाशत्वव्याप्यत्ववैशिष्ट्यस्याभावात् 'अत्राकाशौ' इति प्रयोगो भ्रान्त्यापि न स्यादेवेत्यर्थः। ननु क्वचित् प्रसिद्धस्यैवान्यत्र भ्रमो भवतीति कथं द्वित्वपर्याप्तावाकाशत्वव्याप्यत्वस्य भ्रम इत्याशङ्क्याह– द्वित्वादीति। अन्यत्र=शब्दादौ प्रसिद्धस्याकाशत्वव्याप्य-त्वस्य तत्र 'अत्राकाशौ' इति वाक्यस्थले द्वित्वपर्याप्तौ भ्रान्तेः स्वीकारादित्यर्थः। ननु प्रकारांशे भ्रमो भवति न तु सम्बन्धांशे पर्याप्तिश्चात्र सम्बन्ध एवेति

प्रकारकाऽऽकाशादिशाब्दबोधस्तत्र विशिष्टसंसर्गाप्रसिद्धावपि न क्षतिः–द्वित्वादिपर्याप्तावन्यत्र प्रसिद्धस्याकाशत्वादिव्याप्यत्वस्य भ्रान्तेस्तत्रोपगमात्, प्रकारतायां भ्रमस्य सर्वानुभवसिद्धत्वेऽपि संबन्धतावच्छेदकांशे भ्रमत्वस्यान्यत्रोपपादितत्वात्।

न च प्रकृत्यर्थतावच्छेदके एव व्यापकतासंबन्धेन द्वित्वान्वयधीः किं नोपेयत इति वाच्यम्, 'घटौ' इत्यादौ

कथं तत्र भ्रमः स्यादित्याशङ्क्याह– प्रकारतायामिति। प्रकारतायां भ्रमस्य शुक्तिरजतादिस्थले शुक्तौ रजतत्वमसदपि प्रकारतया भासते इति सर्वानुभवसिद्धत्वेऽपि सम्बन्धतावच्छेदकांशेऽपि भ्रमो भवतीत्यन्यत्रोपपादितम्। अत्र "नन्वत्राकाशावित्यत्राकाशे द्वित्वं प्रकारतया भासते तत्र सम्बन्धः पर्याप्तिस्तत्राकाशत्वव्याप्यत्वमसदपि भासते सम्बन्धतावच्छेकांशे भ्रमत्वं न तु द्वित्वरूपप्रकारांशे सम्बन्धतावच्छेदकांशे च भ्रमत्वस्यानङ्गीकारादित्यत आह– सम्बन्धतावच्छेदकांशे च भ्रमत्वस्यान्यत्रोपपादितत्वादिति, पर्याप्तिः सम्बन्धस्तत्राकाशत्वव्याप्यत्वं विशेषणं सम्बन्धतावच्छेदकं तत्राकाशत्वव्याप्यत्वाभाववत्पर्याप्तौ चाकाशत्वव्याप्यत्वं प्रकारतयाऽवच्छेदक इति सम्बन्धतावच्छेदकांशे भ्रमत्वस्यान्यत्रोपपादितत्वादित्यर्थः। परस्परविशेषणविशेष्यभावापन्नेष्वेव संसर्गतास्वीकारात् तादृशप्रकारतामादायैव भ्रमत्वमुपपादनीयमित्याद्यन्यत्र स्थितम्।" इति कृष्णंभट्टाः।

ननु संख्यायाः व्यापकतासम्बन्धेन प्रकृत्यर्थतावच्छेदके एवान्वयः स्वीक्रियतां तथा च यत्र यत्र घटादौ संख्या वर्तते तत्र तत्र प्रकृत्यर्थतावच्छेदकघटत्वादेरपि सत्त्वात् प्रकृत्यर्थतावच्छेदके व्यापकत्वमस्त्येवेति तेन सम्बन्धेन प्रकृत्यर्थतावच्छेदके संख्यान्वयो नानुपपन्नः, द्वित्वपर्याप्तावाकाशत्वव्याप्यत्ववैशिष्ट्यस्याभावाद् यथा 'आकाशौ' इति प्रयोगवारणं पर्याप्तेः सम्बन्धत्वे संभवति तथा व्यापकतासम्बन्धेन द्वित्वस्य प्रकृत्यर्थतावच्छेदके आकाशत्वेप्यन्वयस्वीकारे संभवत्येकद्वित्वव्यापकताया आकाशत्वेऽभावात्तेन सम्बन्धेनाकाशत्वे द्वित्वासंभवादिति विनिगमनाविरहेणाशङ्क्याह– न चेति। परिहारहेतुमाह– घटाविति, पदार्थान्तरनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन

घटत्वादीनां स्वरूपत एवोपस्थिततया तत्रोक्तान्वयबोधस्याऽसंभवात्। स्वव्यापकीभूतोद्देश्यतावच्छेकवत्त्वरूपपरम्पराया एव प्रकृत्यर्थे द्वित्वादेः संबन्धतास्वीकारे च व्यापकतारूपसंबन्धतावच्छेदकांशे भ्रमत्वस्यावश्यकतया उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेः संबन्धतोपेक्षाया निर्बीजत्वात्।

अथात्र व्याप्तिर्व्यापकसामानाधिकरण्यरूपैव वाच्या न तु तद्वदन्यावृत्तित्वरूपा–केवलान्वयिधर्मस्य प्रकृत्यर्थता–

शाब्दबुद्धित्वावच्छिन्नं प्रत्यन्वयितावच्छेदकरूपेणोपस्थितिः कारणमिति नियमात् 'घटौ' इत्यादौ घटत्वादेः स्वरूपेणोपस्थितत्वेनाऽन्वयितावच्छेदक (घटत्वत्वादि) रूपेणोपस्थित्यभावात्तत्र द्वित्वादिसंख्यान्वयो न संभवतीति न प्रकृत्यर्थतावच्छेदके केनापि सम्बन्धेन संख्यान्वयः स्वीकर्तुं शक्यते इति उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसम्बन्धेन प्रकृत्यर्थे एवोक्तरीत्या संख्यान्वयो युक्त इत्यर्थः। ननूक्तोद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेः सम्बन्धत्वं त्यक्त्वा स्वव्यापकीभूतोद्देश्यतावच्छेदकवत्त्वस्यैव सम्बन्धत्वं स्वीकार्यं तथा च स्वं संख्या तद्व्यापकीभूतं यदुद्देश्यतावच्छेदकं घटत्वादि तद्वत्वं प्रकृत्यर्थे घटादावस्त्येवेति तेन सम्बन्धेन घटादौ द्वित्वादिसंख्यान्वये न काचिदनुपपत्तिः, 'आकाशौ' इत्यत्र स्वपदेन द्वित्वं ग्राह्यं द्वित्वव्यापकता चोद्देश्यतावच्छेदके आकाशत्वे नास्तीति स्वव्यापकतावच्छेदकवत्त्वसम्बन्धेनाकाशे द्वित्वाभावात् 'आकाशौ' इति प्रयोगापत्तिरपि नास्त्येवेत्याशङ्क्याह– स्वव्यापकीति। उत्तरमाह– व्यापकतारूपेति, एवमपि भ्रान्त्या 'अत्राकाशौ' इति प्रयोगोपपत्त्यर्थं उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेः सम्बन्धत्वे यथोक्तरीत्या द्वित्वपर्याप्तौ आकाशत्वे व्याप्यत्वभ्रमः स्वीक्रियते तथा स्वव्यापकीभूतोद्देश्यतावच्छेदकवत्त्वस्य सम्बन्धत्वेप्याऽऽकाश द्वित्वव्यापकत्वभ्रमः स्वीकर्तव्य एवेति विशेषाभावाद् उद्देश्यतावच्छेदकव्याप्यत्वविशिष्ट पर्याप्तेः सम्बन्धत्वपरित्यागे कारणं नास्त्येव, न च विनिगमनाविरहः– "आचार्याः कृत्वा न निवर्तन्ते" इत्यस्यैव विनिगमकत्वादित्यर्थः स्वव्यापकीभूतोद्देश्यतावच्छेदकवत्त्वं सम्बन्ध इत्यस्य स्वनिरूपितव्यापकताश्रयाभूतोद्देश्यतावच्छेदक–

वच्छेदकता यत्र तत्राप्रसिद्धेः, एवं चोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्त्यऽपेक्षया लघोः स्वव्यापकतादृशधर्मवत्त्वस्यैव संबन्धत्वमुचितमिति चेत्? तर्हि 'आकाशो न द्वौ' इत्यादिवाक्यजन्यशाब्दबोधदशायामपि 'आकाशौ' इत्यादिवाक्याद् द्वित्वबोधापत्तिः, तथा हि–'आकाशो न द्वौ' इत्यादितो द्वित्वावच्छिन्नभेदः प्रतीयते स च न स्वव्यापकाऽऽका-

---

वत्त्वं सम्बन्ध इत्यर्थ एतत्सम्बन्धस्वरूपे च व्यापकता प्रविष्टास्तीति सा व्यापकता सम्बन्धतावच्छेदिका जाता स्वपदेन च द्वित्वादिसंख्या ग्राह्या आकाशत्वे च द्वित्वव्यापकताया असत्त्वेऽपि यद् द्वित्वव्यापकताज्ञानं तद् भ्रम एव 'आकाशौ' इत्यत्रेत्यवधेयम्।

ननु सम्बन्धभूता योद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिस्तत्र व्याप्यत्वस्य प्रवेशोऽस्ति व्याप्यत्वं हि व्याप्त्याश्रयत्वमेवेति व्याप्तेरपि पर्याप्तौ प्रवेशः प्राप्तो व्याप्तिश्च द्विविधाऽस्ति व्यापकसामानाधिकरण्यरूपा तद्वदन्यावृत्तित्वरूपा=व्यापकवदन्यावृत्तित्वरूपा च, तत्र तद्वदन्यावृत्तित्वरूपा व्याप्तिरत्र न ग्रहीतुं शक्यते यतः 'द्वौ प्रमेयो इत्यत्रोद्देश्यतावच्छेदकं प्रमेयत्वं तच्च केवलान्वयि तथा चात्रपर्याप्तौ प्रमेयत्वाभाववदवृत्तित्वमपेक्ष्यते तच्च न सम्भवति प्रमेयत्वाभावस्याप्रसिद्धत्वादिति व्याप्तिरत्र व्यापकसामानाधिकरण्यरूपैव ग्राह्या 'द्वौ प्रमेयौ' इत्यत्राप्युद्देश्यतावच्छेदकं यत्प्रमेयत्वं तत्सामानाधिकरण्यं तु द्वित्वपर्याप्तावस्त्येवेति न कोऽपि दोषः, किं त्वेवमुद्देश्यतावच्छेदकरूपं यद् व्यापकं तादृशव्यापकसामानाधिकरण्यविशिष्टायाः पर्याप्तेः सम्बन्धत्वं प्राप्तं तत्र च व्यापकत्वस्य व्यापकसामानाधिकरण्यस्य च प्रवेशेन गौरवात् तादृशपर्याप्त्यपेक्षया लघुभूतस्य स्वव्यापकतादृशधर्मवत्त्वस्य=स्वव्यापकीभूतोद्देश्यतावच्छेदकवत्त्वस्यैव सम्बन्धत्वमुचितम् अत्र व्यापकत्वस्य प्रवेशेऽपि व्यापकसामानाधिकरण्यप्रवेशाभावेन लाघवादित्याशङ्कते– अथेति। स्वं संख्या। परिहरति– तर्हीति, स्व (संख्या) व्यापकीभूतोद्देश्यतावच्छेदकवत्त्वसम्बन्धेन प्रकृत्यर्थे संख्याया अन्वयस्वीकारे 'आकाशो न द्वौ' इति वाक्यजन्यशाब्दबोधे सत्यपि 'आकाशौ' इति वाक्येनाकाशे द्वित्वान्वयबोधोऽनिष्ट आपद्येत। एतदेवोपपादयति– तथाहीति, 'आकाशो न द्वौ' इत्यत्राकाशशब्दद्विशब्दयोः

शत्ववत्त्वादिसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकः– तादृशसंबन्धेन द्वित्ववतोऽप्रसिद्धेः अपि तु पर्याप्तिसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताक एव तत्काले च पर्याप्तिसंबन्धेन द्वित्वविशिष्टबुद्धिरेव प्रतिबध्यते न तूक्तपरम्परासंबन्धेन तद्विशिष्टबुद्धिरपीति।

समानविभक्तिकत्वाद् द्वित्वावच्छिन्नप्रतियोगिताकभेदः प्रतीयते, स च भेदो न स्व (संख्या) व्यापकाकाशत्ववत्त्वसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताक, इति न स्वव्यापकाकाशत्ववत्त्वसम्बन्धेन द्वित्वावच्छिन्नभेदः प्रतीयते। अत्र हेतुमाह– तादृशसम्बन्धेनेति, यथा संयोगसम्बन्धेन घटवतो भूतलस्य प्रसिद्धत्वात् संयोगसम्बन्धेन घटाभावः प्रत्येतुं शक्यते तथा यदि तादृशसम्बन्धेन=स्व द्वित्व) व्यापकीभूताकाशत्ववत्त्वसम्बन्धेन द्वित्ववान् प्रसिद्धः स्यात्तदा तादृशसम्बन्धेन द्वित्वावच्छिन्नभेदः प्रत्येतुं शक्येतापि नैवमस्ति, आकाशत्वे द्वित्वव्यापकत्वस्यैवाभावादित्यर्थः, किन्तु 'आकाशो न द्वौ' इत्यत्र पर्याप्तिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकः=उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसम्बन्धेन द्वित्वावच्छिन्नभेदः प्रतीयते उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसम्बन्धेन द्वित्ववतो घटादेः प्रसिद्धत्वात्, अत्रापि शब्दे उद्देश्यतावच्छेदकीभूताकाशत्वव्याप्यत्वस्य सत्त्वादेवेत्यर्थः। तथा च यथा संयोगसम्बन्धेन घटाभावज्ञानकाले संयोगेनैव घटवत्त्वज्ञानप्रतिबन्धो भवति न तु समवायादिनापि तथा प्रकृतेऽपि 'आकाशे न द्वौ' इत्यत्र तत्काले= उक्तपर्याप्तिसम्बन्धेन द्वित्वावच्छिन्नभेदप्रतीतिकाले उक्तपर्याप्तिसम्बन्धेनैव द्वित्वविशिष्टबुद्धेः=द्वित्ववत्त्वबुद्धेः प्रतिबन्धः संभवति न तूक्तपरम्परासम्बन्धेन=स्वव्यापकीभूतोद्देश्यतावच्छेदकवत्त्वसम्बन्धेनापि तद्विशिष्टबुद्धेः=द्वित्ववत्त्वबुद्धेः=प्रतिबन्धः संभवतीति यथा संयोगेन घटाभावज्ञाने सत्यपि समवायेन घटवत्त्वज्ञानं जायते एव बाधकाभावात्तथात्रापि 'आकाशो न द्वौ' इति वाक्याद् उक्तपर्याप्तिसम्बन्धेन द्वित्वावच्छिन्नभेदज्ञानकालेऽपि स्वव्यापकीभूतोद्देश्यतावच्छेदकवत्त्वसम्बन्धेन 'आकाशौ' इत्यत्राकाशे द्वित्वान्वयबोधः स्यादेव बाधकाभावादित्याह– अपि त्विति।

अथ 'आकाशो न द्वौ' इत्यादौ केवलपर्याप्ति-संबन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेदो नञा बोधयितुं न शक्यते– आकाशेऽप्युक्तयुक्त्या द्वित्वपर्याप्तेः सत्त्वेन तत्र तेन संबन्धेन तद्वद्भेदस्य वक्तुमशक्यत्वात्, आकाशत्व-व्याप्यपर्याप्तिसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकद्वित्वादि-मद्भेदश्चाऽप्रसिद्ध एवेति चेत्? न– द्वित्वादिपर्याप्तेरुभयादि-

---

ननु पर्याप्तेः केवलपर्याप्तित्वरूपेण सम्बन्धत्वमुच्यते किं वाऽऽकाशत्व-व्याप्यपर्याप्तित्वेन रूपेण सम्बन्धत्वमुच्यत इत्याशङ्कते–अथेति। यदि केवल-पर्याप्तित्वरूपमात्रेण पर्याप्तेः सम्बन्धत्वं तदा आकाशेऽप्युक्तयुक्त्या= घटाकाशोभयगतद्वित्वस्याऽऽकाशेऽपि सत्त्वात् प्रत्येकस्योभयानतिरिक्तत्वात् तत्र=द्वित्ववत्याकाशे तेन सम्बन्धेन=केवलपर्याप्तिसम्बन्धेन तद्वद्भेदस्य= द्वित्ववद्भेदस्य (द्वित्वावच्छिन्नभेदस्य) वक्तुमशक्यत्वात् 'आकाशो न द्वौ' इत्यत्र केवलपर्याप्तिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेदः=केवल-पर्याप्तिसम्बन्धेन द्वित्वावच्छिन्नभेदो नञा बोधयितुं नैव शक्येत सामान्यतः पर्याप्तिसम्बन्धेन घटाकाशोभयगतद्वित्वस्याकाशेऽपि सत्त्वादेवेत्याह– केवलेति। द्वितीयदलमुद्दिशति–आकाशत्वेति, केवलाकाशे द्वित्वं नास्त्येवेति द्वित्वपर्याप्ता-वाकाशत्वव्याप्यत्वं नास्तीत्याकाशत्वव्याप्यपर्याप्तेः सम्बन्धत्वमपि न संभवति तथा चाऽऽकाशत्वव्याप्यपर्याप्तिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकता-कद्वित्वादिमद्भेदश्च=आकाशत्वव्याप्यपर्याप्तिसम्बन्धेन द्वित्वावच्छिन्नभेदश्चा-ऽप्रसिद्ध एव, यद्याकाशत्वव्याप्यपर्याप्तिसम्बन्धेन द्वित्ववत्त्वं प्रसिद्धं स्यात्तदा-ऽऽकाशत्वव्याप्यपर्याप्तिसम्बन्धेन द्वित्वावच्छिन्नभेदोऽपि प्रसिद्धः स्यात् नैवमस्ति द्वित्वपर्याप्तावाऽकाशत्वव्याप्यत्वाभावेनाऽलीकाया आकाशत्वव्याप्यपर्याप्तेः सम्बन्धत्वासंभवादित्याऽऽकाशे द्वित्वावच्छिन्नभेदबोधनस्याऽसम्भवात् 'आकाशौ न द्वौ' इति प्रयोगोऽमूलक एवेत्यर्थः। परिहरति– नेति। द्वित्वपर्याप्तेरुभयादि-वृत्तिधर्मेणैवावच्छेदादिति– उभयवृत्तिधर्म उभयत्वमेवद्वित्वपर्याप्तेरवच्छेदकं भवतीत्युभयत्वावच्छेदेन द्वित्वावच्छिन्नभेदस्य विरोधोस्ति–द्वित्वपर्याप्त्य-वच्छेदकोभयत्ववति घटपटद्वये द्वित्वस्यैव सत्त्वेन द्वित्वावच्छिन्नभेदस्या-ऽसंभवात्। एकमात्रवृत्तिधर्मस्त्वाऽऽकाशत्वादि द्वित्वपर्याप्तेरवच्छेदकमेव न भवतीति तदनवच्छेदकैकमात्रवृत्तिधर्मावच्छेदेन=तस्या द्वित्वपर्याप्तेरनवच्छेदको

वृत्तिधर्मेणैवाऽवच्छेदात्, तदनवच्छेदकैकमात्रवृत्तिधर्मावच्छेदेन तद्वद्भेदस्य तेन संबन्धेन द्वित्वादिमद्भेदस्य च तद्वति वृत्तौ बाधकाभावात्।

न चैवम्– 'घटपटौ न द्वौ' इति प्रयोग आपद्येत– घटपटयोरपि प्रत्येकं द्वित्वावच्छिन्नभेदसत्त्वादिति वाच्यम्, द्विवचनाद्युपस्थापितद्वित्वावच्छेदेनैव द्वित्वावच्छिन्नभेदस्य बाधेन तादृशप्रयोगाभावोपपत्तेः। नञा व्यासज्यवृत्तिधर्मावच्छिन्न–

य आकाशत्वादिरूप एकमात्रवृत्तिधर्मस्तदवच्छेदेन तद्वद्भेदस्य=द्वित्वादि–पर्याप्तिवद्भेदस्य=उभयभेदस्य (प्रत्येकस्योभयस्वरूपत्वाभावेन प्रत्येकमुभय–भेदस्य स्वीकारात्) तेन सम्बन्धेन=पर्याप्तिसम्बन्धेन द्वित्वादिमद्भेदस्य= द्वित्वावच्छिन्नभेदस्य च तद्वति=एकमात्रवृत्त्याकाशत्वादिधर्मवत्याकाशादौ वृत्तौ=सत्त्वे बाधकाभावादित्यन्वयः। तथा चाकाशत्वस्यैकमात्रवृत्तित्वेन द्वित्वपर्याप्त्यवच्छेदकत्वाभावादाकाशत्वावच्छेदेनाकाशे द्वित्वावच्छिन्नभेदस्य वृत्तित्वे बाधकाभावात् 'आकाशो न द्वौ' इति प्रयोग उपपद्यते। 'घटपटौ न द्वौ' इति प्रयोगस्तु न भवति घटपटोभये द्वित्वपर्याप्त्यवच्छेदकस्योभयत्वस्य सत्त्वेन तत्र द्वित्वावच्छिन्नभेदस्यासत्त्वादित्यर्थः।

नन्वेवम्=द्वित्वपर्याप्तेरुभयत्वादिव्यासज्यवृत्तिधर्मावच्छेदेनैव स्वीकारे यथा 'आकाशो न द्वौ' इति प्रयोगो भवति तथा 'घटपटौ न द्वौ' इत्यपि प्रयोगः स्यादेव प्रत्येकं घटे च पटे चोभयत्वाभावेन द्वित्वपर्याप्तेरभावाद् द्वित्वस्याभावेन द्वित्वावच्छिन्नभेदस्य सत्त्वात्–द्वित्वपर्याप्तिं विना तादृशपर्याप्तिसम्बन्धेन द्वित्वस्यासम्भवादित्याशङ्क्याह– न चेति। परिहारमाह– द्विवचनेति, 'घटपटौ' इत्यत्र द्विवचनेन यद् द्वित्वमुपस्थितं भवति तस्य घटपटयोरन्वयात् तादृशद्वित्वावच्छेदेन घटपटयोरुभयोर्द्वित्वावच्छिन्नभेदस्यासम्भवात् (द्वित्वस्यैव सत्त्वात्) तादृशप्रयोगाभावः=(घटपटौ न द्वौ' इति प्रयोगाभाव उपपद्यते। घटपटोभयत्वावच्छेदेन द्वित्वपर्याप्तेः सत्त्वेन तादृशपर्याप्तिसम्बन्धेन घटपटोभयस्मिन् द्वित्वस्यैव सत्त्वात् द्वित्वावच्छिन्नप्रतियोगिताकभेदो न सम्भवतीति यावत्। प्रत्येकं घटपटयोर्द्वित्वाभावेन द्वित्वावच्छिन्नभेदस्य सत्त्वेऽपि घटपटद्वये तु द्वित्वसत्त्वेन द्वित्वावच्छिन्नभेदस्यासत्त्वात् नञा घटपटद्वये

प्रतियोगिताकभेदश्चोद्देश्यतावच्छेदकावच्छेदेनैव बोध्यते इति व्युत्पत्तेर्द्वित्वसामानाधिकरण्येन तदबाधस्याकिञ्चित्करत्वात्।

न च घटत्वादेरतिप्रसक्ततया द्वित्वादिपर्याप्तेरन-

द्वित्वावच्छिन्नभेदस्य स्वार्थस्य, बोधनमेव न सम्भवति येन 'घटपटौ न द्वौ' इति प्रयोग आपद्येतेत्याह– नञेति, व्यासज्यवृत्तिधर्मो द्वित्वोभयत्वादिस्तेन व्यासज्यवृत्तिधर्मेण=उभयत्वेन द्वित्वेन वाऽवच्छिन्ना प्रतियोगिता यस्यैवं भूतभेदस्य द्वित्वावच्छिन्नभेदस्य नञर्थस्य नञा उद्देश्यतावच्छेदकावच्छेदेनैव प्रतीतिर्भवति, 'घटपटौ न द्वौ' इत्यत्र चोद्देश्यतावच्छेदकम् 'घटपटौ' इति द्विवचनोपस्थाप्यं द्वित्वमिति 'घटपटौ न द्वौ' इत्यत्र द्वित्वावच्छेदेन घटपटोभयस्मिन्नेव नञा द्वित्वावच्छिन्नभेदो बोधनीयस्तत्तु न संभवति– घटपटोभयस्मिन् द्वित्वस्यैव सत्त्वेन द्वित्वभेदस्य बाधितत्वात्, द्वित्वसामानाधि-करण्येन=घटवृत्तिद्वित्वसामानाधिकरण्येन पटवृत्तिद्वित्वसामानाधिकरण्येन च तदबाधस्य=द्वित्वावच्छिन्नभेदाबाधस्य=द्वित्वावच्छिन्नभेदसत्त्वस्या-किञ्चित्करत्वात्=प्रयोगापादकत्वाभावात् 'घटपटौ न द्वौ' इति प्रयोगा-पत्तिर्नास्त्येव। अयं भावः– 'घटपटौ' इत्यत्र घटपटद्वये वर्तमानं द्वित्वं प्रत्येकं घटे च पटे चापि वर्तते एव अन्यथा प्रत्येकं घटपटयोर्द्वित्वाभावे घटपटद्वयेऽपि द्वित्वं न स्यादेव समुदायवृत्तिधर्मस्य प्रत्येकमप्यावश्यकत्वात् तत्र प्रत्येकं घटपटयोर्वर्तमानद्वित्वसामानाधिकरण्येन प्रत्येकं घटपटयोर्व्यासज्य-वृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्य=द्वित्वावच्छिन्नभेदस्य सत्त्वेऽपि– (प्रत्येकं घटपटयोर्द्वित्वस्याभावात्) घटपटद्वये तु द्वित्वावच्छिन्नभेदो नास्त्येव द्वित्वस्यैव सत्त्वात् नञा द्वित्वभेदाश्चोद्देश्यतावच्छेदकावच्छेदेनैव=उभयत्वावच्छेदेन घटपटोभयस्मिन्नेव बोधयितुं शक्यते न तु प्रत्येकम्, उभयस्मिश्च द्वित्वावच्छिन्नभेदस्यासत्त्वात् 'घटपटौ न द्वौ' इति प्रयोगस्यापत्तिर्नास्त्येव– द्वित्वावच्छिन्नभेदसत्त्वे एव 'न द्वौ' इति प्रयोगस्य संभवात्। द्वित्वसामानाधि-करण्येन प्रत्येकं घटपटयोर्द्वित्वावच्छिन्नभेदसत्त्वेऽपि द्वित्वावच्छेदेन घटपटोभयस्मिन् द्वित्वसत्त्वे द्वित्वावच्छिन्नभेदाभावसत्त्वे बाधकाभावात्।

ननु द्वित्वपर्याप्तिस्तु 'घटपटौ' इत्यत्र घटपटोभयत्रैव वर्तते घटत्वं तु द्वित्वपर्याप्त्यनधिकरणेष्वपि बहुषु घटेषु वर्तते इत्यतिप्रसक्तं अतिप्रसक्त-

वच्छेदकत्वात् तदवच्छेदेन द्वित्ववद्भेदस्य भवतामप्यनुमतत्वात् प्रकृत्यर्थगतैकत्वाविवक्षायाम् 'घटो न द्वौ' इत्यादिप्रयोगापत्तिरिति वाच्यम्, तादृशप्रयोगाभावे घटत्वादेर्द्वित्वपर्याप्तेरिव द्वित्वादि-मद्भेदस्याप्यनुयोगितावच्छेदकताया अप्रामाणिकत्वात्,

धर्मस्यावच्छेदकत्वास्वीकाराद् द्वित्वपर्याप्तेर्घटत्वमनवच्छेदकमेवेति तदवच्छेदेन= द्वित्वपर्याप्त्यनवच्छेदकीभूतघटत्वावच्छेदेन=यत्र यत्र घटत्वं वर्तते तत्र तत्र द्वित्वपर्याप्तेरभावात् तादृशपर्याप्तिसम्बन्धेन द्वित्वस्याप्यसत्त्वेन द्वित्ववद्भेदस्य= द्वित्वावच्छिन्नभेदस्य सत्त्वात् भवतामप्यनुमतत्वात् प्रकृत्यर्थगतैकत्वस्या-विवक्षायाम् 'घटो न द्वौ' इति प्रयोगः स्यादेवेत्याशङ्क्याह– न चेति। प्रकृत्यर्थगतैकत्वस्य विवक्षायां त्वेकत्वविशिष्टे घटे द्वित्वाभावेन द्वित्वा-वच्छिन्नभेदस्य विवक्षितत्वान् 'घटो न द्वौ' इति प्रयोगस्येष्टत्वादुक्तम्– एकत्वाविवक्षायामिति। प्रकृत्यर्थगतैकत्वस्याविवक्षायाम् 'घटो न द्वौ' इति प्रयोगो नेष्टः– द्वित्वसम्भवेन द्वित्ववद्भेदासंभवादित्यर्थः। परिहरति– तादृशेति, तादृशप्रयोगाभावे=प्रकृत्यर्थगतैकत्वाविवक्षायाम् 'घटो न द्वौ' इति प्रयोगाभावे घटत्वादेर्द्वित्वपर्याप्त्यनुयोगितावच्छेदकत्वस्रूपाप्रामाणिकत्वस्येव द्वित्ववद्भेदा (द्वित्वावच्छिन्नभेदा) नुयोगितावच्छेदकत्वस्याप्रामाणिकत्वस्यैव हेतुत्वादि-त्यन्वयः। यथोक्तरीत्यातिप्रसक्तत्वेन घटत्वं द्वित्वपर्याप्त्यवच्छेदकत्वाभावेन द्वित्वपर्याप्त्यनुयोगितावच्छेदकं नास्ति तथा द्वित्वावच्छिन्नभेदानुयोगिता-वच्छेदकमपि नास्त्येव– 'घटपटौ द्वौ' इत्यत्र द्वित्वसत्त्वेन द्वित्वावच्छिन्न-भेदाभावेऽपि घटत्वस्य सत्त्वेनातिप्रसक्तत्वात् तथा च घटत्वस्वरूप द्वित्वा-वच्छिन्नभेदानुयोगितावच्छेदकत्वाभावेन घटत्वावच्छेदेन द्वित्वावच्छिन्न-प्रसक्त्यऽसंभवात् 'घटो न द्वौ' इति प्रयोगापत्तिरेकत्वाऽविवक्षायां नास्ति, एकत्वविवक्षायां त्वेकत्वस्य द्वित्वावच्छिन्नअभेदानुयोगितावच्छेदकत्वसम्भवेन तादृशैकत्वा- वच्छेदेनैकस्मिन् घटे द्वित्वावच्छिन्नभेदसम्भवादेकं घटमुद्दिश्य 'घटो न द्वौ' इति प्रयोग उपपद्यते, न चैवमेकत्वाविवक्षायामेकत्वस्य द्वित्वावच्छिन्नभेदानुयोगितावच्छेदकत्वं सम्भवति येनैकत्वाऽविवक्षायामपि 'घटो न द्वौ' इति प्रयोग आपद्येतेत्यर्थः। ननु 'यद् भेदीयप्रतियोगिता-वच्छेदकानवच्छेदकं भवति तद् भेदावच्छेदकं भवति' इति नियमोऽस्ति यथा 'घटो न पटः' इत्यत्र पटभेदस्य प्रतियोगितावच्छेदकं पटत्वं

प्रतियोगितावच्छेदकानवच्छेदकताया भेदावच्छेदकता-नियतत्वासिद्धेः।

अस्तु वाऽतिप्रसक्तोऽपि घटत्वादिर्द्वित्वपर्याप्तेरवच्छेदकः 'घटौ' इत्यादिप्रतीतिबलात्।

प्रतियोगितावच्छेदकं पटत्वत्वं भवति घटत्वं तु प्रतियोगितावच्छेदकानवच्छेदकमेवेति तद् घटत्वं पटभेदस्यावच्छेदकं भवत्येव– घटे पटभेदस्य घटत्वस्य च सत्त्वात् सामानाधिकरण्येन घटत्वस्य पटभेदावच्छेदकत्वात्। एवम्– द्वित्ववद्भेदस्य (द्वित्वावच्छिन्नभेदस्य) प्रतियोगी द्वित्ववान्, प्रतियोगिता द्वित्ववति, प्रतियोगितावच्छेदकं द्वित्ववति वर्तमानं द्वित्वं प्रतियोगितावच्छेदकावच्छेदकं द्वित्वत्वं घटत्वं तु प्रतियोगितावच्छेदकानवच्छेदकमेवेति तद् घटत्वं द्वित्ववद्भेदस्यावच्छेदकं स्यादेव तथा च घटे द्वित्ववद्भेदस्य प्राप्त्या एकत्वाविवक्षायामपि 'घटो न द्वौ' इति प्रयोगः स्यादेव 'न द्वौ' इत्यस्य द्वित्ववद्भेदबोधकत्वादित्याशङ्क्याह– प्रतियोगितावच्छेदकेति, भेदस्य प्रतियोगितावच्छेदकानवच्छेदकं घटत्वादिकं भेदस्यावच्छेदकं भवत्येवेति नियतं नास्त्येव– अस्वीकारात्, अन्यथा– एकत्वाविवक्षायामपि त्वदुक्तरीत्या 'घटो न द्वौ' इति प्रयोगः स्यादेव, न चैवं प्रयोगो भवतीति नोक्तनियमः स्वीक्रियते तथा चोक्तनियमास्वीकारे घटत्वस्य द्वित्ववद्भेदावच्छेदकत्वाप्राप्तौ घटत्वावच्छेदेन द्वित्ववद्भेदाप्रसक्त्या 'घटो न द्वौ' इति प्रयोगमापत्तिर्नास्त्येवेत्यर्थः।

अतिप्रसक्तधर्मस्यावच्छेदकत्वं स्वीकृत्याप्याह– अस्तु वेति, न्यूनवृत्तिधर्मस्यावच्छेदकत्वाभावेऽप्यतिप्रसक्तधर्मस्यावच्छेदकत्वस्वीकारेणोक्तरीत्यातिप्रसक्तस्यापि घटत्वस्य द्वित्वपर्याप्त्यवच्छेदकत्वस्वीकाराद् द्वित्वावच्छेदकत्वमेव प्राप्तमिति द्वित्वावच्छेदकस्य घटत्वस्य द्वित्ववद्भेदावच्छेदकत्वासम्भवात् 'घटो न द्वौ' इति प्रयोगापत्तिर्नास्त्येव– एकत्वाविवक्षायां घटे द्वित्वान्वयस्वीकारेण द्वित्ववद्भेदासंभवादित्यर्थः। यद्यतिप्रसक्तस्यापि घटत्वस्य द्वित्वपर्याप्त्यवच्छेदकत्वं न स्यात्तदा 'घटौ' इत्येवं घटत्वावच्छेदेन घटे द्विवचनोपस्थाप्यद्वित्वास्यान्वयो न स्यादिति 'घटौ' इति प्रतीतिबलादेवातिप्रसक्तस्यापि घटत्वस्य द्वित्वपर्याप्त्यवच्छेदत्वं स्वीक्रियत इत्याह– घटाविति।

वस्तुतस्तु घटत्वादेः प्रत्येकं द्वित्वपर्याप्त्यनवच्छेदकत्वेऽपि द्वित्वपर्याप्तित्वावच्छिन्नानतिप्रसक्ततया तदवच्छिन्नावच्छेदकत्वमव्याहतमेव।

अथ पर्याप्त्याख्यविलक्षणसंबन्ध एवाऽप्रामाणिकस्तत्कथं तत्संबन्धता? 'आकाशो न द्वौ' इति प्रतीतिस्तु समवायसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकद्वित्वावच्छिन्नभेदविषयिकैवाऽऽस्ताम्– आकाशादौ द्वित्वसमवायसत्त्वेऽपि द्वित्वा–

घटत्वस्य द्वित्वपर्याप्त्यतिप्रसक्तत्वमेव नास्ति येन द्वित्वपर्याप्त्यवच्छेदकत्वं न स्यादित्याह– वस्तुतस्त्विति, द्वित्वपर्याप्तितत्तद्व्यक्तीनां भिन्नत्वाद् या द्वित्वपर्याप्तिव्यक्तिरेतद्घटपटद्वयेऽस्ति सान्यघटद्वये नास्ति घटत्वं तु तत्राप्यस्त्येवेति चालनीयन्यायेन प्रत्येकं द्वित्वपर्याप्तीनाम्=द्वित्वपर्याप्तितत्तद्व्यक्तीनाम् (द्वित्वपर्याप्तितत्तद्व्यक्त्यपेक्षया) घटत्वस्यातिप्रसक्ततयाऽनवच्छेदकत्वेऽपि द्वित्वपर्याप्तित्वावच्छिन्नानतिप्रसक्ततया=यत्र यत्र घटत्वं तत्र तत्र कस्या अपि द्वित्वपर्याप्तिव्यक्तेः सत्त्वात् सर्वासां च द्वित्वपर्याप्तीनां द्वित्वपर्याप्तित्वेन रूपेणैकत्वाद् घटत्वावच्छेदेन द्वित्वपर्याप्तित्वावच्छिन्नाभावस्यासत्त्वाद् द्वित्वपर्याप्तित्वावच्छिन्नातिप्रसक्तत्वं नास्त्येव घटत्वाधिकरणे कस्या अपि द्वित्वपर्याप्तेः सत्त्वादेवेति तदवच्छिन्नावच्छेदकत्वम्=द्वित्वपर्याप्तित्वावच्छिन्नावच्छेदकत्वं घटत्वस्याऽव्याहतमेव तथा च घटत्वस्य द्वित्वपर्याप्त्यवच्छेदकत्वेन द्वित्वावच्छेदकत्वमपि प्राप्तमिति घटत्वावच्छेदेन द्वित्वस्यैव सत्त्वाद् द्वित्ववद्भेदस्यासत्त्वाच्चैकत्वाविवक्षायाम् 'घटो न द्वौ' इति प्रयोगापत्तिर्नास्त्येवेत्यर्थः।

ननु पर्याप्तिरूपः कोऽपि सम्बन्ध एव प्रामाणिको नास्ति येन तत्सम्बन्धता=तस्याः पर्याप्तेः सम्बन्धता स्यात् किं वा तस्याः पर्याप्तेः सम्बन्धो यस्मिन् स तत्सम्बन्धः शाब्दबोधः तत्सम्बन्धता=पर्याप्तिसम्बन्धविषयतेत्यर्थः अलीकभूतपर्याप्त्याख्यसम्बन्धविषयाता शाब्दबोधे कथं स्यादित्याशङ्कते–अथेति। ननु यदि पर्याप्तेः संख्यासम्बन्धत्वं न स्यात्तदा पर्याप्तिसम्बन्धेनाकाशादौ द्वित्वादिवद्भेदप्रतीतिरपि न स्यादिति 'आकाशो न द्वौ' इत्यादिप्रतीतिरपि न स्यादित्याशङ्क्याह=आकाश इति, समवाय एव

देरेवोभयादिवृत्तिधर्ममात्रावच्छिन्नत्वोपगमात् तदनवच्छेदकाऽऽकाशत्वाद्यवच्छेदेन समवायसंबन्धेन तद्वतो भेदस्य वृत्तौ बाधकाभावादिति चेत्? न– 'आकाशौ' इत्यादिवाक्यजन्यशाब्दबोधस्याप्रमात्वानुपपत्त्यैव तादृशसंबन्धसिद्धेः। तादृश–

संख्यासम्बन्धः 'आकाशो न द्वौ' इत्यत्रापि समयासम्बन्धेनैवाकाशे द्वित्ववद्भेद–प्रतीयते न पर्याप्तिसम्बन्धेनेत्यर्थः समवायसम्बन्धावच्छिन्न द्वित्वनिष्ठा प्रतियोगितावच्छेदकता यस्य स समवायसम्बन्धावच्छिन्न प्रतियोगितावच्छेदकताको द्वित्वावच्छिन्नभेदस्तद्विषयैवेत्यन्वयः। द्वित्वावच्छिन्नभेदस्य द्वित्वावच्छिन्नः= द्वित्ववान् प्रतियोगी प्रतियोगिता द्वित्ववति प्रतियोगितावच्छेदकं द्वित्वमिति प्रतियोगितावच्छेदकता द्वित्वे द्वित्वं च द्वित्ववति समवायेन वर्तते इति स समवायोपि घटे संयोग इव द्वित्वे वर्तते इति प्रतियोगितावच्छेदकता समवायसम्बन्धावच्छिन्ना जातेति 'आकाशो न द्वौ' इत्यत्राकाशे समवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकस्यैव द्वित्वावच्छिन्नभेदस्य प्रतीतिर्जायते न तु पर्याप्तिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकस्येत्यर्थः। ननु यदि समवाय एव संख्यासम्बन्धस्तदा समवायस्यैकत्वेन घटपटोभयस्मिन् वर्तमानस्य द्वित्वसमवायस्याकाशेऽपि सत्त्वात् 'आकाशो न द्वौ' इत्येवमाकाशे द्वित्ववद्भेदः कथं प्रतीयेतेत्याशङ्क्याह– आकाशादाविति, यथा वायौ रूपसमवायसत्त्वेऽपि रूपाभावाद्रूपवत्ताबुद्धिर्न जायते तथा समवायस्यैकत्वेनाकाशे द्वित्वसमवायसत्वेऽपि द्वित्वस्योभयवृत्त्युभयत्वधर्ममात्रावच्छिन्नत्वोपगमेनोभयत्वावच्छेदेनैव सत्त्वात् तदनवच्छेदक=द्वित्वानवच्छेदकाकाशत्वावच्छेदेन समवायेन द्वित्वस्याऽसत्त्वाच्चाकाशत्वावच्छेदेनाकाशे तद्वतो भेदस्य=द्वित्वावच्छिन्नभेदस्य वृत्तौ=सत्त्वे बाधकाभावात् 'आकाशो न द्वौ' इत्येवमाकाशे द्वित्वावच्छिन्नभेदप्रतीतौ न काप्यनुपपत्तिरित्यर्थः। परिहरति–नेति, 'आकाशौ' इति वाक्यजन्यशाब्दबोधोऽनिष्टत्वादप्रामाणिक एव तस्याप्रमात्वं च समवायस्य संख्यासम्बन्धत्वस्वीकारे न संभवतीति तस्याऽप्रमात्वोपपादनार्थमेव तादृशसम्बन्धसिद्धेः=पर्याप्तिसम्बन्धः सिद्ध्यतीत्यर्थः। विपक्षे बाधकमाह–तादृशेति, तादृशबुद्धेः='आकाशौ' इत्यादिवाक्यजन्यबोधस्य समवायविषयकत्वे=यदि संख्यासम्बन्धः समवायः स्यात्तदा घटाकाशगतद्वित्वस्य द्वित्वसमवायस्य चाकाशे सत्त्वादेव 'आकाशौ' इति वाक्यजन्यस्या–

बुद्धेः समवायविषयकत्वे प्रमात्वनिराकरणस्याशक्यत्वात्। उद्देश्यतावच्छेदकव्याप्तिविशिष्टसमवायस्य संसर्गतोपगमे? 'घटौ' इत्यादिवाक्यस्याप्यऽप्रमाणतापत्तिः—समवायस्यैक्येन घटादि-निष्ठस्य द्वित्वादिसमवायस्य पटादावपि सत्त्वेन घटत्वाद्य-व्याप्यत्वात्।

काशानुयोगिकद्वित्वविषयकशाब्दबोधस्याप्रामाण्यं न स्यादेव। पर्याप्तेः सम्बन्धत्वे तु द्वित्वपर्याप्तेः घटाकाशोभयस्मिन्नेव सत्त्वेन केवलाकाशे- ऽभावात् तादृशपर्याप्तिसम्बन्धेनाकाशे द्वित्वस्यासम्भवाद् 'आकाशौ' इति वाक्यजन्यशाब्दबोधस्याऽप्रामाण्यं सूपपादमेवेत्यर्थः। अत्र "यद्यपि समवायेनाकाशे द्वित्वं नाकाशत्वावच्छेदेन किन्तु घटाकाशोभयत्वावच्छेदेनैवेति पर्याप्त्य-ऽनङ्गीकारेऽपि 'आकाशौ' इति धियोऽप्रमात्वं सूपपादं तथापि तत्सम्बन्धा-वच्छेदकस्य तदवच्छेदकतानियमात् प्रकृते च द्वित्वसमवायावच्छेदक-स्याकाशत्वस्य द्वित्वावच्छेदकत्वनियमादाकाशत्वावच्छेदेन द्वित्वसमवायोऽस्ति द्वित्वं चास्तीति 'आकाशौ' इति प्रतीतेः प्रमात्वं स्यादतः आकाशत्वानवच्छेद्यः कश्चिद् द्वित्वसम्बन्धोऽन्वेष्टव्यः स च पर्याप्तिनामास्तु इति द्वित्वपर्याप्त्य-ऽनवच्छेदकाकाशत्वावच्छेदेन पर्याप्तिसम्बन्धेन द्वित्वावगाहिनी 'आकाशौ' इति प्रतीतिरप्रमैवेति पर्याप्तिसम्बन्धोऽवश्यमङ्गीकरणीयः" इति कृष्णंभट्टाः।

ननु न शुद्धसमवायस्य सम्बन्धत्वं येन 'आकाशौ' इति वाक्यजन्यशाब्द-बोधस्याप्रमात्वं न स्यात् किंतूद्देश्यतावच्छेदकव्याप्तिविशिष्टसमवायस्य सम्बन्धत्वमुच्यते व्याप्तिश्च तदभाववदवृत्तित्वं तथा चोद्देश्यतावच्छेदका-भाववदवृत्तिसमवायस्य सम्बन्धत्वं प्राप्तं समवायस्य चैकत्वात् 'आकाशौ' इत्यत्रोद्देश्यतावच्छेदकं यदाकाशत्वं तदभाववति घटादावपि वृत्तित्वात् समवाये उद्देश्यतावच्छेदकव्याप्यत्वमेव नास्तीत्याऽऽकाशत्वव्याप्तिविशिष्टसमवायेना-ऽऽकाशे द्वित्वासंभवात् 'आकाशौ' इति प्रतीतेः कथं प्रमात्वं स्यादित्याशङ्क्याह— उद्देश्यतावच्छेदकेति। अत्र दोषमाह— घटाविति, उद्देश्यतावच्छेदकव्याप्तिविशिष्टसमवायस्य सम्बन्धत्वस्वीकारे 'आकाशौ' इत्यादिप्रतीतेरप्रामाण्यवत् 'घटौ' इत्यादिप्रतीतेरप्यऽप्रामाण्यं स्यात् 'घटौ' इत्यत्रोद्देश्यतावच्छेदकं घटत्वं घटत्वव्याप्यत्वं च द्वित्वसमवाये नास्त्येव— द्वित्वसमवायस्य घटत्वाभाववत पटादावपि सत्त्वादिति घटत्वव्याप्यसमवाय-

न चोद्देश्यतावच्छेदकव्याप्यद्वित्वादिसमवायत्वेनैव संबन्धतास्तु द्वित्वादिसमवायस्य घटत्वाद्यव्याप्यत्वेऽपि द्वित्वादेस्तद्व्याप्यतया न 'घटौ' इत्यादेरप्रमाणतेति वाच्यम्, एवं सति तथाविधद्वित्वादेरेव लाघवेन द्वित्वादिसंबन्धतौचित्यात्।

अथास्त्वेवमेव तावतापि पर्याप्तिसंबन्धस्य विलयादिति

स्यालीकत्वेन तेन सम्बन्धेन घटेऽपि द्वित्वासम्भवात् 'घटौ' इति वाक्यजन्यशाब्दबोधस्याप्यऽप्रामाण्यं स्यात् तत्तु नेष्टमित्यर्थः। द्वित्वसमवायस्य घटत्वाव्याप्यत्वं स्वयमेवोपपादयति– समवायस्यैक्येनेति।

ननूद्देश्यतावच्छेदकव्याप्यं यद् द्वित्वं तादृशद्वित्वसमवायस्यैव सम्बन्धत्वमुच्यते तथा च द्वित्वसमवायस्यैकत्वेन घटत्वाभाववति पटादौ वृत्तित्वेन घटत्वाव्याप्यत्वेऽपि द्वित्वस्य तु घटत्वव्याप्यत्वं सम्भवत्येव द्वित्वव्यक्तीनामधिकरणभेदेन भिन्नत्वात् प्रत्येकघटद्विकवृत्तिद्वित्वव्यक्तीनां घटत्वव्याप्यत्वात् तथा च घटत्वव्याप्यद्वित्वस्य घटसत्त्वात् समवायस्याप्येकत्वेन घटे सत्त्वात् 'घटौ' इति प्रतीतेः प्रमात्वेनाऽप्रामाण्यं न सम्भवति, आकाशे च समवायस्याप्येकत्वेन सत्त्वेऽपि द्वित्वे आकाशत्वव्याप्यत्वाभावेन तादृशद्वित्वासम्भवात् 'आकाशौ' इति प्रतीतेः प्रमात्वं न सम्भवतीत्याशङ्क्याह– न चेति। परिहारहेतुमाह– एवं सतीति, एवं सति=उद्देश्यतावच्छेदकव्याप्यत्वस्य द्वित्वविशेषणत्वे सति, उद्देश्यतावच्छेदकव्याप्यद्वित्वसमवायस्य सम्बन्धत्वापेक्षया लाघवात् तथाविधद्वित्वादेः=उद्देश्यतावच्छेदकव्याप्यद्वित्वस्यैव (अर्थात् स्वरूपस्यैव) द्वित्वसम्बन्धत्वं युक्तं प्रथमसम्बन्धस्वरूपे समवायप्रवेशेन गौरवाद् उद्देश्यतावच्छेदकव्याप्यद्वित्वस्य च सम्बन्धत्वे समवायाऽप्रवेशेन लाघवात्, तथा च घटे द्वित्वसम्बन्धभूतस्य घटत्वव्याप्यद्वित्वस्य सत्त्वात् 'घटौ' इति प्रतीतेर्नाऽप्रमात्वं आकाशे द्वित्वाभावादाकाशत्वव्याप्यत्वस्य च द्वित्वेऽभावाद् द्वित्वसम्बन्धभूतस्याऽऽकाशत्वव्याप्यद्वित्वस्यालीकत्वेनाकाशेऽसंभवात् 'आकाशौ' इति प्रतीतेरप्रमात्वं सूपपादमेवेत्यर्थः।

नन्वस्त्वेवमेव=उद्देश्यतावच्छेदकव्याप्यद्वित्वस्यैव (स्वरूपस्यैव)

चेत्?, न– द्वित्वादिस्वरूपस्यैव द्वित्वादिपर्याप्ततयाऽभिमत-सिद्धेः। उक्तं च दीधितिकृता–"पर्याप्तिश्च 'अयमेको घट इमौ द्वौ' इत्यादिप्रतीतिसाक्षिकः स्वरूपसंबन्धविशेषः" इति। समवायस्य नानात्वमते च द्वित्वादिसमवाय एव तत्पर्याप्तिर्न तु स्वरूपमतिरिक्तपदार्थो वेत्यन्यदेतत्।

यत्तु 'आकाशं न द्वे' इत्यादिप्रतीतिवत् 'आकाशं न द्वित्ववत्' इति प्रतीतेः प्रमात्वस्य वारणाय समवायेन

सम्बन्धत्वमस्तु तावतापि=उद्देश्यतावच्छेदकव्याप्यद्वित्वस्य सम्बन्धत्व-स्वीकारेणापि पर्याप्तेस्तु सम्बन्धत्वं नष्टमेवेत्यभ्युपगम्य शङ्कते– अथेति। परिहरति– नेति। द्वित्वादीति– उद्देश्यतावच्छेदकव्याप्यद्वित्वस्वरूपैव द्वित्वपर्याप्तिरस्ति द्वित्वस्वरूपस्य सम्बन्धत्वे स्वीकृते च पर्याप्तेः सम्बन्धत्वं स्वीकृतमेवेति सिद्धं नः समीहितमित्यर्थः। ननु द्वित्वस्वरूपस्य द्वित्वपर्याप्तित्वं कथं स्यादित्याशङ्क्यात्र प्रमाणमाह– उक्तं चेति, 'अयमेको घट इमौ द्वौ' इति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः='अयमेको घटः' इत्यत्रैकत्वस्वरूप-मेवैकत्वपर्याप्तिः 'इमौ द्वौ' इत्यत्र द्वित्वस्वरूपमेव द्वित्वपर्याप्तिस्तथा 'घटाः' इत्यत्र बहुत्वस्वरूपमेव बहुत्वपर्याप्तिः, तथा च 'घटः' इत्यादावेकत्वादीनां स्वरूपेणैव पर्याप्तिरूपेण घटादौ प्रतीयमानत्वादेकत्वादिस्वरूपेनेवैकत्वादि-पर्याप्तिरित्यर्थः। यदा च समवायस्य नानात्वं स्वीक्रियते तदा द्वित्वादिसमवाय एव द्वित्वादिपर्याप्तिर्न तु द्वित्वादिस्वरूपं पर्याप्तिः द्वित्वादिसमवायातिरिक्तपदार्थो वा पर्याप्तिः, समवायस्य नानात्वेन द्वित्वादिसमवायस्यापि द्वित्वादिसम्बन्धत्व-स्वीकारे 'आकाशौ' इति प्रतीतेरप्रमात्वस्य 'घटौ' इति प्रतीतेः प्रमात्वस्य च सूपपादत्वात् तथा हि समवायस्य नानात्वेन द्वित्वसमवायस्याकाशेऽसत्त्वात् समवायेन द्वित्वस्याप्यसत्त्वाच्च 'आकाशौ' इति प्रतीतेराकाशानुयोगिक-द्वित्वावगाहिन्या अप्रमात्वमेव, घटे च द्वित्वसमवायद्वित्वयोः सत्त्वात् 'घटौ' इति प्रतीतेर्घटानुयोगिकद्वित्वावगाहिन्याः प्रमात्वमेवेत्यभिप्रायेणाह– समवाय-स्येति। अन्यदेतत्=अत्रैतद्विचारापेक्षा नास्तीत्यर्थः।

पर्याप्त्याख्यसम्बन्धसिद्ध्यर्थमन्योक्तयुक्त्यन्तरं परिहारायानुवदति– यत्त्विति। आकाशद्वयाभावेन 'आकाशं न द्वे' इति प्रतीतिर्भवति तस्याः

द्वित्वादिमद्भेद आकाशत्वावच्छेदेन न स्वीकर्तव्यः, तथा च पर्याप्तेरविलक्षणत्वे 'आकाशं न द्वे' इत्यादिप्रतीतेरप्यऽप्रमात्वापत्तिरिति, तन्न– 'आकाशं न द्वित्ववत्' इति

प्रमात्वमपीष्टमस्ति, घटाकाशोभयगतद्वित्वस्याकाशेऽपि सत्त्वेन तेन द्वित्वेनाकाशस्यापि द्वित्ववत्त्वात् 'आकाशं न द्वित्ववत्' इति प्रतीतिर्न भवति तस्याः प्रमात्वमपीष्टं नास्तीति सिद्धान्तः। किं च 'आकाशं न द्वे' इत्यनेनापि द्वित्वावच्छिन्नभेद एव प्रतिपाद्यते तथा 'आकाशं न द्वित्ववत्' इत्यनेनापि द्वित्वावच्छिन्नभेद एव प्रतिपाद्यते इति प्रतीयते इत्युभयोरपि वाक्योस्तज्जन्यप्रतीत्योश्च साम्यमेव। तत्र यदि द्वित्वसम्बन्धः समवाय एव स्यात्तदा समवायस्यैकत्वेन द्वित्वसमवायस्याप्याकाशे सत्त्वाद् घटाकाशोभयगतद्वित्वस्याप्याकाशेऽपि सत्त्वादेवाकाशे 'आकाशं द्वित्ववन्न' इत्याकारकस्य द्वित्वावच्छिन्नभेदस्याऽसत्त्वाद् द्वित्वावच्छिन्नभेदबोधकस्य 'आकाशं न द्वित्ववत्' इति वाक्यस्य यथा ह्यऽप्रामाण्यं स्यात् (असद्बोधकत्वात्) तथा 'आकाशं न द्वे' इति वाक्यस्याप्यऽप्रामाण्यं स्यादेव– उभयोर्वाक्ययोः समानार्थत्वात्, न च 'आकाशं न द्वे' इत्यस्याऽप्रामाण्यमिष्टम्, स्वयमप्येतद्वदति– तथा चेत्यादिना। यदि चैतद्दोषपरिहाराय पर्याप्तेरेव द्वित्वसम्बन्धत्वं स्वीक्रियते तदा घटाकाशोभयगतद्वित्वस्याकाशे सत्त्वेऽपि सम्बन्धभूता घटाकाशोभयगतद्वित्वपर्याप्तिस्तु घटाकाशोभयस्मिन्नेव सम्भवति न तु केवलाकाशेऽपीति तादृशपर्याप्तिसम्बन्धेनाकाशे द्वित्वाभावेन द्वित्वावच्छिन्नभेदस्यापि (द्वित्ववन्नेति भेदस्यापि) सत्त्वात् तद्बोधकस्य 'आकाशं न द्वे' इति वाक्यस्य यथा हि प्रामाण्यं स्यात्तथा आकाशं न द्वित्ववत्' इति वाक्यस्य तज्जन्यप्रतीतेश्चापि प्रामाण्यं स्यादेव– उभयोर्वाक्ययोस्तज्जन्यप्रतीत्योश्च विशेषाभावात् (द्वित्वावच्छिन्नभेदविषयकत्वेन समानत्वात्)। न च 'आकाशं न द्वित्ववत्' इति प्रतीतेः प्रमात्वमिष्टमिति तस्याः प्रमात्वस्य वारणाय 'आकाशं न द्वित्ववत्' इत्यत्राकाशे समवायेन द्वित्वादिमद्भेदः= द्वित्वावच्छिन्नभेदो न स्वीकर्तव्यस्तथा च 'आकाशं न द्वित्ववत्' इति वाक्यस्याकाशे समवायेन द्वित्वावच्छिन्नभेदबोधकत्वस्वीकाराद् आकाशे च द्वित्वसमवायस्य घटाकाशोभयगतद्वित्वस्यापि च सत्त्वेन समवायेन द्वित्वावच्छिन्नभेदस्याऽसत्त्वादऽसतो द्वित्वावच्छिन्नभेदस्य बोधकत्वाद–

प्रतीतौ द्वित्वसमवायावच्छिन्नभेद एव विषयो मतुपा संबन्ध्युल्लेखात् न तु द्वित्वावच्छिन्नभेदः, एवं चाकाशत्वाद्य-

---

प्रामाण्यमुपपद्यते। घटाकाशोभयगतद्वित्वस्याकाशे सत्त्वेऽपि द्वित्वपर्याप्तेर्घटाकाशोभयत्रैव सम्भवात् केवलाकाशे चासम्भवात् पर्याप्तिसम्बन्धेन केवलाकाशे द्वित्वस्यासम्भवेन द्वित्वावच्छिन्नभेदस्य स्वीकारात् तादृशद्वित्वावच्छिन्नभेदस्य सतो बोधकत्वात् 'आकाशं न द्वे' इति वाक्यस्य प्रामाण्यमप्युपपद्यते इति सम्बन्धभेदनोभयप्रतीत्योः प्रामाण्ययाऽप्रामाण्ययोर्व्यवस्था सम्भवतीत्यर्थः। अत्र 'आकाशं न द्वे' इति प्रतीतिवदिति व्यतिरेकी दृष्टान्तस्तथा च यथा 'आकाशं न द्वे' इति प्रतीतेः प्रमात्वं तथा 'आकाशं न द्वित्ववत्' इति-प्रतीतेरापद्यमानप्रमात्वस्य वारणायेत्यन्वयः।

यदि च पर्याप्तिर्द्वित्वस्वरूपा वा द्वित्वसमवायस्वरूपा वा स्यात्तद्विलक्षणा न स्यात्तदा समवायस्यैकत्वेन घटाकाशोभयगतद्वित्वसमवायस्याप्याकाशे सत्त्वाद् घटाकाशोभयगतद्वित्वस्यापि चाकाशे सत्त्वादेव 'आकाशं न द्वे' इतिप्रतीतेरसम्भवादप्रमात्वं स्यादेव, द्वित्वाद् द्वित्वसमवायाच्च विलक्षणायाः पर्याप्तेर्द्वित्व-सम्बन्धत्वे तु घटाकाशोभयगतद्वित्वस्याकाशे सत्त्वेऽपि घटाकाशोभयगतद्वित्व-पर्याप्तेस्तूभयत्वावच्छेदेनैव सम्भवेन केवलाकाशेऽसम्भवात् सम्बन्धाभावे सम्बन्धिप्रतीत्यसंभवाच्चाकाशे द्वित्वप्रतीतिर्न सम्भवतीति 'आकाशे न द्वे' इति द्वित्वावच्छिन्नभेदप्रतीतिस्तस्याः प्रमात्वं च सम्भवत्येवेति पर्याप्त्याख्य-सम्बन्धोऽवश्यं स्वीकर्तव्य इत्याह– तथा चेति। तथा च=समवायेन द्वित्वादि-मद्भेदस्याकाशत्वावच्छेदेनाऽस्वीकारे पर्याप्तेश्चाविलक्षणरूपत्वे 'आकाशं न द्वे' इत्यादिप्रतीतेरप्यऽप्रमात्वमापद्येत न चैतदिष्टमित्यर्थः।

परिहरति– तन्नेति, द्वित्वात् द्वित्वसमवायाच्च विलक्षणायाः पर्याप्तेः सम्बन्धत्वस्वीकारं विनापि समवायस्यैव द्वित्वसम्बन्धत्वस्वीकारेण 'आकाशं न द्वे' इति प्रतीतेः प्रमात्वम् 'आकाशं न द्वित्ववत्' इति प्रतीतेरप्रमात्वं चोपपादयितुं शक्यते इति भावः, तथा हि– 'आकाशं न द्वित्ववत्' इत्यत्र मतुपः संबन्ध्युपस्थापकत्वाद् द्वित्वसमवायवतः सम्बन्धिनो भेदो विषयोस्ति– आकाशं द्वित्वसमवायवद्भिन्नम् आकाशं द्वित्वसमवायवन्न) इति, न त्वत्र 'न द्वित्ववत्' इत्यनेन द्वित्वावच्छिन्नभेद (द्वित्ववन्नेति भेदः) प्रतिपाद्यते,

वच्छेदेन द्वित्वाद्यवच्छिन्नभेद एव स्वीकर्तव्यो न तु तत्संबन्धावच्छिन्नभेद इति 'आकाशं न द्वे' इतिप्रतीतेरप्रमात्वस्य 'आकाशं न द्वित्ववत्' इति प्रतीतेर्वा प्रमात्वस्य न प्रसङ्ग इति।

अथोद्देश्यतावच्छेदकव्याप्यपर्याप्तेर्द्वित्वसंबन्धत्वे 'धवखदिरौ छिनत्ति' इत्यादावुद्देश्यतावच्छेदकीभूतधवत्वखदिरत्वव्याप्यं द्वित्वादिद्वयमेव प्रत्येतव्यं न तु धवखदिरादिपर्याप्तद्वित्वादिकं तथा चैकैकधवखदिरादितात्पर्येण तथाप्रयोगानुपपत्तिरिति

'आकाशं न द्वे' इत्यत्र च द्वित्वावच्छिन्नभेद एव विषयः, उक्तप्रतीत्योः प्रमात्वाप्रमात्वयोरुपपत्यर्थं चाकाशत्वावच्छेदेनाकाशे द्वित्वावच्छिन्नभेदस्तु स्वीक्रियते तत्सम्बन्धावच्छिन्नभेदः=द्वित्वसमवायावच्छिन्नभेदः (आकाशं द्वित्वसमवायवद्भिन्नम्=द्वित्वसमवायवन्नेति भेदः) तु न स्वीक्रियते, तथा चाकाशे समवायेन द्वित्वावच्छिन्नभेदस्य स्वीकारान् तद्बोधकस्य 'आकाशं न द्वे' इति वाक्यस्य तज्जन्यप्रतीतेश्च प्रामाण्यमुपपद्यते एवेति न तदर्थं पर्याप्तिसम्बन्धस्वीकारापेक्षा। आकाशे द्वित्वसमवायावच्छिन्नभेदस्य चास्वीकारात् तद्बोधकस्य 'आकाशं न द्वित्ववत्' इति वाक्यस्य तज्जन्यप्रतीतेश्चाऽप्रामाण्यमप्युपपद्यते, द्वित्वसमवायस्यैकत्वादाकाशत्वावच्छेदेनापि सत्त्वेनाकाशस्य द्वित्वसमवायवत्त्वादेव द्वित्वसमवायवद्भिन्नत्वाभावाद् द्वित्वसमवायवद्भेदबोधकस्य 'आकाशं न द्वित्ववत्' इति वाक्यस्य तज्जन्यप्रतीतेश्च प्रामाण्यप्रसक्तेर्न संभवः। तथा च विलक्षणपर्याप्तेः सम्बन्धत्वास्वीकारेऽपि 'आकाशं न द्वे' इति प्रतीतेरप्रमात्वप्रसङ्गो नास्त्येव प्रमात्वस्यैवोपपादितत्वात्, 'आकाशं न द्वित्ववत्' इति प्रतीतेश्च प्रमात्वप्रसङ्गोपि नास्त्येव– अप्रमात्वस्यैवोपपादितत्वात्, 'आकाशं न द्वित्ववत्' इति प्रतीतेश्च प्रमात्वप्रसङ्गोपि नास्त्येव– अप्रमात्वस्यैवोपपादितत्वादिति सर्वं सुस्थमिति न द्वित्वाद् द्वित्वसमवायाच्च विलक्षणायाः पर्याप्तेः सम्बन्धत्वस्वीकारापेक्षेत्वर्थः।

ननु त्वया "उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेरेव संसर्गतोपगमात् (पृ. १३७)" इत्यनेनोद्देश्यतावच्छेदकव्याप्यपर्याप्तेर्द्वित्वसम्बन्धत्वमुक्तं तत्रोद्देश्यतावच्छेदकव्याप्यपर्याप्तेर्द्वित्वसम्बन्धत्वे 'धवखदिरौ छिनत्ति' इत्यत्रोद्देश्यतावच्छेदकं धवत्वं न खदिरत्वं चेति धवत्वव्याप्यपर्याप्तिसम्बन्धेनैकस्य

द्वित्वान्वयितावच्छेदकमपेक्षाबुद्धिविशेषविषयत्वादिरूपमुभयादिनिष्ठं साहित्यं द्वन्द्वसमासार्थो वाच्यस्तथा च मीमांसकमतप्रवेश इति चेत्?, न– यत्रैकधर्मस्य द्वित्वाद्युद्देश्यतावच्छेदकता तत्रैवोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेः संसर्गतानियमः। यत्र धर्मद्वयादेस्तथात्वं तत्र केवला पर्याप्तिः

द्वित्वस्य धवेऽन्वयो भविष्यति खदिरत्वव्याप्यपर्याप्तिसम्बन्धेन चापरस्य द्वित्वस्य खदिरेऽन्वयो भविष्यतीति 'धवखदिरौ' इत्यत्र प्रकारतया द्वित्वद्वयस्य भानं प्राप्तं धवत्वखदिरत्वयोरुभयोरेवोद्देश्यतावच्छेदकत्वेन साम्याद् धवत्वव्याप्यपर्याप्तिसम्बन्धेन धवातिरिक्ते खदिरादौ द्वित्वान्वयासम्भवात् खदिरत्वव्याप्यपर्याप्तिसम्बन्धेन च खदिरातिरिक्ते धवादौ द्वित्वान्वयासंभवाच्च न धवखदिरोभयपर्याप्तमेकं द्वित्वं प्रत्येतुं शक्यते युक्त्यभावात्, तथा चैकैकधवखदिरादितात्पर्येण तथाप्रयोगस्य='धवखदिरौ' इति प्रयोगस्योपपत्तिर्न स्यादेव किं तु धवद्वयखदिरद्वयतात्पर्येणैव 'धवखदिरौ' इति प्रयोगो भविष्यति– उक्तयुक्त्या द्वित्वस्य प्रत्येकं धवखदिरयोः प्रतीत्यापत्तेः, न चैवमस्ति किन्त्वेकैकधवखदिरतात्पर्येणैव 'धवखदिरौ' इति प्रयोग इष्ट इति तदुपपत्त्यर्थं यदि द्विवचनार्थस्य द्वित्वस्यान्वयितावच्छेदकस्वरूपं तथा 'इमौ द्वौ' इत्याकारकापेक्षाबुद्धिविशेषविषयत्वरूपं (साहित्यस्यापेक्षाबुद्धिविषयत्वादेव) धवखदिरोभयपदार्थनिष्ठं यत् साहित्यं (एकक्रियान्वयित्वरूपम्) तदेव 'धवखदिरौ' इत्यादौ द्वन्द्वसमासार्थः स्वीकर्तव्यः एवं हि द्वित्वान्वयितावच्छेदकत्वादुदेश्यतावच्छेदकं साहित्यमेवेति प्राप्तं साहित्यं च धवखदिरोभयपर्याप्तमेव न तु प्रत्येकं धवखदिरयोरित्युद्देश्यतावच्छेदकीभूतसाहित्यव्याप्यपर्याप्तिसम्बन्धेन द्वित्वस्य धवखदिरोभये एवाऽन्वयसम्भवादेकैकधवखदिरतात्पर्येण 'धवखदिरौ' इति प्रयोगोपपत्तेरेकमेवोभयगतं द्वित्वं प्रतीतं भविष्यति न द्वित्वद्वयप्रतीत्यापत्तिरित्युच्यते तदा मीमांसकमतप्रवेशः स्वादित्याशङ्कते– अथेति। परिहरति– नेति यत्रैकेति। यत्रैकस्यैव धर्मस्य द्वित्वोद्देश्यतावच्छेदकत्वं भवति तत्रैवोद्देश्यतावच्छेदकव्याप्यपर्याप्तेर्द्वित्वसम्बन्धत्वं स्वीक्रियते यथा 'घटौ' इत्यादौ, यत्र च 'धवखदिरौ' इत्यादौ धर्मद्वयस्य तथात्वम्=उद्देश्यतावच्छेदकत्वं भवति तत्र तु शुद्धपर्याप्तेः समवायस्य वा द्वित्वसम्बन्धत्वं स्वीक्रियते न तूद्देश्यतावच्छेदकव्याप्यपर्याप्तेः तत्र द्वित्वपर्याप्तावुद्देश्यता–

समवाय एव वा संसर्ग इत्युपगमाद् विनैव साहित्य-स्यान्वयितावच्छेदकतामेकैकतात्पर्येण 'धवखदिरौ' इत्यादिप्रयोगोपपत्तेः।

न चैवमेकैकधवखदिरादितात्पर्येण 'धवौ' 'खदिरौ' इत्यादिप्रयोगापत्तिः तादृशवाक्यद्वयविषयकसमूहालम्बन-जन्यसमूहालम्बनशाब्दबोधस्य नानाधर्मावच्छिन्नोद्देश्यताकतया शुद्धपर्याप्तेरपि संसर्गतयाऽवगाहनसंभवादिति वाच्यम्, यत्र

वच्छेदकव्याप्यत्वस्यासम्भवात् तथा हि– उद्देश्यतावच्छेदकं ह्यत्र धवत्वं खदिरत्वं च व्याप्यत्वं च तद्वदन्यावृत्तित्वं द्वित्वपर्याप्तेश्चात्र धवत्ववदन्यस्मिन् खदिरेऽपि सत्त्वान्न धवत्वव्याप्यत्वं तथा खदिरत्ववदन्यस्मिन् धवेऽपि सत्त्वान्न खदिरत्वव्याप्यत्वमिति 'धवखदिरौ' इत्यादौ शुद्धाया एव पर्याप्तेः समवायस्य वा द्वित्वादिसम्बन्धत्वं स्वीक्रियते तथा च 'घटौ' इत्यत्रोद्देश्यता-वच्छेदकीभूतस्य घटत्वस्यैकत्वात् तद्व्याप्यपर्याप्तिसम्बन्धेन घटद्वये एकस्यैव द्वित्वस्यान्वयः प्रतीतिश्च सम्भवति, 'धवखदिरौ' इत्यत्र च धवत्वखदिर-त्वोभयस्योद्देश्यतावच्छेदकत्वाद् द्वित्वसम्बन्धभूतपर्याप्तावुद्देश्यतावच्छेदक-व्याप्यत्वविशेषणराहित्याच्च साहित्यस्य द्वित्वान्वयितावच्छेदकत्वाश्रयणं विनापि केवलपर्याप्तिसम्बन्धेन या समवायसम्बन्धेन वैकस्य द्वित्वस्य धवखदिरयोरु-भयोरन्वये विरोधाभावादेकैकधवखदिरतात्पर्येण 'धवखदिरौ' इति प्रयोगे न काचिदनुपपत्तिर्न वा मीमांसकमतप्रवेश इत्यर्थः।

ननु यत्रोद्देश्यता नानाधर्मावच्छिन्ना स्यादर्थादुद्देश्यतावच्छेदकं धर्मद्वयं धर्मत्रयादिकं वा स्यात्तत्र यदि शुद्धपर्याप्तेर्द्वित्वसम्बन्धत्वं स्वीक्रियते तदा तादृशवाक्यद्वय='धवौ' 'खदिरौ' इत्येतादृशवाक्यद्वयविषयकेन समूहालम्बनेन= समूहालम्बनात्मकश्रावणप्रत्यक्षेण जन्यो यो धवविशेष्यकखदिरविशेष्यक-शाब्दबोधस्तस्मिन् उद्देश्यतावच्छेदकत्वेन धवत्वखदिरत्वैतद्धर्मद्वयस्य भानाद् द्वित्वसम्बन्धत्वं शुद्धपर्याप्तेः प्राप्तं तथा च तादृशशुद्धपर्याप्तिसम्बन्धेन प्रत्येकं धवखदिरयोर्द्वित्वान्वयसंभवादेकधवैकखदिरतात्पर्येणापि 'धवौ' 'खदिरौ' इति प्रयोगः स्यादेव प्रत्येकं धवादौ द्वित्वस्य तत्सम्बन्धभूतपर्याप्तेश्च सत्त्वादेव न चैतदिष्टमित्याशङ्क्याह– न चैवमिति। परिहारमाह– यत्रेति,

नानाधर्मावच्छिन्नविशेष्यतानिरूपिता एकैव द्वित्वादिप्रकारता तत्रैव शुद्धायाः पर्याप्तेः समवायस्य वा संसर्गतया भानात्। 'धवौ' 'खदिरौ' इत्यादिनानावाक्यजन्यसमूहालम्बनशाब्दबोधे विशेष्यताभेदेन प्रकारताभेदादुद्देश्यतावच्छेदकधवत्वादि-

---

यत्र नानाधर्मावच्छिन्नविशेष्यतानिरूपिता एका द्वित्वादिनिष्ठा प्रकारता भवति तत्रैव शुद्धायाः (उद्देश्यतावच्छेदकव्याप्यत्वविशेषणरहितायाः) पर्याप्तेः समवायस्य वा द्वित्वादिसंबन्धत्वं स्वीक्रियते यथा– 'धवखदिरौ' इत्यत्र धवत्वखदिरत्वरूपानामा (उभय) धर्मावच्छिन्ना या धवखदिरनिष्ठा विशेष्यता तादृशविशेष्यतानिरूपिता एका द्वित्वनिष्ठा प्रकारतास्तीति तत्र शुद्धपर्याप्तेः समवायस्य वा सम्बन्धत्वं स्वीक्रियते (शेषं पूर्ववत्) 'धवौ' 'खदिरौ' इत्यत्र तु एतादृशवाक्यद्वयजन्यसमूहालम्बनात्मकशाब्दबोधे धवे धवपदोत्तर-द्विवचनार्थद्वित्वनिरूपिता विशेष्यता पृथग् भासते खदिरे च खदिरपदोत्तर-वर्तमानद्विवचनार्थद्वित्वनिरूपिता विशेष्यता पृथग् भासते विशेष्यताभेदेन च धवनिष्ठविशेष्यतानिरूपिता एकद्वित्वनिष्ठा प्रकारता भिन्नास्ति खदिरनिष्ठ-विशेष्यतानिरूपिताऽपरद्वित्वनिष्ठा प्रकारता भिन्नास्तीति प्रकारतया अनेकत्वे-नैकत्वाभावान्नात्र शुद्धपर्याप्तेः समवायस्य वा द्वित्वसम्बन्धत्वं स्वीक्रियते किंतूद्देश्यतावच्छेदकव्याप्यपर्याप्तेरेव सम्बन्धत्वं स्वीक्रियते तथा च 'धवौ' 'खदिरौ' इत्यादिनानावाक्यजन्यसमूहालम्बनशाब्दबोधे धवत्वमप्युद्देश्यता-वच्छेदकमस्ति खदिरत्वमप्युद्देश्यतावच्छेदकमस्ति धवत्वव्याप्यद्वित्वपर्याप्तिश्च धवद्वये एव संभवति न त्वेकस्मिन् धवे इत्येकस्मिन् धवे धवद्वयगतद्वित्वस्य संभवेऽपि सम्बन्धभूताया द्वित्वपर्याप्तेरसंभवात् सम्बन्धाभावे च सम्बन्धि (द्वित्व) प्रतीत्यसंभवादेकधवतात्पर्येण 'धवौ' इति प्रयोगापत्तिर्नास्त्येव, एवमेकखदिरतात्पर्येण 'खदिरौ' इति प्रयोगापत्तिर्नास्त्येवेत्येकैकधवखदिरादि-तात्पर्येण तथाप्रयोगासम्भवात्='धवौ' 'खदिरौ' इति प्रयोगासम्भवान्न कोपि दोष इत्यर्थः। धवद्वये च द्वित्वमप्यस्ति धवत्वव्याप्यद्वित्वपर्याप्तिरप्यस्त्येवेति धवद्वयतात्पर्येण 'धवौ' इति प्रयोग उपपद्यते। एवम् 'घटौ' इत्यादावपि बोध्यम्। धवखदिरोभयस्मिंश्च द्वित्वमप्यस्ति द्वित्वपर्याप्तिर्द्वित्वसमवायो वा द्वित्वसम्बन्धोप्यस्त्येवेत्येकैकधवखदिरतात्पर्येण 'धवखदिरौ' इति प्रयोगोप्युपपद्यते, धवखदिरोभयगतमद्वित्वस्य प्रत्येकं धवखदिरयोः सत्त्वेऽपि

व्याप्तिविशिष्टपर्याप्तेः संसर्गतानियमेनैकैकधवखदिरादितात्पर्येण तथाप्रयोगासंभवात्।

'धवखदिरौ' इत्यादिसमासोत्तरद्विवचनेन धवत्वखदिरत्वाद्यवच्छिन्ननानाविशेष्यतानिरूपितैकद्वित्वादिप्रकारताशालिज्ञानमेव जन्यते–तादृशवाक्यजन्यबोधस्य समूहालम्बनाऽनात्मकतया विशेष्यताभेदेन प्रकारताभेदाभावात्। यथा हि समूहालम्बनात्मके 'खड्गी चैत्रः कुण्डली' इत्याकारकनानाविशेषणकैकविशेष्यकज्ञाने नानाप्रकारतानिरूपिता एका विशेष्यता तथा तथाविधे 'धवखदिरौ' इत्याद्याकारके नानाविशेष्यकैकविशेषणकज्ञाने विशेष्यताभेदेऽप्यभिन्नैव द्वित्वादि-

---

द्वित्वपर्याप्तेरसत्त्वान्न प्रत्येकं द्वित्वप्रतीतिसम्भवः। किं वा द्वित्वस्यैव प्रत्येकं पर्याप्तत्वाभावान्न प्रत्येकं द्वित्वप्रतीतिसम्भव इत्यवधेयम्।

यदुक्तम्– "यत्र नानाधर्मावच्छिन्नविशेष्यतानिरूपिता एकैवद्वित्वादिप्रकारता तत्रैव शुद्धायाः पर्याप्तेः समवायस्य वा संसर्गतया भानात्" इति, तत्र नानाधर्मावच्छिन्नविशेष्यतानिरूपिता एका द्वित्वनिष्ठाप्रकारता क्वास्तीति जिज्ञासायामाह– धवखदिराविति, 'धवखदिरौ' इत्यत्र धवे पृथग् विशेष्यतास्ति खदिरे च पृथग् विशेष्यतास्ति तादृशविशेष्यताद्वयनिरूपिता प्रकारता तु द्विवचनार्थैकद्वित्वनिष्ठा एकैवास्तीत्यर्थः। अत्र हेतुमाह– तादृशेति, समूहालम्बनात्मकबोधे एव विशेष्यताभेदेन प्रकारताभेदो भवति यथा 'धवौ' 'खदिरौ' इत्यत्र। तादृशवाक्य='धवखदिरौ' इत्येतादृशवाक्यजन्यशाब्दबोधस्तु न समूहालम्बनात्मक इत्यत्र विशेष्यताभेदेऽपि प्रकारताभेदो न भवतीत्यर्थः। अत्र दृष्टान्तमाह– यथा हीति, यथा 'खड्गी कुण्डली चैत्रः' इत्यादौ समूहालम्बनाऽनात्मके बोधे नानाखड्गकुण्डलादिनिष्ठानां प्रकारतानां भेदेऽपि विशेष्यताभेदो न भवति किंत्वेकैव चैत्रनिष्ठा विशेष्यता भासते तथा तथाविधे=समूहालम्बनानात्मके 'धवखदिरौ' इत्याकारकवाक्यजन्यबोधेऽपि विशेष्यताभेदेऽपि प्रकारताभेदो न भवति किंत्वेकैवेकद्वित्वनिष्ठा प्रकारता भासते इत्यर्थः। विपक्षे बाधकमाह– अन्यथेति, यदि 'धवौ' 'खदिरौ'

प्रकारता, अन्यथा समूहालम्बनतस्तद्वैलक्षण्यानुपपत्तेः, समास-घटकधवखदिरादिपदानामेकवाक्यतानुपपत्तेश्च, तत्प्रयोज्य-

---

इत्याकारकसमूहालम्बनात्मकबोधे इव 'धवखदिरौ' इति बोधेऽपि विशेष्यताभेदेन प्रकारताभेदः स्यात्तदा 'धवौ' 'खदिरौ' इति सूहालम्बनात्मकस्य 'धवखदिरौ' इति समूहालम्बनानात्मकस्य च बोधस्य परस्परं किमपि वैलक्षण्यं न स्यादित्यर्थः। 'धवखदिरौ' इत्यत्र विशेष्यताभेदेऽपि प्रकारताभेदाभावे हेत्वन्तरमाह– समासेति, यद्यत्र विशेष्यताभेदेन प्रकारताभेदोऽपि स्यात्तदा धवखदिरपदयोः परस्परमेकवाक्यता न स्यात्, एकवाक्यताऽभावे च समासोऽपि न स्यादित्यर्थः। विशेष्यताभेदेन प्रकारताया भेदे एकवाक्यता कथं न भवतीति जिज्ञासायामेकवाक्यतास्वरूपमाह– तत्प्रयोज्येति, तथा हि– 'राजपुरुषः' इत्यत्र राजपदप्रयोज्यप्रकारताख्यविषयतया साक्षान्निरूपिता या पुरुषनिष्ठा विशेष्यताख्या विषयता=शाब्दबोधीयविषयता तत्प्रयोजकत्वं पुरुषपदेऽस्ति, एवं पुरुषपदप्रयोज्यविशेष्यताख्यविषयतया साक्षान्निरूपिता या राजनिष्ठा प्रकारताख्यविषयता तत्प्रयोजकत्वं राजपदेऽस्तीत्येतादृश-प्रयोज्यप्रयोजकभावरूपैकवाक्यतायाः सत्त्वात्समासो जातः, तत्राप्यत्र राजनिष्ठप्रकारतायाः पुरुषनिष्ठविशेष्यतायाश्च साक्षादेव परस्परं निरूप्यनिरूपकभावो विज्ञेयः। 'धवखदिरौ' इत्यत्र च धवपदप्रयोज्य-विशेष्यताख्यविषयतानिरूपिता खदिरपदप्रयोज्यविशेष्यताख्यविषयतानिरूपिता चैका द्विवचनोपस्थापितद्वित्वनिष्ठा प्रकारतास्तीति तादृशप्रकारतारूपपरम्परया वा द्वित्वरूपपरम्परया वा धवखदिरोभयनिष्ठविशेष्यतयोर्निरूप्यनिरूपक-भावोऽस्ति न तु धवः खदिरे वा खदिरो धवे वा विशेषणमस्ति येन साक्षान्निरूप्यनिरूपकभावः स्यात् किन्तु धवखदिरयोरेकस्मिन्नेव द्वित्वेऽन्वयोस्त्येतादृशपारम्परिकप्रयोज्यप्रयोजकभावरूपैकवाक्यतायाः सत्त्वादत्र समासो जातः। यद्यत्र धवनिष्ठविशेष्यतानिरूपिता द्वित्वनिष्ठा प्रकारता भिन्ना स्यात् खदिरनिष्ठविशेष्यतानिरूपित च द्वित्वनिष्ठा प्रकारता भिन्ना स्यात्तदा तादृशप्रकारतयोः परम्परात्वाभावात् परम्परायाप्युक्तप्रयोज्य-प्रयोजकभावो न स्यादित्येकवाक्यताया असत्त्वात् समासो न स्यादेव, भवति च समास इति धवखदिरोभयनिष्ठविशेष्यताद्वयनिरूपिता द्वित्वनिष्ठा एकैव प्रकारतास्तीति स्वीकार्यम्। तादृशद्वित्वनिष्ठप्रकारताया एकत्वे तु

विषयतया साक्षात् परम्परया वा निरूपिता या विषयता तत्प्रयोजकत्वस्यैव तदेकवाक्यतापदार्थत्वात्।

न चैतादृशैकवाक्यताविरहेऽपि क्षतिविरहः– तथा सति समासस्यैवानुपपत्तेः।

अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्' इत्यादौ राजपुरुष-

तादृशप्रकारतारूपपरम्परयाऽन्यतरपदप्रयोज्यविषयतानिरूपितविषयता-प्रयोजकत्वमन्यतरपदस्य सम्भवतीति सम्भवत्येकववाक्यतेत्यर्थः।

अत्र च "'धवखदिरौ' इत्यत्र तत्प्रयोज्या=धवपदप्रयोज्या या धवपद-ज्ञानजन्यधवपदार्थोपस्थितिजन्यधवखदिराविति शाब्दबोधनिरूपितधवपदार्थनिष्ठ-विशेष्यता तया परम्परया निरूपिता या द्वित्वनिष्ठा प्रकारताख्यविषयता तत्प्रयोजकत्वस्य खदिरपदनिष्ठस्यैव तदेकवाक्यतापदार्थत्वात्=धवपदैक-वाक्यतापदार्थत्वात्, धवपदजन्यधवोपस्थितिजन्यधवखदिरशाब्दबोधनिरूपित-धवनिष्ठविशेष्यतानिरूपितद्वित्वनिष्ठप्रकारतानिरूपितशाब्दबोधीयखदिरनिष्ठ-विशेष्यताशालिशाब्दधीजनकखदिरोपस्थितिजनकत्वं खदिरपदे इति धवपदैक-वाक्यतापन्नं खदिरपदमेवेत्येवं रीत्या खदिरपदैकवाक्यतापन्नं धवपदमिति परस्परं धवखदिरपदयोरेकवाक्यत्वमित्यर्थः। एवम्– 'राजपुरुषः' इत्यत्र राजसम्बन्धी प्रकारः पुरुषो विशेष्यस्तत्र तत्प्रयोज्या=राजपदप्रयोज्या या राजपदजन्यराजसम्बन्ध्युपस्थितिजन्यशाब्दबोधीयराजसम्बन्धिनिष्ठा प्रकारता-ख्यविषयता तन्निरूपिता या पुरुषनिष्ठा विशेष्यताख्या साक्षाद्विषयता तत्प्रयोजकत्वम्=तन्निरूपकशाब्दबोधजनकपदार्थोपस्थितिजनकत्वरूपमेकवाक्यत्वं पुरुषपदे, एवं पुरुषपदप्रयोज्या पुरुषपदजन्यपदार्थोपस्थितिजन्यशाब्दबोधनिरूपिता पुरुषनिष्ठविशेष्यताख्यविषयता तन्निरूपिता या राजसम्बन्धिनिष्ठा प्रकारता तत्प्रयोजकत्वम्=तन्निरूपकशाब्दबोधजनकपदार्थोपस्थितिजनकत्वरूपमेकवाक्यत्वं राजपदे। तत्पदजन्यज्ञाननिरूपितत्वेन तत्पदप्रयोज्यत्वव्यवहारो विषयतायामिति बोध्यमित्यर्थः।" इति कृष्णंभट्टाः।

ननु 'धवखदिरौ' इत्यत्रोक्तस्वरूपैकवाक्यता मा भवतु विशेष्यताभेदेन प्रकारताभेदं तु स्वीकरिष्याम एव इत्याशङ्क्याह– न चेति। परिहारमाह– तथा सतीति, विशेष्यताभेदेन प्रकारताभेदस्वीकारे उक्तैकवाक्यता न भविष्यति

पदादीनां समासवारणाय समर्थपदयोरेव समासानुशासनात्, सामर्थ्यस्य च निरुक्तैकवाक्यतारूपत्वात्।

'जलपृथिव्योः स्नेहगन्धौ' इत्यादितोऽपि न 'जले स्नेहः

तथा सति=उक्तस्वरूपैकवाक्यताया अभावे च 'धवखदिरौ' इति समासो न भविष्यतीत्यत्रोक्तैकवाक्यता स्वीकार्या एकवाक्यतार्थं च विशेष्यता-भेदेऽप्यभिन्नैव द्वित्वनिष्ठा प्रकारता स्वीकार्येत्यर्थः। उक्तैकवाक्यत्वाभावे समासानुपपत्तौ प्रमाणमाह– अयमेतीति, यद्युक्तैकवाक्यता समासे कारणं न स्यात्तदा 'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्' इत्यत्रापि राजपदपुरुषपदयोः समासो भवेद् न च भवतीत्यत्र राजपदपुरुषपदयोः समासवारणाय समर्थानामेव पदानाम् "समर्थः पदविधिः" इत्यनेन समासानुशासनं कृतं सामर्थ्यं चोक्तैकवाक्यतारूपमेवेति समासकारणत्वेनोक्तैकवाक्यतायाः स्वीकार आवश्यक एवेत्यन्वयः। "सापेक्षमसमर्थवद् भवति" इति व्युत्पत्त्या 'अयमेति' इति वाक्यघटकराजपदपुरुषपदयोः समासे कृते तादृशराजपदस्य समासाघटक-पुत्रपदसापेक्षत्वेन पुरुषपदस्य च समासाघटकापसार्यतां पदसापेक्षत्वेना-ऽसमर्थत्वात्तयोः समासस्याऽसाधुत्वं स्यादिति तयोः समासापत्तिर्नास्ति, अन्यथा 'ऋद्धस्य राजमातङ्गाः' इत्यपि स्यात्, तत्रापि राजपदस्य समासाघटकऋद्धपद-सापेक्षत्वेनाऽसामर्थ्यात्समासाऽसाधुत्वम्। अत्र च "राजपदजन्यपदार्थोपस्थिति-जन्यशाब्दनिरूपितराजनिष्ठप्रकारताख्यविषयतानिरूपितसम्बन्धनिष्ठविशेष्यत्वा-भिन्नप्रकारतानिरूपितशाब्दबोधीयपुत्रनिष्ठविशेष्यताशालिशाब्दबोधजनकपुत्रोप-स्थितिजनकत्वरूपैकवाक्यत्वं पुत्रपदे एव न तु पुरुषपदेऽस्तीति भावः।" इतिकृष्णंभट्टाः। तथा च 'अयमेति' इत्युक्तवाक्यघटकराजपदपुरुषपदयो-रुक्तैकवाक्यत्वाभावादेव न समासापत्तिरित्यर्थः। एवम् 'धवखदिरौ' इत्यत्राप्युक्तद्वित्वनिष्ठप्रकारतया भेदे धवखदिरपदयोरुक्तैकवाक्यत्वाभावापत्त्या समासो न स्यादेव प्रकारताया एकत्वे तूक्तरीत्या तादृशैकप्रकारतापरम्परया ह्येकवाक्यत्वसम्भवात् सम्भवति समासः।

ननु यथा 'धवौ' 'खदिरौ' इत्यत्र वाक्यद्वयसत्त्वात्समूहालम्बनात्मको बोधस्तथा 'जलपृथिव्योः स्नेहगन्धौ' इत्यत्रापि वाक्यद्वयसत्त्वात् 'जले स्नेहः पृथिव्यां गन्धः' इत्याकारकसमूहालम्बनात्मक एव बोधो भविष्यतीत्याशङ्क्याह– जलेति। अत्रत्यसमूहालम्बनानात्मकबोधस्य स्वरूपमाह– किं त्विति।

पृथिव्यां गन्धः' इत्याकारकसमूहालम्बनबोधः किं तु तद्विलक्षणो द्वित्वादिनिष्ठैकप्रकारतानिरूपितजलत्वपृथिवीत्वाद्यवच्छिन्न-विशेष्यतात्मकप्रकारताद्वयनिरूपिताधेयत्वप्रकारतानिरूपितं यद्धर्मितावच्छेदकद्वित्वादिनिष्ठैकप्रकारतानिरूपकं स्नेहत्व-

तद्विलक्षणः=समूहालम्बनविलक्षणः। 'जलपृथिव्योः' इत्यत्र सप्तम्यर्थ आधेयत्वं द्विवचनार्थश्च द्वित्वं तच्च द्वित्वं जलपृथिव्युभयनिष्ठमेकमेव, द्वित्वे प्रकारता वर्तते, जलपृथिव्योश्च द्वित्वनिष्ठप्रकारतानिरूपितविशेष्यतापि वर्तते सप्त्म्यर्था-धेयत्वनिष्ठविशेष्यतानिरूपितप्रकारतापि वर्तते, आधेयत्वेऽपि जलपृथिवीनिष्ठ-प्रकारतानिरूपितविशेष्यतापि वर्तते स्नेहगन्धनिष्ठविशेष्यतानिरूपितप्रकारतापि वर्तते स्नेहगन्धौ इत्यत्र च द्वित्वनिष्ठप्रकारता स्नेहगन्धनिष्ठविशेष्यतानिरूपिता ज्ञेया, स्नेहगन्धोभयस्य धर्मितावच्छेदकमपि द्वित्वं उभयवृत्तित्वात् गन्धत्वादे-रुभयवृत्तित्वाभावादिति पदार्थः, तथा च जलनिष्ठविशेष्यतानिरूपिता पृथिवीनिष्ठविशेष्यतानिरूपिता चैकद्वित्वनिष्ठा एकैव प्रकारतास्ति न तु विशेष्यताभेदेन प्रकारताभेदस्तथा स्नेहनिष्ठविशेष्यतानिरूपिता गन्धनिष्ठ-विशेष्यतानिरूपिता च द्वित्वनिष्ठा एकैव प्रकारता न तु विशेष्यताभेदेन प्रकारताभेदोस्ति येनात्रत्यबोधस्य समूहालम्बनात्मकत्वं स्यात् तथा चोक्तैक-वाक्यतायाः सत्त्वादेव 'जलपृथिव्योः' इति 'स्नेहगन्धौ' इति च समासोऽपि जात इति भावः। वाक्यार्थबोधमाह– द्वित्वेति, द्वित्वनिष्ठप्रकारतानिरूपितजल-पृथिव्युभयवृत्तिविशेष्यता तादृशविशेष्यतासमानाधिकरणप्रकारतानिरूपिता-ऽऽधेयत्वनिष्ठविशेष्यता तादृशविशेष्यतासमानाधिकरणप्रकारतानिरूपितं तथा स्नेहगन्धपदोत्तरद्विवचनार्थद्वित्वनिष्ठप्रकारतानिरूपकं स्नेहगन्धोभयवृत्ति-विशेष्यताद्वयं यत्तद्वान् बोधो जायते इति न कुत्रापि समासे उक्तैकवाक्यताया भङ्गः=अभावः (व्यभिचारः) येनोक्तैकवाक्यतायाः समासं प्रति कारणत्वं न स्यात्, तथाचोक्तैकवाक्यतायाः समासकारणत्वे सिद्धे 'धवखदिरौ' इत्यादौ विशेष्यताभेदेन प्रकारताभेदस्वीकारे उक्तैकवाक्यता न स्याद् एकवाक्यताया अभावे च समासोऽपि न स्यादित्याह– अत इति। अत्र च "जलपृथिव्योः स्नेहगन्धावित्यत्र सप्तम्यर्थो द्वित्वमाधेयत्वं च तथा च जलपृथिवीवृत्तिद्वित्वादि-निष्ठैकप्रकारतानिरूपितं यज्जलत्वावच्छिन्नपृथिवीत्वावच्छिन्नविशेष्यता-द्वयात्मकप्रकारताद्वयं तन्निरूपिता या सप्तम्यर्थाधेयत्वनिष्ठविशेष्यतारूपप्रकारता

गन्धत्वाद्यवच्छिन्नविशेष्यताद्वयं तद्वानिति, अतो न कुत्राप्येकवाक्यताभङ्गः।

'चैत्रो मैत्रश्च गच्छतः' इत्यादावाख्यातार्थद्वित्वादिप्रकारेण भासमाने चैत्रमैत्रोभयादौ गमनाश्रयत्वाद्यन्वयेन निरुक्तैकवाक्यतासंभवेऽपि समासविधेर्विभाषाधिकारीयत्वादसमासः। तत्र विशेष्यताभेदभिन्नद्वित्वनिष्ठप्रकारताद्वयप्रतियोगी समूहालम्ब-

---

तन्निरूपितं यद्धर्मितावच्छेदकं द्वित्वादिनिष्ठैकप्रकारतानिरूपकं स्नेहत्वावच्छिन्नगन्धत्वावच्छिन्नविशेष्यताद्वयं तद्वान् स्नेहो गन्धश्चेति बोधः, द्वौ स्नेहगन्धौ जलपृथिव्युभयवर्तिनौ इति बोधाकारः" इतिकृष्णंभट्टाः।

ननु यदि यत्र विशेष्यताभेदेन प्रकारताभेदो न भवति तत्रोक्तैकवाक्यतायाः सत्त्वेन समासो भवति यथा 'धवखदिरौ' इत्यत्रेति नियमस्तदा 'चैत्रो मैत्रश्च गच्छतः' इत्यत्रापि चैत्रमैत्रनिष्ठविशेष्यत्वयोर्भेदेऽपि धातूत्तरद्विवचनार्थद्वित्वनिष्ठा प्रकारतात्वेकैवास्ति न तु भिन्नेति चैत्रनिष्ठविशेष्यतानिरूपितद्वित्वनिष्ठप्रकारता- निरूपितमैत्रनिष्ठविशेष्यतायाः सत्त्वाद् द्वित्वद्वारा चैत्रमैत्रयोः परस्परं प्रयोज्यप्रयोजकभावापन्नविषयताशालित्वेन धवखदिरौ इत्यत्रेव 'चैत्रो मैत्रश्च गच्छतः' इत्यत्र कथं न समासः? समासकारणीभूताया उक्तैकवाक्यतायाः सत्त्वादेवेत्याशङ्क्याह— चैत्रो मैत्रश्चेति, यद्यप्यत्रास्त्येकवाक्यता तथापि समासविधेर्वैकल्पिकत्वादेव नात्र समासः। एकवाक्यतायाः सत्त्वाच्च 'चैत्रमैत्रो गच्छतः' इति समासोऽप्येकपक्षे भवत्येवेत्यर्थः। द्वित्वादिप्रकारेणेति द्वित्वं प्रकारोऽत्रेति बहुव्रीहिसमासेन द्वित्वस्यैव चैत्रमैत्रोभयप्रकारत्वं ज्ञेयम्। ननु यत्र विशेष्यताभेदेऽपि प्रकारताभेदो न भवति तत्रोक्तैकवाक्यतायाः सत्त्वात्समासो भवत्येवेति नियमस्तादृशनियमपरिरक्षणाय च तत्र='चैत्रो मैत्रश्च गच्छतः' इत्यत्र विशेष्यताभेदेन द्वित्वनिष्ठप्रकारतापि भिन्नैव स्वीकार्या यथा— चैत्रनिष्ठविशेष्यतानिरूपिता द्वित्वनिष्ठा प्रकारता भिन्ना मैत्रनिष्ठविशेष्यतानिरूपिता च द्वित्वनिष्ठा प्रकारता भिन्नेति प्रकारतया अभेदो नास्त्येव येनात्रोक्तैकवाक्यता प्राप्नुयात् तया च समासः प्राप्नुयादित्याशङ्क्याह— तत्रेति। प्रतियोगी=सम्बन्धी (तद्वान्) तद्विषयक इति यावत् 'प्रतियोगी नाम निरूपकः' इत्यपि केचित्, 'चैत्रो मैत्रश्च गच्छतः' इत्यत्र विशेष्यताभेदेन

नात्मकबोध इति तु न सम्यक् तथा सत्युक्तयुक्त्या एकैकचैत्रमैत्रादितात्पर्येण तथाप्रयोगानुपपत्तेः।

आख्यातोपस्थापितद्वित्वादिकं चोभयादिरूपान्वयितावच्छेदकावच्छिन्ने एवान्वेति व्युत्पत्तिः, तेनोक्तप्रयोगदर्शनात् क्रियापदस्य विशेष्यवाचकपदसमानवचनकत्वाऽनियमेऽपि घटद्वयादितात्पर्येण 'घटस्तिष्ठतः' इत्यादयो न प्रयोगाः। एकवचनान्तं क्रियापदं च तादृशविशेष्यवाचकपदप्रयोगे एव

भिन्ना या द्वित्वनिष्ठा प्रकारता तादृशप्रकारताद्वयविषयकः समूहालम्बनात्मक एव बोधो जायते इत्यर्थः। परिहरति– तथासतीति, तथासति=विशेष्यताभेदेन द्वित्वनिष्ठप्रकारताया भेदे सति, उक्तयुक्त्या=अथोद्देश्यतावच्छेदक-व्याप्यपर्याप्तेः (१५० पृ.) इत्युक्त्या यद्यत्र विशेष्यताभेदेन द्वित्वनिष्ठा प्रकारतापि भिन्ना स्यात्तदा चैत्रमैत्रोभयविशेषणतयैकं द्वित्वं न प्रतीयेत किं तु चैत्रविशेषणतया पृथग् द्वित्वं प्रतीयेत मैत्रविशेषणतया च पृथग् द्वित्वं प्रतीयेत तथा च चैत्रद्वयमैत्रद्वयतात्पर्येणैव 'चैत्रो मैत्रश्च गच्छतः' इति प्रयोगः स्याद् एकैकचैत्रमैत्रतात्पर्येण च तथा प्रयोगो न स्यात् तत्तु नेष्टमित्यर्थः। तथाप्रयोगानुपपत्तेः='चैत्रो मैत्रश्च गच्छतः' इति प्रयोगानुपपत्तेः।

आख्यातेति– 'चैत्रो मैत्रश्च गच्छतः' इत्यादावाऽऽख्यातद्विवचनोपस्थितं द्वित्वं चैत्रत्वमैत्रत्वरूपं यदुभयं तदन्वयितावच्छेदकम्=धर्मितावच्छेदकं यदुभयत्वं च पदोपस्थाप्यं साहित्यं वा तदवच्छिन्ने चैत्रमैत्रद्वये एवान्वेतीति नियमः। "तेन" इत्यस्य "घटस्तिष्ठतः इत्यादयो न प्रयोगाः" इत्यनेनान्वयः। उक्तप्रयोगदर्शनात्='चैत्रो मैत्रश्च गच्छतः' इति प्रयोगदर्शनात्। अत्र च विशेष्यवाचकचैत्रमैत्रपदयोरेकवचनान्तत्वेऽपि क्रियापदस्य द्विवचनान्तत्वेन क्रियापदस्य विशेष्यवाचकपदसमानवचनकत्वाऽनियमेऽपि घटद्वयतात्पर्येण 'घटस्तिष्ठतः' इत्यादयो न प्रयोगा भवन्ति, 'तिष्ठतः' इत्याख्यातोपस्थाप्य-द्वित्वस्य घटद्वये एवान्वयसंभवात् 'घटः' इत्येकवचनान्तघटपदस्य घटद्वया-नुपस्थापकत्वादित्यर्थः। एकवचनान्तक्रियापदम् 'तिष्ठति' इत्यादिकं च तादृश=एकवचनान्तविशेष्यवाचकघटादिपदस्य प्रयोगे एव साधु भवतीति 'घटास्तिष्ठति' इत्यादयोऽपि न प्रयोगा भवन्ति। आख्यातोपस्थापितैक-

साधु अतः 'घटास्तिष्ठति' इत्यादयो न प्रयोगाः।

अथैकघटादिव्यक्तेरेतद्देशवृत्तितादशायाम् 'अत्र घटौ स्तः घटाः सन्ति' इति कथं न प्रयोगाः? घटादौ घटत्वादिव्याप्ति-विशिष्टपर्याप्तिसंबन्धेन द्वित्वादेः स्वरूपादिसंबन्धेनैतद्देशवृत्ति-त्वाश्रयत्वादेश्च सत्त्वात्।

न च द्वित्वेनोपस्थितयोर्द्वयोरेव व्यक्त्योरेवं बहुत्वेनो-पस्थितासु बहुषु व्यक्तिषु विधेयान्वयाद् व्यक्त्यन्तरेष्वेद-द्देशवृत्तित्वाश्रयत्वादिबाधान्न तादृश-प्रयोग इति वाच्यम्, व्यक्त्यन्तरेऽयोग्यतया तादृशविधेयानवगाहिन एकघटे तद-

---

त्वस्यैकव्यक्तावेवान्वयसम्भवात्।

नन्वेतद्देशे घटद्वयसत्त्वे 'अत्र घटौ स्तः' इति प्रयोगो भवति तत्कस्य हेतोः घटत्वव्याप्यपर्याप्तिसम्बन्धेन घटद्वये द्वित्वस्यापि सत्त्वात् क्रियापदबोध्य-स्यैतद्देशवृत्तित्वाश्रयत्वस्यापि सत्त्वाद् एतद्देशवृत्तित्वं घटेऽस्तीति तदाश्रयत्वमस्त्येव तथा चैतद्देशे एकघटसत्त्वेऽपि 'अत्र घटौ स्तः' अत्र घटाः सन्ति' इत्यादिप्रयोगः स्यादेव वर्तमाने एकस्मिन्नपि घटे स्वरूपसम्बन्धे-नैतद्देशवृत्तित्वाश्रयत्वस्यापि सत्त्वादेव घटत्वव्याप्यपर्याप्तिसम्बन्धेन च द्वित्वस्यापि सत्त्वादेव, देशान्तरस्थे एतद्देशस्थे च घटे मिलित्वा द्वित्वमस्त्येवेति तादृशोभयगतद्वित्वस्य प्रत्येकमपि घटे बाधाऽभावादित्याशङ्कते अथेति। एवम् 'अत्र घटाः सन्ति' इति प्रयोगापत्तिर्बहुत्वसत्त्वेन विज्ञेया।

ननु 'अत्र घटौ स्तः' इत्यत्र द्वित्वेनोपस्थितघटव्यक्तिद्वये एव विधेयस्य= एतद्देशवृत्तित्वाश्रयत्वस्यान्वयः स्वीक्रियते तथा चात्रैकघटव्यक्तेरेव सत्त्वाद् या खलु द्वितीया घटव्यक्तिर्देशान्तरे वर्तते तस्यामेतद्देशवृत्तित्वाश्रयत्वस्याभावादेव अर्थात् द्वित्वाश्रयीभूतैकव्यक्तावेतद्देशवृत्तित्वाश्रयत्वस्य सत्त्वेऽपि द्वित्वाश्रयी-भूतव्यक्तिद्वये एतद्देशवृत्तित्वाश्रयत्वस्य बाधादेवैकघटसत्त्वदशायां तादृशप्रयोगः= 'अत्र घटौ स्तः' इति प्रयोगो न भवतीत्याशङ्क्याह– न चेति। एवं अत्र 'घटाः सन्ति' इत्यादावपि बोध्यम्। द्वित्वेन बहुत्वेति तृतीयार्थः प्रकारत्वं द्वित्वप्रकारतया बहुत्वप्रकारतयेत्यर्थः। परिहारहेतुमाह– व्यक्त्यन्तरेति, यथा

वगाहिनो बोधस्योत्पत्तौ बाधकाभावात् तथातात्पर्येण तथा-प्रयोगस्य दुर्वारत्वात्।

न च व्यासज्यवृत्तिधर्मो यत्रान्वयितावच्छेदकस्तत्र यावत्स्वऽन्वयितावच्छेदकस्य पर्याप्तिस्तावतामेव पदार्थान्त-रेणान्वय इति व्युत्पत्तिस्तन्निर्वाहाय च तादृशधर्मावच्छिन्ने इतरान्वयबोधजनकसामग्र्या उभयादिविषयकपदार्थान्त-

---

ह्येकस्मिन् घटे नीलत्वाभावेऽप्यन्यस्मिन् नीलत्वसत्त्वे बाधो न भवति तथा प्रकृतेऽपि देशान्तरवृत्तिघटे एतद्देशवृत्तित्वाश्रयत्वस्य बाधेऽप्येतद्देशवृत्तिघटे त्वेतद्देशवृत्तित्वाश्रयत्वस्य विधेयस्यान्वये बाधो न सम्भवतीत्येकघट-सत्त्वदशायामपि 'अत्र घटौ स्तः' इति प्रयोगः स्यादेवेत्यर्थः। व्यक्त्यन्तरे=देशान्तरवृत्तिघटव्यक्तौ। देशान्तरवृत्तिव्यक्तौ चैतद्देशवृत्तित्वाश्रयत्वस्य योग्यता नास्ति विरोधात्। तादृशविधेयानवगाहिनः=एतद्देशवृत्तित्वाश्रयत्वरूपविधेयावगाहिनोऽपि, एकघटे=एतद्देशवृत्तिघटे, तदवगाहिनः=एतद्देशवृत्तित्वाश्रयत्वरूपविधेयाव-गाहिनो बोधस्योत्पत्तौ बाधकाभावात् तथातात्पर्येण=एतद्देशवर्तमानैकमात्रघटे एतद्देशवृत्तित्वाश्रयत्वबोधनतात्पर्येण तथाप्रयोगस्य='अत्र घटौ स्तः' इत्यादिप्रयोगस्य दुर्वारत्वादित्यन्वयः।

ननु यत्र व्यासज्यवृत्तिधर्मो द्वित्वादिकं धर्मितावच्छेदकं भवति तत्र यावतीषु व्यक्तिषु तस्य व्यासज्यवृत्तिधर्मितावच्छेदकस्यान्वयो भवति तावद्व्यक्तिष्वेव पदार्थान्तरस्यान्वयो भवति यथा 'नीलौ घटौ' इत्यत्र धर्मितावच्छेदकस्य व्यासज्यवृत्तिधर्मस्य द्वित्वस्य घटद्वयेऽन्वयो भवतीति पदार्थान्तरस्य नीलस्यापि घटद्वये एवान्वयो भवति न त्वेकस्मिन् घटे इति नियम एतादृशनियमनिर्वाहाय च तादृशधर्मावच्छिन्ने=व्यासज्यवृत्तिद्वित्वादि-धर्मावच्छिन्ने, इतरान्वयबोधस्य=एतद्देशवृत्तित्वाश्रयत्वान्वयबोधस्य, जनक-सामग्र्याः=अत्रेति सप्तम्यन्तसमभिव्याहृतद्विवचनान्तघटपदज्ञानजन्यपदार्थो-पस्थितिघटितयोग्यताज्ञानादिसामग्र्या उभयत्वावच्छिन्नघटद्वयविशेष्यकैतद्देश-वृत्तित्वाश्रयत्वरूपपदार्थान्तररान्वयबुद्धित्वमेव जन्यतावच्छेदकं वक्तव्यम्, अर्थादुक्तनियमनिर्वाहाय व्यासज्यवृत्तिद्वित्वादिधर्मावच्छिन्ने घटादिद्वयादौ य इतर पदार्थस्य=एतद्देशवृत्तित्वाश्रयत्वादेरन्वयस्तद्विषयको यो बोधस्तज्जनकसामग्र्या

रान्वयबुद्धित्वमेव जन्यतावच्छेदकं वक्तव्यमिति द्वित्वादिनैक-घटादिमात्रविषयकैतद्देशवृत्तित्वाद्यन्वयबोधो न संभवतीति न तादृशबोधतात्पर्येण तादृशप्रयोगापत्तिरिति वाच्यम्, योग्यता-

---

योग्यताज्ञानादिरूपया व्यासज्यवृत्तिद्वित्वादिधर्मावच्छिन्नघटद्वयादावेव पदार्थान्तरान्वयविषयको बोधो जायते इति स्वीकर्तव्यं तथा च व्यासज्यवृत्ति-द्वित्वादिधर्मावच्छिन्ने इतरान्वयबोधजनकसामग्र्या द्वित्वादिनैकघटविषयक एतद्देशवृत्तित्वाश्रयत्वान्वयबोधो न सम्भवति, अर्थात् एकघटव्यक्तौ उभयवृत्ति-द्वित्वस्य सत्त्वेऽप्येतद्देशवृत्तित्वाश्रयत्वस्यान्वयो न सम्भवति– एकघटव्यक्तौ द्वित्वस्य पर्याप्त्यभावाद् द्वित्वपर्याप्तिस्तु घटद्वये एवास्तीति घटद्वये एवैतद्देश-वृत्तित्वाश्रयत्वस्यान्वयः 'अत्र घटौ स्तः' इत्यत्र सम्भवतीति न तादृशतात्पर्येण= एतद्देशवर्तमानैकमात्रघटे एतद्देशवृत्तित्वाश्रयत्वबोधनतात्पर्येण एतद्देशे एकमात्रघटसत्त्वदशायामिति यावत् तथाप्रयोगापत्तिः='अत्र घटौ स्तः' इति प्रयोगापत्तिरित्याशङ्क्याह–न चेति। अत्र च "द्वित्वादिनैकघटादि-मात्रविषयकैतद्देशवृत्तित्वाद्यन्वयबोधो न संभवतीति– उभयत्वावच्छिन्न-घटद्वयविशेष्यकैतद्देशवृत्तित्वप्रकारकान्वयबुद्धित्वरूपमुक्तसामग्रीकार्यता-वच्छेदकमुभयत्वावच्छिन्नोभयविशेष्यकैतद्देशवृत्तित्वप्रकारिकायाम् 'अत्र घटौ स्तः' इत्याकारकबुद्धावेवास्ति न तु 'अत्र घटौ स्तः' इत्याकारकद्वित्वविशिष्टैक-घटमात्रविषयकैतद्देशवृत्तित्वप्रकारकान्वयबोधेऽस्त्यत उक्तसामग्रीबलात् कार्यतावच्छेदकानाक्रान्तद्वित्वविशिष्टैकघटमात्रविषयकैतद्देशवृत्तित्वप्रकारको बोध आपादयितुं न शक्यते इति तादृशबोधतात्पर्येण=द्वित्वविशिष्टैकघटमात्र-विशेष्यकैतद्देशवृत्तित्वप्रकारकबोधः 'अत्र घटौ स्तः' इति वाक्याज्जायतामिति तात्पर्येण न तादृशप्रयोगापत्तिः= 'अत्र घटौ स्तः' इति प्रयोगापत्तिः" इति कृष्णंभट्टाः। परिहरति– योग्यताभ्रमेणेति, 'आकाशौ द्वौ' इत्याकारकभ्रमे जाते यदा योग्यताभ्रमेण 'अत्राकाशौ स्तः' इति वाक्यमुच्चार्यते तदाऽन्वयिता-वच्छेदकव्यासज्यवृत्तिद्वित्वस्याऽऽकाशपदोत्तरद्विवचनार्थस्य पर्याप्तिस्तु व्यक्तिद्वये एव सम्भवति नाकाशैकव्यक्तौ आकाशस्य चैकेव व्यक्तिरिति तत्राकाशैक-व्यक्तावप्येतद्देशवृत्तित्वाश्रयत्वरूपपदार्थान्तरस्यान्वयो भवतीत्युक्तव्युत्पत्तौ व्यभिचारः प्राप्त इति तादृशव्युत्पत्तेः="व्यासज्यवृत्तिधर्मो यत्रान्वयितावच्छेदकस्तत्र यावत्स्वन्वयितावच्छेदकस्य पर्याप्तिस्तावतामेव पदार्थान्तरेणान्वयः" इति

भ्रमेण 'आकाशावत्र स्तः' इत्यादिवाक्याद् द्वित्वादिनैक-व्यक्तिमात्रविषयकपदार्थान्तरान्वयबोधात् तादृशव्युत्पत्तेस्तन्-निर्वाहककार्यकारणभावस्य च कल्पनाऽसंभवात्।

यत्तु द्वित्वाद्यवच्छिन्नोद्देश्यताकबुद्धावुद्देश्यतावच्छेद-कव्यापकता नियमतो विधेयसंसर्गे भासते इति व्युत्पत्तिः,

---

व्युत्पत्तेः कल्पना न सम्भवति, तथोक्तव्युत्पत्तिनिर्वाहककार्यकारणभावस्य= व्यासज्यवृत्तिधर्मावच्छिन्ने इतरपदार्थान्वयबोधजनकसामग्र्या व्यासज्यवृत्ति-द्वित्वादिधर्मपर्याप्त्याश्रयीभूत यावद् (सकल) व्यक्तिष्वेव। इतरपदार्थान्वय-विषयकबोधो जायते नत्वेकव्यक्ताविति कार्यकारणभावस्यापि कल्पना न संभवति– 'अत्राकाशौ स्तः' इत्यत्र व्यभिचारात्, अत्रव व्यासज्यवृत्ति-द्वित्वस्यान्वयितावच्छेदकत्वेऽपि द्वित्वपर्याप्त्यऽनाश्रयीभूतायामप्याकाशैक-व्यक्तावेतद्देशवृत्तित्वाश्रयत्वरूपपदार्थान्तरस्यान्वयादित्यर्थः। तथा च प्रकृतेऽपि द्वित्वपर्याप्त्यऽनाश्रयीभूतायामप्येकघटव्यक्तावेतद्देशवृत्तित्वाश्रयत्वरूप-पदार्थान्तरस्यान्वयसम्भवाद् एतद्देशे एकघटव्यक्तिदशायामपि 'अत्र घटौ स्तः' 'अत्र घटाः सन्ति' इति प्रयोगः स्यादेव बाधकाभावादिति भावः। द्वित्वादिनेति तृतीयार्थः प्रकारत्वम्, द्वित्वप्रकारकैकव्यक्तिमात्रविषयक इत्यर्थः।

एकघटव्यक्तिदशायाम् 'अत्रं घटौ स्तः' इति प्रयोगस्याप्रामाण्योपपादकं मतान्तरं परिहारायानुवदति– यत्त्विति, यस्मिन् बोधे उद्देश्यता द्वित्वावच्छिन्ना भवति तस्मिन् बोधे नियमेनोद्देश्यतावच्छेदकव्यापकता विधेयसंसर्गे भासते इति नियमः, यथा 'नीलौ घटौ' इत्युक्ते घटत्वसमानाधिकरणद्वित्वव्यापकता विधेयस्य नीलत्वस्य संसर्गे समवाये भासते तथा च 'अत्र घटौ स्तः' इत्यत्रापि घटत्वसमानाधिकरणद्वित्वव्यापकत्वं विधेयसंसर्गे=एतद्देशवृत्तित्वा-श्रयत्वरूपविधेयस्य संसर्गे स्वरूपसम्बन्धे भासते (आश्रयत्वस्य स्वरूप-सम्बन्धेन वर्तमानत्वात्) इति यत्र यत्रैतद्देशविद्यमानघटद्वये घटत्व-समानाधिकरणद्वित्वमस्ति तत्रैतद्देशविद्यमानघटद्वये एतद्देशवृत्तित्वाश्रयत्वस्य स्वरूपसम्बन्धोऽपि वर्तते अर्थात् स्वरूपसम्बन्धेनैतद्देशवृत्तित्वाश्रयत्वमपि वर्तत एव तथाचैकघटादिव्यक्तिमात्राधिकरणपरस्य=एतद्देशे एकघटव्यक्ति-दशायामेकघटव्यक्तावेतद्देशवृत्तित्वाश्रयत्वबोधनपरस्य 'अत्र घटौ स्तः' इति

यत्र चोद्देश्यतावच्छेदकविशिष्टाधिकरणाप्रसिद्ध्या तद्-व्यापकत्वमप्रसिद्धं तत्रापि खण्डशः प्रसिद्धानां तत्तद्घटक-पदार्थानां विशेष्यविशेषणभावापन्नानां भानसंभवान्न 'पीत-शङ्खावत्र' इत्यादौ तादृशव्युत्पत्तिभङ्गः, एवं चैकघटादि-व्यक्तिमात्राधिकरणपरस्य 'अत्र घटौ स्तः' इत्यादिवाक्य-स्याप्रामाण्यं सुघटमेव-उद्देश्यतावच्छेदकीभूतघटमात्रवृत्ति-

---

वाक्यस्याऽप्रामाण्यं सुघटमेव= स्पष्टमेवास्ति, अप्रामाण्ये हेतुमाह– उद्देश्यतावच्छेदकेति, 'अत्र घटौ स्तः' इति वाक्येनोक्तव्युत्पत्त्या यत्र यत्र घटत्वादि समानाधिकरणं द्वित्वं तत्र तत्रैतद्देशवृत्तित्वाश्रयत्वस्य संसर्ग इति प्रतिपाद्यते एतद्देशे चैक एव घटो न तु घटद्वयं घटत्वसमानाधिकरणद्वित्वं च देशान्तरस्थद्वितीयघटेऽप्यस्ति तत्रैतद्देशवृत्तित्वाश्रयत्वसम्बन्धो नास्त्येवेति विधेयसंसर्गे घटत्वसमानाधिकरणद्वित्वव्यापकताया बाधेन बाधितार्थ-प्रतिपादकत्वाद् एतद्देशे एकघटव्यक्तिदशायाम् 'अत्र घटौ स्तः' इति वाक्यस्य प्रामाण्यापत्तिर्नास्त्येवेत्यर्थः। ननु 'अत्र पीतशङ्खौ स्तः' इत्यादौ द्वित्वसमानाधिकरणं पीतशङ्खत्वमुद्देश्यतावच्छेदकमेव प्रसिद्धं। नास्ति येनैतद्देशवृत्तित्वाश्रयत्वादिविधेयसंसर्गे तद्व्यापकता स्यादिति व्यभिचारान्नैषा व्युत्पत्तिः स्वीकर्तुं शक्यते येनैकघटव्यक्तिदशायाम् 'अत्र घटौ स्तः' इति वाक्यस्याऽप्रामाण्यमुक्तरीत्या सुघटं स्यादित्याशङ्क्योक्तम्– यत्र चेति, उद्देश्यतावच्छेदकं यद्द्वित्वसमानाधिकरणपीतशङ्खत्वं तद्विशिष्टस्याधि-करणभूतस्य पीतशङ्खस्याऽऽप्रसिद्धत्वेनोद्देश्यतावच्छेदकस्याप्यप्रसिद्ध्या तद्व्यापकत्वम्=उद्देश्यतावच्छेदकव्यापकत्वमप्रसिद्धं यत्र तत्रापि तद्घटक-पदार्थानाम्=व्यापकताघटकपदार्थानां पीतत्वशङ्खत्वादीनां खण्डशः प्रसिद्धानाम्–यथा पीतत्वं पटादौ प्रसिद्धं शङ्खत्वं शुक्लशङ्खे प्रसिद्धिमिति तेषाम् 'पीतशङ्खौ' इत्यत्रापि विशेष्यविशेषणभावेन भानसंभवात् न 'पीतशङ्खावत्र स्तः' इत्यत्रोक्तव्युत्पत्तेर्व्यभिचारस्तथा च 'अत्र पीतशङ्खौ स्तः' इत्यत्रापि शङ्खद्वयसत्त्वे विधेयसंसर्गे उद्देश्यतावच्छेदकव्यापकता भासते एव। ज्ञानमिदं भ्रमात्मकमित्यन्यदेतत् किं वात्र व्यापकताभानमपि भ्रमात्मकमेवास्तु उक्तव्युत्पत्तेः भ्रमप्रमासाधारणत्वादित्यर्थः।

परिहरति– तदपीति, एवं ह्येतद्देशे घटद्वयसत्त्वेऽपि घटद्वयाधिकरणपरता-

द्वित्वव्यापकतायास्तादृशवाक्यप्रतिपाद्याया विधेयसंसर्गे बाधादिति।

तदपि तुच्छम्– 'अत्र घटौ स्तः' इत्यादौ द्वित्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वस्य द्वित्ववद्घटनिष्ठाभावप्रतियोगितानवच्छेदकवत्त्वस्य च तदधिकरणावृत्तिघटादिनिष्ठाभावप्रतियोगितावच्छेदकीभूते तत्तद्विधेयसंसर्गे

दृशवाक्यस्य='अत्र घटौ स्तः' इति वाक्यस्य यदिष्टं प्रामाण्यं तन्न स्यादित्यन्वयः। तथा हि– व्यापकत्वं द्विविधं भवति भेदघटितमत्यन्ताभावघटितं च, तत्र भेदघटितं हि तत्समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वं व्यापकत्वं ज्ञेयं यथा– धूमसमानाधिकरणो यो जलादिमात्रेत्याकारकोऽन्योन्याभावस्तत्प्रतियोगी जलादिमान् प्रतियोगितावच्छेदकत्वं जलादौ प्राप्तं न तु वह्नौ धूमाधिकरणे वह्निमान्नेतिभेदस्याऽसम्भवाद् धूमाधिकरणस्य वह्निमत्त्वादेव तथा च वह्नौ धूमसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वरूपं व्यापकत्वं प्राप्तम् अत्यन्ताभावघटितं च व्यापकत्वम्–तत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकवत्त्वं ज्ञेयं यथा–धूमसमानाधिकरणो यः पर्वते जलं नेत्यत्न्यताभावस्तत्प्रतियोगि जलं प्रतियोगितावच्छेदकं यज्जलत्वं तद्वत्त्वं जले प्राप्तं वह्नित्वं च तादृशाभावप्रतियोगितानवच्छेकमेव तद्वत्त्वं वह्नौ प्राप्तमिति वह्निर्धूमव्यापकः। प्रकृते च 'अत्र घटौ स्तः' इत्यत्र विधेयसंसर्गे=एतद्देशवृत्तित्वाश्रयत्वस्य विधेयस्य संसर्गे स्वरूपसम्बन्धे उद्देश्यतावच्छेदकव्यापकत्वम्=घटत्वसमानाधिकरणद्वित्वव्यापकत्वं त्वदुक्तव्युत्पत्त्याऽपेक्षितमस्ति तन्न सम्भवति तथा हि तदधिकरणावृत्तिघटाद्यन्तरनिष्ठाभावप्रतियोगितावच्छेदकीभूते इति– एतदधिकरणावृत्ति यद् घटद्वयं तस्मिन् एतद्देशवृत्तित्वाश्रयत्वसंसर्गवन्नेति भेदो वर्तते एव तादृशान्योन्याभावप्रतियोगी ह्येतद्देशवृत्तित्वाश्रयत्वसंसर्गवदेव तादृशान्योन्याभावप्रतियोगितावच्छेदकं चैतद्देशवृत्तित्वाश्रयत्वसंसर्ग एवेति तदधिकरणावृत्तिवघटाद्यन्तरनिष्ठाभाव (भेद) प्रतियोगितावच्छेदकीभूते तत्तद्विधेयसंसर्गे भेदघटितं यद् द्वित्वसमानाधिकरणाभाव (भेद) प्रतियोगितानवच्छेदकत्वं व्यापकत्वं तदपि नास्ति यतः– एतद्देशावृत्तिघटद्वयेऽपि द्वित्वं तु वर्तते एतद्देशवृत्तित्वाश्रयत्वसंसर्गवत्त्वं तु न वर्तते इत्येतद्देशावृत्तिघटद्वये

बाधाद् घटद्वयाधिकरणपरतादृशवाक्यस्याप्यप्रामाण्यापत्तेः। तत्तद्द्वित्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य तत्तद्विधेयसंसर्गांशे भानोपगमस्तु न संभवति– तत्तद्द्वित्वत्वेना-नुपस्थितेः।

य एतद्देशवृत्तित्वाश्रयत्वसंसर्गवन्नेति भेदस्तादृशभेदप्रतियोगितावच्छेदक-त्वमेवोक्तरीत्या विधेयस्तैतद्देशवृत्तित्वाश्रयत्वस्य संसर्गे प्राप्तं न तूक्तं व्यापकत्वरूपं तादृशसंसर्गवन्नेति भेदप्रतियोगितानवच्छेदकत्वम्। एवमत्यन्ताभाव-घटितं यद् द्वित्ववद्घटनिष्ठाभावप्रतियोगितानवच्छेदकवत्त्वं व्यापकत्वं तदपि नास्ति यतः—एतद्देशावृत्तिघटद्वये द्वित्वं तु वर्तते एतद्देशवृत्तित्वाश्रयत्वसंसर्गस्तु न वर्तते इत्येतद्देशावृत्तिघटद्वये य एतद्देशवृत्तिघटद्वये द्वित्वं तु वर्तते एतद्देश-वृत्तित्वाश्रयत्वसंसर्गस्तु न वर्तत इत्येतद्देशावृत्तिघटद्वये य एतद्देशवृत्तित्वाश्रय-त्वसंसर्गस्याभावस्तादृशाभावप्रतियोगितावच्छेदकं यत् तादृशसंसर्गत्वं तद्वत्त्वमेव तादृशे विधेयसंसर्गे प्राप्तं न तूक्तं व्यापकत्वरूपं द्वित्ववद्घटनिष्ठाभाव-प्रतियोगितानवच्छेदकवत्त्वमिति विधेयसंसर्गे उक्तस्य द्विविधस्यापि व्यापक-त्वस्य बाधाद् बाधितार्थबोधकत्वाद् घटद्वयाधिकरणपरस्य=घटद्वयाधिक-रणबोधकस्यापि (घटद्वयसत्तादशायामपि) तादृशवाक्यस्य='अत्र घटौ स्तः' इति वाक्यस्याऽप्रामाण्यं स्यादित्यर्थः। ननु न घटत्वसमानाधिकरणद्वित्वमात्र (यावद्द्वित्व) व्यापकत्वं विधेयसंसर्गे उच्यते येनैतद्देशावृत्तिघटद्वये द्वित्वसत्त्वे-ऽप्येतद्देशवृत्तित्वाश्रयत्वसंसर्गस्याऽसत्त्वेनाऽव्यापकत्वं स्यात् किन्तु तत्तद्द्वित्व-समानाधिकरणाभाव (भेद) प्रतियोगितानवच्छेदकत्वरूपं तत्तद्द्वित्वव्यापकत्व-मुच्यते, अस्ति चैतद्देशवृत्तिघटद्वयनिष्ठतद्द्वित्वव्यापकत्वं विधेयसंसर्गे द्वित्व-वत्येतद्देशवृत्तिघटद्वये एतद्देशवृत्तित्वाश्रयत्वसंसर्गस्य स्वरूपसम्बन्धस्य सत्त्वात् तथा च घटद्वयसत्तादशायाम् 'अत्र घटौ स्तः' इति वाक्यस्य नाऽप्रामाण्यापत्ति-रित्याशङ्क्याह– तत्तद्द्वित्वेति। न सम्भवतीत्यत्र हेतुमाह– तत्तद्द्वित्वत्वेनेति, 'अत्र घटौ स्तः' इत्यादौ द्विवचनेन द्वित्वस्य सामान्यतो द्वित्वत्वेनैव रूपेणोप-स्थितिर्भवति न तु तद्द्वित्वत्वेन रूपेण येन त्वदीयेनाऽनेन निवेशेनोक्तम् 'अत्र घटौ स्तः' इत्यस्याप्रामाण्यं परिहृतं स्यादित्यर्थः। कृष्णंभट्ट-महाशयानामभिप्रायस्तु तेषामेव टीकायां द्रष्टव्यः।

न च तदवच्छिन्नस्य संसर्गतया भाने तेन रूपेणोपस्थितेर्नाऽपेक्षेति वाच्यम्, तत्संसर्गावच्छिन्नतत्प्रकारतानिरूपिततत्तद्विशेष्यताशालिशाब्दबोधपरमित्याकारकतात्पर्यज्ञाने संसर्गस्य विशेषणतया तद्भाननिर्वाहाय संसर्गघटकोपस्थितेरपि

ननु संसर्गस्य संसर्गघटकपदार्थानां चोपस्थितेरपेक्षा न भवति, अत्र च विधेयसंसर्गे एव व्यापकत्वभानमुक्तं विधेयसंसर्गश्चात्र तद्द्वित्वव्यापकीभूतैतद्देशवृत्तित्वाश्रयत्वसंसर्गः (स्वरूपसम्बन्धः) एवेति तदवच्छिन्नस्य=तद्द्वित्वत्वावच्छिन्नस्य तद्द्वित्वस्य संसर्गतया=संसर्गघटकतया भाने स्वीकृते तेन रूपेण=तद्वद्वित्वत्वेन रूपेणोपस्थितेरपेक्षैव नास्ति येन तद्द्वित्वत्वेन रूपेणोपस्थित्यभावाद् विधेयसंसर्गस्य तद्द्वित्वव्यापकत्वेन भानं न स्यादित्याशङ्क्याह– न चेति। परिहारमाह–तत्संसर्गेति, तत्संसर्गावच्छिन्ना= तद्द्वित्वव्यापकैतद्देशवृत्तित्वाश्रयत्वस्य स्वरूपसंसर्गावच्छिन्ना या तत्प्रकारता=एतद्देशवृत्तित्वाश्रयत्वनिष्ठा प्रकारता तन्निरूपिता या तत्तद्विशेष्यता=घटादिनिष्ठ विशेष्यता तच्छालिशाब्दबोधपरम् 'अत्र घटौ स्तः' इति वाक्यमित्याकारकतात्पर्यज्ञाने उक्तसंसर्गो विशेषणत्वेनैव भासते प्रकारतावच्छेदकत्वादिति तद्भाननिर्वाहाय= उक्तसंसर्गभानस्य निर्वाहार्थं संसर्गघटकोपस्थितेः=संसर्गघटकस्य तद्द्वित्वादेरप्युपस्थितेः शाब्दबोधात् पूर्वमावश्यकत्वात् (उपस्थितिं विना विशेषणीभूतसंसर्गघटकतद्द्वित्वादेर्भानासंभवात्) 'अत्र घटौ स्तः' इत्यत्र च द्विवचनेन द्वित्वस्य तद्द्वित्वत्वेनोपस्थितेरभावाद् न तद्द्वित्वव्यापकत्वस्यैतद्देशवृत्तित्वाश्रयत्वसंसर्गे भानं संभवति किन्तु द्वित्वत्वेनोपस्थितिद्वित्वव्यापकत्वस्यैव द्वित्वव्यापकत्वं तु विधेयसंसर्गे नास्त्येवेति प्रतिपादितमेवेति घटद्वयदशायामपि 'अत्र घटौ स्तः' इति वाक्यस्याप्रामाण्यं तदवस्थमेवेत्यर्थः। ननु यद्युक्ततात्पर्यज्ञानस्यात्र शाब्दबोधकारणत्वं स्यात्तदोक्ततात्पर्यज्ञाने उक्तसंसर्गस्य प्रकारतावच्छेदकतया विशेषणत्वेन तस्य तद्घटकतद्द्वित्वादिपदार्थानां च भाननिर्वाहायोपस्थितेरपेक्षा स्यात् तथा च द्वित्वस्य तद्द्वित्वत्वेन रूपेणोपस्थित्यभावात् तद्द्विकत्वव्यापकत्वभानं विधेयसंसर्गे न स्यादपि न चैवमस्ति। उक्ततात्पर्यज्ञानस्य कारणत्वास्वीकारात् किन्तु प्रकृतसंसर्गेण= तद्द्वित्वव्यापकैतद्देशवृत्तित्वाश्रयत्वीयस्वरूपसंसर्गेण एकपदार्थविशिष्टः= एतद्देशवृत्तित्वविशिष्टो योऽपरपदार्थः=घटादिस्तद्बोधनपरम्

शाब्दबोधात् प्रागावश्यकत्वात्। प्रकृतसंसर्गेणैकपदार्थ-विशिष्टापरपदार्थबोधपरत्वज्ञानस्य प्रकृतवाक्यार्थविषयकतया प्रागऽसंभवेनोपदर्शिततात्पर्यज्ञानस्यैव शाब्दधीहेतुत्वोपगमात् एवं

'अत्र घटौ स्तः' इति वाक्यमित्याकारकतात्पर्यज्ञानस्यैवात्र शाब्दबोधकारणत्वं स्वीक्रियते अस्मिंश्च तात्पर्यज्ञाने नोक्तसंसर्गस्य किञ्चिदवच्छेदकतया प्रवेशो येना- वच्छेदकत्वेन विशेषणत्वप्राप्त्या तस्य तद्घटकतद्द्वित्वादेश्च भानार्थ-मुपस्थितेरपेक्षा स्यात्, तथा चोक्तसंसर्गघटकतद्द्वित्वस्य तद्द्वित्वत्वेनोप-स्थित्यभावेऽपि तद्व्यापकत्वस्य भाने न काप्यनुपपत्तिः (शेषं पूर्ववत्) इत्याशङ्क्याह- प्रकृतेति, प्रकृतसंसर्गेणेत्याद्युक्ततात्पर्यज्ञानं हि प्रकृतवाक्यार्थ-विषयकमेव='अत्र घटौः स्तः' इति वाक्यार्थबोधस्वरूपमेवेत्यस्य तात्पर्यज्ञानस्य शाब्दबोधात् प्रागसंभवेन कारणत्वं न सम्भवतीत्युपदर्शितं यत् तत्संसर्गावच्छिन्न-तत्प्रकारतानिरूपिततत्तद्विशेष्यताशालिशाब्दबोधपरमेतद्वाक्यमित्याकारकं तात्पर्यज्ञानं तस्यैवात्र शाब्दबोधकारणत्वं स्वीकार्यं तत्र चोक्तसंसर्गस्य प्रकारतावच्छेदकतया विशेषणत्वेन तस्य तद्घटकतद्द्वित्वादीनां च भानयोपस्थितेरावश्यकत्वात् तद्द्वित्वत्वेन तद्द्वित्वस्योपस्थितेरभावाच्च न विधेयसंसर्गे तद्द्वित्वव्यापकत्वभानं सम्भवति उपस्थितिश्च द्वित्वत्वेन द्वित्वसामान्यस्यास्ति द्वित्वमात्रव्यापकत्वं च विधेयसंसर्गे नास्त्येवेति प्रदर्शितमेवेति घटद्वयदशायामपि 'अत्र घटौ स्तः' इत्यस्याप्रामाण्यं तदवस्थमेवेत्यर्थः। तद्द्वित्वस्य संसर्गघटकत्वे दोषान्तरमप्याह- एवमिति, संसर्गभेदे वाक्यभेदनियमोऽस्ति अत्र च तद्द्वित्वं संसर्गघटकम् द्वित्वं चापेक्षाबुद्धिजन्यमपेक्षाबुद्धिनाशनाश्यं च बुद्धिश्च तृतीयक्षणे नश्यत्येवेति तया सह तत्तद्द्वित्वानामपि नाशेन तद्घटित संसर्गस्यापि नाशे प्राप्ते भिन्नभिन्नसंसर्गाणां च संसर्गत्वे प्राप्ते संसर्गभेदाद्वाक्यभेदप्रसङ्ग इत्यर्थः। वाक्यार्थज्ञानभेदे एव वाक्यभेद इत्युच्यते वाक्यार्थज्ञानं च संसर्गाज्ञानमेव संसर्गज्ञानं चात्र संसर्गघटकतत्तद्द्वित्वानां भेदेन संसर्गभेदात् प्रतितृतीयक्षणं भिन्नं भिन्नं स्यादेवेति भावः। अत्र "वाक्यार्थघटकसंसर्गस्याननुगमे 'अत्र घटौ स्तः' इत्यादौ वाक्यभेदप्रसङ्गाच्चेति- एतद्देशवृत्तित्वं प्रकारो द्वौ घटौ विशेष्यौ तत्तद्द्वित्वव्यापकैतद्देशवृत्तित्वीयस्वरूपमेतद्देशवृत्तित्वसम्बन्धस्तत्र तत्तद्द्वित्वं तत्तदपेक्षाबुद्धिजन्यमपेक्षाबुद्धिनाशनाश्यं चेति, नानाविधसंसर्गभेद

वाक्यार्थघटकसंसर्गस्याननुगमे 'घटौ स्तः' इत्यादौ वाक्यभेद-प्रसङ्गाच्च।

अत्रोच्यते– व्यासज्यवृत्तिधर्मावच्छिन्नोद्देश्यताकशाब्दबुद्धौ स्वव्याप्यतादृशधर्मवत्त्वमपि विधेयसंसर्गतया भासते इति व्युत्पत्तिः व्याप्यत्वं च तद्वदन्यावृत्तित्वं व्यतिरेकिविधेयस्थले। तादृशधर्मवत्त्वं। चोद्देश्यतावच्छेदकताघटकसंबन्धेन बोध्यम्।

एव वाक्यभेदनियामकः, संसर्गज्ञानं वाक्यार्थज्ञानं शाब्दबोध इत्येते पर्यायशब्दाः" इति कृष्णंभट्टाः। द्वित्वसामान्यस्य संसर्गघटकत्वे तु तस्य द्वित्वत्वेन रूपेणानुगमसंभवात् तद्घटितसंसर्गस्याप्यनुगमः संभवत्येव। तत्तद्द्वित्वव्यक्तीनां त्वनुगमो नैव संभवतीत्यर्थः।

अथेत्यादिना (पृ. १५७) आशङ्कितस्योत्तरमारभते– अत्रोच्यते इत्यादिना। व्यासज्यवृत्तिधर्मेण द्वित्वादिनाऽवच्छिन्ना उद्देश्यता यस्यामेतादृशशाब्दबुद्धौ, यथा– 'अत्र घटौ स्तः' इत्यत्र घटनिष्ठोद्देश्यता व्यासज्यवृत्तिद्वित्वेनावच्छिन्ना-स्तीत्येतादृशवाक्यजन्यशाब्दबोधे, स्वव्याप्येत्वत्र स्वम्=विधेयम्, तथा चैतद्देशवृत्तित्वाश्रयत्वलक्षणविधेयव्याप्यो यस्तादृशधर्मः=व्यासज्यवृत्तिधर्मो द्वित्वं तद्वत्त्वमपि विधेयस्य (एतद्देशवृत्तित्वाश्रयत्वरूपविधेयस्य) संसर्गतया भासते इति व्युत्पत्तिः, व्याप्यत्वं चात्र व्यतिरेकिविधेयस्थले (अत्यन्ताभावप्रतियोगि-विधेयकस्थले) तद्वदन्यावृत्तित्वरूपं बोध्यम्, तादृशधर्मवत्त्वम्=विधेयव्याप्य-व्यासज्यवृत्तिद्वित्वादिधर्मवत्त्वं चोद्देश्यतावच्छेदकताघटकसम्बन्धेन=उद्देश्यता-वच्छेदकघटत्वादिव्याप्यपर्याप्तिसम्बन्धेन बोध्यम्, तथा च 'अत्र घटौ स्तः' इत्यत्रैतद्देशवृत्तित्वाश्रयत्वरूपविधेयस्य यथा स्वरूपसम्बन्धेनान्वयो भवति तथा एतद्देशवृत्तित्वाश्रयत्वव्याप्यद्वित्ववत्त्वसम्बन्धेनाप्यन्वयो भवतीति प्राप्तम्, सम्बन्धभूतं द्वित्ववत्त्वमपि उद्देश्यतावच्छेदकघटत्वव्याप्यपर्याप्तिसम्बन्धेन बोध्यमित्यर्थः। एतद्देशे घटद्वयसत्त्वे तादृशघटद्वये घटत्वव्याप्यपर्याप्तिसम्बन्धेन द्वित्ववत्त्वं (द्वित्वं) वर्तत एवेति तादृशद्वित्ववत्त्वसम्बन्धेन घटद्वये एव विधेयस्यैतद्देशवृत्तित्वाश्रयत्वस्यान्वयः संभवति न त्वेकस्मिन् घटे तत्रोक्तसम्बन्धेन सम्बन्धभूतद्वित्ववत्त्वस्यासंभवादिति घटद्वयसत्त्वे 'अत्र घटौ स्तः' इति प्रयोग उपपद्यते। एतद्देशवर्तमानघटद्वयवृत्ति द्वित्वं चात्र

'अत्र घटौ स्तः' इत्यादावेतद्देशवर्तमानत्वादिरूपविधेयस्य तद्वदन्यावृत्तित्वरूपव्याप्तिमच्चैतद्देशस्यैकघटादिव्यक्ति-मात्राधिकरणत्वे घटपटादिनिष्ठद्वित्वमेव घटत्वव्याप्यपर्याप्ति-रूपोद्देश्यतावच्छेदकताघटकसंबन्धावच्छिन्नं तद्वत्त्वं च घटादौ

विधेयव्याप्यमेक एतद्द्वित्वस्यैतद्देशवृत्तित्वाश्रयत्वरूपविधेयाभाववति देशान्तरस्थघटेऽसत्त्वाद् विधेयवत्येतद्देशवृत्तिघटद्वये एव सत्त्वाच्चेति बोध्यम्। एतद्देशे एकघटसत्त्वे च वर्तमानैव घटे उद्देश्यतावच्छेकघटत्वव्याप्य-पर्याप्तिसम्बन्धेन विधेयव्याप्यद्वित्ववत्त्वस्याभावद् घटत्वव्याप्यपर्याप्तिसम्बन्धा-वच्छिन्नविधेयव्याप्यद्वित्ववत्त्वसम्बन्धेनैतद्देशवृत्तित्वाश्रयत्वरूपविधेयस्याप्यन्वयो न संभवति– सम्बन्धाभावे संबन्ध्यन्वयासंभवादित्येकघटसत्त्वे 'अत्र घटौ स्तः' इतिवाक्यस्य प्रामाण्यं नोपपद्यते, यद्यप्येतद्देशस्थघटे देशान्तरस्थघटे च मिलित्वा घटत्वव्याप्यपर्याप्तिसम्बन्धेनैकं द्वित्वमस्त्येव तथापि तद् द्वित्वं विधेयव्याप्यं नास्ति– एतद्देशवृत्तित्वाश्रयत्वरूपविधेयाभाववति देशान्तरस्थघटेपि तस्य सत्त्वादिति न तद् द्वित्वं सम्बन्धघटकत्वेन ग्राह्यम्। एकघटसत्त्वदशायां तत्र विधेयव्याप्यं द्वित्वं नैवोपलब्धुं शक्यते येन तद्वत्त्वसम्बन्धेनैकघटे विधेयान्वयः स्यादिति यावत्।

एतद्देशे एकघटैकपटसत्त्वेऽपि 'अत्र घटौ स्तः' इति प्रयोगो न संभवतीत्याह–'अत्र घटौ स्तः' इत्यादिना। एतद्देशस्यैकघटादिव्यक्तिमात्राधि-करणत्वे=एतद्देशे एकघटैकपटसत्त्वे मात्रपदेन द्वितीयघटव्यक्तिनिरासः, एतद्देश-वर्तमानत्वादिरूपविधेयस्य=एतद्देशवृत्तित्वाश्रयत्वरूपविधेयस्य, तद्वदन्यावृत्तित्व-रूपव्याप्तिमच्च=व्याप्यं च घटपटोभयनिष्ठमेव द्वित्वं न तु घटद्वयनिष्ठं द्वित्वं घटद्वयनिष्ठद्वित्वस्यैतद्देशवृत्तित्वाश्रयत्वरूपविधेयाभाववति देशान्तर-स्थघटेऽपि सत्त्वेन विधेयव्याप्यत्वाभावात् तथा चैकघटैकपटसत्त्वदशायां घटादौ घटत्वव्याप्यपर्याप्तिरूपोद्देश्यतावच्छेदकताघटकसम्बन्धावच्छिन्न तद्वत्त्वम्=घटत्वव्याप्याप्यपर्याप्तिरूपो य उद्देश्यतावच्छेदकताघटकसम्बन्ध-स्तदवच्छिन्न तद्वत्त्वम् अर्थात्–उद्देश्यतावच्छेदकघटत्वव्याप्यपर्याप्तिसम्बन्धेन तदवत्त्वम्=विधेयव्याप्यद्वित्ववत्त्वं बाधितमेव (विधेयव्याप्यद्वित्वस्यात्रय)। घटत्वपटत्वोभयव्याप्यपर्याप्तिसम्बन्धेनैव सत्त्वात्) इति न तादृशवाक्यस्य='अत्र घटौ स्तः' इति वाक्यस्य प्रामाण्यमित्यन्वयः। अर्थात् 'अत्र घटौ स्तः'

बाधितमिति न तादृशवाक्यस्य प्रामाण्यम्। अधिकरणस्य घटद्वयादिमत्त्वे च घटत्वादिव्याप्यं द्वित्वमेव तथेति घटत्वादि-व्याप्यपर्याप्तिसंबन्धेन तद्वत्त्वं घटादावबाधितमिति तादृशवा-क्यस्य प्रामाण्यं निर्वहति।

इत्यादि व्यासज्यवृत्तिधर्मावच्छिन्नोद्देश्यताकशाब्दबोधस्थले विधेयव्याप्य-व्यासज्यवृत्तिद्वित्ववत्त्वसम्बन्धेन विधेयान्वयो भवतीति स्वीकृतम्, तथा चैतद्देशे एकघटैकपटसत्त्वदशायामेतद्देशवृत्तित्वाश्रयत्वरूपविधेयव्याप्यद्वित्वत्त्वरूपो विधेयसम्बन्धो घटपटोभयस्मिन्नेवास्ति (इति 'अत्र घटपटौ स्तः' इति वाक्यस्य प्रामाण्यमुपपद्यते) न त्वेकस्मिन् घटे पटेन सहवर्तमानैकस्मिन्नैतद्घटे घटपटोभयगतविधेयव्याप्यद्वित्वस्य घटत्वपटत्वोभयव्याप्यपर्याप्तिसम्बन्धेन सत्त्वेऽपि घटत्वव्याप्यपर्याप्तिसम्बन्धेनाऽसत्त्वात्, यच्च द्वित्वम् एतद्देशस्थे देशान्तरस्थे च मिलित्वा घटद्वयेऽस्ति तस्यैतद्देशवृत्तित्वाश्रयत्वरूपविधेयव्याप्यत्वं नास्ति—एतद्देशवृत्तित्वाश्रयत्वरूपविधेयाभाववति देशान्तरस्थघटेऽपि सत्त्वात्, तथा चात्र पटेन सह वर्तमानैकघटे घटत्वव्याप्यपर्याप्तिसम्बन्धेन विधेय-व्याप्यद्वित्ववत्त्वस्य संसर्गभूतस्याऽभावात् तादृशसंसर्गेणैतद्देशवृत्तित्वाश्रयत्व-रूपविधेयस्यान्वयोऽपि न सम्भवति (सम्बन्धाभावे सम्बन्ध्यन्वयाभाव-स्यावश्यंभावात्) इत्येकघटैकपटसत्त्वेऽपि 'अत्र घटौ स्तः' इति प्रयोगस्यापत्ति-र्नास्त्येवेत्यर्थः। घटपटोभयसत्त्वे 'अत्र घटौ स्तः' इति वाक्यस्य प्रामाण्यनिरासार्थं तादृशधर्मवत्त्वम्=विधेयव्याप्यव्यासज्यवृत्तिद्वित्वादिधर्मवत्त्वम् उद्देश्यता-वच्छेदकव्याप्यपर्याप्तिसम्बन्धेनोक्तं तथा च 'अत्र घटौ स्तः' इत्यत्रोद्देश्यता-वच्छेदकं घटत्वमेव घटत्वव्याप्यपर्याप्तिसम्बन्धेन चात्र घटे विधेयव्याप्यं द्वित्वं नास्तीति विधेयव्याप्यद्वित्ववत्त्वसम्बन्धेन विधेयान्वयासंभवात् 'अत्र घटौ स्तः' इति वाक्यस्य प्रामाण्यापत्तिर्नास्त्येव, अन्यथा सम्बन्धान्तरेणात्र विधेयव्याप्यद्वित्ववत्त्वस्यैकघटेऽपि संभवात् प्रामाण्यापत्तिः स्यादेवेत्यवधेयम्। यच्च घटद्वयनिष्ठं द्वित्वं घटत्वव्याप्यं तन्न विधेयव्याप्यम्— विधेयाभाववति देशान्तरस्थघटेपि सत्त्वात्, यच्च घटपटोभयनिष्ठं द्वित्वं विधेयव्याप्यं तन्न घटत्वव्याप्यं घटत्वाभाववति पटेऽपि सत्त्वादितिसारः एतद्देशे घटद्वयसत्त्वे 'अत्र घटौ स्तः' इति वाक्यस्य प्रामाण्यमुपपादयति— अधिकरणस्येति, पूर्वमेवेदं व्याख्यातम्। तथा=एतद्देशवृत्तित्वाश्रयत्वरूपविधेयव्याप्तिमत् (विधेय-

केवलान्वयिविधेयकस्थले च द्वित्वत्वाद्यवच्छिन्न-व्यापकत्वमेव संसर्गघटकम्, केवलान्वियिनि तादृशव्यापकताया अक्षतत्वात्, न तु तत्तद्द्वित्वत्वावच्छिन्नव्यापकत्वमिति न पूर्वोक्तदोषावकाशः।

व्याप्यमित्यर्थः), तद्वत्त्वम्=विधेयव्याप्यद्वित्ववत्त्वम्, घटद्वये विधेयव्याप्य-द्वित्ववत्त्वं घटत्वव्याप्यपर्याप्तिसम्बन्धेनास्त्येवेति तादृशद्वित्ववत्त्वसम्बन्धेन विधेयान्वयोपपत्त्या 'अत्र घटौ स्तः' इतिवाक्यस्य प्रामाण्यमुपपद्यते इति सारः। एवकारो भिन्नक्रम इति 'घटत्वादिव्याप्यमेव द्वित्वं तथा' इत्यन्वयः।

ननु 'घटौ प्रमेयौ' इत्यादिकेवलान्वयिविधेयकस्थले विधेयव्याप्यत्वं तद्वदन्यावृत्तित्वं यदुक्तं तन्न संभवति—केवलान्वयिवदन्यस्याऽप्रसिद्धे-रित्याशङ्क्याह— केवलान्वयीति, केवलान्वयिविधेयकस्थले विधेयव्याप्यत्वं संसर्गप्रविष्टं नास्ति किन्तु द्वित्वत्वावच्छिन्न-व्यापकत्वम्=द्वित्वनिष्ठव्याप्य-त्वनिरूपितं केवलान्वयिप्रमेयत्वादिरूपविधेयनिष्ठं व्यापकत्वमेव संसर्गघटकं ज्ञेयं केवलान्वयिनि प्रमेयत्वादौ व्यापकत्वं चाक्षतमेवेत्यन्वयः, अर्थात्— 'घटौ प्रमेयौ' इत्यत्र स्वनिष्ठव्यापकतानिरूपकोद्देश्यतावच्छेदकाश्रयत्वसम्बन्धेन विधेयस्य प्रमेयत्वस्यान्वयो भवतीति स्वीकृतं स्वं प्रमेयत्वं तन्निष्ठव्यापकता-निरूपकं यदुद्देश्यतावच्छेदकं प्रमेयत्वव्याप्यं द्वित्वं तदाश्रयत्वम्=तद्वत्वं घटद्वये एवास्तीति तादृशद्वित्ववत्त्वसम्बन्धेन घटद्वये एवात्र प्रमेयत्वस्यान्वयः संभवतीति 'अत्र घटौ प्रमेयौ' इति वाक्यस्य घटद्वयसत्त्वे एव प्रामाण्यमुपपद्यते, सम्बन्धभूतं व्यापकतानिरूपकद्वित्ववत्त्वं चोद्देश्यतावच्छेदकव्याप्यपर्याप्ति-सम्बन्धेन बोध्यं तेनैकघटैकपटदशायां यद् व्यापकतानिरूपकं घटपटोभयगतं द्वित्वं तत्तूद्देश्यतावच्छेदकघटत्वव्याप्यपर्याप्तिसम्बन्धेन नास्ति तस्य घटत्वपटत्वोभयव्याप्यपर्याप्तिसम्बन्धेन वर्तमानत्वात्, यच्च एतद्देशस्थे देशान्तरस्थे च घटद्वये मिलित्वा घटत्वव्याप्यपर्याप्तिसम्बन्धेन द्वित्वमस्ति तत्तूक्तव्यापक-ताया निरूपकमेव नास्ति— अत्र प्रमेयत्वनिष्ठव्यापकताया एतद्देशवृत्तिपदार्थद्वय-वृत्तिद्वित्वनिरूपतित्वादिति न देशान्तरस्थघटव्यासक्तद्वित्ववत्त्वसम्बन्धेनैकघटे विधेयान्वयः संभवतीत्येकघटसत्त्वदशायाम् 'अत्र घटौ प्रमेयौ' इति वाक्यस्य प्रामाण्यापत्तिर्नास्त्येवेत्यर्थः। नन्वत्र द्वित्वपदेन तत्तद्द्वित्वव्यक्तीनां ग्रहणे इत्यादिनोक्तोवाक्यभेदप्रसङ्गः स्यादित्याशङ्क्याह— न त्विति, द्वित्वपदेन

'घटावानयति चैत्रः' इत्यादौ चैत्रकर्तृकानयनकर्मत्वादि-व्याप्यद्वित्वादिमन्निष्ठनिरूपकताकाधेयत्वादिसंबन्धेन कर्मत्वादौ घटादेरन्वयो व्युत्पन्नस्तेन चैत्रादावेकघटादिव्यक्तिमात्राऽऽनय-कर्तृत्वे न तादृशप्रयोगः। द्वित्वादिमत्त्वं च प्रकारतावच्छेदकी-

---

सामान्यतो द्वित्वत्वावच्छिन्नस्यैव ग्रहणात् तत्तद्द्वित्वव्यक्तीनां चाऽग्रहणात् पूर्वोक्तस्य वाक्यभेदप्रसङ्गरूपदोषस्य प्रसक्तिर्नास्तीत्यर्थः।

घटावानयतीति– 'घटावानयति चैत्रः' इत्यत्र चैत्रकर्तृकानयनकर्मत्वमेव विधेयं विशेष्यं च तच्चानयनकर्मत्वं घटाधेयमस्तीति तत्राधेयत्वं वर्तते तथा चात्र चैत्रकर्तृकानयनकर्मत्वव्याप्यं यद्द्वित्वं तादृशद्वित्ववन्निष्ठनिरूपकता-काधेयत्वसम्बन्धेन=तादृशद्वित्ववद् यद् घटद्वयं तन्निष्ठा याऽऽधारता तन्निरूपिता या कर्मत्वनिष्ठाऽऽधेयता तादृशाधेयतारूपसम्बन्धेन चैत्रकर्तृकानयनकर्मतायां घटादेरन्वयो व्युत्पन्न इति चैत्रकर्तृकैकघटानयनदशायाम् 'घटावानयति चैत्रः' इति वाक्यस्य प्रामाण्यप्रसङ्गो नास्ति–तादृशैकघटे सम्बन्धघटकस्य चैत्रकर्तृका-नयनकर्मत्वव्याप्यद्वित्वस्याभावात् एकघटकर्मकानयनकर्मतानिष्ठाधेयतायां विवक्षितस्यानयनकर्मत्वव्याप्यद्वित्ववन्निष्ठाधारतानिरूपितत्वस्याभावाच्च कर्मतायां सम्बन्धभूतस्यानयनकर्मत्वव्याप्यद्वित्ववन्निष्ठाधारतानिरूपिताधेयत्वस्याभावान्न तेन सम्बन्धेन घटान्वयः सम्भवति, यच्चैतद्देशस्थे देशान्तरस्थे च घटद्वये मिलित्वा द्वित्वमस्ति तत्त्वाऽऽनयनकर्मत्वव्याप्यमेव नास्ति–आनयनक-र्मत्वाभाववति देशान्तरस्थघटेऽपि सत्त्वात्। घटद्वयानयनदशायां तु घटद्वयनिष्ठं द्वित्वमानयनकर्मत्वव्याप्यमस्ति तादृशद्वित्ववद् यद् घटद्वयं तन्निष्ठाधारता निरूपिताधेयता चानयनकर्मतायां वर्तते इति। तादृशाधेयतासम्बन्धेन कर्मतायां घटद्वयस्यान्वयः सम्भवतीति 'घटावानयति' इति प्रयोगस्य प्रामाण्यमुपपद्यते इत्यर्थः। तादृशप्रयोगः= 'घटावानयति' इति प्रयोगः, भवतीति शेषः। किं चात्र द्वित्ववत्त्वं प्रकारतावच्छेदकीभूतघटत्वव्याप्यपर्याप्तिसम्बन्धेन बोध्यं तथा च 'घटावानयति' इत्यत्र प्रकारतावच्छेकं घटत्वमेवेति घटद्वयानयनदशायामेव घटत्वव्याप्यपर्याप्तिसम्बन्धेन द्वित्ववत्त्वोपपत्त्या 'घटावानयति' इति प्रयोग उपपद्यते, एकघटैकपटानयनदशायां प्रकारतावच्छेदकं घटत्वपटत्वोभयमेव न केवलघटत्वमिति घटत्वव्याप्यपर्याप्तिसम्बन्धेन द्वित्ववत्त्वाभावान्न 'घटावानयति' इति प्रयोगस्य प्रामाण्यापत्तिः किन्तु

भूतघटत्वादिव्याप्यपर्याप्तिसंबन्धेन बोध्यं तेन चैत्रस्य पटादि-सहितेकघटादिव्यक्त्यानयनकर्तृत्वेऽपि न तादृशप्रयोगः। एवमन्यत्राप्यूहनीयम्।

यत्रानेकवृत्तिधर्मो द्वित्वान्वयितावच्छेदकतया भासते तत्रोभयादिनैव समं पदार्थान्तरस्यान्वयः। यत्रैकमात्रवृत्तिस्तथा तत्रैकेनापि, व्युत्पत्तिभेदावलम्बनात् कार्यकारणभाववैचित्र्याच्च सर्वं समञ्जसमित्यपि वदन्ति।

'घटपटावानयति' इति प्रयोगस्यैव प्रामाण्यं स्यादित्याह–द्वित्वादिमत्त्वं चेति। अत्र कर्मतायां घटस्याऽन्वयाद् घटः प्रकारो घटत्वं प्रकारतावच्छेदकम्। अत्र– "एवमन्यत्रापि= 'घटानानयति' इति बहुवचनान्तप्रयोगेऽपि चैत्रकर्म-कानयकर्मतादिव्याप्यबहुत्वादिमन्निष्ठनिरूपकताकाधेयत्वादिसम्बन्धेन कर्मतायां तादृशप्रकारता बोध्येत्यप्यूहनीयमित्यर्थः।" इति कृष्णंभट्टाः।

मतान्तरमाह– यत्रेति, यथा 'अत्र घटौ स्तः' इत्यत्राऽनेकवृत्तिधर्मो घटत्वमेव द्वित्वान्वयितावच्छेदकमस्तीत्यत्रोभयेनैव=घटद्वयेनैव पदार्थान्तरस्य= एतद्देशवृत्तित्वाश्रयत्वस्यान्वयः स्वीकर्तव्य इत्येकघटसत्त्वदशायाम् 'अत्र घटौ स्तः' इति प्रयोगापत्तिर्नास्ति वर्तमानैकघटे एतद्देशवृत्तित्वाश्रयत्वास्यान्वया-स्वीकारात्। एकघटैकपटसत्त्वदशायां च द्वित्वान्वयितावच्छेदकं घटत्व-पटत्वोभयमेव न केवलघटत्वमिति न तत्रापि केवलघटेनैतद्देशवृत्तित्वाश्रयत्वा-न्वयोपपत्तिर्येन 'अत्र घटौ स्तः' इति वाक्यस्य प्रामाण्यं स्यादित्यर्थः। यत्र चैकमात्रवृत्ति आकाशत्वादिकं तथा=द्वित्वान्वयितावच्छेदकतया भासते तत्रैकेनाप्याकाशादीनां पदार्थान्तरस्य एतद्देशवृत्तित्वाश्रयत्वस्यान्वयः स्वीक्रियते यथा 'अत्राकाशौ स्तः' इत्यत्र, तथा चात्रैकेनैवाकाशेन पदार्थान्तरान्वय-स्वीकारादेकाकाशबोधकस्य 'अत्राकाशः' इति वाक्यस्यैव प्रामाण्यं स्यात् न तु 'अत्राकाशौ' इत्यस्यापीत्याऽऽह– यत्रैकेति। व्युत्पत्तिभेदावलम्बनात्= उक्तनियमस्वीकारात्। कार्यकारणभाववैचित्र्यादिति–अत्र "द्वित्वविशिष्ट-घटद्वयविशेष्यकैतद्देशवृतित्वादिरूपेतरपदार्थान्वयबुद्धित्वावच्छिन्नं प्रति अत्रेत्यादिसप्तम्यन्तपदसमभिव्याहृतद्विवचनान्तघटपदज्ञानत्वेन कारणता, एवमाकाशावत्रेत्यत्र अत्रेति समभिव्याहृतद्विवचनान्ताकाशपदज्ञानत्वेन कारणता

अथ घटादिव्यक्तिभेदेनाऽऽनयनकर्मता भिन्नेति प्रतिसंदधानस्य पुंसः 'घटावानयति' इति वाक्याच्छाब्दबोधानुपपत्तिः– तस्य कर्मतात्त्वावच्छेदेनाऽऽधेयतासंसर्गावच्छिन्नप्रतियोगिताकस्य द्वित्वाद्यवच्छिन्नघटाद्यभावस्य निश्चय-

---

इति कार्यकारणभाववैचित्र्यात् सर्वं समञ्जसं– एकघटसत्त्वे 'अत्र घटौ' इत्यापत्तिर्न, 'अत्राकाशौ' इति प्रयोगोपि, सर्वं समञ्जसं सर्वकार्यनिर्वाहः, वदन्तीत्यनेन 'अत्राकाशौ स्तः' इति प्रयोगो न भवति तन्निर्वाहाय व्युत्पत्त्यङ्गीकारकार्यकारणभावकल्पनमसमञ्जसमेवेत्यस्वरसः सूचितः" इति कृष्णंभट्टाः।

ननु 'घटावानयति चैत्रः' इत्यत्र यदेकस्यामानयनकर्मतायां घटद्वयस्यान्वय उक्तस्तन्न सम्भवति यतः– आनयनकर्मत्वं ह्येतद्देशसंयोगाश्रयत्वमेव तत्र संयोगस्य स्वाश्रयीभूतव्यक्तिभेदेन भिन्नत्वात् (नानात्वात्) संयोगाश्रयत्वमपि घटादिव्यक्तिभेदेन भिन्नमेवेति प्राप्तं तथा च चैत्रकर्तृकघटद्वयानयनदशायामपि तद्घटवृत्त्यानयनकर्मत्वे तस्यैवैकस्य घटस्यान्वयः सम्भवति न घटद्वयस्यापि घटद्वये एकाया आनयनकर्मताया अभावात्– आश्रयीभूतव्यक्तिभेदेनानयनकर्मताया भिन्नत्वादिति प्रतिसंदधानस्य=ज्ञानवतः पुंसः 'घटावानयति' इति वाक्यात् शाब्दबोधानुपपत्तिः=घटद्वयप्रकारकैककर्मताविशेष्यकशाब्दबोधस्यानुपपत्तिरित्याशङ्कते– अथेति, उक्तमुपपादयति– तस्येति। तस्य=उक्तपुरुषस्य कर्मतात्वावच्छेदेन=कर्मतात्वावच्छिन्नकर्मतायां आधेयतासंसर्गावच्छिन्नप्रतियोगिताकस्य=आधेयतासम्बन्धावच्छिन्ना प्रतियोगिता यस्यैवंभूतस्य द्वित्वाद्यवच्छिन्नघटाद्यभावस्य निश्चयसम्भवात् अर्थात् पूर्वोक्ताधेयतासम्बन्धेन घटद्वयाभावस्य (विषयत्वं षष्ठ्यर्थः) निश्चयसम्भवात्=निश्चयसत्त्वात् तस्य=उक्तनिश्चयस्य द्वित्वादिना तादृशसंसर्गकघटादिविशिष्टधीविरोधित्वात्=उक्ताधेयतासंसर्गेण द्वित्वविशिष्टघटप्रकारककर्मताविशेष्यकविरोधित्वात् (आधेयतासम्बन्धेन द्वित्वविशिष्टघटद्वयस्यैककर्मतायामन्वयज्ञानविरोधित्वात्) इत्यन्वयः। यदि घटद्वये आनयनकर्मत्वमेकमेव स्यात्तदा घटद्वयस्यैकानयनकर्मत्वेऽन्वयः स्यादपि न चैवमस्ति घटव्यक्तिभेदेनानयनकर्मत्वस्य भिन्नत्वात् तथा चोक्ताधेयतासंसर्गेण कर्मतायां घटद्वयस्याभावनिश्चये जाते तादृशनिश्चयस्याधेयतासम्बन्धेन कर्मतायां घटद्वयान्वयज्ञानविरोधित्वात् तादृशनिश्चयवतः

संभवात्, तस्य द्वित्वादिना तादृशसंसर्गकघटादिविशिष्टधीविरोधित्वादिति चेत्? न–उभयत्वाद्यवच्छिन्नाभाववत्ताज्ञानमुभयत्वावच्छिन्ननिरूपिताधेयतासंसर्गावगाहिज्ञानमेव प्रतिबध्नाति न तु केवलं विशेष्ये विशेषणमिति रीत्या जायमानमुभयत्वादिविशिष्टज्ञानम्, अतो विशेषदर्शिनां

पुरुषस्य 'घटावानयति' इति वाक्याद् द्वित्वविशिष्टघटप्रकारकैककर्मता-विशेष्यकशाब्दबोधो न सम्भवतीति भावः।

परिहरति– नेति। उभयत्वावच्छिन्नाभाववत्ताज्ञानम्=उक्तस्वरूपमाधेयता-सम्बन्धेनैककर्मतायां घटद्वयान्वयो न सम्भवतीत्याकारकं निश्चयात्मकं ज्ञानम् उभयत्वावच्छिन्ननिरूपिताधेयतासंसर्गावगाहिज्ञानमेव=घटद्वयनिरूपिता यैकानयनकर्मतानिष्ठा एकाधेयता तादृशाधेयतासम्बन्धेनानयनकर्मतायां घटद्वयान्वयज्ञानमेव प्रतिबध्नाति प्रथमे निश्चयात्मके प्रतिबन्धकज्ञाने आनयन-कर्मतानिष्ठाधेयतायां घटद्वयनिरूपितत्वाभावस्य विषयत्वेन द्वितीये प्रतिबध्यज्ञाने आनयनकर्मतानिष्ठाधेयतायां घटद्वयनिरूपितत्वस्य च विषयत्वेन परस्परं विरोधात्,–उक्तोभयत्वावच्छिन्नाभाववत्ताज्ञानमपि केवलं विशेष्ये विशेषण-मितिरीत्या जायमानमुभयत्वविशिष्टज्ञानं तु न प्रतिबध्नाति परस्परं विरोधाभावात्।

अयं भावः–प्रतिबन्धके आधेयतासम्बन्धेनानयनकर्मतायामुभयत्वा-वच्छिन्नघटद्वयाभावविषयकज्ञाने उभयत्वं न केवलं घटविशेषणमात्रं किं त्वानयनकर्मतानिष्ठाधेयताया निरूपिका या घटद्वयनिष्ठाऽऽधारता तादृशाधारता-वच्छेदकमप्यस्तीति एतादृशज्ञानेन यस्मिन् ज्ञाने उभयत्वं सम्बन्धभूताधेयता-निरूपकाधारताया अवच्छेदकं स्यात् तादृशज्ञानस्यैव प्रतिबन्धः सम्भवति, तथा च उभयत्वावच्छिन्ननिरूपिताधेयतासंसर्गावगाहि ज्ञानं हि 'उभयत्वाव-च्छिन्नघटद्वयनिष्ठाधारतानिरूपिता याऽऽनयनकर्मतानिष्ठाऽऽधेयता तादृशाधेयता-सम्बन्धेन घटद्वयवती आनयनकर्मता' इति ज्ञानमेव अत्र च ज्ञाने उभयत्वं सम्बन्धभूताधेयतानिरूपकाधारताया अवच्छेदकत्वेन भासते इत्युक्तोभयत्वा-वच्छिन्नाभाववत्ताज्ञानं ह्येतद् उभयत्वावच्छिन्ननिरूपिताधेयतासंसर्गावगाहिज्ञानमेव प्रतिबध्नाति, न तु यस्मिन् ज्ञाने उभयत्वं केवलं विशेष्ये घटद्वये विशेषणमात्रं

तादृशवाक्याद् दोषायत्तमाधेयत्वांशे उभयत्वाद्यवच्छिन्ननिरूपितत्वावगाहिभ्रमात्मकज्ञानं न भवत्येव अपि तु तदंशे तदनवगाहिप्रमात्मकं ज्ञानमिति। उभयत्वावच्छिन्ननिरूपिताधेयत्वं चोभयादिवृत्तावेकस्मिन् धर्मे एव न तु प्रत्येकमात्र-

---

स्यात्तादृशज्ञानमपि–'घटावानयति चैत्रः' इति वाक्यजन्यशाब्दज्ञाने चोभयत्वं घटद्वयस्य विशेषणमात्रमेव न तु सम्बन्धभूताधेयतानिरूपकाधारताया अवच्छेदकत्वेनापि भासते (येन प्रतिबध्यत्वं स्यात्) 'घटावानयति' इतिवाक्येनानयनकर्मता घटद्वयनिष्ठा एकैवेति प्रतिपादनाभावात्, घटद्वयनिष्ठानयनकर्मताया ऐक्ये आनयनकर्मतानिष्ठाधेयता एका स्यात्तदा तादृशैकाधेयतानिरूपिका घटद्वयनिष्ठा एकैवाधारता स्यादिति तादृशधारतावच्छेदकमुभयत्वं स्यादपि न चैवमस्ति व्यक्तिभेदेनानयनकर्मताया भिन्नत्वात्, तस्मादुक्तप्रतिबन्धकज्ञानेन 'घटावानयति' इति वाक्याज्जायमानस्योभयत्व (द्वित्व) विशिष्टघटप्रकारकानयनकर्मताविशेष्यकज्ञानस्य प्रतिबन्धो न भवतीत्यर्थः। स्वनिष्ठानयनकर्मतायामेव प्रत्येकघटस्य प्रकारतया भानस्वीकारात् प्रत्येकघटस्यापि द्वित्वविशिष्टत्वाच्च द्वित्वविशिष्टघटद्वयस्यैकानयनकर्मतायामन्वयास्वीकाराच्च।

अत इति– यतो व्यक्तिभेदेनानयनकर्मता (भिन्नास्त्यतस्तादृशानयनकर्मतानिष्ठाधेयतापि भिन्नास्ति न तु घटद्वयनिरूपिता (घटद्वयनिष्ठाधारतानिरूपिता) एकैवाधेयतास्तीति विशेषदर्शिनां किं वाऽऽनयनकर्मत्वमुभयत्वावच्छिन्ननिरूपिताधेयत्वाभाववदिति विशेषनिश्चयवतां पुंसां तादृशवाक्यात्='घटावानयति' इति वाक्याद् आधेयत्वांशे दोषायत्तम्=दोषाधीनमुभयत्वावच्छिन्न (घटद्वय) निरूपितत्वावगाहिभ्रमात्मकं ज्ञानं नैव भवति आधेयताया घटत्वनिरूपितत्वाभावाद् घटद्वय निरूपितत्वज्ञानं भ्रमात्मकमेव स्यात्) अपि तु तदंशे=आधेयत्वांशे तदनवगाहि=उभयत्वावच्छिन्न (घटद्वय) निरूपितत्वानगाहि प्रमात्मकमेव ज्ञानं भवतीत्यर्थः। तथा च प्रतिबन्धकत्वेनाभिमतमपि ज्ञानमाधेयत्वांशे उभयत्वावच्छिन्ननिरूपितत्वाभावावगाह्येव 'घटावानयति' इति वाक्यजन्यमपि ज्ञानमाधेयत्वांशे उभयत्वावच्छिन्ननिरूपितत्वानवगाह्येवेति परस्परं साम्येन विरोधाभावात् प्रतिबध्यप्रतिबन्धकभावो नैव सम्भवतीति यावत्। ननूक्ताधेयतायामुभयत्वावच्छिन्ननिरूपितत्वावगाहिज्ञानस्य कथं

वृत्ताविति कर्मत्वांशे तादृशाधेयत्वावगाहिज्ञानस्य भ्रमत्व-मित्यवधेयम्।

संख्याश्च प्रकृत्यर्थतावच्छेदकगतः क्वचित् प्रतीयन्ते यथा 'संपन्नौ व्रीहियवौ' इत्यादौ, एतत्तत्वं प्रागेवाभिहितम्।

विरुद्धसंख्यावच्छिन्नवाचकशतादिपदोत्तरविभक्त्युपस्थाप्या संख्या प्रकृत्यर्थतावच्छेदकसंख्यायामेवान्वेति यथा–'शतमेकम्'

भ्रमत्वमित्याशङ्क्याह– उभयत्वावच्छिन्नेति, यः खलु धर्मो घटद्वये एक एव व्यासज्यवृत्त्या वर्तेत तस्मिन् धर्मे याऽऽधेयता सैवोभयत्वावच्छिन्ननिरूपिता भवति यथा द्वित्वनिष्ठाऽऽधेयता द्वित्वं घटद्वये एकमेवेति द्वित्वनिष्ठाऽऽधेयता घटद्वयनिरूपिता=घटद्वयनिष्ठाधारतानिरूपिता भवति न तु प्रत्येकवृत्ति-धर्मनिष्ठाधेयता उभयत्वावच्छिन्ननिरूपिता भवति किम् तु प्रत्येकमात्रनिरूपितैव भवति यथा 'नीलौ घटौ' इत्यत्र नीलत्वगुणस्य घटव्यक्तिभेदेन भिन्नत्वेन प्रत्येकवृत्तित्वाद् नीलत्वनिष्ठाधेयता न घटद्वयनिरूपिता भवति किम् तु प्रत्येंकनिरूपितैव तथा 'घटावानयति' इत्यत्रापि घटव्यक्तिभेदेनानयनकर्मत्वस्य भिन्नत्वाद् आनयनकर्मत्वनिष्ठाधेयतापि प्रत्येकनिरूपिता भिन्नैव न तूभयत्वा-वच्छिन्न (घटद्वय) निरूपिता भवतीत्यानयनकर्मत्वे तादृशाधेयतावगाहिज्ञानस्य= उभयत्वावच्छिन्ननिरूपिताधेयता वर्तते इत्यवगाहिज्ञानस्य भ्रमत्वमेवेत्यर्थः।

'अत्र घटौ स्तः' 'घटावानयति' इत्यादौ प्रकृत्यर्थघटादिगतैव संख्या प्रतीयते, क्वचित प्रकृत्यर्थेन संख्यान्वयबाधे सति प्रकृत्यर्थतावच्छेदक-गतैवसंख्या प्रतीयते यथा 'सपन्नौ व्रीहियवौ' इत्यत्र संपन्नानेकव्रीहियवेषु द्विवचनार्थद्वित्वसंख्यान्वयस्य बाधात् प्रकृत्यर्थतावच्छेदकीभूतयोर्व्रीहित्व-यवत्वयोरन्वयो भवति– व्रीहित्वयवत्वजातिमन्तौ संपन्नावित्यर्थ इत्याशयेनाह– संख्या चेति। एतत्तत्त्वं=प्रकृत्यर्थतावच्छेदके संख्यान्वयतत्त्वं प्रागेव 'सम्पन्नो व्रीहिः' इत्यत्र प्रदर्शितम्। तथा चात्रापि स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसम्बन्धेन द्वित्वस्य प्रकृत्यर्थभूतव्रीहियवयोरप्यन्वयः सम्भवतीत्यादिकं तत्रैव द्रष्टव्यम्।

क्वचिच्च प्रकृत्यर्थतावच्छेदकसंख्यायामेव विभक्त्यर्थसंख्या अन्वेती-त्याह–विरुद्धेति, शतादिपदोत्तरविभक्तयुपस्थाप्या या संख्या तद्विरुद्धसंख्या-

'द्वे शते' 'त्रीणि शतानि' इत्यत्र शतत्वादावेकत्वद्वित्वबहुत्वानामन्वयः। अत एव चैकशतद्विशततात्पर्येण न 'शतानि' इति प्रयोगः– तत्र प्रकृत्यर्थस्य शतस्य बहुत्वाद्यन्वययोग्यत्वेऽपि प्रकृत्यर्थतावच्छेदकशतत्वांशे बहुत्वाद्यन्वये एव बहुवचनस्य साकाङ्क्षत्वात् तत्र च योग्यताविरहात्।

वच्छिन्नवाचकं यच्छतादिपदं तदुत्तरवर्तमानविभक्त्युपस्थाप्येत्यन्वयः। यथा– 'शतमेकम्' इत्यत्र शतपदं शतत्वसंख्यावच्छिन्नवाचकं शतपदोत्तरप्राप्तप्रथमैकवचनं चैकत्ववाचकम् एकत्वसंख्यायाः शतत्वसंख्यायाश्च परस्परं विरोधाच्छतत्वसंख्यावच्छिन्ने एकत्वसंख्याऽन्वयासम्भवात् प्रकृत्यर्थतावच्छेदकीभूतशतत्वसंख्यायां विभक्त्यर्थैकत्वस्यान्वयो भवति– अत्र शतत्वस्यैकत्वात् 'एकत्वविशिष्टं शतत्वम्' इत्यर्थः। 'एकम्' इति पदं चोक्तैकत्वस्यानुवादकं बोध्यम् एकत्वस्य स्पष्टप्रतिपत्त्यर्थं चैकपदप्रयोगः। यत्र शतत्वव्यक्ती द्वे भवतस्तत्र द्विवचनं भवति यथा– 'द्वे शते' इति 'द्वित्वविशिष्टं शतत्वम्' इत्यर्थः। एवम् 'त्रीणि शतानि' इत्यादि। यद्यप्यत्र शतत्वसंख्यापि बहुत्वरूपा बहुवचनार्थभूतापि बहुत्वसंख्येति तयोर्बहुत्वत्वेन रूपेण विरोधो नास्ति तथापि त्रिशब्दसामानाधिकरण्यादत्र शतशब्दोत्तरबहुवचनं त्रित्वसंख्योपस्थापकमेव त्रित्वसंख्यायाः शतत्वसंख्यायाश्च परस्परं विरोधाच्छत्वसंख्यावच्छिने त्रित्वसंख्यान्वयासम्भवात् प्रकृत्यर्थतावच्छेदकशतत्वे एव शतशब्दोत्तरबहुवचनार्थत्रित्वसंख्याया अन्वयः– त्रित्वविशिष्टं शतत्वमिति। 'त्रिशतं गावः' इत्यादौ तु एकत्वविशिष्ट शतत्वत्रिकावच्छिन्ना गावः' इति वाक्यार्थः। शतादिशब्दानां शक्तिस्तु शतत्वादिसंख्यावच्छिन्ने संख्येये एव। न च शतत्वादिसंख्यायामेकत्वद्वित्वादिसंख्यान्वयासम्भवः– गुणे गुणानङ्गीकारादिति वाच्यम्, अत्रैकत्वद्वित्वादीनामपेक्षाबुद्धिविषयत्वरूपत्वेन शतत्वादिसंख्यायामन्वये विरोधाभावात्। एकादिपदं चानुवादकमपि सन्न व्यर्थम्–"संभेदे नान्यतरवैयर्थ्यम्" इति न्यायादिति विभावनीयम्।

अत एव=विरुद्धसंख्यावच्छिन्नवाचकशतादिपदोत्तरविभक्त्युपस्थाप्या च संख्या प्रकृत्यर्थतावच्छेदकसंख्यायामेवान्वेतीति नियमस्वीकारादेव। तत्र=एकशततात्पर्येण द्विशततात्पर्येण वा कृते 'शतानि' इति प्रयोगे। तत्र=शतत्वे। एकशततात्पर्येण वा द्विशततात्पर्येण वा 'शतानि' इतिप्रयोगकाले प्रकृत्यर्थे

न चैकशतेऽपि नानापुरुषीयापेक्षाबुद्धिजन्यनानाशतत्व-संभवादेकशतनिष्ठशतत्वेऽपि बहुत्वान्वययोग्यताऽक्षतैवेति वाच्यम्, परस्परसमानाधिकरणद्वयाऽवृत्तिबहुत्वस्यैव शतादि-पदोत्तरबहुवचनार्थत्वात् तादृशबहुत्वस्य चैकशतादिवृत्ति-

शतत्वसंख्याविशिष्टे बहुत्वमस्तीति बहुवचनार्थबहुत्वान्वययोग्यताप्यस्ति यद्यपि तथापि तत्रान्वयस्वीकारो नास्ति यत्र च प्रकृत्यर्थतावच्छेदकीभूतशतत्वे शतपदोत्तरबहुवचनार्थबहुत्वस्यान्वय इष्टस्तत्र शतत्वे तदानीं बहुत्वाऽभावाद् बहुत्वान्वययोग्यता नास्ति– एकशतविषयकतात्पर्ये सति शतत्वव्यक्तेरेकत्व-विशिष्टत्वाद् द्विशतविषयकतात्पर्ये च सति द्वित्वविशिष्टत्वादित्यर्थः। एकशतद्विशततात्पर्येण 'शतानि' इति प्रयोगो न भवतीति विनिगमनायाः सत्त्वादेव विरुद्धसंख्यावच्छिन्नवाचकेत्याद्युक्तनियमः स्वीक्रियते अन्यथा बहुवचनार्थबहुत्वस्य शतत्वसंख्यावच्छिन्नप्रकृत्यर्थेऽन्वयसंभवे एकशतद्विशत-तात्पर्येणापि 'शतानि' इति प्रयोगः स्याद् न चैतदिष्टम्।

ननु शतत्वादिसंख्या ह्यपेक्षाबुद्धिजन्यैव भवति अपेक्षाबुद्धिश्च पुरुषभेदेन भिन्नेत्येकस्मिन्नपि शते देवदत्तयज्ञदत्तादिनानापुरुषीयापेक्षाबुद्धिभिर्नानाश-तत्वोत्पत्त्या एकशतद्विशततात्पर्यकालेप्येकशतादौ नानाशतत्वसम्भवात् तादृशनानाशतत्वेषु बहुत्वसत्त्वेन बहुवचनार्थबहुत्वान्वययोग्यतायाः सम्भवाद् एकशतद्विशततात्पर्यकालेऽपि 'शतानि' इति प्रयोगः कथं न स्यादित्याशङ्कते–न चेति। परिहारमाह–परस्परेति, नानापुरुषीयापेक्षाबुद्धिजन्यनानाशतत्वानि परस्परं समानाधिकरणान्येव भवन्ति– एकस्मिन्नेव शते वर्तमानत्वात्, शतादिपदोत्तर-बहुवचनार्थभूतबहुत्वं च परस्परसमानाधिकरणद्वयाऽवृत्तिबहुत्वमेव भवति यथा बहुशततात्पर्ये सति 'शतानि' इत्यत्र शतत्रये पृथक् पृथक् शते शतत्वं वर्तते इत्येतादृशशतत्वानि परस्परं व्यधिकरणान्येवेति तत्र शतत्रयगतशतत्वत्रये यद् बहुत्वं तत् परस्परसमानाधिकरणम्=एतत्तृतीयशतत्वसमानाधिकरणं यच्छतत्वद्वयं तद्वृत्तिर्न भवति तादृशबहुत्वस्य परम्पराऽसमानाधिकरणशतत्वेषु वर्तमानत्वाद् एतादृशं परम्पराऽसमानाधिकरणशतत्वेषु वर्तमानमेव बहुत्वं च शतपदोत्तरबहुवचनार्थ इति तस्य बहुशततात्पर्ये सत्येव शतत्वेष्वन्वयः सम्भवति न त्वेकशतद्विशततात्पर्ये सत्यपि– तादृशबहुत्वस्य=परम्परा-ऽसमानाधिकरणशतत्वेषु वर्तमानस्य बहुवचनार्थभूतबहुत्वस्य एकशतवृत्त्यपेक्षा-

नानाशतत्वादौ बाधात्। अथवा तत्रापि बहुत्वमेव बहुवचनार्थः, परस्परसमानाधिकरणद्वयावृत्तिपर्याप्तिरेवाकाङ्क्षानिरूपकः संबन्धः।

यत्तु 'द्वे शते' 'त्रीणि शतानि' इत्यादौ संख्यैव शतादि-

बुद्धिजन्योक्तनानाशतत्वेषु बाधात्, तस्मादेकशतद्विशततात्पर्येण 'शतानि' इति प्रयोगापत्तिर्नास्त्येवेत्यर्थः। एकस्मिन्नेव शते यदा नानापुरुषीयापेक्षाबुद्धिभिर्नानाशतत्वान्युत्पद्यन्ते तत्र तादृशनानाशतत्वेषु वर्तमानं बहुत्वं परस्परसमानाधिकरणम्=बहुत्वाश्रयीभूततृतीयशतत्वसमानाधिकरणं यच्छतत्वद्वयं तद्वृत्त्येव भवति तत्र बहुत्वाश्रयीभूतसकलशतत्वानामेकस्मिन्नेव शते वर्तमानत्वेन समानाधिकरणत्वात्, न चैतादृशं परस्परसमानाधिकरणनानाशतत्वेषु वर्तमानं बहुत्वं बहुवचनार्थो भवति येनैकशतगतनानाशतत्वान्याश्रित्यैकशतद्विशततात्पर्येणापि 'शतानि' इति प्रयोगः स्यादित्यर्थः।

पक्षान्तरमाह—अथ वेति। यथान्यत्र सर्वत्र बहुत्वमेव बहुवचनार्थस्तथा तत्रापि='शतानि' इत्यत्रापि परस्परसमानाधिकरणद्वयावृत्तित्वविशेषणरहितमेव बहुत्वं बहुवचनार्थम् इत्यत्र बहुत्वस्य परस्परसमानाधिकरणद्वयावृत्तिपर्याप्तिः सम्बन्ध इत्युच्यते तथा च बहुशततात्पर्ये सति 'शतानि' इति प्रयोगो भवति—तत्र बहुत्वाश्रयीभूतशतत्वत्रयस्य पृथक् पृथक् शते वर्तमानत्वेन समानाधिकरणत्वाभावात् परस्परसमानाधिकरणम्=तृतीयशतत्वसमानाधिकरणं यच्छतत्वद्वयं तदवृत्तिर्या बहुत्वपर्याप्तिस्तादृशपर्याप्तिसम्बन्धेन बहुवचनार्थ-बहुत्वस्य शतत्वत्रये वर्तमानत्वात् बहुत्वपर्याप्तेर्बहुशतत्वेष्वेव सम्भवादित्यर्थः। एकशतद्विशतविषयकतात्पर्ये च सत्येकशतगतनानापुरुषीयापेक्षाबुद्धिजन्यनानाशतत्वेषु बहुत्वस्य परस्परसमानाधिकरणद्वयावृत्तिपर्याप्तिसम्बन्धेन वृत्तित्वं न सम्भवति यतः— एकशतगतनानापुरुषीयापेक्षाबुद्धिजन्यनानाशतत्वानामेकशतगतत्वेन समानाधिकरणत्वात् तेषु वर्तमानस्य बहुत्वस्य बहुत्वाश्रयीभूततृतीयशतत्वसमानाधिकरणशतत्वद्वयेऽपि पर्याप्तिरस्त्येवेति तत्र बहुत्वं परस्परसमानाधिकरणद्वय (शतत्वद्वय) वृत्तिपर्याप्तिसम्बन्धेनैव वर्तते न चैतादृशपर्याप्तिसम्बन्धेन बहुत्वमिष्टमिति नैकशतद्विशतविषयकतात्पर्येण 'शतानि' इति प्रयोगापत्तिः।

परिहाराय मतान्तरमनुवदति—यत्त्विति, 'शतानि' इत्यत्र शतादिशब्दानां

शब्दार्थो न तु संख्येयम्, संख्येयस्य तदर्थत्वे "विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः" इत्यनुशासनविरोधाद् द्विवचनादिसाधुतानुपपत्तेः 'गवां शतानि' इत्यादौ षष्ठ्य-

---

संख्येयवाचकत्वे शतत्वादेः संख्येयपदार्थतावच्छेदकत्वं प्राप्तं तत्र शतत्वादौ शतपदोत्तरबहुवचनाद्यर्थबहुत्वादेरन्वये च "प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थ-बोधकत्वम्" इति नियमस्य परित्यागः स्यादेव—प्रकृत्यर्थभूतसंख्येये समन्वया-भावात् संख्येयार्थावच्छेदकीभूते शतत्वादावन्वयात्, तथा शतादिशब्दानां संख्येयवाचकत्वे "विंशत्याद्याः" इत्यनुशासनेनैकवचनान्तत्वं प्रतिपाद्यते 'द्वे शते' 'त्रीणि शतानि' इत्यत्र तु द्विवचनान्तो बहुवचनान्तश्च प्रयोगोऽस्तीत्युक्ता-नुशासनविरोधोऽपि संख्येयवाचकत्वेऽत्र प्राप्तः, उक्तानुशासनविरोधादेव शतादिशब्दस्य संख्येयवाचकत्वे 'द्वे शते' 'त्रीणि शतानि' इत्यादौ द्विवचनादेः साधुत्वानुपपत्तिरपि प्राप्ता, तथा शतादिशब्दानां संख्येयवाचकत्वे 'गवां शतानि' इत्यादौ गोपदोत्तरषष्ठ्यर्थस्यान्वयानुपपत्तिरप्यस्ति—षष्ठ्यर्थस्य भेदसम्बन्धस्य क्वचिदप्यन्वयो न सम्भवति—यथा 'घटस्य नीलः' इत्यत्र 'घटवृत्तिर्नीलः' इति बोधो जायते तथात्र 'गोवृत्तीनि शतसंख्येयानि' इत्यपि बोधो नोपपद्यते तस्मात् शतादिशब्दा न संख्येयवाचकाः किन्तु संख्यावाचका एवेति स्वीकार्यम्, संख्यावाचकत्वे तु शतादिपदोत्तरबहुवचनाद्यर्थबहुत्वादेः प्रकृत्यर्थशतादिसंख्यायामेवान्वयात् "प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्" इति नियमरक्षापि भवति, तथा संख्यावाचकत्वे "संख्यायां द्विबहुत्वे स्तः" इत्यनेन द्विवचनान्तत्वबहुवचनान्तत्वयोरपि बोधनात् 'द्वे शते' 'त्रीणि शतानि' इत्यत्रानुशासनविरोधोऽपि नास्तीति द्विवचनादिसाधुतानुपपत्तिरपि नास्ति, 'गवां शतानि' इत्यत्र षष्ठ्यर्थान्वयानुपपत्तिरपि नास्ति 'घटस्य नीलः' इत्यत्र 'घटवृत्तिर्नीलः' इति बोधवदत्रापि 'गोवृत्तीनि बहूनि शतत्वानि' इति बोध उपपद्यते संख्यायाः संख्येयपदार्थवृत्तित्वे विरोधाभावादित्यर्थः। ननु 'गवां शतानि' इत्यत्राभेद एव षष्ठ्यर्थस्तथा च शतशब्दस्य संख्येयपरत्वे 'गवाभिन्नानि— शतसंख्येयानि' इति वाक्यार्थबोधो भविष्यतीत्याशङ्क्याह— न चेति। परिहारमाह— तथा सतीति, यद्यभेदोऽपि षष्ठ्यर्थः स्यात्तदा 'ब्राह्मणा दश' (दशसंख्याका ब्राह्मणः इत्यस्य स्थाने 'ब्राह्मणानां दश' इत्यपि प्रयोगः स्यात्—अभेदबोधसम्भवात्, न च 'ब्राह्मणानां दश' इति प्रयोगो भवतीति

र्थान्वयानुपपत्तेश्च। न चाभेदः षष्ठ्यर्थः—तथा सति 'ब्राह्मणा दश' इत्यत्र 'ब्राह्मणानां दश' इत्यपि स्यात्। अस्माकं चादशतः संख्याः संख्येये वर्तन्ते अतः परं संख्याने संख्येये च इत्यनुशासनाद् दशादिशब्दानां शतादिशब्दवत् संख्या-नार्थकत्वाभावात्। दशत्वादिसंख्यायाः पदार्थतावच्छेदकत्वेन तत्र षष्ठ्यर्थसंबन्धान्वयासंभवेन न तथाप्रयोग इति।

नाऽभेदः षष्ठ्यर्थस्तथा च शतादिशब्दानां संख्येयवाचकत्वे 'गवां शतानि' इत्यादौ षष्ठ्यर्थान्वयानुपपत्तिस्तदवस्थेति संख्यैव शतादिशब्दार्थ इत्यर्थः।

स्वमतमाह— अस्माकं चेति, "संख्येये ह्यादश त्रिषु" इत्यनुशासनाद् आदशतः=एकमारभ्याष्टादशपर्यन्ताः संख्यावाचकाः शब्दाः संख्येयवाचका एव यथा 'एकः पटौ द्वौ पटौ दश ब्राह्मणा अष्टादश गावः' इति तथा च दशशब्दस्य संख्येयपरत्वेनाऽभेदबोधनार्थम् 'ब्राह्मणा दश' इत्येव प्रयोगो भवति न तु 'ब्राह्मणानां दश' इत्यपि—अभेदबोधासम्भवात्। अतः परम्= अष्टादशसंख्यातः परम् एकोनर्विंशत्यादिसंख्यावाचकाः शब्दाः संख्यावाचकाः संख्येयवाचकाश्च भवति तत्र संख्येयवाचका यथा—'एकोनविंशतिः पटाः' 'शतं गावः' इत्यादि, संख्यावाचका यथा 'पटानामेकोनविंशतिः' 'गवां शतम्' इत्यादि, तथा च शतादिशब्दवत्=यथा शतादिशब्दानाम् "विंशत्याद्याः" इत्यनुशासनेन संख्यानार्थकत्वम्=संख्यावाचकत्वमस्ति तथा दशादिशब्दानाम्= एकमारभ्याष्टादशपर्यन्तसंख्यावाचकानां दशादिशब्दानाम् 'संख्येये ह्यादश त्रिषु" इत्यनुशासनात्संख्येयमात्रवाचकत्वेन संख्यानार्थकत्वाभावात्= संख्या-वाचकत्वमेव नास्ति येन 'ब्राह्मणानां विंशतिः' इतिवत् 'ब्राह्मणानां दश' इत्यपि प्रयोगः स्यात्। दशादिशब्दानां संख्यावाचकत्वे "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति व्युत्पत्तेर्विरोधमप्याह— दशत्वादीति, दशादिशब्दानां संख्यावाचकत्वे संख्यायाश्च पदार्थतावच्छेदकत्वेन पदार्थत्वाभावात् तत्र षष्ठ्यर्थस्य वृत्तित्वस्य दशत्वसंख्यायामन्वयो न संभवतीतिहेतोरपि तथा= 'ब्राह्मणानां दश' इति प्रयोगो न भवति ब्राह्मणानां विंशतिः' इत्यादौ तु "विंशत्याद्याः" इत्यनुशासनबलात् विवशम् "पदार्थः पदार्थेनान्वेति" इति व्युत्पत्तेः संकोचं कृत्वा पदार्थतावच्छेदकीभूतविंशतित्वादिसंख्यायां षष्ठ्यर्थान्वयः स्वीक्रियते यथा—'ब्राह्मणवृत्ति विंशतित्वम्' इति, एवमेव 'गवां शतानि'

तदसत्–'गवां शतानि' इत्यादौ संख्यायाः प्राधान्येन शतादिशब्दवाच्यत्वे 'गवां शतं दद्यात्' इत्यादौ शतादिपदार्थस्य संख्याया दानादिकर्मत्वान्वयाऽयोग्यतया प्रामाण्यानुपपत्तिः, 'गवां शतं शुक्लम्' इत्यादौ संख्यायां शुक्लाद्यभेदान्वय-योग्यताविरहात् तदनुपपत्तिश्च, तस्माद् दशादिशब्दा इव विंशतिशतसहस्त्रादिशब्दा अपि संख्यावच्छिन्नवाचका एव न तु धर्मिविशेषणतानापन्नसंख्यावाचकाः।

इत्यस्यापि 'गोवृत्तीनि शतत्वानि' इत्येवार्थस्तथा च सिद्धम्–'द्वे शते' 'त्रीणि शतानि' इत्यादौ संख्यैव शतादिशब्दार्थ इत्यर्थः।

परिहरति– तदसदिति, यदुक्तम् 'द्वे शते' 'त्रीणि शतानि' इत्यादौ संख्यैव शतादिशब्दार्थो न तु संख्येयमिति तन्न युक्तं एवं हि 'गवां शतानि' इत्यत्रापि शतशब्दवाच्या संख्यैव स्यात् तथा च 'गवां शतं दद्यात्' इत्यत्रापि शतशब्दवाच्या संख्यैव स्यात् संख्यायाश्च दानकर्मत्वं न सम्भवतीति शतसंख्याया दानकर्मत्वेऽन्वययोग्यताया असंभवाद् असंभावितार्थबोधकत्वात् 'गवां शतं दद्यात्' इत्यस्याप्रामाण्यं स्यात्, एवम् 'गवां शतं शुक्लम्' इत्यत्रापि शतशब्दवाच्या प्राधान्येन संख्यैव स्यात् तथाच 'गवां शतं दद्यात्' शुक्लत्वगुणेनाभेदो वा न सम्भवतीति 'गवां शतं शुक्लम्' इति वाक्यस्यापि तदनुपपत्तिः=प्रामाण्यानुपपत्तिः, तस्माद् यथा दशादिशब्दाः संख्यावच्छिन्न-संख्येयवाचकास्तथा शतादिशब्दा अपि संख्यावच्छिन्नसंख्येयवाचका एव न तु प्राधान्येन संख्यावाचकास्तथा च 'गवां शतं दद्यात्' इत्यत्र शतशब्दस्य संख्येयवाचकत्वे प्राप्ते संख्येयस्य च दानकर्मत्वयोग्यत्वान्न प्रामाण्यानुपपत्तिः, तथा 'गवां शतं शुक्लम्' इत्यत्रापि शतशब्दस्य संख्येयवाचकत्वे प्राप्ते संख्येयस्य च शुक्लत्वगुणेनाऽन्वययोग्यत्वेन शुक्लपदार्थेनाभेदान्वययोग्यत्वान्न प्रामाण्यानुपपत्तिरित्यर्थः। धर्मिविशेषणतानापन्नेति– यथा घटादिशब्दानां घटाद्य-वच्छेदकीभूतघटत्वादिवाचकत्वमपि भवति– घटादिवाचकत्वाद् घटादिपदार्थानां घटत्वादिविशिष्टत्वात् तथा विंशत्यादिसंख्याशब्दानामपि संख्याविशिष्ट-संख्येयवाचकत्वमेवेति संख्येयरूपधर्मिविशेषणतापन्नसंख्यावाचकत्वमपि प्राप्तमेवेत्येव युक्तं न तु धर्मिविशेषणताऽनापन्नसंख्यावाचकत्वम्=केवलं संख्यामात्रवाचकत्वमित्यर्थः।

स्वार्थैकदेशेऽपि संख्यायां स्वप्रकृतिकविभक्त्यर्थ-संख्यान्वयसाकाङ्क्षतयाऽन्यप्रकृतिकषष्ठ्यर्थसंबन्धान्वय-साकाङ्क्षतया च तेषां संख्यानार्थकताप्रवादो न तु दशादिशब्दानां

ननु यदि 'गवां शतानि' 'गवां शतं दद्यात्' इत्यादौ शतादिशब्दानां संख्येयवाचकत्वमेव न च संख्यावाचकत्वं तदा सर्वत्र संख्येयवाचकत्वमेव स्यात्तथा च शतादिशब्दानां संख्यावाचकत्वं कथमुच्यते जनैः तथा दशादिशब्दानां केवलं संख्येयमात्रवाचकत्वं न संख्यावाचकत्वमित्यपि कथमुच्यते? इत्याशङ्क्य शतादिशब्दानां संख्यावाचकत्वप्रवादमुपपादयति– स्वार्थैकेति। दशादिशब्दानां संख्येयमात्रवाचकत्वप्रवादं चोपपादयति–दशादिब्राह्मणेति। 'एकं शतम्' इत्यत्र स्वार्थैकदेशे=स्वार्थैकदेशभूतायां संख्यायाम्=शतत्वसंख्यायां स्वप्रकृतिकविभक्त्यर्थसंख्यान्वयसाकाङ्क्षतया=एवं शतशब्दस्तत्प्रकृतिक-विभक्तिः शतपदोत्तरप्रथमाविभक्तिस्तदर्थभूतैकत्वसंख्याया अन्वये साकाङ्क्षतया (एकं शतत्वमिति बोधात्) तेषाम्=शतादिशब्दानां संख्यानार्थकताप्रवादः= संख्यावाचकत्वप्रवादोऽस्ति–शतादिपदोत्तरविभक्त्यर्थभूतसंख्यायाः शतत्वादि-संख्यायामन्वयस्वीकारादित्यर्थ एतच्च पूर्वमेव 'विरुद्धसंख्यावच्छिन्नवाचक' इत्यादिनोक्तम्, तथा स्वार्थैकदेशसंख्यायां शतत्वादौ अन्यप्रकृतिकषष्ठ्यर्थ-सम्बन्धान्वयसाकाङ्क्षतया='गवां शतम्' इत्यत्रान्यप्रकृतिका=गोपदप्रकृतिका या गवामिति गोपदोत्तरषष्ठी तदर्थो यो वृत्तित्वसम्बन्धस्तस्यान्वये साकाङ्क्षतया च तेषां शतादिशब्दानां संख्यानार्थकताप्रवादोस्ति– 'गवां शतम्' इत्यत्र गोवृत्तिशतत्वम् गोवृत्तित्वाश्रयतावच्छतत्वमिति बोधोदयात् षष्ठ्यर्थवृत्तित्वस्य शतत्वादावन्वयस्वीकारात् संख्यावाचकत्वप्रवाद एव, संख्येयवाचकत्वं तु युक्तमेव 'गवां शतं दद्यात्' इत्यादिप्रयोगात्। दशादिशब्दानां च तथात्वम्= स्वप्रकृतिकविभक्त्यर्थसंख्यान्वयसाकाङ्क्षत्वं तथाऽन्यप्रकृतिकषष्ठ्यर्थ-सम्बन्धान्वयसाकाङ्क्षत्वं च नास्तीति दशपदोत्तरविभक्त्यर्थसंख्यायास्तथा ब्राह्मणपदाद्युत्तरषष्ठ्यर्थवृत्तित्वस्य दशत्वसंख्यायामन्वयासंभवान्न दशादिशब्दानां संख्यानार्थकताप्रवाद इत्यर्थः। दशादिशब्दानां संख्येयमात्रवाचिताप्रवाहकारणमाह– दशादिब्राह्मणेति, यदि दशादिशब्दानामपि संख्यावाचकत्वं स्यात्तदा 'ब्राह्मणानां शतम्' इतिवत् 'ब्राह्मणानां दश' इत्यपि प्रयोगः स्याद् न चैवं प्रयोगो भवतीति न दशादिशब्दानां संख्यावाचकत्वं किन्तु 'ब्राह्मणा दश' इत्येव प्रयोगो भवतीति तेषाम्=दशादिशब्दानां संख्येयमात्रवाचिताप्रवादोऽस्ति, वस्तुस्तु

तथात्वं दशादिब्राह्मणतात्पर्येण 'ब्राह्मणानां दश' इत्यादिप्रयोग-विरहादिति तेषां संख्येयमात्रवाचिताप्रवाद इति, "विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः। संख्यार्थे द्विबहुत्वे स्तः" इत्यनुशासनमप्युक्तार्थे तात्पर्यग्राहकम्।

सर्वेषामेव दशादिशब्दानां शतादिशब्दानां च संख्यावच्छिन्नवाचकत्वमेवास्ति तत्र 'ब्राह्मणा दश' इत्यादौ दशादिशब्दोत्तरविभक्त्यर्थसंख्यायाः प्रकृत्यर्थे दशादावेवान्वयो भवति न तु दशत्वादावित्येव दशादिशब्दानां संख्येय-वाचकत्वम्, विभक्त्यर्थसंख्याया दशत्वादावन्वयासम्भवादेव इति प्रयोगो न भवति, शतत्वादान्वयसंभवादेव 'ब्राह्मणानां शतम्' इति प्रयोगस्तु भवति। शतादिशब्दोत्तरविभक्त्यर्थसंख्यायास्तु प्रकृत्यर्थतावच्छेदकशतत्वादावप्यन्वयो भवतीत्येव शतादिशब्दानां संख्यानार्थकता वस्तुतस्तु संख्यावच्छिन्नबोधकत्वमेव, तत्रापि यत्र शतादिशब्दोत्तरविभक्त्यर्थसंख्यायाः शतत्वादिसंख्यायामन्वयस्तत्र वचनत्रयमेव भवति यथा 'गवां शतं शते शतानि' इति, यत्र च प्रकृत्यर्थे एवान्वयस्तत्रैकवचनमेव यथा 'शतं गावः' इति विवेकः। अत्रामरकोशं प्रमाणयति– विंशत्याद्येति। उक्तार्थे=विंशत्यादिशब्दोत्तरविभक्त्यर्थसंख्यायाः प्रकृत्यर्थे विंशत्यादावन्वये विंशत्यादिशब्दानामेकवचनान्तत्वं प्रकृत्यर्थतावच्छेदके विंशतित्वादावन्वये च वचनत्रयान्तत्वमेव यथायोग्यं भवतीत्यमरवाक्यस्यार्थ एतदेवोक्तम्= संख्यार्थे इति। अत्र च "उक्तार्थे तात्पर्यग्राहकमिति विंशत्याद्याः संख्याः (संख्याशब्दाः) संख्येयसंख्ययोर्वाचका इति नार्थः किं तु संख्येयसंख्यान्यतरविशेष्यकैकत्वादिरूपविभक्त्यर्थप्रकारकान्वयबोधपरा इत्येवानुशासनार्थः–'शतं गावः' 'गवां शतम्' इत्युभयविधप्रयोगदर्शनात्, संख्येयमात्रविशेष्यकशतत्वादिप्रकारकबोधपराः शतादिसंख्यावाचकशब्दाः सदैकत्वे वर्तते 'शतं ब्राह्मणाः' इति प्रयोगदर्शनात्, संख्यायाम्=शतत्वादिसंख्या-विशेष्यकशतादिपदोत्तरैकवचनद्विवचनबहुवचनार्थैकत्वद्वित्वबहुत्वप्रकारक-बोधपराः शतादिसंख्यावाचकाः शब्दा एकवचनान्ता द्विवचनान्ता बहुवचनान्ता अपीत्यर्थः–'गवां शतं शते शतानि' इति प्रयोगात्– एकं शतत्वं द्वे शतत्वे त्रीणि शतत्वानीत्यर्थादिति" इति कृष्णंभट्टाः।

एकेति– एकशब्दोत्तरमेकवचनं द्विशब्दोत्तरं द्विवचनं बहुशब्दोत्तरं च बहुवचनं संख्याबोधकं न भवति संख्याबोधकत्वं ह्येकमित्यत्रोद्देश्यता-

एकद्विबहुशब्दोत्तरैकवचनद्विवचनबहुवचनानि च न संख्याबोधकानि– उद्देश्यतावच्छेदकविधेययोरैक्येनैकत्वाद्यन्वये आकाङ्क्षाविरहादिति तदुत्तरं प्रथमाविभक्तिः प्रयोगसाधुता-मात्राय।

नित्यबहुवचनान्ताऽबादिशब्दपरं प्रथमाबहुवचनमपि क्वचिन्निरर्थकमेव– यत्रैकव्यक्तिमात्रतात्पर्येण तादृशशब्दः प्रयुज्यते तत्र बहुत्वान्वये योग्यताविरहात्।

यत्तु तद्गतगुणादिसाधारणबहुत्वस्य तत्रान्वय इति, तत्र शोभनम्– प्रकृत्यर्थतावच्छेदकव्याप्यपर्याप्तिसंबन्धेनैवाऽने-कवृत्तिसंख्यान्वयस्य व्युत्पन्नतया तादृशसंबन्धेन तथाविध-

वच्छेदकमप्येकत्वं विधेयमप्येकमेव द्वावित्यत्र द्वित्वमेव स्याद् बहव इत्यत्र बहुत्वमेव स्यात्तथा चोद्देश्यतावच्छेदकविधेयोरैक्ये जाते एकत्वादेः-प्रकृत्यर्थेनान्वये आकाङ्क्षा न सम्भवतीति न संख्याबोधकत्वं किन्तु साधुत्वार्थत्वमेव, एतच्च पूर्वमेव "एवमुद्देश्यतावच्छेदकविधेययोरैक्येन" इत्यत्र प्रतिपादितम्।

नित्येति– यथा एकद्विबहुशब्देभ्यो जायमाना प्रथमा विभक्तिर्निरर्थकैव तथा नित्यबहुवचनान्ताऽबादिशब्दोत्तरवर्तमानमपि प्रथमाबहुवचनं क्वचिन्नि-रर्थकमेव– यत्रैकजलव्यक्तितात्पर्येण 'आपः' इत्युच्यते तत्र प्रकृत्यर्थभूतैक-जलव्यक्तौ बहुवचनार्थबहुत्वस्यान्वयासम्भवादित्यर्थः। तादृशशब्दः=आपः इति शब्दः। आदिपदेन नित्यबहुवचनान्तदारादिपदं ग्राह्यम्।

ननु 'आपः' इत्यत्रैका जलव्यक्तिरनेकाश्च जलगतमाधुर्यादिगुणव्यक्तय इति मिलित्वा तत्र बहुत्वमस्त्येवेति तत्र प्रथमाबहुवचनार्थबहुत्वस्यान्वये न योग्यताविरह इति नाबादिशब्दोत्तरप्रथमाबहुवचनं निरर्थकमित्याशङ्कते– यत्त्विति। परिहरति– तन्नेति। परिहारहेतुमाह–प्रकृत्यर्थेति, अनेकवृत्तिसंख्यान्वयस्य= द्वित्वबहुत्वादिसंख्याया अन्वयस्तु प्रकृत्यर्थतावच्छेदक=उद्देश्यतावच्छेदक-व्याप्यपर्याप्तिसम्बन्धेनैव भवतीति पूर्वम् "उद्देश्यतावच्छेदक-व्याप्यत्वविशिष्टपर्याप्तेरेव संसर्गतोपगमात्" इत्यनेन प्रतिपादितम् 'आपः'

बहुत्वान्वये योग्यताविरहात्। अन्यथा– उदासीनघट- पटादि-साधारणबहुत्वस्याप्यन्वयसंभवेन तद्गतगुणादिसाधारण-बहुत्वानुधावनस्याऽकिञ्चित्करत्वात्।

अथाऽजहत्स्वार्थलक्षणया गुणादिसाधारणधर्मावच्छिन्न एव प्रकृत्यर्थ इति चेत्, तर्हि बहुत्वेन भासमानेषु गुणादिष्वपि पदार्थान्तरान्वयः स्यात् तथा च 'आपो द्रव्याणि' 'दारा अत्र गृहे सन्ति' इत्यादिवाक्यानामप्रमाणतापत्तिः–गुणादिषु

इत्यत्र प्रकृत्यर्थता-(उद्देश्यता)-वच्छेदकं जलत्वमेव तथा च जलत्वव्याप्य-बहुत्वपर्याप्तिजले एव सम्भवति न तु जलगतगुणेष्वपीति तादृशसम्बन्धेन=जलत्वव्याप्यपर्याप्तिसम्बन्धेन तथाविधबहुत्वान्वये=जलत्वव्याप्यपर्याप्तिक-बहुत्वस्यान्वये जलगतगुणानां योग्यता नास्ति– जलीयगुणेषु जलत्वाभावादिति नाऽप्शब्दोत्तरप्रथमाबहुवचनार्थबहुत्वस्य जलेन सह जलीयगुणेष्वन्वयः संभवति येन प्रथमाबहुवचनस्य निरर्थकत्वं न स्यादित्यर्थः। अन्यथा=यदि 'आपः' इत्यत्र जलगतगुणवृत्ति संख्यामादाय बहुत्वान्वयो युक्तः स्यात्तदा जलसमीप-वर्तिघटपटादिवृत्तिसंख्यामादायापि घटपटादिसाधारणस्यापि बहुत्वस्य जलेऽन्वय-संभवाज्जलगतगुणादिसाधरणबहुत्वपर्यन्तानुधावनमपि व्यर्थमेव स्यात् न च 'आपः' इत्यत्र जले घटपटादिसाधारणबहुत्वस्यान्वयो युक्तस्तथा जलीयगुण-साधारणबहुत्वस्याप्यन्वयो न युक्त इति प्रथमाबहुवचनं निरर्थकमेवेत्यर्थः। एवम् 'दाराः' इत्यादावपि बोध्यम्।

ननु 'आपः' इत्यत्र न जलत्वमात्रावच्छिन्नः प्रकृत्यर्थो येन जलत्व-व्याप्यपर्याप्तेः सम्बन्धत्वेन तादृशसम्बन्धेन जलीयगुणेषु बहुत्वान्वयोपपत्तिर्न स्यात् किं तु अजहत्स्वार्थलक्षणया=स्वार्थजलमत्यक्त्वैव जलजलगत-गुणोभयसाधारणो यस्तृट्शामकत्वादिरूपो धर्मस्तदवच्छिन्न एव प्रकृत्यर्थस्तथा च प्रकृत्यर्थतावच्छेदक तृट्शामकत्वं तादृशतृट्शामकत्वव्याप्यबहुत्वपर्याप्तेर्जले इव जलगुणेष्वपि सत्त्वादेव तृट्शामकत्वव्याप्यपर्याप्तिसम्बन्धेन बहुत्वस्य जलजलगतगुणसाधारण्येनान्वये न काचिदनुपपत्तिरिति न प्रथमाबहुवचनं निरर्थकमित्याशङ्कते– अथेति। परिहरति– तर्हीति, एवं हि 'अनेकवृत्तिसंख्याया यावत्स्वन्वयो भवति तावत्स्वेव पदार्थान्तरस्यान्वयो भवति यथा 'अत्र घटौ

द्रव्याभेदगृहवृत्तितादेर्बाधात् मुख्यार्थमात्रपरतादृशशब्दानां बहुवचनान्ततानुपपत्तिश्चेति न किञ्चिदेतत्। अबादिपदार्थे एकत्वद्वित्वान्वययोग्यतासत्त्वेऽप्यसाधुत्वादेव तदुत्तरमेकवचनं न प्रयुज्यते इति ध्येयम्।

स्तः' इत्यत्र द्वित्वाधिकरणघटद्वये एवैतद्देशवृत्तित्वस्यान्वयो भवति' इति पूर्वोक्त (१५८) नियमेनात्रापि 'आपो द्रव्याणि' इत्यत्र बहुत्वेन भासमानेषु= बहुत्वाधिकरणत्वेन भासमानेषु जलीयगुणेष्वपि द्रव्याभेदरूपपदार्थान्तरस्यान्वयः स्याद् न च द्रव्यगुणयोरभेदः सम्भवतीति जलगुणेषु द्रव्याभेदस्य बाधात्= बाधितत्वात् बाधितार्थप्रतिपादकत्वात् 'आपो द्रव्याणि' इत्यस्याप्रामाण्यं स्यात् एवम्– 'दारा अत्र गृहे सन्ति' इत्यत्रापि बहुत्वाधिकरणत्वेन भासमानेषु दारगुणेष्वप्येतद्गृहवृत्तित्वरूपपदार्थान्तरस्यान्वयः स्यात् न च दारगुणेष्व-तद्गृहवृत्तित्वमस्तीति गृहवृत्तितादेर्बाधाद् बाधितार्थप्रतिपादकत्वात् 'दारा अत्र गृहे सन्ति' इति वाक्यस्याऽप्रामाण्यं स्याद् न च 'आपो द्रव्याणि' 'दारा अत्र गृहे सन्ति' इत्यादिवाक्यानामप्रामाण्यमिष्टमिति नात्र गुणादि-साधारणधर्मावच्छिन्नः प्रकृत्यर्थः किन्तु जलत्वावच्छिन्नो दारत्वा-वच्छिन्नश्चेत्येकजलव्यक्तौ बहुत्वान्वयासम्भवात् 'आपः' इत्यत्र बहुवचनं निरर्थकमेवेत्यर्थः। एवम् 'दाराः' इत्यत्रापि बोध्यम्। दोषान्तरमाह– मुख्यार्थेति, यदि 'आपः' इत्यत्र बहुवचनार्थबहुत्वस्य गुणादिसाधारण्येनैवान्वयः स्यात्तदा गुणादिसहितजलबोधनतात्पर्ये सति बहुवचनोपपत्तावपि केवलजलमात्र-प्रतिपादनतात्पर्ये सति मुख्यार्थपराणाम्=जलादिमात्रार्थप्रतिपादकानां तादृशशब्दानाम्=अबादिशब्दानां बहुवचनान्तत्वं नोपपद्येत बहुत्वाश्रयीभूत-जलीयगुणेषु तदानीं तात्पर्याभावादिति नेदं मतं शोभनमित्यर्थः। सिद्धान्तमाह– अबादीति, एकजलव्यक्तावेकत्वस्य जलव्यक्तिद्वये द्वित्वस्य चान्वययोग्यतायाः सत्त्वेनाऽबादिशब्दोत्तरमेकवचनद्विवचनयोः प्रयोगे यद्यप्यनुपपत्तिर्नास्ति तथापि असाधुत्वात् तदुत्तरम्=अबादिशब्दोत्तरमेकवचनं द्विवचनं च न प्रयुज्यते किं तु बहुवचनमेव, एवं दारपदेऽपि बोध्यम्। तथा चानुशासनम्–"आपः स्त्री भूमि" इति "पुंभूम्नि दाराः" इति च।

आख्यातेति, निष्कर्षः=सिद्धान्तः। 'घटोऽस्ति' इत्यत्रैकत्वविशिष्टघटस्य

आख्यातैकवचनस्य संख्यार्थकत्वे विवदन्ते निष्कर्षानुसारिणः—'घटोऽस्ति' इत्यादौ सुबेकवचनादेव संख्याबोधसंभवात् 'चैत्रेण दृष्टो घटः' इत्यादिस्थलानुरोधेन तस्य तद्बोधकताया आवश्यकत्वात्। न चैकवचनत्वेनाऽनुगतेनैकत्वशक्तत्वात् तिङेकवचनस्याप्येकत्ववाचकत्वमक्षतमिति वाच्यम्, एकवचनत्वस्यैकत्वशक्ततावच्छेदकतायाः प्रागेव निराकृतत्वात्।

अस्तु वा तेन रूपेण तिङेकवचनस्याप्येकत्वे शक्तिस्तथापि

बोधो भवतीति घटे एकत्वान्वयार्थमेकत्वोपस्थितेर्विवक्षास्तीत्येकत्वसंख्यार्थकत्वमाख्यातैकवचनस्य वा स्वीकर्तव्यं घटपदोत्तरप्रथमैकवचनस्य वा स्वीकर्तव्यमिति संशये 'चैत्रेण दृष्टो घटः' इत्यत्राख्यातं तु नास्त्येव यस्य घटविशेषणीभूतैकत्वोपस्थापकत्वं स्यादिति तस्य=सुबेकवचनस्य (प्रथमैकवचनस्य) तद्बोधकतायाः=एकत्वसंख्याबोधकताया आवश्यकत्वात् 'घटोऽस्ति' इत्यत्रापि सुबेकवचनस्यैवैकत्वबोधकत्वं युक्तं न त्वाख्यातैकवचनस्येत्यर्थः। 'चैत्रो मैत्रश्च गच्छतः' इत्यत्र चैत्रमैत्रयोर्विशेषणीभूतद्वित्वोपस्थापकं सुब्द्विवचनं तु नास्तीत्यत्राख्यातद्विचनस्यैव द्वित्वोपस्थापकत्वात्सार्थक्यमेव तथा 'चैत्रो मैत्रो देवदत्तश्च गच्छन्ति' इत्यत्राख्यातबहुवचनस्यैव बहुत्वोपस्थापकत्वात्सार्थक्यमेवेत्याख्यातैकवचनस्यैव संख्यार्थकत्वे विवादो न तु द्विवचनबहुवचनयोरितिऽभावः। ननु वाचकत्वं हि शक्त्यधीनमस्ति शक्तिश्च वाच्यवाचकयोरनुगतरूपाधीनास्ति यथा घटस्य घटत्वरूपेण वाच्यत्वं घटपदस्य च घटपदत्वेन रूपेण वाचकत्वं तथाऽऽख्यातैकवचनस्याप्यऽनुगतेनैकवचनत्वरूपेणैकत्वे शक्तत्वं सम्भवतीति कथं नैकत्ववाचकत्वं स्यादित्याशङ्क्याह— न चेति। परिहरति— एकवचनत्वस्येति, एकवचनत्वस्य निरूपयितुमशक्यत्वादेव शक्ततावच्छेदकत्वं प्रागेव=(पृ. १२३) "एकवचनत्वादेर्दुर्वचत्वात्" इत्यादिना निराकृतम्, तथा चाख्यातैकवचनं निरर्थकमेवेत्यर्थः।

अभ्युपगम्याह— अस्तु वेति, तेन रूपेण=एकवचनत्वेन रूपेणाख्यातैकवचनस्यैकत्वे शक्तिसत्त्वेऽपि तज्जन्यैकत्वोपस्थितेः=आख्यातैकवचनज्ञानजन्यैकत्वोपस्थितेरेकत्वप्रकारककर्त्रादिविशेष्यकशाब्दबोधोपयोगित्वं न

तज्जन्यैकत्वोपस्थितेः शाब्दबोधोपयोगित्वे मानाभावः– न हि सामान्यत एकवचनज्ञानजन्योपस्थितित्वेन तच्छाब्दबोधहेतुता संभवति तथा सत्येकत्वेऽगृहीत- सुपदवृत्तिकस्य पुंसः सुपदप्रकृतिघटादिपदोपस्थाप्यघटादौ पटादिपदोत्तराऽमादि-पदोपस्थाप्यैकत्वाद्यन्वयबोधप्रसङ्गात्, किं तु सुपदत्वादि-

---

सम्भवतीत्यन्वयः। उक्तमुपपादयति– न हीति, यदि सामान्यत एकवचनज्ञान-जन्यैकत्वोपस्थितस्तच्छाब्दबोधहेतुता=एकत्वप्रकारकशाब्दबोधे हेतुत्वं स्यात्तदा येन पुरुषेण सुपदस्यैकत्वे शक्तिर्न गृहीता तस्य 'घटोऽस्ति' 'पटं पश्य' इत्याकारकवाक्यद्वयश्रवणकाले घटपदोपस्थापितघटे पटपदोत्तराऽम्पदोप-स्थाप्यैकत्वस्याप्यन्वयबोधः स्यादेव– एकत्वोपस्थितेरेकवचनज्ञानजन्यत्वात्– अम्पदस्याप्येकवचनत्वात्, न चैवं पटपदोत्तराऽम्पदोपस्थितैकत्वस्य घटेऽन्वयो भवति किन्तु 'घटोस्ति' इत्यादौ त्वन्तघटपदोपस्थितघटे सुपदत्वादिप्रकारक-ज्ञानजन्यतदुपस्थितत्वादिनैव नाम सुपदत्वप्रकारकम्=सुपदविषयकं यद् एकत्वं सुपदवाच्यमित्याकारकं शक्तिज्ञानं तादृशशक्तिज्ञानजन्या या एकत्वोपस्थिति-स्तादृशोपस्थितित्वेनैव रूपेणैकत्वोपस्थितेरेकत्वप्रकारकशाब्दबोधं प्रति हेतुता सम्भवति अर्थात् स्वन्तघटपदोपस्थितघटविशेष्यकैकत्वप्रकारकबोधं प्रति सुपदज्ञानजन्यैकत्वोपस्थितेरेव हेतुतास्ति स्वपदघटपदोपस्थितघटे सुपदोपस्थित-स्यैवैकत्वस्यान्वयस्वीकारात्, तथा सति=तथा च घटादौ=स्वन्तघटपदोपस्थितघटे एकत्वान्वयबोधस्य या घटादिपदोत्तरसुपदत्वादिरूपानुपूर्वीविशेषरूपाकाङ्क्षा-ज्ञानघटिता सामग्री=शाब्दबोधसामग्री तस्यां सुपदत्वादिप्रकारकधीजन्यैकत्वोप-स्थितेरेवान्तर्भावात्=स्वन्तघटपदोपस्थितघटविशेष्यकैकत्वप्रकारकशाब्दबोधं प्रति सुपदज्ञानजन्यैकत्वोपस्थितेः कारणत्वमित्येव कार्यकारणभावस्वीकारात् स्वन्त-घटपदोपस्थितघटे सुपदोपस्थितैकत्वस्यैवान्वयो भविष्यति न त्वऽम्पदोप-स्थितैकत्वस्यापीति न तादृशापत्तेः=सुपदप्रकृतिघटादिपदोपस्थाप्यघटादौ घटादिपदोत्तराऽमादिपदोपस्थाप्यैकत्वाद्यन्वयबोधापत्तेरवकाश इत्यर्थः। एवमिति– यदा हि स्वन्तघटपदोपस्थितघटे सुपदोपस्थितैकत्वास्यान्वयो भवतीति नियमः स्वीकृतस्तदा यथा स्वन्तघटपदोपस्थितघटे अम्पदोपस्थितैकत्वस्यान्वयो न भवत्येवमाऽऽख्यातैकवचनोपस्थितैकत्वस्याप्यन्वयो न भवतीति तिबादि (आख्यात) पदत्वप्रकारकज्ञान (शक्तिज्ञान) जन्योपस्थितित्वेन रूपेणैकत्वोप-

प्रकारकज्ञानजन्यतदुपस्थितित्वादिनैव तथा सति घटादि-पदोत्तरसुपदत्वादिरूपानुपूर्वीविशेषरूपाकाङ्क्षाज्ञानघटितायां घटादावेकत्वान्वयबोधस्य सामग्र्यां सुपदत्वादिप्रकारक-धीजन्योपस्थितेरेवान्तर्भावात् तादृशापत्तेरनवकाशात्। एवं च तिबादिपदत्वप्रकारकज्ञानजन्योपस्थितित्वेन तच्छाब्दबोध-हेतुत्वे मानाभाव इति।

यत्तु तिबादेः संख्यानभिधायकत्वे 'चैत्रः पचति तण्डुलम्' 'चैत्रेण पच्यते तण्डुलः' इत्यादौ कर्तृकर्मवाचकपदात् तृतीयाद्वितीययोरापत्तिः– कर्तृकर्मगतसंख्याया अनभिधाने "कर्तृकरणयोस्तृतीया" इति "कर्मणि द्वितीया" इति सूत्राभ्यां

स्थितेस्तच्छाब्दबोधे हेतुत्वे=एकत्वप्रकारकशाब्दबोधहेतुत्वे प्रमाणं नास्त्येव, तथा चाख्यातैकवचनस्यैकवचनत्वेन रूपेणैकत्वे शक्तिस्वीकारेप्याख्यातैक-वचनोपस्थितैकत्वस्य घटादावन्वयो न भवतीत्याख्यातैकवचनस्य निरर्थकत्वमेव प्राप्तम्– आख्यातैकवचनोपस्थितैकत्वस्योपयोगाभावादित्यर्थः।

यत्त्विति– आख्यातैकवचनस्य यद्येकत्वसंख्याभिधायकत्वं (वाचकत्वम्) न स्यात्तदा नैयायिकमते लकारस्य कर्तृकर्मवाचकत्वमपि नास्ति येन तदनभिधानस्य=कर्त्रऽनभिधानस्य कर्तृवाचकपदात् तृतीयानियामकत्वं स्याद् यथा–'चैत्रेण पच्यते' इत्यत्र तथा कर्मानभिधानस्य कर्मवाचकपदात् द्वितीयानियामकत्वं स्याद् यथा–'तण्डुलं पचति' इत्यत्र, किन्तु नैयायिकमते कर्तृकर्मगतसंख्यानभिधानस्यैव तृतीयाद्वितीयानियामकत्वमस्तीति कर्तृगत-संख्याया अनभिधाने=आख्यातवाच्यसंख्यायाः कर्तरि अनन्वये हि "कर्तृकरण-योस्तृतीया" इति सूत्रेण कर्तृवाचकपदात्तृतीया भवति यथा– 'चैत्रेण पच्यते तण्डुलः' इति अत्राख्यातवाच्यसंख्यायाः कर्मभूततण्डुले एवान्वयो न तु कर्तृभूतचैत्रेऽपीति चैत्रपदात्तृतीया प्राप्ता, एवं कर्मगतसंख्याया अनभिधाने= आख्यातवाच्यसंख्यायाः कर्मण्यनन्वये हि "कर्मणि द्वितीया" इति सूत्रेण कर्मवाचकपदाद् द्वितीया भवति यथा– 'तण्डुलं पचति चैत्रः' इति अत्राख्यातवाच्यसंख्यायाः कर्तृभूतचैत्रे एवान्वयो न तु कर्मभूततण्डुलेऽपीति तण्डुलपदाद् द्वितीया प्राप्ता इत्येवं प्राप्ते यदि तिबादेः=आख्यातैकवचनस्य

तयोरनुशासनात्। नैयायिकमते लकारस्य कर्तृकर्माऽवाचकतया तदनभिधानस्य द्वितीयातृतीयानियामकत्वासंभवात्।

न च कर्त्रादिगतसंख्यानभिधानमेव कथं कर्त्रादि-वाचकपदोत्तरतृतीयादिनियामकम् 'चैत्रेण पच्यते तण्डुलः'

संख्याभिधायकत्वं न स्यात्तदा 'चैत्रः पचति' इत्यत्र कर्तृगतसंख्यानभिधानस्य तृतीयाप्रयोजकस्य सत्त्वात् चैत्रपदात्तृतीया प्राप्नुयात् न चात्र चैत्रपदात् तृतीया भवति 'चैत्रः पचति' इत्यस्यैव साधुत्वात् 'चैत्रेण पचति' इत्यस्यासाधुत्वाच्च तथा 'चैत्रेण पच्यते तण्डुलः' इत्यत्र कर्मगतसंख्यान-भिधानस्य द्वितीयाप्रयोजकस्य सत्त्वात् तण्डुलपदाद् द्वितीया प्राप्नुयात् न चात्र तण्डुलपदाद् द्वितीया भवति 'तण्डुलः पच्यते' इत्यस्यैव साधुत्वात् 'तण्डुलं पच्यते' इत्यस्यासाधुत्वादिति तिबादेः संख्यावाचकत्वं स्वीकार्यं तथा च 'चैत्रः पचति' इत्यत्राख्यातस्य कर्तृगतसंख्यावाचकत्वान्न तृतीयाप्राप्तिः, 'तण्डुलः पच्यते' इत्यत्र चाख्यातस्य कर्मगतसंख्यावाचकत्वान्न द्वितीयापत्ति-रित्यर्थः।

ननु कर्तृगतसंख्यानभिधानमपि न कर्तृवाचकपदात्तृतीयानियामकं तथा कर्मगतसंख्यानभिधानं च न कर्मवाचकपदाद् द्वितीयानियामकं सम्भवति अन्यथा यथा 'चैत्रः पचति' इत्यत्राख्यातस्य कर्तृगतसंख्याभिधायकत्वमस्ति तथा 'चैत्रेण पच्यते तण्डुलः' इत्यत्राप्याख्यातस्य कर्तृगतसंख्याभिधायकत्वं स्यादेव—उभयत्राख्यातस्य समानरूपत्वेन विशेषाभावादिति 'चैत्रेण पच्यते' इत्यत्राख्यातस्य कर्तृगतसंख्याभिधायकत्वे प्राप्ते चैत्रपदात् तृतीया न स्यात्—भवति चात्र कर्तृगतसंख्यानभिधानेऽसत्यपि तृतीयेति न कर्तृगतसंख्यानभिधानं तृतीयाप्रयोजकम्, तथा 'तण्डुलं पचति' इत्यत्राख्यातस्य कर्मगतसंख्याभिधाय-कत्वात् कर्मगतसंख्यानभिधाने असत्यपि द्वितीया भवतीति न कर्मगतसंख्यान-भिधानं द्वितीयाप्रयोजकमित्यभिप्रायेणाशङ्कते— न चेति। आख्यातस्य संख्या-भिधायकत्वे हेतुमाह— एकत्ववादिनेति, सामान्यरूपेणैकत्वस्यैकवचनवाच्यत्वे प्राप्ते सुबेकवचनस्यैकत्ववाचकत्वमस्त्याऽऽख्यातैकवचनस्यैकत्ववाचकत्वं नास्तीत्यत्र नियामकाभावादित्यर्थः। परिहरति— यत इति, प्रकृते='तण्डुलं पचति' 'चैत्रेण पच्यते' इत्यादौ तद्गत (कर्तृकर्मगत) संख्यानभिधायकत्वं

इत्यादिस्थलेऽपि लकारस्य चैत्रादिगतसंख्याभिधायकत्वाद् एकत्वत्वादिना एकत्वादिसामान्यस्यैवैकवचनाद्यभिधेयत्वादिति वाच्यम्, यतस्तदगतसंख्यानभिधायकत्वं प्रकृते न तद्गतसंख्यानिष्ठवृत्त्यनिरूपकत्वम् अपि तु तद्विशेष्यकसंख्याप्रकारकशाब्दबोधाऽननुकूलत्वमेव तथा च कर्त्रादिविशेष्यकसंख्यान्वयबोधाजनकलकारादिसमभिव्याहृतकर्त्रादिवाचकपदात् तृतीयादयो भवन्तीत्यत्रैतदनुशासनतात्पर्यम्।

न तद्गतसंख्यानिष्ठवृत्त्यनिरूपकत्वम्=सम्बन्धविशेषेण कर्तृकर्मगतसंख्यानिष्ठा या वृत्तिः=शक्तिस्तदनिरूपकत्वं यत आख्यातैकवचनस्य कर्तृगतकर्मगतसंख्यानिष्ठवृत्तिनिरूपकत्वमेवास्तीति उक्तरूपाऽनिरूपकत्वरूपसंख्यानभिधानस्याख्यातेऽभावात् कर्तृपदात्तृतीया कर्मपदाद् द्वितीया च न स्यादेव भवति च तृतीया द्वितीयेति तद्गतसंख्यानभिधायकत्वं हि तद्विशेष्यकसंख्याप्रकारकशाब्दबोधानुकूलत्वमेवेति (शाब्दबोधजनकत्वमेव) उच्यते तथा च "कर्तृकरणयोस्तृतीया" इति सूत्रस्य 'कर्तृविशेष्यकसंख्याप्रकारकबोधाऽजनकलकारेण सह समभिव्याहृतकर्तृवाचकपदात् तृतीया भवति' इत्यर्थस्तथा च 'चैत्रेण पच्यते' इत्यत्र लकारेण=लकारस्थानीयतिपादिकर्तृविशेष्यकसंख्याप्रकारकबोधो न जन्यते किं तु कर्मविशेष्यकसंख्याप्रकारक एव बोधो जन्यते इत्येतादृशलकारसमभिव्याहृतकर्तृवाचकचैत्रपदात्तृतीया भवति, एवम् "कर्मणि द्वितीया" इति सूत्रस्य 'कर्मविशेष्यकसंख्याप्रकारकबोधाजनकलकारेण सह समभिव्याहृतकर्मवाचकपदाद् द्वितीया भवति' इत्यर्थस्तथा च 'तण्डुलं पचति' इत्यत्र लकारेण=लकारस्थानीयतिपा 'कर्मविशेष्यकसंख्याप्रकारकबोधो न जन्यते किन्तु कर्तृविशेष्यकसंख्याप्रकारक एव बोधो जन्यत इत्येतादृशलकारसमभिव्याहृतकर्मवाचकतण्डुलपदाद् द्वितीया भवतीति सर्वं समञ्जसं तस्मादाख्यातैकवचनस्यापि संख्यावाचकत्वं युक्तमेवेत्यर्थः। संख्यानिष्ठवृत्तीति यदुक्तं तत्र वृत्तेर्वाच्यनिष्ठत्वं शक्तिवादेऽस्मदीयतट्टीकायां वा द्रष्टव्यम्। किं चार्थविशेष्यकशक्तेराश्रयत्वसम्बन्धेनार्थनिष्ठत्वं भवतीति तथात्रापि बोध्यम्, पदविशेष्यकशक्तेश्चार्थनिष्ठत्वं शक्तिवादोक्तपरम्परासम्बन्धेन बोध्यम्। एतदनुशासनस्य="कर्तृकरणयोस्तृतीया"

'चैत्रेण पच्यते तण्डुलः' इत्यादौ चैत्रादिविशेष्यक-संख्यान्वयबोधकत्वं नाख्यातस्य, आख्यातार्थभावनाया यत्रान्वयस्तद्विशेष्यकसंख्यान्वयबोधस्यैवाख्यातेन जननात् तादृशभावनान्वयबोधे विशेष्यश्च प्रथमान्तपदोपस्थाप्य एव। 'चैत्रः पचति तण्डुलम्' इत्यादौ चैत्रादिः साक्षादेव भावनाविशेष्यः। 'चैत्रेण पच्यते तण्डुलः' इत्यादौ तु परम्परया, "कर्मणि द्वितीया" इत्यनुशासनद्वयस्य।

'कर्त्रादिविशेष्यकसंख्यान्वयबोधाजनकलकारादिसमभिव्याहृतकर्तृवाचकपदात् तृतीया भवति' इत्यनेनानुशासनतात्पर्येण किं प्राप्तमित्याह– चैत्रेणेति, 'चैत्रेण पच्यते तण्डुलः' इत्यत्राख्यातस्य कर्मभूततण्डुलविशेष्यकसंख्याप्रकारका-न्वयबोधजनकत्वादेव कर्तृभूतचैत्रविशेष्यकसंख्याप्रकारकान्वयबोधजनकत्वं नास्तीत्यत्र कर्तृविशेष्यकसंख्यान्वयबोधाऽजनकलकारेण सह चैत्रपदं समभिव्याहृतमस्तीति चैत्रपदात्तृतीया प्राप्ता। अत्राख्यातस्य चैत्रविशेष्यक-संख्यान्वयाऽबोधकत्वे हेतुमाह–आख्यातार्थेति, आख्यातार्थभावनाया यत्रान्वयो भवति तद्विशेष्यकसंख्यान्वयबोध एवाख्यातेन जन्यते "भावनान्वयिनि संख्यान्वयः" इति नियमात्, तादृशभावनान्वयबोधे=आख्यातार्थभावनान्वयबोधे च प्रथमान्तपदोपस्थाप्य एव विशेष्यो भवति तस्मात् प्रथमान्तपदोपस्थाप्ये एव भावनायाः संख्यायाश्चान्वयो जायते इति 'चैत्रेण पच्यते तण्डुलः' इत्यत्र प्रथमान्ततण्डुलपदोपस्थाप्यतण्डुलस्यैव विशेष्यत्वात् तत्रैव भावनायाः संख्यायाश्चान्वयो जायते इत्याख्यातेनात्र तण्डुलविशेष्यकसंख्यान्वयबोधजननात् चैत्रविशेष्यकसंख्यान्वयबोधाऽजननाच्च चैत्रपदात् तृतीया प्राप्तेत्यर्थः। एवम् 'चैत्रः पचति तण्डुलम्' इत्यत्र प्रथमान्तचैत्रपदोपस्थाप्यत्वात् चैत्रस्यैव विशेष्य-त्वमिति तत्रैव भावनायाः संख्यायाश्चान्वय इत्यत्राख्यातेन चैत्रविशेष्यक-संख्यान्वयबोधजननात् तण्डुलविशेष्यकसंख्यान्वयबोधाऽजननाच्च तण्डुलपदाद् द्वितीया जाता। ननु 'तण्डुलः पच्यते' इत्यत्र तण्डुलस्य कथं भावनाविशेष्यत्वं येन तत्र संख्यान्वयः स्यादित्याशङ्क्याह– चैत्र इति, 'चैत्रः पचति' इत्यत्र चैत्रस्य तु साक्षादेव भावनाविशेष्यत्वमस्ति– साक्षादेव भावनाश्रयत्वात्, 'चैत्रेण पच्यते तण्डुलः' इत्यत्र तण्डुलस्य तु परम्परयैव भावनाविशेष्यत्वम्– भावनायाः साक्षात्सम्बन्धेन चेतननिष्ठत्वनियमात्। तण्डुलस्य परम्परया

चैत्रादिनिष्ठभावनाजन्यफलशाली तण्डुल इत्याकारकबोधस्यैव तत्रोदयात्। तस्मात्तिबादेरपि संख्याबोधकत्वमावश्यकमिति।

तन्न विचारसहम्– तथा हि कर्त्रादिनिष्ठसंख्यान्वय-बोधाननुकूलत्वं यदि तादृशबोधोपधायकज्ञानविषयत्वाभाववत्त्वं तदा यादृशतिबादिज्ञानेन सहकार्यन्तरविरहात् तादृशबोधो न जनितस्तद्योगे तृतीयाद्यापत्तिः। यदि च तादृशबोधस्वरूप-

---

भावनाविशेष्यत्वे शाब्दबोधस्वरूपमाह– चैत्रादीति, चैत्रनिष्ठभावनाजन्यफल-शालित्वमेवात्र तण्डुलस्य भावनाविशेष्यत्वमस्तीत्यर्थः, किं वा तण्डुलस्य स्वजन्यफलशालित्वसम्बन्धेन भावनाश्रयत्वाद् भावनाविशेष्यत्वं विज्ञेयम्, स्वं भावना। उपसंहरति–तस्मादिति, यस्मात्तिवादेः संख्यानभिधायकत्वे उक्तरीत्या तृतीयाद्वितीययोर्व्यवस्था नोपपद्यते तस्मात् तिबादेः=आख्यातैक-वचनस्यापि संख्याबोधकत्वमवश्यं स्वीकार्यमित्यर्थः।

यत्त्वित्यादिना प्रतिपादितं परिहरति–तन्नेति। कर्त्रादिनिष्ठसंख्यान्वय-बोधाननुकूलत्वमिति–तृतीयाप्रयोजकं कर्तृविशेष्यकसंख्याप्रकारकशाब्द-बोधाननुकूलत्वं यदुक्तं तत् किं स्वरूपम्? यदि तादृशबोधोपधायकज्ञान-विषयत्वाभाववत्त्वम्=अर्थात् तादृशबोधः=कर्तृविशेष्यकसंख्याप्रकारकबोधः, तादृशबोधोपधायकम्=कर्तृविशेष्यकसंख्याप्रकारकबोधरूपफलजनकं यज्ज्ञानं तिब्विषयकज्ञानं तादृशज्ञानविषयत्वाभाववत्त्वमेव यदि कर्तृविशेष्यक-संख्याप्रकारकशाब्दबोधाननुकूलत्वं तदा यथा 'चैत्रेण पच्यते' इत्यत्र चैत्रविशेष्यकसंख्याप्रकारकबोधस्तिब्ज्ञानेन न जन्यते इति चैत्रविशेष्यकसंख्या-प्रकारकबोधजनकज्ञानविषयत्वाभाववत्त्वं तिपोऽस्तीति चैत्रपदात् तृतीया भवति तथा यदा तिब्ज्ञानेन 'चैत्रः पचति' इत्यत्र सहकार्यन्तरविरहात्='तिबेक-वचनमेकत्वे शक्तम्' इत्याकारकशक्तिज्ञानादिलक्षणसहकारिविरहात् तादृशबोधः=चैत्रविशेष्यकसंख्याप्रकारकबोधो न जनितस्तदा तद्योगे=एतादृश-तिब्योगे 'चैत्रः पचति' इत्यत्र चैत्रपदाद् तृतीयापत्तिः स्यादेव–यतोऽत्र तिब्ज्ञानेन चैत्रविशेष्यकसंख्याप्रकारकबोधो न जनित इति तिपश्चैत्रविशेष्यक-संख्याप्रकारकबोधाजनकज्ञानविषयत्वात् चैत्रविशेष्यकसंख्याप्रकारक-बोधोपधायकज्ञानविषयत्वाभाववत्त्वमस्त्येव, शक्तिज्ञानं विना बोधो न जायते

योग्यज्ञानविषयत्वाभावस्तदा यगादिसमभिव्याहृतात्मनेपदादिज्ञानस्यापि तादृशबोधस्वरूपयोग्यत्वात्। तत्स्वरूपयोग्यज्ञानाविषयतिबाख्यातस्यैवाऽप्रसिद्धेः।

अथ कर्त्रादिविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयित्वानिरूपकत्वमेव तादृश-

---

इति तस्य सहकारित्वं तदुक्तम्–"शक्तिधीः सहकारिणी" इति। संख्याप्रकारकज्ञानं तिप्पदज्ञानेन जन्यते इति तिप्पदज्ञानविषयत्वं तिपः तदुक्तम्–"पदज्ञानं तु करणम्" इति, 'चैत्रः पचति' इत्यत्र उक्तसहकारिसत्त्वे तु चैत्रविशेष्यकसंख्याप्रकारकबोधस्तिप्ज्ञानेन जन्यते इति तिपश्चैत्रविशेष्यकसंख्याप्रकारकबोधोपधायक (बोधरूपफलजनक) ज्ञानविषयत्वं विज्ञेयम्। द्वितीयकल्पमाह– यदि चेति, तादृशबोधस्वरूपयोग्यज्ञानविषयत्वाभावः= कर्तृविशेष्यकसंख्याप्रकारकबोधजननविषयकस्वरूपयोग्यताविशिष्टज्ञानविषयत्वाभाववत्त्वमेव यदि कर्तृविशेष्यकसंख्याप्रकारकशाब्दबोधाननुकूलत्वं तदा यक्समभिव्याहृतात्मनेपद (ते) ज्ञानस्यापि तादृशबोधस्वरूपयोग्यत्वात्= कर्तृविशेष्यकसंख्याप्रकारकशाब्दबोधजननानुकूलस्वरूपयोग्यतालक्षणकारणताविशिष्टत्वाद् यक्समभिव्याहृतात्मनेपदस्य चैतादृशज्ञानविषयत्वादेवाऽत्मनेपदे तादृशबोधस्वरूपयोग्यज्ञानविषयत्वाभाववत्त्वस्य तृतीयाप्रयोजकस्याऽभावात् 'चैत्रेण पच्यते' इत्यत्रापि चैत्रपदात् तृतीया न स्यादेवेत्यर्थः। संख्याप्रकारकशाब्दबोधजनकतावच्छेदकं हि एकवचनत्वं वा तिङ्त्वं वा वाच्यं तत्तु यक्समभिव्याहृतात्मनेपदेप्यस्त्येवेति तद्विषयकज्ञाने संख्याप्रकारकशाब्दबोधजननानुकूलस्वरूपयोग्यता त्वस्त्येव यगादिसमभिव्याहाररूपप्रतिबन्धकवशात् शाब्दबोधरूपं फलं न जन्यते इति भावः। उक्ते हेतुमाह– तत्स्वरूपेति, कर्त्रादिविशेष्यकसंख्याप्रकारकशाब्दबोधजननानुकूलस्वरूपयोग्यताविशिष्टज्ञानाविषयस्तिबाख्यातमेव प्रसिद्धं नास्ति येन तादृशबोधस्वरूपयोग्यज्ञानाविषयत्वं तृतीयाप्रयोजकं स्यादित्याक्षेपः। "तादृशबोधस्वरूपयोग्यत्वात्" इत्यस्याग्रे 'चैत्रेण पच्यते इत्यादावपि तृतीया न स्यात् तण्डुलं पचतीत्यादावपि द्वितीया न स्यात्' इति पाठशेषः।

अथेति– ननु कर्तृविशेष्यकसंख्याप्रकारकशाब्दबोधाननुकूलत्वं न

बोधाननुकूलत्वम् 'चैत्रः पचति' इत्यादिवाक्यघटकतिबादि-विषयिता चैत्रादिविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्न-जन्यतानिरूपितजनकतावच्छेदिका- तादृशान्वयबुद्धि-त्वावच्छिन्नं प्रति चैत्रादिपदसमभिव्याहृततिबादिपदज्ञानस्य

उक्ततादृशबोधोपधायकज्ञानविषयत्वाभाववत्त्वं वा उक्ततादृशबोधस्वरूपयोग्य-ज्ञानविषयत्वाभाववत्त्वं वा येनोक्तरीत्या 'चैत्रः पचति' इत्यत्र तृतीयापत्तिः स्यात्तथा 'चैत्रेण पच्यते' इत्यत्र तृतीयानुपपत्तिः स्यात् किन्तु तादृश-बोधाननुकूलत्वम्=कर्तृविशेष्यकसंख्याप्रकारकशाब्दबोधाननुकूलत्वं हि कर्त्रादिविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकता-वच्छेदकविषयित्वानिरूपकत्वमित्युच्यते यथा—चैत्रः पचति 'इत्यत्र कर्तृविशेष्यकसंख्यान्वयबुद्धिः (शाब्दबोधः तिब्ज्ञानेन जन्यते एतादृशबुद्धौ बुद्धित्वमप्यस्ति जन्यताप्यस्तीत्येतादृशबुद्धित्वावच्छिन्ना या एतादृशबुद्धिनिष्ठा जन्यता तादृशजन्यतानिरूपिता या तिब्ज्ञाननिष्ठा जनकता तादृश-जनकतावच्छेदकं यद्विषयित्वं तिब्ज्ञाने जनकताया विषयित्वस्य च सत्त्वात् जनकताया अवच्छेदकं विषयित्वं जातं तादृशविषयित्वस्य निरूपकत्वं तिबि वर्तते ज्ञानविषयस्यैव ज्ञानीयविषयिता निरूपकत्वादिति अत्र चैतादृशतिब्ज्ञानस्यैव कर्तृविशेष्यकसंख्याप्रकारकशाब्दबोधजनकत्वमस्तीति नात्र तृतीयायाः प्राप्तिः, एतादृशविषयित्वानिरूपकत्वं च 'चैत्रेण पच्यते' इत्यत्रात्मनेपदेऽस्त्येवेति तत्र कर्तृवाचकपदात् तृतीया प्राप्तेति न कोऽपि दोष इत्यर्थः। एतदेव स्वयमप्याह— चैत्र इत्यादिना, 'चैत्रः पचति' इत्यादिवाक्यघटकं यत् तिप्पदं तादृशतिप्पदनिष्ठविषयतानिरूपिता या तिप्पदज्ञाननिष्ठा विषयिता साऽत्र चैत्रविशेष्यकसंख्यान्वयबुद्धि(संख्या-प्रकारकबुद्धि) त्वावच्छिन्नजन्यतानिरूपिता या तिप्पदज्ञाननिष्ठा जनकता तस्या अवच्छेदिकास्ति एतादृशजनकतावच्छेदकीभूतविषयितायाश्चात्र तिबि निरूपकत्वमेवास्ति नाऽनिरूपकत्वमिति न चैत्रपदात्तृतीयापत्तिरित्यर्थः, उक्ततिबादिविषयिताया उक्तजनकतावच्छेदकत्वे हेतुमाह— तादृशेति, यतः— तादृशान्वयबुद्धित्वावच्छिन्नम्= चैत्रविशेष्यकसंख्याप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति चैत्रादिपदसमभिव्याहृततिबादिपदज्ञानस्य हेतुत्वमस्ति अतः उक्तशाब्दबोध-जनकतिबादिविषयकज्ञाननिष्ठजनकताया तिबादिज्ञाननिष्ठा विषयितात्रा-

हेतुत्वात्। 'चैत्रेण पच्यते तण्डुलः इत्यादिवाक्यघटकतादि-पदविषयिता च न तादृशी– चैत्रादिपदसमभिव्याहृत-तादृशपदज्ञानत्वेन तादृशबुद्धित्वावच्छिन्नं प्रत्यहेतुत्वात्।

न च 'चैत्रः पचते इत्यादौ चैत्रविशेष्यकाख्यातार्थ-संख्यान्वयबोधोत्पत्त्या चैत्रादिपदसमभिव्याहृततादिपदज्ञानत्वेन तादृशान्वयबुद्धित्वावच्छिन्नहेतुताऽक्षतैवेति 'चैत्रेण पच्यते'

वच्छेदिका जातेत्यर्थः। चैत्रेणेति– 'चैत्रेणेति– 'चैत्रेण पच्यते तण्डुलः' इति वाक्यघटकं यदात्मनेपदं ते इति पदं तन्निष्ठविषयतानिरूपिता या तेपदज्ञान– निष्ठा विषयिता सा तु तादृशी=चैत्रविशेष्यक-संख्याप्रकारक-शाब्दबुद्धित्वावच्छिन्नजन्यता निरूपिता या ते पदज्ञाननिष्ठाजनकता तादृश-जनकताया अवच्छेदिका न–अत्र चैत्रविशेष्यक संख्याप्रकारकबोधस्याऽजाय-मानत्वेन ते पदज्ञानं चैत्र विशेष्यक संख्याप्रकारकबोधजनकतैव नास्ति येन तेपदज्ञाननिष्ठा विषयिता जनकतावच्छेदिका स्यात् तथा चोक्तजनकता-वच्छेदकविषयिताया निरूपकत्वम्–'चैत्रः पचतीति इतिवाक्यघटकतिबि वर्तते अनिरूपकत्वं च 'चैत्रेण पच्यते' इति वाक्यघटकात्मनेपदे वर्तते इत्यत्र चैत्रपदात्तृतीया प्राप्ता अत्र तेपदज्ञानस्य कर्मविशेष्यकसंख्याप्रकारक-शाब्दबोधजनकत्वादित्यर्थः। न तादृशीत्यत्र हेतुमाह– चैत्रादीति, 'चैत्रेण पच्यते' इत्यत्र चैत्रादिपदसमभिव्याहृततादृशपदज्ञानत्वेन=चैत्रपदसमभि-व्याहृतात्मनेपदज्ञानस्य तादृशबुद्धित्वावच्छिन्नम्=चैत्रविशेष्यकसंख्याप्रकारक-शाब्दबुद्धित्वावच्छिन्नं प्रत्यहेतुत्वात्। यद्यत्र तेपदज्ञानस्य हेतुत्वं स्यात्तदा तेपदज्ञाननिष्ठविवक्षित जनकतायास्तेपदज्ञाननिष्ठा विषयिता अवच्छेदिका स्यादपि तथाच तादृशजनकतावच्छेदकीभूतविषयिताया निरूपकत्वमात्मनेपदे प्राप्नुयादित्यत्र तृतीयानुपपत्तिः स्यादपि न चैवमस्तीत्यर्थः।

ननु 'चैत्रः पचते' इत्यत्रात्मनेपदज्ञानेनापि चैत्रविशेष्यकाख्यातार्थभूत-संख्याप्रकारकशाब्दबोधो जायत एवेति चैत्रादिपदसमभिव्याहृततादिपद (आत्मनेपद) ज्ञानस्य तादृशान्वयबुद्धित्वावच्छिन्नहेतुता=चैत्रविशेष्यक-संख्याप्रकारकशाब्दबोधहेतुताऽस्त्येवेति 'चैत्रेण पच्यते' इत्यादिवाक्यघटकी-भूततादिपदविषयिता=इत्यादिवाक्यघटकात्मनेपदनिष्ठविषयतानिरूपिता

इत्यादिवाक्यघटकीभूततादिपदविषयितापि तादृश्येवेति वाच्यम्, 'चैत्रेण पच्यते' इत्यादिवाक्यघटकीभूततादि-पदविषयितापि तादृश्येवेति वाच्यम्, 'चैत्रेण पच्यते' इत्यादिवाक्यघटकीभूततादिपदविषयितापि तादृश्येवेति वाच्यम्, 'चैत्रेण पचते' 'चैत्रः पच्यते' इत्यादिवाक्याच्चैत्रादि-विशेष्यकस्य भावनायाः संख्यायाश्चान्वयबोधस्यानुदयात्। तद्विशेष्य- कतदुभयान्वयबोधे प्रथमान्तचैत्रादिपदसमभिव्याहृत-

---

याऽऽत्मनेपदज्ञाननिष्ठा विषयिता सापि तादृश्येव=चैत्रविशेष्यकसंख्याप्रकारक-शाब्दबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदिकैवेति तादृशजनकता-वच्छेदकीभूतविषयिताया निरूपकत्वमेवात्रात्मनेपदे प्राप्तं नाऽनिरूपकत्वम्-उक्तशाब्दबोधजनकात्मनेपदज्ञाननिष्ठविषयितायास्तद्विषयीभूतात्मनेपदनिरूपित-त्वादेवेति 'चैत्रेण पच्यते' इत्यत्र तृतीया न स्यादेवेत्याशङ्कते—न चेति। परिहरति—चैत्रेणेति। यदि चैत्रादिपदसमभिव्याहृतात्मनेपदज्ञानस्य चैत्रविशेष्यक-संख्याप्रकारकशाब्दबोधजनकत्वं स्यात्तदा 'चैत्रेण पचते' 'चैत्रः पच्यते' इत्यादिवाक्यादपि चैत्रविशेष्यको भावनाप्रकारकः संख्याप्रकारकश्च शाब्दबोधः स्यादेव—अत्रापि चैत्रपदसमभिव्याहृतात्मनेपदज्ञानस्य सत्त्वात्, न चैवं भवति तस्मान्न चैत्रविशेष्यकाख्यातार्थसंख्याप्रकारकशाब्दबोधं प्रति चैत्रपदसमभिव्या-हृतात्मनेपदमात्रज्ञानस्य हेतुत्वं किन्तु प्रथमान्तचैत्रपदसमभिव्याहृतं शबादि-विकरणोत्तरं च यत् तत्तदाख्यातपदम्=आत्मनेपदं वा परस्मैपदं वा तज्ज्ञानस्य हेतुत्वमस्ति तथा च 'चैत्रः पचति' 'चैत्रः पचते' इत्यादावाख्यातस्य शबादिविकरणोत्तरत्वात् तादृशाख्यातज्ञानेन चैत्रविशेष्यकसंख्याप्रकारकशाब्दबोधो जायते, 'चैत्रेण पच्यते' इत्यत्र चात्मनेपदस्य यगुत्तरत्वेन शबादिविकरणोत्तर-त्वाभावान्नैतादृशात्मनेपदज्ञानेन चैत्रविशेष्यकसंख्याप्रकारकशाब्दबोधो जायते इति नोक्ततादिपदविषयिता=आत्मनेपदज्ञाननिष्ठविषयितापि तादृशी=चैत्र-विशेष्यकसंख्याप्रकारकशाब्दबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदिका येनात्र तृतीयानुपपत्तिः स्यादित्यर्थः, तद्विशेष्यकतदुभयान्वयबोधे=चैत्रादिकर्तृ-विशेष्यकभावनाप्रकारकसंख्याप्रकारकबोधे। स्वयमपि व्यतिरेकमाह= चैत्रेणेति। तादीनाम्=आत्मनेपदस्य। तादृशसमभिव्याहारादिशून्यतया=शबादिविकरण-समभिव्याहारशून्यतया। तद्विषयितायाः='चैत्रेण पच्यते' इत्यत्रात्मनेपदज्ञाननिष्ठ-

शबादिविकरणोतरत्तदाख्यातपदज्ञानत्वेन हेतुत्वात् 'चैत्रेण पच्यते तण्डुलः' इत्यादिवाक्यघटकतादीनां तादृशसमभिव्याहारादिशून्यतया तद्विषयिताया अतादृशत्वात्।

'चैत्रः पक्ष्यते' इत्यादितः 'तण्डुलः पक्ष्यते' इत्यादितश्च चैत्रतण्डुलादिविशेष्यकसंख्यान्वयबोधोत्पत्त्या 'चैत्रः पक्ष्यते तण्डुलः' इत्यत्रोभयविशेष्यकसंख्यान्वयबोधोपयिकता-दृशसमभिव्याहारज्ञानविषयितायाः 'पक्ष्यते' इत्यादौ सत्त्वेन

विषयितायाः। अतादृशत्वात्=चैत्रादिविशेष्यकसंख्याप्रकारकबुद्धित्वावच्छिन्न-जन्यतानिरूपितजनकताऽनवच्छेदकत्वात्। तथा च 'चैत्रेण पच्यते' इत्यत्रोक्त-जनकतावच्छेदकीभूतविषयिताया आत्मनेपदेऽनिरूपकत्वमेवोक्तरीत्यास्तीति न तृतीयानुपपत्तिः—शबादिविकरणोत्तराख्याते एवोक्तविषयितानिरूपकत्वस्य सम्भवादित्यर्थः।

प्रसङ्गेनाह—चैत्र इति, 'चैत्रः पक्ष्यते' इति कतरि लृटः प्रयोगः, अत्र प्रथमान्तचैत्रपदसमभिव्याहृतं स्यविकरणोत्तरात्मनेपदाख्यातमस्तीति चैत्र-विशेष्यकसंख्याप्रकारकबोधो जायते, 'तण्डुलः पक्ष्यते' इति कर्मणि लृटः प्रयोग इतियग्विकरणोत्तराख्यातज्ञानेन कर्मविशेष्यकसंख्याप्रकारकबोधो जायते अत्र च प्रथमान्ततण्डुलपदसमभिव्याहृतं यग्विकरणोत्तरात्मनेपदाख्यातमस्तीति तण्डुलविशेष्यकसंख्याप्रकारकबोधो जायते तथा च 'पक्ष्यते' इत्याकारकपद-समभिव्याहारे चैत्रविशेष्यकसंख्याप्रकारकबोधस्य तथा तण्डुलविशेष्यक-संख्याप्रकारकबोधस्य च योग्यतास्त्येवेत्युभयविशेष्यकसंख्याप्रकारक-शाब्दबोधार्थम् 'चैत्रः पक्ष्यते तण्डुलः' इति प्रयोगः स्यादेव—उभयविशेष्यक-संख्यान्वयबोधोपयिकं यत्समभिव्याहारज्ञानम्=प्रथमान्तचैत्रतण्डुलपद-समभिव्याहृतपक्ष्यतेपदसमभिव्याहारज्ञानं तादृशसमभिव्याहारज्ञाननिष्ठाविषयिता निरूपकत्वसम्बन्धेन ते इत्यात्मनेपदेऽत्र वर्तते एव विषयस्य ज्ञाननिष्ठविषयिता-निरूपकत्वेन ज्ञाननिष्ठविषयिताया निरूपकत्वसम्बन्धेन विषये सत्त्वादत्रोक्त-समभिव्याहारज्ञानं ते इत्यात्मनेपदविषयकमेवेति उक्तसमभिव्याहारज्ञाननिष्ठा-विषयिता ते इत्यात्मने पदे वर्तते तथा चात्राख्याते चैत्र विशेष्यकसंख्याप्रकारक-शाब्दबोधजनकज्ञाननिष्ठ जनकतावच्छेदिकीभूतविषयिताया निरूपकत्वमेवास्ति

कर्तृकर्मणोस्तृतीयाद्वितीययोरप्रसक्तावपि न तादृशवाक्यं व्युत्पन्नाः प्रयुञ्जते– कर्तरि साक्षात् कर्मणि च दर्शितपरम्परया युगपद्भावनाविशेषणकान्वयबोधजनकताया आख्यातस्याऽव्युत्पन्नतया तादृशवाक्यादुभयविशेष्यकान्वयबोधाऽसंभवात्।

न चाकाङ्क्षायोग्यतादिसत्त्वात् कथं न तादृशान्वयबोध इति वाच्यम्, अगत्यैकविधान्वयबोधेऽन्यविधान्वयबोधसामग्र्या–

न तु तृतीयाप्रयोजकमनिरूपकत्वमिति न चैत्रपदादत्र तृतीयाप्रसक्तिः, तथा प्रथमान्ततण्डुलपदसमभिव्याहृतपक्ष्यतेपदज्ञानस्य तण्डुलविशेष्यकसंख्याप्रकारकशाब्दबोधजनकत्वादत्राख्याते तण्डुलविशेष्यकसंख्याप्रकारकशाब्दबोधजनकोक्तज्ञाननिष्ठजनकतावच्छेदकीभूतविषयिताया अपि निरूपकत्वमेवास्ति न तु द्वितीयाप्रयोजकमनिरूपकत्वमिति न तण्डुलपदादत्र द्वितीयाप्रसक्तिः इत्येवं रीत्योभयविशेष्यकसंख्यान्वयबोधार्थम् 'चैत्रः पक्ष्यते तण्डुलः' इति प्रयोगस्य साधुत्वेऽपि प्राप्ते नैतादृशवाक्यं व्युत्पन्नाः प्रयुञ्जते–'पक्ष्यते' इत्यस्य कर्तरि लृटः प्रयोगत्वे तण्डुलपदाद् द्वितीया स्यादेवेति प्रथमान्ततण्डुलपदस्यात्राऽसाधुत्वात् कर्मणि लृटः प्रयोगत्वे च चैत्रपदात्तृतीया स्यादेवेति प्रथमान्तचैत्रपदस्याऽसाधुत्वादित्यर्थः। 'चैत्रः पक्ष्यते तण्डुलः' इति वाक्यस्याऽप्रयोगे स्वयमपि हेतुमाह–कर्तरीति, कर्तरि साक्षात्=समवायसम्बन्धेन भावनाविशेषणकान्वयबोधं कर्मणि च दर्शितपरम्परया=चैत्रनिष्ठभावनाप्रयोज्यव्यापारजन्यफलशालित्वपरम्परया भावनाविशेषणकान्वयबोधं युगपत्=एककाले जनयितुमाख्यातस्य सामर्थ्यमेव नास्ति–एककाले एकमात्रविशेष्यकभावनाप्रकारकसंख्याप्रकारकबोधजननसमर्थत्वादित्येककाले तादृशवाक्यात्='चैत्रः पक्ष्यते तण्डुलः' इति वाक्यात् कर्तृकर्मोभयविशेष्यकशाब्दबोधासम्भवादित्यर्थः। तथा च कर्तृविशेष्यकशाब्दबोधस्येष्टत्वे 'चैत्रः पक्ष्यते तण्डुलम्' इत्येव स्यात्, कर्मविशेष्यकशाब्दबोधस्येष्टत्वे च 'चैत्रेण पक्ष्यते तण्डुलः' इत्येव स्यादिति।

ननु "यत्पदेन विना यस्याऽननुभावकता भवेत् आकाङ्क्षा" इति कर्तृविशेष्यकस्य कर्मविशेष्यकस्य च बोधस्य 'पक्ष्यते' इति पदमाकाङ्क्षा

स्तद्घटकतात्पर्यज्ञानस्य वा प्रतिबन्धकत्वोपगमात्।

न च 'चैत्रेण तण्डुलः पक्ष्यते' 'चैत्रस्तुण्डलं पक्ष्यते' इत्यादिवाक्यद्वयविषयकसमूहालम्बनदशायामप्युभयविधान्वयबोधानुपपत्तिरिति वाच्यम्, तादृशैकविधान्वयबोधे तादृशान्यविधान्वयबोधपरत्वेनाऽगृह्यमाणतथाविधाख्यातधर्मिक-

---

सापि 'चैत्रः पक्ष्यते तण्डुलः' इत्यत्रास्ति तथा कर्तृकर्मणोर्विशेष्यत्वस्य योग्यताप्यत्रास्त्येवेति कथं न तादृशान्वयबोधः=चैत्रतण्डुलोभयविशेष्यक-भावनाप्रकारकसंख्याप्रकारकशाब्दबोधः स्यात् आकाङ्क्षायोग्यतादिज्ञानस्यैव शाब्दबोधकारणत्वात् कारणे सति कार्यावश्यंभावादित्याशङ्कते– न चेति। परिहरति– अगत्येति, एकेन वाक्येनैकविशेष्यकबोध एव जायते इति "सिद्धस्य गतिश्चिन्तनीया" इति न्यायेनागत्या एकविधान्वयबोधे= एकविशेष्यकशाब्दबोधं प्रत्यन्यविशेष्यकशाब्दबोधसामग्र्या वा तादृशसामग्री-घटकतात्पर्यज्ञानस्य वा प्रतिबन्धकत्वं कल्प्यते तथा च कर्मविशेष्यक-संख्यान्वयतात्पर्ये सति कर्तृविशेष्यकसंख्याप्रकारकशाब्दबोधस्यापत्तिर्नास्ति कर्तृविशेष्यकसंख्यान्वयतात्पर्ये च सति कर्मविशेष्यकसंख्याप्रकारक-शाब्दबोधस्यापत्तिर्नास्तीति नैककाले एकस्माद् वाक्यादुभयविशेष्यक-शाब्दबोधापत्तिरित्यर्थः।

ननु यद्युक्तरीत्या एकविशेष्यकशाब्दबोधं प्रत्यपरविशेष्यकशाब्दबोधस्य प्रतिबन्धकत्वादेककाले एकविशेष्यक एव शाब्दबोधो जायते नोभयविशेष्यक-स्तदा 'चैत्रेण तण्डुलः पक्ष्यते' 'चैत्रस्तण्डुलं पक्ष्यते' इति वाक्यद्वयेनापि समूहालम्बनात्मकश्चैत्रतण्डुलोभयविशेष्यकः शाब्दबोधो न स्यादेव, इष्टश्चात्रोभयविशेष्यकः शाब्दबोधः इत्याशङ्कते–न चेति। परिहरति– तादृशैकेति, तादृशैकविधान्वयबोधे=कर्तृकर्मणोर्मध्ये एकविशेष्यकाख्यातार्थप्रकारकशाब्दबोधं प्रति तादृशान्यविधान्वयबोधपरत्वेनाऽगृह्यमाणतथाविधाख्यातधर्मिकप्रकृतान्वय-बोधपरत्वज्ञानस्य हेतुत्वमस्ति यथा 'पक्ष्यते' इति पदघटितवाक्यात् कर्तृ-विशेष्यकाख्यातार्थप्रकारकशाब्दबोधं प्रति यस्तादृशान्यविधान्वयबोधः= आख्यातार्थप्रकारककर्मविशेष्यकशाब्दबोधस्तत्परत्वेनागृह्यमाणं यत्तथा-विधाख्यातम्='पक्ष्यते' इति पदघटकाऽऽख्यातं तादृशाख्यातधर्मिकम्=तादृशा–

प्रकृतान्वयबोधपरत्वज्ञानस्य हेतुतया 'चैत्रः पक्ष्यते तण्डुलः' इत्येकवाक्यात् तादृशद्विविधान्वयबोधवारणस्य दर्शित-वाक्यद्वयात् तदुपपादनस्य च शक्यत्वात्।

न च निरुक्तसंख्यानभिधानस्य तृतीयाद्वितीयानियामकत्वे 'चैत्रेण स्वं दृश्यते' 'चैत्रः स्वं पश्यति' इत्यादौ तृतीयाद्वितीय-योरनुपपत्तिः—कर्त्रादिविशेष्यकसंख्याप्रकारकान्वयबोधौपयि-

---

ख्यातविशेष्यकम् (आख्यातविषयकम्) यत् प्रकृतान्वयबोध (कर्तृविशेष्यका-ख्यातार्थप्रकारकबोध) परत्वज्ञानम्=कर्तृविशेष्यकाख्यातार्थप्रकारकशाब्दबोध-परमिदमाख्यातमिति ज्ञानं तादृशज्ञानस्य हेतुत्वमस्ति तथा च 'चैत्रः पक्ष्यते तण्डुलः' इत्यत्रैकविशेष्यकबोधकाले आख्यातस्यापरविशेष्यकबोधपरत्वेना-ऽगृह्यमाणत्वमस्त्येवेति एकविशेष्यक एवैकवाक्याद्बोधो जायते न तूभयविशेष्यक इति तादृशविधान्वयबोधवारणस्य=आख्यातार्थप्रकारकोभय-विशेष्यकबोधवारणस्य शक्यत्वात्। दर्शितवाक्यद्वयात्='चैत्रेण तण्डुलः पक्ष्यते' 'चैत्रस्तण्डुलं पक्ष्यते' इति वाक्यद्वयात् तदुपपादनस्य=आख्यातार्थप्रकारक-चैत्रतण्डुलोभयविशेष्यकबोधोपपादनस्य च शक्यत्वात्=एतद्वाक्यद्वय-विषयकसमूहालम्बनात्मकबोधदशायां चैत्रविशेष्यकाऽऽख्यातार्थान्वयबोधपरत्वेन वा तण्डुलविशेष्यकाख्यातार्थान्वयबोधपरत्वेन वा 'पक्ष्यते' इत्याख्यातस्या-गृह्यमाणत्वमेकमात्रविशेष्यकबोधप्रयोजकं नास्ति किं तूभयविशेष्यकाख्यातार्था-न्वयबोधपरत्वेन गृह्यमाणत्वमेवास्तीति नोभयविशेषयकाख्यातार्थप्रकारक-शाब्दबोधस्यानुपपत्तिरित्यर्थः।

ननु निरुक्तसंख्यानभिधानस्य=यदि कर्तृविशेष्यकसंख्यान्वयबुद्धित्वा-वच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतविषयिताया अनिरूपकत्वं कर्तृपदात्तृतीयाप्रयोजकम् तथा कर्मविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यता-निरूपितजनकतावच्छेदकीभूतविषयिताया अनिरूपकत्वं च (उक्तैतादृशसंख्या-नभिधानं) कर्मवाचकपदाद् द्वितीयाप्रयोजकम् (१८५ पृ. उक्तम्) तदा 'चैत्रेण स्वं दृश्यते' इत्यत्राऽऽख्यातार्थसंख्यायाः स्वपदार्थेऽन्वयोऽस्तीति स्वपदार्थविशेष्यकसंख्याप्रकारकबोधो जायते स्वपदार्थश्चात्र चैत्र एव न त्वन्य इति संख्यायाः स्वपदार्थेऽन्वयेन चैत्रे एवान्वयो जातस्तथा च

काऽऽकाङ्क्षाज्ञानीयविषयित्वनिरूपकत्वस्य तत्राख्याते सत्त्वा-दिति वाच्यम्, कर्त्रादिपरयत्पदाख्यातपदयोः समभिव्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयित्वानिरूपकस्तत्पदोत्तरं तृतीयाविभक्तिरित्येवं नियमोपगमेन प्रथमस्थले चैत्रपरस्वपदा-

---

चैत्रविशेष्यकसंख्याप्रकारक एव बोधो जायते इति प्राप्तं तत्र चैत्रविशेष्यक-संख्याप्रकारकबोधौपयिकम्=बोधजनकं यदाकाङ्क्षाज्ञानं तन्निष्ठा या जनकता-वच्छेदकीभूतविषयिता तादृशविषयितायाः निरूपकत्वमेवात्राऽऽख्यातेऽस्ति (आख्यातस्यैव विषयत्वेनोक्तविषयितानिरूपकत्वात्) न त्वनिरूपकत्वं तृतीयाप्रयोजकमिति चैत्रपदात्तृतीयानुपपत्तिः— तत्प्रयोजकाभावात्— अर्थात् 'चैत्रेण स्वं दृश्यते' इत्यत्राख्यातार्थसंख्यायाः स्वपदार्थेनान्वयो न चैत्रेणेति चैत्रपदात्तृतीया प्राप्तेत्युच्येत तत्र स्वपदार्थोपि चैत्र एवेत्याख्यातार्थसंख्यायाः स्वपदार्थेनान्वये चैत्रेणैवान्वयो जात इति तृतीया न स्यात्। तथा 'चैत्रः स्वं पश्यति' इत्यत्राख्यातार्थसंख्यायाश्चैत्रेणान्वयोऽस्तीति चैत्रविशेष्यकसंख्या-प्रकारकबोधो जायते चैत्र एव चात्र स्वपदार्थ इति संख्यायायाश्चैत्रेऽन्वयेन स्वपदार्थे एवान्वयो जातः—अत्र चैत्रपदार्थस्वपदार्थयोरभेदात् तथा चात्र स्वपदार्थविशेष्यकसंख्याप्रकारक एव बोधो जायते इति प्राप्तं तत्र स्वपदार्थ-विशेष्यकसंख्याप्रकारकबोधौपयिकं यदाकाङ्क्षाज्ञानं तन्निष्ठा या उक्तबोधीय-जनकताया अवच्छेदकीभूता विषयिता तादृशविषयितायाः अत्राख्याते निरूपक-त्वमेवास्ति न तु द्वितीयाप्रयोजकमनिरूपकत्वमिति स्वपदाद् द्वितीयानुपपत्तिः— द्वितीयाप्रयोजकाभावात्, अर्थात् 'चैत्रः स्वं पश्यति' इत्यत्राख्यातार्थ-संख्यायाश्चैत्रेणैवान्वयो न स्वपदार्थेनेति स्वपदाद् द्वितीया जातेत्युच्यते तत्र चैत्रपदार्थे स्वपदार्थयोरभेदाच्चैत्रेणान्वये स्वपदार्थेनान्वयो जात एवेति स्वपदाद् द्वितीया न स्यादित्याशङ्कते—न चेति। परिहरति— कर्त्रादीति, कर्तृबोधकस्य यस्य पदस्याख्यातपदस्य च समभिव्याहारः संख्याप्रकारकशाब्दबोधप्रयोजकं यज्ज्ञानं तन्निष्ठविषयितायाः अनिरूपकस्तस्मात् पदात् तृतीया भवतीति नियमस्तथा च प्रथमस्थले='चैत्रेण स्वं दृश्यते' इत्यत्र चैत्रपरं यत्स्वपदं तादृशस्वपदाख्यातपदयोः समभिव्याहारे स्वपदार्थविशेष्यकसंख्याप्रकारक-शाब्दबोधस्यैव प्रयोजकतया स्वपदार्थविशेष्यकसंख्याप्रकारकशाब्दबोध-प्रयोजकैतादृशसमभिव्याहारविषयकज्ञाननिष्ठविषयितायाः एव निरूपकत्वमस्ति

ख्यातपदयोर्द्वितीये च तत्परचैत्राख्यातपदयोः समभिव्याहारस्यैव तद्विशेष्यकसंख्यान्वयबोधप्रयोजकतया क्रमेण चैत्रपदस्वपदाभ्यां तृतीयाद्वितीययोरनुपपत्त्यऽनवकाशादिति चेत्?

न–"अनभिहिते" इत्यधिकारे "कर्तृकरणयोस्तृतीया" इत्याद्यनुशासनस्य किं प्रयोजनमिति वक्तव्यम्। 'चैत्रः पचति' 'तण्डुलः पच्यते' इत्यादौ चैत्रतण्डुलपदाभ्यां तृतीयाद्वितीय-

---

चैत्रविशेष्यकसंख्याप्रकारकशाब्दबोधजनकज्ञाननिष्ठविषयितायास्त्वनिरूपकत्वमेवास्तीति चैत्रपदात्तृतीयाया अनुपपत्तिर्नास्ति, तथा–कर्मबोधकस्य यस्य पदस्याख्यातपदस्य च समभिव्याहारः संख्याप्रकारकशाब्दबोधप्रयोजकज्ञाननिष्ठविषयिताया अनिरूपकस्तस्मात् पदाद् द्वितीया भवतीति नियमस्तथा च द्वितीये='चैत्रः स्वं पश्यति' इति स्थले कर्तृपरं यच्चैत्रपदं तादृशचैत्रपदाख्यातपदयोः समभिव्याहारस्य चैत्रविशेष्यकसंख्याप्रकारकशाब्दबोधस्यैव प्रयोजकतया चैत्रविशेष्यकसंख्याप्रकारकशाब्दबोधप्रयोजकैतादृशसमभिव्याहारविषयकज्ञाननिष्ठविषयिताया एव चैत्रपदाख्यातपदसमभिव्याहारे निरूपकत्वमस्ति स्वपदार्थविशेष्यकसंख्याप्रकारकशाब्दबोधजनकसमभिव्याहारज्ञाननिष्ठविषयितायास्त्वनिरूपकत्वमेवास्तीति स्वपदाद् द्वितीयानुपपत्तिर्नास्तीत्यर्थः।

अथेत्यादिना प्रतिपादितं परिहरति– नेति। "अनभिहिते" इत्यधिकारे "कर्तृकरणयोस्तृतीया" "कर्मणि द्वितीया" इत्यनुशासनयोः पाठस्य प्रयोजनं पृच्छति– अनभिहितेति। "अनभिहिते" इत्यधिकारे उक्तसूत्रयोः पाठेन कर्त्तुरनभिधाने तृतीया भवति यथा– 'चैत्रेण पच्यते' इत्यत्र– आख्यातस्य कर्माभिधायकत्वात्, 'चैत्रः पचति' इत्यत्र तृतीया न भवति– आख्यातस्य कर्त्रभिधायकत्वात्, तथा 'तण्डुलं पचति' इत्यत्र द्वितीया भवति– आख्यातस्य कर्मानभिधायकत्वात् 'तण्डुलः पच्यते' इत्यत्र द्वितीया न भवति– आख्यातस्य कर्माभिधायकत्वादित्येव प्रयोजनमित्युत्तरमाशङ्कते– चैत्र इति। उत्तरमाह–तदिति, यदि मणिमन्त्रादिरीत्या तादृशानुशासनस्य="कर्तृकरणयोस्तृतीया" "कर्मणि द्वितीया" इत्यनुशासनद्वयस्य तथाविधप्रयोगविरोधिता='चैत्रेण पचति' 'तण्डुलं पच्यते' इतिप्रयोगविरोधिता स्यात्तदा 'चैत्रेण पचति'

योरप्रयोग इति चेत्? तत् किं मणिमन्त्रादिन्यायेन तादृशानुशासनस्य तथाविधप्रयोगविरोधिता येन तदभावस्तत्प्रयुक्तः स्यात्? न चैवं संभवति। 'पचति' 'पच्यते' इत्यादिक्रियायोगे कर्तृकर्मवाचकपदानन्तरतृतीयाद्वितीययोरसाधुत्वस्य तत्कर्तृत्व-

'तण्डुलं पच्यते' इत्यादिप्रयोगाणामुच्चारणमेवाशक्यं स्यात् न चैवमस्तीत्यर्थः। तदभावः='चैत्रेण पचति' 'तण्डुलं पच्यते' इति प्रयोगाभावः। तत्प्रयुक्तः= "कर्तृकरणयोस्तृतीया" "कर्मणि द्वितीया" इत्यनुशासनप्रयुक्तः। ननु 'पचति' इतिक्रियायोगे कर्तृवाचकचैत्रादिपदानन्तरं तृतीयाया असाधुत्वज्ञानमेव "अनभिहिते" इत्यधिकारे तस्य="कर्तृकरणयोः" इत्यनुशासनस्य प्रयोजनं तथा चासाधुत्वात् 'चैत्रेण पचति' इति प्रयोगो न भवति किन्तु 'चैत्रः पचति' इति प्रयोगो भवति, तथा 'पच्यते' इतिक्रियायोगे कर्मवाचकतण्डुलादि-पदानन्तरं द्वितीयाया असाधुत्वज्ञानमेव "अनभिहिते" इत्यधिकारे तस्य="कर्मणि द्वितीया" इत्यनुशासनस्य प्रयोजनं तथा चाऽसाधुत्वात् 'तण्डुलं पच्यते' इति प्रयोगो न भवति किन्तु 'तण्डुलः पच्यते' इत्येव प्रयोगो भवतीत्याह- पचतीति। असाधुत्वस्वरूपमाह- तत्कर्तृत्वेति, अत्र च "तत्कर्तृत्वकर्म-त्वादीति-पचतीत्यत्र पाककर्तृत्वबोधौपयिकाकाङ्क्षा प्रथमायामेवास्ति तृतीयायां तु पाककर्तृत्वादिबोधौपयिकाकाङ्क्षारहितत्वमस्ति तदेवाऽसाधुत्वम् 'चैत्रः पचति' इति प्रयोगादिति भावः, एवम्-'पच्यते' इत्यत्र पाककर्मत्वबोधौपयिकाकाङ्क्षा प्रथमायामेवास्ति 'चैत्रेण तण्डुलः पच्यते' इति प्रयोगात् द्वितीयायां तु पाककर्मत्वबोधौपयिकाकाङ्क्षाराहित्यरूपमसाधुत्वमस्ति 'तण्डुलं पच्यते' इत्यप्रयोगात्" इति कृष्णंभट्टाः। उत्तरमाह- तर्हीति, उक्तानुशासनद्वयस्य उक्तनियमपरतयापि=कर्तृपरयत्पदाख्यातपदयोः समभिव्याहारः संख्यान्वयबुद्धि-त्वावच्छिन्नप्रयोजकविषयित्वानिरूपकस्तत्पदोत्तरं तृतीया तथा कर्मपरयत्पदा-ख्यातपदयोः समभिव्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयित्वा-निरूपकस्तत्पदोत्तरं द्वितीया भवतीति नियमपरतयापि न ततः="कर्तृकरणयोः" इत्यनुशासनात् तल्लाभः='पचति' इति क्रियायोगे कर्तृवाचकपदात्तृतीयाया असाधुत्वलाभस्तथा "कर्मणि द्वितीया" इत्यनुशासनात् 'पच्यते' इति क्रियायोगे कर्मवाचकपदाद् द्वितीयाया असाधुत्वलाभ इत्यन्वयः। उक्ताऽसाधु-त्वालाभमुपपादयति- प्रथमान्तेति, प्रथमान्तचैत्रपदपचतीत्याख्यातपदयोरेव

तत्कर्मत्वादिबोधौपयिकाकाङ्क्षादिरहितत्वादिरूपस्य प्रतिपत्तिः प्रयोजनं तस्येति चेत्? तर्हि– उक्तनियमपरतयापि न ततस्तल्लाभः। प्रथमान्तचैत्रतण्डुलादिपदतत्तदाख्यातपदयोः समभिव्याहारस्यैव चैत्रतण्डुलादिविशेष्यकतत्तदाख्यातार्थ-

समभिव्याहारस्य चैत्रविशेष्यकतत्तदाख्यातार्थसंख्याप्रकारकशाब्दबोध-प्रयोजकत्वमस्ति तथा प्रथमान्ततण्डुलपदपच्यतेइत्याख्यातपदयोरेव समभिव्याहारस्य तण्डुलविशेष्यकतत्तदाख्यातार्थसंख्याप्रकारकशाब्दबोध-प्रयोजकत्वमस्तीति 'चैत्रः पचति' 'तण्डुलः पच्यते' इत्यत्र चैत्रतण्डुलपदाभ्यां प्रथमैव भवति न तृतीयाद्वितीये, बोधस्य यद्विशेष्यकत्वमिष्टं भवति तद्वाचकपदात् प्रथमैवेति नियमात्, 'चैत्रेण पचति' 'तण्डुलं पच्यते' इत्यादिवाक्यघटकचैत्रतण्डुलादिपदतत्तदाख्यातपदयोः समभिव्याहारस्य अतथात्वेन=चैत्रतण्डुलविशेष्यकत्वत्तदाख्यातार्थसंख्याप्रकारकान्वयबोधाप्रयोजकत्वेन च 'चैत्रेण पचति' 'तण्डुलं पच्यते' इत्येतद्वाक्यघटकतृतीयाद्वितीययोः साधुत्वस्योक्तनियमाऽव्यवच्छेद्यत्वादित्यन्वयः, अयं भावः– उक्ततात्पर्येण हि यादृशचैत्रपदाख्यातपदयोः समभिव्याहारश्चैत्रविशेष्यकसंख्याप्रकारक-शाब्दबोधाऽप्रयोजको भवति तादृशचैत्रपदात्तृतीया भवति तथा यादृशतण्डुल-पदाख्यातपदयोः समभिव्याहारस्तण्डुलविशेष्यकसंख्याप्रकारकशाब्दबोधा-ऽप्रयोजको भवति तादृशतण्डुलपदाद् द्वितीया भवति यथा– 'चैत्रेण पच्यते' 'तण्डुलं पचति' इति लभ्यते, तथा च 'चैत्रेण पचति' इत्येतत्समभिव्याहारस्यापि चैत्रविशेष्यकसंख्याप्रकारकशाब्दबोधाप्रयोजकत्वादत्र चैत्रपदात्तृतीया स्यादेव एतादृशतृतीयायाः साधुत्वं च नोक्ततात्पर्यनियमव्यवच्छेद्यं भविष्यति– उक्ततात्पर्यनियमेनैवात्र तृतीयायाः प्राप्तत्वात्, तथा 'तण्डुलं पच्यते' इत्येतत्समभिव्याहारस्यापि तण्डुलविशेष्यकसंख्याप्रकारकशाब्दबोधा-प्रयोजकत्वादत्र तण्डुलपदाद् द्वितीया स्यादेव एतद्द्वितीयायाः साधुत्वं च नोक्ततात्पर्यनियमव्यवच्छेद्यं भविष्यति– उक्ततात्पर्यनियमेनैवात्र द्वितीयायाः प्राप्तत्वादिति। उक्तं च कृष्णंभट्टैरपि– "कत्रादिपरयत्पदाख्यातपदयोः समभिव्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयित्वानिरूपकस्तत्पदोत्तरं तृतीयादिविभक्तिरिति नियमवाक्यात् 'चैत्रेण पचति' इत्यत्र कर्तरि तृतीया न साध्वी 'तण्डुलं पच्यते' इत्यत्र कर्मणि द्वितीया न साध्वीत्यर्थो न

संख्यान्वयबोधप्रयोजकतया 'चैत्रेण पचति' 'तण्डुलं पच्यते' इत्यादिवाक्यघटकचैत्रतण्डुलादिपदतिबादिपदयोः समभिव्याहारस्याऽतथात्वेन तद्घटकतृतीयाद्वितीययोः साधुत्वस्योक्तनियमाऽव्यवच्छेद्यत्वात् तस्मान्मुख्यभाक्तसाधारणकर्तृत्वकर्मत्वयोः कर्तृकर्मवाचकपदसमभिव्याहृतलकृत्तद्धितसमासैरनभिधानमेव तृतीयाद्वितीयानियामकम्, शिरोमणिभिरप्यत्रैव निर्भरो विहितः।

प्रतीयते इति भावः" इति। उपसंहरति–तस्मादिति, कर्तृकर्मगतसंख्यानभिधानस्य तृतीयाद्वितीयानियामकत्वासम्भवात् कर्तृकर्मवाचकपदसमभिव्याहृतलकृत्तद्धितसमासैर्मुख्यभाक्तसाधारणकर्तृत्वकर्मत्वयोरेवाऽनभिधानं तृतीयाद्वितीययोर्नियामकमित्येव युक्तं तथा च 'पचति' इत्यत्र लकारेण कर्तृत्वाभिधानात् कर्तृपदात् तृतीया न भवति किन्तु प्रथमैव यथा– 'चैत्रः पचति' इति, 'पच्यते' इत्यत्र लकारेण कर्तृत्वानभिधानात् तृतीया भवति यथा– 'चैत्रेण पच्यते' इति, तथा 'पच्यते' इत्यत्र लकारेण कर्मत्वाभिधानात् कर्मवाचकपदाद् द्वितीया न भवति किन्तु प्रथमैव यथा– 'तण्डुलः पच्यते' इति, पचति' इत्यत्र लकारेण कर्मत्वानभिधानात् कर्मवाचकपदाद् द्वितीया भवति यथा–'तण्डुलं पचति' इति, एवं च 'चैत्रेण पचति' इति प्रयोगस्य प्राप्तिर्नास्त्येव–तृतीयाप्रयोजकस्यात्राख्याते कर्तृत्वानभिधानस्याभावात्, तथा 'तण्डुलं पच्यते' इति प्रयोगस्यापि प्राप्तिर्नास्त्येव– द्वितीयप्रयोजकस्यात्राख्याते कर्मत्वानभिधानस्याभावादिति सर्वं समञ्जसम्। अत्र शिरोमणि प्रमाणयति– शिरोमणिभिरिति। 'चैत्रः पचति' इत्यत्र मुख्यं कर्तृत्वम्, 'जानाति' इत्यत्र भाक्तम्=गौणं कर्तृत्वम्, 'तण्डुलः पच्यते' इत्यत्र मुख्यं कर्मत्वम्, 'ज्ञायते घटः' इत्यादौ गौणं कर्मत्वमिति बोध्यम्। कर्तरि तिङ्–'पचति' इति, कर्मणितिङ् 'पच्यते' इति, कर्तरिकृत् 'कर्ता कटान्' इति तृच्, कर्मणि कृत् 'लक्ष्म्या सेवितः' इति क्तः, कर्तरि तद्धितम्– 'पक्षिणो हन्ति पाक्षिकः' इति ष्टक्, कर्मणि तद्धितम्– 'शतेन क्रीतः शत्यः' इति यत्, कर्तरि समासः–'कृतं विश्वमनेनेति कृतविश्वो हरिः' इति, कर्मणि समासः–'प्राप्त आनन्दो यं स प्राप्तानन्दः' इति, कर्तरि प्रत्ययस्थले कर्मत्वानभिधानं कर्मणि प्रत्ययस्थले कर्तृत्वानभिधानं बोध्यम्।

लादीनां तदनभिधायकत्वं च न तदऽवाचकत्वं तन्निष्ठ-वृत्त्यनिरूपकत्वं वा– आत्मनेपदस्याप्याख्यातत्वेन लत्वादिना वा कर्तृत्वादिनिष्ठशक्तिलक्षणानिरूपकत्वात्, कर्तृत्वानभि-धायकाख्यातस्यैवाप्रसिद्धेः।

तच्छाब्दबोधौपयिकाकाङ्क्षाशून्यत्वमेव तत् 'चैत्रेण पच्यते तण्डुलः' इयादावाख्यतस्य कर्तृत्वादिवाचकत्वेऽपि तच्छाब्दबो-धौपयिकाकाङ्क्षाराहित्यं तत्राक्षतमेव–चैत्रादिपदोत्तरतृतीययैव

लादीनां तदनभिधायकत्वम्=कर्तृत्वकर्मत्वानभिधायकत्वं च न तदवाचक-त्वम्–कर्तृत्वाद्यनभिधायकाख्यातस्यैवाप्रसिद्धेः, न वा तन्निष्ठवृत्त्य-निरूपकत्वम्=कर्तृत्वादिनिष्ठवृत्त्यनिरूपकत्वम्–आत्मनेपदस्यापयाख्यातत्वेन रूपेण लत्वादिरूपेण वा कर्तृत्वादिनिष्ठशक्तिलक्षणारूपवृत्तिनिरूपकत्वादेव, अर्थविशेष्यकवृत्तिस्वीकारपक्षे वृत्तेर्राश्रयतासम्बन्धेनार्थनिष्ठाया अर्थवाचक-पदनिरूपितत्वादेवेत्यर्थः।

तदनभिधायकत्वमाह–तच्छाब्दबोधेति, अस्य "इत्यपि न" इत्यनेनान्वयः। तच्छाब्दबोधौपयिकाकाङ्क्षाशून्यत्वमेव=कर्तृविशेष्यकाख्यातार्थसंख्याप्रकारक-शाब्दबोधजनकाकाङ्क्षाशून्यत्वमेव कर्तृत्वानभिधायकत्वं तथा च 'चैत्रेण पच्यते तण्डुलः' इत्यत्राख्यातस्य कर्मविशेष्यकसंख्याप्रकारकशाब्दबोधजनकाकाङ्क्षा-वत्त्वेन तच्छाब्दबोधौपयिकाकाङ्क्षाराहित्यम्=कर्तृविशेष्यकाख्यातार्थसंख्या-प्रकारकशाब्दबोधजनकाकाङ्क्षाशून्यत्वं तत्र='पच्यते' इत्याख्यातेऽक्षतमेवेति न तृतीयाया अनुपपत्तिः। ननु यद्येतादृशाकाङ्क्षाशून्यत्वेनाख्यातस्यात्र कर्तृविशेष्यकबोधजनकत्वं न स्यात्तदा चैत्रस्य कर्तृत्वमपि न ज्ञातं स्यान्न चैवमस्तीत्याशङ्क्याह– 'चैत्रादीति, 'चैत्रेण पच्यते' इत्यत्र न चैत्रस्य कर्तृत्वमाख्यातेन प्रतिपाद्यते किन्तु चैत्रपदोत्तरतृतीययैवेति तृतीयया कर्तृत्वबोधन-संभवात्तत्र='पच्यते' इत्याख्याते तादृशाकाङ्क्षायाः=कर्तृविशेष्यकसंख्या-प्रकारकबोधजनकाङ्क्षाया अकल्पनात्=कल्पनापेक्षाभावादित्यर्थः। यदा ह्याख्यातस्याख्यातत्वेन रूपेण वा लत्वादिना रूपेण वा कर्तृत्वादिवाचकत्वमस्ति तदा 'पच्यते' इत्याख्यातस्यापि कर्तृत्वादिवाचकत्वमक्षतमेव शक्तता-वच्छेदकरूपेणाख्यातत्वेन लत्वादिना वा समाक्रान्तत्वादित्युक्तम्–कर्तृत्वादि-

कर्तृत्वबोधनसंभवात् तत्र तादृशकाङ्क्षाया अकल्पनात्, इत्यपि न– 'चैत्रेण पक्ष्यते' इत्यादौ तृतीयानुपपत्तेः, 'पक्ष्यते चैत्रः' इत्यादितश्चैत्रादौ पाककृतेः केवलात् 'पक्ष्यते' इत्यादितश्च मुख्यविशेष्यतया तस्या बोधात् तादृशाख्यातधात्वोरानुपूर्वीविशेषाकाङ्क्षायाः कृतिबोधौपयिकत्वात्।

न च समभिव्याहाररूपाकाङ्क्षैव विवक्षणीया प्रकृते च प्रकृतिप्रत्यययोरानुपूर्वीरूपाकाङ्क्षा न तु समभिव्याहार इति

वाचकत्वेऽपीति। एवं कर्मविशेष्यकसंख्याप्रकारकशाब्दबोधजनकाकाङ्क्षाशून्यत्वमेव कर्मत्वानभिधायकत्वं तदेव द्वितीयाप्रयोजकम् यथा 'तण्डुलं पचति' इत्यत्राख्यातेऽस्ति। तच्छाब्दबोधेत्याद्युक्तं परिहरति–इत्यपि नेति, एवं हि 'चैत्रेण पक्ष्यते' इत्यत्र तृतीया न स्यात्–'पक्ष्यते' इति यथा कर्मणि लृटा भवति तथा कर्तर्यपि लृटा भवतीति 'पक्ष्यते' इत्याख्याते कर्तृविशेष्यकसंख्याप्रकारकशाब्दबोधजनकाकाङ्क्षायाः सत्त्वेन तृतीयाप्रयोजकं कर्तृविशेष्यकसंख्याप्रकारकशाब्दबोध- जनकाकाङ्क्षाशून्यत्वं नास्तीति तृतीयानुपपत्तिरित्यर्थः। 'पक्ष्यते' इत्याख्यातस्य कर्तृविशेष्यकसंख्याप्रकारकशाब्दबोधजनकाकाङ्क्षावत्त्वमुपपादयति–पक्ष्यते चैत्र इत्यादिना, 'पक्ष्यते चैत्रः' इत्यत्र कृतिश्चैत्रे प्रकारीभूय भासते इति चैत्रविशेष्यककृतिप्रकारको बोधो जायते, केवलात्= चैत्रपदरहितात् 'पक्ष्यते' इतिपदाच्च मुख्यविशेष्यतया तस्याः=पाककृतेर्बोधो जायते कृतिश्च कर्तृत्वमेवेति कर्तृत्वविशेष्यकबोधस्य जायमानत्वात् तादृशाख्यातधात्वोः='पक्ष्यते' इत्याख्यातधात्वोरानुपूर्वीविशेषाकाङ्क्षायाः='पक्ष्यते' इत्यत्र वर्तमानाकाङ्क्षायाः कृतिबोधौपयिकत्वात्=कृतिविशेष्यकबोधजनकत्वात् 'पक्ष्यते' इत्याख्याते कर्तृविशेष्यकसंख्याप्रकारकशाब्दबोधौपयिकाकाङ्क्षायाः सत्त्वेनैतादृशाकाङ्क्षाशून्यत्वरूपं कर्तृत्वानभिधायकत्वं तृतीयाप्रयोजकं नास्तीति 'चैत्रेण पक्ष्यते' इत्यादौ तृतीयानुपपत्तिरित्यर्थः। "पाककृतेः" इत्यस्य "बोधात्" इत्यनेनान्वयः।

ननु "तच्छाब्दबोधौपयिकाकाङ्क्षाशून्यत्वं तदनभिधायकत्वम्" इत्यत्राकाङ्क्षापदेन समभिव्याहाररूपैवाऽऽकाङ्क्षा गृह्यते न तु प्रकृतिप्रत्ययोरानुपूर्वीरूपा, तत्र प्रकृतिप्रत्यययोस्तु पूर्वापरीभावे वैपरीत्यं नैव सम्भवति–

नोक्तानुपपत्तिरिति वाच्यम्, तथा सति 'चैत्रेण पचति' इत्यादावपि तृतीयायाः साधुतापत्तेः– तादृशचैत्रपदाख्यातपदयोः समभिव्याहारस्य कृतिबोधानौपयिकत्वात्। 'चैत्रेण विजेष्यते मैत्रः' इत्यादौ तृतीयानुपपत्तेश्च–'विजेष्यते मैत्रः' इत्यादितो मैत्रकृतिबोधात् तादृशाख्यातपदमैत्रपदयोः समभिव्याहारस्य कृतिबोधौपयिकत्वात्।

प्रकृत्यव्यवहितोत्तरमेव प्रत्ययसम्भवाद् यथा 'पचति पचते पक्ष्यते' इत्यादौ इत्येषा पूर्वापरीभावरूपाकाङ्क्षास्ति, समभिव्याहारे तु पूर्वापरीभावस्य वैपरीत्यमपि भवति यथा–'पचति चैत्रः' इत्यपि वक्तुं शक्यते 'चैत्रः पचति' इत्यपि वक्तुं शक्यते इति, तथा च कर्तृविशेष्यकसंख्याप्रकारकशाब्दबोधजनक-समभिव्याहाररूपाकाङ्क्षाशून्यत्वं तृतीयाप्रयोजकमस्ति कर्तृविशेष्यकसंख्या-प्रकारकशाब्दबोधजनकसमभिव्याहारश्च प्रथमान्तचैत्रपदसमभिव्याहृताख्यात-समभिव्याहार एव प्रकृते 'चैत्रेण पक्ष्यते' इत्यत्र च प्रकृतिप्रत्यययोरानुपूर्वीरूपा 'पक्ष्यते' इत्याकाङ्क्षैवास्ति न तु समभिव्याहारः=प्रथमान्तचैत्रपदसमभिव्याहृता-ख्यातसमभिव्याहार इत्येतादृशसमभिव्याहारशून्यत्वं तृतीयाप्रयोजकम् 'चैत्रेण पक्ष्यते' इत्यत्रास्त्येवेति नोक्तानुपपत्तिः=तृतीयानुपपत्तिरित्याशङ्कते–न चेति। परिहरति–तथा सतीति तथा सति=यदि कर्तृविशेष्यकसंख्याप्रकारक-शाब्दबोधजनकसमभिव्याहारशून्यत्वमेव तृतीयाप्रयोजकं तदैतादृशसमभिव्याहार-शून्यत्वं तु 'चैत्रेण पचति' इत्यत्राप्यस्त्येव तादृश='चैत्रेण पचति' इत्याकारक-तृतीयान्तचैत्रपदाख्यातपदयोः समभिव्याहारस्य कृतिबोधानौपयिकत्वात्= कर्तृत्वबोधाजनकत्वादत्र कर्तृविशेष्यकशाब्दबोधजनकसमभिव्याहारशून्यत्वं तृतीयाप्रयोजकमस्त्येवेति तृतीयायाः साधुत्वं स्यादेव न चैतदिष्टमित्यर्थः। किं च कर्तृविशेष्यकसंख्याप्रकारकशाब्दबोधजनकसमभिव्याहारशून्यत्वं यदि तृतीयाप्रयोजकं स्यात्तदा "चैत्रेण विजेष्यते मैत्रः" इत्यत्र तृतीयाप्रयोजकस्य तादृशसमभिव्याहारशून्यत्वस्याऽभावात् तृतीया न स्यात् 'विजेष्यते मैत्रः' इति। समभिव्याहारात् मैत्रकृतिबोधात्=कर्तृविशेष्यकबोधस्य जायमानत्वात् तादृश='विजेष्यते मैत्रः' इत्याकारकाख्यातमैत्रपदयोः समभिव्याहारस्य कृति-बोधौपयिकत्वात्=कर्तृविशेष्यकबोधजनकत्वात् एतादृश(विजेष्यते मैत्र इत्याकारक) कर्तृविशेष्यकशाब्दबोधजनकसमभिव्याहारशून्यत्वं 'चैत्रेण विजेष्यते

किं तु तत्तात्पर्यशून्यत्वमेव तथा च 'चैत्रेण पक्ष्यते' इत्यादावाख्यातस्य कर्तृत्वादितात्पर्यकत्वे तृतीयाऽसाधुरेव, तथा च 'चैत्रेण पचति' इत्यादावाख्यातस्याऽर्थाविवक्षायां तृतीयायाः साधुत्वेऽपि परस्मैपदस्याऽसाधुत्वान्न प्रयोगः। परस्मैपदस्या-

---

मैत्रः' इत्यत्र नास्ति तादृशसमभिव्याहारघटितत्वादेवेति चैत्रपदात्तृतीया न स्यादित्यर्थः।

तस्मात् तच्छाब्दबोधौपयिकाकाङ्क्षाशून्यत्वं कर्तृत्वकर्मत्वानभिधायकत्वं न सम्भवति किन्तु तत्तात्पर्यशून्यत्वम्=कर्तृविशेष्यकशाब्दबोधविषयकतात्पर्यशून्यत्वमेव कर्तृत्वानभिधायकत्वं तदेव तृतीयाप्रयोजकम्, कर्मविशेष्यकशाब्दबोधविषयकतात्पर्यशून्यत्वमेव कर्मत्वानभिधायकत्वं तदेव द्वितीयाप्रयोजकमित्याह—किं त्विति, तथा च 'पक्ष्यते' इति प्रयोगः कर्तर्यपि लृटा भवति कर्मण्यपि लृटा भवति तत्र 'चैत्रेण पक्ष्यते' इत्यत्राख्यातस्य कर्तृविशेष्यकशाब्दबोधविषयकतात्पर्यविशिष्टत्वे तृतीयाप्रयोजकस्य कर्तृविशेष्यकशाब्दबोधविषयकतात्पर्यशून्यत्वस्याभाववत्त्वादसाधुरेव (असाध्वेव) तृतीया, यदा चाख्यातस्याऽत्र कर्मविशेष्यकशाब्दबोधविषयकतात्पर्यविशिष्टत्वं तदा कर्तृविशेष्यकशाब्दबोधविषयकतात्पर्यशून्यत्वात्तृतीया साधुरेवेत्यर्थः। 'चैत्रेण पचति' इत्यत्राख्यातार्थस्य कर्तृत्वस्याविवक्षायाम्=कर्तृविशेष्यकशाब्दबोधविषयकतात्पर्यस्यासत्त्वे तृतीयायाः साधुत्वसम्भवेऽपि परस्मैपदस्य साधुत्वं न सम्भवतीति परस्मैपदप्रयोगो न सम्भवतीत्याह—तथाचेति। अत्र परस्मैपदस्य कथं साधुत्वमित्याह— परस्मैपदस्यासाधुत्वञ्चेति) 'चैत्रेण पचति' इत्यत्र धात्वर्थस्य पाकस्य विशेष्यभूतायाः कृतेराख्यातःप्रत्ययेनाविवक्षायां भावस्य वा कर्मत्वस्य वा विवक्षा स्यादेव आख्यातस्य निरर्थकत्वासम्भवात् तत्र च "भावकर्मणोः" इति सूत्रेणात्मने पदं प्राप्नोतीति परस्मैपदस्याऽसाधुत्वं स्यादेवेति न 'चैत्रेण पचति' इति प्रयोगापत्तिरत्र तृतीयापत्तिर्वेत्यर्थः। ननु यदि 'चैत्रेण पचति' इत्यत्र परस्मैपदस्यासाधुत्वमात्मनेपदप्राप्तेस्तदात्मनेपदेन 'चैत्रेण पचते' इति प्रयोगः स्यादेव न चैतदिष्टमित्याशङ्क्याह—आख्यातार्थविवक्षायामिति, आत्मनेपदाख्याते कर्तृविशेष्यकबोधस्य कर्मविशेष्यकबोधस्य भावविशेष्यकबोधस्य च सामर्थ्यमस्त्येवेति 'चैत्रेण पचते' इत्यत्राख्यातार्थ-

साधुत्वं च धात्वर्थविशेष्यस्य प्रत्ययेनाऽविवक्षणे "भाव-कर्मणोः" इति सूत्रेणात्मनेपदनियमात्। आख्यातार्थविवक्षायां न 'चैत्रेण पचते' इत्यादिप्रयोगः–शबादिविकरणस्याऽ-साधुत्वात्, कर्तृत्वतात्पर्यकसार्वधातुकयोगे एव तत्साधुत्वात्।

कर्तृत्वकर्मत्वोभयतात्पर्येण 'मैत्रः पक्ष्यते तण्डुलः' इत्यादयस्तु न प्रयोगाः– तदेकतरबोधेऽन्यतरपरत्वेनागृह्यमाणा-

---

विवक्षायाम्=आख्यातार्थस्य कर्मत्वस्य भावस्य वा विशेष्यतया विवक्षाया-मात्मनेपदस्य साधुत्वेऽपि विकरणस्य शप्प्रत्ययस्य साधुत्वं न सम्भवति कर्तृत्वतात्पर्यकसार्वधातुकाख्यातयोगे एव तत्साधुत्वात्=शपः साधुत्वात् "कर्तरिशप्" इत्यनुशासनात्, आख्यातार्थस्य कर्तृत्वस्य विशेष्यतया विवक्षायां चात्मनेपदस्य शपश्च साधुत्वेऽपि तृतीयायाः साधुत्वं न सम्भवति कर्तृविशेष्यकत्वाविवक्षायामेव कर्तृविशेष्यकशाब्दबोधविषयकतात्पर्यशून्यत्वस्य तृतीयाप्रयोजकत्वस्य सम्भवेन तृतीयायाः साधुत्वात् कर्तृविशेष्यकत्वविवक्षायां चाऽसाधुत्वादिति न 'चैत्रेण पचते' इत्यपि प्रयोगो भवतीत्यर्थः।

कर्तृत्वेति–कर्तृत्वकर्मत्वोभयविशेष्यकशाब्दबोधतात्पर्येण 'मैत्रः पक्ष्यते तण्डुलः' इत्यादिप्रयोगो न भवति–तदेकतरबोधे=कर्तृकर्मणोर्मध्ये एकतर-विशेष्यकाख्यातार्थप्रकारकशाब्दबोधे ह्यन्यपरत्वेन=कर्तृकर्मणोर्मध्ये ह्यन्यपरत्वेना-ऽगृह्यमाणं यदाख्यातधर्मिकमाऽख्यातविषयकं प्रकृतान्वयबोधपरत्वज्ञानं प्रकृतशाब्दबोधपरत्वज्ञानं तस्य हेतुत्वाद् यथात्र कर्तृविशेष्यकाख्यातार्थ-प्रकारकशाब्दबोधे कर्मविशेष्यकशाब्दबोधपरत्वेनागृह्यमाणं यदाख्यातं पक्ष्यते इत्याख्यातं तादृशाख्यातधर्मिकं तादृशाख्यातविषयकं यत्प्रकृतान्वयबोधपरत्वज्ञानं इदमाख्यातं कर्तृविशेष्यकबोधजनकमिति ज्ञानं तस्य हेतुत्वादेक (कर्तृ) विशेष्यक एव बोधो जायते एवं कर्मविशेष्यकबोधपक्षेऽपि ज्ञेयम्– तथा च कर्तृविशेष्यकबोधविवक्षायाम् 'मैत्रः पक्ष्यते तण्डुलम्' इत्येव भवति–आख्या तस्य कर्तृत्वाभिधायकत्वेन मैत्रपदात् प्रथमायाः कर्मत्वानभिधायकत्वेन तण्डुलपदाच्च द्वितीयायाः प्राप्तेः, कर्मविशेष्यकबोधविवक्षायां च 'मैत्रेण पक्ष्यते तण्डुलः' इत्येव भवति–आख्यातस्य कर्मत्वाभिधायकत्वेन तण्डुलपदात् प्रथमायाः कर्मत्वानभिधायकत्वेन तण्डुलपदाच्च द्वितीयायाः प्राप्तेः,

ख्यातधर्मिकप्रकृतान्वयबोधपरत्वज्ञानस्य हेतुत्वात्। 'चैत्रेण पक्ष्यते तण्डुलः' इत्यादौ कर्त्तृत्वादावाख्यातस्य तात्पर्यग्रहे कर्मत्वाद्यन्वयबोधोऽपि न भवत्येव।

अथ 'पक्वानि भुङ्क्ते चैत्रः' 'ओदनः पक्त्वा भुज्यते' इत्यादौ कृता क्रमेण कर्तृत्वकर्मत्वानभिधानात् चैत्रपदौदनपदाद्युत्तरं तृतीयाद्वितीये कथं न स्याताम्? न च कृताऽनभिधानेऽप्याऽऽख्यातेन तदभिधानान्नाऽनभिहितत्वम्—समभिव्याहृतपदाभिहितत्वसामान्याभावस्यैवाऽनभिहितपदेन विवक्ष-

---

कर्मविशेष्यकबोधविवक्षायां च 'मैत्रेण पक्ष्यते तण्डुलः' इत्येव भवति—आख्यातस्य कर्मत्वाभिधायकत्वेन तण्डुलपदात् प्रथमायाः कर्तृत्वानभिधायकत्वेन मैत्रपदाच्च तृतीयायाः प्राप्तेरित्यर्थः। फलमाह—चैत्रेणेति, 'पक्ष्यते' इत्याख्यातस्य कर्तृत्वे तात्पर्यग्रहे कर्मत्वविशेष्यकबोधो न भवति कर्मत्वे तात्पर्यग्रहे कर्तृत्वविशेष्यकबोधो न भवति—एकविशेष्यकबोधपरत्वस्याऽपरविशेष्यकबोधे प्रतिबन्धकत्वादित्यर्थः। यद्यपि 'चैत्रेण पक्ष्यते तण्डुलः' इत्यत्र कर्मविशेष्यकबोध इष्ट एव तथाप्यत्राख्यातस्य कर्तृत्वे तात्पर्यग्रहे जाते कर्मत्वाद्यन्वयबोधः=कर्मत्वप्रकारककर्मव्यक्तिविशेष्यकोपि बोधो न जायते—तत्प्रतिबन्धकस्य कर्तृत्वपरत्वतात्पर्यग्रहस्य सत्त्वादित्यभिप्रायेणोक्तम्—कर्तृत्वादाविति। इदं च पूर्वमपि (१८९पृ.) व्याकृतम्।

ननु यदि कर्तृत्वानभिधाने तृतीया भवति तदा 'पक्वानि फलानि भुङ्क्ते चैत्रः' इत्यत्र पक्वपदघटकक्तप्रत्ययस्य कर्मत्वाभिधायकत्वेन कर्तृत्वानभिधायकत्वादत्र चैत्रपदात्तृतीया कथं न स्यात्? तथा यदि कर्मत्वाभिधायकत्वेन कर्मत्वानभिधाने द्वितीया भवति तदा 'ओदनः पक्त्वा भुज्यते' इत्यत्र क्त्वाप्रत्ययस्य कर्तृत्वाभिधायकत्वेन कर्मत्वानभिधायकत्वादत्रौदनपदाद् द्वितीया कथं न स्यादित्याशङ्कते—अथेति। ननु 'कर्तृत्वानभिधाने तृतीया कर्मत्वानभिधाने च द्वितीया' इत्यत्रानभिहितपदेन कर्तृकर्मवाचकपदसमभिव्याहृतपदाभिहितत्वसामान्याभावो विवक्षितः—अर्थात् कर्तृकर्मवाचकपदेन सह समभिव्याहृतेन केनापि पदेन यदि कर्तृत्वकर्मत्वयोरभिधानं न भवति तदा कर्तृपदात्तृतीया कर्मपदाद्द्वितीया भवति तथा च

णात् समभिव्याहृतेति करणाच्च 'चैत्रेण गम्यते ग्रामस्तं मैत्रो गच्छति' इत्यादौ न तृतीयाद्वितीयोरनुपपत्तिः– 'गच्छति' 'गम्यते' इत्याख्यातस्य तत्तत्पदासमभिव्याहृतत्वादिति वाच्यम्, तथा सति 'भुञ्जानेन चैत्रेण पच्यते' भोक्तव्यमोदनं पचति'

'पक्वानि भुङ्क्ते चैत्रः' इत्यत्र कृता=क्तप्रत्ययेन कर्तृत्वस्यानभिधानेऽप्याऽऽख्यातेनाभिधानमस्त्येवेत्यभिहितत्वसामान्याभावस्य तृतीयाप्रयोजकस्याभावान्न चैत्रपदात्तृतीयापत्तिः, एवम् 'ओदनः पक्त्वा भुञ्यते' इत्यत्र क्त्वाप्रत्ययेन कर्मत्वस्यानभिधानेऽप्याख्यातेनाभिधानमस्त्येवेत्यभिहितत्वसामान्याभावस्य द्वितीयाप्रयोजकस्याभावान्न ओदनपदाद्द्वितीयापत्तिरित्याशङ्कते–नचेति। अत्र यदि 'पदाभिहितत्वसामान्याभावस्यैवाऽनभिहितपदेन विवक्षणात्' इत्येवोच्येत तदा 'चैत्रेण गम्यते ग्रामः, तम् (ग्रामम्) मैत्रो गच्छति' इत्यत्र गच्छतिपदेन कर्तृत्वस्याभिधानादनभिधानं तृतीयाप्रयोजकं नास्तीति चैत्रपदात्तृतीया न स्यात्तथा गम्यते पदेन कर्मत्वस्याभिधानादनभिधानं द्वितीयाप्रयोजकं नास्तीति तमिति तत्पदाद् द्वितीया न स्यादिति दोषपरिजिहीर्षया समभिव्याहृतेति कृतम्= "समभिव्याहृतपदाभिहितत्वसामान्याभावस्य" इत्येवमुक्तं तथा चात्र 'चैत्रेण गम्यते ग्रामः' इति पृथक् वाक्यम् 'तं मैत्रो गच्छति' इति च पृथक् वाक्यं तथा च गच्छतीति पदेन कर्तृत्वस्याभिधानेऽपि 'गच्छति' इत्याख्यातस्य तत्पदाऽसमभिव्याहृतत्वात्= चैत्रपदेन सह समभिव्याहाराभावात्–वाक्यान्तर-घटकत्वाद् न गच्छतीत्याख्यातकृतकर्तृत्वाभिधानमाश्रित्य चैत्रपदात्तृतीयानुपपत्तिः, तथा गम्यते इति पदेन कर्मत्वस्याभिधानेऽपि 'गम्यते' इत्याख्यातस्य वाक्यान्तर-घटकत्वेन तत्पदासमभिव्याहृतत्वात्=तत्पदेन सह समभिव्याहाराभावाद् न गम्यते इत्याख्यातकृतकर्मत्वाभिधानमाश्रित्य वाक्यान्तरस्थतत्पदाद् द्वितीयानुप-पत्तिरित्याह–समभिव्याहृतेति करणाच्चेति। परिहरति–तथा सतीति, यदि समभिव्याहृतपदैः कर्तृत्वाभिधानसामान्याभावस्य तृतीयाप्रयोजकत्वमुच्यते तदा 'भुञ्जानेन चैत्रेण पच्यते' इत्यत्रापि चैत्रपदात्तृतीया न स्यादेव–अत्र पच्यते पदेन कर्तृत्वस्यानभिधानेऽपि भुञ्जानपदेन कर्तृत्वाभिधानस्य तृतीयाप्रतिबन्धकस्य सत्त्वादेव–शानच्प्रत्ययस्य कर्तरि वर्तमानत्वात्। तथा यदि समभिव्याहृतपदैः कर्मत्वाभिधानसामान्याभावस्य द्वितीयाप्रयोजकत्वमुच्यते तदा 'भोक्तव्यमोदनं पचति' इत्यत्राप्योदनपदाद् द्वितीया न स्यादेव–अत्र पचतीति पदेन

इत्यादौ तृतीयाद्वितीययोरनुपपत्तिः–कृता कर्तृत्वकर्मत्वयोरभिधानात्।

कृता तत्र भोजनकर्तृत्वतत्कर्मत्वयोरभिधानेऽपि पाककर्तृत्वं तत्कर्मत्वं चानभिहितमेवेति चेत्? तर्हि प्रकृतेऽपि तदनभिहितमेव।

न च प्रधानक्रियानिरूपितकर्तृत्वाद्यनभिधाने तृतीयादेः साधुतेति तदुक्तम्–"प्रधानशक्त्यऽभिधाने गुणशक्तिर-

---

कर्मत्वस्यानभिधानेऽपि भोक्तव्यपदेन कर्मत्वाभिधानस्य द्वितीयाप्रतिबन्धकस्य सत्त्वादेव– तव्यप्रत्ययस्य कर्मणि वर्तमानत्वादिति "समभिव्याहृतपदाभिहितत्वसामान्याभावस्य" इत्यादिव्युत्पादनमपि न युक्तमित्यर्थः।

ननु 'भुञ्जानेन चैत्रेण पच्यते' इत्यत्र भुञ्जानपदेन भोजनकर्तृत्वस्याभिधानेऽपि पच्यते इति पदेन पाककर्तृत्वं त्वभिहितं नास्तीति तादृशपाककर्तृत्वानभिधानमाश्रित्यैवात्र चैत्रपदात्तृतीया प्राप्ता साध्वी च, तथा 'भोक्तव्यमोदनं पचति' इत्यत्र भोक्तव्यपदेन भोजनकर्मत्वस्याभिधानेऽपि पचतीति पदेन पाककर्मत्वं त्वभिहितं नास्तीति तादृशपाकर्मत्वानभिधानमाश्रित्यैवात्रौदनपदाद् द्वितीया प्राप्ता साध्वी चेत्याह– कृतेति। अथेति पूर्वपक्षी समाधत्ते– तर्हीति। प्रकृतेऽपि='पक्वानि भुङ्क्ते चैत्रः' इत्यत्रापि भुङ्क्ते इति पदेन भोजनकर्तृत्वाभिधानेऽपि पक्वानीति पदेन पाककर्तृत्वं त्वभिहितं नास्ति क्तप्रत्ययस्य कर्मणि सत्त्वादिति तादृशपाककर्तृत्वानभिधानमाश्रित्य चैत्रपदात्तृतीया स्यादेव तथा 'ओदनः पक्त्वा भुज्यते' इत्यत्रापि भुज्यते इतिपदेन भोजनकर्मत्वाभिधानेऽपि पक्त्वेतिपदेन पाककर्मत्वं त्वभिहितं नास्ति क्त्वाप्रत्ययस्य कर्मण्यसत्त्वादिति तादृशपाककर्मत्वानभिधानमाश्रित्यौदनपदाद् द्वितीया स्यादेवेत्यथेत्याद्युक्तशङ्का तदवस्थैवेत्यर्थः। तत्=पाककर्तृत्वं पाककर्मत्वं च।

ननु प्रधानक्रियानिरूपितस्य कर्तृत्वस्यानभिधाने तृतीया कर्मत्वस्यानभिधाने च द्वितीया भवति साध्वी च प्रधानक्रियानिरूपितस्य कर्तृत्वस्य कर्मत्वस्य चाऽभिधाने गौणक्रियानिरूपितमपि कर्तृत्वं कर्मत्वं चाऽभिहितवदेव भवति

भिहितवत् प्रकाशते" इति शक्तिः=कर्तृत्वादिकमिति वाच्यम्, तथापि 'चैत्रेण दृश्यमानं घटं मैत्रः पश्यति' इत्यादौ ज्ञानभेदेनविषयताभेदाभावात् चैत्रदर्शनमैत्रदर्शनोभय-निरूपितविषयत्वरूपकर्मतायाः कृताऽभिधानाद् द्वितीयानुप-पत्तिः, इति चेत्?

तथा प्रधानक्रियानिरूपितस्य कर्तृत्वस्य कर्मत्वस्य चाऽनभिधाने गौणक्रिया-निरूपितमपि कर्तृत्वं कर्मत्वमऽनभिहितवदेव भवति, उक्तं च "प्रधानशक्त्य-भिधाने" इत्यादिना, प्रधानशक्तेः=प्रधानक्रियानिरूपितस्य कर्तृत्वस्य कर्मत्व-स्याभिधाने सति गुणशक्तिः=गौणक्रियानिरूपितमपि कर्तृत्वं कर्मत्व-मभिहितवदेव भवतीत्यर्थः, उक्तं च हरिणा–

"प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिः, गुणाश्रया तत्र प्रधानमनुरुध्यते।।
उक्तमेवोक्ततां याति क्वचिदुक्तमनुक्तताम्।
अनुक्तमपि नोक्तं स्यात् क्वचिदेव पदान्तरैः।।" इति।

तथा च 'पक्वानि भुङ्क्ते चैत्रः' इत्यत्र प्रधानीभूतभोजनक्रियानिरूपित-कर्तृत्वस्याभिहितत्वाद् गौणीभूतपाकक्रियानिरूपितकर्तृत्वमप्यभिहितवदेव प्रकाशते इति प्रधानीभूतभोजनक्रियानिरूपितकर्तृत्वानभिधानस्य तृतीयाप्रयोजक-स्याभावान्नात्र चैत्रपदात्तृतीयापत्तिः, तथा 'ओदनः पक्त्वा भुज्यते' इत्यत्र प्रधानीभूतभोजनक्रियानिरूपितकर्मत्वानभिधानस्य द्वितीयाप्रयोजकस्या-भावान्नात्रौदनपदाद् द्वितीयापत्तिः। 'भुञ्जानेन चैत्रेण पच्यते' इत्यत्र च प्रधानीभूतपाकक्रियानिरूपितकर्तृत्वानभिधानस्य तृतीयाप्रयोजकस्य सत्त्वान्न चैत्रपदात्तृतीयानुपपत्तिः, तथा 'भोक्तव्यमोदनं पचति' इत्यत्र प्रधानीभूतपाक-क्रियानिरूपितकर्मत्वानभिधानस्य द्वितीयाप्रयोजकस्य सत्त्वान्नात्रौदनपदाद् द्वितीयानुपपत्तिरित्याशङ्क्याह–नचेति। परिहरति– तथापीति, ज्ञानभेदेऽपि ज्ञेयपदार्थनिष्ठकर्मत्वरूपविषयताया भेदो न भवतीति 'चैत्रेण दृश्यमानं घटं मैत्रः पश्यति' इत्यत्र मैत्रकर्तृकप्रधानीभूतदर्शनक्रियानिरूपितं विषयत्वरूपं कर्मत्वं चैत्रकर्तृकगुणीभूतदर्शनक्रियानिरूपितं विषयत्वरूपं कर्मत्वं च घटे एकमेव तच्च 'दृश्यमानम्' इति कृताऽभिहितमेवेति प्रधानक्रियानिरूपित-

न, तत्तत्प्रातिपदिकार्थविशेषणत्वमात्रेण कर्तृत्वकर्मत्वाद्यविवक्षाया एव तदनभिधानपदार्थत्वात्, तत्तत्प्रातिपदिकार्थविशेष्यतया कर्मत्वकर्तृत्वादिविवक्षायां द्वितीयादिविभक्तेः साधुत्वमित्यर्थे तात्पर्यस्य पर्यवसितत्वात्। शेषमाख्यातार्थविचारावसरे विवेचयिष्यत इत्यलमत्राधिक्येन।

कर्मत्वस्यात्राभिहितत्वेनाऽनभिहितत्वं द्वितीयाप्रयोजकं नास्तीति घटपदाद् द्वितीया न स्यादेवेति दोषः। दर्शनमपि दर्शनत्वेन रूपेणैकमेवेति विज्ञेयम्।

अथेत्यादिनाशङ्कितं परिहरति– नेति, तत्तत्प्रातिपदिकार्थविशेषणत्वेन या कर्तृत्वस्याऽविवक्षा तदेव कर्तृत्वानभिधानम्, तत्तत्प्रातिपदिकार्थविशेषणत्वेन या कर्मत्वस्याविवक्षा तदेव कर्मत्वानभिधानं, तस्मात् कर्तृत्वस्य तत्तत्प्रातिपदिकार्थस्य विशेषणत्वेनाऽविवक्षायां विशेष्यत्वेन विवक्षायां च कर्तृवाचकपदात् तृतीया भवति तथा च 'चैत्रेण पच्यते' इत्यत्र तृतीयार्थस्य कर्तृत्वस्य चैत्ररूपप्रातिपदिकार्थस्य विशेषणतया विवक्षा नास्ति किन्तु विशेष्यतयैव विवक्षास्ति कर्तृत्वस्य प्रत्ययार्थत्वेन प्रधानत्वात् "प्रकृतिप्रत्ययार्थौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्यम्" इति न्यायात् चैत्रपदात्तृतीया जाता साध्वी च, एवम् 'भुञ्जानेन चैत्रेण पच्यते' 'चैत्रेण दृश्यमानम्' इत्यादिष्वपि कर्तृत्वस्य प्रातिपदिकार्थविशेष्यत्वात् तृतीयोपपत्तिर्ज्ञेया। एवं कर्मत्वस्य तत्तत्प्रातिपदिकार्थस्य विशेषणत्वेनाऽविवक्षायां विशेष्यत्वेन विवक्षायां च कर्मवाचकपदाद् द्वितीया भवति यथा 'तण्डुलं पचति' इत्यत्र द्वितीयार्थस्य कर्मत्वस्य तण्डुलरूपप्रातिपदिकार्थस्य विशेषणतया विवक्षा नास्ति किन्तु विशेष्यतयैव विवक्षास्ति कर्मत्वस्य प्रत्ययार्थत्वेन प्रधानत्वादिति तण्डुलपदाद् द्वितीया जाता, एवमेव 'भोक्तव्यमोदनं पचति' 'चैत्रेण दृश्यमानं घटं मैत्रः पश्यति' इत्यादिष्वपि कर्मत्वस्य प्रातिपदिकार्थविशेष्यत्वाद् द्वितीयोपपत्तिर्ज्ञेया। 'चैत्रः पचति' 'पक्वानि भुङ्क्ते चैत्रः' इत्यत्र चैत्रपदोत्तरप्रथमार्थो न कर्तृत्वं येन कर्तृत्वस्य प्राधान्येन विशेष्यत्वं स्यात् किन्तु चैत्ररूपप्रातिपदिकार्थविशेषणत्वमेवास्ति कृतिमांश्चैत्र इत्याकारकबोधोदयादिति नात्र कर्तृवाचकचैत्रपदात्तृतीयापत्तिः। तथा–'तण्डुलः पच्यते' 'ओदनः पक्त्वा भुज्यते' इत्यादौ तण्डुलादिपदोत्तरप्रथमार्थो न कर्मत्वं येन तस्य प्राधान्येन विशेष्यत्वं स्यात् किन्तु तण्डुलादिरूपप्रातिपदिकार्थविशेषणत्वमेव विक्लित्त्याश्रयस्तण्डुल

आख्यातद्विवचनबहुवचनयोस्तु संख्याबोधकत्वमावश्यकम्– 'चैत्रो मैत्रश्च गच्छतः' 'चैत्रो मैत्रो देवदत्तश्च गच्छन्ति' इत्यादौ

"चन्द्रे कलङ्कः सुजने दरिद्रता
विकाशलक्ष्मीः कमलेषु चञ्चला।
मुखाप्रसादः सधनेषु सर्वदा यशो
विधातुः कथयन्ति खण्डितम्॥"

इत्याकारकबोधोदयादिति नात्र कर्मवाचकतण्डुलादिपदाद् द्वितीयापत्तिरित्यर्थः। उक्तमेव स्पष्टयति– तत्तत्प्रातिपदिकार्थविशेष्यतयेति, 'चैत्रेण पच्यते तण्डुलः' इत्यादौ 'चैत्रादिवृत्तिकृतिजन्यव्यापारजन्यविक्लित्त्याश्रयस्तण्डुलः' इत्याद्याकारकबोधोदयाच्चैत्रादिविशेष्यत्वेनैव कर्तृत्वम्=कृतिर्भासते इति चैत्रादिपदात्तृतीया जाता। 'तण्डुलं पचति चैत्रः' इत्यादौ 'तण्डुलादिवृत्तिविक्लित्त्यनुकूलव्यापारानुकूलकृतिमांश्चैत्रः' इत्याद्याकारकबोधोदयात् तण्डुलादिविशेष्यत्वेनैव विक्लित्तिर्भासते विक्लित्तिरेव चात्र कर्मत्वमिति तण्डुलादिपदाद्द्वितीया प्राप्नोतीत्यनुसन्धेयम्। फलस्य कर्मत्वं चाग्रे धातुप्रकृतिकप्रत्ययार्थविचारस्थले "कर्मत्वं च धात्वर्थतावच्छेदकीभूतसंयोगविभागादिरेव" इत्यादिना वक्ष्यति।

आख्यातैकवचनस्य संख्याबोधकत्वाभावेऽऽख्यातद्विवचनस्य द्वित्वसंख्याबोधकत्वामाख्यातबहुवचनस्य च बहुत्वसंख्याबोधकत्वामावश्यकमेव–'चैत्रो मैत्रश्च गच्छतः' इत्यत्र सुब्विभक्तिद्विवचनस्याभावादाख्यातद्विवचनादेव द्वित्वबोधस्वीकारावश्यंभावात्, एवम् 'चैत्रो मैत्रो देवदत्तश्च गच्छन्ति' "चन्द्रे कलङ्कः" इत्यादिवाक्यघटकाख्यातबहुवचनस्यापि बहुत्वसंख्याबोधकत्वमावश्यकम्– शाब्दबोधविषयीभूतबहुत्वस्य सुपा बोधासम्भवात् सुब्विभक्तिबहुवचनस्याभावादित्याह– आख्यातेति। आख्यातद्विवचनबहुवचनार्थद्वित्वबहुत्वयोश्च प्रातिपदिकार्थचैत्रादावन्वयो भवति क्रियायां द्वित्वसंख्यान्वयासम्भवात्, चैत्रमैत्रपदोत्तरसुबेकवचनं चात्र साधुत्वमात्रार्थकत्वान्निरर्थकमेव चैत्रमैत्रद्वये सुबेकवचनार्थैकत्वस्य बाधितत्वेनाऽन्वयासम्भवादित्यनुसंधेयम्।

ननु तत्र='चैत्रो मैत्रश्च गच्छतः' इत्यादौ सुबेकवचनस्यैव द्वित्वे बहुत्वे वा लक्षणास्त्वित्याऽख्यातैकवचनवदाख्यातद्विवचनबहुवचनयोरपि

इत्यादौ च द्वित्वबहुत्वबोधकसुपोऽभावात्।

न च तत्र सुबेकवचनस्यैव द्वित्वबहुत्वादौ लक्षणाऽस्त्विति वाच्यम्, आनुशासनिकातिरिक्तार्थे सुब्विभक्तेर्लक्षणाया अनभ्युपगमात्, अन्यथा 'चैत्रो मैत्रश्च गच्छतः' इत्यादाविव च्छन्दसि लक्षणयैव स्वादिना द्वित्वादिबोधनसंभवाद् औजसादिरूपादेशिस्मृतिद्वारा द्वित्वादिबोधनिर्वाहाय छन्दसि "सुपां सुलुक्" इत्यादिसूत्रेण औजसादिस्थाने स्वाद्यादेशस्य

निरर्थकत्वमेव युक्तमित्याशङ्कते– न चेति। परिहरति– आनुशासनिकेति, व्याकरणे सुबेकवचनस्य द्वित्वार्थकत्वं बहुत्वार्थकत्वं च नोक्तमिति न द्वित्वबहुत्वयोर्लक्षणा स्वीकर्तुं शक्यते, शक्यार्थैकत्वेन सह द्वित्वबहुत्वयोः सम्बन्धासम्भवादपि न तत्र लक्षणा सम्भवति–लक्षणायाः शक्यसम्बन्धरूपत्वात्। विपक्षे बाधकमाह– अन्यथेति, यदि सुब्भिभक्तेरपि क्वचिदर्थे लक्षणा व्याकरणकर्तुरभीष्टा स्यात्तदा "ऋजवः सन्तु पन्थाः" इत्यत्राऽऽदेशिभूत-जस्मरणद्वाराऽऽदेशरूपसुबेकवचनाद् बहुत्वबोधनिर्वाहाय 'पन्थानः' इत्यत्र-त्यजसः स्थाने 'पन्थाः' इत्यत्रत्यसुइत्येकवचनस्यादेशविधानं व्यर्थमेव स्यात्–'चैत्रो मैत्रश्च गच्छतः' इत्यादाविव 'ऋजवः सन्तु पन्थाः' इत्यत्रापि सुबेकवचनस्य बहुत्वे लक्षणया बहुत्वार्थबोधकत्वसम्भवात्, व्याकरणकर्त्रा चात्र "सुपां सु" इत्यादिसूत्रेण 'पन्थाः' इत्येकवचनस्य जस्स्थाने आदेशविधानं कृतमिति ज्ञायते– सुब्विभक्तेर्लक्षणा न भवतीति न 'चैत्रो मैत्रश्च गच्छतः' इत्यादावपि सुबेकवचनस्य द्वित्वबहुत्वादौ लक्षणासंभव इत्यर्थः। दोषान्तरमाह– चैत्रादिपदोत्तरेति, अत्र यदि चैत्रपदोत्तरैकवचनस्य द्वित्वादौ लक्षणा स्यात्तदा तादृशद्वित्वस्य तदप्रकृत्यर्थे=चैत्रपदोत्तरैकवचनस्य प्रकृत्यर्थश्चैत्र एव न तु मैत्र इति चैत्रपदोत्तरैकवचनाऽप्रकृत्यर्थमैत्रादावन्वयो न सम्भवति– उक्तव्युत्पत्तिविरोधेन= "प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वम्" इति व्युत्पत्तिविरोधात्। किं वा चैत्रपदोत्तरैकवचनार्थद्वित्वस्योद्देश्यता-वच्छेदकव्याप्यपर्याप्तिसम्बन्धेनैवान्वयः स्यात् चैत्रपदोत्तरैकवचनार्थद्वित्वस्य च चैत्रत्वमेवोद्देश्यतावच्छेदकं सम्भवति चैत्रत्वव्याप्यपर्याप्तिसम्बन्धेन च द्वित्वस्य चैत्रद्वये एवान्वयः सम्भवतीत्युक्तद्वित्वान्वयव्युत्पत्तिविरोधाद् न

वैयर्थ्यात्। चैत्रादिपदोत्तरैकवचनस्य द्वित्वादिलाक्षणिकत्वे तदप्रकृत्यर्थमैत्रादिसाधारणद्वित्वादिबोधस्योक्तव्युत्पत्ति-विरोधेनाऽनुपपत्तेश्च।

आख्यातार्थसंख्यान्वयबोधे च समानविशेष्यकतदर्थ-भावनान्वयबुद्धिसामग्री अपेक्षिता– भावनाया बाधादिग्रहकाले तात्पर्यादिग्रहशून्यकाले चोक्तस्थले द्वित्वान्वयाऽबोधात्, भावनाया अविशेष्ये धात्वर्थादौ संख्यान्वयाऽबोधाच्च

चैत्रमैत्रद्वयेऽन्वयबोध उपपद्यते इत्यर्थः। चैत्रमैत्रादिसकलपदोत्तरैकवचनानां द्वित्वादौ लक्षणायामनेकद्वित्वादिबोधापत्तिरित्यपि विज्ञेयम्।

आख्यातार्थसंख्यायाः कुत्रान्वयो भवतीति जिज्ञासायामाह– आख्यातार्थेति, आख्यातार्थसंख्याप्रकारकशाब्दबोधं प्रति समानविशेष्यक=आख्यातार्थ-संख्याभावनयोर्यो विशेष्यस्तद्विशेष्यक तदर्थ (आख्यातार्थ) भावनाप्रकारक-शाब्दबोधसामग्री अपेक्षिता भवति सा च सामग्री भावनाप्रकारकतात्पर्यज्ञान-योग्यताज्ञानादिघटिता ज्ञेया तथा च यत्राख्यातार्थभावनाया अन्वयो भवति तत्रैवाख्यातार्थसंख्याया अन्वयो भवतीति प्राप्तम्। आख्यातार्थसंख्याप्रकारक-शाब्दबोधं प्रत्याऽख्यातार्थभावनाप्रकारकशाब्दबोधसामग्र्याः कारणत्वे हेतुमाह– भावनाया इति, यदि आख्यातार्थसंख्याप्रकारकशाब्दबोधं प्रत्याख्यातार्थ-भावनाप्रकारकान्वयबोधसामग्री कारणं न स्यात्तदा भावनाया बाधग्रहकालेऽपि तथा भावनायाः=भावनाविषयकतात्पर्यादिग्रहशून्यकालेऽपि उक्तस्थले='चैत्रो मैत्रश्च गच्छतः' इत्यादिस्थले चैत्रादावाख्यातार्थसंख्याया अन्वयः स्यादेव न चैवं भवति, तथा भावनाया अविशेष्ये धात्वर्थादावप्याख्यातार्थसंख्याया अन्वयो न भवतीत्याऽख्यातार्थसंख्याप्रकारकशाब्दबोधं प्रति तादृशसामग्र्याः= आख्यातार्थभावनाप्रकारकशाब्दबोधसामग्र्याः स्वातन्त्र्येण=पृथगेव हेतुत्व-मस्तीत्यर्थः। विपक्षे बाधकमाह–तदकल्पनेपीति, आख्यातार्थसंख्याप्रकारक-शाब्दबोधं प्रति भावनाप्रकारकशाब्दबोधसामग्र्या हेतुत्वाकल्पनेप्याऽख्यात-जन्यसंख्योपस्थितियोग्यताज्ञानादिघटितया आख्यातार्थसंख्याप्रकारक-शाब्दबोधसामग्र्या भावनानवगाही (भावनामविषयीकृत्य) संख्याप्रकारक-शाब्दबोधः कदापि न जन्यते इति विवशमाऽख्यातार्थसंख्याप्रकारकशाब्दबोधं

तादृशसामग्र्याः संख्यान्वयबुद्धित्वावच्छिन्नं प्रति स्वातन्त्र्येण हेतुता। तदकल्पनेऽपि आख्यातजन्यसंख्योपस्थितियोग्यताज्ञान-विशेषादिघटितसामग्र्या भावनानवगाहिसंख्यान्वयबोधस्य कदाप्यजननात्, संख्यान्वयबोधसाधारणभावनान्वयबोधत्वा-वच्छिन्नहेतूनामपि तादृशसामग्रीघटकत्वेनापत्त्यभावात्।

न च तादृशकारणानां भावनान्वयबुद्धित्वं संख्यान्वय-बुद्धित्वं वा जन्यतावच्छेदकमुपेयत इत्यत्र विनिगमनाविरहः—

प्रति भावनाप्रकारकशाब्दबोधसामग्र्या हेतुत्वं कल्प्यते एवं च भावनाप्रकारक-शाब्दबोधसामग्र्या एव भावनाप्रकारकशाब्दबोधं प्रत्याख्यातार्थसंख्याप्रकारक-शाब्दबोधं प्रति च कारणत्वाल्लाघवमपि भवतीत्यर्थः। ननु यदि भावना-प्रकारकशाब्दबोधसामग्र्या आख्यातार्थसंख्याप्रकारकशाब्दबोधं प्रति स्वातन्त्र्येण हेतुत्वमस्ति तदा तादृशसामग्र्या भावनामविषयीकृत्यापि भावनानवगाह्या-ख्यातार्थसंख्याप्रकारकशाब्दबोधः कथं न स्यादित्याशङ्क्याह— संख्यान्वय-बोधेति, संख्याप्रकारकशाब्दबोधसामग्र्यां भावनाप्रकारकशाब्दबोधहेतूनामपि भावनाविषयकतात्पर्यज्ञानयोग्यताज्ञानादीनां घटकत्वेन=सत्त्वेन आपत्त्यऽभावात्= तादृशसामग्र्या भावनामविषयीकृत्य भावनानवगाहिकेवलसंख्याप्रकारक-शाब्दबोधस्यापत्तिर्नास्तीत्यर्थः। किं वा "कदाप्यजननात्" इत्युक्ते हेतुमाह— संख्यान्वयेति। अर्थस्तु स एव विज्ञेयः।

ननु तादृशकारणानाम्=संख्यान्वयबोधसाधारणभावनान्वयबोधसामग्री-घटककारणानां भावनान्वयबुद्धिरेव जन्या न संख्यान्वयबुद्धिर्जन्येत्यत्र विनिगमनाविरहः, अर्थाद् यद्येकैव सामग्री संख्याप्रकारकबोधस्य भावना-प्रकारकबोधस्य च कारणं किं वा यदि भावनामविषयीकृत्य संख्याप्रकारक-शाब्दबोधो न जायते तदाऽऽख्यातार्थसंख्याप्रकारकशाब्दबोधं प्रति भावना-प्रकारकशाब्दबोधसामग्रीकारणं न तु भावनाप्रकारकशाब्दबोधं प्रत्याख्यातार्थ-संख्याप्रकारकशाब्दबोधसामग्रीकारणमित्यत्र विनिगमनाविरहः तथा च भावनाप्रकारकशाब्दबोधं प्रत्येवाख्यातार्थसंख्याप्रकारकशाब्दबोधसामग्री किं न कारणं स्यात् इत्याशङ्क्याह— न चेति। परिहारहेतुत्वेन विनिगमनामाह— संख्यामिति, भावनामविषयीकृत्य संख्याप्रकारकशाब्दबोधः कदापि न जायते

संख्यामविषयीकृत्यापि भावनान्वयबोधस्यानुभवसिद्धत्वात्, द्वितीयस्य जन्यतावच्छेदकत्वाऽसंभवादिति दिक्।

अथ गुणादिवाचकपदोत्तरद्विवचनबहुवचनयोः कथं द्वित्वादिबोधकता? संख्याया गुणत्वेन गुणादौ बाधात्। न च तत्र स्वाश्रयसमवेतत्वादिसंबन्धेन द्रव्यगतं द्वित्वादिकमेव भासते इति वाच्यम्, एकव्यक्तावपि तादृशसंबन्धेन द्वित्वादेः परि-

---

संख्याविषयीकृत्य तु 'चैत्रमैत्राभ्यां भूयते' इत्यादौ भावाख्यातेन भावनाप्रकारक-बोधो जायते भावनाप्रकारकबोधस्य व्यापकत्वेन तत्सामग्र्या एव संख्याप्रकारकशाब्दबोधं प्रति हेतुत्वमुच्यते युक्तं चेत्यर्थः, न तु द्वितीयस्य=संख्याप्रकारकशाब्दबोधत्वस्य जन्यतावच्छेदकत्वम्=तादृशसामग्रीजन्यता-वच्छेदकत्वं युक्तमित्याह—द्वितीयस्येति, संख्याप्रकारकशाब्दबोधसामग्र्यास्तु भावनाप्रकारकशाब्दबोधं प्रति कारणत्वं न युक्तमित्यर्थः। संख्यामविषयीकृत्यापि भावनाप्रकारकशाब्दबोधस्य जायमानत्वेन संख्याप्रकारकशाब्दबोधत्वस्य न्यूनवृत्तित्वाज्जन्यतानवच्छेदकत्वं विज्ञेयम्।

ननु 'रूपारसौ' इत्यादौ गुणादिवाचकपदोत्तरवर्तमानद्विवचनबहुवचनयो-र्द्वित्वबहुत्वरूपसंख्याबोधकत्वं कथं स्यात् संख्याया गुणत्वाद् गुणे गुणानङ्गी-काराच्चेत्याशङ्कते— अथेति। एकवचनस्य तु साधुत्वार्थकत्वसंभवेन नैरर्थक्यमपि सम्भवति न तु द्विवचनबहुवचनयोः केवलं साधुत्वार्थकत्वमित्येकवचनाशङ्कां परित्यज्य द्विवचनबहुवचनविषयकमेवाशङ्कितम्। ननु स्वाश्रयसमवेतत्व-सम्बन्धेन=स्वं द्वित्वादिस्तदाश्रयो घटादिस्तत्र समवेतत्वं गुणादावस्तीत्येतादृश-सम्बन्धेन द्रव्यगतमेव द्वित्वादिकं तत्र=गुणादौ भासते न तु गुणादौ वास्तवं गुणरूपं द्वित्वादिकं स्वीक्रियते इति न कोपि दोष इत्याशङ्क्याह— न चेति। परिहरति—एकव्यक्तावपीति, पर्याप्त्यादिसम्बन्धेन द्वित्वस्यैकव्यक्ताव-सम्भवेऽपि तादृशसम्बन्धेन=स्वाश्रयसमवेतत्वसम्बन्धेन त्वेकरूपादिगुण-व्यक्तावपि द्वित्वादेः परिसमाप्ततया=पर्याप्तिसम्भवात् पर्याप्तत्वात् एकमात्ररूप-व्यक्तितात्पर्येणापि 'घटे रूपे' इत्येवं द्विवचनापत्तिः स्यादेवेति दोषः। तथास्मिन् मते 'घटे रूपरसौ' इत्यत्र रूपरसाश्रयीभूतघटे एव द्वित्वं नास्तीति कथं घटगतं द्वित्वं रूपरसयोर्भासेतेत्यपि दोषः। न च रूपरसपदोत्तरद्विवचनार्थ-

समाप्ततया एकमात्रतात्पर्येणापि द्विवचनाद्यापत्तिरिति चेत्? मैवम्– अपेक्षाबुद्धिविषयत्वमेव तदुत्तरद्विवचनादिना बोध्यते। तच्चैक-मात्रवृत्तिधर्मस्य प्रकृत्यर्थतावच्छेदकत्वस्थले प्रकृत्यर्थतावच्छेदक-व्याप्यत्वविशिष्टपर्याप्तिसंबन्धेन प्रकृत्यर्थेऽन्वेति, अन्यत्र तु शुद्धपर्याप्तिसंबन्धेनेति न द्वन्द्वादिस्थलोक्तदोष इति विदुषां परामर्शः॥

॥ इति व्युत्पत्तिवादे प्रथमाकारकम् ॥

द्वित्वस्य घटेऽन्वयः घटेऽन्वितं च तदेव द्वित्वं पुना रूपरसयोर्भासते इति वाच्यम्, एकस्मिन् घटे द्वित्वान्वयासम्भवादित्यवधेयम्। परिहरति–मैवमिति, 'अयमेको ऽयमेकः' इत्याकारकापेक्षाबुद्धेर्विषयत्वरूपमेव द्वित्वादिकं गुणादौ तदुत्तरद्विवचनादिना=गुणादिपदोत्तरद्विवचनादिना बोध्यते न तु संख्यारूपं द्वित्वादिकं येन द्विवचनाद्यर्थद्वित्वादेर्गुणादावन्वयो न स्यादित्यर्थः। तच्च= अपेक्षाबुद्धिविषयत्वरूपं द्वित्वादिकम् एकमात्रवृत्तिधर्मस्य=रूपत्वादेः प्रकृत्यर्थतावच्छेदकत्वस्थले 'घटे रूपे रूपाणि' इत्यादौ प्रकृत्यर्थतावच्छेदक (रूपत्वादि) व्याप्यत्वविशिष्टपर्याप्तिसम्बन्धेनान्वेतीति नैकरूपतात्पर्येणापि 'रूपे' इत्यादिद्विवचनापत्तिः तादृशसम्बन्धेन रूपद्वये एव द्वित्वस्य सम्भवात्। अन्यत्र=यत्रानेकवृत्तिधर्मस्य प्रकृत्यर्थतावच्छेदकत्वं यथा 'रूपरसौ' इत्यत्राऽनेक-वृत्तिरूपत्वरसत्वयोः प्रकृत्यर्थतावच्छेदकत्वमिति तत्र द्वित्वपर्याप्तौ रूपरूपत्व-व्याप्यत्वं वा रसत्वव्याप्यत्वं वा नास्त्येवतादृशद्वित्वपर्याप्ते रूपत्वाभाववति रसे रसत्वाभाववति रूपे च सत्त्वादिति द्वित्वं शुद्धपर्याप्तिसम्बन्धेन प्रकृत्यर्थेऽन्वेति, शुद्धपर्याप्तिसम्बन्धेनापि द्वित्वस्य रूपरसोरुभयोरेवान्वयसंभवात् पर्याप्तौ किञ्चिद्व्याप्यत्वविशेषणापेक्षा नास्ति। एकरूपव्यक्तावपि रूपरसोभयगतद्वित्वस्य शुद्धपर्याप्तिसम्बन्धेनान्वयसम्भवादेकरूपव्यक्ति-तात्पर्येणापि 'रूपे' इति प्रयोगः स्यात्तद्वारणाय पर्याप्तौ प्रकृत्यर्थतावच्छेदक-व्याप्यत्वविशेषणापेक्षास्तीत्यादिकं सर्वमपेक्षितं यथामति पूर्वमेव प्रतिपादितं तदेवात्राप्यनुसंधेयम्। फलमाह–न द्वन्द्वादीति, 'धवखदिरौ' इति द्वन्द्वस्थले ये दोषाः प्रदर्शितास्तेषां प्राप्तिर्नास्तीत्यर्थः। तथा च यथा 'घटौ' इत्यादौ घटद्वये द्वित्वान्वयः प्रदर्शितस्तथैव 'रूपे' 'रसौ' इत्यादौ द्वित्वान्वयो ज्ञेयः, यथा च 'धवखदिरौ' इत्यत्र द्वित्वान्वयः प्रदर्शितस्तथैव 'रूपरसौ' इत्यादिद्वन्द्वस्थले द्वित्वान्वयो विज्ञेयः। इति शम्। श्रीमते हनुमते नमः।

॥ इति व्युत्पत्तिवादाऽऽदर्शे प्रथमाकारकं समाप्तम्॥

॥ अथ द्वितीया ॥

"कर्मणि द्वितीया" इत्यनुशासनात् कर्मत्वं द्वितीयार्थः, तत्र कर्मपदस्य धर्मपरत्वात्, सप्तम्या वाचकतार्थकत्वात्। कर्मणश्च न तथात्वम् कर्मणि नामार्थस्य ग्रामादेरभेदान्वयसम्भवेऽपि धात्वर्थगमनादिना तदन्वयासंभवात्, गौरवाच्च।

॥ श्रीमद्धयग्रीवाय भगवते नमः ॥

द्वितीयाविभक्त्यर्थनिरूपणमारभते–कर्मणीति, कर्मत्वं द्वितीयार्थ इत्यत्र "कर्मणि द्वितीया" इति सूत्रमेव प्रमाणमित्यर्थः। तत्र="कर्मणि द्वितीया" इति सूत्रे कर्मपदस्य ग्रामादिरूपकर्मपदार्थवृत्तिकर्मत्वरूपधर्मपरत्वात् कर्मत्वं द्वितीयार्थः। "गुणे शुक्लादयः पुंसि" इत्यादौ 'गुणवाचकाः शुक्लादयः पुंसि' इत्यर्थस्याभीष्टत्वाद् यथा "गुणे" इति सप्तम्या वाचकतार्थकत्वं तथात्रापि "कर्मणि" इति सप्तम्या वाचकतार्थकत्वात् "कर्मणि द्वितीया" इति सूत्रस्य 'कर्मत्ववाचिका द्वितीया' इत्यर्थः संपन्न इत्याह–सप्तम्या इति। ननु सूत्रे कर्मपदं कर्मभूतग्रामादिपदार्थपरमेव किं न स्यादित्याशङ्क्याह–कर्मणश्चेति, कर्मणः=कर्मभूतग्रामादिपदार्थस्य तु न तथात्वम्=द्वितीयार्थत्वं संभवति, यदि कर्मैव द्वितीयार्थः स्यात्तदा ग्रामस्यैव कर्मत्वाद् द्वितीयार्थत्वेन प्रधानीभूततादृशकर्मपदार्थे नामार्थस्य=ग्रामपदवाच्यस्य ग्रामस्य 'ग्रामं गच्छति' इत्यत्राभेदान्वयसंभवेऽपि धात्वर्थगमनादिना तु तत्=तस्य कर्मपदार्थस्यान्वयो न संभवति–कर्मभूतग्रामादिनिरूपितजनकत्वादेर्धात्वर्थगमनादावऽभावादित्यर्थः। ननु कर्मणोऽपि द्वितीयार्थत्वं तस्य कर्मभूतग्रामपदार्थस्य स्ववृत्तिफलजनकत्व–संबन्धेन धात्वर्थगमनादिनाऽन्वयः संभवत्येवेति 'ग्रामं गच्छति' इत्यादौ कर्मणोऽपि द्वितीयार्थत्वे न कोपि दोषः स्वं कर्म तद्वृत्ति फलं संयोगस्तज्जनकत्वं धात्वर्थगमनेऽस्त्येवेत्याशङ्क्याह–गौरवाच्चेति, एवं हि

कर्मत्वं च क्रियाजन्यफलशालित्वम्। तत्र च क्रिया धातुत एव लभ्यते, जन्यजनकभावस्य च विनैव पदार्थत्वं संसर्गमर्यादया भानं सम्भवतीति फलमात्रं कर्मप्रत्ययार्थः।

न च संयोगविभागादिरूपफलमपि धातुलभ्यमेवगमित्यजिप्रभृतीनां तदवच्छिन्नस्पन्दादिरूपव्यापारवाचकत्वादिति वाच्यम्, व्यापारमात्रस्य धात्वर्थत्वात्। फलविशेषान्वयबोधे च धातुविशेषजन्यव्यापारोपस्थितेर्हेतुतया 'ग्रागं त्यजति' गौरवं स्यादेवेति न कर्मद्वितीयार्थः, किं तु कर्मत्वमेव, तत्र कर्मत्वं हि चैत्रादिकर्तृकव्यापारजन्यसंयोगादिरूपं फलमेव तस्य तु जनकत्वसंबन्धेन साक्षादेव धात्वर्थगमनादिनाऽन्वयः संभवत्येव–ग्रामवृत्तिसंयोगजनकव्यापारवांश्चैत्र इति बोधोदयादिति न गौरवमपीति भावः। कर्मत्वस्वरूपमाह–कर्मत्वमिति। तत्र=क्रियाजन्यफलशालित्वे यः क्रियापदार्थः प्रविष्टः स धातुवाच्य एव क्रियातज्जन्यफलयोश्च यो जन्यजनकभावः स संसर्गत्वादाकाङ्क्षावलेनैव भासते इत्यवशिष्टं संयोगादिरूपं फलमात्रमेव कर्मप्रत्ययस्य द्वितीयादेरर्थ इत्यर्थः।

ननु ''फलव्यापारयोर्धातुः'' इति प्रमाणात् संयोगविभागादिरूपं फलमपि धातुलभ्यमेवगमित्यजिप्रभृतीनां धातूनां तदवच्छिन्नस्पन्दादिरूपव्यापारवाचकत्वात्=संयोगविभागादिफलजनकस्पन्दादिरूपव्यापारवाचकत्वात्–जनकत्वसंबन्धेन संयोगादिरूपफलविशिष्टव्यापारवाचकत्वेन संयोगादिरूपफलवाचकत्वस्यापि प्राप्तत्वात् कथं फलस्य कर्मप्रत्ययवाच्यत्वमुच्यते इत्याशङ्कते न चेति। परिहरति–व्यापारेति, व्यापारमात्रमेव धातुवाच्यमस्ति न तु फलमपीति संयोगादिरूपफलम् 'ग्रामं गच्छति' इत्यादौ कर्मप्रत्यय (द्वितीया) वाच्यमेवेत्यर्थः। ननु व्यापारमात्रस्य धात्वर्थत्वे फलमात्रस्य च कर्मप्रत्ययार्थत्वे 'ग्रामं त्यजति' इत्यत्रापि धात्वर्थव्यापारे संयोगजनकत्वं प्रतीयेतेति सर्वत्र सर्वप्रतीत्यापत्त्या व्यापारविशेषफलविशेषयोः प्रतीतिनियमो न स्यादित्याशङ्क्याह–फलविशेषेति, सामान्यतः फलविषयकशाब्दबोधं प्रति कर्मप्रत्ययस्य कारणत्वेऽपि फलविशेषविषयकशाब्दबोधं प्रति तु धातुविशेषजन्यव्यापारोपस्थितेरेव कारणत्वं ज्ञेयं तथा च 'ग्रामं त्यजति' इत्यत्र ग्रामकर्मकत्यागरूप–

इत्यादौ धात्वर्थस्पन्दे ग्रामनिष्ठविभागजनकत्वमेव 'ग्रामं गच्छति' इत्यादौ च धात्वर्थस्पन्दे ग्रामनिष्ठसंयोगजनकत्वमेव प्रतीयते न तु विपरीतम्।

'ग्रामं गच्छति' इत्यादिवच्च 'ग्रामं स्पन्दते' इत्यादयो न प्रयोगाः- द्वितीयादेर्गम्याद्युपस्थापितस्पन्दादावेव फलान्वयबोधकत्वात्, स्पन्दिप्रभृत्युपस्थापिते तस्मिन् द्वितीयादिना फलान्वयबोधजननासंभवात्, न हि येन केनचिदुपस्थापित-

---

फलविषयकशाब्दबोधं प्रति व्यजधातुजन्यस्पन्दरूपव्यापारोपस्थितेर्हेतुत्वात् त्यजधात्वर्थस्पन्दे ग्रामनिष्ठो यो विभागस्तादृशविभागरूपफलजनकत्वमेव प्रतीयते न तु विपरीतम्=ग्रामनिष्ठसंयोगरूपफलजनकत्वम् तथा 'ग्रामं गच्छति' इत्यत्र ग्रामकर्मकसंयोगरूपफलविषयकशाब्दबोधं प्रति गम्धातुजन्यस्पन्दरूपव्यापारोपस्थितेर्हेतुत्वाद् गम्धात्वर्थस्पन्दे ग्रामनिष्ठो यः संयोगस्तादृशसंयोगरूपफलजनकत्वमेव प्रतीयते न तुविपरीतम्= ग्रामनिष्ठविभागरूपफलजनकत्वम्, फलविशेषान्वयबोधे यदि धातुविशेषजन्य-व्यापारोपस्थितेर्हेतुत्वं न स्यात्तदोक्तवैपरीत्यमपि स्यादेव=त्यज्धात्वर्थस्पन्दे ग्रामनिष्ठसंयोगजनकत्वं गम्धात्वर्थस्पन्दे च ग्रामनिष्ठविभागजनकत्वमपि प्रतीयेत न चैवं प्रतीयते इति ''फलविशेषान्वयबोधे'' इत्यादिविशेष-कार्यकारणभाव आश्रीयते इत्यर्थः।

ग्राममिति=द्वितीया विभक्तिर्गमधातूपस्थिते एव स्पन्दरूपव्यापारे जनकत्वसंबन्धेन संयोगरूपफलस्यान्वयबोधजननसमर्थास्ति नतु स्पन्दधातूप-स्थापितेपि स्पन्दरूपव्यापारे, स्पन्दधातूपस्थापिते तस्मिन्=स्पन्दरूपव्यापारे द्वितीयादिना फलान्वयस्य बोधजननासंभवादिति 'ग्रामं गच्छति' इतिवत् 'ग्रामं स्पन्दते' इति प्रयोगो न भवतीत्यर्थः। उक्तमुपपादयति- नहीति। किं वा ननु गम्धात्वर्थोपि स्पन्द एव स्पन्दधात्वर्थोपि स्पन्द एवेति समानार्थकत्वात् 'ग्रामं गच्छति' इतिवत् 'ग्रामं स्पन्दते' इति प्रयोगः कथं न स्यादित्याशङ्क्याह- न हीति, न हि याभ्यां काभ्यां पदाभ्यामुपस्थितयोरर्थयोः परस्परमन्वयः प्रतीयते, तथा सति= यदि याभ्यां काभ्यां पदाभ्यामुपस्थितयोरप्यर्थयोः परस्परमन्वयः प्रतीयेत तदा 'घटः कर्मत्वम्' इत्यत्र घटकर्मत्व-

योरेवार्थयोः परस्परमन्वयः प्रतीयते तथा सति घटकर्मत्वादि-पदोपस्थापितयोरपि घटकर्मत्वाद्योः परस्परमन्वयबोधप्रसङ्गात्, कृञादिसमानार्थकयत्धातुपस्थाप्यफले विषयितात्मका-द्वितीयार्थान्वयसम्भवेन 'घटं करोति इतिवत्' 'घटं यतते' इत्यादिप्रयोगप्रसङ्गाच्च, अपि तु ययोर्यादृशान्वयबोधे आकांक्षा

पदाभ्यामुपस्थितयोरपि घटकर्मत्वयोः परस्परमन्वयबोध स्यादेव न चैवं भवति किं नु 'घटं करोति' इत्यत्र घटपदेनोपस्थितघटस्य द्वितीयोपस्थि-तकर्मत्वस्य चान्वयः प्रतीयते तस्मान्न याभ्यां काभ्यां पदाभ्यामुपस्थित-योरर्थयोरन्वयः प्रतीयते इति गम्धातूपस्थितस्पन्दस्य द्वितीयोपस्थितफनस्य चान्वयः संभवति न तु स्पन्दधातूपस्थितस्पन्दस्य फलस्य चेत्यर्थः। किं च यदि येन केनचिदुपस्थितयोप्यर्थयोः परस्परमन्वयः प्रतीयेत तदा कृञादि-समानार्थकयत्यादिधातूपस्थाप्यफलेपि विषयितात्मकद्वितीयार्थस्यान्वयसंभवेन 'घट करोति' इतिवत् 'घटं यतते' इत्यपि प्रयोगः स्यादेव न चैवं भवतीत्यर्थः। अत्र धातोः फलावच्छिन्नव्यापारवाचकत्वमतेनोक्तम्-कृञादिसमानार्थकयतधातूपस्थाप्यफले इति तन्मते फलावच्छिन्नव्यापारस्य धातुबाच्यत्वेन फलस्यापि धातुवाच्यत्वं प्राप्तमेव, अवच्छिन्नत्वं चात्र जनकत्वमेव, फलं चात्र यत्नः, तस्मिन् यत्नरूपफले द्वितीयार्थविषयिताया आश्रयत्वेनान्वयः, घटनिष्ठविषयतानिरूपितविषयिताश्रयत्वस्य यत्ने सत्त्वात् 'घटं करोति' इत्यत्र घटनिष्ठविषयतानिरूपितविषयिताश्रयीभूतकृति(यत्न) मानिति बोधोदयात्। 'घटं यतते' इति प्रयोगस्तु न भवतीति सिद्धान्तमाह-अपि त्विति, ययोः पदयोर्यादृशान्वयबोधे आकाङ्क्षा=परस्परमपेक्षा भवति ताभ्यामेव पदाभ्यामुपस्थितयोरर्थयोस्तादृशान्वयस्य बोधो जायते यथाघटपदद्वितीयापदयोर्घटकर्मत्वबोधे आंकाङ्क्षास्तीति 'घटम्' इतिघटपदद्वितीयापदाभ्यामुपस्थितयोरेव घटकर्मत्वयोः परस्परमन्वयबोधो जायते, तथात्रापि द्वितीयादेर्गम्यादिनैवाकाङ्क्षेति गम्धातूपस्थितस्पन्दे एव द्वितीयोपस्थितफलस्यान्वयो भवति न तु स्पन्दधातूपस्थितस्पन्देपीति न 'ग्रामं स्पन्दते' इति प्रयोगापत्तिः। तथा द्वितीयादेः कृञादिनैवाऽकाङ्क्षेति कृञ्धातूपस्थाप्यफले एव द्वितीयार्थस्य (विषयितायाः) अन्वयो भवति न यतिधातूपस्थापितफलेपीति न 'घटं यतते' इतिप्रयोगापत्तिरित्याहआकाङ्क्षा चेति। स्पन्दियतीत्यत्र यथासंख्यमन्वयः।

तदुपस्थापितयोरेव तादृशान्वयबोधः। आकांक्षा च द्वितीय-यादेर्गम्यादिना कृञादिना च कल्प्यते न तु तत्समानार्थकेनापि स्पन्दियतिप्रभृतिनेति।

न चाकांक्षात्र समभिव्याहारः स च गम्यादिनेव स्पन्द्यादिनापि समान एवेति वाच्यम्, यतः- द्वितीयादेर्गम्यादि-समभिव्याहारस्यैव फलबलादन्वयबोधौपयिकत्वमुपगम्यते न तु स्पन्दिप्रभृतिसमभिव्याहारस्येति न तस्याकाङ्क्षात्वम्

नन्वाकाङ्क्षा समभिव्याहार एव समभिव्याहारश्च गम्यादिनेव स्पन्द्यादिनेव स्पन्द्यादिनापि नानुपपन्न इति द्वितीयार्थफलस्य संयोगादेः स्पन्दिधातूपस्थापितस्पन्दरूपव्यापारे जनकत्वसंबन्धेन कथं नान्वयः स्यादित्याशङ्क्याह– न चेति। परिहरति–यत इति, 'ग्रामं स्पन्दते' इत्यत्र ग्रामवृत्तिसंयोगजनकत्वविशिष्टव्यापारविषयको बोधो न जायते 'ग्रामं गच्छति' इत्यत्र च जायते इति फलबलाद् द्वितीयादेर्यो गम्यादिना समभिव्याहारस्त-स्यैवोक्तशाब्दबोधकारणत्वमुपगम्यते इति फलबलाद् द्वितीयादेर्यो गम्यादिना समभिव्याहारस्तस्यैवोक्तशाब्दबोधकारणत्वमुपगम्यते इति तादृशस्योक्तशाब्दबोध-जनकस्यैव समभिव्याहारस्याकाङ्क्षात्वं युक्तं न तु द्वितीयादेः स्पन्दिप्रभृतिधातुनापि यः समभिव्याहारस्तस्यापि उक्तशाब्दबोधाऽजनक-त्वादित्यर्थः। तस्य=स्पन्दिप्रभृतिसमभिव्याहारस्य। अत्र विनिगमनामाह-अन्वयेति। तथात्वात्= आकाङ्क्षात्वात् अत एव=द्वितीयादेः स्पन्द्यादिना सह समभिव्याहारस्याकाङ्क्षात्वाऽभावादेव=द्वितीयार्थफलस्य स्पन्द्याद्युप-स्थापितस्पन्दादिव्यापारे आकाङ्क्षाविरहेणान्वयासंभवादेव गमिस्पन्दिधात्वोः समानार्थकत्वेऽपि गम्यादेरेव सकर्मकत्वं न स्पन्द्यादेः– फलान्वितव्यापार-बोधकधातोरेव सकर्मकत्वनियमात् तथा च गम्यादेः फलान्वितव्यापारबोध-कत्वात्सकर्मकत्वम्, स्पन्द्यादेः फलान्वितव्यापारबोधकत्वाभावादकर्म-कत्वमित्यर्थ इत्याह– अत एवेति। तन्नियामकत्वम्=सकर्मकत्वव्यवहार-नियामकत्वम्। एवं समानार्थकत्वेऽपि कृञादेरेव सकर्मकत्वं न यत्यादेरिति ज्ञेयम्। येन व्यापारेण कर्मभूतपदार्थे किंचित् फलमुत्पद्यते तस्य फलान्वितव्यापारत्वं ज्ञेयं यथा गमनव्यापारेण ग्रामे गमनकर्तृदेवदत्तस्य संयोग

अन्वयबोधौपयिकसमभिव्याहारस्यैव तथात्वात्, अत एव समानार्थकत्वेऽपि गम्यादेरिव न स्पन्द्यादेः सकर्मकत्वव्यवहारः– फलान्वितव्यापारबोधकधातुत्वस्यैव तन्नियामकत्वात्।

अथ धातोर्व्यापारमात्रवाचित्वे 'त्यजति गच्छति' त्यागो गमनम्' इत्यादिवाक्यादविलक्षणबोधप्रसङ्गः, न हि शक्तिभ्रमाद्यऽजन्मनोस्तादृशवाक्यजन्यबोधयोरवैलक्षण्यं कश्चिदभ्युपैति, तथा सति त्यागादितात्पर्येण गमनादिपदं व्युत्पन्ना अपि प्रयुञ्जीरन्। न च तत्र फलविशेषावच्छिन्नव्यापारे लक्षणा स्वीक्रियते इति विलक्षणबोधोपपत्तिरिति वाच्यम्,

---

उत्पद्यते न चैवं स्पन्द्यादिधातुबोध्यव्यापारेऽस्तीति तत्र फलान्वितत्वं नास्तीति।

ननु यदि धातोः फलवाचकत्वं न स्यात् किं तु व्यापारमात्रवाचकत्वं स्यात्तदा सर्वेषामेव धातूनां व्यापारमात्रवाचकत्वेन समानार्थकत्वं स्यात्तथा च य एव 'त्यजति' पदाद्बोधः स्यात्स एव 'गच्छति' पदादपि बोधः स्यात्, तथा त्यागगमनपदाभ्यामपि समानार्थक एव बोधः स्यात्, न च शक्तिभ्रमं विना कोऽपि त्यजतिपदजन्यबोधगच्छतिपदजन्यबोधयोरवैलक्षण्यम्=तुल्यत्वं स्वीकरोति, तथा त्यागपदजन्यगमनपदजन्यबोधयोरप्यवैलक्षण्यं न कोपि स्वीकरोति, तथासति=उक्तबोधयोरवैलक्षण्ये सति त्यागादितात्पर्येण गमनादिपदं व्युत्पन्ना अपि प्रयुञ्जीरन्, न चैवमस्ति, तस्माद्धातोः फलविशिष्ट-व्यापारवाचकत्वमेव युक्तं तथा च त्यागगमनादिव्यापाराणामवच्छेदकीभूत-फलभेदान्नोक्तबोधयोरवैलक्षण्यापत्तिर्न वा व्युत्पन्नानां गमनादितात्पर्येण त्यागादिपदप्रयोगापत्तिरित्याशङ्कते- अथेति। ननु धातोर्व्यापारमात्रवाचकत्वेपि= व्यापारमात्रे एव शक्तिस्वीकारेऽपि तत्र='त्यजति गच्छति' 'त्यागो गमनम्' इत्यादौ फलविशेषविशिष्टव्यापारे लक्षणा स्वीक्रियते तथा च फलभेदात् लक्षणया तत्तद्धातुपदेन विलक्षणबोधसंभवेन नाऽविलक्षणबोधप्रसङ्ग इति न गमनादितात्पर्येण त्यागादिपदप्रयोगापत्तिरित्याशङ्क्याह–न चेति। परिहरति– लक्षणयेति। लक्षणया विलक्षणबोधसंभवेऽपि शक्त्याऽविलक्षणबोधसंभवेन दर्शितातिप्रसङ्गस्य=गमनादितात्पर्येण त्यागादिपदप्रयोगप्रसङ्गस्य दुर्वारत्वात्।

लक्षणया विलक्षणबोधजननेऽपि शक्त्याऽविलक्षणबोधजननसम्भवेन दर्शितातिप्रसङ्गस्य दुर्वारत्वात्।

न च गम्यादिशक्तिज्ञानजन्यार्थोपस्थित्या फलाविषयकान्वयबोधस्य कुत्राप्यजननात् तादृशोपस्थितिघटितसामग्रीशरीरे फलविशेषबोधकसामग्र्यपि निवेश्यते तदा च त्यागगमनादिपदयोः शक्त्या नाऽविलक्षणबोधजनकतेति वाच्यम्, त्यजिगम्योरेकार्थवाचकतारूपपर्यायतां विपर्यस्यतो गमनादिपदात् त्यागादिपदजन्यबोधसमानाकारकबोधस्य सर्वानुभवसिद्धतया

ननु गम्यादिधातुशक्तिज्ञानेन जायमाना यार्थोपस्थितिस्तया फलाऽविषयकबोधः कदापि न जन्यते किं तु फलविषयक एव बोधो जन्यते इति शाब्दबोधजनिका या तादृशोपस्थितिघटिता सामग्री तस्याः शरीरे=स्वरूपे फलविशेषबोधकसाम्ग्र्यपि निवेश्यते तथा च फलविशेषविषयकबोधजनकसामग्रीघटितया उक्तगम्यादिशक्तिज्ञानजन्यार्थोपस्थितिघटितसाम्ग्र्या त्यागगमनादिपदाभ्यां शक्त्यापि नाऽविलक्षणबोधप्रसङ्ग इति न गमनादितात्पर्येण त्यागादिपदप्रयोगापत्तिरित्याशङ्कते- न चेति। परिहरति- त्यजिगम्योरिति, विपर्यस्यतः=(भ्रमवतः) यस्य पुरुषस्य त्यजिगम्योरेकार्थवाचकतारूपपर्यायत्वभ्रमो जातः= य एव त्यजधातोरर्थः स एव गम्धातोरप्यर्थ इति भ्रमो जातस्तस्य पुरुषस्य गमनादिपदात् त्यागादिपदजन्यबोधतुल्य एव बोधो जायते इति सर्वानुभवसिद्धमस्ति—उक्तभ्रान्तपुरुषदृष्ट्या त्यजिगम्योः समानार्थकत्वेन पर्यायरूपत्वादिति तस्य भ्रान्तस्य गम्यादिधातुशक्तिज्ञानात् फलाविषयकबोधस्यापि=फलविशेषाविषयकबोधस्यापि प्रसिद्धेः=जायमानत्वात् शक्त्यापि त्यागगमनादिपदाभ्यामविलक्षणबोधोत्पत्तिस्तदवस्थैव। एवमेव तादृशस्य=उक्तभ्रमवतः पुंसः त्यजिगम्योः पर्यायत्वज्ञान (भ्रम) सत्त्वेन 'ग्रामं गच्छति' 'ग्रामं त्यजति' इत्यादिवाक्याभ्यामप्यविलक्षणबोधोदयात् फलविशेषबोधकसाम्ग्र्या यद् गम्यादिपदजन्यबोधनियामकत्वमुक्तं नाम त्यजिगमिधातुभ्यां सामान्यतो व्यापारमात्रविषयकबोधे जायमानेपि फलविशेषबोधकसामग्रीप्रभावात् फलविशेषस्याप्युपस्थित्या त्यजति-गच्छतिपदाभ्यां विलक्षण एव बोध उत्पद्येतेत्युक्तं तदपि वक्तुं न शक्यते—

गम्यादिशक्तिज्ञानात् फलाविषयकबोधस्यापि प्रसिद्धेः, एवं तादृशस्य पुंसः 'ग्रामं गच्छति' 'ग्रामं त्यजति' इत्यादितोऽप्यऽविलक्षणबोधोदयात् फलविशेषबोधकसामग्र्या गम्यादिपदजन्यबोधनियामकताया वक्तुमशक्यत्वात्, तथा

अविलक्षणबोधोदयस्य प्रदर्शितत्वादित्याह– एवमिति। तथा चाभ्रान्तस्यापि ततः='त्यजति, गच्छति' 'त्यागः, गमनम्' इत्यादितोऽविलक्षणबोध-संभवेनैकविधबोधतात्पर्येण व्युत्पन्नानां तादृशप्रयोगप्रसङ्गः=त्यागादितात्पर्येण गमनादिपदप्रयोगप्रसङ्गो दुर्वार एवेत्युपसंहरति– तथा चेति।

अयं भावः– पूर्वपक्षिणा धातोर्व्यापारमात्रवाचित्वं स्वीकृत्यापि गम्यादिपदजन्यशाब्दबोधसामग्रीशरीरे फलविशेषबोधिकाया द्वितीयाविभक्त्यादि-समभिव्याहारादिरूपायाः साम्ग्र्या निवेशेन शक्त्यापि गम्यादेर्विलक्षणबोधजनकत्वं प्रतिपादितं तत्र त्यजिगम्योः पर्यायताभ्रमाभावकाले तु गमधातुजन्यशाब्दबोध-सामग्रीशरीरे संयोगरूपफलबोधकसामग्रीनिवेशेन त्यज्धातुजन्यशाब्दबोध-सामग्रीशरीरे च विभागरूपफलबोधकसामग्रीनिवेशेन संयोगविभागादिरूपफल-विशेषविषयकबोधस्यापि जायमानत्वात् त्यजिगम्योः शक्त्या विलक्षणबोधजन-कत्वसंभवेऽपि त्यजिगम्योः पर्यायताभ्रमकाले तु नैवं संभवति किं तु त्यज्धातुजन्यशाब्दबोधसामग्रीशरीरे गम्धातुजन्यशाब्दबोधसामग्रीशरीरे चैकसमान-फलबोधकसाम्ग्र्या एव निवेशः स्यादिति 'ग्रामं गच्छति' 'ग्रामं त्यजति' इत्युभयत्रैवैकसमानफलबोधकसामग्रीविशिष्टसाम्ग्र्या व्यापारमात्रवाच-कत्यजिगमिभ्यां शक्त्या विलक्षणबोधोत्पत्तेरसंभव एव, 'त्यागः' 'गमनम्' इत्यादौ तु फलबोधकद्वितीयायाः समभिव्याहाराभावेन संयोगादिरूप-फलविशेषबोधकद्वितीयासमभिव्याहाररूपसाम्ग्र्याः शाब्दबोधजनकसाम्ग्र्यां निवेश एव नास्ति येन त्यागगमनपदाभ्यां विलक्षणबोधः स्यादिति त्यागगमनपदघट-कगम्यादिशक्तिज्ञानात् फलाविषयक एव बोधः संभवति न फलविषयक इति सिद्धं तथा च 'त्यागः' 'गमनम्' इत्यादौ गम्यादिशक्तिज्ञानात् फलाविषयकबोधस्याप्युक्तरीत्या जायमानत्वे बोधवैलक्षण्यसम्पादक-फलोपस्थितेश्च फलोपस्थापकाभावादभावे प्राप्ते त्यजिगम्योश्च व्यापारमात्रवाचकत्वस्वीकारेणाऽभ्रान्तस्यापि त्यजिगमिभ्यामविलक्षणबोधाव-श्यम्भावाद् व्युत्पन्नानामपि त्यागादितात्पर्येण गमनादिपदप्रयोगादिप्रसङ्गः स्यादेव।

चाऽभ्रान्तस्यापि भवन्मते ततोऽविलक्षणबोधसम्भवेनैकविधबोधतात्पर्येण व्युत्पन्नानां तादृशप्रयोगप्रसङ्गो दुर्वार इति चेत्?

मैवम्—कर्मप्रत्ययासमभिव्याहृतत्यागगमनादिपदस्य तत्तत्फलावच्छिन्नव्यापारेऽनादितात्पर्यं कल्प्यते न तु केवलव्यापारे, अनादितात्पर्यमेव च स्वारसिकप्रयोगनियामकमित्येकार्थतात्पर्येण प्रामाणिकानां स्वारसिको न त्यागगमनादिपदप्रयोगः।

एवमेव 'ग्रामं गच्छति' 'ग्रामं त्यजति' इत्यत्रापि त्यजिगम्योस्तु व्यापारमात्रवाचकत्वमेव फलविशेषबोधकसाम्ग्र्याश्चोक्तरीत्या गम्यादिधातुजन्यबोधवैलक्षण्यनियामकत्वं न संभवतीत्यऽभ्रान्तस्यापि व्युत्पन्नस्य त्यजिगमिभ्यामविलक्षणबोधावश्यम्भावात् 'ग्रामं त्यजति' इति तात्पर्येण 'ग्रामं गच्छति' इति प्रयोगातिप्रसङ्ग स्यादेवेति धातोर्व्यापारमात्रवाचकत्वं न युक्तमिति।

परिहरित— मैवमिति, कर्मप्रत्ययो द्वितीयादिस्तत्समभिव्याहारस्थले 'ग्रामं गच्छति' 'ग्रामं त्यजति' इत्यादौ तु संयोगविभागादिरूपफलबोधकद्वितीयासत्त्वादेतादृशवाक्यजन्यबोधस्य वैलक्षण्यं स्पष्टमेव सम्भवति, कर्मप्रत्याऽसमभिव्याहृतत्यागगमनादिपदस्य=द्वितीयान्तकर्मवाचकग्रामादिपदरहितस्य 'त्यजति' 'गच्छति' 'त्यागः' 'गमनम्' इत्यादिपदस्य तत्तत्फलजलावच्छिन्नव्यापारे तात्पर्यं कल्प्यते यथा 'गच्छति' इति पदघटकगम्धातोः संयोगरूपफलजनकव्यापारे 'त्यजति' इति पदघटकत्यज्धातोर्विभागरूपफलजनकव्यापारे एवानादितात्पर्यमस्ति न तु केवलव्यापारे=फलानवच्छिन्नव्यापारे, अनादितात्पर्यमेव च स्वारसिकप्रयोगनियामकमस्तीति न प्रामाणिकानामेकार्थतात्पर्येण=त्यागतात्पर्येण गमनपदप्रयोगापत्तिः, गमनतात्पर्येण वा त्यागपदप्रयोगापत्तिरित्यर्थः। यथा कौपीनशब्दस्य पापे शक्तत्वेप्यऽनादितात्पर्यं पुरुषेन्द्रियाच्छादकवस्त्रविशेषे एवास्तीति तादृशवस्त्रतात्पर्येणैव कौपीनशब्दप्रयोगो भवति न तु शक्यार्थपापतात्पर्येणापि तथात्र धातोर्व्यापारमात्रशक्तत्वेप्यनादितात्पर्यं फलविशेषावच्छिन्नव्यापारे एवास्तीति तादृशफलविशेषावच्छिन्नव्यापारतात्पर्येणैव तत्तद्धातुपदप्रयोग उपपद्यते न तु शक्यार्थव्यापारमात्रतात्पर्येणापीति नोक्तप्रयोग-

एवं त्यजिगमिप्रभृतिसमभिव्याहृतकर्मप्रत्ययस्य फल-विशेषे एव नियतं तादृशं तात्पर्यमिति न विभागादितात्पर्येण 'ग्रामं गच्छति' इत्यादिप्रयोगः। तदर्थबोधकत्वमात्रं तु न तदर्थतात्पर्येण स्वारसिकप्रयोगनियामकम्, तथा सति शक्ति-भ्रमादिना घटपदस्यापि पटादिबोधकतया पटादितात्पर्येणापि स्वारसिकघटादिपदप्रयोगापत्तेः। नापि शक्त्या बोधकत्वं तथा-निरूढलक्षणयापि स्वारसिकपदप्रयोगात्।

सांकर्यापत्तिरिति भावः।

एवमेव 'ग्रामं गच्छति' इत्यादौ कर्मप्रत्ययस्य द्वितीयादेर्यदि संयोगादिरूपफलविशेषे तात्पर्यं न स्यात् किं तु फलमात्रे तात्पर्यं स्यात्तदा द्वितीयाया, संयोगविभागादिरूपानेकविधफलेषु शक्तत्वाद् द्वितीयया विभागरूपफलोपस्थितेरपि संभवाद् धातोश्च व्यापारमात्रस्योपस्थितेः संभवात् 'ग्रामं गच्छति' इत्यनेन विभागजनकव्यापारबोधस्यापि संभवाद् विभागा-दितात्पर्येण ग्रामं गच्छति' इति प्रयोगः स्यादेव, यदा च गम्धातुसमभिव्याहृत-कर्मप्रत्ययद्वितीयायाः फलविशेषे=संयोगे एव तात्पर्यं न विभागे तथा त्यज्धातुसमभिव्याहृतद्वितीयाया विभागरूपफले एव तात्पर्यं न संयोगे तदा तु विभागादितात्पर्येण 'ग्रामं गच्छति' इत्यादिप्रयोगापत्तिर्नास्त्येवेत्याह—एवमिति। तादृशम्=अनादि। ननु यदि द्वितीयाया विभागरूपफलबोधकत्वमप्यस्ति तत्र शक्तत्वात् तदा 'ग्रामं गच्छति' इत्यत्रापि द्वितीयया विभागरूपफलोप-स्थितिसम्भवाद् विभागतात्पर्येण 'ग्रामं गच्छति' इति स्वारसिकप्रयोगः कथं न स्यादित्याशङ्क्याह—तदर्थेति। विपक्षे बाधकमाह-तथा सतीति। तथासति=यदि तदर्थबोधकत्वमात्रं तदर्थतात्पर्येण स्वारसिमप्रयोगनियामकं स्यात्तदा शक्तिभ्रमेण घटपदस्यापि पटादिबोधकत्वात् पटेऽपि घटपदस्य स्वारसिकप्रयोगः स्यादेव न चैवं भवतीति न तदर्थबोधकत्वमात्रं तदर्थतात्पर्येण स्वारसिक-प्रयोगनियामकमित्यर्थः। ननु नात्र शक्तिभ्रमस्य प्रसङ्ग इति शक्त्या बोधकत्वं स्वारसिकप्रयोगनियामकं भविष्यत्येवेति द्वितीयायाः शक्त्यैव विभागरूप-फलबोधकत्वमस्त्येवेति विभागादितात्पर्येण 'ग्रामं गच्छति' इति प्रयोगः स्यादेवेत्याशङ्क्याह-नापीति। तथा=स्वारसिकप्रयोगनियामकम्। परिहारहेतुमाह-

शक्तिभ्रमं लक्षणाज्ञानं चान्तरेण गम्यादेर्विभागादि-रूपफलविशेषविशेषितस्पन्दादिबोधकत्वाऽभावनियमोऽसिद्ध एवेति तात्पर्यभ्रमसहकृतशक्तिप्रमया तादृशबोधजननेऽपि न क्षतिः। विना लक्षणाग्रहं भ्रमानधीनतादृशबोधो गमिप्रभृतितो न सम्भवतीत्येव नियमः, स च तात्पर्यभ्रमेणैव निर्वहति। विभागाद्यर्थे पूर्वपूर्वेषामनादितात्पर्यभ्रमवतो वक्तुः स्वकी-

---

निरूढेति। तस्मादनादितात्पर्यमेव स्वारसिकप्रयोगनियामकम्, गम्धातुसमभि-व्याहृतद्वितीयाया अनादितात्पर्यं च संयोगरूपफले एवेति न विभागतात्पर्येण 'ग्रामं गच्छति' इति प्रयोगापत्तिरित्यर्थः। निरूढलक्षणया स्वारसिकपदप्रयोगो यथा प्रवीणे कुशलेति पदप्रयोगः।

नन्वनादितात्पर्यस्यैव स्वारसिकप्रयोगनियामकत्वे शक्तिभ्रमं विना तथा लक्षणाज्ञानं विना गम्यादेर्विभागादिरूपफलविशेषविशेषितस्पन्दादिबोधकत्वं नास्ति किं तु शक्तिभ्रमेण वा लक्षणाज्ञानेन वैव गम्यादेर्विभागादिरूपफल-विशेषविशेषितस्पन्दादिबोधकत्वमस्तीति नियमस्य भङ्गः स्यात्, अनादितात्पर्यस्य नियामकत्वेऽनादितात्पर्यभ्रमेणापि गम्यादेर्विभागादिरूपफल-विशेषविशेषितस्पन्दादिबोधकत्वापत्तेरित्याशङ्क्याह-शक्तिभ्रममिति। उक्तनियमो नास्त्येवेति तात्पर्यभ्रमसहकृतशक्तिप्रमया तादृशबोधजनने=गम्या-देर्विभागादिरूपफलविशेषविशेषितस्पन्दविषयकबोधजननेऽपि न क्षतिः=न किं चिन्नियमभङ्गः। द्वितीयायाः संयोगविभागादौ शक्तिरस्त्येवेति 'ग्रामं गच्छति' इत्यत्रापि द्वितीयाया यद् विभागे शक्तिज्ञानं तत्प्रमैवास्ति किं तु गम्धातुसमभिव्याहृतद्वितीयायाः संयोगे एवानादितात्पर्यमस्तीति विभागेऽनादिता-त्पर्यग्रहो भ्रम एवेत्युक्तम्-तात्पर्यभ्रमसहकृतशक्तिप्रमयेति। स्वमतेन नियमस्वरूपमाह-विनेति, लक्षणाज्ञानेन वा शक्तिभ्रमेण वा तात्पर्यभ्रमेण वैव गम्यादिधातुतो विभागादिरूपफलविशेषविशेषितस्पन्दादिबोधो जायते नान्यथेत्येव नियमोऽस्तीत्यर्थः। स च=उक्तनियमः। ननु यदुक्तम्-'लक्षणाग्रहं विना गमिप्रभृतिधातुभ्यो विभागादिरूपफलविशेषविशेषितस्पन्दादिरूपव्यापार-बोधस्तात्पर्यभ्रमेणैव जायते' इति नियम इति, स नियमो न सम्भवति यतः-यस्य पुंसो गम्धातोर्विभागाद्यर्थे पूर्वपूर्वेषां तात्पर्यमस्तीति तात्पर्यभ्रमो

यतात्पर्येण 'ग्रामं गच्छति' इत्यादिप्रयोगो यत्र तत्र श्रोतुस्तात्पर्यभ्रमासम्भवेऽपि वक्तृतात्पर्यानादित्वभ्रम एव प्रयोगसम्पादनद्वारा तदर्थशाब्दबोधप्रयोजक इति न तादृशनियमक्षतिरिति प्राचीनपथपरिष्कारप्रकारः।

नव्यास्तु-संयोगादिरूपफलविशेषावच्छिन्नस्पन्दो गम्याद्यर्थः। तद्धात्वर्थतावच्छेदकफलशालित्वमेव तद्धातुकर्मत्वं नातो गम्यादिकर्मत्वस्य पूर्वदेशादौ प्रसङ्गः। न वा स्पन्देः

जातस्तेन पुंसा यत्र=यदा स्वकीयतात्पर्येण=विभागादिविषयकस्वीयतात्पर्येण 'ग्रामं गच्छति' इत्यादिप्रयोगः कृतस्तत्र=तदा श्रोतुर्गम्धातोर्विभागाद्यर्थे पूर्वपूर्वेषां तात्पर्यमस्तीत्याकारकस्यानादितात्पर्यभ्रमस्याभावेऽप्युक्तवक्तुर्विभागादितात्पर्येण 'ग्रामं गच्छति' इति प्रयोगात् श्रोतुर्विभागादिविषयकशाब्दबोधो जायते एवेत्युक्तनियमस्य व्यभिचारः प्राप्त इत्याशङ्क्याह-विभागाद्यर्थेति, तत्र श्रोतुः पूर्वपूर्वेषामनादितात्पर्यभ्रमासम्भवेऽपि उक्तवक्तृतात्पर्ये त्वनादित्व-भ्रमोऽस्त्येव तेनैव वक्तृतात्पर्यानादित्वभ्रमेण श्रोतापि विभागादितात्पर्येण 'ग्रामं गच्छति' इतिप्रयोगं संपादयति (करोति) एतादृशवाक्याद्विभागादि-रूपफलविषयकबोधोऽपि श्रोतुर्जायते इत्यनादितात्पर्यभ्रमाभावेऽपि वक्तृतात्पर्यभ्रम एव 'ग्रामं गच्छति' इति प्रयोगसंपादनद्वारा तादृशार्थबोधस्य= विभागादिविषयकशाब्दबोधस्य प्रयोजको भवति, वक्तृतात्पर्यभ्रमोऽपि च तात्पर्यभ्रम एवेति तादृशनियमस्य=तात्पर्यभ्रमेणैव गम्यादिना विभागादिरूपफल-विशेषविशेषितस्पन्दादिबोधो जायते नान्यथेति नियमस्य क्षतिः=व्यभिचारो नास्त्येव-उक्तस्थलेऽपि श्रोतुस्तात्पर्यभ्रमस्य सत्त्वादेवेत्यर्थः।

नवीनमतमाह—नव्यास्त्विति, नवीनमते न केवलव्यापारवाचकत्वं धातूनां किंतु "फलव्यापारयोर्धातुः" इति वैयाकरणमतवत् संयोगादि-रूपफलविशेषावच्छिन्नस्पन्दादिव्यापारवाचकत्वमेव गम्यादिधातूनाम्, जनकत्व-संबन्धेन संयोगादिरूपफलविशिष्टत्वमेव फलविशेषावच्छिन्नत्वम्, तथा च गम्धातोः संयोगरूपफलावच्छिन्नस्पन्दे एव शक्तिर्न स्पन्दमात्रे इति न विभागादितात्पर्येण 'ग्रामं गच्छति' इति प्रयोगापत्तिः। एवं विभागरूपफला-वच्छिन्नस्पन्दे एव त्यज्धातोः शक्तिरिति न संयोगादितात्पर्येण 'ग्रामं त्यजति'

सकर्मकत्वम्-तत्र फलस्य धात्वर्थताऽनवच्छेदकत्वात्। एवं च धातोरेव फलविशेषलाभात् फलान्वयिनी वृत्तिरेव द्वितीयार्थः। न च "कर्मणि द्वितीया" इत्यनुशासनविरोधः-तस्य कर्मणि=फलनिष्ठाधेयत्वान्वयिनि प्रकृतितात्पर्ये तदुत्तरं द्वितीयेत्यर्थकत्वात्। न चैवं तस्य शक्तिग्राहकत्वानुपपत्तिः-

---

इति प्रयोगापत्तिरित्यर्थः। कर्मस्वस्वरूपमाह-तद्धात्वर्थेति। यदि प्रकृतधात्वर्थ-फलशालित्वं कर्मत्वमित्युच्येत तदा गमनेन यथोत्तरदेशसंयोग उत्पद्यते इत्युत्तरदेशसंयोगस्य फलत्वं तथा पूर्वदेशविभागोप्युत्पद्यते एवेति पूर्वदेश-विभागस्यापि गमनफलत्वं स्यादेव तथा च गमनजन्यसंयोगवत्त्वाद् यथोत्तरदेशस्य गम्यादिकर्मत्वं तथा गमनजन्यविभागरूपफलवत्त्वात् पूर्वदेशस्यापि गम्यादिकर्मत्वं स्यादेव न चैतदिष्टमिति तद्धात्वर्थतावच्छेदकफलशालित्वमेव तद्धातुकर्मत्वमित्युच्यते एवं च 'ग्रामं गच्छति' इत्यत्र गम्धात्वर्थतावच्छेदकं फलं संयोग एवेति तादृशसंयोगाश्रयत्वमेव गम्धातुकर्मत्वमिति लब्धम्, गमनजन्यसंयोगाश्रयत्वं तूत्तरदेशस्यैवास्तीत्युत्तरदेशस्यैव गम्धातुकर्मत्वं प्राप्तं न तु पूर्वदेशस्यापि, पूर्वदेशस्य गमनजन्यसंयोगरूपफलाश्रयत्वाभावात्। पूर्वदेशस्य विभागाश्रयत्वात् त्यज् धातुकर्मत्वमेव, एवम् 'ग्रामं त्यजति' इत्यत्र धात्वर्थतावच्छेदकं फलं विभाग एवेति तादृशविभागाश्रयस्यैव त्यज्धातुकर्मत्वं ज्ञेयम्। एवं रीत्या कर्मत्वलक्षणेन स्पन्देः=स्पन्द्यादिधातोः सकर्मकत्वापत्तिरपि नास्ति तत्र फलस्य धात्वर्थतावच्छेदकत्वाभावादित्याह-न वेति। एवं च धातोः फलावच्छिन्नव्यापारवाचकत्वेन फलविशेषवाचकत्वमपि धातोरेव प्राप्तं न द्वितीयाया इति फलान्वयिनी=संयोगादिरूपफलनिष्ठा या वृत्तिः=आधेयता सैव द्वितीयार्थः, संयोगस्य ग्रामनिष्ठत्वाद् ग्रामनिरूपिताऽऽधेयता संयोगेऽस्त्येव, 'ग्रामं गच्छति' इत्यत्र 'ग्रामनिरूपिताधेयतावत्संयोगजनकव्यापारवान् इति बोधोदयादित्याह-एवमिति। ननु द्वितीयाया आधेयतार्थकत्वे "कर्मणि द्वितीया" इति सूत्रविरोधः स्यात्-अनेन सूत्रेण कर्मत्वे द्वितीया विधीयते नत्वाधेयतायामित्याशङ्क्याह-न चेति। परिहारहेतुमाह-तस्येति, तस्य="कर्मणि द्वितीया" इति सूत्रस्य 'यदा प्रकृतिभूतग्रामादिपदस्य संयोगादिरूपफलनिष्ठा याऽऽधेयता तादृशाधेयतान्वयिनि=तादृशाधेयतानिरूपके ग्रामादिपदार्थे तात्पर्यं भवति तदा तदुत्तरम् ग्रामादिपदोत्तरद्वितीया भवति' इत्येवार्थो न तु 'कर्मत्वे

अनादितात्पर्यग्रहसम्पादकत्वेन परम्परया शक्तिग्राहकत्व-सम्भवात्। न च फलस्य पदार्थैकदेशतया तत्र द्वितीयार्थ-वृत्तेरन्वयासम्भवः– व्युत्पत्तिवैचित्र्येण प्रकृते एकदेशान्वय-स्वीकारात्।

द्वितीया भवति' इत्यर्थ इति नास्माकं "कर्मणि द्वितीया" इत्यनुशासनविरोधोपीत्यर्थः। सूत्रघटकस्य "कर्मणि" इति पदस्यार्थमाह– फलनिष्ठाधेयत्वान्वयिनीति। ननु सूत्रघटककर्मपदस्य कर्मपदार्थे कर्मत्वे वा शक्तिः संभवति न तु फलनिष्ठाधेयत्वान्वयिन्यपि किंतु तत्र तात्पर्यमात्रमेव स्यात् त्वयापि सूत्रतात्पर्यस्यैव वर्णितत्वादिति तस्य="कर्मणि द्वितीया" इति सूत्रस्य त्वदुक्तार्थपरत्वे शक्तिग्राहकत्वं न स्यादस्ति च व्याकरणस्यापि शक्तिग्राहकत्वम् "शक्तिग्रहं व्याकरणोपमान" इति प्रमाणादित्याशङ्क्याह– न चैवमिति। अनादितात्पर्यग्राहकत्वमपि शक्तिग्राहकत्वमेवास्ति किं वाऽनादितात्पर्यग्राहकत्वपरम्परया शक्तिग्राहकत्वं सूत्रस्य ज्ञेयं सूत्रघटक-कर्मपदस्य च फलनिष्ठाऽऽधेयत्वाऽन्वयिन्येवानादितात्पर्यमस्ति तादृशस्यैव बोधस्य जायमानत्वादित्यभिप्रायेण परिहारहेतुमाह–अनादीति। ननु फलावच्छिन्नव्यापारस्य धात्वर्थत्वे फलस्य पदार्थैकदेशत्वं प्राप्तं तत्र च द्वितीयार्थस्य वृत्तेः=आधेयताया अन्वयो न संभवति–"पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति व्युत्पत्तिविरोधादित्याशङ्क्याह– न चेति। परिहारहेतुमाह व्युत्पत्तीति। धात्वर्थादन्यत्र पदार्थस्य पदार्थैकदेशेऽन्वयो न भवति धात्वर्थस्थले तु धात्वर्थैकदेशेऽपि पदार्थान्तरस्यान्वयो भवतीत्येतादृश-व्युत्पत्तिवैचित्र्येण पदार्थैकदेशेऽपि फले द्वितीयार्थाधेयत्वान्वये न कोपि विरोध इत्यर्थः।

ननु यद्युक्तरीत्या द्वितीयार्थाधेयत्वस्य धात्वर्थैकदेशेऽपि संयोगादि-रूपफलेऽन्वयो भवति तदा 'गमनं न स्पन्दः' इत्यत्रापि गमनपदादुपस्थितो यः संयोगरूपफलावच्छिन्नव्यापारस्तादृशव्यापारैकदेशभूतसंयोगे स्पन्दभेद-स्यान्वयसंभवेन 'गमनं न स्पन्दः' इत्यपि प्रयोगः स्यादेव, न चैवं प्रयोगो भवति धात्वर्थस्य स्पन्दरूपत्वेन तत्र स्पन्दभेदासंभवादित्येतादृशप्रयोगस्य='गमनं न स्पन्द' इति प्रयोगस्य वारणाय फलविशेष्यकबोधं प्रति तद्विशेष्यक=

अथ 'गमनं न स्पन्दः' इत्यादितो धात्वर्थतावच्छेदकफले स्पन्दभेदान्वयबोधसम्भवेनैतादृशप्रयोगस्य वारणाय फलविशेष्यकान्वयबोधे तद्विशेष्यकवृत्तिज्ञानजन्यफलोपस्थितित्वेन हेतुत्वकल्पनस्यावश्यकत्वात् तादृशकारणबाधेन धात्वर्थतावच्छेदकफले द्वितीयार्थान्वयासम्भवः।

न च यादृशपदसमभिव्याहारज्ञानात् फलविशेष्यकस्पन्दभेदान्वयबोधः प्रसिद्धस्तादृशपदसमभिव्याहारज्ञानतादृशपदज्ञानजन्यफलाद्युपस्थितिघटितसामग्र्यास्तादृशान्वय-

---

फलविशेष्यकवृत्तिज्ञानजन्यफलोपस्थितेर्हेतुत्वं वक्तव्यं यथा 'संयोगो न स्पन्दः' इत्यत्र संयोगविशेष्यकवृत्तिज्ञानात्संयोगोपस्थितिरस्तीति स्पन्दभेदप्रकारकसंयोगविशेष्यकशाब्दबोधो जायते तथा च 'गमनं न स्पन्दः' इत्यत्र गमनपदेन विशेष्यतयोपस्थितिस्तु गमनरूपस्पन्दस्यैव भवति न फलस्येति न संयोगरूपफले स्पन्दभेदस्यान्वयः संभवति विशेष्यतयोपस्थितं गमनं तु स्पन्दरूपमेवेति न तत्रापि स्पन्दभेदान्वयः संभवतीति 'गमनं न स्पन्दः' इति प्रयोगो न भवति, तथा च 'ग्रामं गच्छति' इत्यत्रापि संयोगरूपफलस्य विशेष्यतयोपस्थितिर्नास्तीति तादृशकारणबाधेन=फलविशेष्यकबोधसम्पादिकायाः फलस्य विशेष्यतयोपस्थितेर्बाधेन=असत्त्वान्नात्र धात्वर्थतावच्छेदकफले संयोगे द्वितीयार्थस्याधेयत्वस्यान्वयः संभवतीत्याशङ्कतेअथेति। अथेत्यत्र 'अथैवम्' इति युक्तः पाठः। किं वा "बोधसंभवेन" इत्यत्र 'बोधासंभवेन' इति पठितव्यम्।

ननु यादृशपदसमभिव्याहारज्ञानात्='संयोगः स्पन्दो न' इत्यत्र संयोगपदसमभिव्याहारज्ञानात् संयोगरूपफले स्पन्दभेदान्वयबोधो जायते इति तादृशपद=संयोगपदसमभिव्याहारेण संयोगपदजन्यसंयोगरूपफलोपस्थित्या च घटितायाः तादृशान्वयबोधोत्पादप्रयोजिकायाः=स्पन्दभेदप्रकारकसंयोगरूपफलविशेष्यकबोधोत्पत्तिप्रयोजिकायाः सामग्र्या उक्तस्थले- 'गमनं न स्पन्दः' इत्यत्रासत्त्वेन तदापत्त्यऽसंभव=गमनपदोपस्थितसंयोगरूपफलावच्छिन्नव्यापारैकदेशे संयोगरूपफले स्पन्दभेदान्वयस्यापत्तिर्नास्ति, संयोगस्य विशेष्यतयोपस्थापकसामग्रीसत्त्वे एव विशेष्यतयोपस्थितसंयोगे पदार्थान्तरान्वयसंभवादिति न 'गमनं न स्पन्दः' इति प्रयोगापत्तिरित्याशङ्क्याह न चेति। परिहरति-

बोधोत्पादप्रयोजिकाया असत्त्वेनोक्तस्थले तदापत्त्यऽसंभव इति वाच्यम्, यत्र गमनादिपदादेव लक्षणया शक्तिभ्रमेण वा स्वातन्त्र्येण फलोपस्थितिस्तत्र फलविशेष्यकस्पन्दभेदान्वयबोधप्रसिद्ध्या गमनपदसमभिव्याहारतज्जन्यफलोपस्थितिघटितसाम्ग्याः फलविशेष्यकस्पन्दत्वाद्यवच्छिन्नभेदान्वयबोधप्रयोजकताया आवश्यकत्वात् तद्बलेन शक्तिप्रमाधीनबोधेपि फलांशे स्पन्दभेदादिभानप्रसङ्गात्।

यत्रेति, यदा हि 'गमनं न स्पन्दः' इत्यत्र गमनपदेन लक्षणया शक्तिभ्रमेण वा केवलसंयोगरूपफलस्यैवोपस्थितिर्भवति तत्र स्वातन्त्र्येण=विशेष्यतया फलोपस्थितेः सत्त्वात् फले संयोगे स्पन्दभेदस्यान्वयः संभवत्येवेति तत्र फलविशेष्यकस्पन्दभेदप्रकारकशाब्दबोधस्य प्रसिद्ध्या गमनपदसमभिव्याहारेण गमनपदजन्यसंयोगरूपफलोपस्थित्या च घटितायाः साम्ग्याः फलविशेष्यकस्पन्दभेदप्रकारकशाब्दबोधं प्रति प्रयोजकतायाः=हेतुतायाः स्वीकारस्यावश्यकत्वात् तद्बलेन=उक्तैतादृशसामग्रीबलेन शक्तिप्रमाधीनबोधेऽपि=यत्र 'गमनं न स्पन्द', इति वाक्यघटकगमनपदाच्छक्तिप्रमया संयोगावच्छिन्नव्यापारस्योपस्थितिर्जाता तयोपस्थित्या च शाब्दबोधो जायते तत्रापि फले संयोगे स्पन्दभेदान्वयप्रयोजिकाया उक्ताया गमनपदसमभिव्याहारगमनपदजन्यसंयोगरूपफलोपस्थितिघटितसाम्ग्याः सत्त्वादेव फलांशे= गमनं न स्पन्दः' इति प्रयोगोऽपि स्यादेव संयोगे स्पन्दभेदस्य सत्त्वादेव, न चैवं प्रयोग इष्ट इति तद्वारणाय संयोगे स्पन्दभेदान्वयबोधं प्रति शक्तिप्रमया विशेष्यतया संयोगोपस्थितेः कारणत्वं वक्तव्यं, सा च 'गमनं न स्पन्दः' इत्यत्र नास्तीति न संयोगे स्पन्दभेदान्वयापत्तिस्तथा चैवमेव 'ग्रामं गच्छति' इत्यत्रापि संयोगस्य विशेष्यतयोपस्थित्यभावात्तत्रसंयोगे द्वितीयार्थाधेयत्वान्ववासंभव इत्यर्थः।

ननु गम्यादिधातोः फलव्यापारयोः पृथक् पृथक् खण्डशः शक्तिं स्वीकरिष्यामस्तथा च 'ग्रामं गच्छति' इत्यत्र गम्धातुना संयोगरूपफलस्यापि व्यापारवत् स्वतन्त्रैव विशेष्यतयोपस्थितिर्भविष्यति न व्यापारविशेषणत्वेन येनात्र संयोगरूपफले द्वितीयार्थाधेयत्वस्यान्वयानुपपत्तिः स्यादित्याशङ्क्याह–एवं

एवं च फलव्यापारयोः पृथक् शक्तिस्वीकारपक्षेऽपि न निस्तारः– तथात्वेऽपि हि 'गमनं न स्पन्दः' इत्यादौ फलांशे शक्तिप्रमया स्पन्दभेदान्वयबोधसम्भवेन तादृशप्रयोगापत्तेर्दुर्वार-त्वादिति चेत्?,

न, तद्विशेष्यकवृत्तिज्ञानजन्यतदुपस्थितिजन्यतावच्छेद-ककोटौ तादृशोपस्थित्यव्यवहितोत्तरत्वनिवेशनमावश्यकम्, विशिष्य तत्तत्पदमन्तर्भाव्यैव पदार्थोपस्थितेरेकैकविधबोधे

चेति। एवं च=एवमेव। परिहारहेतुमाह तथात्वेऽपीति। तथात्वे=फलव्यापारयोः पृथक् शक्तिस्वीकारपक्षेऽपि 'गमनं न स्पन्दः' इत्यत्रापि गमनपदाद् व्यापारवत् संयोगरूपफलस्यापि पृथक् शक्त्या विशेष्यतयोपस्थितिः स्यादेवेति विशेष्यतयोपस्थितिसंयोगे स्पन्दभेदस्यान्वयसंभवेन तादृशप्रयोगस्य='गमनं न स्पन्दः' इति प्रयोगस्याऽऽपत्तिर्दुर्वारैव स्यादिति न फलव्यापारयोर्धातूनां खण्डशक्तिस्वीकारंपक्षेऽपि निस्तार इत्यर्थः।

अथेत्यादिना शङ्कितं परिहरति नेति, यत्रैकविधशाब्दबोधं प्रत्यनेकविधोपस्थित्यादीनां कारणत्वं प्राप्नोति तत्र कार्यतावच्छेदककोटौ कारणाव्यवहितोत्तरत्वनिवेशस्य मर्यादास्तीति बहुधा प्रतिपादितम्, एतदेवाह– तद्विशेष्यकेति। यथा घटविशेष्यकबोधं प्रति घटपदजन्योपस्थितेः कारणत्वं तथा कलशपदजन्योपस्थितेरपि कारणत्वमस्त्येव किं तु घटपदजन्योपस्थिति-जन्यशाब्दबोधकाले कलशपदजन्योपस्थितेरसत्त्वेन कारणत्वव्यभिचारः स्यादिति तादृशव्यभिचारस्य कार्यतावच्छेदककोटौ कारणाव्यवहितोत्तरत्वनिवेशं विना प्रकारान्तरेण वारणासंभवादित्याह– एकपदेति, तथा च घटपदजन्योपस्थित्य-व्यवहितोत्तरजायमानघटविशेष्यकशाब्दबोधं प्रति घटपदजन्योपस्थितिः कारणमित्येवं विशेषरूपेण तत्तत्पदमन्तर्भाव्यैव पदार्थोपस्थितेः कारणत्वं वक्तव्यम्, एकप्रकारकबोधे घटकलशादिपदजन्यनानाविधोपस्थितीनां या नानाहेतुता तस्याः प्रकारान्तरेण व्यवस्थाया असंभवादित्याह– विशिष्येति तथा च प्रकृतेऽपि संयोगविशेष्यकवृत्तिज्ञानजन्यसंयोगोपस्थित्यव्यवहितोत्तर-जायमानसंयोगविशेष्यकशाब्दबोधं प्रति संयोगविशेष्यकवृत्तिज्ञानजन्यसंयोगो-पस्थितेः कारणत्वमित्येवं विशेषरूपेणैव कार्यकारणभावो वक्तव्यः=तत्तच्छाब्द-

नानाहेतुताया व्यवस्थापितत्वाद् एकपदाधीनतद्विषयकशाब्दबोधे पदान्तरवृत्तिज्ञानजन्यतदुपस्थितेर्व्यभिचारस्य प्रकारान्तरेण वारणासम्भवात्। एवं च धात्वर्थतावच्छेदकफले द्वितीया-

---

बोधं प्रति तत्तद्विशेष्यकोपस्थितेरेव कारणत्वमिति यावत् तथा च यदा 'गमनं न स्पन्दः' इत्यत्र गमनपदाल्लक्षणया विशेष्यत्वेन संयोगोपस्थितिः स्यात्तदा तत्र विशेष्यत्वेनोपस्थितसंयोगे स्पन्दभेदान्वयस्य न काप्यनुपपत्तिः–एतादृशबोधं प्रति संयोगविशेष्यकोपस्थितेः कारणत्वात् तस्याश्चात्र सत्त्वात्–गमनपदेन लक्षणया संयोगस्य विशेष्यतयैवोपस्थितत्वात्, यदा च गमन-पदात्संयोगावच्छिन्नव्यापारस्यैवोपस्थितिस्तदा तस्याः संयोगविशेष्यकशाब्दबोधं प्रति कारणत्वाभावान्न व्यापारैकदेशे संयोगे स्पन्दभेदान्वयापत्तिः–संयोगस्य विशेष्यतयोपस्थित्यभावादिति न 'गमनं न स्पन्दः' इति प्रयोगापत्तिः। एवं च तत्तच्छाब्दबोधं प्रति तत्तद्विशेष्यकोपस्थितेः कारणत्वे स्वीकृते 'ग्रामं गच्छति' इत्यत्र द्वितीयार्थाधेयताया व्यापारैकदेशेऽपि संयोगेऽन्वयोपगमे संयोग-विशेष्यकद्वितीयार्थाधेयत्वप्रकारकशाब्दबोधं प्रति द्वितीयासमभिव्याहृतगम्धातु-जन्यसंयोगोपस्थितेः कारणत्वं प्राप्तमित्येतादृशकारणसत्त्वात् 'ग्रामं गच्छति' इत्यत्र व्यापारैकदेशेऽपि संयोगे द्वितीयार्थाधेयत्वस्यान्वये न काप्यनुपपत्तिः। स्पन्दभेदप्रकारकसंयोगविशेष्यकशाब्दबोधं प्रति च संयोगविशेष्यकोपस्थितेरेव कारणत्वात् तस्याश्च 'गमनं न स्पन्दः' इत्यत्राभावान्न व्यापारैकदेशे संयोगे स्पन्दभेदान्वयापत्तिरिति न 'गमनं न स्पन्दः' इति प्रयोगापत्तिरित्याशयेनाह–एवं चेति। क्षतिविरहः='गमनं न स्पन्दः' इति प्रयोगापत्तिरूपा क्षतिर्नास्तीत्यर्थः। उक्ते हेतुमाह तत्रेति, तत्र=स्पन्दभेदप्रकारकसंयोगविशेष्यकशाब्दबोधे एतादृश-कारणस्य=गम्धातुजन्याया व्यापारैकदेशत्वेन संयोगस्योपस्थितेः कारणत्वमेव नास्ति (संयोगविशेष्यकोपस्थितेरेव कारणत्वात्) येन 'गमनं न स्पन्दः' इत्यत्र गम्धातुना व्यापारैकदेशत्वेनाप्युपस्थितेः संयोगे स्पन्दभेदान्वयः आपद्येत? यदि स्पन्दभेदप्रकारकसंयोगविशेष्यकशाब्दबोधं प्रति गम्धातुजन्याया व्यापारैकदेशत्वेन संयोगस्योपस्थितेः कारणत्वं स्यात्तदा 'गमनं न स्पन्दः' इत्यत्र स्पन्दभेदप्रकारकसंयोगविशेष्यकशाब्दबोधस्याऽजायमानत्वेऽप्येतादृश-कारणस्य सत्त्वेन व्यभिचारः स्यात्? न चैवमस्ति। किं वा तत्र=आधेय-त्वप्रकारकसंयोगविशेष्यकशाब्दबोधे एतादृशकारणस्य=गम्धातुजन्यसंयोग-

र्थान्वयबोधेऽपि क्षतिविरहः– तत्रैतादृशकारणस्य व्यभिचारा-प्रसक्तेरिति वदन्ति।

अत्रेदं चिन्त्यते– व्यापारमात्रस्य धात्वर्थतायामपि सर्वानुपपत्तीनामुद्धृतत्वात् फलावच्छिन्नव्यापारस्य गुरुतया तथात्वमनुचितम्।

अथ फले द्वितीयादेः शक्त्यन्तरकल्पनामपेक्ष्य धातोर्विशिष्टे शक्तिकल्पनमेवोचितम्। न च भवन्मतेप्याधेयत्वे द्वितीयादेः शक्त्यन्तरस्य कल्पनीयत्वात्तदंशे साम्यमिति वाच्यम्,

विशेष्यकोपस्थितेः कारणत्वमेव नास्ति येन 'ग्रामं गच्छति' इत्यत्र संयोगविशेष्य-कोपस्थितिं विनाप्याधेयत्वप्रकारकसंयोगविशेष्यकशाब्दबोधस्य जायमानत्वेन एतादृशकारणस्य=संयोगविशेष्यकोपस्थितेर्व्यभिचारः स्यादित्यर्थः प्रतीयते।

इत्येवं प्राचीननवीनयोर्मतमुपपाद्य तयोः समीक्षामारभते अत्रेदमि-त्यादिना, प्राचीनमतानुसारेण व्यापारमात्रस्यापि धात्वर्थत्वे न कोऽपि दोषः, ये च नवीनेन दोषाः प्रदर्शितास्तेप्युद्धृतास्तथा च फलावच्छिन्नव्यापारस्य गुरुतया तथात्वम्=धात्वर्थत्वं नोचितमित्यर्थः। व्यापारमात्रस्य धात्वर्थत्वे ये दोषा यथा प्रदर्शिता यथा चोद्धृतास्तत्सर्वं पूर्वं द्वितीयाकारकग्रन्थमारभ्य द्रष्टव्यमित्यलमत्र पुनस्तत्प्रदर्शनेन।

ननु प्राचीनमतानुसारेण फले संयोगादौ द्वितीयादेः शक्तिकल्पनापेक्षया धातोरेव विशिष्टे=फलावच्छिन्नव्यापारे शक्तिकल्पनमुचितं लाघवात् फले द्वितीयायाः पृथक् शक्तिकल्पने गौरवादित्याशङ्कतेअथेति। ननु भवन्मते=नवीनमतेऽपि धातोरेव फलावच्छिन्नव्यापारे शक्तिस्वीकारेण फले द्वितीयायाः शक्त्यभावेऽप्याधेयत्वे तु शक्तिः स्वीक्रयते एवेति यथा मया प्राचीनेन फले द्वितीयायाः शक्तिः स्वीक्रियते तथा त्वया नवीनेनाधेयत्वे शक्तिः स्वीक्रियते एवेति साम्यमेव प्रत्युत धातोः फलावच्छिन्नव्यापारे शक्त्या गौरवमधिकमित्याशङ्क्याह– न चेति। परिहारमाह ग्राममिति, 'इत्यत्र स्थितिरूपफलं तु धात्वर्थ एवं द्वितीया च सप्तम्यर्थे जातास्तीति द्वितीयाया आधेयत्वमेवार्थः–ग्रामनिरूपिताधेयतावती स्थितिरिति बोधः, 'ग्राममधिशेते'

'ग्राममध्यास्ते' 'ग्राममधिशेते' 'ग्रामं संयुनक्ति' इत्यादौ द्वितीयायाः सर्वमते एवाधेयत्वबोधकतया द्वितीयादेः फलवाचकत्वमतेप्याधेयत्ववाचकताया आवश्यकत्वात्। न च द्वितीयायाः संयोगादिवाचकत्वमते आधेयत्वे तस्या लक्षणैव न तु शक्तिरिति वाच्यम्, आधेयतात्वस्याखण्डतया संयोगत्वादिसमशरीरत्वात् संयोगत्वाद्यवच्छिन्ने तदवच्छिन्ने वा शक्तिः कल्प्यते इत्यत्र विनिगमकासम्भवात्।

इत्यत्र शयनरूपफलं तु धात्वर्थ एव द्वितीयार्थ आधेयत्वमेव 'ग्रामं संयुनक्ति' इत्यत्र संयोगरूपफलं तु धात्वर्थ एव द्वितीयार्थ आधेयत्वमेव भवतीत्युक्तोदाहरणस्थलेषु सर्वमतेष्वेव द्वितीयाया आधेयत्वरूपार्थबोधकत्वात् प्राचीनमते द्वितीयायाः फलवाचकत्वस्वीकारेऽप्याधेयत्ववाचकत्वमावश्यकमेव तथा प्राचीनमते द्वितीयायाः फलवाचकत्वमप्याधेयत्ववाचकत्वमपीति गौरवं नवीनमते केवलाधेयत्ववाचकत्वमेवेति लाघवमित्यर्थः । ननु प्राचीनमते द्वितीयायाः संयोगादिरूपफले एव शक्तिः आधेयत्वे तु तस्याः=द्वितीयाया लक्षणैवेति न फलाऽऽधेयत्वोभयवाचकत्वापत्त्या गौरवमित्याशङ्क्याह—न चेति। परिहारमाह— आधेयतात्वस्येति, यथा संयोगत्वमखण्डो धर्मस्तथाऽऽधेयतात्वमप्यखण्ड एव धर्म इत्याऽऽधेयतात्वस्य संयोगत्वसमानत्वेन विशेषाभावात् संयोगत्वाद्यवच्छिन्ने संयोगादौ फले द्वितीयायाः शक्तिरुचिता वा तदवच्छिन्ने=आधेयतात्वावच्छिन्ने आधेयत्वे वा द्वितीयायाः शक्तिरुचितेत्यत्र विनिगमकाभावाद् द्वितीयायाः फले एव शक्तिरिति नियमो न संभवति, तस्माद् द्वितीयाया आधेयत्वे एव शक्तिः—उक्तोदाहरणस्थलेषु द्वितीयाया आधेयत्वबोधकतायाः सर्वमतसिद्धत्वादित्यर्थः । अखण्डेति बहुपदार्थऽघटितत्वमेवाऽखण्डत्वम्।

नवीन आह— अस्तु वेति, आधेयत्वे द्वितीयाया लक्षणास्वीकारेऽपि फले तु द्वितीयायाः शक्तिर्नास्त्येव किं तु संख्यायामेव शक्तिः— द्वितीयान्तप्रयोगेषु सर्वत्र द्वितीयाया एव संख्याबोधकत्वात्, फलं तु धातुलभ्यमेव फलावच्छिन्नव्यापारे एव धातुशक्तिस्वीकारादित्यर्थः । ननु प्राचीनमतेऽपि

अस्तु वा ममाप्याधेयत्वे लक्षणैव शक्तिस्तु संख्यायामेव। यदि च द्वितीयादेः फलबोधकतामते फलेऽपि तस्या लक्षणैव न तु शक्तिः, शक्तिस्तु संख्यायामेव– संयोगविभागादि-रूपप्रत्येकफलापेक्षया संख्यायां तत्प्रयोगप्राचुर्यस्य विनिगमक-त्वादित्युच्यते? तथापि तन्मते धातुजन्यशुद्धव्यापारोपस्थितेः शाब्दबोधहेतुताकल्पनमधिकम्– द्वितीयाद्यसमभिव्याहार-स्थलानुरोधेन फलविशेषावच्छिन्नव्यापारे धातोर्लक्षणाया भवतामप्यावश्यकत्वाद् धातुजन्यतादृशव्यापारोपस्थिति-हेतुताया उभयसिद्धत्वात्।

द्वितीयाया यत्फलबोधकत्वं तल्लक्षणयैव न शक्त्येति फलेऽपि द्वितीयाया लक्षणैवोच्यते न शक्तिः शक्तिस्तु द्वितीयायाः संख्यायामेव स्वीक्रियते– 'ग्रामं गच्छति' इत्यत्र संयोग एव फलं 'ग्रामं त्यजति' इत्यत्र विभाग एव फलं नत्वेकं फलं सर्वत्रास्ति यस्मिन् द्वितीयायाः शक्तिः स्वीक्रियेत संख्या तु सर्वत्रैव शाब्दबोधविषयो भवतीति संख्यायां तत्प्रयोगप्राचुर्यस्य= द्वितीयाप्रयोगप्राचुर्यस्यैव संख्यायां शक्तिकल्पने विनिगमकत्वादिति फले द्वितीयाया लक्षणया द्वितीयाया एव फलबोधकत्वं न धातोरित्याशङ्क्याह–यदि चेति । उत्तरमाह–तथापीति, तथापि=फले द्वितीयाया लक्षणास्वीकारेण शक्त्यऽस्वीकारेऽपि तन्मते=प्राचीनमते धातुना फलानवच्छिन्नस्य शुद्धस्य=केवलस्य व्यापारस्योपस्थितिर्या भवति तस्या यच्छाब्दबोधहेतुत्वं तदधिकमेव स्याद् यतः–'त्यजति' 'इत्यादौ द्वितीयासमभिव्याहाररहितस्थले फलबोधिकाया द्वितीयाया अभावाद् धातोरेव फलावच्छिन्नव्यापारे लक्षणा स्वीकर्तव्या तथा च धातुजन्यफलावच्छिन्नव्यापारोपस्थितेरपि शाब्दबोधहेतुत्वं स्वीकर्तव्यमेवेति गौरवम्। 'गच्छति' इत्यत्रापि संयोगानुकूलव्यापारस्य प्रतीयमानत्वेन धातुजन्यायास्तादृशव्यापारोपस्थितेः=फलावच्छिन्नव्यापारोपस्थितेः शाब्दबोधहेतुता तव मम चेत्युभयमतसिद्धास्तीति प्राचीनमते धातुजन्यो-भयविधोपस्थितेः शाब्दबोधहेतुत्वकल्पनं प्राप्तमिति गौरवम्, नवीनमते तु धातुजन्यफलावच्छिन्नव्यापारोपस्थितेरेकाया एव शाब्दबोधहेतुत्वकल्पनापत्तिरिति लाघवमित्यर्थः।

यदि च 'स्पन्दते' इत्यादित इव शक्तिभ्रमात् 'गच्छति' इत्यादितोऽपिशुद्धव्यापारबोध आनुभविक इति मन्यते? तथापि तन्मते शाब्दबुद्धौ द्वितीयादिजन्यफलोपस्थितेः कारणतायाः कल्पनाधिक्यं तज्जन्याधेयत्वोपस्थितिहेतुत्वकल्पनस्य चोक्तस्थलानुरोधेनोभयमत एवावश्यकत्वादिति चेत्?, अस्तु तन्मते तादृशकारणताया आधिक्यम्।

ननु यथाः 'स्पन्दते' इत्यत्र न किंचित्फलावच्छिन्नव्यापारस्य बोधो जायते किं तु शुद्धव्यापारस्यैव तथा शक्तिभ्रमात् 'गच्छति' इत्यत्रापि द्वितीयारहितस्थले शुद्धव्यापारबोध एव जायते न फलावच्छिन्नव्यापारबोध इति धातुजन्यशुद्धव्यापारोपस्थितेरेवैकायाः प्राचीनमतेऽपि शाब्दबोधहेतुत्वमस्ति नोक्तधातुजन्यद्विविधोपस्थितेरिति नोक्तगौरवमित्याशङ्क्याह—यदि चेति। उत्तरमाह—तथापीति, तथापि=धातुजन्योक्तद्विविधव्यापारोपस्थितेः शाब्दबोधहेतुत्व-कल्पनापत्त्यभावेऽपि तन्मते=प्राचीनमते 'ग्रामं गच्छति' इत्यत्र शाब्दबोधं प्रति यद् द्वितीयाजन्यफलोपस्थितेः कारणत्वकल्पनं (कारणत्वं) तदधिकमेव, यतः— उक्तस्थलानुरोधेन='ग्राममध्यास्ते' इत्यादौ स्थित्यादिरूपफलस्य धातुनैव लभ्यत्वाद् धातोः स्थित्यर्थकत्वाद् द्वितीयाया आधेयत्वार्थकत्वमुभय (तव मम) मतसिद्धमेवेति तज्जन्य=द्वितीयाजन्याधेयत्वोपस्थितेस्तु शाब्दबोधहेतुत्व-कल्पनमुभयमतसिद्धत्वादावश्यकमेवेति द्वितीयाजन्यफलोपस्थितेः कारणत्व-कल्पनमधिकमेवेति गौरवम्। नवीनमते त्वाधेयत्वमेव द्वितीयार्थ इति सर्वत्र द्वितीयाजन्याधेयत्वोपस्थितेरेकाया एव शाब्दबोधकारणत्वकल्पनापत्तिरिति लाघवमित्यर्थः । अथेत्यादिनारब्धामाशङ्कां परिसमापयति-इति चेदिति । उत्तरमाह-अस्त्विति, तन्मते=द्वितीयायाः फलबोधकत्ववादिप्राचीनमते तादृशकारणतायाः=उक्तरीत्या शाब्दबोधं प्रति द्वितीयाजन्यफलोपस्थितेः कारणताया आधिक्यमस्तु तन्न दोषावहं नवीनमतस्यैव तदपेक्षयाधिकप्रदर्शयिष्य-माणगौरवग्रस्तत्वादित्यर्थः।

नव्यमते स्वाभिप्रेतं गौरवं प्रदर्शयति—नव्यमते इति, शाब्दबोधसामग्र्याः समानविषयकानुमितिं प्रति प्रतिबन्धकत्वं सर्वमतसिद्धमेव, नवीनमते धातोः फलावच्छिन्नव्यापारे शक्तिरस्ति तत्र ग्रामं गच्छति' इत्यादिवाक्यज्ञानघटितसामग्र्या

नव्यमते तु 'ग्रामं गच्छति' इत्यादिवाक्यज्ञान-घटितशाब्दसामग्र्याः समानविषयकानुमित्यादिप्रतिबन्धकतायां फलप्रकारतानिरूपितव्यापारविशेष्यताशालित्वेन धातुजन्योप-स्थितेर्निवेशनीयतया तस्यास्तादृशविशेष्यताशालित्वेन व्यापार-विशेष्यतानिरूपितफलप्रकारताशालित्वेन वा निवेश इत्यत्र विनिगमनाविरहात् सामग्रीप्रतिबन्धकताधिक्यमवच्छेदकगौरवं च। प्राचीनमते द्वितीयाजन्यफलोपस्थितेः सामग्र्यन्तर्निवेशस्तु नव्यमतसिद्धतज्जन्याधेयत्वोपस्थितिनिवेशस्थलीय इति। नव्यमते

या समानविषयकानुमित्यादिप्रतिबन्धकता तच्छरीरे धातुजन्योपस्थितेः फलनिष्ठप्रकारतानिरूपितव्यापारनिष्ठविशेष्यताशालित्वेन रूपेण निवेशनीयतया तत्र तस्याः=धातुजन्योपस्थितेः तादृशविशेष्यताशालित्वेन=फलप्रकारता-निरूपितव्यापारविशेष्यताशालित्वेन वा निवेशः कर्तव्यः व्यापारविशेष्यता-निरूपितफलप्रकारताशालित्वेन रूपेण वा निवेशः कर्तव्य इत्यत्र विनिगमना-विरहात् द्विविधरूपेणैव निवेशः स्यादिति सामग्र्या द्वैविध्येन सामग्रीनिष्ठप्रति-बन्धकताया अपि द्वैविध्यं स्यादेवेति गौरवाधिक्यम्, अवच्छेदकगौरवं च=फलावच्छिन्नव्यापारस्य धात्वर्थत्वे धात्वर्थतावच्छेदकं फलावच्छिन्नव्यापारत्वं स्यात्तच्च गुरू इत्यवच्छेदकगौरवम्। प्राचीनमते तु शुद्धव्यापार एव धात्वर्थ इति नोक्तरीत्या समानविषयकानुमित्यादिकं प्रति शाब्दसामग्र्या द्विविधप्रति-बन्धकत्वं न वाऽवच्छेदकगौरवं व्यापारत्वमात्रस्यैव धात्वर्थतावच्छेदक-त्वादित्यर्थः। ननु प्राचीनमतेऽपि द्वितीयाजन्यफलोपस्थितेरपि शाब्दसामग्र्या-मन्तर्भावात् तादृशोपस्थितेः प्रतिबन्धकत्वेन गौरवं स्यादित्याशङ्क्याह–प्राचीनमत इति, नवीनमते यथा तज्जन्य=द्वितीयाजन्याधेयेत्वोपस्थितेः शाब्दसामग्र्या-मन्तर्भावस्तथा प्राचीनमते द्वितीयाजन्यफलोपस्थितेः शाब्दसामग्र्यामन्तर्भाव इति साम्यमेवेत्यर्थः। स्थलीयः=स्थानीयः। नवीनमते पुनर्गौरवमाह–नव्यमते इति, नवीनमते तादृशस्थले='ग्रामं गच्छति' इत्यादिस्थले शाब्दबोधे व्यापारस्य फलस्याऽऽधेयत्वस्य च विषयतया भासमानत्वेन शाब्दबोधकारणी-भूततात्पर्यज्ञानादिकमपि शाब्दबोधसमानविषयकत्वादधिकविषयकमेव शाब्दबोधकारणं स्यात्, तादृशमेवाधिकविषयकं तात्पर्यज्ञानादिकं समानविषयकानुमित्यादिप्रतिबन्धकीभूतायां शाब्दसामग्र्यामन्तर्भूतं च स्यात्

तादृशस्थले शाब्दबोधस्याधिकविषयतया तात्पर्यज्ञानादिकमप्यधिकविषयकमेव शाब्दधीहेतुर्भविष्यति प्रतिबन्धकसामग्र्यामप्यन्तर्भविष्यतीति च गौरवम्।

अथ फलस्य द्वितीयार्थत्वे 'भूमिं गच्छति न महीरुहम्' इत्यादौ महीरुहवृत्तिसंयोगादेर्जनकतासम्बन्धावच्छिन्नाभाव एव नञर्थो वाच्यः स च वृत्त्यनियामकसम्बन्धस्याऽभावप्रतियोगितानवच्छेदकतया अप्रसिद्धः। नव्यमते तु द्वितीयार्थस्याधेयत्वस्य फलनिष्ठोऽभाव एव तथेति नानुपपत्तिः। न च भूमिकर्मक-

---

तेन च प्रतिबन्धकतास्वरूपाधिक्यं स्यादिति गौरवम् ।

ननु 'ग्रामं गच्छति' इत्यादौ संयोगादिरूपफलस्य द्वितीयार्थत्वे तस्य फलस्य जनकत्वसंबन्धेन धात्वर्थव्यापारेऽन्वयो भवति-ग्रामवृत्तिसंयोगजनकव्यापारवानिति बोधोदयात्, इत्येवं स्थिते 'भूमिं गच्छति न महीरुहम् (जलमिति शेषः)' महीरुहवृत्तिसंयोगस्य जनकत्वसंबन्धेन गमनव्यापारेऽभावो वक्तव्य इत्यत्र जनकत्वसंबन्धावच्छिन्नप्रतियोगिताको महीरुहवृत्तिसंयोगस्याभावो नञर्थो वक्तव्यः स च=जनकत्वसंबन्धावच्छिन्नप्रतियोगिताकोऽभावो ऽप्रसिद्ध एव वृत्त्यऽनियामकस्य जनकत्वसंबन्धस्याऽभावप्रतियोगितावच्छेदकत्वाभावात्, वृत्तिनियामकस्यैव संबन्धस्याभावप्रतियोगितावच्छेदकत्वात्, अप्रसिद्धस्य च बोधो न संभवतीति प्राचीनमते 'भूमिं गच्छति न महीरुहम्' इत्यत्र वाक्यार्थबोधानुपपत्तिर्दोष इत्याशङ्कते अथेति। नन्वत्र नवीनमते कथं वाक्यार्थबोधोपपत्तिः स्यादित्याशङ्क्य नवीनमतेनात्र वाक्यार्थबोधमुपपादयति-नव्यमते इति, नवीनमते तु द्वितीयार्थ आधेयत्वमेवेति तस्याधेयत्वस्य संयोगादिरूपफलनिष्ठोऽभाव एव तथा=नञर्थ इति नात्र वाक्यार्थानुपपत्तिः-संयोगादावाऽऽधेयत्वस्याश्रयतासंबन्धेनान्वयसंभवादाऽऽश्रयतासंबन्धस्य वृत्तिनियामकत्वेनाऽभावप्रतियोगितावच्छेदकत्वात् संयोगे आश्रयत्वसंबन्धावच्छिन्नप्रतियोगिताकाधेयत्वाभावस्यात्र प्रतीयमानत्वादित्यर्थः । ननु 'भूमिं गच्छति न महीरुहम्' इत्यत्र न जनकतासंबन्धेन संयोगाद्यभावो नञर्थ उच्यते येनोक्तानुपपत्तिः स्यात् किंतु भूमिकर्मकगमनकर्तरि समवायेन महीरुहकर्मकगमनव्यापारकर्तृत्वाभाव एव नञ प्रतीयते स एवात्र नञर्थ

गमनकर्त्रादौ महीरुहकर्मकगमनकर्तृत्वाद्यभावः प्रतीयते इति वाच्यम्, कर्तृवाचकपदाऽसमभिव्याहारस्थले तदसम्भवात्।

न च तत्राप्याख्यातार्थान्वयबोधानुरोधेन कर्तृवाचकपदाध्याहारस्यावश्यक तयाऽध्याहृतपदोपस्थाप्यकर्तर्येव तादृशाभावो नञा बोधयिष्यते इति वाच्यम्, आख्यातार्थविशेष्यकस्याप्यन्वयबोधस्य सम्भवेनाऽध्याहारस्याऽनावश्यकत्वात्। 'भूमेर्गमनं न महीरुहस्य' इत्यादौ द्वितीयासमा-

---

इत्युच्यते समवायस्य च वृत्तिनियामकत्वेनाभावप्रतियोगितावच्छेदकत्वसंभवादित्याशङ्क्याह– न चेति। परिहारमाह– कर्तृवाचकेति, कर्तृवाचकेति, कर्तृवाचकपदसत्त्वे तेनोपस्थितकर्तरि उक्तकर्तृत्वाभावबोधनसंभवेऽपि कर्तृवाचकपदाभावे तदसंभवात्=उक्तगमनकर्तृत्वाभावबोधनसंभवात्, अनुयोगिसत्त्वे ह्यभावप्रतीतेः संभवादित्यर्थः ।

ननु तत्रापि=कर्तृवाचकपदाऽसमभिव्याहरस्थलेप्याख्यातार्थस्य व्यापारस्य वान्वयबोधोपपत्त्यर्थे कर्तृवाचकपदस्याध्याहारः कर्तव्य एव येनाऽध्याहृतपदोपस्थितकर्तरि व्यापारादेरन्वयः स्यात् तथा चाध्याहृतपदोपस्थितकर्तर्येव नञा तादृशाभावः=उक्तमहीरुहकर्मकगमनकर्तृत्वाभावो बोधयिष्यते इति नात्र वाक्यार्थानुपपत्तिरित्याशङ्क्याह– न चेति। परिहारमाह–आख्यातार्थेति, 'भूमेर्गमनं न महीरुहस्य' इत्यादौ प्रथमान्तगमनपदवाच्यव्यापारविशेष्यकोऽपि शाब्दबोधो जायते एवेति कर्तृवाचकपदाऽसमभिव्याहारस्थले सर्वत्र कर्तृवाचकपदाध्याहारनियमस्यासंभवात्, अनुपस्थितकर्तरि चोक्तकर्तृत्वाभावान्वयासंभवात्, तथा च महीरुहवृत्तिसंयोगस्य जनकत्वसंबन्धावच्छिन्नाभाव एव नञर्थ उक्तस्थले वाच्यः स चाप्रसिद्ध एवेत्यर्थः । किं च 'भूमेर्गमनं न महीरुहस्य' इत्यत्र कृद्योगे कर्मणि षष्ठी जातेति षष्ठ्या द्वितीयासमानार्थकत्वात् तादृशषष्ठ्यर्थस्याऽभावोऽवश्यं बोधनीयस्तत्र यदि द्वितीयार्थः संयोगादिरूपफलमेव तदात्र संयोगाभावस्य व्यापारे जनकत्वसंबन्धेनान्वये उक्तानुपपत्तिस्तदवस्थैव जनकत्वसंबन्धस्य वृत्त्यनियामकत्वेनाऽभावीयप्रतियोगितानवच्छेदकत्वादित्यत्र षष्ठ्यर्थस्याधेयत्वस्यैवाभावो वक्तव्य इति द्वितीयार्थोप्याधेयत्वमेव स्यान्न फलमित्याह–भूमेरिति। ननु तत्र='भूमेर्गमनं न महीरुहस्य' इत्यत्रापि नञा

नार्थकषष्ठ्यर्थाभावबोधकताया आवश्यकत्वाच्च, न हि तत्राप्याश्रयतासम्बन्धावच्छिन्नप्रतियोगिताकगमनाभाव एव प्रतीयते इति सम्यक्– अनुयोग्यनुपस्थितेः, नञोऽनुयोगिविनिर्मोकेणाभावबोधकताया अव्युत्पन्नत्वादितिचेत्?, न, वृत्त्यनियामक संबन्धस्याभावप्रतियोगितावच्छेदकत्वे दोषः कः?।

अथ जनकतादिसम्बन्धावच्छिन्नप्रतियोगिताकसंयोगाद्यभावस्यातिरिक्तस्य कल्पने गौरवमितिचेत्?, न, तादृशाभावस्य

गमनव्यापाराभाव एव प्रतीयते न षष्ठ्यर्थाभाव इत्याशङ्क्याह– न हीति। उक्ते हेतुमाह–अनुयोगीति, उक्तस्थलेऽनुयोगिनो व्यापारकर्तृरुपस्थितिरेव नास्ति यत्र गमनाभावस्यान्वयः स्यादित्यर्थः। अत्र विनिगमकमाह नञ इति, अनुयोगिविनिर्मोकेण=अनुयोगिनं विना। कस्मिंश्चिदधिकरणे एव पदार्थान्वयबोधसंभवादिति भावः। 'गच्छति' इत्यादिकर्तृवाचकपदशून्यस्थले आख्यातार्थकृतेर्विशेष्यत्वविवक्षायाम् 'गमनानुकूलाकृतिः' इत्येवमाख्यातार्थविशेष्यकान्वयबोधोऽनुसन्धेयः। अथेत्यादिनाशङ्कितं परिहरति–नेति। तथा च वृत्त्यनियामकस्यापि जनकत्वसंबन्धस्याभावप्रतियोगितावच्छेदकत्वेन 'भूमिं गच्छति न महीरुहम्' इत्यत्रोक्तजनकत्वसंबन्धावच्छिन्नप्रतियोगिताकसंयोगाभावप्रतीतौ न काचिदनुपपत्तिरिति प्राचीनमतेन फलस्य द्वितीयार्थत्वेऽपि न कोपि दोष इत्यर्थः।

ननु वृत्त्यनियामकस्य जनकत्वसंबन्धस्याभावप्रतियोगितावच्छेदकत्वस्वीकारे उक्तस्थले उक्तरीत्या जनकत्वसम्बन्धावच्छिन्नप्रतियोगिताकसंयोगाभावस्यातिरिक्तस्य स्वीकारेण गौरवमेव दोष इत्याशङ्कते– अथेति। परिहरति– नेति, यत्र संयोगजनकत्वाभावस्तत्र तादृशाभावस्य=जनकत्वसंबन्धावच्छिन्नप्रतियोगिताकसंयोगाभावस्य समनियतत्वेन=सत्त्वेन जनकत्वसम्बन्धावच्छिन्नसंयोगाभावस्य तत्स्वरूपत्वात्=संयोगजनकत्वाभावस्वरूपत्वात् तस्य=संयोगजनकत्वाभावस्य चोभयवादिसिद्धत्वात् संयोगजनकत्वाभावस्वरूपस्य जनकत्वसम्बन्धावच्छिन्नसंयोगाभावस्याप्युभयवादिसिद्धत्वप्राप्तौ नातिरिक्तकल्पनास्वरूपमुक्तगौरवमित्यर्थः। ननु जनकत्वसंबन्धावच्छिन्नप्रतियोगिताकसंयोगाभावस्य संयोगजनकत्वाभावस्वरूपत्वेनाऽतिरिक्तत्वा–

संयोगजनकत्वाद्यभावसमनियतत्वेन तत्स्वरूपत्वात् तस्य चोभयवादिसिद्धत्वात्। अतिरिक्तप्रतियोगिताकल्पने गौरवमितिचेत्?, अस्त्वेतद् गौरवम्– उपदर्शितबहुविधलाघवेनेदृशगौरवस्याऽकिंञ्चित्करत्वात्।

अथ फलस्य द्वितीयार्थत्वे वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वेऽपि 'द्रव्यं गच्छति न गुणम्' इत्यादौ गुणादिनिष्ठस्य संयोगादिरूपफलस्याप्रसिद्ध्या नञर्थान्वय–

भावेऽपि संयोगजनकत्वाभावीयप्रतियोगितातो जनकत्वसंबन्धावच्छिन्नप्रतियोगिताकसंयोगाभावीयप्रतियोगिताया एवातिरिक्ताया: कल्पने=स्वीकारेण गौरवं स्यात् प्राचीनमते इत्याशङ्कते– अतिरिक्तेति । यथा संयोगेन घटाभावस्य घटसंयोगाभावस्य चैकरूपत्वेऽपि संबन्धभेदात्तयो: प्रतियोगिता भिन्नैव भवति संयोगेन घटाभावीयप्रतियोगिताया: संयोगसंबन्धस्यावच्छेदकत्वाद् घटसंयोगाभावीयप्रतियोगिताया: समवायस्यावच्छेदकत्वात्तथात्राप्युक्ताभावयो: प्रतियोगितयोरवच्छेदकीभूतसंबन्धभेदेन भेदो ज्ञेय: संयोगाभावीयप्रतियोगितावच्छेदक:, जनकत्वसंबन्ध:, संयोगजनकत्वाभावीयप्रतियोगितावच्छेदक: स्वरूपसंबन्ध: इति ध्येयम् । अभ्युपगम्याह– अस्त्वेतदिति । आधेयत्वस्य द्वितीयार्थत्वं फलावच्छिन्नव्यापारस्य च धात्वर्थत्वमिति नवीनमते ये दोषा: (२२३ पृ.) प्रदर्शितास्ते प्राचीनमते न सन्तीति प्राचीनमते प्रदर्शितबहुविधलाघवेन तुलनायामीदृशस्य= अतिरिक्तप्रतियोगितास्वीकाररूपगौरवस्य तुच्छत्वादित्यर्थ:।

ननु प्राचीनमतेन फलस्य संयोगादेर्द्वितीयार्थत्वे वृत्त्यनियामकस्य जनकत्वसंबन्धस्याभावीयप्रतियोगितावच्छेदकत्वे च स्वीकृतेऽपि तेन च 'भूमिं गच्छति न महीरुहम्' इत्यत्र 'जनकत्वसंबन्धावच्छिन्नप्रतियोगिताको यो महीरुहानुयोगिकसंयोगस्याभावस्तद्वद्व्यापारवज्जलम्' इत्याकारकान्वयबोधोपपादनेऽपि 'द्रव्यं गच्छति न गुणम्' इत्यादौ शाब्दबोधानुपपत्तिर्दोषोऽस्त्येव अतोऽत्र 'गुणम्' इति द्वितीयार्थ: फलरूप: संयोग एव प्राप्त इति 'जनकत्वसंबन्धावच्छिन्नप्रतियोगिताको यो गुणवृत्तिसंयोगस्याभावस्तद्वद्व्यापारवांश्चैत्र:' इत्येव शाब्दबोधो वक्तव्य: स च न संभवति गुणे संयोगरूपगुणस्य

बोधानुपपत्तिरितिचेत्?, न, तत्राधेयतासम्बन्धावच्छिन्न-प्रतियोगिताकप्रकृत्यर्थाभावस्यैव द्वितीयार्थे फले नञा बोधनोपगमात्। 'गुणो न गुणं गच्छति' इत्यादिवाक्यस्योभयमत एवाप्रमाणत्वात्। अस्तु वा तत्राभावस्य द्विधाभानोपगमेन गुणाभाववत्फलानुकूलस्पन्दाश्रयत्वाभाववान् गुण इत्याकारक एवान्वयबोधः।

बाधाद् गुणवृत्तिसंयोगरूपफलाभावस्य नञर्थत्वासंभवेन चान्वयबोध-संभवादित्याशङ्कते– अथेति । परिहरति– नेति, तत्र='द्रव्यं गच्छति न गुणम्' इत्यत्र द्वितीयार्थे= गुणपदोत्तरद्वितीयार्थे फले=संयोगे आधेयत्वसंबन्धा-वच्छिन्नप्रतियोगिताकः प्रकृत्यर्थस्य=गुणस्याभावो नञा बोध्यते संयोगे चाधेयतासंबन्धेन गुणो नास्त्येव 'आधेयत्वसम्बन्धावच्छिन्नप्रतियोगिताको यो गुणाभावस्तद्वान् यः संयोगस्तज्जनकगमनव्यापारवांश्चैत्रः' इति च शाब्दबोधः, आधेयत्वसंबन्धावच्छिन्नप्रतियोगिताकगुणाभाववत्संयोगजनकगमनव्यापारः द्रव्यकर्मक एव गमनव्यापारश्चात्र संभवति न गुणकर्मक इति नात्रान्वयबोधानुपपतिरित्यर्थः । गुणवृत्तिगुणत्वादौ गुणस्याधेयतासंबन्धेन वृत्तेः प्रसिद्धत्वादत्र संयोगे गुणस्याधेयतासबन्धेनाभावो नानुपपन्नः, किं वा समवायेनैव गुणे गुणानङ्गीकारात् समवायातिरिक्ताधेयतादिसंबन्धेन गुणे गुणवृत्ति-त्वविरोधाभावादत्राधेयतासंबन्धेन संयोगे गुणाभावो नानुपपन्नः, पूर्वत्र तु द्वितीयार्थसंयोगस्य गुणे समवायेनैव वृत्तित्वं वक्तव्यं तत्तु न संभवतीति "गुणादिनिष्ठस्य संयोगादिरूपफलस्याप्रसिद्ध्या" इत्यनेन शाब्दबोधानुपपत्तिः प्रदर्शितेति भावः। ननु 'द्रव्यं गच्छति न गुणम्' इत्यत्राधेयत्वसंबन्धावच्छिन्नप्रति-योगिताकगुणाभाववत्संयोगजनकगमनव्यापारस्य चैत्रे संभवेन शाब्दबोधे उपपन्नेऽपि प्राचीनमते 'गुणो न गुणं गच्छति' इत्यत्र तु शाब्दबोधानुपपत्तिरस्त्येव यतोऽत्रोक्तरीत्या 'आधेयत्वसंबन्धावच्छिन्नप्रतियोगिताकगुणाभाववत्संयोग-जनकगमनव्यापारवान् गुणः' इत्येव शाब्दबोधो वक्तव्यः स च न संभवति गुणे व्यापाराऽसंभवात् "गुणादिर्निर्गुणक्रियः" इति सिद्धान्तादित्याशङ्क्याह– 'गुणो न गुणं गच्छति' इत्यादिवाक्यस्येति, एतद्वाक्यार्थस्य बाधितत्वा-देतद्वाक्यस्याऽप्रामाण्यमेव नवीनमतेनाप्यत्रान्वयबोधोपपत्तेरसंभवादित्यर्थः। पक्षान्तरमाह अस्तु वेति, तत्र='गुणो न गुणं गच्छति' इत्यत्र नञर्थाभावस्य

परे तु वृत्त्यनियामकसम्बन्धस्याऽभावप्रतियोगिता-नवच्छेदकत्वे तु नव्यमतेऽपि 'द्रव्यं गच्छति नाभावम्' इत्यादौ गतिविरहः, तथा हि– समवायसम्बन्धावच्छिन्नाधेयतैव द्वितीयार्थो वाच्यः, अन्यथा कालिकादिसम्बन्धावच्छिन्न-ग्रामादिवृत्तिसंयोगादिकमादायातिप्रसङ्गात्, तथा चाभावादि-निरूपिततथाविधाधेयत्वाद्यऽप्रसिद्ध्या तदभावबोधासम्भवः।

द्विधा=द्विवारं भानोपगमेन 'आधेयत्वसंबन्धेन गुणाभाववद्यत्संयोगरूपं फलं तदनुकूलव्यापाराश्रयत्वाभाववान् गुणः' इत्याकारकशाब्दबोधसंभवात्, गुणे व्यापाराश्रयत्वाभावस्याऽबाधादित्यर्थः। एकस्यैव च नञोऽत्र गुणाभावबोधकत्वं स्पन्दाश्रयत्वाभावबोधकत्वं चेति नञर्थाभावस्य द्विधा भानं जातम्।

नवीनमते दोषमाह– परेत्विति, वृत्त्यनियामकस्य जनकत्वादि-संबन्धस्याभावीयप्रतियोगितावच्छेदकत्वास्वीकारे तु नव्यमतेऽपि 'द्रव्यं गच्छति नाभावम्' इत्यत्रान्वयबोधानुपपत्तिरेव। गतिविरहमुपपादयति–तथा हीति, नव्यमतेऽप्याधेयता समवायसंबन्धावच्छिन्नैव द्वितीयार्थ इति स्वीकार्यं यथा 'ग्रामं गच्छति' इत्यत्र संयोगस्य समवायेन ग्रामवृत्तित्वात्तादृशसंयोगे ग्रामनिरूपिताऽऽधेयताप्यस्ति ग्रामानुयोगिकः समवायोऽप्यस्त्येवेति संयोगरूपफलनिष्ठाऽऽधेयता समवायसंबन्धावच्छिन्नास्ति। विपक्षे बाधकमाह– अन्यथेति, यदि समवायातिरिक्तकालिकादिसंबन्धावच्छिन्नाप्याधेयता द्वितीयार्थः स्यात्तदा ग्रामं त्यजत्यपि चैत्रे ग्रामत्यागकाले समवायेन चैत्रसंयोगस्य ग्रामाऽवृत्तित्वेऽपि कालिकसंबन्धेन ग्रामे संभवादेव तादृशं कालिकसंबन्धा-वच्छिन्नग्रामवृत्तिसंयोगमादाय 'ग्रामं गच्छति चैत्रः' इति प्रयोगापत्तिरूपोऽतिप्रसङ्गः स्यादेव तन्निवारणार्थं समवायसंबन्धावच्छिन्नाऽऽधेयता द्वितीयार्थ इति वक्तव्यं तथा च ग्रामत्यागकाले समवायेन चैत्रसंयोगस्य ग्रामेऽसंभवात् कालिक-संबन्धावच्छिन्नग्रामवृत्तिसंयोगवृत्त्याधेयतायाः कालिकसंबन्धावच्छिन्नत्वेन समवायसंबन्धावच्छिन्नत्वाभावात् समवायानवच्छिन्नाधेयताया द्वितीयार्थत्वाभावाच्च 'ग्रामं गच्छति' इति प्रयोगापत्तिर्नास्त्येव, एवं स्थिते 'द्रव्यं गच्छति नाभावम्' इत्यत्राप्यभावपदोत्तरद्वितीयार्थः समवायावच्छिन्नैवाधेयतेति वक्तव्यं तत्र यदि कोऽपि पदार्थोऽभावे समवायसंबन्धेन स्यात्तदा तस्मिन्नभावानुयोगिकसमवायस्य

निरूपितत्वसम्बन्धस्य च वृत्त्यनियामकतया समवायसम्बन्धावच्छिन्नाधेयतायां तत्सम्बन्धावच्छिन्नप्रतियोगिताकप्रकृत्यर्थाभावबोधो न सम्भवत्येवेत्याहुरिति।

सत्त्वेन तन्निष्ठा साऽभावनिरूपिताऽऽधेयता समवायसंबन्धावच्छिन्ना स्यादपि न चैवमस्ति– अभावे कस्यापि समवायेन वृत्तित्वाभावादिति अभावनिरूपितस्य तथाविधाधेयत्वस्य=समवायसंबन्धावच्छिन्नाधेयत्वस्याऽप्रसिद्ध्या तदभावबोधासंभवः=अभावनिरूपितस्य समवायावच्छिन्नाधेयत्वस्य नञाऽभावबोधासंभवः– अप्रसिद्धप्रतियोगिकाभावबोधस्यास्वीकारादित्याह– तथा चेति। ननु 'द्रव्यं गच्छति नाभावम्' इत्यत्र नाभावनिरूपितायाः समवायसंबन्धावच्छिन्नाधेयतायाः फलेऽभाव उच्यते येन तादृशाधेयताया अप्रसिद्धत्वात्तदभावबोधासंभवः स्यात्, किं तु समवायसंबन्धावच्छिन्नाधेयतायाम् 'अभावम्' इति प्रकृत्यर्थाभावस्य निरूपितत्वसंबन्धेनाऽभावान्वयबोध उच्यते इति नाभावबोधासंभवः–अभावपदोत्तरद्वितीयार्थाधेयताया अभावनिरूपितत्वेन तस्यां निरूपितत्वसंबन्धेनाभावस्याऽभावाभावस्य चान्वयेऽनुपपत्त्यभावादित्याशङ्क्याह– निरूपितत्वेति, स्यादेवं यदि नव्यमते वृत्त्यनियामकसंबन्धस्याप्यभावीयप्रतियोगितावच्छेदकत्वं स्यात्, न चैवमस्ति, तथा च निरूपितत्वसंबन्धस्य वृत्त्यनियामकतया समवायसंबन्धावच्छिन्नाधेयतायां तत्संबन्धावच्छिन्नप्रतियोगिताकस्य=निरूपितत्वसंबन्धावच्छिन्नप्रतियोगिताकस्य (निरूपितत्वसंबन्धेनेति यावत्) प्रकृत्यर्थाभावस्य= अभावाभावस्यान्वयबोधोऽपि नैवात्र संभवतीत्यर्थः। यदि तु वृत्त्यनियामकसंबन्धस्याभावीयप्रतियोगितावच्छेदकत्वं स्वीकृतं स्यात्तदात्वत्र वृत्त्यनियामकस्यापि निरूपितत्वसंबन्धस्याभावप्रतियोगितावच्छेदकत्वे प्राप्ते अभावनिरूपितायां समवायसंबन्धावच्छिन्नाधेयतायां तेन निरूपितत्वसंबन्धेनापि प्रकृत्यर्थाभावस्य= अभावाभावस्य बोधः स्यादेव तत्र–निरूपितत्वसंबन्धावच्छिन्नप्रतियोगिताकाभावाभावविशिष्टाधेयताविशिष्टसंयोगजनकगमनव्यापारवांश्चैत्र इति च बोधाकारः, एतादृशसंयोगजनकगमनव्यापारश्चात्र द्रव्यकर्मकगमनव्यापार एव भवतीति ध्येयम्।

अत्रोच्यते इति, वृत्त्यनियामकसंबन्धस्याभावीयप्रतियोगितानवच्छेदकत्वे हि (224 पृ॰) अथेत्यादिनोक्तरीत्या 'भूमिं गच्छति न महीरुहम्' इत्यत्र महीरुहवृत्तिसंयोगस्य जनकतासंबन्धावच्छिन्नप्रतियोगिताकाभावबोधो न संभवति

अत्रोच्यते– वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेकत्वे आधेयत्वं संसर्गो विभक्तेः संख्यामात्रमर्थः फलावच्छिन्नो व्यापारो धात्वर्थ इत्येवोचितम्। अस्तु च व्युत्पत्तिवैचित्र्येण नामार्थधात्वर्थयोरपि साक्षादन्वयबोधस्तथा सत्यतिप्रसङ्गस्य प्रागुपदर्शितप्रकारेण वारणसम्भवात्। न चैतत्कल्पे

जनकत्वसंबन्धस्य वृत्त्यनियामकत्वादित्याऽऽधेयत्वस्यैवाऽऽश्रयत्वादिसंबन्धावच्छिन्नप्रतियोगिताकफलनिष्ठाभावबोध उपपद्यते तदर्थं चाधेयत्वस्य द्वितीयार्थत्वमावश्यकमेव केनचित्पदेनोपस्थितिं विना नञा तदभावबोधासंभवात् यदा तु वृत्त्यनियामकस्य जनकत्वादिसंबन्धस्याप्यभावीयप्रतियोगितावच्छेदकत्वं स्वीकृतं तदा तु 'भूमिं गच्छति न महीरुहम्' 'ग्रामं न गच्छति' इत्यादौ महीरुहग्रामादिवृत्तिसंयोगादेर्जनकत्वसंबन्धेन व्यापारे नञाऽभावबोधनसंभवादाधेयत्वस्य द्वितीयार्थत्वस्वीकारापेक्षा नास्ति संसर्गविधयापि भाने दोषाभावात् प्रत्युत तत्र द्वितीयायाः शक्तिकल्पने एव गौरवादित्यभिप्रायेणाह– वृत्त्यनियामकेति। विभक्तेः संख्यार्थकत्वं तु सर्वावस्थायां सर्वसम्मतमेव। ननु पूर्वम् "क्रियातादृशप्रातिपदिकार्थयोः (68 पृ.) इत्यादिना निपातातिरिक्तनामार्थधात्वर्थयोः भेदेन साक्षादन्वयः प्रतिषिद्धस्तत्राधेयत्वस्य द्वितीयार्थत्वे ग्रामस्याधेयत्वे आधेयत्वस्य च धात्वर्थीभूतसंयोगान्वयो भवतीत्युक्तनियमपरिपालनं संभवति आधेयत्वस्य संसर्गत्वे तु ग्रामस्य नामार्थस्याधेयत्वसंबन्धेन धात्वर्थीभूतसंयोगे (संयोगावच्छिन्नव्यापारस्य धात्वर्थत्वेन संयोगस्य धात्वर्थत्वात्) साक्षादेवान्वयः स्यादित्युक्तनियमभङ्गः स्यात् इत्याशङ्क्याह–अस्तु चेति। व्युत्पत्तिवैचित्र्येण="ग्रामं गच्छति' इत्यादिवाक्यजन्यबोधवैचित्र्येण, किं वा वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितावच्छेदकत्वस्वीकारवैचित्र्येण। ननु यदि 'ग्रामं गच्छति' इत्यत्राधेयतासंबन्धेन धात्वर्थीभूतसंयोगे साक्षादेव ग्रामान्वयः स्यात्तदा 'ग्रामो गच्छति' इत्यपि प्रयोगः स्यात्–अत्रापि संसर्गविधया भासमानाधेयतासंबन्धेन ग्रामस्य धात्वर्थीभूतसंयोगेऽन्वयसंभवाद् आधेयत्वस्य संसर्गत्वेन पदेन तदुपस्थित्यपेक्षाभावात्, मन्मते तु आधेयत्वं न संसर्गः किं तु प्रकार एवेति 'ग्रामो गच्छति' इत्यत्राधेयत्वोपस्थापिकाया द्वितीयाया अभावादेव नाधेयत्वसंबन्धेन ग्रामस्य धात्वर्थीभूतसंयोगेऽन्वयः संभवतीति न 'ग्रामो गच्छति'

लाघवानवकाशः– फले स्वतन्त्रशक्त्यकल्पनेन सामग्रीप्रतिबन्धकतायां द्वितीयादिजन्यफलोपस्थितिधातुजन्यव्यापारोपस्थितिरित्युभयोपस्थित्यपेक्षया धातुजन्यविशिष्टविषयकोपस्थितेरेकस्या निवेशेन लाघवात्।

वस्तुतस्तु शाब्दबुद्धेरधिकविषयकत्वे 'राज्ञः पुरुषः' इत्यादौ स्वत्वादेः संसर्गतानिराकरणावसरे सामग्रीप्रतिबन्धकतायां लाघवस्य दर्शितत्वाद् द्वितीयादेराधेयत्वमर्थः फलावच्छिन्नव्यापारश्च धातोरित्येव युक्तम्।

इत्यतिप्रसंगस्यापत्तिरित्याशङ्क्याह–तथा सतीति, तथा सति=आधेयत्वसंसर्गेण ग्रामस्य धात्वर्थीभूतसंयोगे साक्षादन्वयस्वीकारे सति, अतिप्रसंगस्य='ग्रामो गच्छति' इति प्रयोगापत्तेः, प्रागुपदर्शितप्रकारेण=ग्रामकर्मकसंयोगानुकूलव्यापारविषयकशाब्दबोधं प्रति किं वा आधेयतासंसर्गेण ग्रामादेः धात्वर्थीभूतसंयोगेऽन्वयबोधं प्रति द्वितीयान्तग्रामादिपदसमभिव्याहृतगच्छतीत्यादिपदसमभिव्याहारज्ञानस्य कारणत्वान्न तादृशशाब्दबोधार्थम्–'ग्रामो गच्छति' इत्यादिप्रयोगापत्तिरित्यर्थः। ननु द्वितीयायाः फले शक्तिस्वीकारपक्षापेक्षयाऽस्मिन् मते किं नाम लाघवमित्याशंक्याह–न चेति। लाघवमाह–फले इति, फले द्वितीयाशक्तिस्वीकारे द्वितीयाजन्यफलोपस्थितेः धातुजन्यव्यापारोपस्थितेश्च कारणत्वं प्रतिबन्धकत्वं च स्यादिति गौरवम्, फलविशिष्टव्यापारे धातुशक्तिस्वीकारे चोपस्थितिद्वयस्थाने धातुजन्यफलविशिष्टव्यापारोपस्थितेरेकस्या एव कारणत्वं प्रतिबन्धत्वं चेत्यस्मिन्मते लाघवमित्यर्थः।

विभिन्नविषयकप्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वात् तादृशप्रतिबन्धकतायां लाघवप्राप्त्यर्थं पक्षान्तरमाह–वस्तुतस्त्विति। शाब्दबुद्धेरधिकविषयकत्वे प्रत्यक्षस्य तदपेक्षया विभिन्नविषयकत्वमल्पमेव स्यादिति प्रतिबन्धकत्वमप्यऽल्पं स्यादिति लाघवम्। शाब्दबुद्धेरधिकविषयकत्वसंपादनार्थं चाधेयत्वस्य द्वितीयार्थत्वं मन्तव्यं शेषं पूर्ववदेवेत्यर्थः।

संप्रति कर्मवाचकाख्यातप्रत्ययस्यार्थमाह–कर्मेति, 'ग्रामो गम्यते'

कर्माख्यातस्य फलमर्थः, अन्यथा 'ग्रामो गम्यते' इत्यादौ ग्रामादेर्व्यापारजन्यफलाश्रयत्वरूपकर्मत्वप्रतीत्यनुपपत्तेः, यादृश-विशेष्यविशेषणभावापन्नयोः पदशक्यता तादृशविशेष्यविशेषण-भावापन्नयोरेव शाब्दबोधे भानसम्भवात् न तु विपरीतविशेष्य-विशेषणभावापन्नयोः।

यत्तु फले धातोः पृथक् शक्त्युपगमाद् व्युत्पत्तिवैचित्र्येण कर्त्राख्यातसमभिव्याहारस्थले व्यापारविशेषणतया भासमानस्य

इत्यत्राख्यातस्य संयोगादिरूपं फलमाश्रयत्वं चार्थः धातोश्च पूर्ववदेव संयोगादिरूपफलावच्छिन्नव्यापार एवार्थ इति फलस्य द्वेधा भानं भवति-संयोगानुकूलव्यापारजन्यसंयोगाश्रयो ग्राम इति बोधात्। विपक्षे बाधकमाह-अन्यथेति, यदि कर्माख्यातस्य फलमर्थो न स्यात्तदा 'ग्रामो गम्यते' इत्यत्र ग्रामे यत्संयोगरूपफलाश्रयत्वं प्रतीयते तन्न प्रतीयेत धातूपस्थितफलस्य व्यापारे विशेषणत्वं ग्रामविशेषणत्वासंभवात् "एकत्र विशेषणत्वेनान्वितस्यान्यत्रविशेषणत्वेनान्वयाभावात्" इति न्यायादिति ग्रामविशेषणीभूतसंयोगादिरूपफलोपस्थापकमाख्यातमेवेत्यर्थः। स्वाभिप्रायं प्रकटयति-यादृशेति, ग्रामवृत्तिसंयोगो ह्यत्र व्यापारविशेष्यतयैव भासते धातूपस्थितसंयोगश्च व्यापारविशेषणतया भासते इति व्यापारविशेषणत्वेन धातुपदशक्यस्य संयोगादिरूपफलस्य शाब्दबोधेऽपि व्यापारविशेषणत्वेनैव भानं संभवति न तु व्यापारविशेष्यत्वेनेति व्यापारविशेष्यभूतसंयोगस्या-ख्यातेनोपस्थितिः स्वीकार्येत्यर्थः। संयोगानुकूलव्यापारजन्यसंयोगाश्रयो ग्राम इत्यत्र पूर्वपूर्वस्य विशेषणत्वादुत्तरोत्तरस्य विशेष्यत्वादिति भावः।

ननु व्युत्पत्तिवैचित्र्येणैकत्र विशेषणतया भासमानस्याप्यन्यत्र विशेष्यतया भानं संभवत्येव तथा च धातोः फले व्यापारे च खण्डशः शक्तिं स्वीकरिष्याम इति धातोः फले पृथक् शक्तिस्वीकारात् 'ग्रामं गच्छति' इत्यादौ कर्त्राख्यातसमभिव्याहारस्थले व्यापारविशेषणतया भासमानस्य संयोगादिरूपफलस्य कर्माख्यातस्थले तद्विशेष्यतया=व्यापारविशेष्यतया भानं व्युत्पत्तिवैचित्र्यात्=बोधवैचित्र्यान्नानुपपन्नमिति फलस्य कर्माख्यातार्थत्वाभावेऽपि 'ग्रामो गम्यते' इत्यादौ ग्रामादेर्व्यापारजन्यफलाश्रयत्वरूपकर्मत्वप्रतीत्यनुप-

फलस्य कर्माख्यातस्थले तद्विशेष्यतया भानमिति, तन्न, पृथक् शक्तिस्वीकारे शाब्दसाम्ग्याः प्रतिबन्धकतायां विशिष्टविषय-कोपस्थितिस्थले उपस्थितिद्वयनिवेशे गौरवात्। गम्यादेः संपूर्वयुजिप्रभृतिसमानार्थकताभ्रमवतामिव विशेषदर्शिनामपि 'गमनं न स्पन्दः', इत्यादिवाक्यात् संयोगादौ स्पन्दभेदान्वय-बोधापत्तेर्दर्शिताया दुर्वारत्वाच्च, संयोगादिविशेष्यकवृत्ति-

पत्तिर्नास्त्येव धातुनैवोपस्थितस्य फलस्य व्यापारविशेष्यतया ग्रामविशेषणतया चात्र भानसंभवादित्याशंकते–यत्त्विति। परिहरति–तन्नेति, एवं हि धातुजन्यफलोपस्थितिधातुजन्यव्यापारोपस्थितिद्वयस्य कारणत्वेन प्रतिबन्धकत्वेन च गौरवं स्यादित्याह–पृथगिति। पृथक्शक्तिस्वीकारे=धातौ फले पृथक्शक्तिस्वीकारे। विशिष्टविषयकोपस्थितिः=फलावच्छिन्नव्यापारोपस्थितिः। किं च 'संयोगो न स्पन्दः' इत्यत्र संयोगपदेनोपस्थितसंयोगे स्पन्दभेदान्वयो भवत्येवेति येषां गम्धातावपि संपूर्वकयुज्धातुसमानार्थकताभ्रमो जातस्तेषां दृष्ट्या 'गमनं न स्पन्दः' इत्यत्रापि गमनपदेन विशेष्यतया संयोगोपस्थितेः संभवात् तादृशसंयोगे स्पन्दभेदान्वयानुपपत्त्यभावाद् यथा 'गमनं न स्पन्दः' इति प्रयोगः स्यात्तथा विशेषदर्शिनाम्=उक्तभ्रमरहितानामपि संप्रति धातुना पृथगुपस्थिते संयोगरूपफले स्पन्दभेदान्वयसंभवात् 'गमनं न स्पन्दः' इति प्रयोगापत्तिः स्यादेव, न चैतदिष्टमिति न धातोः फले पृथक्शक्तिस्वीकारपक्षः सम्यगित्याह–गम्यादेरिति। उक्तविशेषदर्शिनां दृष्ट्या 'गमनं न स्पन्दः' इति प्रयोगापत्तौ हेतुमाह–संयोगेति, धातोः फले पृथक् शक्तिस्वीकारे धातुना फलस्य पृथग् विशेष्यतयैवोपस्थितिः स्यादिति 'गमनं न स्पन्दः' इत्यत्र स्पन्दभेदप्रकारकसंयोगविशेष्यकशाब्दबोधकारणीभूतायाः संयोगविशेष्यकशक्तिज्ञानजन्यसंयोगोपस्थितिघटितायाः साम्ग्याः सत्त्वादेव तत्कार्यभूतस्य स्पन्दभेदप्रकारकसंयोगविशेष्यकशाब्दबोधस्य संभवात् 'गमनं न स्पन्दः' इति प्रयोगः स्यादेवेत्यर्थः। ननु 'गमनं न स्पन्दः' इत्यत्र धातूपस्थितव्यापारे तत्तद्विशेषणक=स्पन्दभेदादीनां विशेषणत्वबोधविषय-कतात्पर्यज्ञानस्य धातूपस्थितसंयोगे स्पन्दभेदादीनां विशेषणत्वेनान्वयबोधं प्रति प्रतिबन्धकत्वं कल्पयिष्यामस्तथा चैतादृशप्रतिबन्धकस्य सत्त्वान्नात्र संयोगादौ स्पन्दभेदान्वयो भविष्यति व्यापारे च स्पन्दभेदो बाधित एवेति न 'गमनं न

ज्ञानजन्यतदुपस्थितिघटितायास्तथाविधान्यवबोधसामग्र्या अक्षतत्वात्, तत्तद्धातूपस्थाप्यव्यापारांशे तत्तद्विशेषणकबोध-तात्पर्यज्ञानस्य तादृशान्वयबोधप्रतिबन्धकताकल्पने गौरवादिति।

फलस्य द्विधा भानं चेदनुभवविरुद्धं तदा पुनरनायत्या फलव्यापारयोः खण्डशः शक्तिद्वयमेव धातोः स्वीकरणीयम्, आख्यातस्याश्रयत्वमेव तत्रार्थः। अधिकमग्रे वक्ष्यते।

अथ द्वितीयाया आधेयत्वार्थकत्वे व्यापारे तदन्वयतात्पर्येण सप्तम्या इव द्वितीयाया अपि प्रयोगापत्तिः, 'न हि गृहे पचति' इत्यादिवत् 'गृहं पचति' इति कश्चित्

स्पन्दः' इति प्रयोगापत्तिरित्याशंक्याह—तत्तद्धातूपस्थाप्येति, एवं हि प्रतिबध्यप्रति-बन्धकभावकल्पने गौरवं स्यादित्यर्थः। तादृशान्वयबोधे=स्पन्दभेदप्रकारक-संयोगविशेष्यकशाब्दबोधे।

ननु कर्माख्यातस्य फले शक्तिस्वीकारे हि 'ग्रामो गम्यते' इत्यत्र 'संयोगानुकूलव्यापारजन्यसंयोगाश्रयो ग्रामः' इति बोधापत्त्या फलस्य द्विधा=द्विवारं भानं स्यादेव न चैकस्मिन् बोधे फलस्य द्विधा भानमनुभवसिद्धमि-त्याशंक्याह—फलस्येति। अनायत्त्या=अगत्या। तत्र=कर्मख्यातस्थले। तथा च फलव्यापारयोः धातोः खण्डशक्तिस्वीकारे फलस्य व्यापारविशेषणत्वेनो-पस्थित्यभावात्तादृशसंयोगादिरूपफलस्य पृथगुपस्थितस्य ग्रामे विशेषणत्वे न काप्यनुपपत्तिरिति भावः। अग्रे=धातुप्रकृतिकप्रत्ययार्थनिरूपणस्थले।

ननु यदि द्वितीयाया आधेयत्वमर्थः स्यात्तदा तादृशाऽऽधेयत्वस्य व्यापारेऽन्वयतात्पर्येण यथा 'गृहे पचति' इतिऽप्रयोगो भवति तथा 'गृहं पचति' इत्यपि प्रयोगः स्यात्— आधेयत्वार्थकत्वेन द्वितीयासप्तम्योः समानार्थकत्वापत्तेः, न चैतदिष्टमित्याशंकते- अथेति। 'गृहे पचति' इत्यत्र गृहनिरूपिताधेयतावान् पाक इति बोधोदयात् सप्तम्यर्थाधेयत्वस्य व्यापारेऽन्वयो ज्ञेयः। परिहरति=मैवमिति, यदा हि धात्वर्थतावच्छेकफले एवाधेयत्वस्यान्वयो भवति तदैव तादृशद्वितीयायाः=आधेयत्वार्थकद्वितीयायाः प्रयोगो भवति यथा 'ग्रामं गच्छति' 'तण्डुलं पचति' इति, तस्माद् द्वितीयोपस्थिताधेयत्व- स्य

प्रयुक्तः। मैवम्– धात्वर्थतावच्छेदकफलांशे आधेयत्वान्वये एव तादृशद्वितीयायाः साकांक्षत्वकल्पनाद् व्यापारे तदुपस्थापिताधेयत्वान्वयाऽसंभवात्। सप्तम्यधीनाधेयत्वोपस्थितिसप्तमीसमभिव्याहारज्ञानघटिताया एव सामग्र्यास्तादृशान्वयबोधनियामकत्वात्। द्वितीयासप्तम्योः समानार्थकत्वेऽपि व्युत्पत्तिभेदज्ञापनायैव पृथक्-पृथक् सूत्रेणैव तयोर्विधानात्।

अथाधःसंयोगावच्छिन्नस्पन्दस्य पतधात्वर्थत्वाद् धात्वर्थ-

व्यापारेऽन्वयासम्भवात् 'गृहं पचति' इति प्रयोगापत्तिर्नास्त्येवेत्यर्थः सप्तम्यर्थाधेयत्वस्यैव सप्तम्योपस्थितस्य व्यापारेऽन्वयो भवतीति 'गृहे पचति' इत्येव प्रयोगो भवतीत्याह–सप्तम्यधीनेति। तादृशान्वयबोधनियामकत्वात्= व्यापारविशेष्यकाधेयत्वप्रकारकशाब्दबोधनियामकत्वात्। यद्यपि द्वितीयासप्तम्योरुभयोरप्याधेयत्वमेवार्थस्तथापि व्युत्पत्तिभेदज्ञापनायैव= शाब्दबोधविशेषस्य स्वरूपज्ञापनायैव=शाब्दबोधविशेषरूपज्ञापनायैव तयोः= द्वितीयासप्तम्योः पृथक् पृथक् सूत्रेण="कर्मणि द्वितीया" "सप्तम्यधिकरणे च" इति सूत्राभ्यां विधानं कृतं तथा च यदाऽऽधेयत्वस्य धात्वर्थतावच्छेदके फलेऽन्वयो भवति तदा द्वितीया भवति यथा 'ग्रामं गच्छति' 'तण्डुलं पचति' इति, अत्राधेयत्वस्य धात्वर्थतावच्छेदकीभूतसंयोगविक्लित्त्यादावन्वयात्, यदा चाधेयत्वस्य व्यापारे एवान्वयो भवति तदा सप्तमी भवति यथा 'गृहे पचति' इत्याह– द्वितीयासप्तम्योरिति। एवकारो भिन्नक्रम इति 'पृथक् पृथगेव' इत्यन्वयः। 'ग्रामं गच्छति' इत्यत्र 'ग्रामवृत्तिसंयोगानुकूलव्यापारवान्' इति बोधः, 'तण्डुलं पचति' इत्यत्र 'तण्डुलवृत्तिविक्लित्त्यनुकूलव्यापारवान्' इति बोधः। वृत्तिरेव चाधेयत्वम्।

ननु यद्युक्तरीत्या धात्वर्थतावच्छेदके फले आधेयत्वान्वयतात्पर्ये द्वितीया भवति तदाऽधःसंयोगावच्छिन्नस्पन्द एव पतधात्वर्थोस्तीति तत्राधेयत्वस्य धात्वर्थतावच्छेकीभूतफलेऽधःसंयोगे तात्पर्येण द्वितीयाप्राप्त्या 'भूमिं पतति' इत्यपि प्रयोगः स्यात्, न चैतदिष्टमित्याशंकते–अथेति। ननु द्वितीयोपस्थिताधेयत्वप्रकारकफलविशेष्यकशाब्दबोधं प्रति गम्यादिधातुजन्यफलोपस्थितिघटितायास्तथा गम्यादिसमभिव्याहारघटिताया एव सामग्र्या हेतुत्वमस्तीति

तावच्छेदकीभूतफले आधेयत्वान्वयतात्पर्येण 'भूमिं पतति' इति प्रयोगापत्तिः। न च द्वितीयोपस्थिताधेयत्वप्रकारकफलविशेष्यकान्वयबोधे गम्यादिजन्यफलोपस्थितितत्समभिव्याहारज्ञानघटितसामग्र्येव प्रयोजिका न तु पतधातुजन्यतदुपस्थितिघटिता सामग्रीति नातिप्रसंग इति वाच्यम्, पतधातुनैव यत्र संयोगावच्छिन्नगमनं लक्षणादिनोपस्थापितं तत्र संयोगे द्वितीयार्थाधेयत्वान्वयात्।

अत्राहुः– धातुजन्यशुद्धसंयोगावच्छिन्नस्पन्दोपस्थितेः शाब्दबोधकारणतायामवच्छेदकघटकसंयोगविषयतायाः

'ग्रामं गच्छति' इत्यादिप्रयोगो भवति, द्वितीयोपस्थिताधेयत्वप्रकारकफलविशेष्यकशाब्दबोधं प्रति पतधातुजन्यफलोपस्थितिघटितसामग्र्याः कारणत्वं नास्तीति नातिप्रसंगः= 'भूमिं पतति' इति प्रयोगापत्तिर्नास्त्येव अर्थात्गम्यादिधात्वर्थतावच्छेदकीभूतफले आधेयत्वान्वयतात्पर्ये सत्येव द्वितीया भवति पतधात्वर्थतावच्छेदकीभूतफले आधेयत्वान्वयतात्पर्ये सत्यपि द्वितीया न भवतीति न 'भूमिं पतति' इति प्रयोगापत्तिरित्याशङ्क्याह– न चेति। परिहारमाह पतधातुनेति, एवं नियमे कृते हि यत्र पतधातोः संयोगावच्छिन्नगमनव्यापारे लक्षणा भवति तत्र लक्षणयोपस्थिते धात्वर्थतावच्छेदकीभूतसंयोगरूपफले द्वितीयार्थाधेयत्वान्वयेऽनुपपत्त्यभावात् 'भूमिं पतति' इति प्रयोग इष्ट एव स च न स्यात्, तदानीं पतधात्वर्थतावच्छेदकीभूतफले एवाधेयत्वान्वयतात्पर्यस्य सत्त्वादित्यर्थः।

समाधत्ते– अत्राहुरित्यादिना। धातुजन्यशुद्धसंयोगावच्छिन्नस्पन्दोपस्थितिनिष्ठायां शाब्दबोधकारणतायाम् अवच्छेदकघटकसंयोगविषयतायाम्= धात्वर्थतावच्छेदकीभूतसंयोगनिष्ठविषयतायामधिकरणानवच्छिन्नत्वं विशेषणं देयम्, अर्थाद् धात्वर्थतावच्छेदकीभूतसंयोगो यत्राधिकरणानवच्छिन्नो भवति तत्र तादृशसंयोगे आधेयत्वान्वयतात्पर्ये सति द्वितीया भवति यत्र च धात्वर्थतावच्छेदकीभूतसंयोगोऽधिकरणविशेषावच्छिन्नो भवति तत्र द्वितीया न भवति तथा च 'ग्रामं गच्छति' इत्यत्र धात्वर्थतावच्छेदकीभूतसंयोगः केनाप्यधिकरणेनावच्छिन्नो नास्तीत्येतादृशसंयोगे आधेयत्वान्वयतात्पर्येण द्वितीया

मऽधिकरणानवच्छिन्नत्वं विशेषणं देयं तथा च तादृशविषयता-शालिसंयोगोपस्थित्यादिघटितसाम्ग्रया एव संयोगविशेष्यक-द्वितीयोपस्थाप्याधेयत्वान्वयबोधप्रयोजकत्वोपगमान्नातिप्रसङ्ग।

न चैवमपि फलावच्छिन्नव्यापारबोधकतया पतेः सकर्मत्वव्यवहारापत्तिर्दुर्वारैवेति वाच्यम्, आश्रयानवच्छिन्न-फलावच्छिन्नव्यापारबोधकत्वस्यैव तादृशव्यवहारनियामकत्वात्। उत्तरदेशानवच्छिन्नमेव संयोगः फलं गम्यर्थतावच्छेदकमिति

जाता, पतधात्वर्थस्तु अधःसंयोगावच्छिन्न एव स्पन्द इति तत्र धात्वर्थतावच्छेद-कीभूतसंयोगस्याऽधोदेशरूपाधिकरणेनावच्छिन्नत्वात् तत्र द्वितीया न भवतीति न 'भूमिं पतति' इति प्रयोगापत्तिरित्यर्थः। संयोगस्यावच्छिन्नत्वे संयोगनिष्ठ-शाब्दबोधविषयताया अप्यवच्छिन्नत्वं भवति शाब्दबोधविषयताया अधोदेशा-वच्छिन्नत्वस्य च संयोगे सत्त्वेन तयोः सामानाधिकरण्यादवच्छेद्या-वच्छेदकभावस्य संभवात्, संयोगस्यानवच्छिन्नत्वे संयोगनिष्ठविषयताया अप्यनवच्छिन्नत्वं ज्ञेयम्। तादृशविषयताशालि=अधिकरणानवच्छिन्न-विषयताशालिसंयोगस्य योपस्थितिस्तद्घटितसाम्ग्रया एव द्वितीयार्थाधेयत्वप्रकार-कसंयोगविशेष्यकशाब्दबोधकारणत्वमस्तीति नातिप्रसङ्गः= 'भूमिं पतति' इति प्रयोगापत्तिर्नास्त्येव, पतधात्वर्थतावच्छेदकीभूतसंयोगनिष्ठविषयताया अधोदेशावच्छिन्नत्वादित्याह— तथा चेति।

नन्वेमपि फलावच्छिन्नव्यापारबोधकत्वमेव सकर्मकत्वमित्युक्तमिति पतधातोरप्यऽधःसंयोगावच्छिन्नव्यापारबोधकत्वात्सकर्मकत्वं स्यादेव तथा च पतधात्वर्थनिरूपितकर्मत्वाश्रयबोधकपदाद् द्वितीया स्यादेवेति 'भूमिं पतति' इति प्रयोगापत्तिस्तदवस्थैवेत्याशङ्क्याह— न चेति। परिहारमाह— आश्रयानवच्छिन्नेति, आश्रयविशेषानवच्छिन्नं यत् फलं तादृशफलावच्छिन्न-व्यापारबोधकत्वमेव तादृशव्यवहारस्य=सकर्मकत्वव्यवहारस्य नियामकमस्तीति गम्यादिधात्वर्थतावच्छेदकफलस्य संयोगस्याधिकरणविशेषेणाऽनवच्छिन्न-त्वात्तादृशाधिकरणानवच्छिन्नफलावच्छिन्नव्यापारबोधकत्वाद् गम्यादेः सकर्मकत्वमस्ति, पतधात्वर्थतावच्छेदकीभूतसंयोगरूपफलस्याऽधोदेशा-वच्छिन्नत्वेनाश्रयावच्छिन्नफलावच्छिन्नव्यापारबोधकत्वात् पतधातोः

नानुपपत्तिः, अत एवाग्निसंयोगावच्छिन्नक्रियानुकूलव्यापारस्य जुहोत्यर्थतया धात्वर्थतावच्छेदकसंयोगाश्रयस्याप्यग्नेर्न तत्कर्मता– आश्रयानवच्छिन्नावच्छेदकताश्रयफलवत्त्वविरहात्, संयोगनिष्ठाया धात्वर्थतावच्छेदकताया आश्रयेणाग्निनाऽव-च्छिन्नत्वात्।

सकर्मकत्वापत्तिर्नास्तीत्यर्थः। ननु 'ग्रामं गच्छति' इत्यादौ गम्धात्वर्थता-वच्छेदकीभूतफलरूपसंयोगोप्युत्तरदेशावच्छिन्न एवास्ति– उत्तरदेशसंयोगा-नुकूलव्यापारस्यैव गम्धात्वर्थत्वादित्याशङ्क्याह– उत्तरदेशेति, गम्धात्वर्थता-वच्छेकीभूतः संयोगः शुद्धसंयोग एव नोत्तरदेशावच्छिन्नसंयोग इति न गम्यादेः सकर्मकत्वानुपपत्तिरित्यर्थः। अत एव=आश्रयानवच्छिन्नफलावच्छिन्नव्या-पारबोधकस्यैव धातोः सकर्मकत्वाद् आश्रयानवच्छिन्नफलाश्रयस्यैव कर्मत्वव्य-पदेशाच्च, अग्निरूपाश्रयेणावच्छिन्नो यः संयोगो घृताग्निसंयोगस्ता-दृशसंयोगावच्छिन्ना=तादृशसंयोगानुकूला या घृतनिष्ठा क्षरणरूपा क्रिया तादृशक्रियानुकूलो यो हवनकर्तृनिष्ठो घृतत्यागरूपो व्यापार स एव हुधात्वर्थ इति हुधात्वर्थतावच्छेदकसंयोगाश्रयत्वं यद्यप्यग्नेरस्ति तथाप्यग्नेर्न तत्कर्मता=जुहोतिकर्मता– अग्न्याश्रितस्य धात्वर्थतावच्छेदकीभूतसंयोगस्याश्र-यानवच्छिन्नत्वाभावात्– आश्रयानवच्छिन्ना या संयोगनिष्ठा धात्वर्थतावच्छेकता तादृशावच्छेदकताश्रयीभूतं यत् फलं संयोगस्तद्वत्त्वविरहादग्नेरित्याह– अत एवेत्यादिना। संयोगस्यात्राश्रयानवच्छिन्नत्वाभावे हेतुमाह– संयोगनिष्ठाया इति। न चैवं जुहोतेः सकर्मकत्वानुपपत्तिरितिशङ्क्यम्– जुहोतिधात्वर्थता-वच्छेदकीभूतायाः क्षरणरूपक्रियाया आश्रयविशेषानवच्छिन्नत्वेनैव प्रतीयमानत्वात्, एतादृशक्रियाश्रयत्वेन घृतस्य जुहोतिकर्मत्वमपि नानुपपन्नमिति ज्ञेयम्, तस्मात् 'घृतं जुहोति' इति प्रयोगो भवति 'अग्निं जुहोति' इति प्रयोगस्तु न भवति।

ननु यद्यग्निविशेषितः=अग्न्यवच्छिन्न एव संयोगो हुधात्वर्थता-वच्छेदकस्तदा 'अग्नौ धृतं जुहोति' इत्यत्राग्निसंयोगस्योद्देश्यतावच्छेदकत्वमग्नेरेव प्राप्तम् 'अग्नौ' इति पदेनाग्नेरेव च विधेयत्वमस्ति घृतादीनां प्राप्तत्वादित्युद्देश्यतावच्छेदकस्य विधेयस्य चैक्ये प्राप्ते शाब्दबोधो न जायते

न चाग्निविशेषितसंयोगस्य धात्वर्थतावच्छेदकत्वे 'अग्नौ घृतं जुहोति' इत्यत्रानन्वयप्रसङ्गः– उद्देश्यतावच्छेदकविधेययोरैक्यादिति वाच्यम्, तत्र संयोगनिष्ठायामुद्देश्यतायां वह्नेराधेयतासंसर्गेणावच्छेदकतया सप्तम्यर्थस्याग्निवृत्तित्वस्य च विधेयतया उद्देश्यतावच्छेदकविधेययोरैक्यानवकाशात्। वस्तुतस्तु तत्र वह्नेरनन्येऽपि न क्षतिः– व्युत्पन्नानां तादृशप्रयोग–

इति पूर्वमेव (64 पृ.) प्रतिपादितमित्याशङ्कते–न चेति। अनन्वये हेतुमाह– उद्देश्येति। परिहरति– तत्रेति। तत्र='अग्नौ घृतं जुहोति' इत्यत्र यद्यप्यग्निसंयोगस्यैवोद्देश्यत्वादग्नेरेवाऽऽधेयतासंबन्धेन तादृशसंयोगे वर्तमानस्याऽऽधेयतासंसर्गेणोद्देश्यतावच्छेकत्वं तथापि विधेयत्वमग्नेर्नास्ति किंतु 'अग्नौ' इति सप्तम्यर्थस्य वृत्तित्वस्य=अग्निनिरूपिताधेयत्वस्यैव विधेयत्वमस्तीत्युद्देश्यतावच्छेदकस्य विधेयस्य च भेदान्नात्र शाब्दबोधानुपपत्तिरित्यर्थ। स्वमतमाह– वस्तुतस्त्विति, तत्र='अग्नौ घृतं जुहोति' इत्यत्रैकस्य वह्नेरुद्देश्यतावच्छेदकत्वेन विधेयत्वेन चाऽनन्वयेऽपि क्षतिर्नास्ति– तादृशप्रयोगस्य='अग्नौ घृतं जुहोति' इति प्रयोगस्यैवाऽप्रामाणिकत्वादित्यर्थः। मीमांसकमतेन चात्र "अप्सु जुहोति" "पाणौ जुहोति" "पदे जुहोति" इत्येवं होमाधिकरणानां विविधानां प्रतीयमानत्वाद् हुधात्वर्थतावच्छेदकीभूतसंयोगावच्छेदकत्वं वह्नेर्नास्त्येव–उक्तोदाहरणेषु व्यभिचारादिति अधिकरणसामान्यस्यैव तादृशसंयोगावच्छेदकत्वं स्वीक्रियते इति नाग्नेरुद्देश्यतावच्छेदकत्वं येन शाब्दबोधानुपपत्तिः स्यादिति ज्ञेयम्। नन्वेवम् 'संस्कृते वह्नौ जुहुयात् 'इत्यत्राप्युक्तरीत्याऽग्नेरेवोद्देश्यतावच्छेदकत्वाद् विधेयत्वाच्च शाब्दबोधानुपपत्तिः स्यादित्याशङ्क्याह– संस्कृते इति, यथा 'घटो नीलघटः' इत्यत्र विधेयांशेऽधिकावगाहिशाब्दबोधस्वीकारान्नानुपपत्तिरित्युक्तम् तथात्राप्युद्देश्यतावच्छेदकः (हुधात्वर्थतावच्छेदकसंयोगावच्छेदकः) अग्निरेव विधेयश्च संस्कृतोऽग्निरिति विधेयांशे संस्कृतत्वस्याधिकस्यावगाहनान्नात्र शाब्दबोधानुपपत्तिरित्यर्थः। 'अग्नौ घृतं जुहोति' इत्यादौ घृतादेः कर्मत्वमुपपादयति– घृतादेरिति, आश्रयविशेषेणाऽनवच्छिन्ना या हुधात्वर्थतावछेदकतावती घृतनिष्ठा क्षरणरूपा क्रिया तादृशक्रियारूपफलस्याश्रयत्वाद् घृतादेः कर्मत्वम्। यद्यप्यत्रैषा क्रियापि

स्याऽप्रामाणिकत्वात्। 'संस्कृते वह्नौ जुहुयात्' इत्यादिस्थले च विधेयांशेऽधिकावगाहनान्नास्त्येवानुपपत्तिः। घृतादेश्चाश्रयानवच्छिन्नधात्वर्थतावच्छेदकतावत्क्रियारूपफलाश्रयत्वात् कर्मत्वोपपत्तिः।

यत्तु धात्वर्थतावच्छेदकत्वं धातुवृत्तिग्रहविशेष्यांशे साक्षात्प्रकारत्वं तच्च क्रियायामेव च संयोगांशेऽपीति नाग्नेर्जुहोतिकर्मतापत्तिरिति, तदसत्– 'अजां ग्रामं नयति' इत्यादौ संयोगावच्छिन्नक्रियानुकूलव्यापारादिरूपे धात्वर्थे संयोगादेः साक्षादप्रकारतया तदाश्रयीभूतग्रामादेः कर्मत्वानुपपत्त्या नीवहादेर्द्विकर्मकत्वव्याघातात्।

घृतरूपाश्रयेणावच्छिन्नैव तथापि यथा 'ग्रामं गच्छति' इत्यत्र धात्वर्थतावच्छेदकसंयोगस्योत्तरदेशेनावच्छिन्नत्वेऽपि नोत्तरदेशावच्छिन्नत्वेन प्रतीतिः किं तु शुद्धसंयोगस्यैव धात्वर्थतावच्छेदकत्वं तथाऽत्राप्याश्रयानवच्छिन्नाया एव क्रियाया धात्वर्थतावच्छेदकत्वमिति भावः। क्षरणानुकूलव्यापारस्य धात्वर्थत्वात् क्षरणक्रियाया धात्वर्थतावच्छेदकत्वं प्राप्तम्।

ननु धात्वर्थतावच्छेदकं तदेव भवति यद् धातुविषयकशक्तिज्ञाने विशेष्यतया भासमानधात्वर्थस्य साक्षात्प्रकारः स्यात्तथा च 'अग्नौ घृतं जुहोति' इत्यत्र अग्न्याश्रितः संयोगो न साक्षाद्धात्वर्थतावच्छेदको येन तदाश्रयस्याग्नेः कर्मत्वं स्यात्–अग्न्याश्रितसंयोगस्य धात्वर्थतावच्छेदकीभूतक्रियावच्छेदकत्वात्, साक्षाद्धात्वर्थतावच्छेदकत्वं तु घृताश्रितक्रियाया एवेति घृतस्यैव कर्मत्वमित्याशङ्कते–यत्त्विति । परिहरति–तदसदिति, यदि धात्वर्थे साक्षात्प्रकारत्वमेव धात्वर्थतावच्छेदकत्वं स्यात् तादृशसाक्षाद्धात्वर्थतावच्छेदकीभूतफलाश्रयस्यैव च कर्मत्वं स्यात्तदा 'अजां ग्रामं नयति' इत्यत्र ग्रामवृत्तिसंयोगावच्छिन्ना (जनकीभूता) याऽऽजानिष्ठा क्रिया तादृशक्रियानुकूल-(जनक) व्यापार एव नीधात्वर्थोऽस्तीति नीधात्वर्थे ग्रामवृत्तिसंयोगस्य साक्षात्प्रकारत्वं नास्तीति तादृशसंयोगाश्रयीभूतग्रामस्य कर्मत्वं न स्यादिति नीवहादेर्द्विकर्मत्वं न स्यादित्यर्थः । अत्र ग्रामवृत्तिसंयोगस्य धात्वर्थतावच्छेदकीभूता याऽजानिष्ठा क्रिया तदवच्छेदकत्वम्, तादृशक्रियाया एव

अथात्र ग्रामादेः प्रधानकर्मत्वं नास्त्येवाऽपितु गौणकर्मत्वमेव, अत एव तादृशकर्मत्वमाख्यातेन नाभिधीयते "प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्" इत्यनुशासनादिति 'अजां ग्रामो नीयते' इत्यादिको न प्रयोग इति चेत्?, तर्हि तत्र ग्रामादेरिवात्रापि हुधात्वर्थतावच्छेदकतावच्छेदकफलशालित्वेन धात्वर्थतावच्छेदकत्वम् ।

ननु धात्वर्थे साक्षात्प्रकारत्वमेव धात्वर्थतावच्छेदकत्वं तादृशधात्वर्थतावच्छेदकीभूतफलाश्रयस्यैव च प्रधानकर्मत्वं भवति यथा 'ग्रामं गच्छति' इत्यत्र ग्रामस्य 'अजां ग्रामं नयति' इत्यत्र चाऽजाया इति, तथा चात्र साक्षाद्धात्वर्थतावच्छेदकीभूतफलाश्रयत्वाभावाद् ग्रामस्य प्रधानकर्मत्वं नास्त्येव किं तु गौणकर्मत्वमेव, अत एव=साक्षाद्धात्वर्थतावच्छेदकीभूतफलाश्रयत्वाभावादेव तादृशकर्मत्वम्=गौणकर्मत्वमाख्यातेन नाभिधीयते=आख्यातस्य गौणकर्मत्वे शक्तिर्नास्तीत्याशङ्कते-अथेति। उक्ते प्रमाणमाह-प्रधानेति, अत्र धातूनामिति शेषः। द्विकर्मणां धातूनां द्वयोः कर्मणोर्मध्ये प्रधानकर्मण्याख्येये=बोध्ये लादीनाहुः लादयः (आख्यातादयः) प्रधानकर्मणि शक्ताः=प्रधानकर्मबोधका एवेत्यर्थः। न चैवं ह्यत्र ग्रामपदाद् द्वितीयापि न स्यादित्याशङ्क्यम्-ग्रामस्यापि कर्मत्वं त्वस्त्येव तद् गौणं वा स्यात् प्रधानं वा स्यादित्यन्यदेतत् "कर्मणि द्वितीया" इत्यनेन कर्मत्वमात्रे द्वितीयाभिधानात्। नन्वेवम् 'अजां ग्रामो नीयते' इत्येवमपि प्रयोगः स्यात्-प्रधानकर्मत्वमजाया एवेति तद्वाचकाजाशब्दाद् द्वितीयापत्त्या ग्रामस्य च गौणकर्मत्वात्तद्वाचकग्रामपदाद् द्वितीयाऽनापत्त्येत्याशङ्क्याह-अजामिति, 'अजां ग्रामो नीयते' इति प्रयोगो न भवति-अत्र प्रधानकर्मत्वस्याख्यातेनाभिहितत्वात् प्रधानकर्मवाचकाजापदाद् द्वितीयाया अप्राप्तेः, गौणकर्मत्वस्याख्यातेनाऽनभिहितत्वाद् गौणकर्मवाचकग्रामपदाद् द्वितीयायाः प्राप्तेरित्यर्थः । तथा च 'अजा ग्रामं नीयते' इत्येव प्रयोगो भवति । कि वात्र 'अत एव' इत्येवावतरणं ज्ञेयम् । परिहरति-तर्हीति, यदि तत्र='अजां ग्रामं नयति' इत्यत्र नीधात्वर्थतावच्छेदकतावच्छेदकफलशालित्वेन (नीधात्वर्थतावच्छेदिकायाऽजावृत्तिः क्रिया तदवच्छेदकस्संयोगस्तदाश्रयत्वेन) ग्रामस्य गौणकर्मत्वं तदा तादृशग्रामादेरिवात्र='वह्नौ घृतं जुहोति' इत्यत्रापि वह्नेर्हुधात्वर्थतावच्छेदकतावच्छेदक-

गौणकर्मतापत्त्या 'वह्निं घृतं जुहोति' इति प्रयोगापत्तिर्दुर्वारैवेति। अस्मन्मते चाश्रयानवच्छिन्नसंयोगविषयताशालिधातुजन्योपस्थितिघटितसामग्र्या एव संयोगे द्वितीयार्थान्वयबोधप्रयोजकतया नैतादृशप्रयोगापत्तिरिति।

यत्तु अधःसंयोगावच्छिन्नस्पदो न पतत्यर्थः, अपि तु गुरुत्वजन्यतावच्छेदकजातिविशेषावच्छिन्न एव, अत एव

फलशालित्वेन (हुधात्वर्थतावच्छेदिका या घृतनिष्ठा क्षरणक्रिया तदवच्छेदको यो वह्निसंयोगस्तदाश्रयत्वेन) गौणकर्मतापत्त्या द्वितीयाप्राप्तेः 'वह्निं घृतं जुहोति' इत्येवं प्रयोगापत्तिः स्यादेव, न चैतदिष्टमिति न धात्वर्थतावच्छेदकतावच्छेदकफलशालित्वेन गौणकर्मत्वं युक्तमित्यर्थः । स्वमतेन समाधत्ते-अस्मदिति, मम मते तु संयोगे द्वितीयार्थाऽऽधेयत्वान्वयं प्रति धातुजन्याया आश्रयानवच्छिन्नसंयोगविषयकाया उपस्थितेः कारणत्वमस्ति अत्र च वह्न्याश्रितसंयोगस्य वह्निरूपाश्रयेणाऽवच्छिन्नत्वमेवास्तीति न तत्र द्वितीयार्थाधेयत्वान्वयः संभवतीति न तादृशसंयोगाश्रयीभूतवह्निवाचकवह्निपदाद् द्वितीयापत्तिरिति नैतादृशप्रयोगापत्तिः='वह्निं घृतं जुहोति' इति प्रयोगापत्तिरित्यर्थः।

ननु यद्यधस्संयोगावच्छिन्नस्पन्दः पतत्यर्थः स्यात्तदा फलावच्छिन्नव्यापारबोधकत्वसंभवात् सकर्मकत्वापत्तिशङ्का स्यादपि न चैवमस्ति किं तु गुरुत्वजन्यतावच्छेदिका या पतनत्वजातिस्तादृशजातिविशेषावच्छिन्नस्पन्दः (पतनानुकूलस्पन्दः) एव पतधात्वर्थोस्तीति फलावच्छिन्नव्यापाराऽबोधकत्वान्न सकर्मकत्वापत्तिः—धात्वर्थव्यापारावच्छेदिकाया गुरुत्वजन्यतावच्छेदकजातेः फलरूपत्वाभावादित्याशङ्कते—यत्त्विति । आद्यपतनं गुरुत्वजन्यमेव भवतीति पतनत्वजातिर्गुरुत्वजन्यतावच्छेदिका। परिहरति-तन्नेपि, यद्यऽधस्संयोगावच्छिन्नस्पन्दः पतत्यर्थो न स्यात्तदा फलस्य=अधः संयोगरूपफलस्य धात्वर्थाऽघटकत्वे=धात्वर्थे प्रवेशाभावात् सप्तम्यर्थाधेयत्वस्याऽधःसंयोगेऽन्वयाऽसंभवात् स्पन्दे ए धात्वर्थेऽन्वयः स्वीकर्तव्यः, पतधात्वर्थस्पन्दश्च स पर्णनिष्ठ एव न भूतलनिष्ठो येन सप्तम्यर्थाधेयत्वान्वयिस्पन्दाश्रयत्वात् तादृशभूतलवाचकभूतलपदात् सप्तमी स्यात्-यस्मिन् विभक्त्यर्थान्वयस्तदाश्रयीभूतपदार्थवाचकपदादेव तादृशविभक्तेर्जायमानत्वादिति' भूतले पतति'

फलावच्छिन्नव्यापाराऽबोधकत्वान्न सकर्मकत्वमिति, तन्न-फलस्य धात्वर्थाघटकत्वे स्पन्दे एव सप्तम्यर्थान्वयस्योपगन्तव्यतया पर्णादिनिष्ठस्य तस्य भूतलाद्यऽवृत्तितया 'भूतले पतति' इति प्रयोगानुपपत्तेः। पर्णादिगतस्पन्दस्य परम्परया भूतलादिवृत्ति-त्वमितिइ चेत्? तर्हि 'वृक्षात् पतति' इतिवत् 'वृक्षे पतति' इत्यपि स्यात्। अस्मन्मते चान्यत्र व्यापारे सप्तम्यर्थान्वयेऽप्यऽत्र व्युत्पत्तिवैचित्र्यादधःसंयोगरूपधात्वर्थतावच्छेदके एव तदन्वय इत्यदोषः।

इति प्रयोगो न स्यादित्यर्थः । ननु पर्णगतस्यापि स्पन्दस्य परम्परया=पर्णद्वारा भूतलवृत्तित्वमस्त्येवेति भूतलपदात् सप्तमीप्राप्तेः 'भूतले पतति' इति प्रयोगानुपपत्तिर्नास्तीत्याशङ्कते-पर्णादिगतस्येति । उत्तरमाह-तर्हीति, एवं हि पर्णगतस्य स्पन्दस्य परम्परया वृक्षेऽपि संभवात् वृक्षपदादपि सप्तम्यापत्त्या 'वृक्षे पतति' इत्यपि प्रयोगः स्यात्, न चैतदिष्टं तस्मादधःसंयोगावच्छिन्न एव स्पन्दो पतधात्वर्थो न तु गुरुत्वजन्यतावच्छेदकजातिविशेषावच्छिन्न इत्यर्थः। स्वमतेन समाधत्ते-अस्मदिति, अन्यत्र='गृहे पचति' इत्यादौ सप्तम्यर्थाधेयत्वस्य व्यापारेऽन्वयो भवति तादृशव्यापाराश्रयीभूतवाचकगृहपदात् सप्तमी च भवति-गृहवृत्तिर्व्यापार इति बोधोदयात्, अत्र='भूतले पतति' इत्यादौ पतधातुसमभिव्याहारस्थले तु सप्तम्यर्थाधेयत्वस्य धात्वर्थता-वच्छेदकेऽधःसंयोगरूपफले-एवान्वयो भवतीति तादृशाधस्संयोगरूपफलाश्रयी-भूतभूतलवाचकभूतलपदात् सप्तमी भवति वृक्षपदाच्च सप्तमी न संभवति-वृक्षस्य तादृशाधः संयोगरूपफलाश्रयत्वाभावादिति न 'वृक्षे पतति' इति प्रयोगापत्तिः। किं च भूतलाश्रयीभूताधःसंयोगरूपफलस्याऽधोदेश-रूपाश्रयेणावच्छिन्नत्वाद् भूतलपदाद् द्वितीयाऽऽपत्तिरपि नास्त्येव-आश्रयान-वच्छिन्नफलाश्रयीभूतपदार्थवाचकपदादेव द्वितीयाप्राप्तेरित्यदोषः=अस्मन्मते कोऽपि दोषो नास्ति='भूमिं पतति' वृक्षे पतति' इति प्रयोगयोरापत्तिरपि नास्ति 'भूतले पतति' इति प्रयोगस्यानुपपत्तिरपि नास्तीत्यर्थः। तदन्वयः= सप्तम्यर्थाधेयत्वान्वयः।

मतान्तरमाह-अन्ये त्विति। अत एव=भूमेः कर्मत्वविवक्षायाम्

अन्ये तु भूम्यादेः कर्मत्वविवक्षायाम् 'भूमिं पतति' इति प्रयोग इष्ट एव, अत एव "द्वितीयाश्रित" इत्यादिसूत्रेण 'नरकं पतितः' इत्यादिस्थले द्वितीयासमासविधानमप्युपपद्यते। धात्वर्थतावच्छेदकतावच्छेदकफले द्वितीयार्थान्वये एवाश्रयानवच्छिन्नफलोपस्थितेरपेक्षां 'अग्निं जुहोति' इति वारणाय स्वीक्रियते इति वदन्ति। तदपि न शोभनम्– तथा सति

'भूमिं पतति' इति प्रयोगस्येष्टत्वादेव। यदि पतधातुसमभिव्याहारस्थले कर्मत्वविवक्षायामपि भूम्यादीनां कर्मत्वं न स्यात्तदा 'नरकं पतितो नरकपतितः' इति समासविधानमपि नोपपद्येत नरकस्य कर्मत्वानुपपत्तेः। नन्वेवं द्वितीयार्थान्वयं प्रति धातुजन्याश्रयानवच्छिन्नफलोपस्थितेः कारणत्वमस्तीति नियमव्याघातः स्यात्, अर्थात् धात्वर्थतावच्छेदकीभूतं यदाश्रयानवच्छिन्नं संयोगादिरूपं फलं तदाश्रयीभूतपदार्थवाचकपदादेव द्वितीया भवतीति नियमोऽस्ति 'भूमिं पतति' इत्यत्र च भूम्याश्रितसंयोगस्याऽधोदेशरूपाश्रयेणावच्छिन्नत्वात् तदाश्रयीभूत-भूमिवाचकभूमिपदाद् द्वितीया कथं स्यादित्याशङ्क्याह-धात्वर्थतेति, 'अग्निं जुहोति' इति प्रयोगवारणाय धात्वर्थतावच्छेदकतावच्छेदकस्यैव फलस्याश्रयानवच्छिन्नत्वेनोपस्थितेरपेक्षास्ति न तु धात्वर्थतावच्छेदकस्यापि, अन्यथा हुधात्वर्थतावच्छेदिका या क्रिया तदवच्छेदको योऽग्निनिष्ठः संयोगस्तस्याग्नि-रूपाश्रयेणावच्छिन्नत्वेऽप्यग्निपदाद् द्वितीया स्यादेव, धात्वर्थतावच्छे-दकीभूतक्रियाया आश्रयानवच्छिन्नत्वात्, धात्वर्थतावच्छेदकतावच्छेदकफलस्या-श्रयानवच्छिन्नत्वेनोपस्थितेर्द्वितीयार्थान्वयं प्रति कारणत्वे तु 'अग्निं जुहोति' इति प्रयोगस्यापत्तिर्नास्त्येव, धात्वर्थतावच्छेदकतावच्छेदकस्या-ग्निसंयोगरूपफलस्याग्निरूपाश्रयेणावच्छिन्नस्यैवोपस्थितेर्जायमानत्वात् 'भूमिं पतति' इत्यत्र तु धात्वर्थतावच्छेदकमेवाधस्संयोगरूपफलमधोदेश-रूपाश्रयेणावच्छिन्नमस्तीति न तद् द्वितीयाप्राप्तिप्रतिबन्धकमिति न 'भूमिं पतति' इति प्रयोगे काचिदनुपपत्तिःधात्वर्थतावच्छेदकतावच्छेदकफलस्यै-वाश्रयावच्छिन्नत्वेनोपस्थितस्य द्वितीयाप्रतिबन्धकत्वादित्यर्थः। परिहरति-तदपि नेति। तव मतेन 'भूमिं पतति' 'भूमौ पतति' इत्युभयविधस्यैव प्रयोगस्येष्टत्वाद् भूम्यादिपदोत्तरं यत् कदाचिद् द्वितीया भवति कदाचिच्च सप्तमी भवति तत्र नियामकं न स्यादेव। यदि व्यापारांशे आधेयत्वविवक्षायां सप्तमी

भूम्यादिपदोत्तरं कदाचित् सप्तमी कदाचिद् द्वितीयेत्यत्र नियामकाभावप्रसङ्गात्। व्यापारांशे आधेयत्वविवक्षायां सप्तमी फलांशे तद्विवक्षायां द्वितीयेत्यस्योक्तयुक्त्या फलांश एव सप्तम्यर्थान्वयस्यावश्यं स्वीकरणीयतया वक्तुमशक्यत्वादिति।

'ब्राह्मणाय धनं ददाति' इत्यादौ स्वस्वत्वध्वंसविशिष्ट-परस्वत्वानुकूला इच्छा धात्वर्थः, तादृशस्वत्वरूपधा-त्वर्थतावच्छेदकफले एव द्वितीयार्थान्वयः। उपेक्षायामति-

---

भवतीति 'भूमौ पतति' इति प्रयोगः स्यात् फलांशे आधेयत्वविवक्षायां द्वितीया भवतीति 'भूमिं पतति' इति प्रयोगः स्यादित्येव नियामकमित्युच्यते तदपि न संभवति उक्तयुक्त्या=(२३८ पृ०) फलस्य "धात्वर्थघटकत्वे" इत्याद्युक्तयुक्त्या, अर्थात् पर्णादिनिष्ठव्यापारस्य भूतलाद्यऽवृत्तित्वेन 'भूतले पतति' 'भूमौ पतति' इत्यादिः प्रयोगो न स्यादेवेति तत्रोक्तयुक्त्या सप्तम्यर्थाधेयत्वस्यापि फलांशे एवान्वयः स्वीकर्तव्यो न व्यापारांशे इत्याह-व्यापारांशे इत्यादिना ।

दाधात्वर्थमाह स्वब्राह्मणायेति, स्वस्वत्वध्वंसपूर्वकपरस्वत्वजनिकेच्छा दाधात्वर्थः, तादृश=स्वत्वध्वंसविशिष्टपरस्वत्वमेव धात्वर्थतावच्छेदकं फलं च तत्रैव धनपदोत्तरद्वितीयार्थाधेयत्वस्यान्वयः। धने परस्वत्वं दानेनोत्पन्नं वर्तते इति परस्वत्वे आधेयत्वं जातमिति तादृशाधेयत्वसंबन्धेन परस्वत्वे धनं वर्तते। स्वस्वत्वाभावस्तूपेक्षायामपि भवतीति तद्वारणाय परस्वत्वनिवेश इत्याह-उपेक्षायामिति, उपेक्षायां परस्वत्वोत्पादिकेच्छा न भवतीत्यर्थः। मतान्तरमाह-दानं चेति, स्वस्वत्वध्वंसविशिष्टपरस्वत्वोत्पादिकेच्छा न दाधात्वर्थः किं तु स्वस्वत्वध्वंसविशिष्टपरस्वत्वस्य स्वीकार एव दाधात्वर्थः- इष्टं धनमितः परं मैत्रस्य न ममेति। पूर्वोक्तमते धात्वर्थीभूतेच्छा परस्वत्वजनिकास्ति, अस्मिन्मते च परस्वत्वविषयकैवेच्छेति परस्परं भेद इत्याह- इति मते त्विति। पूर्वमते उत्पद्यमानपरस्वत्वरूपफलाश्रयत्वाद् धनस्य कर्मत्वम्, अस्मिन्मते तदसंभवात् स्वस्वत्वध्वंस एव फलं तदाश्रयत्वादेव धनस्य कर्मत्वमित्याह- तत्रेति।

प्रसङ्गवारणाय परस्वत्वनिवेशः। दानं च न संप्रदानस्वत्वजनकम्, अपि तु तत्स्वीकार एवेति मते तु स्वस्वत्वध्वंसानुकूलपर-स्वत्वप्रकारकेच्छैव ददात्यर्थः, तत्र स्वस्वत्वध्वंसरूपफला-श्रयत्वाद् धनस्य कर्मता।

'धनं प्रतिगृह्णाति' इत्यादौ स्वस्वत्वजनकेच्छारूपस्वी-कारविशेषो धातोरर्थः, स्वस्वत्वरूपफले च द्वितीयार्थाधेयत्वान्वयः।

'तण्डुलं पचति' इत्यादौ रूपपरावृत्तिजनकतेजःसंयोगो धातोरर्थः। रूपादिपरावृत्तिरूपफले च तण्डुलादिवृत्तित्वान्वयः। 'ओदनं पचति' इत्यादावोदनादिपदस्य तन्निष्पादकतण्डुलादौ लक्षणा। अवयविनि पाकानभ्युपगमे च 'तण्डुलं पचति' इत्यादौ तण्डुलादिपदस्य तदारम्भकपरमाणुषु लक्षणा।

प्रतिग्रहधातोरर्थमाह—धनमिति, स्वस्वत्वोत्पादिका येच्छा तादृशेच्छारूपो यः स्वीकारः स एव प्रतिग्रहधातोरर्थः। धनादावुत्पद्यमानं स्वस्वत्वमेव धात्वर्थतावच्छेदकं फलं च तत्रैव द्वितीयार्थाधेयत्वस्यान्वयः, स्वस्वत्वं धनवृत्तिः, तादृशफलाश्रयत्वादेव धनस्य कर्मत्वमिति।

पचधात्वर्थमाह—तण्डुलमिति, रूपपरावृत्तिरत्र विक्लित्तिरेव। सा रूपपरावृत्तिरेव धात्वर्थतावच्छेदकं फलं च, तत्रैव द्वितीयार्थस्य तण्डुलवृत्ति-त्वस्यान्वयः। तादृशफलाश्रयत्वादेव तण्डुलस्य कर्मत्वम्। ननु पाकसंपन्नमेव तण्डुलमोदनपदवाच्यं भवतीत्योदनस्य पाकासंभवात् 'ओदनं पचति' इति प्रयोगस्य का गतिरित्याशङ्क्याह—ओदनमिति। अत्रौदनपदं लक्षणावृत्त्या तण्डुलपदार्थबोधकमेवेत्यर्थः। तन्निष्पादक=ओदननिष्पादक। ननु वैशेषिकैस्त्वव-यवेष्वेव पाक उच्यते इत्यऽवयविनि तण्डुले पाकासंभवात् 'तण्डुलं पचति' इत्यपि प्रयोगः कथं स्यादित्याशङ्क्याह—अवयविनीति। तत्र तण्डुलपदं लक्षणावृत्त्या तण्डुलावयवबोधकमेव विज्ञेयमित्यर्थः। तदारम्भक=तण्डुलारम्भक।

भुजधात्वर्थमाह—ओदनमिति, गलाधोनयन (प्रापण) मेव भुजधात्वर्थः। ननु गलाधोनयनं हि गलाधःसंयोगावच्छिन्नव्यापार एव तत्र धात्वर्थता-

'ओदनं भुङ्क्ते' इत्यादौ गलाधोनयनं धात्वर्थः, तच्च गलाधःसंयोगावच्छिन्नक्रियानुकूलव्यापारः, तादृशक्रियारूपफले एव ओदनवृत्तित्वान्वयः। उक्तयुक्त्या गलाधोदेशस्य न कर्मत्वम्। एवमन्यसकर्मकधातूनामप्यर्थाः स्वयमूह्याः।

'गां दोग्धि पयः' इत्यादौ द्विकर्मकधातुसमभिव्याहृतगवादिपदोत्तरद्वितीयाक्रियाजन्यफलशालित्वादन्यदेव कर्मत्वं बोधयति। कारकाधिकारीयेण "अकथितं च" इति सूत्रेणाऽपादानत्वादिभिन्नधातुप्रतिपाद्यान्वयिधर्मान्तरा-

वच्छेदकसंयोगस्य गलाधोदेशेनावच्छिन्नत्वादाश्रयावच्छिन्नफलावच्छिन्न-व्यापारबोधकत्वात् पतधातोरिव भुजधातोरपि सकर्मकत्वं न स्यादित्याशङ्क्य गलाधोनयनपदार्थं परिष्करोति–तच्चेति, तत्=गलाधोनयनं हि गलाधःसंयोगा-वच्छिन्ना=गलाधःसंयोगजनिका या ग्रासनिष्ठा क्रिया तादृशक्रियानुकूलः (जनकः) भोजनकर्तृनिष्ठो व्यापार एव तथा च धात्वर्थतावच्छेदकता-वच्छेदकस्य संयोगस्य गलाधोदेशरूपाश्रयेणावच्छिन्नत्वेऽपि धात्वर्थतावच्छेदिकाया ग्रासनिष्ठक्रियायास्त्वाऽऽश्रयावच्छिन्नत्वं नास्त्येवेति न सकर्मकत्वानुपपत्तिः। तादृशक्रियारूपफले एवौदनवृत्तित्वस्य द्वितीयार्थस्यान्वयः। तादृशक्रियारूप-फलाश्रयत्वादेवौदनस्य कर्मत्वम्। गलाधोदेशस्य चात्रोक्तयुक्त्या=(234 पृ) "आश्रयानवच्छिन्नावच्छेदकताश्रयफलवत्त्वविरहात्" इत्याद्युक्तयुक्त्या न कर्मत्वम्, अर्थात् गलाधोदेशाश्रितसंयोगस्य गलाधोदेशरूपाश्रयेणावच्छिन्नत्वात् तादृशाश्रयावच्छिन्नसंयोगरूपफलाश्रयत्वादेव गलाधोदेशस्य नात्र कर्मत्वम्-आश्रयविशेषानवच्छिन्नफलाश्रयस्यैव कर्मत्वनियमादिति। उपसंहरति–एवमिति।

द्विकर्मधातूनामर्थं वक्तुमुपक्रमते–गामित्यादिना। अत्र क्षरणानकूल-व्यापारो दुहधात्वर्थो विज्ञेयः। एककर्मकधातुसमभिव्याहारस्थले तु क्रियाजन्यफलशालित्वमेव कर्मत्वं द्वितीयया बोध्यते द्विकर्मकधातुसमभि-व्याहारस्थले 'गां पयो दोग्धि' इत्यादावपि प्रधानकर्मणः क्षीरादेस्तु क्रियाजन्यफलशालित्वरूपमेव कर्मत्वं यथात्र क्षरणरूपफलाश्रयत्वम्, अप्रधानकर्मणो गवादेस्तु "अकथितं च" इति सूत्रप्रतिपाद्यं क्रियाजन्यफल-शालित्वादन्यदेव कर्मत्वं भवतीत्यर्थः। स्वाभिप्रायं प्रकटयति-कारकेति,

वच्छिन्नस्यापि कर्मसंज्ञाऽभिधानात्। 'गवां पयो दोग्धि' इत्यादौ धातुप्रति- पाद्यान्वयिगवादिसम्बन्धो न विवक्षितः, अपि तु क्षीराद्यन्वयी स इति कर्मत्वाऽविवक्षया द्वितीयानवकाशः किंतु शैषिकी षष्ठ्येवेति।

अत्र धातुप्रतिपाद्यत्वं तदर्थतावच्छेदककोटिप्रविष्ट-साधारणम्– 'गां दोग्धि' इत्यादौ धात्वर्थतावच्छेदककोटि-प्रविष्टे एव द्वितीयार्थान्वयात्, तथा हि–क्षरणानुकूलव्यापारो

यथा 'गां दोग्धि पयः' इत्यत्र धातुप्रतिपाद्यं यत् क्षरणं तादृशक्षरणान्वयि (क्षरणजन्य) धर्मान्तरो विभाग एव तादृशविभागावच्छिन्नस्य (आश्रयस्य) गोः कर्मत्वं ज्ञेयम्, स च विभागोऽपादानत्वादिभिन्न एवास्ति विभागस्य क्षरणे तु जनकत्वसंबन्धेनान्वयो ज्ञेयः पयोविभागस्य क्षरणजन्यत्वात् क्षरणजन्यपयोविभागश्च गवि समवायेन ज्ञेयः दोहनेन गोक्षीरयोर्विभागस्य जायमानत्वात्। तादृशविभागाश्रयत्वेन गोः कर्मत्वात्तद्वाचकपदादत्र द्वितीया जाता। 'गवां पयो दोग्धि' इत्यत्र तु धातुप्रतिपाद्यं यत् क्षरणं तादृशक्षरणान्वयिना=विभागेन सह गोः संबन्धो न विवक्षितो येन तादृशविभागाश्रयत्वेन गोः कर्मत्वं स्यात्तद्वाचकगोपदाच्चात्र द्वितीया स्यात्, किं तु सः=धातुप्रतिपाद्यान्वयिधर्मो विभाग क्षीरान्वयी एव–क्षरणजन्यविभागस्य क्षीरे एवान्वयो विवक्षित इति क्षीरस्यैव कर्मत्वं क्षीरवाचकपयः– पदादेव च द्वितीया जाता, तादृशविभागस्य गव्यन्वयाऽविवक्षणेन गोः कर्मत्वाविवक्षया न गोपदाद् द्वितीयापत्तिः किं तु षष्ठ्येव जातेत्याह गवामिति।

धातुप्रतिपाद्यान्वयिधर्मान्तरेति वाक्यार्थं स्पष्टयति–अत्रेति। तदर्थता= धात्वर्थता। यद्यपि धातुप्रतिपाद्यत्वं प्राधान्येव व्यापारस्यैव भवति न धात्वर्थतावच्छेदकस्य क्षरणादेस्तथापि 'गां दोग्धि पयः' इत्यादौ धात्वर्थतावच्छेदके क्षरणे द्वितीयार्थविभागस्यान्वयो भवतीत्यत्र धातुप्रतिपाद्यत्वं यथा धात्वर्थस्य व्यापारस्य तथा धात्वर्थतावच्छेदकस्य क्षरणादेरपि धातुप्रतिपाद्यत्वं ज्ञेयम्, अन्यथा क्षरणस्य धातुप्रतिपाद्यत्वाभावे क्षरणान्वयी यो विभागस्तदाश्रयस्य गोरुक्तरीत्या कर्मत्वं न स्यात्। धात्वर्थतावच्छेदकोटिप्रविष्टसाधारण-धातुप्रतिपाद्यत्वग्रहणस्य फलमाह–गामित्यादिना। धात्वर्थतावच्छेदककोटिप्रविष्टे=

दुहेरर्थः, द्वितीयार्थश्च जनकत्वसम्बन्धेन क्षरणान्वयी विभागः, विभागे चाधेयतया प्रकृत्यर्थगवादेरन्वयः, एवं च धात्वर्थता-वच्छेदकक्षरणरूपफले प्रधानकर्मक्षीराद्यन्वितद्वितीयार्थवृत्त्यऽन्वय इति गोनिष्ठविभागानुकूलपयोनिष्ठक्षरणानुकूल- व्यापारकर्ता मैत्र इति 'गां पयो दोग्धि मैत्रः' इति वाक्याधीनो बोधः।

न च विभागोऽपादानत्वमेवेति तद्विवक्षाया द्वितीयाऽन-वकाशेति वाच्यम्, धातुवृत्तिग्रहविशेष्यान्वयिनो विभागस्यैवा-

---

क्षरणे एव गोपदोत्तरद्वितीयार्थस्य विभागस्य जनकत्वसंबन्धेनान्वयः। उपपादयति–तथा हीति। क्षरणानुकूलव्यापारः=क्षीरनिष्ठं यत् क्षरणं तदनुकूलस्तज्जनको व्यापारः। क्षरणजन्यो यो गोक्षीरयोर्विभागः स जनकत्वसंबन्धेन क्षरणे वर्तते स एव विभागो गोपदोत्तरद्वितीयाविभक्त्यर्थः, तादृशविभागे चाधेयतया प्रकृत्यर्थस्य गोपदार्थस्यान्वयः स विभागो गवि वर्तते इति गौराधेयतासंबन्धेन विभागो वर्तते इत्यर्थः। पयःपदोत्तरद्वितीयार्थं तदन्वयं चाह–एवं चेति, प्रधानकर्म यत् क्षीरं तदन्वितद्वितीयार्थवृत्तेः=वृत्तित्वस्य (आधेयत्वस्य) धात्वर्थतावच्छेदकक्षरणरूपफलेऽन्वयो भवति–क्षरणस्य क्षीरवृत्तित्वात्तादृशक्षरणे आधेयतासंबन्धेन क्षीरं वर्तते इत्यर्थः। एवं हि 'गां पयो दोग्धि मैत्रः' इत्यस्य संपन्नं वाक्यार्थबोधस्वरूपमाह–गोनिष्ठेति, गोनिष्ठो यो गोक्षीरयोर्विभागस्तादृशविभागजनकं यत् पयोनिष्ठं क्षरणं तादृशक्षरणजनकव्यापारकर्ता मैत्र इति वाक्यार्थबोधः।

ननु 'गां पयो दोग्धि' इत्यत्र विभागाश्रयत्वं गोरुक्तं विभागश्चापादानत्वमेव अपादानत्वाश्रयवाचकपदाच्च "अपादाने पञ्चमी" इति सूत्रेण पंचमी भवति न द्वितीयेति 'गाम्' इति कथं स्यादित्याशङ्क्याह–न चेति। परिहारमाह–धात्विति, धातुवृत्तिज्ञाने यो विशेष्यतया भासते व्यापारस्तदन्वयी यो विभागः स एव (व्यापारान्वितविभाग एव) अपादानरूपो भवति यथा 'वृक्षात्पर्णं पतति' इत्यत्र विशेष्यभूतो यः पतनरूपो व्यापारस्तत्रैव जनकत्वसंबन्धेन पंचम्यर्थ भूतविभागस्यान्वयोऽस्तीति तादृशविभागाश्रय-वाचकवृक्षपदात् पंचमी जाता। यस्तु विभागो व्यापारान्वयी न भवति किं तु धात्वर्थतावच्छेदकान्वयी भवति सोऽपादानत्वरूपो न भवति 'गां दोग्धि'

पादानत्वरूपत्वात्, 'वृक्षात् पर्णं पतति' इत्यादौ स्पन्दरूप-विशेष्यांशे एव पञ्चम्यर्थविभागान्वयात्।

वस्तुतस्तु विभागावच्छिन्नक्षरणानुकूलोः व्यापारो दुह्यर्थः, गोपदोत्तरद्वितीयार्थश्च विभागान्वयिनी वृत्तिरेव। न चैवं धात्वर्थतावच्छेदकफलशालित्वरूपं कर्मत्वमेवात्रापि प्रतीयते इति न "अकथितञ्च" इत्यस्य विषय इति वाच्यम्, धात्वर्थता-वच्छेदकत्वस्य धातुवृत्तिग्रहविशेष्यांशे साक्षाद्विशेषणत्वरूपत्वात्। यत्र च क्षरणानुकूलव्यापारमात्रं धात्वर्थतया विवक्षितं

इत्यत्र च विभागो धात्वर्थतावच्छेदकक्षरणान्वय्येव न धात्वर्थभूतव्यापारान्वयीति नाऽपादानत्वरूप इति न गोपदाद् द्वितीयानुपपत्तिरित्यर्थः।

स्वमतमाह–वस्तुतस्त्विति, गोक्षीरयोर्विभागजनकं यत् क्षरणं तादृशक्षरणजनकव्यापारो दुहधात्वर्थ इति विभागोऽपि धात्वर्थकोटिप्रविष्ट एव न गोपदोत्तरद्वितीयार्थः, गोपदोत्तरद्वितीयार्थस्तु विभागान्वयि आधेयत्वमेव, विभागस्य गोवृत्तित्वादाधेयत्वसंबन्धेन विभागे गोर्वर्तमानत्वात्। वाक्यार्थबोधस्तु पूर्ववदेव। ननु धात्वर्थतावच्छेदकफलशालित्वमेव प्रधानकर्मत्वमस्ति 'गां पयो दोग्धि' इत्यत्र गोरपि धात्वर्थतावच्छेदकीभूतं यद् विभागरूपं फलं तादृशविभागाश्रयत्वात् प्रधानकर्मत्वमेव प्राप्तमिति "अकथितं च" इत्यनेनाऽप्रधानकर्मत्वं कथमुच्यते इत्याशङ्क्याह-न चेति। अत्रैवकारो भिन्नकमः–"धात्वर्थतावच्छेदकफलशालित्वरूपमेव कर्मत्वम्" इत्यन्वयः। अत्र='गां पयो दोग्धि' इत्यत्र। परिहारमाह–धात्वर्थतेति, धात्वर्थतावच्छेद-कफलशालित्वं प्रधानकर्मत्वमित्यत्र धातुपदशक्तिज्ञाने विशेष्यतया भासमानव्यापारे यत् साक्षाद्विशेषणं तदेव धात्वर्थतावच्छेदकं ग्राह्यम्, 'गां पयो दोग्धि' इत्यत्र च गवाश्रितविभागस्य च साक्षाद् व्यापारे विशेषणत्वं किं तु व्यापारविशेषणीभूतक्षरणविशेषणत्वमिति न गोः प्रधानकर्मत्वं किं तु पयस एवेत्यर्थः। ननु कदाचित् 'गां दोग्धि पयः' इति प्रयोगो भवति कदाचित् 'गोभ्यो दोग्धि पयः' इति प्रयोगो भवति तत्र किं नियामकमित्याशङ्क्याह-यत्र चेति, तथा चोक्तरीत्या यत्र विभागावच्छिन्नक्षर-णानुकूलव्यापारो दुह्यर्थो विवक्षितो गोपदोत्तरद्वितीयार्थश्च विभागान्वयि आधेयत्वं

क्षरणान्वयिविभागश्च विभक्त्यर्थतया तत्राऽपादानत्वबोधिका पञ्चमी। एतेन कदाचित् 'गां दोग्धि पयः' कदाचिच्च 'गोभ्यो दोग्धि पयः' इत्यत्र नाऽनियमः।

अथ वा 'गोभ्यो दोग्धि पयः' इत्यत्रापि विभागो धात्वर्थतावच्छेदककोटिप्रविष्ट एव 'वृक्षाद्विभजते' इत्यत्रेवाऽवधित्वरूपाऽपादानत्वविवक्षायां पञ्चमी, आश्रयत्वविवक्षायां च द्वितीया। अवधित्वं चाश्रयत्वादन्यदेव

तत्र पंचम्या आधेयत्वबोधकत्वासंभवाद् तद्बोधिका गोपदात् द्वितीयाभवति यथा 'गां पयो दोग्धि' इति। यत्र च क्षरणनुकूलव्यापारमात्रं धात्वर्थः क्षरणान्वयिविभागश्च गोपदोत्तरविभक्त्यर्थो विवक्षितस्तत्र द्वितीयाया विभागारूपापादानत्वबोधकत्वासम्भवत् तद्बोधिका पंचमी भवति यथा 'गोभ्यो दोग्धि पयः' इतीत्यर्थः। उपसंहरन् स्वाभिप्रायं प्रकटयतिएतेनेति, उक्तविवक्षाया एव प्रयोगभेदनियामकत्वादित्यर्थः।

पक्षान्तमाह- अथ वेति, 'गोभ्यो दोग्धि पयः' इत्यत्रापि न क्षरणानुकूलव्यापारमात्रं धात्वर्थः किन्तु विभागावच्छिन्नक्षरणानुकूलव्यापार एव धात्वर्थः, तथा च यथा 'वृक्षाद् विभजते' इत्यत्र वृक्षस्यावधित्वरूपाऽपादानत्वाद् वृक्षपदात् पंचमी भवति तथा गोरवधित्वरूपाऽपादानत्वविवक्षायां गोपदाद् पंचमी भवति 'गोभ्यो दोग्धि पयः' इतिं, गोर्विभागाश्रयत्वविवक्षायां गोपदाद् द्वितीया भवति- 'गां पयो दोग्धि' इति विवेक इत्यर्थः। नन्ववधित्वं हि विभागाश्रयत्वमेवेति विभागाश्रयत्वविवक्षायां गोपदाद् द्वितीया अवधित्वरूपाऽपादानत्वविवक्षायां पंचमीति भेदः कथमुपपद्येतेत्याशङ्क्याश्रयत्वापेक्षयाऽवधित्वस्य विशेषस्वरूपमाह– अवधित्वं चेति, पञ्चम्या बोध्यमानस्वरूपमेवावधित्वमिति यावत्। यथा 'ग्रामं गच्छति चैत्रः' इत्यत्र क्रियाजन्यसंयोगरूपफलस्य ग्रामे इव चैत्रेऽपि सत्त्वेन चैत्रस्य क्रियाजन्यफलशालित्वेऽपि 'चैत्रश्चैत्रं गच्छति' इति प्रयोगो न भवति किं तु 'ग्रामं गच्छति' इत्येव प्रयोगो भवति तत्कस्य हेतोः? परसमवेतक्रियाफलशालित्वस्यैव कर्मत्वनियमात् चैत्रस्य च चैत्रापेक्षया परत्वाऽभावात् तथा पयोनिष्ठक्षरणजन्यविभागरूपफलस्य गवीव पयस्यपि सत्त्वेन

स्वरूपसंबन्धविशेषः। अत्र क्षरणान्वयिनः परसमवेतत्वस्य द्वितीयार्थत्वात् पयोनिष्ठक्षरणस्य पयोनिष्ठविभागजनकत्वेऽपि न 'पयः पयो दोग्धि' इति प्रयोगः। परत्वं च विभागान्वयितावच्छेदकावच्छिन्नापेक्षया बोध्यम्।

'दुह्यते गौः क्षीरम्' इत्यादौ क्षरणजन्यविभागाश्रयत्वरूपगवादिनिष्ठमप्रधानकर्मत्वमाख्यातार्थः– "अप्रधाने दुहादीनाम्" इत्यनुशासनात्। क्षीरवृत्तित्वस्य धात्वर्थ- क्षरणे एवान्वयः, आख्यातार्थक्षरणे च धात्वर्थव्यापारान्वयः, तथा

पयोनिष्ठक्षरणस्य गोनिष्ठविभागजनकत्वमिव पयोनिष्ठविभागजनकत्वमपि यद्यप्यस्ति तथापि 'पयः पयोः दोग्धि' इति प्रयोगो न भवति तत्कस्य हेतोः? परसमवेतक्रियाफलशालित्वस्यैव कर्मत्वनियमात्-अत्र च पयसः पयोपेक्षया परत्वाभावात् पयोनिष्ठक्षरणक्रियाजन्यविभागाश्रयस्य पयस एव प्रधानाप्रधानोभयकर्मत्वासंभवात् कर्तृत्वकर्मत्वोभयासंभवाच्चेत्यर्थः। क्षरणान्वयिनः परसमवेतविभागस्य द्वितीयार्थत्वेन तदेकदेशपरसमवेतत्वस्यापि द्वितीयार्थत्वमेवेति ज्ञेयम्। परत्वमाह– परत्वं चेति, विभागस्यान्वयितावच्छेदकं यत् पयस्त्वादिकं तदवच्छिन्नं यत् पय आदि तदपेक्षया परत्वं ग्राह्यमित्यर्थः।

कर्माख्यातान्तप्रयोगमुदाहरति– दुह्यते इति, अत्रापि विभागावच्छिन्नक्षरणानुकूलो व्यापारो दुह्यर्थः, क्षरणजन्यो यो विभागस्तादृशविभागाश्रयत्वरूपं गोनिष्ठं यदप्रधानकर्मत्वं तत् कर्माख्यातस्यार्थः, गोनिष्ठाप्रधानकर्मत्वमेवात्राख्यातार्थो न क्षीरादिनिष्ठप्रधानकर्मत्वमित्यत्र प्रमाणमाह– अप्रधानेति, द्विकर्मकधातूनां मध्ये दुहादिधातूनामप्रधानकर्मण्येव लादयः (आख्यातप्रत्ययाः) भवन्तीत्यर्थः, क्षीरपदोत्तरद्वितीयाया अर्थस्य वृत्तित्वस्य (आधेयत्वस्य) अन्वयमाहक्षीरवृत्तित्वस्येति, धात्वर्थकोटिप्रविष्टं च यत् क्षरणं तत् क्षीरे वर्तते इति क्षीरवृत्तित्वं धात्वर्थक्षरणेऽन्वेति, उक्ताख्यातार्थकोटिप्रविष्टं च यत् क्षरणं तादृशक्षरणे एव जन्यत्वसंबन्धेन धात्वर्थव्यापारस्यान्वयः= उक्तक्षरणस्य उक्तव्यापारजन्यत्वात्, एवं च 'दुह्यते गौः क्षीरम्' इत्यस्य परिनिष्पन्नं वाक्यार्थबोधस्वरूपमाह तथा चेति, विभागावच्छिन्नम्=विभागजनकं यत् क्षीरनिष्ठं क्षरणं तादृशक्षरणानुकूलः=क्षरणजनको यो व्यापारस्तादृशव्यापारजन्यं यत्

च– विभागावच्छिन्नक्षीरनिष्ठक्षरणानुकूलव्यापारजन्य-क्षरणजन्यविभागाश्रयो गौरित्याकारको बोधः।

अथ वा विभागक्षरणव्यापारेषु विशकलितेषु धातोः शक्तित्रयम्, विशिष्टलाभोऽन्वयबलात्। कर्माख्यातस्थले चाकाङ्क्षावैचित्र्येण तेषां विशेष्यविशेषणभाववैपरीत्यात्, व्यापारजन्यक्षरणजन्यविभागपर्यन्तस्य धातुत एव लाभः, आश्रयत्वमेवाख्यातार्थः, एवं च क्षरणविभागयोर्न द्विधा भानम्। गौणकर्माऽसमभिव्याहृते 'दुह्यन्ते क्षीराणि' इत्यादावात्मनेपदेन केवलेन धातुसहितेन वा विभागावच्छिन्नक्षरणाश्रयत्वरूप-

---

क्षरणं तादृशक्षरणजन्यो यो विभागस्तादृशविभागाश्रयो गौरिति बोधः–कर्माख्यातस्य कर्मवाचकत्वेन कर्मविशेष्यकबोधस्यैव कर्माख्यातस्थले इष्टत्वादित्यर्थः।

उक्तरीत्या–"विभागावच्छिन्नक्षीरनिष्ठक्षरणानुकूलव्यापारजन्यक्षरणजन्य-विभागाश्रयो गौः" इत्यत्र क्षरणविभागयोर्द्वेधा भानेन गौरवमसहमानः पक्षान्तरमाह– अथ वेति, दुहधातोर्विभागे क्षरणव्यापारे च पृथक् पृथगेव=खण्डशः शक्तित्रयम्, विशिष्टलाभः=विभागावच्छिन्नक्षरणानुकूलव्यापार इत्येवं विशेष्यविशेषणभावेन विशिष्टप्रतीतिस्त्वन्वयबलात्=आकाङ्क्षा-बलाज्जायतेयादृश्याऽऽकाङ्क्षा भवति तादृश एव विशेष्यविशेषणभावोऽपि भवतीत्यर्थः। तथा च कर्त्राख्यातस्थले व्यापाराश्रयस्य कर्तुरेव प्राधान्याद् विभागावच्छिन्नक्षरणानुकूलव्यापारवान् इत्येवं विशेष्यविशेषणभावेः 'कर्माख्यात-स्थले 'दुह्यते गौः क्षीरम्' इत्यादौ तेषाम्=विभागक्षरणव्यापाराणां विशेष्यविशेषण-भाववैपरीत्यं भवति यथा व्यापारजन्यक्षरणजन्यविभागाश्रयो गौरिति विभागस्यैव विशेष्यत्वम्, व्यापारजन्यक्षरणजन्यविभागाश्रयो गौरित्यत्र विभागपर्यन्तस्तु धात्वर्थ एव, आख्यातार्थ आश्रयत्वमात्रमेव। विभागक्षरणव्यापारेषु विशकलित-शक्तिस्वीकारस्य फलमाह– एवं चेति। यत्र च 'दुह्यन्ते क्षीराणि' इत्यादौ प्रधानकर्मवाचकक्षीरादिपदमेव भवति अप्रधानकर्मवाचकगवादिपदं च न भवति तत्र केवलेन धातुसहितेन वात्मनेपदेन क्षीरनिष्ठं यद् विभागावच्छिन्न (जनक) क्षरणाश्रयत्वरूपं प्रधानकर्मत्वं तस्य बोधनेऽपि "सकृत्प्रयुक्तः

प्रधानकर्मत्वस्य बोधनेप्येकदोभयविधकर्मत्वबोधनस्याऽव्युत्पन्नतया 'दुह्यन्ते क्षीराणि गौः' इत्यादयो न प्रयोगाः।

'पौरवं गां याचते विप्रः' इत्यादौ स्वोद्देश्यकदानेच्छा याचत्यर्थः, प्रधानकर्मगवान्वितद्वितीयार्थो विषयित्वं धात्वर्थतावच्छेदकदानेऽन्वेति। सविषयकज्ञानादिरूपविषयोपहितेच्छाबोधकधातुस्थले इच्छाविषयविषयत्वमेव प्रधानकर्मत्वम्, अत एव 'घटो जिज्ञास्यते' इत्यादौ घटादेः सन्नन्तकर्मता।

अथैवं यद्वस्तुविषयकं दानमप्रसिद्धं तद्वस्तुरूपकर्म-

शब्दः सकृदर्थं गमयति" इतिन्यायात् प्रधानाऽप्रधानोभयविधकर्मत्वस्यैकदा बोधनाऽसंभवात् प्रधानकर्मवाचकपदसमभिव्याहारेऽप्रधानकर्मवाचकगवादिपदं न प्रयुज्यत इति 'दुह्यन्ते क्षीराणि गौः' इति प्रयोगो न भवतीत्याह–गौणकर्मेति।

याचधात्वर्थमाह पौरवमिति, पौरवो मदुद्देश्यकं दानं करोत्वितीच्छेव याचत्यर्थः, तत्र प्रधानकर्मभूतगोपदार्थस्य दाननिष्ठविषयितानिरूपकत्वात् तादृशविषयित्वस्य द्वितीयार्थस्य निरूपकत्वसंबन्धेन गवान्वितस्याऽऽश्रयत्वसंबन्धेन धात्वर्थतावच्छेदके=याचधात्वर्थीभूतेच्छावच्छेदके दानेऽन्वयः–दानस्य प्रधानकर्मभूतगोपदार्थविषयकत्वात्। नन्विच्छाबोधकधात्वर्थस्थले साक्षादिच्छाविषयस्यैव प्रधानकर्मत्वं युक्तं नत्विच्छावच्छेदकदानादिविषयस्येत्याशङ्क्याह–सविषयकेति, सविषयको यो ज्ञानादिरूपो विषयस्तदुपहितेच्छाबोधकधातुस्थले=तद्विषयकेच्छाबोधकधातुस्थले इच्छाविषयविषयत्वमेव प्रधानकर्मत्वं भवति अत एव 'घटो जिज्ञास्यते' इत्यत्र सन्नन्तार्थेच्छाया विषयो यज्ज्ञानं तादृशज्ञानविषयत्वाद् घटस्य प्रधानं सन्नन्तकर्मत्वं तथा 'पौरवं गां याचते' इत्यत्रापि धात्वर्थीभूतेच्छाया विषयो यद् दानं तादृशदानविषयत्वाद् गोः प्रधानकर्मत्वमित्यर्थः। अत्र च स्वोद्देश्यकगोविषयकदानेच्छावान् विप्र इति बोधः।

ननु दानयोग्यगवादिपदार्थविषयकं दानं संभवतीति तादृशदानविषयेच्छापि याचत्यर्थः संभवति परकीयगवादिपदार्थविषयकं तु दानमेव न संभवतीति तद्वस्तुरूपकर्मसमभिव्याहृतधातुघटितवचसः='परकीयां गां याचते'

समभिव्याहृतधातुघटितवचसः का गतिः? इति चेत्?, या गतिः 'गगनं दिदृक्षते' इत्यादिकस्य भ्रान्तपुरुषीयगगनादि-प्रकारकदर्शनेच्छाबोधकवाक्यस्य। गगनविषयकत्वप्रकारक-दर्शनेच्छाबोधस्तत्रेति चेत्? इहापि गोविषयिताप्रकारतानिरूपित-स्वत्वेच्छानिष्ठविषयताशालीच्छाबोधः, तद्वाक्यस्य विशेषा-दर्शिमात्रविषयता च समा। विवेचनीयं चेदमग्रे। पौरवपदोत्तर-द्वितीयायास्तु वृत्तिरेवार्थः, तस्याश्च दानेऽन्वयः, पौरवस्य तादृशदानाश्रयत्वमेवाऽप्रधानकर्मत्वम्।

इत्यादिवचनस्य का गतिः=कथं वाक्यार्थबोधःस्यात्- परकीयवस्तुविषयक-दानेच्छाया असंभवादित्याशङ्कते- अथेति। उत्तरमाह- या गतिरिति। गगनादिप्रकारक=गगनादिविषयक। यथा गगनदर्शनासंभवेन तदिच्छाया असंभवात् 'गगनं दिदृक्षते' इत्यपार्थक एव प्रयोगस्तथा 'परकीयां गां याचते'इत्यप्यऽपार्थक एव प्रयोग इत्यर्थः। ननु 'गगनं दिदृक्षते' इत्यत्र न दर्शनप्रकारत्वं गगनस्य येनासंभवः स्यात् किंतु गगनविषयकत्वस्यैव प्रकारत्वं गगनविषयकत्वं तु गगनविषयकानुमित्यादौ प्रसिद्धमेवेत्याशङ्कते- गगनेति। उत्तरमाह— इहापीति, इह='परकीयां गां याचते' इत्यत्रापि च परकीयगोर्दानेच्छाविषयत्वं येनासंभवः स्यात् किं तु गोविषयताप्रकारता-निरूपितस्वत्वेच्छानिष्ठविषयताशालीच्छाबोधो जायते तत्र स्वत्वेच्छानिष्ठ-विषयताशालीच्छा ह्युक्तरीत्या याचत्यर्थ एव यतः- 'गवि मदीयं स्वत्वमुत्पद्येत' इत्याकारा याचकाभीष्टा या पौरवेच्छा तादृशेच्छानिष्ठविषयताशालिनी= तादृशेच्छानिष्ठविषयितानिरूपितविषयतावती (तादृशेच्छाविषया) या इच्छा सा स्वोद्देश्यकदानेच्छैवेति तस्या धात्वर्थत्वं विज्ञेयम्, गोविषयिता-प्रकारतानिरूपितेत्यस्य हि गोविषयकत्वप्रकारकेत्यर्थः उक्तरीत्या गोनिष्ठा या द्वितीयार्थभूता विषयिता तादृशविषयितानिष्ठप्रकारतानिरूपिता या स्वत्वेच्छानिष्ठा विषयिता तन्निरूपितविषयतावतीच्छेति लब्धम् तथा च परकीयगोविषयकत्वमपि तद्विषयकप्रत्यक्षादौ प्रसिद्धमेवेति तस्य याचत्यर्थ-भूतेच्छायां प्रकारत्वं संभवतीति न काचिदनुपपत्तिः, गोविषयकत्वप्रकारक-स्वोद्देश्यकदानेच्छाश्रयो विप्र इति निर्गलितः शाब्दबोधस्याकारः। अद्धा यथा 'गगनं दिदृक्षते' इति वाक्यं विशेषदर्शी विद्वान्न प्रयुङ्क्ते तथा 'परकीयां गां

नचैवमिच्छाविशेषरूपदानस्याश्रयत्वं कर्तृत्वमेवेति वाच्यम्, धातुजन्यप्रतिपत्तिविशेष्यीभूतदानाश्रयत्वस्यैव तत्कर्तृत्वरूपत्वात्। अत्र च दानस्य तादृशप्रतिपत्ताविच्छारूपधात्वर्थविशेषणत्वात्। 'चैत्रेण पौरवो गां याच्यते' इत्यादावप्युक्तक्रमेण चैत्रवृत्तीच्छाविषयगोकर्मकदानाश्रय इत्यन्वयबोधो बोध्यः।

यद्यपि निरुक्तयाच्ञा भिक्षैवेति "दुहियाचिरुधिप्रच्छिभिक्षिचिञाम्" इत्यत्रार्थपरभिक्ष्युपादानेनैव

याचते' इत्यादिवाक्यमपि विशेषदर्शी न प्रयुङ्क्ते इति विशेषाऽदर्शिविषयता समा। विवेचनीयमिति- एतस्य प्रथमखण्डस्यावसाने एतद्विवेचनं द्रष्टव्यम्। 'पौरवं गां याचते' इत्यत्र पौरवपदोत्तरद्वितीयार्थमाह पौरवेति, वृत्तिः=आधेयत्वम्। तस्याः=वृत्तेः। तथा च गोविषयकं पौरववृत्ति यद् दानं तादृशदानविषयकेच्छावान् विप्र इति बोधः। गोकर्मकपौरववृत्तिदानाश्रयत्वादेव पौरवस्याऽप्रधानकर्मत्वमिति।

ननु पौरवस्योक्तेच्छाविशेषरूपदानाश्रयत्वाद् दानकर्तृत्वमेव स्यान्न तु दानकर्मत्वमित्याशङ्क्याह न चेति, पूर्वोक्तरीत्या याचकाभीष्टेच्छाश्रयत्वं पौरवस्यास्त्येव तादृशेच्छैव च दानपदार्थ इच्छाश्रयस्य च 'इच्छति' इत्यत्र कर्तृत्वं प्रसिद्धमेव। परिहारमाह धातुजन्येति, धातुजन्यज्ञाने (शाब्दबोधे) विशेष्यतया भासमानं यद् दानं तादृशदानाश्रयत्वमेव दनकर्तृत्वं भवति यथा 'विप्राय गां ददाति' इत्यत्र दाधातुजन्यज्ञाने उक्तेच्छारूपं दानं विशेष्यतया भासते इति तादृशदानाश्रयस्यैव दानकर्तृत्वं भवति, अत्र ='पौरवं गां याचते' इत्यत्र तु तादृशप्रतिपत्तौ=याचधातुजन्यज्ञाने (शाब्दबोधे) विशेष्यतया भासमानेच्छारूपधात्वर्थे दानं विशेषणमेवेति तादृशविशेषणीभूतेच्छारूपदानाश्रयस्य पौरवस्य न दानकर्तृत्वं संभवतीतिदानकर्मत्वमेवेत्यर्थः। कर्माख्यातमुदाहरति- चैत्रेणेति, उक्तक्रमेण= 'दुह्यते गौः क्षीरम्' इत्यत्रोक्तकर्मविशेष्यकबोध इवात्रापि चैत्रवृत्तीच्छाविषया या गौस्तादृशगोकर्मकदानस्याश्रयः पौरव इत्यन्वयबोधो विज्ञेय इत्यर्थः।

यद्यपीति- दुह्यादीनामपादानादिविशेषैरविवक्षितस्य गवादेरकथितकर्मसंज्ञाविधानार्थं यः "दुहियाचि" इत्यादिसंग्रहः कृतस्तत्र दुह्यादीनामर्थपरत्वेनैव तत्पर्यायभूतधात्वन्तरसंग्रहस्योपपन्नत्वाद् याचधातोर्भिक्षार्थकत्वेन भिक्षधातूपा-

चरितार्थतया याचेरुपादानमनर्थकम्, तथापि 'याचमानः शिवं सुरान्' इत्यादौ याचतेर्न निरुक्तभिक्षार्थकतेति तदुपादानम्। तत्र हि व्यापारजन्यत्वप्रकारकेच्छा धात्वर्थः, इच्छायां प्रधानकर्मकल्याणान्वितद्वितीयार्थविषयिताया अन्वयः, व्यापारे च सुरान्वितवृत्तित्वस्य द्वितीयार्थस्यान्वयः, तथा च सुरवृत्तिव्यापारजन्यत्वप्रकारककल्याणेच्छाश्रय इत्यन्वयबोधः।

'गां व्रजं रुणद्धि' इत्यादौ देशान्तरसंचारविरोधिव्यापारो धात्वर्थः, संचारविरोधित्वं संचारानुत्पादप्रयोजकत्वम्, अनुत्पादे प्रधानकर्मगोवृत्तित्वान्वयः, देशविशेषणे भेदे च 'व्रजम्' इति

दानेनैव चरितार्थतया=याचधातोर्ग्रहणसंभवेन यद्यपि याचेः पृथगुपादानमनर्थकमेव तथापि 'याचमानः शिवं (कल्याणम्) सुरान्' इत्यत्र याचधातोर्भिक्षार्थकत्वाभावात् पृथगुपादानमस्ति, 'याचमानः शिवं सुरान्' इत्यत्र याच्यमानकल्याणस्यान्नादिवद्धस्तेन सुरैर्दातुमशक्यत्वान्न याचेर्भिक्षार्थकत्वमित्यर्थः। अत्र शिवपदं कल्याणपरं तदेव प्रधानं कर्म सुराश्चाऽप्रधानं कर्म। अत्रत्य याचधात्वर्थमाह-तत्रेति, याचमानपुरुषीयकल्याणविधानानुकूलो यः सुरवृत्तिव्यापारस्तादृशव्यापारजन्यत्वं कल्याणेऽस्तीति सुरवृत्तिव्यापारजन्यकल्याणविषयकेच्छैवात्र धात्वर्थ इति धात्वर्थीभूतेच्छा व्यापारजन्यत्वप्रकारिका ज्ञेया, इच्छा कल्याणविषयास्तीति निरूपितत्वसंबन्धेन कल्याणान्विताया: कल्याणवाचकशिवपदोत्तरद्वितीयार्थभूताया विषयिताया इच्छायामन्वयः, कल्याणजनकव्यापारस्य सुरवृत्तित्वात् सुरपदोत्तरद्वितीयार्थस्य वृत्तित्वस्य (आधेयत्वस्य) व्यापारेऽन्वय इत्यर्थः। वाक्यार्थबोधस्वरूपमाह तथा चेति। आश्रयत्वं याचमानपुरुषस्य ज्ञेयम्।

रुधधात्वर्थमाह गामित्यादिना, देशान्तरसंचाराऽनुत्पत्तिप्रयोजकत्वमेव देशान्तरसंचारविरोधित्वम्। देशान्तरसंचारानुत्पादो गव्येवेति गोपदोत्तरद्वितीयार्थस्य गोवृत्तित्वस्यानुत्पादेऽन्वयः, व्रतादितद्देशभिन्न एव देशो देशान्तरमिति देशान्तरेत्यत्र भेदो देशविशेषणं तादृशभेदे च व्रजपदोत्तरद्वितीयार्थस्य प्रतियोगित्वस्यान्वय इति व्रजप्रतियोगिकभेदविशिष्टदेशस्य यो गोवृत्तिः संचारानुत्पादस्तदनुकूलव्यापारवान् गोप इति बोध इत्यर्थः। कर्माख्यातमुदाहरति-रुध्यते इति।

द्वितीयान्तार्थव्रजप्रतियोगित्वान्वयः। 'रुध्यते गां व्रजः' इत्यादावन्वयबोधः स्वयमूहनीयः।

'गुरुं धर्मं पृच्छति' इत्यादौ जिज्ञासाबोधकव्यापारो धात्वर्थः, बोधे गुरुवृत्तित्वस्य जिज्ञासायां धर्मविषयकत्वस्यान्वयः। 'शिष्यं धर्मं ब्रूते' इत्यत्र ज्ञानानुकूलशब्दप्रयोगो धात्वर्थः, ज्ञाने धर्मविषयकत्वस्य शिष्यवृत्तित्वस्य चान्वय इति।

स्वयमिति-तथा च गोपवृत्तिव्यापारप्रयोज्यो यो गोवृत्तिदेशान्तरसंचारानुत्पादस्तदेकदेशदेशान्तरनिष्ठो यो भेदस्तत्प्रतियोगित्वाश्रयो व्रज इत्यन्वयबोधः, आश्रयत्वं कर्माख्यातार्थः, कर्माख्यातप्रयोगस्थले प्रथमान्तपदार्थे फलाश्रयत्वं भवति तच्चात्राप्यस्त्येव-व्रजप्रतियोगिकभेदाश्रयीभूतदेशान्तरसंचारविरोधिव्यापारस्यात्र धात्वर्थत्वेन देशान्तरनिष्ठभेदप्रतियोगित्वस्य धात्वर्थतावच्छेदकत्वेन फलत्वात् तादृशफलीभूतप्रतियोगित्वाश्रयत्वस्य व्रजे स्वीकारादिति विज्ञेयम्। किं च "अप्रधाने दुहादीनां लादीनाहुर्द्विकर्मणाम्" इति नियमेन 'रुध्यते गां व्रजः' इत्यत्र लकारस्याऽप्रधानकर्मबोधकत्वादप्रधानकर्मभूतव्रजवाचकव्रजपदादेव प्रथमा जाता न तु प्रधानकर्मवाचकगोपदात् प्रधानकर्मत्वस्यानुक्तत्वादित्यनुसंधेयम्।

पृच्छत्यर्थमाह-गुरुमिति, येन प्रश्नरूपेण व्यापारेण गुरोः स्वकीयजिज्ञासाया बोधः स्यात्तादृशो जिज्ञासाबोधको व्यापारः पृच्छत्यर्थः। जिज्ञासाविषयकबोधो गुरौ जायते इति गुरुपदोत्तरद्वितीयार्थस्य गुरुवृत्तित्वस्य बोधेऽन्वयः, जिज्ञासा चात्र धर्मविषयास्तीति जिज्ञासायां धर्मविषयकत्वस्यान्वयः, तथा च धर्मविषयकजिज्ञासाविषयकगुरुवृत्तिबोधोत्पत्त्यनुकूलव्यापारवान् शिष्य इति वाक्यार्थः। ब्रूधात्वर्थमाह-शिष्यमिति, येन शब्दप्रयोगेण शिष्यस्य धर्मविषयकज्ञानं जायेत तादृशशब्दप्रयोगो ब्रूधात्वर्थ। शिष्ये एव धर्मविषयकमेव च ज्ञानमुत्पादनीयमिति ज्ञाने धर्मपदोत्तरद्वितीयार्थस्य विषयिताया:= धर्मविषयकत्वस्यान्वयस्तथा शिष्यपदोत्तरद्वितीयार्थस्य शिष्यवृत्तित्वस्यान्वयः, तथा च धर्मविषयकशिष्यवृत्तिज्ञानोत्पत्तिप्रयोजकशब्दप्रयोगरूपव्यापारवान् गुरुरित्यन्वबोध इत्यर्थः। एतन्मतं दूषयति-तन्नेत्यादिना, तथा सति=यदि जिज्ञासाबोधव्यापार एव पृच्छत्यर्थस्तदा यत्र जिज्ञासाविषयज्ञानं चैत्रनामकगुरोः

तन्न चारुतरम्–तथा सति यत्र जिज्ञासाविषयकचैत्रज्ञानेच्छया प्रश्नस्तादृशशब्दाच्च सामग्रीबलेन मैत्रस्यापि पृच्छकजिज्ञासाज्ञानं तत्र 'मैत्रं पृच्छति' इति प्रयोगस्य एवं यत्र चैत्रज्ञानेच्छया ब्रूते दैववशाच्च मैत्रस्यापि ज्ञानं तत्र 'मैत्रं ब्रूते' इति प्रयोगस्य चापत्तेः। साक्षाद्धात्वर्थविशेषणज्ञानरूपफलाश्रयतया तत्र गुर्वादीनां प्रधानकर्मतया "अप्रधाने दुहादीनाम्" इत्यनुशासन-विरोधेन, 'पृच्छयते गुरुर्धर्मम्' 'शिष्यःउच्यते धर्मम्' इत्यादिस्थले च लकारादिना तत्कर्मत्वाभिधानानुपपत्तेश्च।

परं तु जिज्ञासाज्ञानोद्देश्यकप्रवृत्त्यधीनशब्दः पृच्छतेरर्थः,

स्यादितीच्छया प्रश्नः कृतस्तादृशप्रश्नेन शक्तिज्ञानादिसामग्रीबलेन चैत्रसमीपस्थमैत्रस्यापि धर्मादिविषयकपृच्छकजिज्ञासाज्ञानं जातं तत्र मैत्रसमवेतजिज्ञासाबोधजनकव्यापारस्यापि जातत्वाद् 'चैत्रं धर्मं पृच्छति' इतिवत् 'मैत्रं धर्मं पृच्छति' इत्यपि प्रयोगः स्यादेवेति न जिज्ञासाबोधकव्यापारो पृच्छत्यर्थो युक्त इत्यर्थः। एवं यदि ज्ञानानुकूलशब्दप्रयोगो ब्रूधात्वर्थस्तदा यत्र गुरुश्चैत्रस्य ज्ञानं जायेतेतीच्छया ब्रूतेऽथ च तत्रस्थमैत्रस्यापि गुरुवाक्येन ज्ञानं जातं तत्र मैत्रसमवेतज्ञानजनकशब्दप्रयोगरूपव्यापारस्यापि जातत्वात् 'चैत्रं ब्रूते' इतिवत् 'मैत्रं ब्रूते' इत्यपि प्रयोगः स्यादेव न चैतदिष्टमिति न ज्ञानानुकूलशब्दप्रयोगो ब्रूधात्वर्थो युक्त इत्यर्थः। उक्तमतेन कर्माख्यातस्थले दोषमाह–साक्षादिति, तत्र='पृच्छ्यते गुरुर्धर्मम्' इत्यत्र बोधे गुरुवृत्तित्वमस्ति स च बोधः साक्षाद्धात्वर्थविशेषणं चास्ति साक्षाद्धात्वर्थविशेषणाश्रयस्य च प्रधानकर्मत्वमेव भवतीति साक्षाद्धात्वर्थविशेषणीभूतज्ञान (बोध) रूपफलाश्रयतया गुरोः प्रधानकर्मत्वं प्राप्तं तत्र "अप्रधाने दुहादीनाम्" =दुहादीनामप्रधानकर्मणि लादयो भवन्तीत्यनुशासनविरोधेन लादिना गुरोः तत्कर्मत्वाभिधानानुपपत्तेः= प्रधानकर्मत्वाभिधानं नोपपद्यते, 'शिष्य उच्यते धर्मम्' इत्यादौ च शिष्यस्य साक्षाद्धात्वर्थविशेषणीभूतज्ञानरूपफलाश्रयतया प्रधानकर्मत्वमुक्तरीत्या प्राप्तं तत्रापि ''अप्रधाने दुहादीनाम्'' इत्यनुशासनविरोधेन लादिना प्रधानकर्मत्वाभिधानं नोपपद्यते इति नोक्तपृच्छत्यादिधात्वर्थनिरूपणं युक्तमित्यर्थः।

स्वमतेन पृच्छत्यर्थमाह–परं त्वित्यादिना, तुपदं पूर्वपक्षव्यावर्तकमिति

ज्ञाने गुरुवृत्तित्वस्यान्वयः, शब्दे च धर्मविषयकत्वस्यान्वयः, शब्दस्य च विषयता व्यापारानुबन्धिनी, ज्ञानस्य परम्परया शब्दरूपधात्वर्थविशेषणत्वात् तदाश्रयीभूतगुरोर्गौणकर्मता, धर्मस्य च धात्वर्थविषयतया प्रधानकर्मता। ब्रूञश्च ज्ञानोद्देश्यकप्रवृत्त्यधीनशब्दोर्थः, ज्ञाने शिष्यवृत्तित्वस्य शब्दे च धर्मविषयकत्वस्यान्वयः।

"परं तु" इत्यस्योक्तेन "तन्न शोभनम्" इत्यनेनान्वयः। जिज्ञासेति-जिज्ञासाविषयकज्ञानोद्देश्यका या प्रवृत्तिस्तादृशप्रवृत्त्यधीनशब्दः प्रश्नादिरूपः पृच्छत्यर्थः। तथा च यं प्रति प्रवृत्तिर्भविष्यति तस्यैव चैत्रादिनामक-गुरोरप्रधानकर्मत्वं भविष्यति न तु तत्रस्थमैत्रादेरपीति मदीयजिज्ञासायाश्चैत्रस्य ज्ञानं जायतामितीच्छया प्रश्ने कृते दैववशात् तत्रस्थमैत्रस्य पृच्छकजिज्ञासाज्ञाने जातेऽपि न 'मैत्रं पृच्छति' इति प्रयोगापत्तिः-मैत्रं प्रति जिज्ञासाज्ञानोद्देश्य-कप्रवृत्तेरभावात्। 'गुरुं धर्मं पृच्छति' इत्यत्र जिज्ञासाविषयीभूतज्ञानं गुराविष्टमिति गुरुपदोत्तरद्वितीयार्थस्य वृत्तित्वस्य ज्ञानेऽन्वयः। शब्दस्यैव धात्वर्थत्वात् धर्मपदोत्तरद्वितीयार्थस्य विषयिताया:=धर्मविषयकत्वस्य धात्वर्थीभूतशब्देऽन्वयः। ज्ञानादिवच्छब्दस्य सविषयकपदार्थत्वाभावाद् धर्मे या शब्दविषयता सा शब्दानुकूलव्यापारमूलिका ज्ञेया कृतिरूपव्यापारस्य सविषयकपदार्थत्वात् शब्दोच्चारणानुकूलकृतेः शब्दद्वाराधर्मविषयकत्वसंभवादित्याह-शब्दस्येति । अत्र गुरौ जायमानस्य जिज्ञासाज्ञानस्य शब्दरूपधात्वर्थविशेषणीभूतप्रवृत्ति-विशेषणीभूतोद्देश्यकत्वे विशेषणत्वमस्ति न तु साक्षाद्धात्वर्थीभूतशब्दे इति तादृशज्ञानाश्रयीभूतगुरोरप्रधानकर्मतेत्याह-ज्ञानस्येति। धात्वर्थीभूतशब्दस्य धर्मविषयकत्वेन धर्मस्य साक्षाच्छब्दविषयत्वाद् द्वितीयार्थद्वारा धर्मस्यसाक्षाद्धात्वर्थे शब्दे एवान्वयाद्धर्मस्य प्रधानकर्मतेत्याह-धर्मस्येति । ब्रूधात्वर्थमाह-ब्रूञश्चेति। 'शिष्यं धर्मं बूते' इत्यत्रापि ज्ञानोद्देश्यकप्रवृत्तेर्धात्वर्थे प्रवेशाद् यं शिष्यं प्रति गुरुर्वक्ति तस्यैवाप्रधानकर्मत्वं स्यान्न तु तत्रस्थान्यस्यापीति चैत्रं प्रति उपदेशे 'मैत्रं ब्रूते' इति प्रयोगापत्तिर्नास्तीत्यर्थः । अत्र ज्ञानं शिष्ये इष्टमिति शिष्यपदोत्तरद्वितीयार्थवृत्तित्वस्य ज्ञानेऽन्वयः। अस्मिंश्च पक्षे 'पृच्छ्यते गुरुर्धर्मम्' 'शिष्य उच्यते धर्मम्' इत्यादिकर्माख्यातस्थले गुरुशिष्यादिवृत्तित्वेन विवक्षितोक्तज्ञानस्य साक्षाद्धात्वर्थविशेषणत्वाभावात् तादृशज्ञानरूपफलाश्रयस्य

'अजां ग्रामं नयति' इत्यादौ 'ग्रामं भारं वहति' इत्यादौ चोत्तरदेशसंयोगावच्छिन्नक्रियानुकूलव्यापाररूपं प्रापणं धातोरर्थः, तत्रोत्तरदेशसंयोगे ग्रामस्य गौणकर्मणः, क्रियारूपे च फलेऽजादिप्रधानकर्मणोऽन्वयः, तथा च ग्रामवृत्तिसंयोग-जनकाऽजादिवृत्तिक्रियानुकूलव्यापारानुकूलकृतिमानित्यन्वयबोधः।

'अजा ग्रामं नीयते' 'उह्यते भारो ग्रामं चैत्रेण' इत्यादावुत्तरदेशसंयोगावच्छिन्नक्रियारूपं फलं कर्माख्यातार्थः, तत्र च धात्वर्थस्य तादृशव्यापारस्य जन्यतासंबन्धेन तस्य चाश्रयतासंबन्धेनाऽजाभारादिरूपप्रधानकर्मण्यऽन्वयः, ग्रामादि-वृत्तित्वान्वयस्तु संयोगे एव, एवं च चैत्रकृतिजन्यो यः संयोगावच्छिन्नक्रियानुकूलव्यापारस्तज्जन्यग्रामवृत्तिसंयोगानुकूल-कर्मवानऽजादिरित्यन्वयबोधः।

गुरुशिष्यादेरप्रधानकर्मत्वात् तद्वृत्त्यऽप्रधानकर्मत्वस्य लादिनाऽभिधानानुपपत्तिः पूर्वत्र प्रदर्शिता नास्तीति न काचिदनुपपत्तिः-साक्षाद् धात्वर्थविशेषणीभूत-फलाश्रयस्यैव प्रधानकर्मत्वादिति भावः ।

नीवहधात्वोरर्थमाह-अजामित्यादिना। अत्रोत्तरदेशसंयोगानुकूल-क्रियायाः साक्षाद् धात्वर्थतावच्छेदकत्वं फलत्वं च व्यापारापेक्षयाऽस्तीति तदाश्रयीभूताऽजादेः प्रधानकर्मत्वम्। ग्रामस्य संयोगरूपे अजादेश्च क्रियारूपे फले आधेयत्वसंबन्धेनान्वयः। वाक्यार्थस्वरूपमाह तथा चेति। अजादिवृत्तिक्रिया ग्रामप्राप्त्यनुकूला क्रिया, व्यापारश्च प्रापणरूपो व्यापारः स्पष्टमन्यत्सर्वम्।

कर्माख्यातान्तं नीधातुं वहधातुं चोदाहरति अजेत्यादिना । अत्र चाजाभारादिवृत्तिः प्राप्त्यनुकूला क्रियैव फलम् । तत्र=उक्तक्रियारूपफले धात्वर्थस्य तादृशव्यापारस्य=उक्तक्रियारूपफलजनकस्य प्रापणरूपव्यापरस्य जन्यतासंबन्धेनान्वयः-क्रियारूपफलस्य धात्वर्थीभूतव्यापारजन्यत्वात् । तस्य=क्रियारूपफलस्य चाश्रयतासंबन्धेन प्रधानकर्मभूताजादावन्वयः । ग्रामपदोत्तरद्वितीयार्थस्य ग्रामवृत्तित्वस्य संयोगे एवान्वय इति धात्वर्थतावच्छेद-कतावच्छेदकीभूतसंयोगरूपफलाश्रयत्वाद् ग्रामस्य गौणकर्मत्वम्, संयोगस्याऽजा-

न च कारकविभक्त्यर्थस्य धात्वर्थे एवान्वयनियमात् प्रत्ययोपस्थाप्यसंयोगे कथं ग्रामादिवृत्तित्वान्वय इति वाच्यम्, 'भूतले घटः' इत्यादौ घटादिपदार्थेऽप्यऽधिकरणसप्तम्यर्थान्वयात् तादृशनियमाऽसिद्धेः। अस्तु वा धात्वर्थतावच्छेदकतावच्छेदकतया भासमाने संयोगे एव तदन्वयः।

फलव्यापारयोः पृथक् शक्तिमते चाश्रयत्वमेवा-

दावप्यन्वयविवक्षायामजादेरपि गौणकर्मत्वं स्यान्न तु प्रधानकर्मत्वमित्यर्थः। वाक्यार्थस्वरूपमाह एवं चेति । संयोगावच्छिन्नक्रियानुकूलव्यापार-श्चैत्रवृत्तिप्रापणव्यापारः । कर्म=क्रिया । स्पष्टमन्यत् ।

ननु ग्रामपदोत्तरद्वितीया कारकविभक्तिरस्ति कारकविभक्त्यर्थस्य च धात्वर्थे एवान्वयो भवतीत्यत्र कथं कर्माख्यातप्रत्ययोपस्थाप्ये संयोगे ग्रामपदोत्तरद्वितीयार्थस्य ग्रामवृत्तित्वस्यान्वयः कृत इत्याशङ्कते-न चेति । उत्तरदेशसंयोगावच्छिन्नक्रियारूपं फलं कर्माख्यातार्थ इत्युक्तं तत्रोत्तरदेश-संयोगावच्छिन्नक्रियायाः कर्माख्यातप्रत्यार्थत्वे तदेकदेशस्य संयोगस्यापि कर्माख्यातप्रत्ययार्थत्वं ज्ञेयम् । 'बाणेन हतः' इत्यादौ तृतीयार्थकरणत्वादेर्धात्वर्थे व्यापारे एवान्वयो भवतीति दृष्टान्तः । परिहारमाह– भूतले इति, 'भूतले घटः' इत्यत्र भूतलपदोत्तराधिकरणसप्तम्यपि कारकविभक्तिरेव अथापि तादृशसप्तम्या अर्थस्य वृत्तित्वस्य घटे एवान्वयो भवतीति कारकविभक्त्यर्थस्य धात्वर्थ एवान्वयो भवतीति नियमो नास्तीति 'अजा ग्रामं नीयते' इत्यत्रापि ग्रामपदोत्तरद्वितीयार्थवृत्तित्वस्य प्रत्ययोपस्थाप्यसंयोगेऽन्वये न काचिदनुप-पत्तिरित्यर्थः । कारकविभक्त्यर्थस्य धात्वर्थ एवान्वयनियममभ्युपगम्याह–अस्तु वेति, 'अजा ग्रामं नीयते' इत्यत्रोक्तवाक्यार्थानुसारेण संयोगस्य धात्वर्थतावच्छेद-कतावच्छेदकतया धात्वर्थत्वमस्त्येवेति तादृशसंयोगे एव ग्रामपदोत्तरद्वितीयार्थस्य ग्रामवृत्तित्वस्यान्वयो ज्ञेय इत्यर्थः । कारकत्वं हि क्रियानिरूपितमेव भवतीति कारकविभक्त्यर्थस्य कारकस्य धात्वर्थव्यापारे एवान्वयो युक्त इति भावः । एवकारो भिन्नक्रम इति 'धात्वर्थतावच्छेदकतावच्छेदकतयैव' इत्यन्वयः ।

'अजा ग्रामं नीयते' इत्यत्र मतान्तरमाह– फलेति, फले व्यापारे चोक्ते यदा धातोः पृथक् पृथगेव खण्डशः शक्तिस्तदाऽऽश्रयत्वमेवाख्यातार्थो

त्मनेपदार्थः, संयोगावच्छिन्नक्रियारूपधात्वर्थ एव व्यापाररूप-धात्वर्थविशेष्यतया आश्रयत्वविशेषणतया चान्वेति, तदेकदेशे संयोगे एव ग्रामादिवृत्तित्वान्वयः, चैत्रीयकृतिजन्यव्यापार-जन्यग्रामवृत्तिसंयोगानुकूलक्रियाश्रयोऽजादिरित्याकारको बोधः।

ज्ञानानुकूलशब्दश्च 'द्रव्यं निरूपयति' इत्यादौ धातोरर्थः, तादृशविशिष्टैकार्थस्यैकदेशे ज्ञानांशे आधेयत्वान्वयबोधने न द्वितीयायाः साकाङ्क्षता स्वीक्रियते अपि तु विषयत-याऽन्वयबोधे एवेति 'शिष्यं द्रव्यं निरूपयति' इत्यादिर्न प्रयोगः।

न तु फलं फलस्य धातुनैवोपस्थितिसंभवादित्यर्थः । अत्र च मते पूर्वोक्तं संयोगावच्छिन्नक्रियारूपं फलमजादिवृत्तिधात्वर्थ एव तादृशफलेऽपि धातोरेव शक्तिस्वीकारात् स च संयोगावच्छिन्नक्रियारूपं फलं धात्वर्थो व्यापाररूपधात्वर्थे विशेष्यतयान्वेति-व्यापाररूपधात्वर्थस्य विशेषणत्वात् तत्रैतादृशफलीभूत-क्रियारूपधात्वर्थस्य विशेष्यत्वात्, आख्यातार्थश्चाश्रयत्वं तत्र धात्वर्थीभूतसंयोगा-वच्छिन्नक्रियारूपफलं विशेषणमस्तीति स फलीभूतः संयोगावच्छिन्नक्रिया-रूपधात्वर्थ आश्रयत्वे विशेषणतयाऽन्वेतीत्यर्थः। वक्ष्यमाणशाब्दबोधेन पूर्वपूर्वपदार्थस्य व्यापारादेर्विशेषणत्वमवधार्यम्। "व्यापाररूपधात्वर्थविशेष्यतया" "आश्रयत्वविशेषणतया" इति सप्तमीसमासौ। तदेकदेशे=संयोगावच्छिन्न-क्रियारूपधात्वर्थैकदेशे संयोगे ग्रामपदोत्तरद्वितीयार्थस्य ग्रामवृत्तित्वस्यान्वयः। अत्रत्यवाक्यार्थस्वरूपमाह-चैत्रीयेति। चेत्रीयकृतिजन्यव्यापारः प्रापणरूपव्यापारः, ग्रामवृत्तिसंयोगानुकूलक्रिया ह्यजादिवृत्तिः क्रिया।

निपूर्वकरूपधात्वर्थमाह-ज्ञानेति, येन शब्देन शिष्यस्य द्रव्यादिविषयकं ज्ञानं स्यात् तादृशशब्दो धात्वर्थः। अत्र तादृशविशिष्टैकार्थः=ज्ञानानुकूल (ज्ञानोत्पादक) शब्दस्तस्यैकदेशो ज्ञानं तत्र द्वितीयाया यः खल्वाधेयत्वमर्थ-स्तस्यान्वयो न भवति- अर्थादत्राधेयत्वं द्वितीयार्थो नास्ति, अन्यथा ज्ञानं शिष्ये एवोत्पद्यते इति ज्ञानस्य शिष्यवृत्तित्वात् शिष्यपदोत्तरद्वितीयार्थस्य शिष्यवृत्तित्वस्य (शिष्याधेयत्वस्य) ज्ञानेऽन्वयसंभवात् शिष्यपदोत्तरमपि द्वितीयापत्त्या 'शिष्यं द्रव्यं निरूपयति' इत्यपि प्रयोगः स्याद् न चैतदिष्टं तस्मादत्र न द्वितीयाया आधेयत्वान्वये साकाङ्क्षत्वम् (नात्र द्वितीयाया

यत्तु धात्वर्थो ज्ञानमेव तदनुकूलव्यापारश्च णिजर्थ इति, तदसत्– धातोश्चुराद्यन्तर्गततया स्वार्थे एव णिचो विधानात्, अन्यथा 'निरूपयति' इत्यस्य 'ज्ञापयति' इत्यादि-समशीलतया 'शिष्यं ज्ञापयति' इत्यादिवत् 'शिष्यं निरूपयति' इति प्रयोगस्य दुर्वारत्वात्।

'अजां ग्रामं यापयति' 'शिष्यं शास्त्रं ज्ञापयति' 'ब्राह्मणमन्नं भोजयति' 'यजमानं मन्त्रं पाठयति' 'घटं जनयति नाशयति' इत्यादौ णिच्प्रत्ययप्रकृतिभूतधात्वर्थकर्तृवा-चकाऽजादिपदोत्तरद्वितीयाया मुख्यभाक्तसाधारणं कर्तृत्व-

---

आधेयत्वमर्थः) अपि तु विषयतयान्वयबोधे एवात्र द्वितीयायाः साकाङ्क्षत्वम् (अत्र विषयत्वमेव द्वितीयार्थः) तथा च ज्ञानविषयत्वं तु द्रव्ये एवास्ति न तु शिष्ये इति द्रव्यपदादेव द्वितीया प्राप्ता न शिष्यपदादपीति न 'शिष्यं द्रव्यं निरूपयति' इति प्रयोगापत्तिरित्यर्थः। द्रव्यविषयकज्ञानजनकवाक्यप्रयोगं करोतीति शाब्दबोधः।

ननु 'निरूपयति' इत्यत्र ज्ञानमात्रं धात्वर्थो ज्ञानानुकूलव्यापारस्तु णिजर्थ इति नोक्तविशिष्टं धात्वर्थ इत्याशङ्कते– यत्त्विति। परिहरति– तदसदिति, णिचः स्वार्थे एवात्रजातत्वान्न पृथग् व्यापारार्थत्वं संभवतीत्यर्थः। विपक्षे बाधकमाह– अन्यथेति, यदि निपूर्वकरूपधात्वर्थो ज्ञानमात्रं स्यात्तदा 'शिष्यं ज्ञापयति' इतिवत् 'शिष्यं निरूपयति' इत्यपि प्रयोगः स्याद् न चैतदिष्टमिति न ज्ञानमात्रं निपूर्वकरूपधात्वर्थः किंतु ज्ञानानुकूलशब्द एव, ज्ञानानुकूलशब्दविषयत्वं च द्रव्यादावेव न शिष्यादाविति न 'शिष्यं निरूपयति' इति प्रयोगापत्तिरित्यर्थः । समशीलतया=तुल्यतया, अत्र च तुल्यतापत्त्येत्यर्थः।

अजामिति–"गतिबुद्धि०" इत्यादिसूत्रेण गमनादिकर्तुरेव ण्यन्तावस्थायां कर्मसंज्ञाविधानादत्र णिच्प्रत्ययस्य प्रकृतिभूतो यो यादिधातुस्तदर्थो यो गमनादिव्यापारस्तत्कर्तृवाचकं यदऽजादिपदं तादृशाजादिपदोत्तरद्वितीयाया मुख्यगौणसाधारणं कर्तृत्वमेवार्थः–अजादीनामत्र गमनादिक्रियानिरूपित-कर्तृत्वस्यैव सत्त्वात् । 'अजां ग्रामं नयति' इत्यादौ तु धातोर्द्विकर्मकत्वादजादीनां

मेवार्थः– "गतिबुद्धि" इत्यादिसूत्रेण कर्तुः कर्मसंज्ञाविधानात्। गतिज्ञानोत्पत्त्यादिनिरूपितं कर्तृत्वं चाश्रयत्वमेव, गलाधः संयोगानुकूलक्रियानुकूलव्यापाररूपभोजनकण्ठल्वाद्यभिघात-रूपपाठनिरूपितं च तदनुकूलकृतिमत्त्वम्, नाशनिरूपितं च प्रतियोगित्वम्, तस्य च निरूपकतासंबन्धेन धात्वर्थेऽन्वयः।

नव्यमते च यत्राश्रयत्वं कर्तृत्वं तत्राधेयत्वं द्वितीयार्थः, यत्रानुकूलकृतिमत्त्वं तत्र कृतिजन्यत्वम्, यत्र प्रतियोगित्वम्, तत्रानुयोगित्वम्, तेषां चाश्रयतासंबन्धेनैव धात्वर्थेऽन्वयः।

कर्मत्वमेवेति विवेकः । तत्र धात्वर्थानुकूलकृतिमत्त्वं मुख्यं कर्तृत्वम् धात्वर्थाश्रयत्वं गौणं कर्तृत्वमिति विवेर्कःस्वयमुदाहरति–गतीत्यादिना, 'अजां ग्रामं यापयति' इत्यत्राजायां गत्यनुकूलकृतिमत्त्वमेव मुख्यं कर्तृत्वम्, 'शिष्यं शास्त्रं ज्ञापयति' इत्यत्र शिष्ये ज्ञानाश्रयत्वमेव ज्ञानकर्तृत्वम्–शिष्यो जानाति तं शिष्यं गुरुः ज्ञापयति इति बोधात्, 'ब्राह्मणमन्नं भोजयति' इत्यत्र गलाधः संयोगानुकूला या ग्रासनिष्ठा क्रिया तादृशक्रियानुकूलव्यापाररूपं यद् भोजनं तादृशभोजनानुकूलकृत्तिमत्त्वमेव ब्राह्मणे भोजनकर्तृत्वम्, एतदपि कर्तृत्वं मुख्यम्, 'यजमानं मन्त्रं पाठयति' इत्यत्र कण्ठतात्वाद्यभिघातजन्यो यः पाठस्तादृशपाठानुकूलकृतिमत्त्वमेव यजमानस्य कर्तृत्वम् घटं जनयति इत्यत्रोत्पत्त्याश्रयत्वमेव घटस्य कर्तृत्वम्, 'घटं नाशयति' इत्यत्र नाशनिरूपितप्रतियोगित्वमेव घटस्य नाशक्रियाकर्तृत्वम्, घटो नश्यति तं नश्यन्तं नाशयतीति बोधोदयादित्यन्वयः । कर्तृत्वं हि धात्वर्थीभूतव्यापार-निरूपितमेव भवतीति धात्वर्थे यत्कर्तृत्वनिरूपकत्वं तादृशसंबन्धेनोक्तकर्तृत्वानां धात्वर्थेऽन्वय इत्याह–तस्येति । तस्य=उक्तरूपकर्तृत्वस्य ।

नवीनमतमाह– नव्येति, 'शिष्यं शास्त्रं ज्ञापयति' इत्यत्र ज्ञानाश्रयत्वमेव शिष्यस्य कर्तृत्वमस्तीति शिष्पपदोत्तरद्वितीयार्थ आधेयत्वम्–ज्ञानस्य शिष्टवृत्तित्वात्, 'ब्राह्मणमन्नं भोजयति' इत्यत्रोक्तभोजनानुकूलकृतिमत्त्वमेव ब्राह्मणस्य कर्तृत्वमस्तीति ब्राह्मणपदोत्तरद्वितीयार्थः कृतिजन्यत्वमेव–भोजनव्यापारस्य ब्राह्मणकृतिजन्यत्वात् 'घटं नाशयति' इत्यत्र नाशप्रतियोगित्वमेव घटस्य नाशकर्तृत्वमस्तीति घटपदोत्तरद्वितीयाया अनुयोगित्वमर्थस्तस्य च

गत्यर्थादिभ्योऽन्यत्र णिच्प्रत्ययप्रकृतिधात्वर्थकर्तृवाचकपदान्न द्वितीयातादृशकर्तुः कर्मातिदेशाऽविषयत्वात्, तेन 'पाचयत्योदनं सहायेन' इत्यादय एव प्रयोगाः न तु 'पाचयत्योदनं सहायम्' इत्यादयः।

केचित्तु–पाकादिकर्त्तुः पाकादिकर्मत्वविरहेऽपि ण्यन्तसमुदायस्यापि धातुत्वेन तत्कर्मतया सहायादेः 'पाचयत्योदनं सहायम्' इत्यादयः प्रयोगा अपि साधवः, अत एव "अजिग्रहत्तं जनको धनुस्तत्" इत्यादयो भट्टिप्रयोगाः।

स्वरूपसंबन्धरूपाश्रयतासंबन्धेन धात्वर्थे नाशेऽन्वयः–नाशस्यैवात्र घटनिष्ठप्रतियोगित्वनिरूपकत्वादित्यऽनुयोगितासंबन्धेन घटविशिष्टो यो नाशस्तादृशनाशानुकूलव्यापारवानिति शाब्दबोध इत्यन्वयः। तेषाम्=आधेयत्वादिद्वितीयार्थानाम्। उक्तस्थलेषु ज्ञापयतीत्यत्र शिष्यनिरूपिता द्वितीयार्थभूताधेयताऽऽश्रयतासंबन्धेन धात्वर्थे ज्ञानेऽस्ति, भोजयतीत्यत्र द्वितीयार्थभूतं कृतिजन्यत्वमाश्रयतासंबन्धेन भोजनव्यापारे धात्वर्थे विज्ञेयम्, नाशयतीत्यत्रानुयोगिता धात्वर्थे नाशे विज्ञेया। गत्यर्थादिधातूनामेव ण्यन्तावस्थायां गत्यादिकर्तृवाचकाजादिपदेभ्यो द्वितीया भवति नान्यत्रेत्याह–गत्यर्थेति। तादृशकर्तुः=ण्यन्तगत्यर्थादिधातुभिन्नपचादिधात्वर्थकर्तुः कर्मत्वविधायकानुशासनाभावाद् न तादृशकर्तृवाचकपदाद् द्वितीयापत्तिरिति न 'पाचयत्यन्नं सहायम्' इत्यादयः प्रयोगाः–सहायादिपदादत्र द्वितीयाविधायकसूत्राभावात् किंतु 'पाचयत्यन्नं साहायेन' इत्येवमेव प्रयोग इत्यर्थः।

मतान्तरमाह–केचित्त्विति, 'पाचयत्योदनं सहायम्' इत्यादौ पाककर्तुः सहायस्य पाकादिनिरूपितकर्मत्वाभावेऽपि ण्यन्तसमुदायस्यापि 'पाचयति' इत्यादेर्धातुत्वेन ण्यन्तधात्वर्थनिरूपित तु सहायादेरपि कर्मत्वमस्त्येवेति तादृशकर्मत्वमाश्रित्य द्वितीयापत्त्या 'पाचयत्योदनं सहायम्' इत्यादयोऽपि प्रयोगाः साधव एवेत्यर्थः। अत्र प्रमाणमाह–अत एवेति, अत एव=अण्यन्तावस्थायाः सहायादेः कर्तुर्ण्यन्तावस्थायां कर्मत्वस्य सर्वत्र साधुत्वादेव "अजिग्रहत्तं जनको धनुस्तत्" इत्यत्र भट्टिकारेणाऽण्यन्तावस्थायाः कर्तुस्तत्पदवाच्यस्य ण्यन्तावस्थायां कर्मत्वमाश्रित्य "तम्" इति द्वितीयान्तप्रयोगः कृतः, अन्यथा

"गतिबुद्धि॰" इत्यादिसूत्रं च नियमपरतया गत्यर्थधातुयोगे कर्तृप्रत्ययाऽसाधुत्वज्ञापकम्, तेन 'पाचयत्योदनं सहायेन' इत्यादिवत् 'अजया ग्रामं गमयति' इत्यादयो न प्रयोगा इत्याहुः।

एषामयमाशयः—"हेतुमति च" इत्यनुशासनाद् णिजर्थो हेतुकर्तृत्वं तच्च स्वतन्त्रकर्तृप्रेरणा अन्यनिष्ठकर्तृत्वनिर्वाह-कव्यापाररूपा, कर्तृत्वं क्वचित् प्रयत्नः क्वचिदाश्रयत्वादिकम्। यादृशधातूत्तराख्यातेन यादृशं कर्तृत्वं बोध्यते तदुत्तरणिच्प्रत्ययेन तादृशकर्तृत्वनिर्वाहकव्यापारो बोध्यते, अत एव 'पाचयति' इत्यादौ पाकादिकृतिनिर्वाहकः, 'ज्ञापयति' इत्यादौ ज्ञानाश्रयत्वनिर्वाहकः, 'नाशयति' इत्यादौ नाशप्रतियोगि-

'तेन' इति प्रयुक्तं स्यादित्यर्थः । ननु यदि सर्वत्रैवाऽण्यन्तावस्थायाः कर्तुर्ण्यन्तावस्थायां कर्मत्वं स्यात्तदा "गतिबुद्धि" इत्यादिसूत्रस्य किं फलमित्या-शङ्क्याह गतिबुद्धीति, "गतिबुद्धि" इति सूत्रम् 'गत्यर्थादिधातुयोगेऽण्यन्ता-वस्थायाः कर्तुर्ण्यन्तावस्थायां कर्मत्वमेव भवति तेन च तद्वाचकपदात् तृतीयादिः कर्तृप्रत्ययो न भवति कर्मप्रत्ययो द्वितीयैव भवति' इति नियमपरमस्ति तस्मात् 'अजया ग्रामं गमयति' इति प्रयोगो नैव भवति किं तु 'अजां ग्रामं नयति' इत्येव प्रयोगो भवति, गत्यर्थादिधातुभिन्नधातुयोगे त्वऽण्यन्तावस्थायाः कर्तुर्ण्यन्तावस्थायां कर्तृत्वमपि भवति कर्मत्वमपि भवति तेन 'पाचयत्योदनं सहायम् प्रयोगो भवति 'पाचयत्योदनं सहायेन' इत्यपि प्रयोगो भवतीत्यर्थः ।

उक्तमतावलम्बिनामभिप्रायं वर्णयति-एषामित्यादिना, "हेतुमति च" इति सूत्रेण णिजर्थो हेतुकर्तृत्वम्=प्रयोजककर्तृत्वमिति प्रतिपाद्यते तच्च हेतुकर्तृत्वमन्यनिष्ठ=प्रयोज्यवृद्धनिष्ठकर्तृत्वस्य निर्वाहिका व्यापाररूपा स्वतन्त्रकर्तुः=प्रयोजकवृद्धस्य या प्रेरणा तद्रूपमेव, कर्तृत्वं क्वचिच्च प्रयत्नः= कृतिरेव यथा 'भोजयति' इत्यादौ भोजनानुकूलकृतिमत्त्वमेव कर्तृत्वम्, क्वचिच्च कर्तृत्वं धात्वर्थाश्रयत्वमेव यथा 'ज्ञापयति' इत्यादौ ज्ञानाश्रयत्वमेव कर्तृत्वम्, आदिपदात् प्रतियोगित्वमपि कर्त्तृत्वं यथा नाशयतीत्यत्र, तथा च प्रयोज्यवृद्धनिष्ठकर्तृत्वनिर्वाहको यः प्रयोजकवृद्धनिष्ठव्यापारः स एव हेतुकर्तृत्वं

त्वनिर्वाहको व्यापारः प्रतीयते। निर्वाहकत्वं च स्वरूपसंबन्ध-विशेषो न तु जनकत्वम्, अतो न 'नाशयति' इत्यादावन्व-यानुपपत्तिः एवं च ण्यन्तधातुप्रतिपाद्यतावच्छेदकं फलं कर्तृत्वमेव– निर्वाह्यस्यैव फलत्वात्, तदाश्रयतयाऽस्वतन्त्रस्य कर्तृः कर्मता, तादृशफलविशेषणतयाऽस्वतन्त्रकर्तृवृत्ति-त्वविवक्षायाम् 'पाचयत्योदनं सहायम्' इत्यादयः प्रयोगाः। यदा तु पाकादिविशेषणतया सहायादिकर्तृत्वं विवक्षितं तदा

तदेव च णिजर्थ इति, यादृशधातूत्तराख्यातेन च यादृशं कर्तृत्वं बोध्यते तदुत्तरणिच्प्रत्ययेन तादृशकर्तृत्वनिर्वाहकव्यापारो बोध्यते यथा 'भोजयाति' इत्यत्र भुजधात्तूत्तराख्यातेन भोजनानुकूलकृत्तिमत्त्वरूपंकर्तृत्वं बोध्यते इति तदुत्तर =तादृशधातूत्तरणिच्प्रत्ययेनापि भोजनानुकूलकृतिमत्त्वरूपकर्तृत्वस्यैव निर्वाहको व्यापारो बोध्यते 'ज्ञापयति' इत्यत्र च ज्ञाधातूत्तराख्यातेन ज्ञानाश्रयत्वरूपमेव कर्तृत्वं बोध्यते इति तदुत्तरणिच्प्रत्ययेनापि ज्ञानाश्रयत्वरूप-कर्तृत्वस्यैव निर्वाहको व्यापारो बोध्यते एवमेव युक्तत्वादित्याहयादृशेति। उक्तं स्वयमेवोदाहरति–अत एवेति, अत एव=उक्तयादृशेत्यादिनियमादेव। व्यापारः=णिजर्थव्यापारः। 'नाशयति' इत्यत्र नाशप्रतियोगित्वमेव नाश कर्तृत्वमिति पूर्वमेव उक्तम्। "तादृशकर्तृत्वनिर्वाहकव्यापारः" इत्यनेन यत् प्रयोजकवृद्धव्यापारस्य प्रयोज्यवृद्धनिष्ठकर्तृत्वनिर्वाहकत्वमुक्तं तत्र निर्वाहकत्वस्वरूपमाह निर्वाहकत्वं चेति, तच्च निर्वाहकत्वं स्वरूपसंबन्धविशेष एव न तु कर्तृत्वजनकत्वं निर्वाहकत्वमित्यर्थः। अस्य फलमाह अत इति, यदि जनकत्वमेव निर्वाहकत्वं स्यात्तदा 'नाशयति' इत्यत्र नाशप्रतियोगित्वमेव कर्तृत्वमस्ति न च नाशप्रतियोगित्वं णिजन्तकर्तृव्यापारजन्यमस्ति तस्य घटे स्वतःसिद्धत्वादेवेत्यत्र णिजन्तकर्तृव्यापारस्य नाशप्रतियोगित्वरूपकर्तृत्वनिर्वाह-कत्वं न स्यादिति निर्वाहकत्वं न जनकत्वं किं तु स्वरूपसंबन्धविशेष एव तस्य तु 'नाशयति' इत्यादावप्यनुपपत्तिर्नास्त्येवेत्यर्थः। उपसंहरति एवं चेति, यदेव निर्वाह्यं तदेव फलं भवति निर्वाह्यं चात्र ण्यन्तधात्वर्थतावच्छेदकं प्रयोज्यवृद्धनिष्ठं कर्तृत्वमेवेति तदेवात्र फलमस्ति, फलाश्रयस्य च कर्मत्वं भवतीति तदाश्रयतया= फलभूतकर्तृत्वाश्रयतयाऽस्वतन्त्रस्य कर्तुः=प्रयोज्यवृद्धस्य कर्मत्वं प्राप्तं तथा च यदाऽस्वतन्त्रकर्तृवृत्तित्वं तादृश-(कर्तृत्वरूप)

'पाचयत्योदनं सहायेन' इत्यादयः।

अथ यत्र चैत्रमैत्रोभयकर्तृक एक एव पाकस्तत्र चैत्रमात्रं प्रयोजयति यज्ञदत्ते 'मैत्रेणान्नं पाचयति' इति प्रयोगापत्तिरिति तत्रापि ण्यर्थकृतावेव तृतीयान्तार्थमैत्रादिवृत्तित्वस्याऽन्वयो वाच्य एवं च 'मैत्रं पाचयति' इत्यादिवाक्यजन्यबोधाऽवैलक्षण्याद्

फलविशेषणं भवति अर्थात् यदा सहायवृत्तिपाकानुकूलकृत्यनुकूलव्यापारवानित्येवं कर्तृत्वरूपफलस्य प्रयोज्यवृद्धवृत्तित्वेन विवक्षा भवति तदा कर्तृत्वरूपफलाश्रयत्वेन द्वितीयापत्त्या 'पाचयत्योदनं सहायम्' इत्येवं प्रयोगो भवति, यदा च सहायकर्तृकपाकानुकूल- कृत्यनुकूलव्यापारवानित्येवं सहायादिरूपप्रयोज्यवृद्धनिष्ठं कर्तृत्वं पाकादिविशेषणं भवति तदा पाकादिव्यापारविशेषणीभूतस्य कर्तृत्वस्य फलत्वासंभवात् तदाश्रयीभूतवाचकसहायपदात् तृतीयैव स्यान्न द्वितीयेति 'पाचयत्योदनं सहायेन' इति प्रयोगो भवतीत्यर्थः। "अस्वतन्त्रकर्तृवृत्तित्वविवक्षायाम्" इति षष्ठीतत्पुरुषः-अस्वतन्त्रकर्तृवृत्तित्वस्य तादृशफलविशेषणतया विवक्षायामित्यर्थः।

ननु यदुक्तम् "यदा तु पाकादिविशेषणतया सहायादिकर्तृत्वं विवक्षितं तदा 'पाचयत्योदनं सहायेन' इत्यादयः" इति, तत्र यत्र चैत्रमैत्रोभयकर्तृक एक एव पाकस्तत्रोभयकर्तृकपाके उभयनिष्ठकर्तृत्वस्य विशेषणत्वं स्यादेव निरूपकतासंबन्धेन (पाकस्य कर्तृत्वनिरूपकत्वात्) तथा च तत्र चैत्रमात्रं प्रयोजयति यज्ञदत्ते 'मैत्रेणान्नं पाचयति' इत्यपि प्रयोगः स्यादेव- मैत्रनिष्ठकर्तृत्वस्यापि पाके विशेषणत्वाद् यन्निष्ठकर्तृत्वस्य पाके विशेषणत्वं तद्वाचकपदात्तृतीयायास्त्वया व्यवस्थापित्वाद् न च चैत्रमात्रं प्रयोजयति यज्ञदत्ते 'मैत्रेणान्नं पाचयति' इति प्रयोग इष्ट इत्यभिप्रायेणाशङ्कते- अथेति। किं च "तादृशफलविशेषणतयाऽस्वतन्त्रकर्तृवृत्तित्वविवक्षायाम् 'पाचयत्योदनं सहायम्' इत्यादयः प्रयोगाः" इत्युक्तदिशा यथा 'मैत्रमन्न पाचयति' इत्यत्र फलभूतं यत् ण्यर्थकर्तृत्वं तस्य मैत्रवृत्तित्वेन तादृशकर्तृत्वे मैत्रवृत्तित्वस्यान्वयः प्राप्तस्तथैव तत्रापि='मैत्रेणान्नं पाचयति' इत्यत्रापि ण्यर्थकृतिः (ण्यर्थकर्तृत्वम्) मैत्रे वर्तते एवेति ण्यर्थकृतौ तृतीयान्तपदार्थमैत्रवृत्तित्वस्यान्वयेनोभयोरप्युक्त वाक्ययोः समानबोधजनकत्वात् 'मैत्रमन्नं पाचयति' इति वाक्यजन्यबोधापेक्षया 'मैत्रेणान्नं

द्वितीयातृतीययोस्तात्पर्यभेदेन व्यवस्थाया न संगतिरिति चेत्?, न, अगत्या तत्र पाकादिविशेषणकृतेः पारतन्त्र्येण व्यापार-विशेषणीभूतणिजर्थकृतावऽभेदान्वयमुपगम्योक्तातिप्रसंगस्य

पाचयति' इति वाक्यजन्यबोधस्य वैलक्षण्याभावाद् द्वितीयातृतीययोर्या तात्पर्यभेदेन=विवक्षाभेदेन व्यवस्थोक्ता तस्याः संगतिर्न संभवतीत्याशयेनाह-तत्रापीति। ण्यर्थकृतावेवेति-अन्यनिष्ठकर्तृत्वनिर्वाहकव्यापारो णिजर्थ इत्युक्तं तत्र यज्ञदत्तादिनिष्ठण्यर्थव्यापारनिर्वाह्यं यदन्य-(मैत्रादि)-निष्ठं कर्तृत्वं तस्यापि ण्यर्थकोटिप्रविष्टत्वाद् ण्यर्थत्वमेव कर्तृत्वं च कृतिरेव ण्यर्थभूतमन्यनिष्ठकर्तृत्वं चात्र मैत्रनिष्ठमेव मैत्रस्यात्र ण्यर्थव्यापारकर्तृय- ज्ञदत्तापेक्षयाऽन्यत्वादिति ण्यर्थकृतौ तृतीयान्तार्थमैत्रवृत्तित्वस्यान्वयो ज्ञेय इत्यर्थः। परिहरति नेति, अगत्येति, पाकविशेषणीभूतकृतेः णिजर्थव्यापारविशेषणीभूतकृतावभेदान्वय-स्वीकारेण उक्तातिप्रसङ्गस्य=यत्रोभयकर्तृक एक एव पाकस्तत्र चैत्रमात्रं प्रयोजयति सति यज्ञदत्ते 'मैत्रेणान्नं पाचयति' इति प्रयोगापत्तिर्निवार्यते तथा हि-यत्रोभयकर्तृक एक एव पाकस्तत्र पाकविशेषणीभूता कृतिः (कर्तृत्वम्) तु यद्यप्युभयोरपि चैत्रनैत्रयोर्वर्तते तथापि प्रेरकेण यज्ञदत्तेन प्रेरणा तु चैत्रमात्रं प्रत्येव क्रियते न तु मैत्रं प्रत्यपि तथा च णिजर्थो योऽन्यनिष्ठकर्तृत्व-निर्वाहकप्रेरणारूपव्यापारस्तादृशव्यापारविशेषणीभूता या णिजर्थकृतिः सा तु चैत्रे एव वर्तते न मैत्रे तथा च चैत्रवृत्तिणिजर्थकृतावेवपाकविशेषणी-भूतकृतेरभेदान्वयः संभवतीति 'चैत्रेणान्नं पाचयति' इत्येव प्रयोगो भवति, मैत्रे तु तादृशदशायां णिजर्थकृतिरेव नास्ति येन तस्यां पाकविशेषणी-भूतकृतेरभेदान्वयः स्यादिति न चैत्रमात्रं प्रयोजयति यज्ञदत्ते 'मैत्रेणान्नं पाचयति' इति प्रयोगापत्तिरित्यर्थः। यन्निष्ठणिजर्थव्यापारविशेषणीभूतकृतौ पाकादिकृतेर-भेदान्वयः स्यात्तद्वाचकचैत्रादिपदादेव तृतीया भवत्यऽन्यत्रद्वितीयेति यावत्। अत्र च कृतिः कर्तृत्वमेव पाकविशेषणीभूता कृतिर्हि पाकप्रयोजिकैव कृतिरस्ति तादृशकृतेरेव णिजर्थव्यापारो निर्वाहक इति णिजर्थव्यापार-विशेषणीभूतकृतेः पाकादिविशेषणीभूतकृतेश्चाभेदो जात इत्यभेदान्वय उक्तः। ननु "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति नियमात् णिजर्थव्यापारविशेषणीभूतोक्तणिजर्थकृतिः पदार्थैकदेश एवेति तत्र पाकविशेषणीभूतकृतेः कथमन्वयः स्यादित्याशङ्क्याह पदार्थैकदेशेति,

वारणीयत्वात्, पदार्थैकदेशे कृतौ पाकादेरिव कृतेरप्यन्वयो व्युत्पत्तिवैचित्र्यात्। वस्तुतः कर्तृत्वं व्यापारश्च पृथगेव णिजर्थः, विशिष्टलाभोऽन्वयबलात्।

केचित्तु– अनुकूलव्यापार एव णिजर्थः, तदन्वयिनी गमनज्ञानभोजनादिक्रियैव धात्वर्थतावच्छेदकं फलम्, तत्संबन्धिनस्तादृशक्रियाकर्तुर्ण्यन्तकर्मता, तादृशक्रिया- संबन्धश्चाऽऽ-

---

पारतन्त्र्येण=धर्मिभूतपाकद्वारा पाककृतेरपि पदार्थैकदेशभूतणिजर्थ-व्यापारविशेषणीभूतकृतावन्वये न कोपि दोषः–'पाचयति' इत्यत्र पाकानुकूला या कृतिस्तादृशकृतिनिर्वाहकव्यापारवान् इति बोधोदयात् पाकानुकूला कृतिः पाके पाको णिजर्थकृतौ सा च णिजर्थव्यापारे विशेषणमिति परम्परा। धर्मिपारतन्त्र्येणापि पदार्थैकदेशेऽन्वयानङ्गीकारे पक्षान्तरमाह- वस्तुत इति, विशिष्टस्याऽन्यनिष्ठकर्तृत्वनिर्वाहकव्यापारस्य णिजर्थत्वं यदुक्तं तन्नास्ति किं तु कर्तृत्वं (कृतिः) व्यापारश्च पृथगेव णिजर्थ इति णिजर्थकृतेः पदार्थत्वमेव प्राप्तं न पदार्थैकदेशत्वं येन तत्र पाकविशेषणीभूतकृतेरभेदान्वये उक्ते कोपि दोषः स्यादित्यर्थः। शाब्दबोधे तादृशकर्तृत्वविशिष्टव्यापारस्य प्रतीतिस्त्वन्वयबलात्=आकाङ्क्षाबलादपि संभवत्येवेति न कर्तृत्वविशिष्ट-व्यापारस्य (विशिष्टस्यान्यनिष्ठकर्तृत्वनिर्वाहकव्यापारस्य) णिजर्थत्वं वक्तव्यमित्याह-विशिष्टेति। द्वितीयातृतीययोर्नियमस्त्विदानीं पूर्वोक्तया "तादृशफलविशेषणतया" इति रीत्यैव ज्ञेयः।

णिजर्थे मतान्तरमाह-केचित्त्विति, अनुकूलव्यापारः='गमयति' इत्यादौ गमनाद्यनुकूलव्यापारो णिजर्थस्तत्र गमनादिव्यापारस्तु धात्वर्थ एव पारिशेष्यादनुकूलव्यापार एव णिजर्थः, तदन्वयिनी=णिजर्थव्यापारान्वयिनी । धात्वर्थतावच्छेदकं च फलं भवति अत्र च णिजन्तधात्वर्थो गमनाद्यनुकूलव्यापार एवेति गमनादिक्रियाया धात्वर्थतावच्छेदकत्वम्=णिजन्तधात्वर्थविशेषणत्वं प्राप्तमिति 'गमयति' इत्यादौ णिजन्तस्य गमनादिक्रियैव फलं तत्संबन्धिनः=तादृशक्रियारूपफलसंबन्धिनः(समवायिनः) तादृशक्रियाकर्तुः=गमनादिक्रियाकर्तुः 'अजां ग्रामं गमयति' इत्यादावजादिपदार्थस्य ण्यन्तकर्मत्वं प्राप्तम्, तादृशक्रियासंबन्धः=फलीभूतगमनादिक्रियायाः संबन्धश्चाश्रयत्वादिरेव

श्रयत्वकृतिमत्त्वाद्यन्यतमो ग्राह्यः अतो गमनादिसंबन्धि-कालादौ नातिप्रसङ्गः इत्याहुः। अत्र च तादृशकर्मतावाचकपदात् कदाचिद् द्वितीया कदाचिद् तृतीयेत्यत्र नियामकाभावः– तादृश-पदोत्तरयोस्तयोस्तुल्यार्थकतया विवक्षाभेदरूपनियामका-भावादिति तु चिन्तनीयम्।

'अजा ग्रामं याप्यते चैत्रेण' इत्यादौ चैत्रकर्तृकव्या-पारनिर्वाह्य यद् ग्रामवृत्तिसंयोगानुकूलक्रियाकर्तृत्वं तदाश्रयोऽजा

ग्राह्यः–अर्थात् अजादौ कृतिमत्त्वसंबन्धेन फलीभूतगमनादिक्रियाया अन्वयो ज्ञेयः अजादौ गमनाद्यनुकूलकृतिमत्त्वमस्त्येव, अन्यथा गमनादिरूपं फलं कालिकसंबन्धेन गवादावप्यस्त्येवेति गवादेरपि णिजन्तकर्मत्वं स्यात्, कृतिमत्त्वादिसंबन्धेन तु गमनादिरूपं फलं गवादौ कालादौ वा नास्तीति नातिप्रसङ्गः=कालादेर्गवादेर्वा कर्मत्वापत्तिर्नास्तीत्यर्थः । 'ज्ञापयति' इत्यादौ ज्ञानादेराश्रयत्वं संबन्धः शिष्यादौ ज्ञेयः । अस्मिन् मते दोषमाह–अत्र चेति, 'पाचयति' इति णिजन्तधात्वर्थनिरूपितकर्मत्वं प्रयोज्यस्य मैत्रस्य प्राप्तं 'मैत्रमन्नं पाचयति' इत्येवं तादृशकर्मतावाचकपदात्=ण्यन्तधात्व-र्थनिरूपितकर्मताविशिष्टवाचकमैत्रादिपदात् कदाचित् द्वितीया भवति कदाचिच्च 'मैत्रेणान्नं पाचयति' इत्येवं तृतीया भवतीति तादृशद्वितीयातृतीययोर्नियामकं किमपि नास्त्येवेति दोषः, उक्ते हेतुमाह–तादृशपदोत्तरेऽपि, तादृशपदोत्तरयोः= ण्यन्तधात्वर्थनिरूपितकर्मताविशिष्टवाचकमैत्रादिपदोत्तरं वर्तमानयोस्तयोः= द्वितीयातृतीययोस्तुल्यार्थकतया विवक्षाभेदस्यापि नियामकत्वं न संभवति, यदि तुल्यार्थकत्वं न स्यात्तदा विवक्षाभेदस्य नियामकत्वं स्यादपि न चैवमस्तीत्यर्थः । अत्र केचित्तु मते यः खलु "अत्र च" इत्यादिना दोषः प्रदर्शितस्तमुद्दिश्याह भट्टाचार्यः–इति तु चिन्तनीयमिति, तथा च यथा समानार्थकयोरपि घटकलशपदयोर्विवक्षाभेदेन प्रयोगव्यवस्था तथात्रापि समानार्थकत्वेऽपि द्वितीयातृतीययोः प्रयोगव्यवस्था संभवत्येवेत्यर्थः।

यगन्तप्रयोगमुदाहरति–अजेति, अत्र प्राप्त्यनुकूलगमनकर्तृत्वमजायाः प्रापणकर्तृत्वं च चैत्रस्य, तच्चाजानिष्ठं प्राप्त्यनुकूलक्रियाकर्तृत्वं चैत्रनिष्ठ-प्रापणव्यापारनिर्वाह्यमस्ति, तदाश्रयः= तादृशकर्तृत्वाश्रयोऽजेति वाक्यार्थबोधः।

इति बोधः, तत्र संयोगावच्छिन्नक्रिया धातुलभ्या, संयोगे 'ग्रामम्' इत्यादिद्वितीयान्तार्थग्रामादिवृत्तित्वान्वयबलाद् ग्रामादिवृत्ति-संयोगावच्छिन्नक्रिया लभ्यते, तादृश्या णिजर्थकर्तृत्वेऽन्वयः। कर्माख्यातादिसमभिव्याहारनियन्त्रितव्युत्पत्तिबलाच्च तादृशक्रियान्वितकर्तृत्वं तृतीयान्तार्थचैत्रादिकर्तृत्वविशेषितव्या-यारूपाऽपरणिजर्थेन निर्वाह्यत्वसंबन्धेन विशेषितम् अजादिरूपकर्मीभूतकर्तरि तद् विशेषणीभवदाख्यातार्थाश्रयत्वे विशेषणतया भासते।

नन्वत्र कर्माख्यातस्याश्रयत्वार्थकत्वादजायाः क्रियाकर्तृत्वाश्रयत्वसंभवेऽपि ग्रामवृत्तिसंयोगानुकूलक्रियाकर्तृत्वाश्रयत्वं कथं प्राप्तमित्याशङ्क्याह-तत्रेति, अत्र संयोगानुकूलक्रिया तु याधात्वर्थ एवेति धातुलभ्यैव 'ग्रामम्' इति द्वितीयान्तपदसमभिव्याहाराच्च संयोगे ग्रामवृत्तित्वस्यान्वयो जात इत्येवं रीत्या ग्रामवृत्तिसंयोगावच्छिन्नक्रिया लभ्यते तादृश्याः=ग्रामवृत्तिसंयोगानुकूलक्रियाया णिजर्थकर्तृत्वे=चैत्रनिष्ठकर्तृत्वे निर्वाहकत्वसंबन्धेनान्वयः—कर्तृत्वं कृतिरेव चैत्रनिष्ठकृतेरेवाजानिष्ठतादृशक्रियानिर्वाहकत्वात्, अजायां चाश्रयत्व-संबन्धेनान्वयः, अजानिष्ठकर्तृत्वे (कृतौ) च जनकत्वसंबन्धेनान्वय इत्यर्थः। उक्तवाक्यार्थघटकपदार्थान् प्रतिपादयति-कर्मेति, कर्माख्यातसमभि-व्याहारव्युत्पत्तिबलात्=प्रथमान्तकर्मपदार्थविशेष्यकबोधबलान्, तादृशक्रियान्वि-तकर्तृत्वम्=ग्रामवृत्तिसंयोगावच्छिन्न (जनक) क्रियया निरूपितत्वसंबन्धेनान्वितं कर्तृत्वं तृतीयान्तार्थो यच्चैत्रनिष्ठं कर्तृत्वं तादृशकर्तृत्वविशेषितः=निरूप-कत्वसंबन्धेन चैत्रनिष्ठकर्तृत्वविशिष्टो यश्चैत्रनिष्ठोऽपरणिजर्थः प्रापणरूप-व्यापारस्तेन व्यापारेण च निर्वाह्यत्वसंबन्धेन विशेषतम्=विशिष्ट-म् (एतद्व्यापारस्यैवोक्तकर्तृत्वनिर्वाहकत्वात्) अजादिरूपकर्मीभूत-कर्तरि=कर्माख्यातकर्मीभूते धात्वर्थकर्तरि चाजापदार्थे तत्=उक्तविशिष्टकर्तृत्वं विशेषणीभवत् कर्माख्यातार्थभूते आश्रयत्वे विशेषणतया भासते-एतत्कर्तृत्व-विशिष्टाश्रयत्वस्याजायां त्त्वास, आश्रयत्वे कर्तृत्वं निरूपितत्वसंबन्धेन विशेषणमित्यर्थः । अत्र च पूर्वम् "कर्तृत्वं व्यापारश्च पृथगेव णिजर्थः" इत्युक्तत्वाद् व्यापारस्याऽपरणिजर्थत्वं ज्ञेयं कर्तृत्वस्यापि णिजर्थत्वादिति।

ये तु "गतिबुद्धि" इत्यादिसूत्रस्य संज्ञाविधायकत्वं वर्णयन्ति तेषामयमाशयः—व्यापार एव णिजर्थस्तत्र धात्वर्थ-क्रियायाःस्वकर्तृत्वनिर्वाहकत्वं संसर्गः, अतो न कर्तुः कर्मत्वं सूत्रान्तरप्राप्तम्।

'याप्यते ग्राममजा' इत्यादौ च स्वनिर्वाह्यकर्तृता-निरूपकत्वसंबन्धेन व्यापारविशेषितो धात्वर्थः कर्तृत्वेऽन्वेति,

चैत्रनिष्ठप्रापणव्यापारनिर्वाह्या या ग्रामवृत्तिसंयोगानुकूला क्रिया तादृशक्रियानु-कूलकर्तृतवाश्रयत्ववती अजेति शाब्दबोधः।

"गतिबुद्ध" इति सूत्रस्य केचिद् द्वितीयाविधायकत्वं वदन्ति, केचिच्च कर्मसंज्ञाविधायकत्वमेव वदन्ति कर्मसंज्ञायां प्राप्तायाम् "कर्मणि द्वितीया" इत्यनेन द्वितीया स्वयमेव प्राप्स्यतीति, तत्र द्वितीयमतं व्याख्यातुमुपक्रमते-ये त्विति । तत्र=णिजर्थव्यापारे । 'यापयति इत्यादौ धात्वर्थक्रियायाः= प्राप्त्याद्यनुकूलक्रियायाः, स्वेति-स्वं प्राप्त्याद्यनुकूलक्रिया तादृशक्रिया निरूपितकर्तृत्वनिर्वाहकत्वं णिजर्थव्यापारेऽस्तीति तेन संबन्धेन णिजर्थव्यापारे तादृशक्रियाया अन्वय इत्यर्थः। अत इति-यतो व्यापारमात्रं णिजर्थोऽतो धात्वर्थक्रियाकर्तुरजादेः कर्मत्वं न सूत्रान्तरप्राप्तमिति "गतिबुद्धि" इति सूत्रेण विधीयते इत्यर्थः। यदि धात्वर्थक्रियानुकूलव्यापारो णिजर्थः स्यात्तदा धात्वर्थक्रियाया व्यापारावच्छेदकत्वेन फलत्वं स्यात् तादृशफलीभूतक्रियाश्रयत्वेनैवाजादीनां कर्मत्वं प्राप्नुयात् फलाश्रयस्यैव कर्मत्वादिति "गतिबुद्धि" इति सूत्रेण कर्मसंज्ञाविधानं न स्यात्, यदा च व्यापारमात्रं णिजर्थस्तदा धात्वर्थक्रियाया णिजर्थव्यापारावच्छेदकत्वाभावेन फलत्वाभावात्तादृशक्रियाश्रयत्वेनाऽजादीनां कर्मत्वं न संभवतीति "गतिबुद्ध" इति सूत्रेण तत् कर्मत्वं विधीयते इति भावः।

उक्तमतेन 'अजा ग्रामं याप्यते' इत्यस्य पदार्थानाह-याप्यत इत्यादिना, स्वं णिजर्थव्यापारस्तादृशव्यापारनिर्वाह्यं यदजानिष्ठं कर्तृत्वं तादृशकर्तृत्व-निरूपकत्वं संबन्धभूतं धात्वर्थे=अजानिष्ठप्राप्त्यनुकूलक्रियायामस्तीति स्वनिर्वाह्यकर्तृतानिरूपकत्वसंबन्धेन णिजर्थव्यापारो धात्वर्थे वर्तते व्यापारविशिष्टैतादृशधात्वर्थस्य चाजानिष्ठकर्तृत्वे निरूपितत्वसंबन्धेनान्वयः

तच्चाश्रयत्वसंबन्धेनाऽजादौ विशेषणतया भासते, तादृशव्यापारे तृतीयान्तार्थस्य चैत्रादिकर्तृत्वस्य धात्वर्थैकदेशे संयोगादिरूपफले च द्वितीयान्तार्थस्य ग्रामवृत्तित्वस्य विशेषणतया भानम्। ण्यन्तोत्तराख्यातस्यापि कर्तृत्वमेवार्थः, तत्र च तस्य वृत्तिः क्लृप्तैव, तच्चोक्तस्य धात्वर्थस्य विशेष्यतया प्रथमान्तपदार्थस्य च विशेषणतया भासते।

न च यक्समभिव्याहृताख्यातोपस्थाप्यकर्तृत्वस्यान्व-

कर्तृत्वस्यैतादृशधात्वर्थनिरूपितत्वात्, तच्च=उक्तविशिष्टकर्तृत्वमाश्रयतासंबन्धेनाऽजायां विशेषणमित्यन्वयः। तादृशेति- तादृशव्यापारे=उक्तधात्वर्थविशेषणीभूतणिजर्थव्यापारे तृतीयान्तार्थचैत्रनिष्ठकर्तृत्वं निरूपकत्वसंबन्धेन विशेषणमस्ति, धात्वर्थैकदेशे संयोगरूपफले च द्वितीयान्तार्थग्रामवृत्तित्वमाश्रयतासंबन्धेन विशेषणमस्तीत्यन्वयः, याधात्वर्थस्य संयोगानुकूलक्रियारूपत्वात्संयोगस्य धात्वर्थैकदेशत्वं विज्ञेयम्। नन्वजादावाश्रयत्वसंबन्धेन यत् कर्तृत्वं भासते तत् कस्यार्थ इत्याशङ्क्याह ण्यन्तोत्तरेऽति, ण्यन्तोत्तराख्यातस्यापि कर्तृत्वमेवार्थस्तदेवाख्यातार्थभूतं कर्तृत्वमत्राऽजायामाश्रयतासंबन्धेन विशेषणतया भासते, याप्यते इति च णिजन्तयगन्तप्रयोगः। तत्र=कर्तृत्वे। तस्य=ण्यन्तोत्तराख्यातस्य। तत्=कर्तृत्वं चोक्तस्य=णिजर्थव्यापारविशेषितस्य धात्वर्थस्य विशेष्यतया भासते-णिजर्थव्यापारविशिष्टधात्वर्थस्य कर्तृत्वेऽन्वयस्योक्तत्वात्, तदेव कर्तृत्वं प्रथमान्ताजादिपदार्थस्य विशेषणतया भासते-आश्रयत्वसंबन्धेन कर्तृत्वस्याजादावन्वस्योक्तत्वात्, 'चैत्रवृत्तिकर्तृत्वनिरूपको यो णिजर्थव्यापारस्तादृशव्यापारेण स्वनिर्वाह्यकर्तृतानिरूपकत्वसंबन्धेन विशिष्टो यो ग्रामवृत्तिसंयोगानुकूलगमनव्यापारस्तदनुकूलकृतिमती अजा' इति शाब्दबोधोदयात्, चैत्रवृत्तिकर्तृत्वनिरूपकप्रापणव्यापारविशिष्टग्रामसंयोगानुकूलगमनानुकूलकृतिमती अजेति यावत्। अपि शब्दाच्चैत्रादिपदोत्तरतृतीयाया अपि कर्तृत्वमेवार्थस्तस्य च निरूपकत्वसंबन्धेन णिजर्थव्यापारेऽन्वय उक्त एवेत्यर्थः।

ननु यदि त्वदुक्तरीत्या 'याप्यते ग्राममजा' इत्यत्र यक्समभिव्याहृताख्यातोपस्थाप्यकर्तृत्वस्याजादावाश्रयत्वसंबन्धेनान्वयः स्यात्तदा 'गम्यते

यबोधोपगमे 'गम्यते चैत्रः' इत्यतोऽपि गमनकर्ता चैत्र इत्यनवयबोधः स्यादिति वाच्यम्, ण्यन्तोत्तरयक्समभिव्याहृताख्यातस्यैव कर्तृत्वान्वयबोधनियामकत्वात्।

अथैवमपि 'अजा याप्यते' इत्यादौ कर्तृत्वस्याख्यातबोध्यत्वे "कर्तरि शप्", इत्यपवादविषयतया यकोऽसाधुतापत्तिः। न च यादृशधातूत्तरं यत् सार्वधातुकं विहितं तादृशधात्वर्थनिरूपितकर्तृत्वस्य तेन विवक्षायामेव "कर्तरि शप्" इत्यादेः शबादिविधायकत्वात्, प्रकृते ण्यन्तसमुदायोत्तरमेवाख्यातं तेन तदर्थनिरूपितकर्तृत्वं च न बोध्यते, चैत्रः' इत्यत्रापि यक्समभिव्याहृताख्यातोपस्थाप्यकर्तृत्वस्याश्रयत्वसंबन्धेन चैत्रेऽन्वयापत्त्या 'गम्यते चैत्रः' इत्यनेन 'गमनकर्ता चैत्रः' इति शाब्दबोधः स्यात् समत्वादित्याशङ्क्याह–न चेति, परिहारमाह–ण्यन्तोत्तरेति, ण्यन्तोत्तरयक्–समभिव्याहृताख्यातस्थले एवाजादौ कर्तृत्वस्याश्रयत्वसम्बन्धेनान्वयो भवतीति नियमाद् न 'गम्यते चैत्रः' इत्यत्र चैत्रे कर्तृत्वान्वयापत्तिः– अत्र णिचोऽभावादित्यर्थः। अत्र तु चैत्रस्य कर्मत्वमेव।

ननु (२६२ पृ॰) यदुक्तम्– "ण्यन्तोत्तराख्यातस्यापि कर्तृत्वमेवार्थः" इति तत्र अजा याप्यते' इत्यत्रापि यगन्तण्यन्तोत्तराख्यातस्य कर्तृत्वमेवार्थः स्यात्तथा चाख्यातस्य कर्तृत्वार्थकत्वे "कर्तरि शप्" इत्यनेन शबेव स्याद् न तु यगिति तथा चात्र वर्तमानस्य यकोऽसाधुत्वं स्यादित्याशङ्कते–अथेति । ननु यादृशयादिधातूत्तरं यत्=तिङादिसार्वधातुकं (प्रत्ययः) विहितं स्यात् तादृशधात्वर्थनिरूपितकर्तृत्वस्य=तिङादिप्रकृतिभूतधात्वर्थनिरूपितकर्तृत्वस्य तेन=तिङादिना विवक्षायामेव शबादिर्भवति यथा 'भवति' इत्यत्र तिङ्प्रकृतिभूतभूधात्वर्थनिरूपितकर्तृत्वस्य विवक्षायां शप् भवति, प्रकृते='अजा याप्यते' इत्यत्र तु ण्यन्तसमुदायोत्तरमेवाख्यातमस्ति न तु केवलधातूत्तरमिति न तेन=आख्यातेन तिङा तदर्थनिरूपितकर्तृत्वम्=धात्वर्थनिरूपितकर्तृत्वं बोध्यते किं तु स्वनिर्वाह्यकर्तृतानिरूपकत्वसंबन्धेन ण्यर्थव्यापारविशिष्टो यो धात्वर्थस्तादृशधात्वर्थेन निरूपितत्वसंबन्धेन विशिष्टं यत् कर्तृत्वं तदेव बोध्यते इति नात्र तादृशापवादविषयता="कर्तरि शप्" इत्याद्यपवादविषयता,

अपि तु ण्यर्थविशेषितधात्वर्थान्वितकर्तृत्वमेवेति न तादृशाप-वादविषयतेति वाच्यम्, कर्माख्यातस्थले विशेष्यविशेषण-भाववैपरीत्येन व्यापारविशेषितक्रियाया अपि ण्यन्तधात्वर्थत्वात्।

मैवम्– लकारसामान्यवृत्त्या यत्र कर्तृत्वं प्रतीयते तत्रैव "कर्तरि शप्" इत्यस्य शब्विधायकता, अत्र (च) कर्मत्वसमशीले कर्तृत्वे आत्मनेपदत्वेन शक्तिः। वस्तुतः– फलव्यापारयोः पृथग् धात्वर्थतामते 'गच्छति' इत्यादाविव 'गम्यते' इत्यादावपि लकारेणाश्रयत्वरूपकर्तृत्वाभिधाने

अत्रोक्तरीत्या शपः प्राप्तिरेव नास्ति येन यकोऽसाधुत्वं स्यादिति यावदित्याशङ्क्याह- न चेति । परिहारमाह-कर्मेति, कर्त्राख्यातस्थले णिजर्थव्यापारस्यैव विशेष्यत्वं भवति कर्तर्यऽन्वयित्वात् कर्माख्यातस्थले च धात्वर्थस्यैव विशेष्यत्वं भवति कर्मण्यन्वयित्वादिति विशेष्यविशेषण-भाववैपरीत्याद् विशेष्यभूतस्यैव समुदायार्थत्वाच्च स्वनिर्वाह्यकर्तृता-निरूपकत्वसंबन्धेन णिजर्थव्यापारविशिष्टायाः क्रियायाः=धात्वर्थस्य ण्यन्तधात्वर्थत्वं प्राप्तं तथा च 'याप्यते' इत्यत्राख्यातेन यदि ण्यर्थविशेषितधा-त्वर्थान्वितकर्तृत्वं बोध्यते तदा धात्वर्थक्रियानिरूपितकर्तृत्वमपि बोध्यते एवेति प्राप्तं धात्वर्थक्रियाया ण्यन्तधात्वर्थत्वादेव तथा चाख्यातप्रकृतिभूत-धात्वर्थनिरूपितकर्तृत्वबोधनस्य शप्प्राप्तिकारणस्य सत्त्वात् शप्प्राप्त्यात्र यकोऽसाधुत्वं तदवस्थमेवेत्यर्थः।

परिहरति– मैवमिति, यथा 'भवति' 'एधते' इत्यादौ लकारसामान्य-वृत्त्यैव कर्तृत्वं प्रतीयते न त्वत्र लकारस्य परस्मैपदत्वेनात्मनेपदत्वेन रूपेण वा कर्तरि शक्तिरित्यत्र शब् भवति, अत्र='याप्यते' इत्यत्र तु कर्मणि यगस्तीत्यजावृत्तिकर्तृत्वं कर्मत्वस्वरूपमेवास्तीति तादृशकर्तरि "भावकर्मणोः" इति सूत्रेणात्मनेपदस्य प्राप्तत्वेनात्मनेपदत्वेनैव रूपेण लकारस्य कर्तृत्वे शक्तिरस्ति न तु लत्वेन रूपेणेति नायं शब्विषयो येन यकोऽसाधुत्वं स्यादित्यर्थः । स्वाभिप्रायमाह- वस्तुत इति, फलव्यापारयोर्धातोरेव शक्तिस्वीकारे लकारस्य कर्तृत्वमेवार्थः स्यादिति यथा 'गच्छति' इत्यत्र लकारं कर्तृत्वाभिधायकमिति शबेव भवति न तु यक् तथा 'गम्यते' 'वाप्यते'

यगऽनुपपन्न इति परस्मैपदसमभिव्याहृतधातुना यादृशविशिष्टोर्थः प्रत्याय्यते तादृशविशिष्टार्थान्वितकर्तृत्वाभिधानमेव शब्विषयः एवं च प्रकृतेऽपि नानुपपत्तिरिति ध्येयम्।

'ग्रामो याप्यते' 'अर्थो बोध्यते' इत्यादौ भावना-विशेष्यतया ग्रामादेर्भानेऽपि गमनादिकर्तुः कर्मत्वविवक्षायां तस्यैवाख्यातार्थविशेष्यतया बोधो व्युत्पन्नः– "ण्यन्ते कर्तुश्च कर्मणः" इत्यनुशासनात्, अतो 'अजां ग्रामो याप्यते' 'शिष्यमर्थो बोध्यते' इत्यादयो न प्रयोगाः। 'ग्रामो याप्यते' 'अर्थो बोध्यते' इत्यादौ फलं विषयत्वादिरूपं च मुख्यभाक्तसाधारणं कर्मत्वमेवाख्यातार्थः।

इत्यादावपि लकारस्य कर्तृत्वाभिधायकत्वाच्छबेव स्यादिति यगऽनुपपत्तिः स्यात् तस्मात् 'गच्छति' इत्यादौ परस्मैपदसमभिव्याहृतधातुना यादृशः= ग्रामादिवृत्तिसंयोगाद्यनुकूलचैत्रादिवृत्तिव्यापाररूपो विशिष्टोर्थः प्रतिपाद्यते तादृशविशिष्टार्थेन=ग्रामादिवृत्तिसंयोगाद्यनुकूलव्यापारेण धात्वर्थेन निरूपितत्व-संबन्धेन विशिष्टं यत् कर्तृत्वं तादृशकर्तृत्वस्याख्यातेनाभिधाने एव शब् भवतीति प्रकृते='याप्यते' 'गम्यते' इत्यादौ चाख्यातेन 'गच्छति' इत्यादिपरस्मैमदस्थलीयकर्तृत्वसदृशकर्तृत्वं नाभिधीयते इति न शपः प्राप्तिरिति न यकोऽनुपपत्तिरित्यर्थः ।

'अजां ग्रामो याप्यते' 'शिष्यमर्थो बोध्यते' इत्यादयः प्रयोगा न भवन्तीति प्रतिपादनार्थमाह-ग्राम इति, 'ग्रामो याप्यते' इत्यादौ कर्माख्यातस्थले कर्मण एव ग्रामादेर्यद्यपि भावनाविशेष्यत्वमस्ति तथापि यदि गमनादिकर्तृ-वाचकमजादिपदं प्रयुक्तं स्यात्तदा तस्यैव=गमनादिकर्तुरेव "ण्यन्ते कर्तुश्च कर्मणः" इत्यनुशासनबलादाख्यातार्थविशेष्यत्वं स्यात्– तत्रैव लादीनां जायमानत्वात् । ण्यन्ते=ण्यन्तावस्थायां कर्तृभूते कर्मणि किं वा कर्मभूते कर्तरि लादयो भवन्तीत्यनुशासनार्थः । न च 'अजां ग्रामो याप्यते' इत्यादौ गमनकर्तृभूताऽजाया आख्यातार्थविशेष्यत्वं संभवति तद्वाचकाऽजापदस्य प्रथमान्तत्वाभावादिति 'अजां ग्रामो याप्यते' इत्यादयः प्रयोगा न भवन्ति किं तु अजा ग्रामं याप्यते इति, तथा च 'अजा याप्यते' 'ग्रामो याप्यते'

फलव्यापारयोः पृथग् धात्वर्थतामते आश्रयत्वमेवाख्यातार्थः, धात्वर्थव्यापारविशेष्यतया तादृशाश्रयत्वविशेषणतया च धात्वर्थफलस्य भानम्। ण्यर्थव्यापारस्य जन्यतासंबन्धेनैव धात्वर्थक्रियाज्ञानादिविशेषणत्वं पूर्ववदेव। 'अजां ग्रामो याप्यते' इत्यादिकस्तु न प्रयोगः– द्वितीयया कर्मत्वबोधने धात्वर्थव्यापारविशेष्यतया ण्यर्थबोधसामग्र्याः प्रयोजकत्वात्, यगादिसमभिव्याहारः स्थले च धात्वर्थविशेषणतयैव ण्यर्थस्य बोधात्। ण्यन्तधातोः सकर्मकत्वे तदुत्तरभावाख्यातस्य "भावे चाकर्मकेभ्यः" इत्यनुशासनेनाऽसाधुत्वाच्च न तादृशप्रयोगः।

'अजा ग्रामं याप्यते' 'इत्येवं प्रयोगास्तु भवन्ति, 'अजां ग्रामो याप्यते' 'अजा ग्रामो याप्यते' इत्यादयस्तु प्रयोगा न भवन्ति। एवमन्यत्रापि बोध्यम्। 'ग्रामो याप्यते' इत्यादिस्थलीयाख्यातार्थमाह– ग्रामेति, विषयत्वादीत्यादिपदात् संयोगाद्याश्रयत्वं ग्राह्यं तथा च 'ग्रामो गम्यते' इत्यत्र संयोगाश्रयत्वरूपं यत् फलम् अर्थो 'बोध्यते' इत्यत्र च विषयत्वरूपं यत् फलं तत् कर्मत्वरूपमेव तदेवाख्यातार्थस्तदाश्रयत्वं ग्रामादौ ज्ञेयम्। मुख्यभाक्तसाधारणं विषयत्वादिरूपं कर्मत्वं फलमेवाख्यातार्थ इत्यन्वयः। परसमवेतक्रियाफल-(संयोगादि) शालित्वाद् ग्रामादीनां मुख्यं कर्मत्वम्, अर्थादीनां च भाक्तम्=औपचारिकं कर्मत्वं क्रियाजन्यफलशालित्वासंभवादित्यर्थः।

फलव्यापारयोरुभयोरपि पृथग् धात्वर्थतामते फलस्य धात्वर्थत्वमेव प्राप्तमिति पारिशेष्यादाश्रयत्वमेव 'ग्रामे याप्यते' इत्यादावाख्यातार्थ इत्याह– फलव्यापारयोरिति । 'ग्रामो याप्यते' इत्यादौ यानादिव्यापारजन्यसंयोगाश्रयो ग्राम इति बोधोदयाद् व्यापारः संयोगे संयोगश्चाश्रयत्वे विशेषणविधया भासते इति धात्वर्थीभूतस्य संयोगादिरूपफलस्य व्यापारविशेष्यत्वमाख्यातार्थाऽऽश्रयत्वविशेषणत्वं च प्राप्तमित्याह– धात्वर्थेति । धात्वर्थीभूता गमनज्ञानादिरूपा यात्र क्रियास्ति सा णिजर्थव्यापारजन्यास्तीति जन्यतासंबन्धेन धात्वर्थक्रियायां णिजर्थव्यापारस्यान्वयो ज्ञेय इत्याह– ण्यर्थेति । पूर्ववदेव=(२६१पृ॰) स्वनिर्वाह्येत्यादिनोक्तरीत्यैव। 'अर्थो बोध्यते' इत्यत्र च ण्यर्थव्यापारजन्यज्ञानजन्यविषयत्वाश्रयोऽर्थ इति शाब्दबोधः। पूर्वोक्तं पुनः स्मारयति–

'ग्रामो याप्यते' इति भावाख्यातप्रयोगस्त्विष्ट एव-ण्यन्तस्य कर्मासमभिव्याहारात्। एकदा कर्तृत्वकर्मत्वबोधकताया आख्यातस्याऽव्युत्पन्नतया 'अजा ग्रामो याप्यते' इत्यादयो न प्रयोगाः। एवम्– 'तण्डुलः सहायेन पाच्यते चैत्रेण' इत्यादौ

'अजां ग्रामो याप्यते' इत्यादिकस्तु न प्रयोग इति। अत्र हेतुमाह– द्वितीययेति, यत्र णिजर्थव्यापारस्य धात्वर्थव्यापारविशेष्यतया बोधकसामग्री भवति तत्रैव द्वितीयया कर्मत्वबोधो भवति (कर्मवाचकपदाद् द्वितीया भवति) यथा 'अजां ग्रामं यापयति चैत्रः' इत्यत्राजावृत्तिव्यापारानुकूलव्यापारवांश्चैत्र इति बोधोदयाद् अजावृत्तिधात्वर्थव्यापारविशेष्यतया चैत्रवृत्तिणिजर्थव्यापारस्य भानं भवतीत्यत्र द्वितीयया कर्मत्वबोधो भवति (कर्मवाचकाजापदाद् द्वितीया भवति)। 'अजां ग्रामो याप्यते' इत्यत्र तु (२६१पृ॰) उक्तरीत्या प्रत्युत णिजर्थव्यापारस्य धात्वर्थव्यापारे विशेषणत्वमेवास्ति न तु धात्वर्थव्यापारविशेष्यत्वमिति द्वितीयया कर्मत्वबोधनासंभवान्न द्वितीययाप्राप्तिरिति न 'अजां ग्रामो याप्यते' इत्यादिप्रयोगापत्तिरित्याह– यगादीति । 'अजां ग्रामो याप्यते' इत्यस्याऽसाधुत्वे व्याकरणं प्रमाणयति–ण्यन्तधातोरिति, "लःकर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रेण लकाराः सकर्मकधातुभ्यः कर्मणि कर्तरि च भवन्ति, अकर्मकधातुभ्यश्च भावे कर्तरि च भवन्तीति प्रतिपाद्यते इति सकर्मकधातुभ्यो भावे लकारस्याऽसाधुत्वं प्राप्तम्, 'अजां ग्रामो याप्यते' इत्यत्र च धातुः सकर्मक एव ण्यन्त इति तदुत्तरभावाख्यातस्याप्यसाधुत्वं प्राप्तमेवेति तादृशप्रयोगाः='अजां ग्रामो याप्यते' इति प्रयोगो न भवतीत्यर्थः। ण्यन्तकर्मणो ह्यविवक्षायां तु सकर्मकण्यन्तधातूत्तरमपि भावाख्यातस्य साधुत्वमेवेत्याह– ग्राम इति, 'ग्रामो याप्यते' इत्यत्र ण्यन्तकर्मवाचकाऽजापदस्याऽसमभिव्याहारात् सकर्मकण्यन्तयाधातूत्तरवर्तमानस्यापि भावाख्यातस्य साधुत्वमेव, ग्रामस्य तु न ण्यन्तकर्मता किं तु धात्वर्थकर्मतैव ण्यन्तकर्मत्वं त्वजादीनामेव धात्वर्थकर्तृभूतानां स्यादित्यर्थः । 'अजा ग्रामो याप्यते' इत्यस्याऽसाधुत्वे हेतुमाह– एकदेति, 'अजा ग्रामो याप्यते' इत्यत्राख्यातेनैवैकदाऽजायाः कर्तृत्वं ग्रामस्य च कर्मत्वं बोधनीयं कर्मत्वबोधकद्वितीयाया अभावात् न चैकदैकप्रत्ययेनाख्यातादिनोभयार्थस्य कर्तृत्वकर्मत्वादिरूपस्य बोधनं संभवति–"सकृदुच्चरितः शब्दः

धात्वर्थे सहायादिकर्तृकत्वस्य तद्विशेषणण्यर्थव्यापारे विशेषणतया च चैत्रादिकर्तृकत्वस्य तृतीयान्तार्थस्य बोधः शेषं पूर्ववदिति दिक्।

'ग्रामं गच्छति' इतिवत् 'स्वं गच्छति' इति प्रयोगवारणाय परसमवेतत्वमपि द्वितीयार्थ इष्यते तस्य च धात्वर्थेऽन्वयः, परत्वे चैकदेशेऽप्याऽऽकाङ्क्षावैचित्र्यात् प्रकृत्यर्थस्य प्रतियोगितयाऽन्वयः, एवं च 'ग्रामं गच्छति चैत्रः' इत्यादौ

सकृदर्थगमयति" "इतिनियमादित्यर्थः । 'अजां ग्रामं याप्यते' इत्यत्र तु ग्रामस्य कर्मत्वं द्वितीयया बोध्यते इति नैकप्रत्ययस्य कर्मत्वकर्तृत्वोभय-बोधकत्वापत्तिर्येनाऽसाधुत्वं स्यादित्यर्थः । 'तण्डुलः सहायेन पाच्यते चैत्रेण' इत्यत्रत्यपदार्थानाह– एवमिति, अत्राख्यातस्य कर्मणि जातत्वात्तण्डुलविशेष्यक एव बोधः, आख्यातार्थश्चाश्रयत्वं तथा च–'चैत्रकर्तृणिजर्थव्यापारप्रयोज्यो यः सहायकर्तृकपाकात्मक- व्यापारस्तादृशव्यापारजन्यविक्लित्याश्रयस्तण्डुलः' 'इति बोधोदयात् पूर्वपूर्वपदार्थस्योत्तरोत्तरपदार्थे विशेषणत्वाच्च धात्वर्थव्यापारे सहायकर्तृकत्वस्य विशेषणतया बोधः तद्विशेषणण्यर्थव्यापारे= धात्वर्थविशेषणी-भूतणिजर्थव्यापारे च तृतीयान्तार्थस्य चैत्रकर्तृकत्वस्य विशेषणतया बोधो भवति । शेषम्=आश्रयत्वमाख्यातार्थ इत्यादि सर्वे पूर्ववदेव विज्ञेयमित्यर्थः।

ग्रामनिष्ठसंयोगस्य चैत्रेऽपि सत्त्वात् 'ग्रामं गच्छति' इतिवत् 'चैत्रश्चैत्रं गच्छति' 'चैत्रः स्वं गच्छति' इत्यादिप्रयोगः स्यादेवेति तद्वारणाय परसमवेतत्वमपि द्वितीयार्थः, अर्थात् परसमवेतक्रियाफलशालित्वं कर्मत्वमिति वक्तव्यं तथा ग्रामनिष्ठसंयोगजनकक्रियाया ग्रामान्यचैत्रसमवेतत्वेन ग्रामस्य कर्मत्वापत्त्या 'ग्रामं गच्छति' इति प्रयोगो भवति चैत्रनिष्ठतादृश-संयोगजनकक्रियायाश्चैत्रे एव समवेतत्वेन चैत्रान्यसमवेतत्वाभावात् चैत्रस्य कर्मत्वानापत्त्या 'चैत्रः स्वं गच्छति' इत्यादयः प्रयोगा न भवन्तीत्याह– ग्राममिति । तस्य=परसमवेतत्वस्य धात्वर्थे=संयोगादिफलजनकक्रियायामन्वयः। तादृशपरत्वे च प्रकृत्यर्थस्य=द्वितीयाप्रकृत्यर्थस्य ग्रामादेः प्रतियोगितया=प्रतियोगि-त्वरूपेण स्वप्रतियोगिकत्वसंबन्धेन चान्वयः– परत्वस्य भेदरूपत्वात् अभावे च प्रतियोगिनः स्वप्रतियोगिकत्वसंबन्धेनान्वयस्य प्रतिपादितत्वादित्याह–

ग्रामभिन्नसमवेता ग्रामनिष्ठसंयोगजनिका या क्रिया तदाश्रयतावांश्चैत्र इत्यन्वयबोधः। स्वनिष्ठसंयोगजनकक्रियायां स्वभिन्नसमवेतत्वस्य बाधात् 'स्वमात्मानं गच्छति' इति न प्रयोगः। यत्र चोभयकर्मभ्यां मल्लयोः संयोगस्तत्र मल्लान्तरसमवेतक्रियायाः स्वनिष्ठसंयोगजनिकायाः स्वभिन्नसमवेतत्वेऽपि तादृशक्रियाश्रयतायाः स्वस्मिन् बाधात् 'मल्लः स्वं गच्छति' इति न प्रयोगः।

परत्वे चेति। ननु "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति नियमादत्र द्वितीयार्थैकदेशे परत्वे प्रकृत्यर्थस्य कथमन्वयः स्यादित्याशङ्क्याह– एकदेशेपीति, आकाङ्क्षावैचित्र्यात्=बोधवैचित्र्यादेकदेशेपि पदार्थान्तरान्वय इष्ट एवेति पूर्वं प्रतिपादितमित्यर्थः । 'ग्रामं गच्छति चैत्रः' इत्यस्य वाक्यार्थमाह– एवं चेति। संयोगस्य द्विष्ठत्वेन ग्रामनिष्ठसंयोगस्य स्वनिष्ठत्वेपि तादृशस्वनिष्ठसंयोगजनकक्रियायां स्वान्यसमवेतत्वं नास्ति कर्मत्वं च स्वान्यसमवेतक्रियाजन्यसंयोगादिफलशालित्वे एव भवतीति 'स्वमात्मानं गच्छति' इति प्रयोगापत्तिर्नास्तीत्युपसंहरन्नाह स्वनिष्ठेति। एककर्मजसंयोगस्थलीयातिप्रसङ्गं निवार्योभयकर्मजसंयोगस्थलीयातिप्रसङ्गनिवारणायाह–यत्रेति, मल्लान्तरसमवेतक्रियायाः स्वनिष्ठसंयोगजनिकायाः स्वभिन्नसमवेतत्वेन तादृशक्रियाश्रयतायाः=स्वनिष्ठसंयोगजनकक्रियाश्रयतायाः स्वस्मिन् बाधात् 'मल्लः स्वं गच्छति' इति प्रयोगो न भवति– संयोगस्योभयकर्मजत्वे स्वनिष्ठसंयोगजनकक्रियाश्रयत्वं यस्मिन् स्यात् तस्यैव स्वापेक्षया कर्मत्वसंभवाद् यथा चैत्रमैत्रोभयकर्मजसंयोगस्थले चैत्रनिष्ठसंयोगस्य मैत्रसमवेतक्रियाजन्यत्वे तादृशक्रियाश्रयत्वं मैत्रे एव स्यादिति मैत्रस्य कर्मत्वापत्त्या 'चैत्रो मैत्रं गच्छति' इति प्रयोगः संभवति, तथा 'मैत्रश्चैत्रं गच्छति' इत्यपि। "स्वभिन्नसमवेतत्वेऽपि" इत्यत्र 'स्वभिन्नसमवेतत्वेन' इति पाठो युक्तः।

ननु स्वनिष्ठसंयोगजनिकायाः स्वसमवेतायाः क्रियायाः स्वस्मिन्नेव समवेतत्वेन परसमवेतत्वं न संभवतीति तत्र परसमवेतत्वस्याऽयोग्यतया=बाधात् तदभानेपि=परसमवेतत्वांशस्याभानेप्यऽबाधितं यत् स्वनिष्ठसंयोगजनकत्वं तावन्मात्रं विषयीकृत्यापि स्वनिष्ठसंयोगजनकक्रियाश्रयतावांश्चैत्र इति

न च स्वनिष्ठसंयोगजनकस्वसमवेतक्रियायां स्वभिन्नसमवेतत्वस्याऽयोग्यतया तदभानेऽप्यऽबाधितं स्वनिष्ठ-संयोगजनकत्वं विषयीकृत्य शाब्दबोधसंभवात् तदर्थमात्रतात्पर्येण 'स्वं गच्छति' इति प्रयोगो दुर्वार एवेति वाच्यम्, परसमवे-तत्वांशाविषयकस्य द्वितीयाधीनफलजनकत्वबोधस्य कुत्राप्य-नभ्युपगमेन तादृशबोधे तद्भासकसामग्र्या अप्यपेक्षणीयत्वात्।

अथ स्वस्यापि द्वित्वावच्छिन्नस्वभेदवत्त्वात् 'स्वं गच्छति' इति प्रयोगस्य दुर्वारतया द्वितीयाप्रकृत्यर्थस्य प्रकृत्यर्थ-

---

शाब्दबोधसंभवात् तदर्थमात्रतात्पर्येण=स्वनिष्ठसंयोगजनकत्वमात्रतात्पर्येण 'स्वं गच्छति' इति प्रयोगः स्यादेव—स्वसमवेतक्रियायाः स्वस्मिन्नपि संयोगजनकत्वात् तादृशसंयोगरूपफलशालित्वेन स्वस्यापि कर्मत्वसंभवादित्याशङ्क्याह—न चेति। परिहारमाह— परसमवेतत्वेति, परसमवेतत्वांशमविषयीकृत्य द्वितीयया क्वचिदपि धात्वर्थनिष्ठफलजनकत्वस्य बोधो न भवतीति तादृशबोधे= द्वितीयाधीनफलजनकत्वबोधे तद्भासकसामग्र्याः=परसमवेतत्वांशभासकसामग्र्या अपेक्षा भवत्येव तथा च तादृशसामग्र्या परसमवेतत्वांशभाने जाते स्वस्य च स्वस्मात् परत्वाभावात् कर्मत्वानापत्त्या 'स्वं गच्छति' इति प्रयोगापत्तिर्नास्तीत्यर्थः।

द्वित्वावच्छिन्नप्रतियोगिताकभेदमादाय शङ्कते—अथेति, स्वस्य चैत्रस्य चैत्रप्रतियोगिकभेदवत्त्वविरहेऽपि द्वित्वावच्छिन्नस्वभेदवत्त्वात्=चैत्रघटोभयभेदव-त्त्वात् स्वस्मिन्नपि स्वभेदः प्राप्त इति स्वनिष्ठसंयोगजनकक्रियायाः स्वभिन्नस्वसमवेतत्वे प्राप्ते तादृशक्रियाजन्यसंयोगवत्त्वेन स्वस्यापि कर्मत्वापत्त्या 'स्वं गच्छति' इति प्रयोगः स्यादेव तथा च द्वित्वावच्छिन्नस्वभेदमादाय प्राप्तस्य 'स्वं गच्छति' इति प्रयोगस्य वारणाय परत्वरूपभेदे द्वितीयाप्रकृत्यर्थस्य ग्रामादेः प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वयो वाच्यः यथा 'ग्रामं गच्छति' इत्यत्र प्रकृत्यर्थतावच्छेदकं यद् ग्रामत्वं तादृशग्रामत्वावच्छिन्ना या ग्रामनिष्ठा भेदप्रतियोगिता तादृशप्रतियोगिताकत्वं भेदेऽस्तीति तादृशप्रतियोगिताकत्वसंबन्धेन (ग्रामस्य) भेदेऽन्वयो वक्तव्यस्तथा च स्वनिष्ठे द्वित्वावच्छिन्नस्वभेदे द्वित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन स्वान्वयसंभवेऽपि 'स्वं गच्छति' इत्यत्र प्रकृत्यर्थतावच्छेदकं यत् स्वत्वं

तावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेनैव भेदेऽन्वयो वाच्यस्तथा च 'चैत्रो द्रव्यं गच्छति' मल्लो मल्लं गच्छति' इत्यादिवाक्यस्याऽप्रमाणतापत्तिः–चैत्रमल्लादिनिष्ठक्रियायाः प्रकृत्यर्थतावच्छेदकीभूतद्रव्यत्वमल्लत्वाद्यवच्छिन्नभिन्नाऽसमवेतत्वात्,

तादृशस्वत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन भेदे स्वाऽन्वयस्तु न संभवति भेदस्य चात्र प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेनैव प्रकृत्यर्थविशिष्टस्य ग्राह्यत्वमिति 'स्वं गच्छति' इति प्रयोगस्य वारणे कृते 'चैत्रो द्रव्यं गच्छति' मल्लो मल्लं गच्छति' इत्यादीष्टस्य प्रयोगस्याऽप्रामाण्यं स्यादित्याह–तथा चेति। अप्रामाण्ये हेतुमाह–चैत्रमल्लादीति, उक्तरीत्या संयोगादिरूपफलजनकक्रियाया द्वितीयाप्रकृत्यर्थतावच्छेदकावच्छिन्नभिन्न-समवेतत्वमपेक्ष्यते तादृशक्रियाजन्यफलशालिन एव च कर्मत्वमिष्टम् 'चैत्रो द्रव्यं गच्छति' इत्यत्र च प्रकृत्यर्थतावच्छेदकं द्रव्यत्वं द्रव्यत्वावच्छिन्न भिन्नसमवेतत्वं च द्रव्यनिष्ठसंयोगजनकक्रियायां नास्ति। तादृश क्रियायाश्चैत्रे सत्त्वात् तत्र चैत्रे द्रव्यत्वस्यापि सत्त्वादिति 'चैत्रो द्रव्यं गच्छति' इति प्रयोगो न स्यादेव तथा मल्लनिष्ठसंयोगजनकक्रियायां मल्लत्वावच्छिन्नभिन्नसमवेतत्वं नास्ति तादृशक्रियाश्रये मल्लान्तरेपि मल्लत्वस्य सत्त्वादेवेति 'मल्लो मल्लं गच्छति' इत्यपि प्रयोगो न स्यादित्यर्थः। ननु चैत्रे द्रव्यत्वावच्छिन्न-प्रतियोगिताकभेदाभावेऽपि मल्ले च मल्लत्वावच्छिन्नप्रतियोगिताकभेदाभावेऽपि तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदस्य सत्त्वेन भेदे प्रकृत्यर्थद्रव्यादेस्तद्-व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वयं वक्ष्याम इति 'चैत्रो द्रव्यं गच्छति' इत्यादिप्रयोगस्य नानुपपत्तिरित्याशङ्क्याह–तत्तद्व्यक्तित्वेति, द्रव्यादीनां प्रकृत्यर्थानां तद्व्यक्तित्वेन रूपेणोपस्थित्यभावेपि 'चैत्रो द्रव्यं गच्छति' इत्यत्र शाब्दबोधो जायते एवेति भेदे द्रव्यादीनां तद्व्यक्तित्वावच्छिन्न-प्रतियोगिताकत्वसंबन्धेनान्वयो न संभवति किं तु द्रव्यत्वाद्यवच्छिन्न-प्रतियोगिताकत्वसंबन्धेनेवेत्युक्तमप्रामाण्यं तदवस्थमेवेत्यर्थः। ननु द्रव्यादीनां तद्व्यक्तित्वेन रूपेणोपस्थित्यभावेऽपि शाब्दबोधो भविष्यति–तद्व्यक्तित्वस्य संबन्धघटकत्वेन तदुपस्थित्यपेक्षाभावादित्याशङ्क्याह–उक्तेति, उक्तयुक्त्या= तत्संसर्गावच्छिन्नेत्याद्युक्तयुक्त्या, संसर्गतात्पर्यज्ञानानुरोधेन संसर्गघटक-पदार्थोपस्थितेरपि शाब्दबोधेऽपेक्षा भवत्येवेति तद्व्यक्तित्वानुपस्थितौ शाब्दबोधासंभवादित्यर्थः। तद्व्यक्तित्वेन ग्रहणासंभवे हेत्वन्तरमाह–एकेति,

तत्तद्व्यक्तित्वानुपस्थितावपि शाब्दबोधोदयेन तत्त-द्व्यक्तित्वावच्छिन्नप्रतियोगितासंबन्धेनाऽन्वयोपगमासंभवात्, उक्तयुक्त्या संबन्धघटकोपस्थितेरपि शाब्दबोधेऽपेक्षितत्वात्, एकधर्मावच्छिन्नप्रतियोगिताया अन्यधर्मावच्छिन्नसंसर्गत्वे मानाभावाच्च, प्रतियोगिविशेषिताभावबुद्धेर्विशिष्टवैशिष्ट्या-

---

एकपदमन्यपरं ज्ञेयम्, अत्र हि भेदे द्रव्यत्वावच्छिन्न- स्यान्वये प्रतियोगितैव संसर्गस्तत्रान्यधर्मावच्छिन्ना प्रतियोगिता अन्यधर्मावच्छिन्नस्य संसर्गो न भवतीति तद्व्यक्तित्वावच्छिन्नप्रतियोगितासंबन्धेन द्रव्यत्वावच्छिन्नस्य भेदेऽन्वयो न संभवतीत्यर्थः। अत्र प्रमाणमाह—प्रतियोगिविशेषितेति, पूर्वमेव इदं वाक्यं व्याख्यातं तथा चात्र द्रव्यत्वावच्छिन्नभेदबोधे द्रव्यत्वस्यैव भेद्रप्रतियोगितावच्छेकत्वेन भानं संभवति न तु तद्व्यक्तित्वस्येत्यर्थः। उक्तमुपसंहरन्नाह—अन्वयितेति, 'चैत्रो द्रव्यं गच्छति' इत्यत्र द्वितीयार्थभेदे परत्वस्वरूपे द्रव्यस्यान्वयः प्रतियोगितासंबन्धेन कर्तव्य इति अन्वयितावच्छेदकं यद्द्रव्यत्वं तदवच्छिन्नप्रतियोगिताया एव संबन्धत्वं संभवति न तु न तु अन्वयितानवच्छेदक यत् तद्व्यक्तित्वं तदवच्छिन्नाया अपि, तथा च 'चैत्रो द्रव्यं गच्छति' इत्यत्र तद्व्यक्तित्वावच्छिन्नप्रतियोगि- ताकभेदग्रहणासंभवाद् द्रव्यत्वावच्छिन्नप्रतियोगिताकभेद एव ग्राह्यस्तादृशभेदस्तु चैत्रे नास्तीत्यप्रामाण्यं स्यादेव, एवमेव 'मल्लो मल्लं गच्छति' इत्यस्याप्रामाण्यं विज्ञेयमित्यर्थः। इत्येवमाशङ्क्य परिहरति—तर्हीति, क्रियान्वयिभेद- प्रतियोगितावच्छेदकत्वं द्वितीयार्थो न तु परत्वम्, क्रियान्वयिनः क्रियाश्रयस्य चैत्रादेर्भेदः क्रियान्वयिभेदः, क्रियान्वयिभेदप्रतियोगितावच्छेदकत्वस्य द्वितीयार्थभूतस्यात्र क्रियायामेवान्वयो ज्ञेयः। भेदश्च स्वनिष्ठसंयोगजनकक्रियावान्न इत्याकारको ग्राह्य एतादृशभेद- प्रतियोगितावच्छेदिका च क्रियैव एतादृशभेदश्च ग्रामादौ फलशालिनि कर्मभूतपदार्थे वर्तते इति भेदे प्रकृत्यर्थस्य ग्रामादेराधेयतासंबन्धेनान्वय इत्यर्थः, परसमवेतक्रियाफलशालित्वं कर्मत्वमिति न वक्तव्यं किं तु स्वनिष्ठ- भेदप्रतियोगितावच्छेदकक्रियाफलशालित्वं कर्मत्वमिति वक्तव्यमिति यावत्, तथा च 'ग्रामं गच्छति चैत्र' इत्यत्र स्वनिष्ठसंयोगजनकक्रियावान्न इत्याकारकभेदश्चैत्रे तु नास्त्येव चैत्रस्य ग्रामनिष्ठसंयोगजनकक्रियाश्रयत्वादेव किं तु तादृशभेदो ग्रामे वर्तते ग्रामस्य क्रियाश्रयत्वाभावादिति ग्रामवृत्तिता-

वगाहित्वनियमात्, अन्वयिताऽनवच्छेदकावच्छिन्नप्रतियोगितायाः संबन्धत्वासंभवाच्चेति चेत्?, तर्हि क्रियान्वयिभेदप्रतियोगितावच्छेदकत्वमेव द्वितीयार्थोऽस्तु भेदे प्रकृत्यर्थस्याधेयतासम्बन्धेनान्वय न काचिदनुपपत्तिः।

न चैवमपि 'विहगो भूमिं प्रयाति' इति वत् 'विहगो विहगं गच्छति' इति प्रयोगो दुर्वारः–विहगनिष्ठभूमिसंयोग-

---

दृशभेदप्रतियोगी क्रियावान् चैत्र एव चैत्रनिष्ठाया भेदप्रतियोगिताया अवच्छेदिका च चैत्रनिष्ठा ग्रामवृत्तिसंयोगजनिका सा क्रियैव तादृशक्रियाजन्यसंयोगाश्रयत्वेन ग्रामस्य कर्मत्वसंभवात् 'ग्रामं गच्छति चैत्रः' इति प्रयोग उपपन्नः। एवं द्रव्यनिष्ठो यः स्वनिष्ठसंयोगजनकक्रियावान्न इत्याकारकभेदस्तत्प्रतियोगितावच्छेदिका या चैत्रनिष्ठा क्रिया तज्जन्यसंयोगाश्रयत्वेन द्रव्यस्य कर्मत्वात् 'चैत्रो द्रव्यं गच्छति' इति प्रयोगोप्युपपन्नः। एवं १ मल्लान्तरनिष्ठसंयोगस्य २ मल्लान्तरनिष्ठक्रियाजन्यत्वेन १ मल्लान्तरनिष्ठो यः स्वनिष्ठसंयोगजनकक्रियावान्न इत्याकारको भेदस्तत्प्रतियोगी २ मल्लान्तर एवेति तादृशभेदप्रतियोगितावच्छेदिका या प्रतियोगिभूत २ मल्लान्तरनिष्ठा क्रिया तज्जन्यसंयोगाश्रयत्वेन भेदानुयोगिभूत १ मल्लान्तरस्य कर्मत्वसंभवात् 'मल्लो मल्लं गच्छति' इत्यपि प्रयोग उपपन्नः। स्वनिष्ठसंयोगजनकक्रियावान्न इत्याकारकभेदश्चैत्रे तु न संभवति चैत्रस्य स्वनिष्ठसंयोगजनकक्रियाश्रयत्वादेवेति स्वनिष्ठभेदप्रतियोगितावच्छेकक्रियाजन्यफलशालित्वविरहेण चैत्रस्य कर्मत्वासंभवात् 'चैत्रश्चैत्रं गच्छति' 'चैत्रः स्वं गच्छति' 'चैत्रः स्वमात्मानं गच्छति' इत्यादिप्रयोगापत्तिरपि नास्तीत्याह– न काचिदिति।

ननु स्वनिष्ठसंयोगजनकक्रियावान्न इत्याकारको यो भूमिनिष्ठो भेदस्तत्प्रतियोगितावच्छेदिका या संयोगजनकक्रियाश्रयीभूतविहगनिष्ठा क्रिया तज्जन्यसंयोगाश्रयत्वेन भूमेः कर्मत्वसंभवाद् यथा 'विहगो भूमिं प्रयाति' इति प्रयोगो भवति तथा 'विहगो विहगं (स्वम्) गच्छति' इत्यपि प्रयोगः स्यादेव, विहगनिष्ठक्रियायां विहगनिष्ठो यो भूमिसंयोगस्तज्जनकत्वमप्यस्ति विहगान्तरनिष्ठो यो भेदस्तादृशभेदप्रतियोग्ययमेव विहग इति विहगान्तर-

जनकतत्क्रियाया विहगान्तरनिष्ठभेदप्रतियोगितावच्छेदकतया विहगे विहगनिष्ठभेदप्रतियोगितावच्छेदकविहगवृत्ति-संयोगजनकक्रियाश्रयत्वस्याऽबाधितत्वादिति वाच्यम्, 'विहगो विहगं गच्छति' इत्यादौ विहगादिप्रकृत्यर्थवृत्तित्व-विशिष्टसंयोगस्य क्रियायां स्वजनकत्वस्वाश्रयनिष्ठभेदप्रतियो-गितावच्छेदकत्वोभयसंबन्धेनान्वयोपगमात्, विहगनिष्ठक्रिया-यास्तद्विहगनिष्ठसंयोगजनकत्वेन तज्जनकतासंबन्धेन तत्संयोगवत्त्वेऽपि विहगवृत्तित्वविशिष्टतत्संयोगाश्रयतद्विहग-निष्ठभेदप्रतियोगितावच्छेदकत्वाभावान्नोक्तोभयसंबन्धेन

निष्ठभेदप्रतियोगितावच्छेदकत्वमप्यस्त्येव तथा च विहगे स्वनिष्ठभेद-प्रतियोगितावच्छेदकीभूतक्रियायाः फलस्य संयोगस्य सत्त्वात् कर्मत्वमपि प्राप्तं विहगनिष्ठभेदप्रतियोगितावच्छेदिकाया विहगवृत्तिसंयोग (भूमिसंयोग) जनिकायाः क्रियाया आश्रयत्वमप्यस्त्येवेति विहगकर्मकगमनानुकूलव्या-पारकर्तृत्वमपि प्राप्तम् उक्तक्रियाश्रयस्यैव गमनकर्तृत्वादिति एकस्यैव विहगस्य कर्तृत्वकर्मत्वोभयतात्पर्येणापि 'विहगो विहगं गच्छति' इति प्रयोगो दुर्वार एवेत्याशङ्क्याह- न चैवमिति। परिहारमाह विहग इति। 'ग्रामं गच्छति' 'विहगो भूमिं गच्छति' इत्यादौ भूम्यादिप्रकृत्यर्थनिष्ठसंयोगस्य तादृशसंयोगजन-कक्रियायां न केवलं स्वजनकत्वसंबन्धेनान्वय इष्टो येन 'विहगो विहगं गच्छति' इति प्रयोगापत्तिः स्यात् किं तु स्वजनकत्वस्वाश्रयनिष्ठभेदप्रतियोगिता-वच्छेदकत्वैतदुभयसंबन्धेनान्वयो भवति, स्वं संयोगः, अत्र संयोगजन-कचैत्रविहगादिनिष्ठक्रियायां संयोगजनकत्वमप्यस्ति संयोगाश्रयीभूत-भूम्यादिनिष्ठभेदप्रतियोगितावच्छेदकत्वमप्युक्तरीत्यास्त्येवेत्येतादृशोभयसंबन्धेन भूम्यादिवृत्तित्वविशिष्टसंयोगस्य विहगादिनिष्ठायां संयोगजनकक्रियायामन्वय इति तत्संभवात् 'विहगो भूमिं गच्छति' 'चैत्रो ग्रामं गच्छति' इत्यादयः प्रयोगा भवन्ति, 'विहगो विहगं (स्वं) गच्छति' इत्यत्र विहगनिष्ठक्रिया-यास्तद्विहगनिष्ठसंयोगजनकत्वमस्त्येवेति तज्जनकतासंबन्धेन=स्व (संयोग) जनकत्वसंबन्धेन तत्संयोगवत्त्वेऽपि (संयोगस्य स्वजनकत्वसंबन्धेन क्रियाया-मन्वयसंभवेऽपि) तस्या क्रियाया विहगवृत्तित्वविशिष्टो यस्तत्संयोगस्तदाश्रयीभूतो

विशिष्टसंयोगवत्त्वमित्यनतिप्रसंगात्। एवं सति परसमवेतत्वं संबन्धघटकमेव न तु द्वितीयार्थ इति चेत्? का क्षतिः।

'विहगो विहगेन गम्यते' इत्यादावपि स्वजन्यत्वस्वावच्छिन्नभेदसामानाधिकरण्योभयसंबन्धेन क्रियायाः संयोगेऽन्वय

यस्तद्विहगस्तन्निष्ठो यो भेदस्तादृशभेदप्रतियोगितावच्छेदकत्वं नास्त्येव यतस्तन्निष्ठभेदस्य प्रतियोगितावच्छेदकस्तद्वृत्तिधर्मो न भवति किं तु तद्भिन्नप्रतियोगिवृत्तिधर्म एव भवतीति तद्विहगनिष्ठभेदस्य प्रतियोगितावच्छेदिका तद्विहगनिष्ठा क्रिया कथं स्यादिति तद्विहगनिष्ठसंयोगजनकतद्विहगवृत्तिक्रियायां तद्विहगनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति न तादृशसंयोगस्य तत्-क्रियायां स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वसंबन्धेनान्वयः संभवती-त्युक्तोभयसंबन्धेन संयोगविशिष्टक्रियाया अलाभाद् उक्तोभयसंबन्धेन संयोगविशिष्टक्रियाश्रयत्वं विहगस्य नास्तीति न विहगस्य कर्मत्वं किं वोक्तोभयसंबन्धेन संयोगविशिष्टक्रियाश्रयत्वं विहगस्य नास्तीति न विहगस्य कर्तृत्वमिति 'विहगो विहगं गच्छति' इत्यादिप्रयोगापत्तिरूपोऽतिप्रसङ्गो नास्तीत्यर्थः। विशिष्टसंयोगवत्त्वम्=विहगादिप्रकृत्यर्थवृत्तित्वविशिष्टसंयोगवत्त्वम् (क्रियायां नास्तीत्यन्वयः)। ननु फलजनिका या स्वनिष्ठभेद-प्रतियोगितावच्छेदिका क्रिया सा परसमवेतक्रियैव भवति तादृशक्रियैकदेश-परसमवेतत्वस्य द्वितीयार्थत्वं यदुक्तं तदिदानीं न स्यात् स्वनिष्ठभेद-प्रतियोगितावच्छेदकत्वस्योक्तरीत्या संबन्धत्वाश्रयणेन तद्घटकपरसमवेतत्व-स्यापि संबन्धकोटिप्रविष्टत्वादित्याशङ्कते– एवं सतीति। परिहरति- का क्षतिरिति, परसमवेतत्वस्य द्वितीयार्थत्वाभावे क्षतिर्नास्तीत्यर्थः। अन्येन विहगेन विहगान्तरं प्रत्यनुधावने तु 'विहगो विहगं गच्छति' इति प्रयोग इष्ट एव।

कर्माख्यातान्तप्रयोगमुदाहरति– विहग इति। 'भूमिर्विहगेन गम्यते' इत्यादावाश्रयत्वमाख्यातार्थः, विहगकर्तृकव्यापारजन्यसंयोगाश्रयो भूमिरिति बोधोदयाद् विहगनिष्ठक्रियायाः स्वजन्यत्वस्यावच्छिन्नभेदसाामानाधि-करण्यैतदुभयसंबन्धेन संयोगेऽन्वयः, स्वं क्रिया, संयोगे क्रियाजन्यत्वमप्यस्ति क्रियावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यमप्यस्तीति तदुभयसंबन्धेन संयोगे क्रियान्वयः, स्वावच्छिन्नभेदपदेन पूर्वोक्त एव भूम्यादिनिष्ठः क्रियावान्न

इष्यते तत्तत्क्रियावच्छिन्नभेदवति भूम्यादावेव तादृशभेद-सामानाधिकरण्यसंबन्धेन तत्तत्क्रियाविशिष्टसंयोगादिमत्त्वो-पगमात् तत्र तत्क्रियाश्रयविहगे तद्बाधेन नातिप्रसंग इति ध्येयम्।

ज्ञानादिरूपसविषयकवस्त्वभिधायकधातुसमभिव्याहृत-द्वितीयायाः प्राचीनमते निरूपकतासंबन्धेन धात्वर्थान्वयि-विषयत्वमर्थः, तत्र प्रकृत्यर्थस्याधेयतासंबन्धेनान्वयः। वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितावच्छेदकतया 'घटं

इत्याकारकः क्रियावच्छिन्नप्रतियोगिताकभेदो ग्राह्यः स च भेदः संयोगश्च भूम्यादावस्तीति संयोगे तादृशभेदसामानाधिकरण्यमप्यस्त्येव, तत्तत्क्रिया-वच्छिन्नभेदवति=संयोगादिरूपफलजनकक्रियावच्छिन्नप्रतियोगिताकभेदवति भूम्यादावेव तादृशक्रियाभेदसामानाधिकरण्यसंबन्धेन=क्रियाविच्छिन्नप्रतियोगिता-कभेदसामानाधिकरण्यरूपसंबन्धेन तत्तत्क्रियाविशिष्टोक्तसंयोगादिमत्त्वोपगमात् 'भूमिर्विहगेन गम्यते' इत्यादिप्रयोगो भवतीत्यर्थः। तत्क्रियाश्रयविहगे= संयोगजनकक्रियाश्रयविहगे तु तद्बाधेन=उक्ततादृशभेदसामानाधिकरण्यसंबन्धेन तत्क्रियाविशिष्टसंयेागादिमत्त्वबाधेन नातिप्रसङ्गः='विहगो विहगेन गम्यते' इत्यादिप्रयोगापत्तिर्नास्ति– विहगस्योक्ततादृशभेदप्रतियोगित्वाद् भेदाश्रयत्वमेव नास्ति येन तादृशभेदसामानाधिकरण्यसंबन्धेन क्रियाविशिष्टत्वं विहगनिष्ठ-संयोगस्य स्यात् तेन च 'विहगो विहगेन गम्यते' इत्यादिप्रयोगापत्तिः स्यादित्याह– तत्रेति। तत्र='विहगो विहगेन गम्यते' इत्यत्र। विहगेन स्वभिन्नविहगं प्रत्यनुधावने तु 'विहगो विहगेन गम्यते' इति प्रयोग इष्ट एव।

प्राचीनमतेन ज्ञादिधात्वर्थमाह– ज्ञानादीति, ज्ञानादिरूपं यत्सविषयकं वस्तु=अर्थस्तदभिधायको यो ज्ञादिधातुस्तत्समभिव्याहृतायाः 'घटं जानाति' इत्यादौ द्वितीयायाः प्राचीनमते विषयत्वमर्थः तस्य च विषयत्वस्य निरूपकतासंबन्धेन धात्वर्थज्ञानादावन्वयः– घटादिनिष्ठविषयत्वस्य ज्ञाननिरूपितत्वेन तन्निरूपकत्वं ज्ञानेऽस्ति, तत्र=द्वितीयार्थविषयत्वे प्रकृत्यर्थस्य घटादेराधेयतासंबन्धेनान्वयः, आश्रयत्वं चाख्यातार्थ इति घटवृत्तिविषय-तानिरूपकज्ञानाश्रयश्चैत्र इति शाब्दबोधाकार इत्यर्थः। नवीनमतमाह– वृत्त्यनियामकेति, विषयत्वस्य द्वितीयार्थत्वे तस्योक्तरीत्या निरूपकतासंबन्धेनैव

जानाति पटं न' इत्यादावनुपपत्तेस्तत्र विषयित्वार्थकत्वमेव नवीना उपवर्णयन्ति तत्र च प्रकृत्यर्थस्य निरूपितत्वसंबन्धेन तस्य च धात्वर्थे आश्रयतासंबन्धेनान्वयः, घटादिनिष्ठं ज्ञानादिकर्मत्वं च ज्ञानादिविषयित्वमेव, विषयित्वादौ च द्वितीयाया लक्षणैव न तु शक्तिरिति सांप्रदायिकाः।

वस्तुतस्तु विषयितात्वस्य संयोगत्वाद्यपेक्षयाऽऽधेयत्वाद्यपेक्षया चाऽगुरुतया किं धर्मावच्छिन्ने शक्तिः कल्प्यते इत्यत्र

धात्वर्थज्ञानेऽन्वयो वक्तव्यस्तथा च 'घटं जानाति पटं न' इत्यत्र पटपदोत्तरद्वितीयार्थविषयत्वस्य निरूपकतासंबन्धेनैव धात्वर्थज्ञानेऽभावो वक्तव्यः—निरूपकतासंबन्धेन पटवृत्तिविषयत्वाभाववज्ज्ञानाश्रयश्चैत्र इति, तत्र निरूपकतासंबन्धस्य वृत्त्यनियामकतयाऽभावीयप्रतियोगितावच्छेकत्वं न संभवतीति न विषयत्वं द्वितीयार्थः किं तु विषयित्वमेव तत्र=विषयित्वे प्रकृत्यर्थघटादेर्निरूपितत्वसंबन्धेनान्वयः— ज्ञानादिनिष्ठविषयित्वस्य ज्ञानादिविषयीभूतघटादिनिरूपितत्वात्, तस्य=विषयित्वस्य च धात्वर्थे ज्ञानादावाश्रयत्वसंबन्धेनान्वयस्तथा चाश्रयतासंबन्धस्य वृत्तिनियामकत्वेनाभावीयप्रतियोगितावच्छेदकत्वादाश्रयतासंबन्धेन ज्ञाने द्वितीयार्थविषयित्वस्याभाव उपपद्यते एवेति 'घटं जानाति पटं न' इत्यत्र नोक्तानुपपत्तिः— आश्रयतासंबन्धेन पटनिरूपितविषयित्वाभाववज्ज्ञानाश्रयश्चैत्र इति बोधस्याकार इत्यर्थः। ननु घटादिनिष्ठं यज्ज्ञानादिकर्मत्वम् (विषयत्वं) तदेव द्वितीयार्थो युक्तो न तु ज्ञानादिनिष्ठविषयित्वस्य घटादिपदोत्तरद्वितीयार्थत्वं युक्तं वैयधिकरण्यादित्याशङ्क्याह—घटादीति, विषयित्वमपि निरूपकतासंबन्धेन घटादौ वर्तते एवेति घटादिनिष्ठं यज्ज्ञानादिकर्मत्वं तदिदानीं ज्ञानादिविषयित्वरूपमेव विज्ञेयमित्यर्थः। द्वितीयाया विषयत्वादावेव शक्तिरिति विषयित्वादौ लक्षणैवेत्याह— विषयित्वादाविति।

स्वाभिप्रायमाह— वस्तुतस्त्विति, किंधर्मावच्छिन्ने=विषयितात्वादिकिंधर्मावच्छिन्ने। तथा च विषयित्वेऽपि द्वितीयायाः शक्तिरेवेत्यर्थः। यदि संयोगत्वाद्यपेक्षया विषयितात्वं गुरु स्यात्तदा गुरुधर्मावच्छिन्नविषयित्वापेक्षया संयोगादौ द्वितीयायाः शक्तिस्वीकारे लाघवेन विषयित्वे शक्तेरनुपपत्तिः

विनिगमकं दुर्लभम्। एकस्मिन् प्रयोगभूयस्त्वमप्यऽशक्य-निर्णयमिति तत्रापि शक्तिः सिध्यतीत्यवधेयम्।

'चैत्रेण ज्ञायते घटः' इत्यादौ कर्माख्यातस्थले आख्यातेन घटादौ धात्वर्थनिरूपितविषयत्वं बोध्यते।

चाक्षुषत्वाद्यवच्छिन्नवाचकदृश्यादिसमभिव्याहृतद्वितीयाया लौकिकविषयित्वं तादृशकर्माख्यातस्य लौकिकविषयत्वमर्थः— उपनीतसौरभादिविषयकसुरभिचन्दनमित्याद्याकारकचाक्षुषादिदशायाम्

स्यादपि न चैवमस्तीति भावः। एकस्मिन्=संयोगादौ, विषयित्वसंयोगाद्यर्थेषु द्वितीयायाः समान एव प्रयोग इत्यर्थः। अशक्यो निर्णयोऽनेनेत्यशक्यनिर्णयम्। तत्र=विषयित्वेऽपि।

कर्माख्यातप्रयोगमुदाहरति— चैत्रेणेति, घटादौ धात्वर्थज्ञानादिनिरूपितं यद् विषयत्वं तदेककर्माख्यातार्थ इत्यर्थः, 'चैत्रवृत्तिज्ञानविषयो घटः' इति बोधः।

'घटं पश्यति' इत्यत्र द्वितीयाया लौकिकविषयित्वमर्थः, आख्यातस्याश्रयत्वमर्थ इति घटनिरूपितविषयिताश्रयचाक्षुषलौकिकप्रत्यक्षा-श्रयश्चैत्र इति बोधः। ज्ञानस्य लौकिकालौकिकरूपत्वेन द्वैविध्यमन्यत्र प्रतिपादितं ज्ञेयम्। 'घटो दृश्यते' इत्यत्र च तादृशकर्माख्यातस्य=चा-क्षुषत्वाद्यवच्छिन्नवाचकदृश्यादिसमभिव्याहृतकर्माख्यातस्य लौकिकविषयत्वमर्थ इति-लौकिकचाक्षुषप्रत्यक्षनिरूपितविषयत्वाश्रयो घट इति बोधः- विषयत्वस्य घटे आश्रयतासंबन्धेनान्वयात्। विषयित्वविषयत्वयोर्लौकिकत्वविशेषणस्य फलमाह उपनीतेति, 'सुरभि चन्दनम्' इत्याकारकोपनीतसौरभादिविषयक-चाक्षुषप्रत्यक्षदशायां सौरभस्य ज्ञानलक्षणप्रत्यासत्त्यैव भानं भवति न तु लौकिकप्रत्यक्षेण-सौरभस्य चाक्षुषप्रत्यक्षाऽविषयत्वादिति 'सौरभं पश्यति' सौरभं दृश्यते' इत्यादि प्रयोगो न भवति- अत्र द्वितीयायाश्चाक्षुषप्रत्यक्षनिष्ठ-लौकिकविषयित्वार्थकत्वासंभवात् कर्माख्यातस्य च चाक्षुषप्रत्यक्षनिरूपित-लौकिकविषयत्वार्थकत्वासंभवादित्यर्थः। अयं भावः—यदि 'घटं पश्यति' इत्यत्र लौकिकविषयित्वं द्वितीयार्थो नोच्येत किं तु विषयित्वमेव द्वितीयार्थ

'सौरभं पश्यति' इति 'सौरभं दृश्यते' इत्याद्यप्रयोगात्।

अथैवम् 'पुष्पं जिघ्रति' इत्यादि प्रयोगानुपपत्तिः– घ्राणजप्रत्यक्षस्य पुष्पाद्यंशे लौकिकत्वविरहात्, तादृशधातुयोगे विषयित्वादिसामान्यस्य कर्मप्रत्ययार्थत्वे गन्धसाक्षात्कारे उपनयमर्यादयाऽऽकाशादिभाने 'आकाशं जिघ्रति' इति प्रयोग-

---

उच्येत तदा 'सुरभि चन्दनखण्डम्' इत्याकारकोपनीतसौरभविषयक-चाक्षुषप्रत्यक्षदशायां तादृशप्रत्यक्षेऽपि विषयितायाः सत्त्वात् 'सौरभं पश्यति' इति प्रयोगः स्यादेव न चैतदिष्टमिति द्वितीयार्थविषयितायां लौकिकत्वविशेषणं प्रक्षिप्तं तथा च 'सुरभि चन्दनखण्डम्' इत्याकारकप्रत्यक्षेऽलौकिकविषयितायाः सत्त्वेन लौकिकविषयिताया असत्त्वात् 'सौरभं पश्यति' इति प्रयोगो न भवति प्रत्यक्षे द्वितीयार्थभूताया लौकिकविषयिताया बाधात्। एवमेव 'सौरभं दृश्यते' इति प्रयोगस्योक्तदशायां वारणार्थं लौकिकविषयत्वं कर्माख्यातार्थ इत्युक्तम्, 'सुरभि चन्दनखण्डम्' इत्याकारकोपनीतभानदशायां सौरभेऽलौकिक-विषयतायाः सत्त्वेन लौकिकविषयताया बाधादिति।

ननु यदि चाक्षुषत्वाद्यवच्छिन्नवाचकदृश्यादिधातुसमभिव्याहृतद्वितीयाया लौकिकविषयित्वमर्थस्तदा 'पुष्पं जिघ्रति' इति प्रयोगो न स्यात्– घ्राणजप्रत्यक्षविषयता हि गन्धे वर्तते न तु द्रव्यरूपे पुष्पेऽपीति पुष्पनिरूपितलौकिकविषयिताया घ्राणजप्रत्यक्षे बाधादित्याशङ्कते– अथेति, ननु तादृशधातुयोगे=चाक्षुषत्वाद्यवच्छिन्नवाचकघ्रादिधातुयोगे 'पुष्पं जिघ्रति' इत्यादौ लौकिकालौकिकसाधारणमेव सामान्यतो विषयित्वं द्वितीयादिकर्मप्रत्ययार्थ इति 'पुष्पं जिघ्रति' इत्यत्र पुष्पपदोत्तरद्वितीयाया अलौकिकविषयित्वमेवार्थ इति नानुपपत्तिरित्याशङ्क्याह–तादृशेति, एवं हि 'अत्राकाशे गन्धः' इत्याकारकगन्धप्रत्यक्षे उपनयमर्यादया=ज्ञानलक्षणप्रत्यासत्त्याऽऽकाशस्यापि भानं भवतीति 'आकाशं जिघ्रति' इति प्रयोगापत्तिः स्यात्– आकाशपदोतररद्वितीयाया अलौकिकविषयित्वार्थकत्वेनाकाशविषयकाऽलौकिकविषयिताश्रयघ्राणजप्रत्यक्षस्य संभवात्, न च 'आकाशं जिघ्रति' इति प्रयोगो भवतीति तद्वारणाय लौकिकविषयितैव द्वितीयार्थ इत्युपगन्तव्यं तथा चाकाशनिरूपितलौकि-कविषयिताया घ्राणजप्रत्यक्षे बाधात् 'आकाशं जिघ्रति' इति प्रयोगस्तु न

प्रसङ्गेन तत्रापि लौकिकविषयिताया एव कर्मप्रत्ययार्थतयोपगन्तव्यत्वादिति चेत्? न– घ्राधातोर्हि गन्धलौकिकप्रत्यक्षत्वं शक्यतावच्छेदकम्– "घ्रा गन्धोपादाने" इत्यनुशासनात्, तत्समभिव्याहृतद्वितीयायाश्चाधेयत्वमेवार्थस्तस्य च व्युत्पत्तिवैचित्र्येण गन्धादिरूपधात्वर्थैकदेशेनान्वयः, एवं च 'पुष्पं जिघ्रति' इत्यादितः पुष्पवृत्तिगन्धलौकिकप्रत्यक्षाश्रयतावानित्याकारक एव शाब्दबोधो न तु पुष्पनिरूपितलौकिकविषयिताशालिप्रत्यक्षाश्रय इत्याकारक इति नानुपपत्तिः।

न चैवं सविषयार्थबोधकधातुसमभिव्याहृतकर्मप्रत्ययस्य

भविष्यति किं त्वेवं तत्रापि='पुष्पं जिघ्रति' इत्यत्रापि लौकिकविषयितैव द्वितीयार्थः स्यादिति पुष्पनिरूपितलौकिकविषयिताया घ्राणजप्रत्यक्षे बाधात् 'पुष्पं जिघ्रति' इति प्रयोगानुपपत्तिरित्युभयतः पाशारज्जुरित्यर्थः। परिहरति– नेति, "घ्रा गन्धोपादाने" इत्यनुशासनाद् घ्राधातोर्गन्धविषयकलौकिकप्रत्यक्षं हि शक्यमस्ति, घ्राधातुसमभिव्याहृतद्वितीयायाश्चाऽऽधेयत्वमेवार्थस्तस्य= द्वितीयार्थाधेयत्वस्य च धात्वर्थैकदेशे गन्धेऽन्वयः, तथा च 'पुष्पे गन्धो वर्तते' इति पुष्पस्य गन्धे आधेयत्वसंबन्धेनान्वयसंभवात् 'पुष्पं जिघ्रति' इति प्रयोग उपपद्यते, आकाशे च समवायेन गन्धासंभवात् 'आकाशं जिघ्रति' इति प्रयोगापत्तिर्नास्त्येव–आकाशनिरूपिताधेयत्वस्य द्वितीयार्थस्य गन्धेऽसंभवादित्यर्थः। 'पुष्पं जिघ्रति' इत्यस्य स्वाभीष्टबोधस्य स्वरूपमाह– एवं चेति, पुष्पवृत्तिर्यो गन्धस्तद्विषयकलौकिकप्रत्यक्षाश्रयश्चैत्र इत्यर्थः। स्वानभीष्टबोधं परिहरति– न त्विति, यदि 'पुष्पनिरूपितलौकिकविषयिताशालिप्रत्यक्षाश्रयः' इत्याकारकबोधः 'पुष्पं जिघ्रति' इत्यत्रेष्टं स्यात्तदुक्तरीत्या पुष्पनिरूविन लौकिकविषयिता घ्राणजप्रत्यक्षे नास्तीति 'पुष्पं जिघ्रति' इति प्रयोगानुपपत्तिः स्यादपि न चैवमस्तीत्यर्थः। घ्राधातोर्गन्धलौकिकप्रत्यक्षमेव शक्यमिति गन्धस्यापि धात्वर्थे प्रवेशाद् धात्वर्थैकदेशत्वमुक्तमिति।

ननु यदि घ्राधातुसमभिव्याहृतद्वितीयाया आधेयत्वमर्थस्तदा सविषयकार्थबोधकधातुसममिव्याहृतद्वितीयादिकर्मप्रत्ययस्य विषयितैवार्थो भवतीति नियमस्य भङ्गः स्याद् घ्राधातोरपि सविषयकार्थकत्वादित्याशङ्क्याह–

विषयितार्थकत्वनियमभंगप्रसङ्ग इति वाच्यम्, विषयानवच्छिन्न-तादृशवस्त्वभिधायकधातुसमभिव्याहृतकर्मप्रत्ययस्यैव तदर्थकत्वनियमात्, अस्य च गन्धात्मकविषयावच्छिन्न-प्रत्यक्षवाचकतया तादृशनियमस्याऽबाधितत्वात्।

न च घ्राधातुसमभिव्याहृतद्वितीयाया गन्धान्विताधेय-त्वार्थकत्वे 'आमोदमुपजिघ्रति' इत्यादेरनुपपत्तिः—गन्धविशेषरूपामोदपदार्थाऽऽधेयत्वस्य गन्धे बाधादिति वाच्यम्, विषयावच्छिन्नप्रत्यक्षार्थकघ्राधातुसमभिव्याहृतद्वितीयाया एवाधेयतार्थकत्वनियमात्, तत्र विषयानवच्छिन्नस्यैव

न चेति। परिहारमाह—विषयेति, विषयानवच्छिन्नं यत् तादृशवस्तु= सविषयकार्थस्तदभिधायकधातुसमभिव्याहृतस्यैव कर्मप्रत्ययस्य तदर्थकत्व-नियमात्=विषयितार्थकत्वनियमाद् यथा— 'घटं जानाति' इत्यत्र ज्ञाधातु-र्विषयानवच्छिन्नसविषयकार्थ (ज्ञान) बोधकोस्ति—ज्ञाधात्वर्थज्ञानस्य सविषयकपदार्थत्वाद् रूपगन्धादिविषयैरनवच्छिन्नत्वाच्चेत्यत्र घटपदोत्तरद्वितीयाया विषयित्वमर्थः— घटनिरूपितविषयिताश्रयज्ञानवानिति बोधोदयादित्यर्थः। अस्य=घ्राधातोस्तु "घ्रा गन्धोपादाने" इत्यनुशासनाद् गन्धलक्षणविषयावच्छिन्न-सविषयकप्रत्यक्षपदार्थवाचकतया 'पुष्पं जिघ्रति' इत्यादौ पुष्पादिपदोत्तरद्वितीयाया आधेयतार्थकत्वेऽपि तादृशनियमस्य=सविषयकार्थबोधकधातुसमभिव्याहृतस्य कर्मप्रत्ययस्य द्वितीयादेर्विषयितार्थकत्वनियमस्य अबाधितत्वात्=भङ्गासंभवात्, तादृशनियमस्यात्राऽप्राप्तेरित्यर्थः।

ननु यदि 'पुष्पं जिघ्रति' इत्यादौ पुष्पपदोत्तरद्वितीयाया घ्राधातुसमभिव्याहृताया आश्रयतासंबन्धेन गन्धान्वितम् (गन्धे वर्तमानम्) आधेयत्वमर्थस्तदा 'आमोदमुपजिघ्रति' इत्यादिप्रयोगो नोपपद्येत— यथा 'पुष्पं जिघ्रति' इत्यत्र गन्धे पुष्पवृत्तित्वम् (पुष्पाधेयत्वम्) अस्ति तथात्र गन्धस्यामोदवृत्तित्वं नोपपद्यते—आमोदस्य गन्धविशेषरूपत्वेन गन्धे गन्धासंभवाद् गुणे गुणानङ्गीकारादित्याशङ्कते—न चेति। परिहरति—विषयावच्छिन्नेति, 'पुष्पं जिघ्रति' इत्यत्र घ्राधातोर्गन्धात्मकविषयावच्छिन्नघ्राणजप्रत्यक्षवाच-कत्वमस्तीत्यत्राधेयत्वमेव द्वितीयार्थः, तत्र='आमोदमुपजिघ्रति' इत्यत्र तु

प्रत्यक्षविशेषस्य लक्षणया घ्राधात्वर्थतोपगमेन विषयिताया एव तदर्थत्वात्।

वस्तुतस्तु 'पुष्पं जिघ्रति' इत्यादौ समवायसम्बन्धावच्छिन्नाधेयत्वसंसर्गावच्छिन्नविषयतानिरूपितप्रकारतैव द्वितीयार्थः, तस्याश्च गन्धनिरूपितलौकिकविषयिताशालिप्रत्यक्षात्मकधात्वर्थैकदेशे विषयितायां निरूपितत्वसंबन्धेनान्वयः,

---

घ्राधातोर्गन्धाद्यात्मकविषयैरनवच्छिन्न एव घ्राणजप्रत्यक्षे लक्षणास्तीति नात्र द्वितीयाया आधेयत्वार्थकत्वापत्तिः किं त्वत्र द्वितीयाया विषयित्वमेवार्थस्तथा चामोदनिरूपितविषयितायाः प्रत्यक्षे संभवान्नात्र काचिदनुपपत्तिः—आमोदनिरूपितविषयिताश्रयज्ञानवानिति बोध इत्यर्थः। तदर्थत्वात्=द्वितीयार्थत्वात्।

स्वाभिप्रायं प्रकटयति—वस्तुतस्त्विति। समवायेति—द्वितीयार्थभूता चैषा प्रकारता पुष्पे विज्ञेया सा च प्रकारता गन्धे विषयतां विनाऽनुपपन्नत्वाद् गन्धनिष्ठविषयतानिरूपितास्ति गन्धनिष्ठा च विषयता आधेयतासंबन्धावच्छिन्ना विज्ञेया "घ्रा गन्धोपादाने" इत्यनुशासनाद् धात्वर्थैकदेशभूतगन्धस्य पुष्पवृत्तित्वेन गन्धे आधेयताया घ्राणजप्रत्यक्षविषयतायाश्च सत्त्वात् तयोरवच्छेद्यावच्छेदकभावस्य सुस्पष्टत्वात्, आधेयताप्येषा समवायसंबन्धावच्छिन्ना ग्राह्या गन्धे आधेयतायाः पुष्पानुयोगिकसमवायस्यापि च सत्त्वेन तयोरवच्छेद्यावच्छेदकभावस्यापि विस्पष्टत्वादित्यन्वयः, समवायसंबन्धावच्छिन्नाधेयतानिवेशे सति पुष्पादौ गन्धः समवायेन भवति तादृशपुष्पादिकमुद्दिश्य 'पुष्पं जिघ्रति' इत्यादिः प्रयोगो भवति यत्र च कालादौ गन्धः समवायेन न वर्तते तादृशकालादिकमुद्दिश्य 'कालं जिघ्रति' इत्यादिप्रयोगो न भवतीति भावः। तस्याः=द्वितीयार्थभूतप्रकारतायाश्च गन्धनिरूपिता या गन्धप्रत्यक्षनिष्ठा लौकिकविषयिता तादृशविषयिताशालि यद् घ्राधात्वर्थभूतं प्रत्यक्षं तदेकदेशभूतायां विषयितायां निरूपितत्वसंबन्धेनान्वयः, विषयितावि‌शिष्टप्रत्यक्षस्य धात्वर्थत्वेन विषयिताया धात्वर्थैकदेशत्वं प्राप्तं तादृशविषयितायां पुष्पनिष्ठप्रकारतानिरूपितत्वस्य सत्त्वेन तेन संबन्धेन पुष्पनिष्ठप्रकारताया अन्वयः, तथा च यन्निष्ठप्रकारतानिरूपितत्वं घ्राधात्वर्थप्रत्यक्षनिष्ठविषयितायां संभवति तद्घ्राणनविषयकप्रयोगो भवति यथा 'पुष्पं जिघ्रति' 'गन्धवहं जिघ्रति'

तेन 'इदानींतनपुष्पे गन्धः' इत्यादिप्रत्ययस्याधेयतासंसर्गेण कालादिप्रकारकत्वेऽपि तादृशप्रत्यक्षदशायां न 'कालं जिघ्रति' इत्यादिप्रयोगः—तादृशज्ञानीयगन्धादिविषयितायां कालादि-प्रकारतानिरूपितत्वविरहात्, अत एव 'तदाननं मृत्सुरभि क्षितीश्वरो रहः समाघ्राय न तृप्तिमाययौ' इत्यादौ "आघ्रातवान् गन्धवहं सुगन्धम्" इत्यादौ चोपाधिनिष्ठगन्धग्रहतात्पर्येणैव

इत्यादिः, 'कालं जिघ्रति' इत्यादिश्च प्रयोगो न भवतीति सिद्धम्। अत्र च यद्यपि 'इदानींतनपुष्पे गन्धः' इत्यत्र 'इदानींतनकालवृत्तिः पुष्पवृत्तिश्च गन्धः' 'इदानींतनकालवृत्तिपुष्पवृत्तिर्गन्धः' इत्याकारकद्विविधबोधस्य यथेच्छं स्वीकारात् कालनिष्ठाधारतानिरूपिताधेयताया अपि गन्धे साक्षादपि पुष्पद्वारापि च सत्त्वात् 'इदानींतनपुष्पे गन्धः' इत्याकारकप्रत्यक्षे गन्धे यथाऽऽधेयतासंसर्गेण पुष्पं प्रकारस्तथाऽऽधेयतासंसर्गेण कालोऽपि प्रकारोस्त्येवेति 'इदानींतनपुष्पे गन्धः' इत्याकारकप्रत्यक्षदशायाम् 'पुष्पं जिघ्रति' इतिवत् 'कालं जिघ्रति' इत्यपि प्रयोगः संभवति तथापि तादृशप्रत्यक्षदशायाम्='इदानींतनपुष्पे गन्धः' इत्याकारकप्रत्यक्षदशायाम् 'कालं जिघ्रति' इति प्रयोगापत्तिर्नास्ति—तादृशज्ञानीयगन्धादिविषयितायाम्=घ्राधात्वर्थप्रत्यक्षनिष्ठगन्धनिरू-पितलौकिकविषयितायां कालादिनिष्ठप्रकारतानिरूपितत्वाभावाद्, यन्निष्ठप्रकारतानिरूपितत्वं घ्राधात्वर्थप्रत्यक्षनिष्ठविषयितायां भवति तत्कर्मकस्यैव जिघ्रतिप्रयोगस्य संभवादित्याह—तेनेति, तेन= द्वितीयार्थप्रकारताया उक्तरीत्या प्रत्यक्षीयविषयितायामन्वयेन, किं वा समवायनिवेशेन तथा चात्र कालनिष्ठाधारतानिरूपिताधेयता गन्धनिष्ठा समवायसंबन्धावच्छिन्ना न भवति कालिकसम्बन्धावच्छिन्नत्वाद् गन्धस्य काले कालिकसम्बन्धेन वृत्तित्वाद्, पुष्पनिष्ठाधारतानिरूपिताधेयता तु समवायावच्छिन्ना भवति समवायेनैव गन्धस्य पुष्पवृत्तित्वादित्यर्थः। नन्वेवं नियमे स्वीकृते "तदाननम्" इत्यादिप्रयोगा नोपपद्येरन्—घ्राधात्वर्थप्रत्यक्षनिष्ठविषयितायामाननगन्धवहादिनिष्ठ-प्रकारतानिरूपितत्वाऽभावात्-गन्धाश्रयीभूतपुष्पमृत्तिकादिनिष्ठप्रकारतानि-रूपितत्वस्यैव संभवादित्याशङ्क्याह-अत एवेति, अत एव= उक्तनियमस्वीकारादेव "तदाननम्" इत्यादिस्थलेषु गन्धोपाधिनिष्ठस्यैव= गन्धाश्रयीभूममृत्तिकादिनिष्ठस्यैव गन्धस्य ग्रहणतात्पर्येण जिघ्रतिप्रयोगोऽस्ति

जिघ्रतेः प्रयोगात् तादृशगन्धे चाऽऽननगन्धवहादिवृत्तित्वस्य बाधेऽपि न क्षतिः—तादृशगन्धस्याऽऽननाद्यऽवृत्तित्वेऽपि 'आनने गन्धः' इत्याकारकबोधीयगन्धविषयिताया आननादिप्रकारता-निरूपितत्वेन वाक्यार्थाऽबाधात्। वाय्वानीतचम्पकगन्धस्य यत्र वाय्वादिवृत्तित्वेनैव ग्रहस्तत्र 'चम्पकं जिघ्रति' इत्यादिप्रयोगो

तादृशगन्धे=अत्रत्यगृह्यमाणगन्धे चाननगन्धवहादिवृत्तित्वस्य बाधेऽपि क्षतिः=जिघ्रतिप्रयोगानुपपत्तिर्नास्ति तादृशगन्धस्य=अत्रत्यगृह्यमाणगन्धस्य मृत्तिकादिवृत्तित्वेनाऽऽननाद्यऽवृत्तित्वेऽपि "आननं समाघ्राय" इत्यत्र 'आनने गन्धः' इत्येव बोधः स्यात् तादृशबोधीयगन्धविषयिताया:=घ्राधात्वर्थ-प्रत्यक्षनिष्ठगन्धनिरूपितविषयिताया आननादिनिष्ठप्रकारतानिरूपितत्वेन रूपेण वाक्यार्थस्याऽबाधात्—तादृशविषयितायामाननादिनिष्ठप्रकारतानिरूपितत्वस्यापि संभवान्नात्र जिघ्रतिप्रयोगानुपपत्तिरित्यर्थः। अत्र च "तदाननम्" इत्यत्र यद्यपि मुखस्यापि पार्थिवत्वेन तस्मिन्नपि समवायेन गन्धः संभवति तथापि "मृत्सुरभि" इत्युक्त्या गृह्यमाणगन्धो मृत्समवेत एव नाननसमवेत इत्यनुपपत्तिरासीत्, "आघ्रातवान्" इत्यत्र तु वायौ समवायेन गन्धो न भवतीत्यनुपपत्तिरासीत् सैवात्रोद्धृतेति विज्ञेयम्। किं च वाय्वानीतचम्पकगन्धस्य यत्र वायुवृत्तित्वेनैव ग्रहस्तत्र 'चम्पकं जिघ्रति' इति प्रयोगो न भवति किं तु 'वायुं जिघ्रति' इत्येव प्रयोगो भवतीत्याह—वाय्यानीतेति, यथाज्ञानमेव प्रयोगसंभवादित्यर्थः 'पुष्पं जिघ्रति' इत्यत्र 'समवायसंबन्धावच्छिन्नाधेयत्वसंसर्गावच्छिन्नगन्ध-निष्ठविषयतानिरूपिता या पुष्पनिष्ठा प्रकारता तन्निरूपिता या गन्धनि-रूपितलौकिकविषयिता तादृशविषयिताशालिप्रत्यक्षाश्रयश्चैत्रः' इति शाब्दबोधः। यद्यपि काले इव वायावपि समवायेन गन्धो न वर्तते तथापि वायौ सुगन्धत्वाद्यारोपो भवतीति सुगन्धादिपदसान्निध्ये सति "आघ्रातवान् गन्धवह सुगन्धम्" इत्यादिप्रयोगो भवति काले च सुगन्धत्वाद्यारोपाभावात् 'कालं जिघ्रति' इति प्रयोगो न भवतीति परमार्थः। 'आघ्रातवान् गन्धवहम्' इत्यत्र स्वसमवायिसंयुक्तत्वसम्बन्धावच्छिन्नाधेयत्वसंसर्गावच्छिन्नविषयतानिरूपितप्रकारता द्वितीयार्थः—गन्धस्य स्वसमवायिसंयुक्तत्वसंबन्धेन वायौ सत्त्वात् तादृशसंबन्धावच्छिन्नाधेयत्वं वायुनिरूपितं गन्धे वर्तते एव तादृशाधेय-त्वसंसर्गावच्छिन्नविषयता च गन्धे प्राप्ता तन्निरूपितप्रकारता च पूर्वोक्तदिशा

नेष्यत एव।

यत्तु आधेयतामात्रं द्वितीयार्थो न तु समवायावच्छिन्नत्वविशेषितमाधेयत्वम्, तथा च मुखादिसंसृष्टमृत्तिकादिगन्धे परम्परासंबन्धेन मुखादिवृत्तित्वस्य सत्त्वान्न तादृशस्थलेऽनुपपत्तिरिति। तदसत्– तथा सति 'कालं जिघ्रति' इति प्रयोगस्य दुर्वारत्वात्।

'पुष्पमाघ्रायते' इत्यादौ च निरुक्तप्रकारत्वमाख्यातार्थः,

वायौ प्राप्ता शेषं पूर्ववदेव। स्वं गन्धस्तत्समवायी पार्थिवपरमाणुः पुष्परेणुर्वा तत्संयुक्तत्वं वायावस्तीति तेन संबन्धेन वायावपि गन्धो वर्तते इति चिन्त्यम्।

ननु 'पुष्पं जिघ्रति' इत्यादौ समवायसंबन्धावच्छिन्नाधेयत्वं न द्वितीयार्थो वक्तव्यः अर्थाद् गन्धादीनां समवायेन यत्पुष्पादिवृत्तित्वं तस्योक्तद्वितीयार्थे प्रवेशो न कर्तव्यः द्वितीयार्थप्रविष्टाधेयत्वं समवायावच्छिन्नं न ग्राह्यमिति यावत् येन "तदाननं मृत्सुरभि" इत्यादौ गन्धस्य समवायेन मृत्तिकावृत्तित्वेन मुखवृत्तित्वाभावादन्वयबोधानुपपत्तिः स्यात् किं तु आधेयत्वमात्रमेव द्वितीयार्थस्तथा च "तदाननं मृत्सुरभि" इत्यादौ परम्परासम्बन्धेन=स्वाश्रयाश्रयत्वसंबन्धेन (स्वंगन्धस्तदाश्रयो मृत् तदाश्रयत्वं मुखे) मृत्तिकानिष्ठगन्धस्यापि मुखादौ वर्तमानत्वेन तादृशस्थले="तदाननं मृत्सुरभि" इत्यादिस्थले न काचिदन्वयानुपपत्तिः। 'पुष्पं जिघ्रति' इत्यादौ च गन्धस्य साक्षात्संबन्धेनैव पुष्पवृत्तित्वमस्तीत्याशङ्कते-यत्त्विति। परिहरति-तदसदिति, तथा सति=यदि "तदाननम्" इत्यत्र मृत्तिकाद्वारा गन्धस्य मुखवृत्तित्वमाश्रित्य तादृशपारम्परिकवृत्तित्वस्य च द्वितीयार्थत्वमाश्रित्यानुपपत्तिः परिह्रियते तदा गन्धस्य कालिकसंबन्धेन कालेऽपि वर्तमानत्वेन तादृशकालिकवृत्तित्वस्य द्वितीयार्थत्वाश्रयणेन 'कालं जिघ्रति' इत्यपि प्रयोगापत्तिः स्यादेव च नैतदिष्टमिति समवायावच्छिन्नमेवाधेयत्वं द्वितीयार्थो वक्तव्यस्तथा च गन्धस्य समवायेन कालवृत्तित्वाभावान्न 'कालं जिघ्रति' इति प्रयोगापत्तिः। "तदाननम्" इत्यादिस्थलीयान्वयबोधविचारस्त्वनुपदमेव कृतः।

कर्माख्यातप्रयोगमुदाहरति–पुष्पमिति, 'पुष्पमाघ्रायते' इत्यत्र निरुक्तम्=

आश्रयतासंबन्धेन पुष्पाद्यन्विते तस्मिन् धात्वर्थप्रत्यक्षस्य निरूपितत्वसंबन्धेन तद्विशेषणतापन्नगन्धविषयितायाश्च निरूपितत्वसंबन्धेनान्वयः। एकधर्मिविशेषणतयोपस्थितस्य स्वातन्त्र्येणान्यविशेषणतयाऽन्वयबुद्धेरेवाऽव्युत्पन्नत्वात्, अत्र च प्रत्यक्षपारतन्त्र्येणैव गन्धविषयिताया आख्यातार्थेऽन्वयेन व्युत्पत्तिविरोधविरहात्।

अस्तु वा गन्धो लौकिकविषयिता प्रत्यक्षं च विशकलितमेव धातोरर्थः। कर्त्राख्यातादिसमभिव्याहारे गन्धविषयितायाः प्रत्यक्षविशेषणतया कर्माख्यातसमभि-

गन्धविषयितानिरूपकं प्रकारत्वम्=विषयत्वं कर्माख्यातार्थः, तस्य प्रकारत्वस्याश्रयत्वसंबन्धेन पुष्पेऽन्वयात् आश्रयतासंबन्धेन पुष्पादावन्विते तस्मिन्=आख्यातार्थप्रकारत्वे धात्वर्थप्रत्यक्षस्य निरूपितत्वसंबन्धेनान्वयः—प्रकारत्वस्य प्रत्यक्षनिरूपितत्वात्, तथा धात्वर्थप्रत्यक्षविशेषणीभूतगन्धविषयिताया अपि तादृशप्रकारत्वे एव निरूपितत्वसंबन्धेनान्वय इति प्रत्यक्षादिनिरूपित-प्रकारता (विषयता) श्रयः पुष्पमिति शाब्दबोधः। ननु गन्धविषयिता हि गन्धनिरूपिता प्रत्यक्षनिष्ठा विषयितैव सा च प्रत्यक्षे विशेषणमस्तीति प्रत्यक्षविशेषणत्वेनोपस्थिताया विषयिताया निरूपितत्वसंबन्धेनाख्यातार्थप्रकारत्वे कथमन्वयः स्यात्—"एकत्र विशेषणत्वेनोपस्थितस्यान्यत्र विशेषणत्वासंभवात्" इति नियमादित्याशङ्क्याह—एकेति, एकत्र विशेषणत्वेनोपस्थितस्य स्वातन्त्र्येणान्यविशेषणत्वं न भवतीति पारतन्त्र्येणान्यविशेषणत्वे न कोपि दोषः 'धनी सुखी' इतिवत्, उक्तस्थले च प्रत्यक्षद्वारैव गन्धनिरूपितविषयिताया आख्यातार्थेऽन्वयोस्ति न स्वातन्त्र्येणेति न कोपि दोष इत्यर्थः।

धर्मिपारतन्त्र्येणाप्येकत्र विशेषणस्यान्यविशेषणत्वास्वीकारे पक्षान्तरमाह-अस्तु वेति, पूर्वं घ्राधातोर्विशिष्टे गन्धनिरूपितलौकिकविषयि-ताशालिप्रत्यक्षे शक्तिरुक्ता, इदानीं पदार्थत्रये खण्डशः शक्तिरुच्यते इत्यर्थः। एवं च 'पुष्पं जिघ्रति' इत्यादिकर्त्राख्यातस्थले गन्धनिरूपितविषयिताया: प्रत्यक्षविशेषणत्वं भवति—पुष्पवृत्तिगन्धनिरूपितविषयिताश्रयप्रत्यक्षवांश्चैत्र इति बोधात् पूर्वपूर्वस्य विशेषणत्वादिति न कश्चिद् दोषः। 'पुष्पमाघ्रायते'

व्याहारस्थले च प्रत्यक्षविशेष्यतयाऽन्वय इति न कश्चिद् दोषः। जिघ्रत्यर्थगन्धविषयितानिरूपकत्वमेव पुष्पादिनिष्ठं जिघ्रति-कर्मत्वमिति दिक्।

अथ दृश्यादिसमभिव्याहृतद्वितीयाया लौकिक-विषयितार्थकत्वे 'सौरभं न पश्यति' इत्यादौ सौरभादिनिरूपितलौकिकविषयिताशालिचाक्षुषाद्यप्रसिद्ध्या 'आकाशं न पश्यति' इत्यादौ चाऽऽकाशादिनिरूपितलौकिक-विषयिताया एवाप्रसिद्ध्या तादृशविषयिताशालिचाक्षुषाश्रय-

इत्यादिकर्माख्यातस्थले च गन्धनिरूपितविषयितायाः प्रत्यक्षविशेष्यत्वं भवति—प्रत्यक्षनिष्ठगन्धनिरूपितविषयितानिरूपितविषयताश्रयः पुष्पमिति-बोधात् उत्तरोत्तरस्य विशेष्यत्वात्। तथा च गन्धादौ धातोः खण्डशक्तिस्वीकारेण धातुना गन्धनिरूपितविषयितायाः प्रत्यक्षविशेषणत्वेनोपस्थितिरेव न भवति येन प्रत्यक्षविशेषणीभूतविषयिताया उक्तरीत्या निरूपितत्वसंबन्धेनाख्यातार्थ-प्रकारत्वेऽन्वये विरोधः स्यात् किं तु विषयिताया धातुना स्वातन्त्र्येणैवो-पस्थितिरिति तस्या आख्यातार्थेऽन्वये न कोपि विरोध इत्यर्थः। पुष्पनिष्ठजिघ्रतिकर्मत्वस्य स्वरूपमाह—जिघ्रतीति, प्रत्यक्षकर्मभूतपुष्पादिपदार्थे प्रत्यक्षनिष्ठविषयितानिरूपकत्वं यदस्ति तदेव जिघ्रतिकर्मत्वमस्ति, जिघ्रत्यर्थभूता या गन्धनिरूपितप्रत्यक्षनिष्ठविषयिता तन्निरूपकत्वमित्यर्थः। एवमेवान्यत्रापि कर्मत्वस्वरूपमूह्यम्।

ननु यदि "चाक्षुषत्वाद्यवच्छिन्नवाचकदृश्यादि" इत्युक्तप्रकारेण 'घटं पश्यति' इत्यादौ दृश्यादिधातुसमभिव्याहृतद्वितीयाया लौकिक-विषयित्वमर्थस्तदा सौरभस्य घ्राणजप्रत्यक्षविषयत्वेन चाक्षुषप्रत्यक्ष-विषयत्वाभावात् सौरभनिरूपिता या लौकिकविषयिता तद्विशिष्टचाक्षुषप्रत्यक्षमेव प्रसिद्धं नास्तीति 'सौरभं न पश्यति चैत्रः' इत्यत्र चैत्रे सौरभनिरूपितलौकि-कविषयिताशालिचाक्षुषप्रत्यक्षाश्रयत्वाभावस्याप्यऽप्रसिद्धत्वाद् बोधनं न संभवतीत्यनुपपत्तिः, तथाऽऽकाशस्य तु केनापीन्द्रियेण लौकिकप्रत्यक्षं न भवतीत्याऽऽकाशनिरूपितलौकिकविषयितैव क्वचिदपि प्रत्यक्षे नास्तीत्याकाश-निरूपितलौकिकविषयिताया एवाप्रसिद्धत्वात् 'आकाशं न पश्यति चैत्रः'

त्वाद्यभावरूपवाक्यार्थाऽप्रसिद्धिः। न च 'सौरभं न पश्यति' इत्यादौ सौरभादिनिरूपितलौकिकविषयित्वाभावश्चाक्षुषादौ प्रतीयते इति वाच्यम्, एवमप्याकाशादिनिरूपितलौकिक-विषयित्वाऽप्रसिद्ध्या 'आकाशं न पश्यति' इत्यादावऽप्रती-कारात्।

न च लौकिकविषयितायां निरूपितत्वसंबन्धावच्छिन्न-प्रतियोगिताकाऽऽकाशाभावः प्रतीयते इति वाच्यम्, वृत्त्य-नियामकसंबन्धस्य संसर्गाभावप्रतियोगितानवच्छेदकतया तादृशाभावस्याऽप्रसिद्धेः। एतेन निरूपकतासंबन्धेन चाक्षुषादिनिष्ठलौकिकविषयिताया अभावस्तत्राकाशादौ प्रतीयते

इत्यत्राप्याकाशनिरूपितलौकिकविषयिताशालिचाक्षुषप्रत्यक्षाश्रयत्वाभावस्याऽप्रसिद्ध्या चैत्रे बोधनं न संभवतीत्यनुपपत्तिरित्याशङ्कते—अथेति। ननु सौरभस्य घ्राणजप्रत्यक्षविषयत्वात् सौरभनिरूपितलौकिकविषयिता या घ्राणजप्रत्यक्षे प्रसिद्धास्ति तस्या एव 'सौरभं न पश्यति' इत्यत्र चाक्षुषप्रत्यक्षेऽभावः प्रतीयते इति वक्ष्याम इति न वाक्यार्थबोधानुपपत्तिरित्याशङ्क्याह—न चेति। परिहारमाह—एवमपीति, एवंरीत्या 'सौरभं न पश्यति' इत्यत्र वाक्यार्थ-बोधोपपादनेऽपि 'आकाशं न पश्यति' इत्यत्र तु वाक्यार्थबोधोपपादनं नैव संभवति—उक्तरीत्याऽऽकाशनिरूपितलौकिकविषयितैव क्वचित्प्रत्यक्षे प्रसिद्धा नास्ति यस्याश्चाक्षुषप्रत्यक्षेऽभावबोधनेन वाक्यार्थबोध उपपद्येतेत्यर्थः।

ननु घटादिप्रत्यक्षस्थले लौकिकविषयितापि प्रसिद्धास्त्याकाशमपि प्रसिद्धमेवेति 'आकाशं न पश्यति' इत्यत्र लौकिकविषयितायां निरूपि-तत्वसंबन्धेनाकाशाभावः प्रतीयते इति वक्ष्याम इति न वाक्यार्थबोधानुपपत्तिरि-त्याशङ्क्याह—न चेति। परिहारमाह—वृत्त्यनियामकेति, निरूपितत्वसंबन्धस्य वृत्त्यनियामकत्वात् संसर्गाभावीयप्रतियोगितावच्छेदकत्वमेव न संभवति येन निरूपितत्वसंबन्धेन लौकिकविषयितायामाकाशाभावप्रतीतिः स्यादित्यर्थः। एवमेव निरूपकत्वसम्बन्धस्यापि वृत्त्यनियामकतया निरूपकत्वसंबन्धेन चाक्षुषप्रत्यक्षनिष्ठलौकिकविषयिताया अप्याकाशादावभावस्तत्र='आकाशं न

इत्यपि निरस्तम्। अन्वयबोधस्य प्रथमान्तार्थमुख्यविशेष्यकतायाः सर्वानुभवसिद्धाया भंगप्रसङ्गच्च, चाक्षुषादिनिष्ठलौकिकविषयितात्वावच्छिन्नस्य पदाद्वाक्याच्चानुपस्थितत्वेन तदाभावस्याकाशादौ भानासंभवाच्च। भावान्वयबोधे च लौकिकविषयिताप्रकारेण चाक्षुषादेर्भानान्नाऽभावान्वयबोधे चाक्षुषप्रकारेण तस्या भानम्।

पश्यति' इत्यादौ प्रतीयते इत्यपि वक्तुं न शक्यते इत्यभिप्रायेणाह–एतेनेति। दोषान्तरमाह–अन्वयबोधस्येति, सर्वत्र प्रथमान्तार्थमुख्यविशेष्यक एव बोधो भवतीति नियमः अत्र यदि लौकिकविषयितायामाकाशाभावस्यान्वयः स्यात्तदा लौकिकविषयितावशेष्यक एव बोधः स्यात् न च लौकिकविषयिता प्रथमान्तपदार्थः, एवमेव यद्यत्राकाशे चाक्षुषलौकिकविषयित्वाभावस्यान्वयः स्यात्तदाऽऽकाशविशेष्यक एव बोधः स्याद् न चाकाशः प्रथमान्तपदार्थ इत्यर्थः। दोषान्तरमाह चाक्षुषेति, 'आकाशं न पश्यति' इत्यत्र लौकिकविषयित्वमात्रं द्वितीयार्थः प्रत्यक्षमात्रं च धात्वर्थ इति चाक्षुषप्रत्यक्षनिष्ठलौकिकविषयितायास्तु केनापि पदेन वाक्येन वोपस्थितिरेव नास्ति येनाऽऽकाशे चाक्षुषादिनिष्ठलौकिकविषयिताया अभावस्य भानं स्यात्–उपस्थितस्यैवाभावभानसंभवादित्यर्थः। दोषान्तरमाह–भावान्वयेति, 'आकाशं पश्यति' इत्यत्राकाशनिरूपितलौकिकविषयिताशालिप्रत्यक्षाश्रयश्चैत्र इति भावान्वयबोधे लौकिकविषयिताप्रकारेण चाक्षुषादेर्भानात्=चाक्षुषप्रत्यक्षे लौकिकविषयिता प्रकारतया या भासते तस्या अभावान्वयबोधेऽपि चाक्षुषप्रत्यक्षप्रकारत्वेनैव भानं युक्तं न तु प्रत्यक्षविशेष्यतयेति 'आकाशं न पश्यति' इत्यत्रोक्तरीत्या चाक्षुषप्रत्यक्षनिष्ठलौकिकविषयिताभाववानाकाश इत्याकारकाऽभावान्वयबोधे न चाक्षुषप्रकारेण तस्या भानम्=तस्या लौकिकविषयिताया विशेष्यता चाक्षुषप्रत्यक्षस्य च प्रकारतया भानं न संभवति–"प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ" इतिनियमादित्यर्थः। अत्र च 'भावान्वयबोधे लौकिकविषयितायाश्चाक्षुषादिप्रकारत्वेन भानादाभावान्वयबोधे तस्याः (लौकिकविषयितायाः) चाक्षुषादिविशेष्यत्वेन किं वा चाक्षुषादेर्लौकिकविषयिता–

अस्तु वा वृत्त्यनियामकोऽपि संबन्धोऽभावप्रतियोगिता-वच्छेकस्तथापि निरूपितत्वसंबन्धावच्छिन्नप्रतियोगिताकस्य विषयितात्वविशेषनिष्ठाकाशाद्यभावस्य भानोपगमो न संभवति-तथा सति 'आकाशं पश्यति चैत्रः' इत्याकारकवाक्य-

---

प्रकारत्वेन भानं युक्तम्' इत्येवं पाठो युक्तः।

वृत्त्यनियामकस्यापि निरूपितत्वादिसम्बन्धस्याभावीयप्रतियोगिता-वच्छेदकत्वमभ्युपगम्य दोषमाह—अस्तु वेति, विषयितात्वविशेषः=लौकिक-विषयिता, "न च लौकिकविषयितायाम्" इत्याद्युक्तं नोपपद्यते इत्यर्थः। उक्तमुपपादयति— तथा सतीति, तथा सति=यदि 'आकाशं न पश्यति' इत्यत्र लौकिकविषयितायां निरूपितत्वसंबन्धेनाऽऽकाशाभावस्य भानं स्यात्तदा 'आकाशं पश्यति चैत्रः' इत्याकारकवाक्यजन्यबोधदशायामपि 'आकाशं न पश्यति चैत्रः' इत्याकारकवाक्यादुक्ताभावविषयकः शाब्दबोधः प्रसज्येतैव='आकाशं पश्यति चैत्रः' 'आकाशं न पश्यति चैत्रः' इत्येतद्वाक्यद्वयजन्ययोः शाब्दबोधयोः परस्परमिष्टः प्रतिबध्यप्रतिबन्धकभावो नोपपद्येतेत्यर्थ। प्रतिबध्यप्रतिबन्धकभावानुपपत्तिमुपपादयति—'आकाशं पश्यति मैत्रः' इत्यादिना, 'आकाशं पश्यति मैत्रः' इत्याकारकभ्रमदशायामपि 'आकाशं न पश्यति चैत्रः' इत्याकारकवाक्यान्निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगिता-कलौकिकविषयितानिष्ठोक्ताकाशाभावविषयकशाब्दबोधोत्पत्तौ किमपि प्रतिबन्धकं नास्तीति तादृशशाब्दबोधस्य दुरपन्हवतया लौकिकविषयिता-त्वसामानाधिकरण्येनैव=कस्यांचिल्लौकिकविषयितायामेव तादृशाभावबोधकम्= निरूपितत्वसंबन्धेनाकाशाभावबोधकं तद्वाक्यम्='आकाशं न पश्यति चैत्रः' इति वाक्यमुपगन्तव्यम्=चैत्रीयप्रत्यक्षमात्रनिष्ठलौकिकविषयितायामेव निरूपि-तत्वसंबन्धेनाकाशाभावान्वयबोधकत्वात् मैत्रीयप्रत्यक्षनिष्ठलौकिकविषयितायां निरूपितत्वसम्बन्धेनाकाशाभावान्वयाऽसंभवात्—मैत्रस्याकाशकर्मकप्रत्यक्षस्यैव भ्रमेण प्रतिपन्नत्वादिति न लौकिकविषयितात्वावच्छेदेन निरूपितत्वसंबन्धा-वच्छिन्नप्रतियोगिताकाऽऽकाशाभावान्वयबोधः संभवतीत्यर्थः। 'आकाशं न पश्यति चैत्रः' इत्याकारकवाक्यजन्यबोधस्योक्तदुरपन्हवत्त्वे हेतुमाह— तादृशबोधश्चेति, तादृशबोधः='आकाशं न पश्यति चैत्रः' इत्याकारकवाक्यजन्यो निरूपित्वसंबन्धावच्छिन्नप्रतियोगिताकलौकिकविषयितानिष्ठाकाशाभावान्वयबोधश्च

जन्यबोधदशायाम् 'आकाशं न पश्यति चैत्रः' इत्यादि-वाक्याच्छाब्दबोधप्रसंगात्। 'आकाशं पश्यति मैत्रः' इत्यादि-भ्रमदशायाम् 'आकाशं न पश्यति चैत्रः' इत्यादिवाक्यच्छाब्द-बोधस्य दुरपन्हवतया लौकिकविषयितात्वसामानाधिकरण्येनैव तादृशाभावबोधकं तद्वाक्यमुपगन्तव्यम्, तादृशबोधश्च लौकिकविषयितात्वसामानाधिकरण्यमात्रेणैवाऽऽकाशादिनि-रूपितत्वावगाहिदर्शितयोग्यताज्ञानाऽप्रतिबध्य एव।

न च चैत्रीयचाक्षुषादिनिष्ठलौकिकविषयिता-त्वावच्छेदेनैव तादृशाभावो दर्शितवाक्येन प्रत्याय्यते इति

लौकिकविषयितात्वसामानाधिकरण्यमात्रेण=किंचिल्लौकिकविषयितायामेवाऽऽकाश-निरूपितत्वावगाहि यद् दर्शितयोग्यताज्ञानम्='आकाशं पश्यति मैत्रः' 'आकाशं पश्यति चैत्रः' इत्याकारकभावान्वयबोधकवाक्यजन्यं योग्यताज्ञानं तादृशयोग्य-ताज्ञानेनाऽप्रतिबध्य एव अर्थात् समानविषयकयोरेव प्रतिबध्यप्रतिबन्धकभावो भवति अत्र च 'आकाशं पश्यति मैत्रः' इत्यनेन कस्यांचिल्लौकिकविषयि-तायामाकाशनिरूपितत्वं प्रतिपाद्यते 'आकाशं न पश्यति चैत्रः' इत्यनेनापि कस्यांचिल्लौकिकविषयितायामाकाशाभावान्वयः प्रतिपाद्यते इति समानविषयकत्वाभावान्न प्रतिबध्यप्रतिबन्धकभावस्तथा च 'आकाशं पश्यति चैत्रः' इत्याकारकवाक्यजन्यबोधदशायामपि 'आकाशं न पश्यति चैत्रः' इत्याकारकवाक्यजन्यबोधप्रसङ्गो दुर्वार एवेत्यर्थः। 'आकाशं पश्यति' इत्यत्र प्रत्यक्षनिष्ठा विषयिताऽऽकाशनिरूपितेत्युक्तम्—"आकाशादिनिरूपि-तत्वावगाहि" इति। यदि "आकाशादिनिरूपितत्वाभावावगाही" इत्येवमत्र प्रथमान्तपाठस्तदासौ "तादृशबोधः" इत्यस्य विशेषणमिति विज्ञेयम्।

ननु यद्यपि 'आकाशं न पश्यति चैत्रः' इति वाक्येन लौकिक-विषयितात्वावच्छेदेनाकाशाभावो न प्रत्याय्यते तथापि दर्शितवाक्येन चैत्रीयचाक्षुषप्रत्यक्षनिष्ठलौकिकविषयितात्वावच्छेदेन तु तादृशाभावः=निरूपि-तत्वसंबन्धावच्छिन्नप्रतियोगिताकाऽऽकाशाभावः प्रत्याय्यते इति चैत्रीयचाक्षुषादि-निष्ठलौकिकविषयितायामाकाशनिरूपितत्वावगाही 'आकाशं पश्यति चैत्रः'

चैत्रीयचाक्षुषादिनिष्ठलौकिकविषयितायामाऽऽकाशीयत्वाद्यवगाही 'चैत्र आकाशं पश्यति' इति वाक्यजन्यबोधः प्रतिबध्नात्येव तादृशवाक्यजन्यधियमिति वाच्यम्, तादृशविषयितात्वेन विषयिताया अनुपस्थितेस्तदवच्छेदेनाभावप्रत्यायनाऽसंभवात्। 'चैत्र आकाशं पश्यति' इति वाक्यजन्यबोधे चैत्रांशे दर्शनाश्रयत्वं विशेषणं दर्शनांशे लौकिकविषयिता विशेषणमिति रीत्यैव

इति वाक्यजन्यबोधः तादृशवाक्यजन्यधियम्='आकाशं न पश्यति चैत्रः' इति वाक्यजन्यं निरूपितत्वसंबन्धावच्छिन्नप्रतियोगिताकचैत्रीयप्रत्यक्षनिष्ठलौकिकविषयितानुयोगिकाकाशाभावान्वयबोधं प्रतिबध्नात्येव-समानविषयकत्वात् तथा च 'आकाशं पश्यति चैत्रः' इति वाक्यजन्यबोधदशायाम् 'आकाशं न पश्यति चैत्रः' इति वाक्यजन्यबोधस्यापत्तिर्नास्त्येवेत्याशङ्क्याह— न चेति। परिहारमाह—तादृशेति, अत्र लौकिकविषयितायाश्चैत्रीयचाक्षुषादिनिष्ठलौकिकविषयितात्वेन रूपेणोपस्थितिरेव नास्ति येन तदवच्छेदेन= चैत्रीयचाक्षुषादिनिष्ठलौकिकविषयितात्वावच्छेदेनाकाशाभावप्रत्यायनं संभवेत् तथा चात्र लौकिकविषयितात्वसामानाधिकरण्येनैवाकाशाभावान्वयबोधो वक्तव्यः अन्यथा 'आकाशं पश्यति मैत्रः' इति वाक्यजन्यबोधदशायामपि 'आकाशं न पश्यति चैत्रः' इति वाक्यजन्यबोधो नोपपद्येत, यदा च लौकिकविषयितात्वसामानाधिकरण्येनैवाकाशाभावप्रतिपादनं प्राप्तं तदा समानविषयकत्वाभावेनोक्तरीत्या प्रतिबध्यप्रतिबन्धकभावस्याऽभावात् 'आकाशं पश्यति चैत्रः' इति वाक्यजन्यबोधदशायातपि 'आकाशं पश्यति चैत्रः' इति वाक्यजन्यबोध प्रसङ्गः स्यादेवेति न लौकिकविषयितायां निरूपितत्वसंबन्धेनाकाशाभावान्वयः संभवतीत्यर्थः। 'आकाशं न पश्यति चैत्रः' इति वाक्येन चैत्रीयचाक्षुषादिनिष्ठलौकिकविषयितायामेवाकाशाभावान्वयबोधमभ्युगम्यापि प्रतिबन्ध्यप्रतिबन्धकभावाऽभावमुपपादयति—चैत्र इत्यादिना, 'चैत्र आकाशं पश्यति' इत्यत्राऽऽकाशनिरूपितलौकिकविषयितात्वविशिष्टदर्शनाश्रयत्ववांश्चैत्र इति बोध स्तथा चात्र लौकिकविषयिता एवाकाशनिरूपितास्तीति लौकिकविषयितायामेव भासमानायां निरूपितत्वसंबन्धेनाकाशं विशेषणमस्तीत्याकाशादिधर्मितावाच्छेदकम्=आकाशस्य धर्मितावच्छेदकं शुद्धम्=चैत्रीयादिचाक्षुषादिनिष्ठत्वविशेषणरहितमेव लौकिकविषयितात्वम् (धर्मितावच्छेदकम्) अस्ति न तु

पदार्थानां भानात्, चैत्रीयचाक्षुषादिनिष्ठविषयितात्वं नाकाशादिधर्मितावच्छेदकं किंतु शुद्धलौकिकविषयितात्वमेवेति तस्य शुद्धलौकिकविषयितात्वावच्छेदेनाकाशाद्यभावावगाहिज्ञानं प्रत्येव प्रतिबन्धकतया निरुक्तधर्मावच्छेदेनाकाशाद्यभावावगाहिज्ञानस्य तदऽप्रतिबध्यत्वाच्च।

एतेन तत्राकाशादिपदस्याऽऽकाशादिनिरूपितत्वार्थकतां स्वीकृत्य लौकिकविषयितायामाश्रयतासंबन्धावच्छिन्नप्रतियोगि-

चैत्रीयचाक्षुषादिनिष्ठलौकिकविषयितात्वं तथा च तस्य='आकाशं पश्यति चैत्रः' इति वाक्यजन्यबोधस्य शुद्धलौकिकविषयितायामेवाऽऽकाशाभावावगाहिज्ञानं प्रति प्रतिबन्धकत्वं संभवति-समानविषयकत्वात् न तु चैत्रीयचाक्षुषादिनिष्ठलौकिकविषयतायामाकाशाभावावगाहिज्ञानं प्रत्यपि भिन्नविषयत्वादिति तत्=तेन='आकाशं पश्यति चैत्रः' इति वाक्यजन्यबोधेन निरुक्तधर्मावच्छेदेन=चैत्रीयचाक्षुषादिनिष्ठलौकिकविषयितात्वावच्छेदेनाकाशाभावावगाहिज्ञानस्याऽप्रतिबध्यत्वात् 'आकाशं पश्यति चैत्रः' इति वाक्यजन्यबोधदशायाम् 'आकाशं न पश्यति चैत्रः' इति वाक्यजन्यबोधः प्रसज्येतैवेत्यर्थः।

उक्तदोषं प्रकारान्तरेण समर्थनेप्यतिदिशति-एतेनेति, यदि तत्र='आकाशं न पश्यति चैत्रः' इत्यत्राकाशपदस्याकाशनिरूपितत्वमर्थ इति स्वीकृत्य लौकिकविषयितायामाश्रयतासंबन्धेन तदभावः=आकाशनिरूपितत्वाभावःप्रतीयते इत्युच्येत तदापि न निस्तारः-यत एवमप्युक्तरीत्या लौकिकविषयितात्वसामानाधिकरण्यमात्रेणैवाऽऽकाशनिरूपितत्वाभावान्वयो वक्तव्यो न तु लौकिकविषयितात्वावच्छेदेन तथा सति 'चैत्र आकाशं न पश्यति' इति वाक्यजन्यबोधदशायां लौकिकविषयितात्वावच्छेदेनाकाशनिरूपितत्वाभावान्वयबोधे प्रतिबन्धकरूपे जाते लौकिकविषयितायामाकाशनिरूपितत्वावगाही 'मैत्र आकाशं पश्यति' इति वाक्यजन्यबोधोऽपि नोपपद्येत तस्मात् 'चैत्र आकाशं न पश्यति' इत्यत्र लौकिकविषयितात्वसामानाधिकरण्येनैवाश्रयतासम्बन्धेनाकाशनिरूपितत्वाभावस्यान्वयबोधे वाच्य इति 'चैत्र आकाशं न पश्यति' इत्यनेन किञ्चिल्लौकिकविषयितायामाकाशनिरूपि-

ताकतदभावोपगमेनापि न निस्तारः। 'घट आकाशं न पश्यति' इत्यादौ नितरामेवाऽगतिः।

यत्तु नञर्थस्य द्विधा भानोपगमेनाऽऽकाशादिनिरूपितत्वाभाववल्लौकिकविषयिताशालिचाक्षुषाश्रयत्वाभाववान् घट इत्याकारकस्तत्रान्वयबोध इति, तदपि न—तथा सति 'चैत्रो

तत्वाभावान्वयबोधनेऽपि 'चैत्र आकाशं पश्यति' इति वाक्येन किंचिल्लौकिकविषयितायामाकाशनिरूपितत्वबोधने विरोधाभावेन प्रतिबध्यप्रतिबन्धकभावाभावात् 'आकाशं पश्यति चैत्रः' इतिवाक्यजन्यबोधदशायामपि 'आकाशं न पश्यति चैत्रः' इति वाक्यजन्यबोधप्रसङ्गरूपो दोषस्तदवस्थ एवेत्यर्थः । 'आकाशं न पश्यति चैत्रः' इति वाक्यजन्यबोधस्य कथञ्चित्समर्थनसंभवेऽपि दुरुद्धरं दोषान्तरमाह-घट इति, नितरामेवागतिरिति-घटे लौकिकविषयिताशालिप्रत्यक्षाश्रयत्वमेव न संभवति जडत्वादिति तादृशप्रत्यक्षाश्रयत्वाभावो नितरामेवासंभवतीत्यर्थः। आकाशनिरूपितलौकिकविषयिताशालिप्रत्यक्षाश्रयत्वमप्यन्यत्र प्रसिद्धं नास्ति येन घटे तदभावबोधनमुपपद्येतेत्यर्थः।

ननु 'घट आकाशं न पश्यति' इत्यत्र नञर्थस्याभावस्य द्विधा भानं वक्ष्यामस्तत्रैकस्याकाशनिरूपितत्वेन सहान्वयो द्वितीयस्य चाक्षुषाश्रयत्वेनान्वयस्तथा चाकाशनिरूपितत्वाभाववल्लौकिकविषयिताशालिचाक्षुषाश्रयत्वाभाववान् घट इति वाक्यार्थबोधः संपन्नास्तत्राऽऽकाशनिरूपितत्वाभाववती या लौकिकविषयिता तादृशविषयिताशालिचाक्षुषप्रत्यक्षाश्रयत्वम् 'घटं पश्यति चैत्रः' इत्यादौ चैत्रादौ प्रसिद्धमेव तस्यात्र घटेऽभावो बोध्यते इति न काचिदनुपपत्तिरित्याशङ्कते-यत्तु इति। परिहरति—तदपि नेति, तथा सति=उक्तस्थले नञर्थस्य द्विधा भानोपगमे सति, यथा 'चैत्रो घटं न पश्यति' चैत्र आकाशं न पश्यति' इत्यादौ नञर्थस्यैकदैव भानोपगमेन घटनिरूपितलौकिकविषयिताशालिचाक्षुषाश्रयत्वाभावविषयक आकाशनिरूपितलौकिकविषयिताशालिचाक्षुषाश्रयत्वाभावविषयश्च बोधो भवति तादृश एव तादृशवाक्यात्='घट आकाशं न पश्यति' इति वाक्याद् नञर्थस्यैकदैव भानपूर्वक आकाशनिरूपितलौकिकविषयिताशालिचाक्षुपाश्रयत्वाभावविषयको बोधः सर्वानुभवसिद्धोऽस्ति तन्नोपपद्येत त्वया नञर्थभानस्य द्विधा

घटं न पश्यति' 'चैत्र आकाशं न पश्यति' इत्यादि-वाक्यजन्यशाब्दबोधादविलक्षणबोधस्य सर्वानुभवसिद्धस्य तादृशवाक्यादनुपपत्तेः, न हि तत्रापि तादृश एव शाब्दबोधः, तथा सति चैत्रो यदा घटादिकं न पश्यत्यपि तु पटादिकमेव तदा घटाद्यनिरूपितलौकिकविषयिताशालिचाक्षुषा-श्रयत्वाभावस्य तत्र बाधात् 'चैत्रो घटं न पश्यति' इति प्रयोगानुपपत्तेः, यदा च भावमात्रं पश्यति तदा भावनि-रूपितलौकिकविषयिताशालिचाक्षुषाश्रयत्वाभावसत्त्वात् 'भावं न पश्यति चैत्रः' इत्यादिप्रयोगापत्तेश्च।

स्वीकृतत्वादित्यर्थः। तत्रापि='चैत्रो घटं न पश्यति' इत्यादिस्थले तु तादृशः=नञर्थस्य द्विधाभानपूर्वकः शाब्दबोधो नैव भवति येनोक्तशाब्दबोध ानां नञर्थस्य द्विधाभानेन साम्यं स्यादित्याह—न हीति। विपक्षे बाधकमाह—तथा सतीति, यदि 'चैत्रो घटं न पश्यति' इत्यत्र नञर्थस्य द्विधा भानं स्यात् तदा यदा चैत्रो घटं न पश्यति पटं च पश्यति तदा घटाद्यनिरूपित= घटनिरूपितत्वाभाववल्लौकिकविषयिताशालि यत् पटविषयकचाक्षुषं तदाश्रयत्वस्यैव तत्र=चैत्रे सत्त्वेन तदभावस्याऽसंभवात् 'चैत्रो घटं न पश्यति' इति प्रयोगो नोपपद्येत-एतद्वाक्येन नञर्थस्य द्विधा भाने घटनिरूपितत्वाभाव-वल्लौकिकविषयिताशालिचाक्षुषाश्रयत्वाभाव एव चैत्रे बोधनीयस्तत्तु न संभवति घटनिरूपितत्वाभाववल्लौकिकविषयिताशालिपटविषयकचाक्षुषप्रत्यक्षा-श्रयत्वस्यैव चैत्रे सत्त्वादिति 'चैत्रो घटं न पश्यति' इति प्रयोगानुपपत्तिरित्यर्थः। नञर्थस्य द्विधाभाने दोषान्तरमाह—यदा चेति, नञर्थस्य द्विधा भाने 'भावं न पश्यति चैत्रः' इत्यनेनापि भावानिरूपित=भावनिरूपितत्वाभाववल्लौकि-कविषयिताशालिचाक्षुषाश्रयत्वाभाववांश्चैत्र इत्येव बोधः स्यादिति यदा चैत्रो भावमात्रं पश्यति तदा चैत्रे भावनिरूपितलौकिकविषयिताशालिचाक्षुषा श्रयत्वस्य सत्त्वेन भावानिरूपितलौकिकविषयिताशालिचाक्षुषाश्रयत्वस्याऽसत्त्वात् भावानिरूपितलौकिकविषयिताशालिचाक्षुषाश्रयत्वाभावबोधकस्य 'भावं न पश्यति चैत्रः' इति वाक्यस्य प्रयोगापत्तिः स्यादेव न चैतदिष्टम्, तस्मादुक्तस्थले नञर्थस्य द्विधाभानोपगमो न संभवतीति 'घट आकाशं न पश्यति' इत्यत्र वाक्यार्थबोधानुपपत्तिस्तदवस्थैवेत्यर्थः।

एवम् 'आकाशं न पश्यति घटः' इत्यादावाऽऽकाशाद्यनिरूपितलौकिकविषयिताशालिचाक्षुषाश्रयत्वाभावस्य वाक्यार्थत्वे यदाऽऽकाशाद्यतिरिक्तपदार्थ विषयकचाक्षुषाश्रयत्वभ्रमो घटादौ तदाऽऽकाशाद्यनिरूपितलौकिकविषयिताशालिचाक्षुषाश्रयत्वनिश्चयरूपप्रतिबन्धकसत्त्वेन तादृशवाक्यजन्यशाब्दबोधानुपपत्तिः। यया 'चैत्रो घटं पश्यति' इत्यादिनिश्चयदशायाम् 'पटं न पश्यति चैत्रः' इत्यादिवाक्यजन्यशाब्दबोधोत्पादोऽनुभवसिद्धस्तथैवोक्तभ्रमदशायाम् 'आकाशं न पश्यति घटः' इत्यादिवाक्यजन्यबोधोत्पादोऽपीति न तत्रेष्टापत्तिः (अपि) संभवति।

नञर्थस्य द्विधाभाने दोषान्तरमाह—एवमिति, यदि नञर्थस्य द्विधा भानेन 'घट आकाशं न पश्यति' इति वाक्येनाकाशनिरूपितत्वाभाववल्लौकिकविषयिताशालिचाक्षुषाश्रयत्वाभाव एव बोध्यते तदा यदाऽऽकाशाद्यतिरिक्तपदार्थ (पटादि) विषयकचाक्षुषाश्रयत्वभ्रमो घटे जातस्तदाऽऽकाशानिरूपितलौकिकविषयिताशालि यदाऽऽकाशाद्यतिरिक्तपटादिपदार्थविषयक चाक्षुषप्रत्यक्षं तदाश्रयत्वस्य घटे निश्चये जाते तादृशनिश्चयस्य चाकाशानिरूपितलौकिकविषयिताशालिचाक्षुषाश्रयत्वाभावबोधं प्रति प्रतिबन्धकत्वेन तादृशवाक्यजन्यः='घटं आकाशं न पश्यति' इति वाक्यजन्य आकाशानिरूपितलौकिकविषयिताशालिचाक्षुषाश्रयत्वाभावविषयकः शाब्दबोधो नोपपद्येतेति घटे आकाशाद्यतिरिक्तपदार्थविषयकचाक्षुषाश्रयत्वभ्रमदशायाम् (काले) 'घट आकाशं न पश्यति' इति प्रयोग इष्टोऽपि नोपपद्येतेत्यर्थः। ननूक्तभ्रमकाले उक्तप्रयोगस्तज्जन्यबोधश्च नोपपद्यतां को दोष इत्याशङ्क्याह—यथेति, यथा 'चैत्रो घटं पश्यति' इतिवाक्यजन्यशाब्दबोधविषयस्य चैत्रवृत्तिघटविषयकप्रत्यक्षस्य निश्चयदशायाम् 'पटं न पश्यति चैत्रः' इति वाक्यजन्यशाब्दबोधोत्पत्तिः सर्वानुभवसिद्धा—'चैत्रो घटं पश्यति' 'चैत्रः पटं न पश्यति' इति वाक्ययोस्तज्जन्यशाब्दबोधयोश्च परस्परं विरोधाभावात् तथैवोक्तभ्रमदशायाम्=घटे आकाशातिरिक्तपदार्थविषयकचाक्षुषाश्रयत्वभ्रमदशायाम् 'आकाशं न पश्यति घटः' इति

यच्चाऽलौकिकविषयिताशून्यचाक्षुषत्वाद्यवच्छेदेनाकाशादिविषयकत्वघटादिवृत्तित्वोभयाऽभाव एव 'आकाशं न पश्यति' इति वाक्यात् प्रतीयते, उपनीताकाशादिविषयकचाक्षुषे आकाशादिविषयकत्वचैत्रादिवृत्तित्वोभयसत्त्वेन 'चैत्र आकाशं न पश्यति' इत्यादिप्रयोगानुपपत्तिः घटादौ तादृशचाक्षुषाद्याश्रयत्वभ्रमदशायाम् 'घट आकाशं न पश्यति' इत्यादि-

---

वाक्यजन्यशाब्दबोधोत्पत्तिरपि सर्वानुभवसिद्धास्ति–'पटं पश्यति घटः' 'आकाशं न पश्यति घटः' इति वाक्यजन्यबोधयोः परस्परं विरोधाभावादिति तत्र='आकाशं न पश्यति घटः' इति वाक्यजन्यशाब्दबोधानुपपत्ताविष्टापत्तिरपि न संभवतीत्यर्थः।

नन्वऽलौकिकविषयिताशून्यचाक्षुषत्वाद्यवच्छेदेन=अलौकिकविषयिताशून्यं यच्चाक्षुषप्रत्यक्षं तस्मिन्नाऽऽकाशविषयकत्वस्य घटवृत्तित्वस्य चाऽभाव एव 'आकाशं न पश्यति घटः' इति वाक्येन बोध्यते– अलौकिकविषयिताशून्यचाक्षुषप्रत्यक्षमाकाशविषयकमपि न भवति घटवृत्त्यपि न भवति आकाशस्यालौकिकविषयिताशालिचाक्षुषप्रत्यक्षविषयत्वाभ्युपगमात्, एवं चात्र पक्षे नञर्थस्य द्विधाभानाभावाद् नञर्थस्य द्विधाभानप्रयुक्तोक्तदोषापत्तिर्नास्तीति प्रतिपादकमतमनुवदति– यच्चेति। अत्राभावद्वयस्य भानेप्यभावस्य द्विधा भानं तु नास्तीत्यवधार्यम्। चाक्षुषप्रत्यक्षेऽत्रालौकिकविषयिताशून्यत्वविशेषणप्रदानस्य फलमाह– उपनीतेति, यदि 'घट आकाशं न पश्यति' इत्यत्रालौकिकविषयिताशून्यत्वविशेषणं परित्यज्य प्रत्यक्षमात्रे आकाशविषयकत्वघटवृत्तित्वोभयाभावान्वयबोध उच्येत तदोपनीताकाशादिविषयकचाक्षुषे='तत्राकाशे पक्षी' इत्याकारके चैत्रवृत्त्याकाशविषयकालौकिकचाक्षुपप्रत्यक्षे आकाशविषयकत्वस्य चैत्रवृत्तित्वस्य च सत्त्वेनाऽऽकाशविषयकत्वचैत्रवृत्तित्वोभयाभावबोधकम् 'चैत्र आकाशं न पश्यति' इति वाक्यं नोपपद्येत, अलौकिकविषयिताशून्यत्वविशेषणसत्त्वे तूक्तोपनीताकाशादिविषयकचाक्षुषप्रत्यक्षस्याऽलौकिकविषयिताशालित्वेन तस्मिन्नाऽऽकाशविषयकत्वाभावस्यासंभवेऽपि अलौकिकविषयिताशून्यचाक्षुपप्रत्यक्षे त्वाकाशविषयकत्वचैत्रवृत्तित्वोभयाभावस्यान्वयसम्भवात् 'चैत्र आकाशं न पश्यति' इति प्रयोगानुपपत्तिर्नास्ति, तथा यद्यऽलौकिकविषयिताशून्यत्वं विशेषणं

वाक्याच्छाब्दबोधानुपपत्तिश्चेत्यऽलौकिकविषयिताशून्यत्वेन चाक्षुषादिकं विशेषितम्। आकाशविषयकचाक्षुषाद्युपनीत-भानस्यापीतरांशे लौकिकत्वात् तादृशानुपपत्तितादवस्थ्यमऽतों लौकिकत्वविशेषणमुपेक्षितम्। अत्राऽलौकिकविषयिताशून्य-चाक्षुषत्वाद्यवच्छिन्नस्य 'घट आकाशं न पश्यति' इत्यादौ शक्त्या धात्वर्थत्वासंभवेऽपि प्रकृते तस्यैव लक्षणया

न स्यात्तदा यदा घटे तादृशचाक्षुषाद्याश्रयत्वभ्रमः=आकाशविषयकालौकिक-(उपनीत)चाक्षुषप्रत्यक्षाश्रयत्वभ्रमो जातस्तदा 'घट आकाशं न पश्यति' इति वाक्य- जन्यस्याकाशविषयकत्वघटवृत्तित्वोभयाभावविशिष्टप्रत्यक्ष-विषयकशाब्दबोधस्यानुपपत्तिः स्यात्– घटे आकाशविषयकालौकिक-प्रत्यक्षाश्रयत्वस्यैव ज्ञानस्य सत्त्वात्, अलौकिकविषयिताशून्यत्वविशेषणसत्त्वे तु घटे 'आकाशविषयकालौकिकचाक्षुषप्रत्यक्षाश्रयत्वभ्रमदशायामपि (घटवृत्त्यलौकिकविषयिताशालिप्रत्यक्षे आकाशविषयकत्वसत्त्वेऽपि) अलौकिकविषयिताशून्यचाक्षुषप्रत्यक्षे त्वाऽऽकाशविषयकत्वं नास्तीत्याऽऽकाश-विषयकत्वघटवृत्तित्वोभयाभावस्यान्वयसंभवात् तद्विषयकस्य 'घट आकाशं न पश्यति' इति वाक्यजन्यशाब्दबोधस्यानुपपत्तिर्नास्तीत्यलौकिकविषयिता-शून्यत्वं प्रत्यक्षविशेषणमुपन्यस्तमित्यर्थः। नन्वेवं लौकिकत्वमेव विशेषणमुपन्यस्यताम् अलौकिकविषयिताशून्यं हि प्रत्यक्षं लौकिकमेव भवतीति लौकिकत्वविशेषणसत्त्वेऽप्युक्तरीत्यैव 'चैत्र आकाशं न पश्यति' घट आकाशं न पश्यति' इति प्रयोगयोरनुपपत्तिर्नास्तीस्तीत्याशङ्क्याह–आकाशविषयकेति, उक्तस्य 'तत्राकाशे पक्षी' इत्याद्याकारकस्यालौकिकस्याप्युपनीताकाशादिविषय-कचाक्षुषस्येतरांशे=पक्ष्याद्यंशे लौकिकत्वात् तादृशलौकिकप्रत्यक्षे आकाश-विषयकत्वं घटचैत्रादिवृत्तित्वमपि चास्त्येवेति तादृशलौकिकप्रत्यक्षे आकाश-विषयकत्वचैत्रादिवृत्तित्वोभयाभावान्वयस्य बाधात् तादृशानुपपत्तिः=आकाश-विषयकत्वचैत्रादिवृत्तित्वोभयाभावविशिष्टप्रत्यक्षबोधकत्वेनाभिमतस्य 'चैत्र आकाशं न पश्यति' इत्यादिवाक्यस्य प्रयोगानुपपत्तिस्तदवस्थैव स्यादिति लौकिकत्वविशेषणं नोपन्यस्तं किन्त्वऽलौकिकविषयिताशून्यत्वमेव विशेषणमुपन्यस्तम्, अलौकिकविषयिताशून्यप्रत्यक्षे चाकाशविषयकत्वघट-वृत्तित्वोभयाभावान्वये उक्तरीत्या न कोऽपि दोष इत्यर्थः। ननु यद्यलौकि-

धात्वर्थत्वमुपेयते। विषयितासामान्यमेव च द्वितीयार्थः, आश्रयत्वं द्वित्वं निरूपकत्वं चाख्यातार्थः, आश्रयत्वे व्युत्पत्तिवैचित्र्यात् प्रथमान्तपदार्थघटादेस्तस्य निरूपकत्वे विशेषणतयान्वयः, तादृशनिरूपकत्वद्वितीयान्तार्थाकाशादिविषयकत्वयोश्च प्रकारतया द्वित्वान्वयः, द्वित्वाद्यवच्छिन्नप्रतियोगिताकत्वसंबन्धेन तादृशोभयस्य नञर्थाभावे तस्यान्वयितावच्छेदकनिरुक्त-धर्मावच्छेदेन धात्वर्थेऽन्वयः, धात्वर्थस्य प्रकृते मुख्यविशेष्यतयैव भानम्।

कविषयिताशून्यस्य चाक्षुषप्रत्यक्षस्य दृश्धात्वर्थत्वं स्यात्तदा दृश्धातुनाऽलौकिक-विषयिताशून्यचाक्षुषप्रत्यक्षस्योपस्थितौ सत्यां तत्राकाशविषयकत्वघटवृत्तित्वो-भयाभावस्यान्वयः संभवेदपि न चैवमस्ति दृश्धातोश्चाक्षुषप्रत्यक्षमात्रार्थकत्वाद् अनुपस्थितपदार्थे च पदार्थान्तरान्वयासंभवादित्याशङ्क्याह—अत्रेति। अत्र=अस्मिन्मते। प्रकृते='घट आकाशं न पश्यति' इत्यत्र अस्मिन् प्रकरणे वा। तस्यैव='अलौकिकविषयिताशून्यचाक्षुषप्रत्यक्षस्यैव। धात्वर्थत्वम्= दृश्धात्वर्थत्वम्। 'घट आकाशं न पश्यति' इत्यत्रत्यधात्वर्थमुक्त्वा इतरपदार्थानाह—विषयितेति, विषयितासामान्यस्य द्वितीयार्थत्वे यत्र लौकिकविषयिता प्रत्यक्षे संभवेत्तत्र लौकिकविषयिताया अन्वयः, इति लाभः। 'घटः पश्यति' इत्यादौ प्रत्यक्षनिरूपितस्याऽऽश्रयत्वस्य घटेऽन्वयस्तादृशाश्रयत्वनिरूपकं चाधेयत्वमेव पदार्थान्तरनिष्ठं भवतीत्याऽऽश्रयत्वनिरूपकत्वं वृत्तित्वमेवेति प्राप्तम्। 'घट आकाशं न पश्यति' इत्यत्र च घटस्य स्वनिष्ठत्वसंबन्धेनाधेयत्वसंबन्धेन वाऽऽश्रयत्वे तस्य=आश्रयत्वस्य च प्रत्यक्षनिष्ठे निरूपकत्वे तादृशनिरूपकत्वे= घटविशिष्टाश्रयत्वनिरूपकत्वे घटवृत्तित्वरूपे आकाशविषयकत्वे च मिलित्वा द्वित्वस्य प्रकारतयान्वयस्तादृशोभयस्य=द्वित्वावच्छिन्नस्योक्तनिरूप-कत्वाकाशादिविषयकत्वेति द्वयस्य च द्वित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन नञर्थाऽभावे तस्य=अभावस्य च अन्वयितावच्छेदकनिरुक्तधर्मावच्छेदेन= अलौकिकविषयिताशून्यचाक्षुषत्वावच्छेदेन धात्वर्थे=चाक्षुषप्रत्यक्षेऽन्वयः, तादृशचाक्षुषप्रत्यक्षस्य च न कुत्राप्यन्वय इति मुख्यविशेष्यतयैव भानम्, तथा च घटवृत्तित्वाकाशविषयकत्वोभयाभावविशिष्टम् अलौकिकविषयिता-

अथ वा स्वनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्यापकतासंबन्धेन धात्वर्थस्य तादृशोभयाभावेऽन्वयः, तस्य चाख्यातार्थनिरूपकत्वे, तस्य प्रथमान्तार्थपदार्थे घटादौ घटादेः प्रतियोगितावच्छेदकघटकतया तादृशाभावनिरूपकत्वात्, एवं चान्वयबोधस्य प्रथमान्तपदार्थमुख्यविशेष्यकत्वनियमस्यापि न क्षतिरिति।

शून्यचाक्षुषप्रत्यक्षमिति बोधस्याकारः किं वा यद् घटविशिष्टाश्रयत्वनिरूपकत्वमाकाशविषयकत्वं चैतद्द्वयं तदभावविशिष्टम् अलौकिकविषयिताशून्यचाक्षुषप्रत्यक्षमिति बोधस्याकार इत्यर्थः।

ननु धात्वर्थस्य मुख्यविशेष्यतया भानस्वीकारे प्रथमान्तार्थमुख्यविशेष्यकबोधनियमस्य भङ्गः स्यादित्याशङ्क्य प्रकारान्तेण 'घट आकाशं न पश्यति' इत्यत्र प्रथमान्तार्थमुख्यविशेष्यकबोधमुपपादयति– अथ वेति, तथा च धात्वर्थस्य=अलौकिकविषयिताशून्यचाक्षुषप्रत्यक्षस्य तादृशोभयाभावे= घटवृत्तित्वाकाशविषयकत्वोभयाभावे व्यापकतासंबन्धेनान्वयः तस्य=उक्तोभयाभावस्य चाख्यातार्थीभूतनिरूपकत्वे तस्य निरूपकत्वस्य प्रथमान्तपदार्थघटेऽन्वयस्तथा चात्र अलौकिकविषयिताशून्यचाक्षुषप्रत्यक्षविशिष्टोक्तोभयाभावनिरूपको घट इत्येवं प्रथमान्तार्थमुख्यविशेष्यक एव बोधो जात इति न काचिदनुपपत्तिरित्यर्थः। उक्तोभयाभावनिरूपकत्वं घटे कथमित्याशङ्क्योक्तम्– घटादेरिति, उभयाभावस्य प्रतियोगि उभयं तन्निष्ठप्रतियोगिताया अवच्छेदककोटौ=घटवृत्तित्वाकाशविषयकत्वेत्यत्र घटस्यापि प्रवेशात् तादृशप्रतियोगितावच्छेदकघटकतया घटस्योक्तोभयाभावनिरूपकत्वं प्राप्तं प्रतियोग्यादीनामेवाऽभावनिरूपकत्वात्। अलौकिकविषयिताशून्यचाक्षुषप्रत्यक्षमात्रे घटवृत्तित्वाकाशविषयकत्वयोरभावो भवत्येवेत्युभयाभावे यद् व्यापकत्वं प्राप्तं तस्य स्वरूपमाह– स्वनिष्ठेति, स्वं धात्वर्थः, अलौकिकविषयिताशून्यचाक्षुषप्रत्यक्षं घटवृत्तित्वाकाशविषयकत्वोभयाभावविशिष्टं न इत्याकारकस्तु घटवृत्तित्वाकाशविषयकत्वोभयाभावविशिष्टभेद उक्तप्रत्यक्षे नास्त्येव– उक्तप्रत्यक्षस्य घटवृत्तित्वाकाशविषयकत्वोभयाभावविशिष्टरूपत्वादेव किं त्वऽलौकिकविषयिताशून्यप्रत्यक्षं द्रव्यविशिष्टं न इत्याकारक एव स्वस्मिन् धात्वर्थप्रत्यक्षेऽन्योन्याभावः स्यात् तादृशान्योन्याभावप्रतियोगिताया

तदपि न– घटादिविषयकचाक्षुषादेः कालिकादि-संबन्धेन घटादिवृत्तितया 'घटो घटं न पश्यति' इति प्रयोगानुपपत्तेः आकाशादिविषयकत्वावच्छिन्ने चाक्षुषे कालिकादि-संबन्धेन घटादिवृत्तित्वनिश्चयदशायाम् 'घट आकाशं न पश्यति' इति वाक्याच्छाब्दबोधानुपपत्तेश्च समवायेन घटादिवृत्तित्वाकाशादिविषयकत्वोभयाभावभानस्यैव स्वीकरणीयतया 'अभाव आकाशं न पश्यति' इत्यादावऽभाव-समवेतत्वाऽप्रसिद्ध्या वाक्यार्थाप्रसिद्धेर्दुर्वारत्वात्।

द्रव्यविशिष्टनिष्ठाया अवच्छेदकं द्रव्यादिकमेव स्यान्न तूक्तोभयाभाव इत्युक्तोभयाभावे यत् प्रत्यक्षनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वं तदेव धात्वर्थीभूतोक्तप्रत्यक्षनिरूपितव्यापकत्वं तादृशव्यापकतासंबन्धेनोक्तोभयाभावे धात्वर्थस्योक्तस्यान्वय इत्यर्थः। उपसंहरति– एवं चेति।

परिहरति– तदपि नेति, उक्तरीत्या यत् प्रत्यक्षे घटवृत्तित्वाभाव उक्तस्तत्र यदि यत् समवायसंबन्धेन प्रत्यक्षस्य घटे वृत्तित्वं तदभावो नोच्येत तदा घटविषयकचाक्षुषप्रत्यक्षस्य घटे समवायसम्बन्धेनाऽसत्त्वेऽपि कालिकसंबन्धेन तु सत्त्वमस्त्येवेति 'घटो घटं पश्यति' इत्येव स्यात् 'घटो घटं न पश्यति' इति प्रयोगो नोपपद्येत, एवमाकाशविषयकचाक्षुषप्रत्यक्षस्यापि घटे समवायसंबन्धेन निश्चयासंभवेऽपि कालिकसंबन्धेन तु निश्चयः संभवत्येवेति कालिकसंबन्धेनाकाशविषयकचाक्षुषप्रत्यक्षे घटवृत्तित्व-निश्चयदशायाम् 'घट आकाशं पश्यति' इत्येव स्यात् 'घट आकाशं न पश्यति' इति प्रयोगस्तज्जन्यशाब्दबोधश्च नोपपद्येत इति हेतोः प्रत्यक्षस्य घटे समवायेन वृत्तित्वाभावो वक्तव्यः (समवायेन घटवृत्तित्वाभवस्य भानं स्वीकार्यं) तथा च घटे समवायेन प्रत्यक्षं नैव संभवतीति 'घटो घटं न पश्यति' 'घट आकाशं न पश्यति' इत्यादिप्रयोगस्तूपपद्येत यद्यपि तथापि 'अभाव आकाशं न पश्यति' इति प्रयोगो नोपपद्येत– अभावे समवायसंबन्धेन कस्यचित् वृत्तिरेव प्रसिद्धा नास्ति येनाभावे समवायेन प्रत्यक्षाभाव उपपद्येतेत्यर्थः। घटे तु गुणादीनां समवायेन वृत्तिः प्रसिद्धास्तीति समवायसंबन्धावच्छिन्नप्रतियोगि-ताकोऽभाव उपपद्यते। तस्मात् 'घट आकाशं न पश्यति' इत्यत्रालौकिक-

चैत्रादेरतीतचाक्षुषस्य घटादिविषयकत्वेऽपि समयविशेषे 'चैत्रो घटं न पश्यति' इति प्रयोगाद् वर्तमानतादृशचाक्षुषत्वाद्यवच्छेदेनोभयाभावभानस्य प्रतियोगिकोटौ वर्तमानत्वमन्तर्भाव्य त्रित्वावच्छिन्नाभावभानस्य वा स्वीकरणीयतया यदा किंचिदंशेऽलौकिकमेव घटादिचाक्षुषं तस्य वर्तते तदा 'चैत्रो घटं न पश्यति' इत्यादिप्रयोगापत्तेर्दुर्वारत्वात्– वर्तमानाऽलौकि-

---

विषयिताशून्यप्रत्यक्षे घटवृत्तित्वाऽऽकाशविषयकत्वोभयाभाव एव प्रतीयते इति यदुक्तं तदपि न संभवतीति भावः।

चैत्रादेरिति–यदि 'घट आकाशं न पश्यति' इत्यत्र प्रत्यक्षं घटवृत्तित्वाकाशविषयकत्वोभयाभावभानं स्वीक्रियते तदा 'चैत्रो घटं न पश्यति' इत्यत्रापि प्रत्यक्षे चैत्रवृत्तित्वघटविषयकत्वोभयाभावभानं स्वीकार्यं तत्र चैत्रवृत्त्यऽतीतचाक्षुषप्रत्यक्षस्य घटविषयकत्वसंभवेऽपि 'चैत्रो घटं न पश्यति' इत्यपि प्रयोगः समयविशेषे=वर्तमानकाले संभवतीति वर्तमाने एवालौकिकविषयिताशून्यप्रत्यक्षे चैत्रवृत्तित्वघटविषयकत्वोभयाभावभानं स्वीकार्यं न तु प्रत्यक्षमात्रे 'पश्यति' इत्यस्य वर्तमानकालिकत्वात्, किं वात्र वर्तमानत्वं प्रतियोगिकोटौ निवेश्य त्रित्वावच्छिन्नाभावभानम्= अलौकिकविषयिताशून्यप्रत्यक्षे वर्तमानत्वचैत्र-वृत्तित्वघटविषयकत्वैतत्त्रितयाऽभावभानं स्वीकार्यमेवं प्राप्ते यदा तस्य=चैत्रस्य किञ्चिदंशे=आकाशाद्यंशेऽलौकिकमपि घटादिविषयकम् 'अत्राकाशे घटोऽस्ति' इत्याद्याकारकं चाक्षुषप्रत्यक्षं जायेत तदा 'चैत्रो घटं न पश्यति' इति प्रयोगो यद्यपि नेष्टस्तथापि वर्तमानालौकिकविषयिताशून्यचाक्षुषप्रत्यक्षे चैत्रवृत्तित्वघटविषयकत्वोभयाभावस्य सत्त्वात् 'चैत्रो घटं न पश्यति' इति प्रयोग आपद्येतैवेति दोषः। 'चैत्रो घटं न पश्यति' इत्यत्रोक्तरीत्या वर्तमानालौकिकविषयिताशून्यचाक्षुषप्रत्यक्षे चैत्रवृत्तित्वघटविषयकत्वोभयाभावभानस्वीकारेणाऽलौकिकविषयिताशालिघटविषयकचाक्षुषप्रत्यक्षस्य चैत्रे सत्त्वेऽपि वर्तमानालौकिकविषयिताशून्यघटविषयकप्रत्यक्षाभावस्यापि चैत्रे संभवात् तत्प्रतिपादकस्य 'चैत्रो घटं न पश्यति' इति प्रयोगस्यापत्तिर्दुर्वारैव स्यात्, न च 'अत्राकाशे घटः' इत्याद्याकारकाऽलौकिकविषयताशालिघटविषयकचाक्षुषप्रत्यक्षस्य चैत्रे सत्त्वे 'चैत्रो घटं न पश्यति' इति प्रयोग इष्टः– अत्र धातुना लौकिकालौकिकत्वविशेषणशून्यचाक्षुषप्रत्यक्षो-

कविषयिताशून्यचाक्षुषत्वाद्यवच्छेदेन चैत्रवृत्तित्वघटविषयकत्वो-भयाभावसत्त्वात्।

समानेन्द्रियजन्योपनीतभानादौ लौकिकप्रत्यक्षसामग्र्या विरोधित्वस्य निष्प्रामाणिकतया लौकिकविषयितानियाम-कोपनायकज्ञानादिसमवहितलौकिकसंनिकर्षाद् घटादि-निरूपितलौकिकाऽलौकिकोभयविषयिताशालिचाक्षुषादेरुत्पत्त्या तादृशचाक्षुषादिदशायामुक्तप्रयोगापत्तेः।

पस्थितेर्जायमानत्वाद् घटविषयककिञ्चित्प्रत्यक्षस्य सत्त्वाच्चेति 'चैत्रो घटं न पश्यति' इत्यत्र प्रत्यक्षे उक्तोभयाभावभानस्वीकारो न युक्त इत्यर्थः।

'चैत्रो घटं न पश्यति' इत्यत्रालौकिकविषयिताशून्यचाक्षुषप्रत्यक्षे चैत्रवृत्तित्वघटविषयकत्वोभयाभावभानस्वीकारे दोषान्तरमाह– समानेन्द्रियेति, यथा 'सुरभि चन्दनखण्डम्' इति समानेन्द्रियजन्योपनीतभानम्– चक्षुषैव चन्दनखण्डविषयकस्य सौरभविषयकस्य च प्रत्यक्षस्य जायमानत्वात्, तथा 'सुरभिर्घटः' इत्यपि समानेन्द्रियजन्योपनीतभानम्– चक्षुषैव घटविषयकस्य पूर्वदिने घ्राणेन प्रत्यक्षीकृतसौरभविषयकस्य च प्रत्यक्षस्य जायमानत्वात्, तत्र यथा 'सुरभिचन्दनखण्डम्' इत्यत्र चन्दनखण्डस्य लौकिकसंनिकर्षा-दिरूपलौकिकप्रत्यक्षसामग्र्या लौकिकं प्रत्यक्षं भवति सौरभस्य च स्मरणादिरूपाऽलौकिकप्रत्यक्षसामग्र्याऽलौकिकं प्रत्यक्षं भवतीत्यऽलौकि-कोपनीतभानं प्रति लौकिकप्रत्यक्षसामग्र्या विरोधो नास्तीति लौकिकालौकिको-भयविषयिताशालि 'सुरभि चन्दनखण्डम्' इति चाक्षुषप्रत्यक्षं जायते तथैव 'सुरभिर्घटः' इत्यत्राप्युपनायक (उपनीतापादक) ज्ञानसहकृतो यो लौकिक-विषयितानियामको लौकिकसन्निकर्षस्तादृशसंनिकर्षाद् घटनिरूपितलौकि-कालौकिकोभयविषयिताशालिचाक्षुषप्रत्यक्षं जायते तथा च तादृशचाक्षुषा-दिदशायाम्=घटनिरूपितलौकिकालौकिकोभयविषयिताशालिचाक्षुषप्रत्यक्षकालेऽपि उक्तप्रयोगापत्तेः= 'चैत्रो घटं न पश्यति' इति प्रयोग आपद्येतैव यतः– 'चैत्रो घटं न पश्यति' इत्यत्र त्वलौकिकविषयिताशून्यचाक्षुषप्रत्यक्षे हि चैत्रवृत्तित्वघटविषयकत्वोभयाभावभानमुच्यते न तु लौकिकालौकि-कोभयविषयिताशालिचाक्षुषप्रत्यक्षे तथा च 'सुरभिर्घटः' इत्याकारकस्य

आकाशादिनिरूपितालौकिकविषयिताशालिवर्तमान-चाक्षुषाद्यंशे घटादिवृत्तित्वस्य आकाशीयत्वादिना लौकिकविषयितायाश्च भ्रमदशायाम् 'घट आकाशं न पश्यति'

लौकिकालौकिकोभयविषयिताशालिचाक्षुषप्रत्यक्षस्य घटविषयकस्य चैत्रे सत्त्वेऽपि घटविषयकालौकिकविषयिताशालिचाक्षुषप्रत्यक्षाभावस्य चैत्रे बाधाभावात् तादृशप्रत्यक्षाभावप्रतिपादकस्य 'चैत्रो घटं न पश्यति' इति प्रयोगस्यापत्तिः स्यादेव—'सुरभिर्घटः' 'चैत्रो घटं न पश्यति' इति वाक्ययो-रुक्तरीत्या विभिन्नविषयत्वेनैककाले ताभ्यां जायमानशाब्दबोधयोर्विरोधासम्भवात्, न चासुरभिर्घटः इत्याकाराप्रत्यक्षकाले 'चैत्रो घटं न पश्यति' इति प्रयोग इष्टः— चैत्रे घटप्रत्यक्षस्य सत्त्वादेवेत्युक्तोभयाभावभानस्वीकारे दोष इत्यर्थः।

'घट आकाशं न पश्यति' इत्यत्रालौकिकविषयिताशून्यचाक्षुषप्रत्यक्षे घटवृत्तित्वाऽऽकाशविषयकत्वोभयाभावभानस्वीकारे दोषान्तरमाह—आकाशादीति। आकाशीयत्वादिना आकाशीयत्वेन रूपेण लौकिकविषयितायाः=आकाशनिरूपि-तलौकिकविषयितायाः। यदाऽऽकाशनिरूपिताऽलौकिकविषयिताशालि-वर्तमानचाक्षुषप्रत्यक्षे घटवृत्तित्वस्याकाशनिरूपितलौकिकविषयिताशालित्वस्य च भ्रमो जातस्तदापि 'घट आकाशं न पश्यति' इति वाक्यजन्यशाब्दबोध आपद्येतैव। यतः— 'घट आकाशं न पश्यति' इत्यत्रोक्तरीत्या वर्तमानलौकि-कविषयिताशून्यचाक्षुषप्रत्यक्षे घटवृत्तित्वाकाशविषयकत्वोभयाभावभानस्वीकारे ह्याकाशनिरूपितलौकिकविषयिताशाल्याकाशविषयकचाक्षुषप्रत्यक्षभ्रमस्य घटे सत्त्वेप्याऽऽकाशविषयकाऽलौकिकविषयिताशालिवर्तमानचाक्षुषप्रत्यक्षाभावस्य घटे बाधाभावात् तादृशप्रत्यक्षाभावप्रतिपादकस्य 'घट आकाशं न पश्यति' इति प्रयोगस्य तज्जन्यशाब्दबोधस्य चापत्तिः स्यादेव—उक्तभ्रमस्यैतद्वाक्य-जन्यशाब्दबोधस्य च विभिन्नविषयत्वात्। न चाकाशनिरूपितलौकिकविषयि-ताशाल्याकाशविषयकचाक्षुषप्रत्यक्षस्य घटवृत्तित्वभ्रमदशायाम्। 'घट आकाशं न पश्यति' इति प्रयोग इष्टः—घटे आकाशविषयकप्रत्यक्षभ्रमस्य सत्त्वादित्यर्थः। इत्येवमनिष्टप्रयोगप्राप्तिरूपदोषनिकरं प्रदर्श्य तस्य फलमाह—घटादिनिरूपितेति, 'चैत्रो घटं न पश्यति' इत्यत्र घटनिरूपितालौकिक-विषयिताशून्यचाक्षुषप्रत्यक्षे घटादिविषयत्वघटितोभयाभावभानोपग-मेऽपि=घटविषयकत्वचैत्रवृत्तित्वोभयाभावभानस्वीकारेऽप्युक्तदोषाणामापत्त्या न

इत्यादिवाक्याच्छाब्दबोधापत्तेर्दुर्वारत्वाच्च। घटादिनिरूपिताऽलौकिकविषयिताशून्यचाक्षुषत्वाद्यवच्छेदेन घटादिविषयत्वघटितोभयाभावभानोपगमेऽप्यनिस्तारात्।

एतेनाख्यातार्थवर्तमानत्वाद्यवच्छिन्नसमवायावच्छिन्नाश्रयत्वत्वाद्यवच्छिन्ने आकाशादिविषयकप्रतियोगिकत्वलौकिकान्यविषयिताशून्यचाक्षुषप्रतियोगिकत्वघटाद्यनुयोगिकत्वेतत्त्रितय-

---

निस्तार इत्यर्थः। एवमेव 'घट आकाशं न पश्यति' इत्यत्राप्याकाशनिरूपितालौकिकविषयिताशालिचाक्षुषप्रत्यक्षे घटवृत्तित्वाकाशविषयकत्वोभयाभावभानस्वीकारेऽप्यऽनिस्तारो ज्ञेयः। अथ वेत्यादिना 'घट आकाशं न पश्यति' इत्यत्र यः खलु धात्वर्थीभूतोक्तप्रत्यक्षस्योक्तोभयाभावेऽन्वयः प्रदर्शितस्तत्राप्युक्तप्रयोगापत्त्यादिरूपदोषवृन्दं विज्ञेयम्, तथा हि—चैत्रादावुक्तोपनीतभानादिसत्त्वे ह्युक्तोपनीतभानरूपाऽलौकिकविषयिताशालिचाक्षुषप्रत्यक्षस्य चैत्रादिवृत्तित्वाकाशविषयकत्वोभयस्मिन्नऽन्वयसत्त्वेऽप्यऽलौकिकविषयिताशून्यचाक्षुषप्रत्यक्षस्य चैत्रादिवृत्तित्वाकाशविषयकत्वोभयाभावेऽन्वये बाधकाभावात् तत्प्रतिपादकस्य 'चैत्र आकाशं न पश्यति' इत्यादिप्रयोगस्यापत्तिः स्यादेव, एवमेव 'घट आकाशं न पश्यति' इत्यादावप्येतद्दोषप्रसक्तिर्विज्ञेया।

उक्तदोषं प्रकारान्तरेणाप्युपपादनेऽतिदिशति—एतेनेति, यथा 'भूतले घटः' इत्यत्र घटसंयोगो घटप्रयोगिको भूतलानुयोगिकश्चेति भूतलवृत्तिघटाश्रयत्वे घटप्रतियोगिकत्वं भूतलानुयोगिकत्वं च भासते तथैव 'चैत्रो घटं पश्यति' इत्यत्र चैत्रवृत्ति यद् घटविषयकप्रत्यक्षाश्रयत्वं तादृशाश्रयत्वे चैत्रानुयोगिकत्वं लौकिकविषयिताशालिप्रत्यक्षप्रतियोगिकत्वं प्राप्तं प्रत्यक्षप्रतियोगिकत्वे च प्राप्ते प्रत्यक्षंघटविषयकमेवेति घटविषयकप्रतियोगिकत्वं चापि प्राप्तं भासते, एवमेव 'घट आकाशं पश्यति' इत्यत्रापि घटे आकाशप्रत्यक्षमभ्युपगम्यैतत्प्रतिपादनमिति विज्ञेयम् घटनिष्ठं यद् वर्तमानत्वावच्छिन्नम्= तथा समवायसम्बन्धावच्छिन्नम्= समवायसंबन्धेन वर्तमानकालिकमाकाशविषयकप्रत्यक्षाश्रयत्वं तादृशाश्रयत्वे घटानुयोगिकत्वमलौकिकविषयिताशून्यप्रत्यक्षप्रतियोगिकत्वं प्रत्यक्षं चाकाशविषयकमेवेत्याऽऽकाशविषयकप्रतियोगिकत्वं चाभ्युपगन्तव्यमिति

त्वावच्छिन्नाभावो भासते, अतः 'अभाव आकाशं न पश्यति' इत्यादौ नानुपपत्तिः, तत्र विषयितावत् प्रतियोगिकत्वं द्वितीयार्थः निरुक्तचाक्षुषप्रतियोगिकत्वं त्रित्वं च धातोरर्थः घटाद्यनुयोगिकत्वं च प्रथमान्तार्थः, इत्यपि निरस्तम्,

इतिचेत्? अगत्या 'घट आकाशं न पश्यति'

'घट आकाशं न पश्यति' इत्यत्र आख्यातार्थीभूतवर्तमानत्वावच्छिन्ने समवायसंबन्धावच्छिन्ने आश्रयत्वत्वावच्छिन्ने=आश्रयत्वे एवाऽऽकाशविषयक-प्रतियोगिकत्वस्य लौकिकान्य (अलौकिक) विषयिताशून्यचाक्षुषप्रत्यक्ष-प्रतियोगिकत्वस्य घटानुयोगिकत्वस्य चाभावो भासते इत्युच्यते, एवं च 'अभाव आकाशं न पश्यति' इत्यत्राप्युक्तानुपपत्तिर्नास्त्येव, अर्थात्-प्रत्यक्षे समवायेनाभाववृत्तित्वाभावविवक्षायामभावे नास्ति वृत्तित्वाप्रसिद्धया यःखलु उपालम्भः प्रदर्शितस्तस्येदानीमवकाशो नास्ति—प्रत्यक्षे समवायेनाभाव-वृत्तित्वाभावस्याऽविवक्षणाद् उक्ताश्रयत्वे एवोक्तत्रितयाभावभानस्वीकारात् तत्र च बाधकाभावान्न काचिदनुपपत्तिरित्यर्थः। अत्र च तटस्थे एवाख्यातेन भासमाने आश्रयत्वे त्रितयाभावान्वयो विज्ञेयः— चैत्रादिवृत्तिकिञ्चिन्नि-रूपिताश्रयत्वे चैत्राद्यनुयोगिकत्वस्यैव सत्त्वेन तदभावान्वयासंभवात्। तथा चाख्यातार्थभूतं वर्तमानत्वावच्छिन्नसमवायसंबन्धावच्छिन्नाश्रयत्वम् आकाशविषयकप्रतियोगिकत्वलौकिकान्यविषयिताशून्यचाक्षुषप्रत्यक्षप्रतियोगि-कत्वघटाद्यनुयोगिकत्वैतत्त्रितयाभावविशिष्टमिति वाक्यार्थबोधः। अत्रत्य-पदार्थानाह तत्रेति, यथा विषयिता द्वितीयार्थस्तथात्र प्रतियोगिकत्वमेवाऽऽकाशादि-पदोत्तरद्वितीयार्थः, लौकिकान्यविषयिताशून्यचाक्षुषप्रतियोगिकत्वं त्रित्वं च धात्वर्थः, घटाद्यनुयोगिकत्वं प्रथमान्तार्थ इत्यर्थः। उक्तानिष्टप्रयोगापत्तिरूप-दोषप्रदर्शनेनेदमपि निरस्तमित्याह— इत्यपि निरस्तमिति, एवमपि चैत्रादिनिष्ठे उक्ताऽलौकिकविषयिताशाल्युपनीतभानाद्याश्रयत्वे घटादिप्रतियोगिकत्वादि-सत्त्वेऽपि अलौकिकविषयिताशून्यचाक्षुषप्रत्यक्षस्य वर्तमानत्वावच्छिन्नसमवाया-वच्छिन्नाश्रयत्वे उक्तत्रितयाभावभाने बाधकाभावादुक्तरीत्या चैत्रादौ घटादिप्रत्यक्षदशायामपि 'चैत्रो घटं न पश्यति' इत्यादिप्रयोगापत्तिर्दुर्वारैवेत्यर्थः।

इत्येवम् "अथ दृश्यादिसमभिव्याहृतद्वितीयाः" इत्यादिना यः

इत्यादिवाक्यानामप्रामाण्यमुपगन्तव्यमिति।।

।। इति द्वितीयाकारकप्रथमखण्डः।।

खलु पूर्वपक्षः सवादः प्रतिपादितस्तमुद्दिश्याह– इति चेदिति। अगत्येति– 'घट आकाशं न पश्यति' इत्यादिस्थले वाक्यार्थोपपादनं न संभवतीत्यगत्यैता– दृशवाक्यानामप्रामाण्यमेव स्वीकार्यमित्यर्थः।।

।। इति व्युत्पत्तिवादादर्शे द्वितीयाकारकप्रथमखण्डः।।

(अनुमित्याद्यर्थधातुस्थलीयद्वितीयार्थः)

अनुमित्याद्यर्थकधातुयोगे विधेयत्वं विधेयित्वं वा द्वितीयार्थः, तेन वह्न्यादिपक्षकानुमितिपरस्य 'वह्निमनुमिनोमि' इत्यादिवाक्यस्य न प्रामाण्यम्। यदि च वह्निसाध्यकपर्वतपक्षकानुमितिपरस्य 'वह्निमत्त्वेन पर्वतमनुमिनोमि'

प्रत्यक्षार्थकधातुसमभिव्याहृतद्वितीयाया अर्थं प्रतिपाद्य संप्रत्यनुमित्याद्यर्थकधातुसमभिव्याहृतद्वितीयाया अर्थं प्रतिपादयतुं द्वितीयखण्डमारभते– अनुमित्यादीति, 'पर्वते वह्निमनुमिनोति चैत्रः' इत्यत्र प्राचीनमते विधेयत्वं द्वितीयार्थस्तत्र प्रकृत्यर्थस्याधेयतासम्बन्धेनान्वयः, तस्य प्रकृत्यर्थे निष्ठत्व (आश्रयत्व) संबन्धेनान्वयः, द्वितीयार्थविधेयत्वस्य धात्वर्थेऽनुमितौ च निरूपकत्वसंबन्धेनान्वय आख्यातस्याश्रयत्वमर्थस्तथा चात्र वह्निनिष्ठविधेयतानिरूपकानुमित्याश्रयश्चैत्र इति शाब्दबोधः। पूर्वम् उक्तरीत्या 'वह्निमनुमिनोति जलं न' इत्यत्रानुमितौ जलनिष्ठविधेयताया निरूपकत्वसंबन्धेनाभावो वाच्यस्तत्तु न सम्भवति निरूपकत्वसंबन्धस्य वृत्त्यनियामकत्वादिति विधेयित्वं द्वितीयार्थ इति नवीना वदन्ति, विधेयित्वं तु विषयित्ववज्ज्ञानधर्म एवेति तस्यानुमितावाऽऽश्रयतासंबन्धेनान्वय आश्रयतासंबन्धस्य च वृत्तिनियामकत्वेनाऽभावीयप्रतियोगितावच्छेदकत्वादाश्रयतासंबन्धावच्छिन्नप्रतियोगिताकस्य च जलनिरूपितविधेयित्वाभावस्याऽनुमितावन्वये न काचिदनुपपत्तिरित्यर्थः, एवमेवाग्रेऽपि बोध्यम्। उक्तस्य फलमाह– तेनेति, वह्न्यादिपक्षकानुमितिपरस्य='वह्नावुष्णत्वमनुमिनोमि' इत्यनुमितिपरस्य 'वह्निमनुमिनोमि' इत्यादिवाक्यस्य न प्रामाण्यापत्तिः यतः 'वह्निमनुमिनोमि' इत्यत्र वह्नौ विधेयत्वमभिमतं नास्ति किंतूष्णत्वादावेव एवं वह्निनिरूपितविधेयित्वमनुमिताविष्टं नास्ति किंतूष्णत्वादिनिरूपितविधेयित्वमेव न च तादृशार्थबोधकत्वम् 'वह्निमनुमिनोमि' इत्यस्य संभवतीत्यप्रामाण्यमित्यर्थः। एवम् 'पर्वतमनुमिनोमि' इत्यस्य वह्निविधेयकानुमितिप्रतिपादकत्वासंभवादप्रामाण्येऽपि 'वह्निमत्त्वेन पर्वतमनुमिनोमि' इति वाक्यस्य तु प्रामाण्यमिष्टमेवेत्याह– यदि चेति। 'वह्निमत्त्वेन पर्वतमनुमिनोमि' इत्यत्र तादृशधातुयोगे=अनुमित्यर्थकधातुसमभिव्याहारे पूर्ववत्– प्राचीनमते उद्देश्यत्वं

इत्यादिवाक्यस्यापि प्रामाण्यं मन्यते तदा तादृशे धातुयोगे उद्देश्यत्वमुद्देश्यित्वं वा द्वितीयार्थः, तस्य तृतीयान्तोपस्थाप्य-साध्यविधेयकत्वविशिष्टेऽन्वयः, अतो 'वह्निमत्त्वेन' इत्याद्यसमभिव्याहारे तत्र 'पर्वतमनुमिनोमि' इत्यादयो न प्रयोगाः।

विधेयत्वाद्यर्थे तृतीयानुशासनविरहात् तृतीयान्तेन वह्न्यादिविधेयकत्वं कथमुपस्थापनीयमिति तु न शङ्क्यम्, वैशिष्ट्यरूपार्थे तृतीयानुशासनसत्त्वाद् विधेयतादेरपि वैशिष्ट्यरूपत्वात्, अत एव 'रजतत्वेन शुक्तिं जानाति' इत्यादौ

द्वितीयार्थस्तस्य निरूपकतासंबन्धेन वह्निमत्त्वेनेति तृतीयान्तोपस्थाप्यं यत्साध्य--(वह्नि) विधेयकत्वं तद्विशिष्टे धात्वर्थेऽन्वयस्तथा च पर्वतनिष्ठोद्देश्यता-निरूपकवह्निविधेयकानुमितिवानिति बोधः। नवीनमते निरूपकत्वसंबन्धस्य वृत्त्यनियामकत्वात् 'वह्निमत्त्वेन पर्वतमनुमिनोति न जलवत्त्वेन' इत्यत्र निरूपकत्वसंबन्धावच्छिन्नप्रतियोगिताकोद्देश्यत्वाभावस्यानुमितौ भानासंभवाद् उद्देश्यित्वं द्वितीयार्थः, अत्र च– पर्वतनिरूपितोद्देश्यित्वाभयानुमित्याश्रयश्चैत्र इति बोधाकारः। तृतीयान्तोपस्थाप्यसाध्यविधेयकत्वविशिष्टे धात्वर्थे द्वितीया-र्थान्वयस्वीकारस्य फलमाह– अत इति, 'वह्निमत्त्वेन' इत्यस्याऽसमभिव्याहारे तदर्थस्य साध्यविधेयकत्वस्योपस्थित्यऽसंभवेन धात्वर्थस्य तद्वैशिष्ट्यासंभवात् तत्र=उक्तस्थले (उक्तप्रयोगस्याने) केवलम् 'पर्वतमनुमिनोमि' इति प्रयोगो न भवतीत्यर्थः।

ननु विधेयत्वार्थे तृतीयाया अनुशासनेन विधानमेव न कृतमिति 'वह्निमत्त्वेन' इति तृतीयान्तेन वह्निविधेयकत्वस्योपस्थितिरेव न संभवति येन तद्वैशिष्टयं धात्वर्थे प्राप्नुयादित्याशङ्क्याह– विधेयत्वाद्यर्थेति। उत्तरमाह– वैशिष्ट्येति, "इत्थंभूतलक्षणे" इति सूत्रेण वैशिष्ट्यार्थे तृतीया विधीयते एव विधेयत्वमप्यत्र वैशिष्ट्यरूपमेवेति 'वह्निमत्त्वेन' इति तृतीयान्तेन वह्निविधेयकत्वोपस्थितेर्नानुपपत्तिरित्यर्थः। तृतीयाया वैशिष्ट्यरूपार्थबोधकत्वे प्रमाणमाह–अत एवेति, अत एव=तृतीयाया वैशिष्ट्यरूपार्थबोधकत्वादेव 'रजतत्वेन शुक्तिं जानाति' इत्यत्र रजतत्वप्रकारकशुक्तिविशेष्यकज्ञाने रजतत्वप्रकारकत्ववैशिष्ट्यम् 'रजतत्वेन' इति तृतीयान्तेन प्रत्याय्यते, 'घटत्वेन

ज्ञाने रजतत्वादिप्रकारकत्वस्य 'घटत्वेन वह्निर्नास्ति' इत्यादौ सौंदड़मतेऽभावे घटत्वावच्छिन्नप्रतियोगिताकत्वस्य तृतीयान्ततो बोधः। तृतीयान्तार्थरजतादिप्रकारकत्वद्वितीयान्तार्थशुक्त्यादिविषयकत्वयोर्विशिष्टवैशिष्ट्यबोधमर्यादयाऽवच्छेद्यावच्छेदकभावभानम् 'रजतत्वेन शुक्तिं जानाति' इत्यादौ नियतम्—केवलमेकत्र द्वयमितिरीत्या तदुभयबोधस्य तत्राऽव्युत्पन्नत्वात्, अतः 'इमे रङ्गरजते' इत्यादिप्रमापरस्य तादृशवाक्यस्य न प्रामाण्यम्।

वह्निर्नास्ति' इत्यत्र च वह्न्यभावे घटत्वावच्छिन्नप्रतियोगिताकत्ववैशिष्ट्यम् 'घटत्वेन' इति तृतीयान्तेन प्रत्याय्यते तथा च तत्र= 'रजतत्वेन शुक्तिं जानाति' इत्यत्र केवलमेकत्रद्वयमितिरीत्या=यथा समूहालम्बनबोधविषययोः पदार्थयोः परस्परमवच्छेद्यावच्छेदकभावराहित्येन (विशेष्यविशेषणभावराहित्येन) भानं भवति तथात्र तदुभयबोधस्य=रजतत्वप्रकारकत्वशुक्तिविशेष्यकत्वयोर्बोधस्याऽव्युत्पन्नत्वात् तृतीयान्तार्थं यद्रजतत्वप्रकारकत्वं द्वितीयान्तार्थं यच्छुक्तिविषयकत्वम्=शुक्तिविशेष्यकत्वं च ज्ञाने भासते तयोर्विशिष्टवैशिष्ट्यबोधमर्यादया परस्परमवच्छेद्यावच्छेदकभावस्य नियमेन भानं भवति तत्र रजतत्वप्रकारकत्वमवच्छेदकं शुक्तिविशेष्यकत्वमवच्छेद्यमित्याह—तृतीयान्तार्थेति। अवच्छेद्यावच्छेदकभावभानस्य फलमाह—अत इति, 'इमे रंगरजते' इत्यत्र समूहालम्बनबोधे रंगविषयकत्वरजतविषयकत्वयोः परस्परमवच्छेद्यावच्छेदकभावभानं न भवति 'रंगत्वेन रजतं जानाति' इत्यत्र तु रंगत्वप्रकारकत्वरजतविशेष्यकत्वयोः परस्परमवच्छेद्यावच्छेदकभावभानं भवतीति रंगत्वेन रजतं जानाति' इत्यादिवाक्यस्य रंगत्वप्रकारकत्वरजतविशेष्यकत्वयोरवच्छेद्यावच्छेदकभावपुरस्सरशाब्दबोधं प्रत्येव प्रामाण्यमस्ति न तु 'इमे रंगरजते' इत्यादिसमूहालम्बनशाब्दबोधं प्रत्यपीति यदि समूहालम्बनशाब्दबोधार्थं तादृशवाक्यम्='रंगत्वेन रजतं जानाति' 'रजतत्वेन शुक्तिं जानाति' इत्यादिवाक्यं प्रयुज्यते तदा तस्य प्रामाण्यं न भवतीत्यर्थः। एवमेव 'वह्निमत्त्वेन पर्वतमनुमिनोमि' इत्यत्रानुमितौ भासमानयोः पर्वतोद्देश्यकत्ववह्निविधेयकत्वयोः परस्परमवच्छेद्यावच्छेदकभावो विज्ञेयः।

घटत्वाद्यवच्छिन्नवह्न्याद्यभावनिष्ठेन वह्न्यादिनिरूपितानुयोगितविशेषरूपवह्न्याद्यभावत्वेन तदभावनिष्ठघटत्वाद्यवच्छिन्नप्रतियोगिताकत्वस्याऽवच्छेद्यावच्छेदकभावः स्वीक्रियते। 'घटत्वेन वह्निर्नास्ति' इत्यादौ च तद्बोधस्योक्तरीत्यावश्यकत्वमिति घटत्वावच्छिन्नवह्न्याद्यभावस्य वह्नित्वावच्छिन्नघटाद्यभावसमनियतत्वेन तदभिन्नतया तत्र घटत्वाद्यवच्छिन्नप्रतियोगिताकत्वघटाद्यभावत्वसत्त्वेऽपि तादृशाभावपरस्य 'घटत्वेन

'घटत्वेन वह्निर्नास्ति' इत्यत्रत्यावच्छेद्यावच्छेदकभावमाह– घटत्वाद्यवच्छिन्नेति, घटत्वाद्यवच्छिन्नवह्न्याद्यभावः=घटत्वावच्छिन्नप्रतियोगिताकवह्न्यभावस्तस्मिन् स्वप्रतियोगिकत्वसंबन्धेन वह्निर्वर्तते। इति वह्निनिरूपितानुयोगिता वह्न्यभावे प्राप्ता सा चानुयोगिता वह्न्यभावत्वस्वरूपैवास्तीति वह्निनिरूपितानुयोगितविशेषरूपं यद् वह्न्यभावत्वं तथा तदभावनिष्ठम्=वह्न्यभावनिष्ठं यद् घटत्वावच्छिन्नप्रतियोगिताकत्वं च तयोः परस्परमवच्छेद्यावच्छेदकभावः स्वीक्रियते, तथा च 'घटत्वेन वह्निर्नास्ति' इत्यत्र तद्बोधस्य=उक्तावच्छेद्यावच्छेदकभावपुरस्सरशाब्दबोधस्यावश्यकत्वम्, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वाद् यत्र घटत्वावच्छिन्नप्रतियोगिताकवह्न्यभावो वर्तते तत्र वह्नित्वावच्छिन्नप्रतियोगिताकघटाभावोऽपि वर्तत एवेति तयोः समनियतत्वेनाऽभिन्नत्वात् तत्र=तादृशाभावे यद्यपि घटत्वावच्छिन्नप्रतियोगिताकत्वं घटाभावत्वं च वर्तते एव तथा वह्नित्वावच्छिन्नप्रतियोगिताकत्वं वह्न्यभावत्वं च वर्तत एव तथापि तादृशाभावपरस्य=उक्तव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावपरत्वेन 'घटत्वेन घटो नास्ति' 'वह्नित्वेन वह्निर्नास्ति' इत्यादिवाक्यस्य प्रामाण्यं न भवति विभिन्नविषयत्वात्, यतः– उक्तव्यधिकरणधर्मावच्छिन्नवह्न्यभावस्थले वह्न्यभावत्वघटत्वावच्छिन्नप्रतियोगिताकत्वयोरवच्छेद्यावच्छेदकभावः प्रतीयते 'घटत्वेन घटो नास्ति' इत्यत्र तु घटाभावत्वघटत्वावच्छिन्नप्रतियोगिताकत्वयोः 'वह्नित्वेन वह्निर्नास्ति' इत्यत्र च वह्न्यभावत्ववह्नित्वावच्छिन्नप्रतियोगिताकत्वयोरवच्छेद्यावच्छेदकभावः प्रतीयते इत्यर्थः। तथा च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावपरस्य 'घटत्वेन घटो नास्ति' इत्यादिवाक्यस्य प्रामाण्यपरिहाराय 'घटत्वेन वह्निर्नास्ति' इत्यादौ तद्बोधस्य=अवच्छेद्यावच्छेदक–

घटो नास्ति' 'वह्नित्वेन वह्निर्नास्ति' इत्यादिवाक्यस्य न प्रामाण्यम्।

उक्तस्थलेषु तृतीयान्ताद्यर्थस्य द्वितीयान्ताद्यर्थेऽवच्छेद्यावच्छेकभावसंबन्धेनान्वय इत्यपि केचित्, तन्न–विभक्त्यर्थे विभक्त्यर्थान्वयस्याव्युत्पन्नत्वात्। न च 'रजतत्वेनेदं ज्ञायते' इत्यादावाऽऽख्यातार्थविषयतायां तृतीयान्तार्थप्रकारताया निरूपितत्वसंबन्धेनाऽन्वयान्नोक्तव्युत्पत्तिकल्पनमिति वाच्यम्,

भावबोधस्यावश्यकत्वमित्यन्वयः, अन्यथा 'घटत्वेन घटो नास्ति' इत्यादिवाक्यस्याप्युक्तव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावविषयकशाब्दबोधं प्रति प्रामाण्यापत्तिः स्यादेव।

परिहाराय प्राचीनैकदेशिमतमनुवदति– उक्तस्थलेष्विति, यथा 'रजतत्वेन शुक्तिं जानाति' इत्यत्र तृतीयान्तार्थस्य=रजतत्वप्रकारकत्वस्य द्वितीयान्तार्थे=शुक्तिविशेष्यकत्वे अवच्छेद्यावच्छेदकभावसंबन्धेनान्वय उभयोरपि ज्ञानस्थत्वेन समानाधिकरणत्वात् तथा च रजतत्वप्रकारकत्वावच्छिन्नं यत् शुक्तिविशेष्यकत्वं तद्विशिष्टज्ञानाश्रयश्चैत्र इति बोधः। एवम् 'वह्निमत्त्वेन पर्वतमनुमिनोमि' इत्यत्र वह्निविधेयकत्वस्य पर्वतोद्देश्यकत्वेऽन्वय इत्यर्थः। परिहरति– तन्नेति, विभक्त्यर्थस्य विभक्त्यर्थेऽन्वयो न भवतीति तृतीयान्तार्थस्य रजतत्वप्रकारकत्वादेः द्वितीयान्तार्थे शुक्तिविशेष्यकत्वादावन्वयो न संभवतीत्यर्थः। यथा प्राचीनमते स्वस्वामिभावः सम्बन्धस्तथात्रावच्छेद्यावच्छेदकभावस्य सम्बन्धत्वमुक्तम्। ननु 'रजतत्वेनेदं ज्ञायते' इत्यत्र रजतत्वप्रकारतानिरूपितज्ञानीयविशेष्यता (विषयता) वदिदमिति बोधोदयादाख्यातार्थभूतायां विषयतायाम्=विशेष्यताख्यविषयतायां निरूपितत्वसम्बन्धेन तृतीयान्तार्थप्रकारतायाः=रजतत्वप्रकारताया अन्वयो भवति तत्राख्यातस्यापि विभक्तित्वेन विभक्त्यर्थे एव विभक्त्यर्थस्यान्वयो भवतीति उक्तव्युत्पत्तिकल्पनम्=विभक्त्यर्थस्य विभक्त्यर्थेऽन्वयो न भवतीति नियमकल्पनं न संभवतीत्याशङ्क्याह– न चेति, परिहारमाह– तत्रेति, तत्र= 'रजतत्वेनेदं ज्ञायते' इत्यत्र रजतत्वप्रकारकत्वस्य तृतीयान्तार्थस्याऽऽख्यातरूपविभक्त्यर्थेऽन्वयो न भवति किं तु धात्वर्थज्ञाने, तादृशविशिष्ट–

तत्र रजतत्वादिप्रकारकत्वविशिष्टधात्वर्थज्ञाननिरूपितत्वस्याख्यातार्थे भानस्वीकारेणैवातिप्रसङ्गभङ्गात्।

न च 'तस्मात् पचति' 'तस्मात् चैत्रस्य' इत्यादौ विभक्त्यर्थे कृतिसंबन्धादौ हेतुविभक्त्यर्थान्वयदर्शनान्नास्युक्ताव्युत्पत्तिरिति वाच्यम्, हेतुविभक्त्यतिरिक्तविभक्त्यर्थस्य विभक्त्यर्थानन्वयनियमात्।

न च 'रजतत्वेनेदं जानाति' इत्यादौ तृतीयायाः कारकविभक्तित्वाभावान्न तदर्थस्य क्रियायामन्वयसंभव

ज्ञाननिरूपितत्वमेवाख्यातार्थविषयतायां भासते इति विभक्त्यर्थस्य विभक्त्यर्थेऽन्वयरूपातिप्रसङ्गस्यापत्तिर्नास्तीत्यर्थस्तथा च रजतत्वप्रकारकज्ञाननिरूपितविशेष्यतावदिदमित्यत्र शाब्दबोधः।

ननु 'तस्मात् पचति' इत्यस्य यस्मात् क्षुधितस्तस्मात् पचतीत्यर्थस्तथा च क्षुद्धेतुकापाकानुकूला कृतिरिति शाब्दबोधोदयाद् हेत्वर्थकपञ्चमीविभक्त्यर्थस्य हेतुकत्वस्याऽऽख्,यातरूपविभक्त्यर्थे कृतावन्वयो दृश्यते (आश्रयतासंबन्धेन) तथा 'तस्माच्चैत्रस्य' इत्यत्र यस्माच्चैत्रेण क्रीतं गृहीतं वा तस्माच्चैत्रस्येत्यर्थस्तथा चात्र क्रयादिहेतुकं चैत्रस्वत्वमिति बोधोदयात् पञ्चम्यर्थस्य हेतुकत्वस्य षष्ठ्यर्थस्वत्वेऽन्वयो दृश्यते इति उक्ता व्युत्पत्तिः=विभक्त्यर्थस्य विभक्त्यर्थेऽन्वयो न भवतीति नियमो नास्तीत्याशङ्क्याह– न चेति। परिहारमाह– हेतुविभक्तीति, हेत्वर्थकविभक्त्यर्थस्य तूक्तरीत्या विभक्त्यन्तरार्थेऽन्वयो भवत्येवेति हेतुविभक्त्यतिरिक्तविभक्त्यर्थस्य विभक्त्यऽर्थेऽन्वयो न भवतीति नियमोऽस्तीति तृतीयान्तार्थरजतत्वप्रकारकत्वस्य द्वितीयान्तार्थशुक्तिविशेष्यकत्वे नान्वयः संभवतीत्यर्थः।

ननु यदुक्तम् 'रजतत्वेनेदं, जानाति– ज्ञायते' इत्यादौ तृतीयान्तार्थरजतत्वप्रकारकत्वस्य धात्वर्थज्ञानेऽन्वयो न त्वाख्यातार्थविषयतायां वा द्वितीयार्थविषयतायां वान्वय इति तन्न युक्तं कारकविभक्त्यर्थस्यैव धात्वर्थेऽन्वयनियमात् 'रजतत्वेन' इतीत्थंभूतलक्षणतृतीयायाश्च कारकविभक्तित्वाभावान्न तदर्थस्य=रजतत्वप्रकारकत्वस्य धात्वर्थेऽन्वयः

इत्यगत्या द्वितीयार्थ एव तदन्वय उपगन्तव्य इति वाच्यम्, मणिकारमते 'तस्माज्जानाति' इत्यादौ ज्ञानादिरूपधात्वर्थे एव हेतुविभक्त्यर्थस्य, 'तस्मात् स्थीयते' इत्यादौ च सर्वमत एव धात्वर्थस्थित्यादौ तस्यान्वयेन, षष्ठ्यर्थसंबन्धस्यापि "गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक् स्वभेषजैः" इत्यादौ धात्वर्थेऽन्वयेन, कर्मासमभिव्याहृते 'रजतत्वेन जानाति' इत्यादौ

संभवतीत्यगत्या द्वितीयार्थे=द्वितीयार्थविषयतायामेव तदन्वयः= तृतीयार्थरजतत्वप्रकारकत्वस्यान्वयः स्वीकार्य इत्याशङ्क्याह– न चेति। परिहारमाह– मणिकारेति, 'तस्माज्जानाति' इत्यस्य यस्मादधीतं दृष्टं वा तस्माज्जानातीत्यर्थस्तथा चाऽध्ययनदर्शनादिहेतुकज्ञानवानिति बोधोदयादत्र हेतुविभक्तेः कारकविभक्तित्वाभावेऽपि तदर्थस्य हेतुकत्वस्य धात्वर्थी-भूतज्ञानरूपक्रियायामेव मणिकारमतेऽन्वयो भवति, एवम् 'तस्मात् स्थीयते' (यस्मादाह्वानं कृतं तस्मात् स्थीयते इत्यत्र च सर्वमते एव धात्वर्थस्थितौ तस्य= हेतुविभक्त्यर्थस्य हेतुकत्वस्यान्वयो भवति, एवम् "गुरुविप्र" इत्यत्रभिषक् गुर्वादिसंबन्धिनीं प्रतिक्रियाम् (चिकित्साम्) स्वभेषजैः कुर्यादिति बोधोदयादकारकविभक्तिषष्ठ्या अर्थस्य गुर्वादिसंबन्धित्वस्य धात्वर्थ-प्रतिक्रियायामेवान्वयो भवति, कर्मासमभिव्याहृते=इदमित्यादिकर्मवाचक-पदसमभिव्याहाररहिते 'रजतत्वेन जानाति' इत्यादौ च तृतीयान्तार्थस्य रजतत्वादिप्रकारकत्वस्य धात्वर्थे एवान्वयोऽवश्यं स्वीकार्यः– अन्यत्रान्व-यासंभवाद् न चात्र द्वितीयाविभक्तिरस्ति येन तदुपस्थितार्थे तृतीयार्थस्यान्वयः स्यादिति कारकविभक्तिभिन्नविभक्त्यर्थस्य धात्वर्थक्रियायामन्वयो न भवतीति नियमो न संभवति– उक्तोदाहरणेषु कारकविभक्तिभिन्नषष्ठीपञ्चम्यादि-विभक्त्यर्थस्य धात्वर्थेऽन्वयस्य प्रदर्शितत्वात् किंतु कारकविभक्तेः क्रियायामेवान्वयो भवतीत्ययमेव नियम इति 'रजतत्वेनेदं जानाति' इत्यत्रापि तृतीयार्थस्य रजतत्वप्रकारकत्वस्य धात्वर्थज्ञाने एवान्वयो न तु द्वितीयार्थशुक्तिविशेष्यकत्वे इति हेतुविभक्त्यतिरिक्तविभक्त्यर्थस्य विभक्त्यर्थेऽन्वयो न भवतीति नियमः सिद्ध इत्यर्थः। इदमित्यादिकर्म-वाचकपदसमभिव्याहारे तु कदाचित् तदर्थविशेष्यतायां तृतीयार्थस्य प्रकारत्वस्यान्वयः स्यादपि कर्मासमभिव्याहारे त्वगत्या एव तृतीयार्थान्वयः

धात्वर्थे तृतीयार्थान्वयस्यावश्यकत्वेन, कारकविभक्तिभिन्न-विभक्त्यर्थस्य क्रियायामऽनन्वय इत्यनियमात्।

एवम् 'घटत्वेन वह्निर्नास्ति' इत्यादौ प्रथमार्थो नानुयोगित्वाम्– प्रथमायाः संख्यातिरिक्तार्थाऽबोधकत्वनियमात्, अतो नञर्थाभावे संबन्ध एव तत्, तत्र च न तृतीयार्थान्वयसंभवः।

मम त्वनुयोगितासंबन्धेन वह्न्यादिविशिष्टाभावे तृतीयान्तार्थघटत्वावच्छिन्नप्रतियोगिताकत्ववैशिष्ट्यभानाद्

स्वीकार्य इत्युक्तम्– कर्मासमभिव्याहारे इति।

यथा विभक्त्यर्थस्य विभक्त्यन्तरार्थेऽन्वयो न भवति तथा सबन्धभूतपदार्थेऽप्यन्वयो न भवतीति 'घटत्वेन वह्निर्नास्ति' इत्यत्र घटत्वेनेतितृतीयान्तार्थस्य घटत्वावच्छिन्नप्रतियोगिताकत्वस्य न संबन्धभूतेऽनुयोगित्वेऽन्वयः किं तु नञर्थाभावे एवेत्याह–एवमिति। नन्वऽनुयोगित्वस्य प्रथमार्थत्वसंभवात् संबन्धत्वं कथमित्याशङ्क्याह–प्रथमार्थ इति, प्रथमायाः संख्यातिरिक्तार्थबोधत्वाभावान्नानुयागित्वस्य प्रथमार्थत्वं संभवतीति तत्=अनुयोगित्वं नञर्थाभावे प्रतियोगिभूतवह्न्यादीनामऽन्वये संबन्ध एव प्रतियोगिभूतवह्न्यादीनां स्वाभावेऽनुयोगित्वं सबन्धेनान्वयो भवतीति यावत् तस्मात् तत्र=अनुयोगित्वे तृतीयार्थस्य घटत्वाद्यवच्छिन्नप्रतियोगिताकत्वस्यान्वयो न संभवति–अनुयोगित्वस्य संबन्धरूपत्वादित्यर्थः।

स्वमतमाह–मम त्विति, वह्न्यभावे वह्निरपि वर्तते एवेति वह्न्यभावे यानुयोगिता प्राप्ता तादृशानुयागितासंबन्धेन वह्निविशिष्टाभावे घटत्वेनेति तृतीयान्तार्थो घटत्वावच्छिन्नप्रतियोगिताकत्वमपि वर्तते एवेति 'घटत्वेन वह्निर्नास्ति' इत्यत्र विशिष्टवैशिष्ट्यबोधमर्यादया अनुयोगितासम्बन्धेन बह्निविशिष्टेऽभावे घटत्वावच्छिन्नप्रतियोगिताकत्वस्यापि वैशिष्ट्यमस्तीति नञर्थाभावेऽनुयोगितासंबन्धेन संबद्धो यो वह्निस्तस्यैव तादृशप्रतियोगिताकत्वेन= घटत्वावच्छिन्नप्रतियोगिताकत्वेन सहावच्छेद्यावच्छेदकभावो मम मतेऽस्तीति न कोपि दोषः, वह्नेरेवावच्छेद्यत्वस्वीकारात् तृतीयान्तार्थस्य घटत्वावच्छिन्नप्रति-योगिताकत्वस्य च नञर्थाभावेऽन्वयस्वीकारेण विभक्त्यर्थेऽन्वयाऽ-

विशिष्टवैशिष्ट्यबोधमर्यादया वह्न्याद्यनुयोगिकत्वस्थली-यस्यानुयोगितया संबद्धवह्न्यादेस्तादृशप्रतियोगिताकत्वेना-वच्छेद्यावच्छेदकभावभानोपगमेन सामञ्जस्यात्। अनुयोगिताया नञर्थतावच्छेदकत्वे तत्रैव वह्न्यादेः प्रतियोगिनोऽन्वयः, अतस्तत्र तृतीयान्तार्थघटत्वावच्छिन्नप्रतियोगिताया निरूपकत्वेनान्वयं स्वीकृत्याऽतिप्रसंगवारणं सम्यक् प्रतिभाति।

रंगेऽभेदेन रजतारोपस्थले 'रङ्गं रजतेन जानाति इत्यप्रयोगात् तादात्म्यभिन्नसंबन्धावच्छिन्नप्रकारतैव तृतीयार्थः। तत्र च 'रङ्गं रजतं जानाति' इति प्रयोगात् तादात्म्य-

स्वीकारादित्यर्थः। वह्न्यभावे वह्न्यनुयोगिकत्वं नान्वीयते किंतु वह्न्यनुयोगिकत्वस्य स्थाने वह्निरेवानुयोगितासंबन्धेनान्वीयते इत्यभिप्रायेणोक्तम्-वह्न्यद्यनुयोगिकत्वस्थलीयस्येति, इदं च वह्न्यादेरित्यस्य विशेषणम्। यद्यनुयोगिताया उक्तरीत्या संबन्धत्वं न स्वीक्रियते किं तु नञर्थाऽ-भावावच्छेदकत्वं स्वीक्रियते तदा तत्रैव=अनुयोगितायामेव प्रतियोगिनो वह्नेः स्वनिरूपितत्वसंबन्धेनान्वयः स्वीकार्यः (अनुयोगिताया वह्निनिरूपितत्वात्) अतः= यतोऽनुयोगितायामेव वह्नेरन्वयोऽतस्तत्र=अनुयोगितायां तृतीयान्तार्थभूताया घटत्वावच्छिन्नप्रतियोगिताया निरूपकत्वसंबन्धेनान्वयः स्वीकार्यो न तु घटत्वावच्छिन्नप्रतियोगिताकत्वस्य तादृशानुयोगिताया घटत्वावच्छिन्नप्रतियोगिता-निरूपकत्वात्। अनुयोगितायामेव च तृतीयार्थप्रतियोगिताया अन्वयस्वीकारादति-प्रसङ्गस्य=विभक्त्यर्थस्य विभक्त्यर्थेऽन्वयरूपातिप्रसङ्गस्यापतिर्नास्ति किं तु वारणमेव जातम्, तथा चानुयोगितायां वर्तमानयोर्वह्निघटत्वावच्छिन्न-प्रतियोगित्वयोरेवावच्छेद्यावच्छेदकभाव इत्यर्थः।

रङ्गेऽभेदेनेति-रङ्गरजतयोर्भेदारोपस्थले तादात्म्यसंबन्धभिन्नो यः समवायादिसंबन्धस्तदवच्छिन्नप्रकारता तृतीयार्थो भवतीति 'रङ्गं रजतत्वेन जानाति' इति प्रयोगो भवति-अत्र समवायसंबन्धावच्छिन्ना रजतत्वनिष्ठा या प्रकारता तस्यास्तृतीयार्थत्वात्, तादात्म्यसंबन्धावच्छिन्नप्रकारता तु तृतीयार्थो न भवतीत्यऽभेदारोपाऽभिप्रायेण 'रङ्गं रजतेन जानाति' इति प्रयोगो न भवति-अभेदारोपस्थलेऽप्यभेदान्वयस्थले इव तादात्म्यसंबन्धावच्छिन्नप्रकारताया

संबन्धावच्छिन्नप्रकारता कर्मत्वानुशिष्टद्वितीयादेरेवार्थः, तस्याश्च तादृशप्रकारवाचिपदसमानविभक्तिकपदोपस्थाप्यविशेष्यतावि-शिष्टायामेव ज्ञानरूपक्रियायामन्वयः तेन भेदारोपस्थले 'रङ्गे रजतत्वं जानाति' इतिवदऽभेदारोपस्थले रङ्गे रजतं जानाति' इति न प्रयोगः। उक्तस्थले च रङ्गरजताद्योः समानविभक्ति-कपदोपस्थाप्ययोरभेदान्वये साकाङ्क्षत्वेऽपि नायोरयतया तादृशान्वयः।

अपेक्षितत्वात्तस्याश्च तृतीयार्थत्वासंभवादित्यर्थः। तत्र=रङ्गेऽभेदेन रजतारोपस्थले (अभिप्रायेण) 'रङ्गं रजतं जानाति' इति प्रयोगस्तु भवतीति तादात्म्यसंबन्धावच्छिन्नप्रकारता "कर्मणि द्वितीया" इत्याद्यनुशासनेन कर्मत्वेऽनुशिष्टाया द्वितीयाया अर्थो भवति अत्र रङ्गे रजतस्य तादात्म्यसंबन्धेन प्रकारत्वा तादात्म्यसम्बन्धावच्छिन्न रजतनिष्ठप्रकारताकं रंगनिष्ठविशेष्यताक च यज्ज्ञानं तादृशज्ञानाश्रय इति बोधः। तस्याः=तादात्म्यसंबन्धावच्छिन्न-प्रकारतायाश्च तादृशप्रकारवाचिपदं यद्रजतपदं तत्समानविभक्तिकं यद् द्वितीयान्तं रङ्गपदं तदुपस्थाप्या=रङ्गपदोत्तरद्वितीयोपस्थाप्या या रङ्गनिष्ठा विशेष्यता तादृशविशेष्यताविशिष्टायां ज्ञानक्रियायामन्वयः-रङ्गनिष्ठविशेष्यताया रजतनिष्ठप्रकारतायाश्च निरूपकत्वसंबन्धेन ज्ञानेऽपि सत्त्वादेवेत्यर्थः। अस्य फलमाह-तेनेति भेदारोपस्थले यथा 'रङ्गे रजतत्वं जानाति' इति प्रयोगो भवति तथाऽभेदारोपस्थले 'रङ्गे रजतं जानाति' इति प्रयोगो न भवति-अभेदारोपस्थले प्रकारवाचिरजतादिपदसमानविभक्तिकरङ्गादि-पदोपस्थाप्यविशेष्यताविशिष्टायामेव ज्ञानादिक्रियायां द्वितीयार्थप्रकारताया अन्वयस्येष्टत्वात् 'रङ्गे रजतं जानाति' इत्यत्र च रङ्गपदरजतपदयोः समानविभक्तिकत्वाभावेनोक्तान्वयासम्भवादित्यर्थः। ननूक्तस्थले='रङ्गं रजतं जानाति' इत्यत्र रङ्गरजतयोरभेदान्वय एव 'नीलो घटः' इत्यत्रेव कथं न स्वीक्रियते? इत्याशङ्क्याह-उक्तस्थले चेति, 'रङ्गं रजतं जानाति' इत्यत्र समानविभक्तिकपदोपस्थाप्याप्यत्वेन रङ्गरजतयोरभेदान्वयानुकूलाकाङ्क्षावत्त्वेऽपि परस्परं भिन्नव्यक्तिकत्वेनाभेदस्याऽयोगतया=बाधात् तादृशान्वयः=अभेदान्वयो न भवतीत्यर्थः। 'नीलो घटः' इत्यत्र तु नीलपदघटपदयोरेकार्थबोधकत्वान्नील-

नन्वेवं सति रङ्गरजतादिपदयोः सामानाधिकरण्यानुपपत्तिरिति चेत्? का क्षतिः। न चैवं रजतगतैकत्वबहुत्वाऽविवक्षायाम् 'रङ्गाणि रजतं जानाति' इति प्रयोगस्य 'स्त्रियं पांसुला जानाति' इति प्रयोगस्य च प्रसंगः– सामानाधिकरण्यस्यैव समानवचनलिंगकत्वनियतत्वादिति वाच्यम्, समानाधिकरणयोरिव यत्पदार्थविशेष्यकत्वविशिष्टेऽभेदसंबन्धावच्छिन्नयत्पदार्थप्रकारकत्वस्यान्वयस्तयोरपि समानलिंगवचनत्वनियमात्।

पदार्थघटपदार्थयोर्भेदाभावादभेदान्वयो भवति, न चैवमत्रास्तीत्यऽभेदारोपो भवति न त्वऽभेदान्वय इति भावः।

ननु यदि रङ्गपदरजतपदयोर्विभिन्नपदार्थबोधकत्वेनैकपदार्थबोधकत्वं नास्ति तदा सामानाधिकरण्यं न भविष्यति भिन्नप्रवृत्तिनिमित्तयोः पदयोरेकार्थबोधकत्वस्यैव सामानाधिकरण्यनियामकत्वादित्याशङ्कते–नन्वेवमिति। 'रङ्गं रजतं जानाति' इत्यत्र सामानाधिकरण्याभावं स्वीकरोति–का क्षतिरिति। ननु यदि 'रङ्गं रजतं जानाति' इत्यादौ रङ्गपदरजतपदयोः सामानाधिकरण्यमिष्टं नास्ति तदा सामानाधिकरण्यस्यैव समानवचनलिङ्गकत्वनियतत्वात्=सामानाधिकरण्ये सत्येव समानवचनलिङ्गकत्वनियमात् रजतगतैकत्वाऽविवक्षायाम् 'रङ्गाणि रजतगतैकत्वाऽविवक्षायाम् 'रङ्गाणि रजतं जानाति' इत्यसमानवचनकः पांसुलागतबहुत्वाविवक्षायाम् 'स्त्रियं पांसुलाः जानाति' इत्यऽसमानवचनकश्च प्रयोगः स्यादेव–अत्र समानवचनलिङ्गकत्वनियामकस्य सामानाधिकरण्यस्याऽनभिप्रेतत्वादित्याशङ्क्याह–न चैवमिति। किं वा रजतगतस्य स्त्रीगतस्य चैकत्वस्य रङ्गगतस्य पांसुलागतस्य च बहुत्वस्याविवक्षायामित्येवमन्वयः। रजतगतैकत्वविवक्षायां तु 'रङ्गाणि रजतम्' इति प्रयोग इष्ट एव तथा पांसुलागतबहुत्वविवक्षायाम् 'स्त्रियं पांसुलाः' इति प्रयोग इष्ट एवेत्युक्तम्–रजतादिगतैकत्वबहुत्वाविवक्षायामिति। परिहारमाह–समानाधिकरणयोरिति, यथा समानाधिकरणयोः 'नीलो घटः' इत्यत्र नीलपदघटपदयोः समानलिङ्गवचनकत्वनियमोऽस्ति तथा यत्पदार्थविशेष्यकत्वविशिष्टेऽभेदसंबन्धाच्छिन्नयत्पदार्थप्रकारकत्वस्यान्वयो भवति तयोरपि=तादृशविशेष्यवाचकतादृशप्रकारवाचकपदयोरपि समानलिङ्गवचनत्वनियमोऽस्ति

यज्ञपतिमतानुयायिनस्तु 'रङ्गं रजतं जानाति' इत्यादौ सामानाधिकरण्यानुरोधाद् रजतादिपदस्य रजताभेदज्ञानविषये लक्षणा, अत एव भ्रान्तिज्ञविशेषदर्शिना प्रयुक्तस्य 'लोहितवह्निं जानाति' इत्यादिवाक्यस्यापि प्रामाण्यनिर्वाहः। न ह्यऽसमासस्थले इव लोहितवह्न्योद्योरभेदाऽविवक्षा– ज्ञानांशे लोहितादेः

तथा च 'रङ्गं रजतं जानाति' इत्यत्रोक्तरीत्या रङ्गविशेष्यकत्वविशिष्टे एव ज्ञाने तादात्म्यसंबन्धेन रजतप्रकारकत्वस्यान्वयो भवतीति सामानाधिकरण्याभावेऽपि रङ्गपदरजतपदयोः समानलिङ्गवचनत्वनियमः प्राप्त इति न 'रङ्गाणि रजतं जानाति' इत्यादिप्रयोगापत्तिरित्यर्थः। "नियतत्वात्" इत्यत्र नियामकत्वात्' इत्येवं पाठो युक्तः।

'रङ्गं रजतं जानाति' इत्यत्र सामानाधिकरण्योपपादकस्य यज्ञपतेर्मतमाह–यज्ञपतीति, अत्र रजतपदस्य रजताभेदज्ञानविषये लक्षणास्ति तथा च रङ्गस्य रजताभेदज्ञानविषयत्वेन रङ्गपदार्थरजताभेदज्ञानविषयपदार्थयोरभेदात् सामानाधिकरण्ये न काचिदनुपपत्तिः, रङ्गविशेष्यकरजताभेदज्ञानविषयत्वप्रकारकज्ञानवानिति बोधाकार इत्यर्थः। एवं लक्षणया सामानाधिकरण्योपपादनस्य फलान्तरमाह–अत एवेति, 'लोहितवह्निं जानाति' इत्यत्र वह्नेः शुक्लत्वेन लौहितत्वाभावेपि लोहिताभेदज्ञानविषयत्वेन प्रामाण्यं निर्वहति। लोहितपदस्य लोहिताभेदज्ञानविषये लक्षणाया अस्वीकारे बाधकमाह–न हीति, 'रङ्गं रजतं जानाति' इत्यत्र यथा रङ्गरजतयोरभेदविवक्षा नास्ति किंतु रजतप्रकारकत्वस्य ज्ञाने एवान्वयः स्वीकृतस्तथाऽसमासस्थले= 'लोहितं वह्निं जानाति' इत्यत्र त्वन्वयसंभवेप्यत्रेव 'लोहितवह्निं जानाति' इत्यत्र तु समासे लोहितवह्न्योरभेदाऽविवक्षापि न संभवति–अभेदाविवक्षायाम् 'लोहितवह्निम्' इति कर्मधारयस्य साधुत्वं न स्यात्– अभेदविवक्षायामेव कर्मधारयस्य साधुत्वात् यथा– 'नीलोत्पलम्' इति, लोहितपदार्थस्य स्वातन्त्र्येण न संभवति लोहितपदोत्तरं प्रकारताबोधकद्वितीयाविभक्तेरभावादिति लोहितपदार्थस्य धात्वर्थज्ञाने साक्षाद्भेदान्वय एव कर्तव्यः– अभेदान्वयासंभवात् तदपि न संभवति धात्वर्थे नामार्थस्य साक्षाद् भेदान्वयस्याऽस्वीकारात्, द्वारीभूतार्थप्रतिपादकविभक्तेरभावाच्चेत्यगत्या प्रामाण्यप्रतिपादनाय 'लोहितवह्निम्' इत्यत्र लोहितपदस्य लोहिताभेदज्ञानविषये लक्षणा स्वीकार्या तथा च

स्वातन्त्र्येणान्वयो वा संभवति– कर्मधारयस्य साधुतानुपपत्तेः, लोहितपदोत्तरं प्रकारताबोधकविभक्तेरभावात्, धात्वर्थे साक्षान्नामार्थस्य भेदाऽन्वयेऽव्युत्पत्तेः। द्वन्द्वस्थलवत् कर्मधारयोत्तरविभक्तेः पूर्वपदप्रकृतिकत्वाभावात् तस्याः पूर्वपदार्थान्वितप्रकारताबोधकत्वायोगात्। न च द्वन्द्वसमास एवासौ– अल्पाचो वह्निपदस्य पूर्वनिपातप्रसङ्गात्। समाहारपक्षे पुंलिङ्गताया इतरेतरपक्षे चैकवचनस्यानुपपत्तेः।

एतन्मते 'शुक्लो वह्निः' इत्यादिप्रमाया लोहिताभेदारोपविषयवह्निविषयकत्वेऽपि शुक्लो वह्निर्लोहिता जपा इति

सामानाधिकरण्यसत्त्वात् कर्मधारय उपपद्यते, एवमेवासमासस्थलेऽपि 'रङ्गं रजतं जानाति' इत्यादौ रजतादिपदस्य रजताद्यऽभेदज्ञानविषये लक्षणा स्वीकार्या तथा च रङ्गस्य रजताभेदज्ञानविषयेणाऽभेदात् सामानाधिकरण्यमप्युपपन्नमित्यर्थः। ननु यथा 'धवखदिरौ छिन्नत्ति' इत्यत्र धवपदोत्तरं विभक्तेरभावेऽपि धवखदिरोभयपदोत्तरविभक्तिरेव धवपदार्थान्वितप्रकारतां बोधयति तादृशप्रकारतायाश्च धात्वर्थेऽन्वयो भवति तथा 'लोहितवह्निम्' इति कर्मधारयोत्तरविभक्तिरपि लोहितपदार्थेऽन्वितप्रकारतां बोधयिष्यति तस्याश्च ज्ञानेऽन्वयो भविष्यतीत्याशङ्क्याह–द्वन्द्वस्थलवदिति, द्वन्द्वस्थले तूभयपदोत्तरं विभक्तेः प्राप्तत्वादुभयपदार्थान्वितप्रकारताबोधकत्वं संभवति कर्मधारयस्थले तूभयपदोत्तरं विभक्तेः प्राप्तिरेव नास्तीति कर्मधारयोत्तरविभक्तेः पूर्वपदप्रकृतिकत्वाभावात् तस्याः=कर्मधारयोत्तरविभक्तेलोहितादिरूपपूर्वपदार्थान्वितप्रकारताबोधकत्वं न संभवति। ननु 'लोहितवह्निम्' इत्यपि द्वन्द्वसमासो भवतु? इत्याशङ्क्याह– न चेति। तस्माल्लोहितपदस्यागत्या लोहिताभेदज्ञानविषये लक्षणा स्वीकार्यैवेत्यर्थः। समाहारो नपुंसको भवतीति पुंलिङ्गत्वानुपपत्तेः 'लोहितवह्निम्' इति पुंलिङ्गस्य समाहारद्वन्द्वत्वमपि न संभवति, इतरेतरद्वन्द्वसमास एकवचनान्तो न भवतीत्येकवचनत्वानुपपत्तेरितरेतरद्वन्द्वत्वमपि न संभवतीत्याह समाहारपक्षेति।

ननु यदि यज्ञपतिमते लोहितपदस्य लोहिताभेदज्ञानविषये लक्षणा तदा 'शुक्लो वह्निः' इत्यादिप्रमाकालेऽपि 'लोहितवह्निम्' 'लोहितं वह्निं'

समूहालम्बनप्रमाया लोहिताभेदावगाहिस्वविषयवह्निविषयकत्वेऽपि च तद्दशायाम् 'लोहितवह्निं लोहितं वह्निं वा जानाति' इति न प्रयोगः तादृशपदोपस्थाप्यविषयताया धर्मिपारतन्त्र्येण द्वितीयार्थविषयतायामभेदसंबन्धेन विशेषणताया नियमोपगमात्।

अथवा लोहिताभेदविषयतानिरूपितविषयतापन्नस्य वह्न्यादेर्ज्ञानान्वयिविषयितानिरूपकत्वं भासते। समूहालम्बनादौ च तादृशविषयतानापन्नस्यैव विषयितानिरूपकत्वमिति

इत्यादिवाक्यस्य प्रयोगः स्यादित्याशङ्क्याह एतन्मते इति, यद्यपि उक्ते 'लोहितवह्निम्' इति वाक्ये य एव लोहिताभेदारोपविषयो वह्निर्विषयः स एव वह्निः 'शुक्लो वह्निः' इति प्रमायां विषयोस्ति वह्नेरेकत्वादिति 'शुक्लो वह्निः' इति प्रमाया लोहिताभेदारोपविषयवह्निविषयकत्वात् तथा 'शुक्लो वह्निर्लोहिता जपा' इति प्रमाया लोहिताभेदावगाहित्वात् (अत्र लोहितस्यापि विषयत्वात् वह्निविषयकत्वाच्चास्याः समूहालम्बनप्रमाया लोहिताभेदावगाहि यत् स्वं तद्विषयो यो वह्निस्तादृशवह्निविषयकत्वं प्राप्तं तस्माद् एतदुभयप्रमादशायां वह्नेर्लोहिताभेदावगाहिज्ञानविषयत्वेन 'लोहितवह्निम् लोहितं वह्निम्' इत्यादिप्रयोगः स्यादेवेति प्राप्तं तथापि 'शुक्लो वह्निः' इत्याकारकप्रमात्मकज्ञानकाले उक्तसमूहालम्बनात्मकप्रमाकाले च 'लोहितवह्निम् लोहितं वह्निम्' इत्यादिः प्रयोगो न भवति यज्ञपतिना तादृशपदोपस्थाप्यविषयतायाः=आरोप्यवाचकलोहितादिपदोपस्थाप्यविषयताया धर्मिपारतन्त्र्येण=लोहितादिपदार्थद्वारा द्वितीयार्थविषयतायामभेदेन विशेषणत्वं स्वीक्रियते न चैवमभेदेन विशेषणत्वं तद्दशायां संभवति वह्नेः शुक्लपदार्थेनेवाऽभेदस्योक्तोभयप्रमाविषयत्वाद् शुक्लत्वावरुद्धे च वह्नौ लोहितत्वान्वयासंभवात्, उक्तोभयप्रमाया असत्त्वे तु 'लोहितवह्निम् लोहितं वह्निम् जानाति' इति प्रयोगः संभवत्येवेत्यर्थः।

पक्षान्तरमाह-अथ वेति, 'लोहितवह्निम्, लोहितं वह्निम्' इत्यत्र वह्नौ लोहिताभेदविषयताप्यस्ति वह्निविषयकज्ञानविषयाप्यस्ति तयोश्च विषयतयोः परस्परं निरूप्यनिरूपकभावो विज्ञेय इति 'लोहितवह्निम्' इत्यादौ लोहिताभेदविषयानिरूपितविषयता (वह्निज्ञानीयविषयता)-पन्नस्य वह्नेर्ज्ञाननिष्ठविषयिताया निरूपकत्वं भासते 'शुक्लो वह्निः' 'शुक्लो

नातिप्रसङ्गः। विषयतापन्नस्य निरूपकत्वमित्यस्य च विषयतावच्छिन्नं निरूपकत्वमित्यर्थः। एतच्च विलक्षणं विषयितानिरूपकतावच्छेदकत्वमविषयस्यापि विषयत्वस्योपेयते 'रक्तदण्डवान्' इत्यादौ दण्डादिरूपप्रकारांशेऽप्रकारेणापि रक्तत्वादिप्रकारतानिरूपितविशेष्यत्वेन दण्डादिप्रकारताया अवच्छेद्या-

---

वह्निर्लोहिता जपा' इत्यादौ च वह्नौ लोहिताभेदविषयताया अभावात् तादृशविषयतानापन्नस्य=लोहिताभेदविषयतानिरूपितविषयतानापन्नस्यैव वह्नेर्ज्ञाननिष्ठविषयितानिरूपकत्वं भासते इति 'लोहितवह्निम्' इत्यादौ लोहिताभेदविषयतानिरूपितविषयतापन्नस्य वह्नेर्विषयत्वात् 'शुक्लो वह्निः' इत्यादौ च लोहिताभेदविषयतानिरूपितविषयतानापन्नस्यैव वह्नेविषयत्वाद् विषयभेदेन समानार्थकत्वाभावात् नातिप्रसङ्गः='शुक्लो वह्निः' इत्यादिप्रमाकाले 'लोहितवह्निम्' इत्यादिप्रयोगापत्तिर्नास्तीत्यर्थः। वह्निनिष्ठाया लोहिताभेद-विषयतानिरूपितविषयताया वह्निनिष्ठस्य ज्ञानीयविषयितानिरूपकत्वस्य च परस्परमवच्छेद्यावच्छेदकभावसूचनार्थमाह-विषयतापन्नस्येति, वह्नावुक्तविषय-ताध्यस्त्युक्तनिरूपकत्वमप्यस्तीत्युक्तनिरूपकत्वमुक्तविषयतावच्छिन्नं जातमिति विषयताया अवच्छेदकत्वं निरूपकत्वस्य चावच्छेद्यत्वं प्राप्तम्, अयं चावच्छेद्यावच्छेदकभावः 'लोहितवह्निम्' इत्यादिवाक्यजन्यबोधे भासते 'शुक्लो वह्निः' 'शुक्लो वह्निर्लोहिता जपा' इत्यादिवाक्यजन्यबोधे च न भासते इति समानार्थकत्वाभावात् 'शुक्लो वह्निः' इत्यादिप्रमाकाले 'लोहितवह्निम्' इत्यादिप्रयोगापत्तिर्नास्तीत्यर्थः। ननु विषयतायां ज्ञानविषयत्वस्वीकारेऽनव-स्थाप्रसङ्गादविषयस्यैव वह्निनिष्ठविषयत्वस्योक्तविषयितानिरूपकतावच्छेदकत्वं वक्तव्यं तच्च कथं स्यात्? ज्ञानविषयीभूतस्यैवावच्छेदकत्वस्वी-कारादित्याशङ्क्याह-एतच्चेति, यथा 'रक्तदण्डवान्' इत्यत्र दण्डवति दण्डो दण्डे रक्तं रक्ते च रक्तत्वं विशेषणं न तु दण्डे इति रक्तत्वनिष्ठप्रकारता-निरूपितविशेष्यता रक्ते एव भासते न तु दण्डे इति दण्डाभिन्नप्रकारेऽप्रकारेण=प्रकारतयाऽभासमानेनापि रक्तत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वेन दण्डनिष्ठा प्रकारताऽवच्छिन्ना भवति तथैवात्राप्यविषयस्यापि वह्निनिष्ठविषयत्वस्य विषयितानिरूपकतावच्छेदकत्वं स्वीक्रियते इत्यर्थः। दृष्टान्ते "अप्रकारेणापि" इति यदुक्तं तेन रक्तत्वादिप्रकारतानिरूपितविशेष्यत्वस्याऽविषयत्वमेव प्राप्तं

वच्छेदकभाववदित्याहुः। तन्न शोभनम्–उक्तरीत्या विनैव लक्षणामुपपत्तौ तस्या अन्याय्यत्वात्।

अथोक्तस्थले आरोप्यारोपविषयबोधकपदयोज्ञानान्वितार्थकत्वे कर्मप्रत्ययस्थले 'लोहितो वह्निर्ज्ञायते' इत्यादौ विशेष्यभेदाद्वाक्यभेदापत्तिः। न च लोहिताभेदज्ञानविषयो वह्निरित्येव शाब्दधीरुपगम्यते न तु ज्ञाने प्रकारो लोहितो विशेष्यश्च वह्निरिति समूलालम्बनं तथा सति 'शुक्लो

प्रकारीभूतपदार्थस्य ज्ञानविषयत्वनियमात्, रक्तत्वप्रकारतानिरूपितविशेष्यत्वस्य रक्तवृत्तित्वेन ज्ञानविषयत्वेऽपि दण्डवृत्तित्वेन ज्ञानविषयत्वमस्त्येव-रक्तपदार्थदण्डपदार्थयोरभेदेऽपि शब्दभेदेनार्थभेदस्वीकारात् तदुक्तम्–"प्रतिशब्दमर्थो भिद्यते" इति। वस्तुतो रक्तपदार्थदण्डपदार्थयोरभेदाद् रक्तनिष्ठं स्क्तत्वप्रकारतानिरूपितविशेष्यत्वं दण्डनिष्ठमेवेति दण्डनिष्ठप्रकारताया अवच्छेदकं भवत्येवेति भावः। परिहरति-तन्नेति, यज्ञपतिमतानुयायिनः 'रङ्गं रजतं जानाति' इत्यादौ रङ्गपदरजतपदयोः सामानाधिकरण्योपपत्त्यर्थमेव रजतादिपदस्य रजताद्यभेदज्ञानविषये लक्षणां स्वीकुर्वन्ति तच्च सामानाधिकरण्यं लक्षणां विनाप्युक्तरीत्या="यत्पदार्थविशेष्यकत्वविशिष्टे" इत्याद्युक्तरीत्योपपद्यत एवेति लक्षणाश्रयणं न युक्तमित्यर्थः। तस्याः=लक्षणायाः।

ननु 'रङ्गं रजतं जानाति' उक्तरीत्येत्यत्रेवोक्तस्थले='लोहितं वह्निं जानाति' इत्यत्रारोप्यबोधकस्य लोहितपदस्यारोपविषयबोधकस्य च वह्निपदस्य ज्ञानान्वितार्थकत्वे अर्थादत्र यदि स्वोत्तरद्वितीयार्थद्वारा लोहितवह्निपदार्थयोर्ज्ञाने एव 'लोहितप्रकारकं वह्निविशेष्यकं च यज्ज्ञानं तादृशज्ञानाश्रयश्चैत्रः' इत्येवमन्वयः स्यात्तदा 'लोहितो वह्निर्ज्ञायते' इत्यादिकर्मप्रत्ययस्थले ज्ञानीयविषयताश्रयत्वेन लोहितवह्निपदार्थयोर्विशेष्यत्वात् परस्परं भिन्नत्वाच्च विशेष्यभेदात् 'ज्ञानीयविषयताश्रयो लोहितः ज्ञानीयविषयताश्रयो वह्निश्च' इत्येवं वाक्यभेदः स्यादेव न चैतदिष्टमित्याशङ्कते-अथेति। ननु 'लोहितो वह्निर्ज्ञायते' इत्यत्र 'लोहिताभेदज्ञानविषयो वह्निः' इत्येवमेकवाक्यतां कृत्वा शाब्दबोधः स्वीक्रियते न तु 'ज्ञाने लोहितः प्रकारः वह्निश्च विशेष्यः=ज्ञानीयविषयताश्रयो लोहितो वह्निश्च' इत्येवं समूहालम्बनात्मको

वह्निर्लोहिता जपा' इत्यादावपि तथाप्रयोगप्रसंगात्, दर्शितविशिष्टवैशिष्ट्यबोधस्वीकारे लोहितादिप्रकारकत्व-विशिष्टनिरूपितविशेष्यतायाः शुक्लवह्न्यादौ बाधितत्वेन तादृशप्रयोगापत्तिविरहादिति वाच्यम्, तत्र लोहितादिपदोत्त-रप्रकारतार्थकद्वितीयादिविभक्तिविरहेण लोहितादिप्रकारकत्वेन ज्ञानभानासंभवात्, नामार्थधात्वर्थयोः साक्षादन्वयस्याव्युत्पन्नतया प्रकारितायाः संसर्गतया भानासंभवादिति चेत्?,

---

येनोक्तरीत्या विषयताश्रयीभूतवह्निलोहितयोर्भेदाद्वाक्यभेदः स्यात्, विपक्षे बाधकमाह-तथा सतीति, तथा सति=यदि 'लोहितो वह्निर्ज्ञायते' इत्यत्रापि 'ज्ञाने प्रकारो लोहितो वह्निश्च विशेष्यः' इत्येवं समूहालम्बनात्मक एव बोधः स्यात् तदोक्तसमूहालम्बनात्मकबोधजनकस्य 'शुक्लो वह्निर्लोहिता जपा ज्ञायते' इति वाक्यस्यापि स्थाने तथा='लोहितो वह्निर्ज्ञायते' इत्येवं प्रयोगः स्यादेव उभयोरपि वाक्ययोरुक्तसमूहालम्बनात्मकबोधजनकत्वेन साम्यस्य प्राप्तत्वाद् न चैतदिष्टम्, तस्मात् 'लोहितो वह्निर्ज्ञायते' इत्यत्र लोहिताभेदज्ञानविषयो वह्निः न इत्येतादृशो दर्शितो विशिष्ट्यवैशिष्ट्यबोध एव स्वीकार्यस्तथा च लोहितप्रकारकत्वविशिष्टं यज्ज्ञानं तादृशज्ञाननिरूपित-विशेष्यताया लोहितवह्नावेव सत्त्वेन शुक्लवह्नौ बाधितत्वात् 'शुक्लो वह्निःलोहिता जपा' इत्याकारकबोधतात्पर्येण तादृशप्रयोगस्य='लोहितो बह्निः' इत्याकारक-प्रयोगस्यापत्तिर्नास्तीत्याशङ्क्याह न चेति। लोहिताभेदज्ञानविषयताविशिष्टे वह्नौ वह्निविषयकज्ञानीयविषयताया वैशिष्ट्यमस्तीत्यस्य विशिष्टवैशिष्ट्यबोधत्वम्। परिहारमाह—तत्रेति, 'लोहिताभेदज्ञानविषयो वह्निः' इति बोधेपि लोहितप्रकारकत्वं ज्ञाने स्वीकार्यं तच्च न संभवति—लोहितपदोत्तरं प्रकारतावाचकद्वितीया-विभक्तेरभावाद् तथा लोहितप्रकारकस्वविशिष्टज्ञानभाने ज्ञाने लोहितस्य ज्ञाननिष्ठप्रकारतारूप-संसर्गेणान्वयो वक्तव्य इति प्रकारिताया: संसर्गत्वेन भानं प्राप्तं तदपि न संभवति—नामार्थस्य लोहितस्य धात्वर्थज्ञाने साक्षाद् भेदान्वयस्याऽव्युत्पन्नत्वेन प्रकारिताया: संसर्गत्वासंभवात्, तथा चागत्योक्तरीत्या 'ज्ञानीयविषयताश्रयो लोहितो वह्निश्च ज्ञायते' इत्येव शाब्दबोधः स्वीकार्यस्तत्र च विशेष्यभेदाद्वाक्यभेदापत्तिरित्यर्थः।

न– यथा हि 'घटो नीलो भवति' 'वृक्षो नौका भवति' 'काष्ठं भस्म भवति' इत्यादौ धात्वर्थेऽसाधारणधर्मरूपे भावे व्युत्पत्तिवैचित्र्येण नीलनौकाभस्मादेः साक्षादेवान्वयः– प्रथमाया अन्तरा भासमानार्थकत्वाभावात्, नौकादिपदस्य स्वारम्भकावयवारभ्य नौकाद्यर्थलाक्षणिकतया प्रकृतिविकृत्योर्भेदमतेऽपि 'वृक्षो नौका भवति' इत्यादौ योग्यताया उपपत्तिस्तथा धात्वर्थे प्रकृतेऽपि प्रकारितासंबन्धेन लोहितादेः साक्षादन्वयस्यागत्योपगमात्।

यथा प्रकृतिविकृतिभावस्थले 'वृक्षः पञ्च नौका भवति' इत्यादौ प्रकृतिभूतवृक्षादेर्विशेष्यतया भावनान्वयित्वात्

अथेत्यादिनाशङ्कितं परिहरित–नेति, यथा 'घटो नीलो भवति' इत्यत्र नीलपदार्थस्य नामार्थस्याप्यऽसाधारणधर्मरूपे भावे=भवनरूपे धात्वर्थे साक्षादेवान्वयो भवति–नीलपदोत्तर-प्रथमाया नीलपदार्थधात्वर्थयोर्मध्ये द्वारीभूतार्थप्रतिपादकत्वाभावात् तथा प्रकृतेपि='लोहितो वह्निर्ज्ञायते' इत्यत्रापि धात्वर्थे ज्ञाने प्रकारितासंबन्धेन लोहितपदार्थस्यागत्या साक्षादेवान्वय उपगम्यते तथा च 'प्रकारितासंबन्धेन लोहितविशिष्टज्ञानविषयताश्रयो वह्निः' इति शाब्दबोधोदयाद्वाक्यभेदापत्तिर्नास्तीत्यर्थः। 'घटो नीलो भवति' इत्यत्र सिद्धे घटे नीलोत्पत्तिरिष्टास्तीति धात्वर्थे नीलस्यैवान्वय अत एव भावानानुकूलव्यापारो धात्वर्थो नीले एव न घटेऽपीति नीलस्याऽसाधारणो धर्म इत्युक्तम्–असाधारणेति। ननु प्रकृतिविकृत्योर्भेद एवास्तीति स्वभिन्नपदार्थान्तररूपत्वप्राप्तेरसंभवाद् वृक्षः प्रकृतिभूतः कथं विकृतिभूतनौका भवेदित्याशङ्क्योक्तम्–नौकादिपदस्येति, स्वं वृक्षः वृक्षारम्भकावयवानामेव नौकारम्भकत्वात् नौकापदस्य वृक्षारम्भकावयवारभ्य नौकापदार्थे लक्षणा तथा च वृक्षारम्भकावयवारभ्यनौकापदार्थरूपत्वं वृक्षे बाधितं नास्तीति वृक्षे नौकारूपत्वेन भवनव्यापारस्य योग्यताया उपपत्तिरित्यर्थः।

संप्रत्याख्यातवचननियामकमाह–यथेति 'वृक्षः पञ्च नौका भवति' इत्यादिप्रकृतिविकृतिभावस्थले प्रकृतिभूतवृक्षस्य विशेष्यत्वेन धात्वर्थभावनायामन्वयोस्तीति तद्गत=वृक्षगतसंख्याबोधकतया प्रकृतिभूतवृक्षवाचक–

तद्गतसंख्याबोधकतया प्रकृतिवाचकपदसमानवचनत्वमाख्या-तस्य तथा 'एको द्वौ ज्ञायते' इत्याद्युभयाभेदारोपस्थलीयवाक्ये एकादिपदार्थस्यारोपविशेष्यस्याख्यातार्थविशेष्यत्वान्वयविशेष्यतया तत्पदसमानवचनत्वमाख्यातस्य।

न चैवम् "अमानि तत्तेन निजाऽयशोयुगं द्विफालवद्धाश्चिकुराः शिरस्थितम्" इत्यत्र कथमारोपविशेष्य-वाचकपदविरुद्धवचनत्वम् "अमानि" इति क्रियापदस्येति वाच्यम्, तत्राऽयशोद्वयस्य वास्तवत्वेन चिकुरभागद्वयस्य राज्ञ आरोप्यत्वेन कवेरुत्प्रेक्षितत्वात्, आख्यातार्थविशेष्यतान्वय-विशेष्यत्वेनाऽयशोयुगस्यैव विवक्षितत्वात्।

वृक्षपदसमानवचनत्वमेवाख्यातस्येति 'भवति' इत्येकवचनान्तं क्रियापदं वृक्षपदस्यैकवचनान्तत्वात्, तथैवैकस्मिन् चन्द्रादौ द्वित्वस्य चन्द्रद्वयस्य वाऽऽरोपस्थले 'एको द्वौ ज्ञायते' इत्यत्रोभयाभेदारोपस्थलीयवाक्येप्येकपदार्थ-स्यारोपविषयस्यैवाऽऽख्यातार्थविशेष्यतान्वये विशेष्यत्वात् (आख्यातार्थस्य विषयत्वस्य विशेष्यत्वरूपत्वादेकपदार्थे एवान्वयाच्चैकपदार्थस्याख्यातार्थ-विशेष्यतान्वयविशेष्यत्वं प्राप्तमिति विज्ञेयम्) तत्पद=एकपदसमानवचन-त्वमाख्यातस्य प्राप्तमित्येकवचनान्तत्वमित्यर्थः। अत्र "उभय" इत्यत्र "उभयार्थ" इत्यपि पाठः।

ननु यद्यारोपविषयस्यैव प्राधान्यादारोपविषयवाचकपदसमानवचनत्व-माख्यातस्योच्यते तदा "अमानि तत्तेन इत्यत्र चिकुराणामेवारोपविषयत्वात् तादृशचिकुरवाचकपदस्य बहुवचनान्तत्वेऽपि तद्विरूद्धम्" 'अमानि' इत्येकवचनत्वमाख्यातस्य कथं संगच्छेत बहुवचनस्यापेक्षितत्वादित्या-शङ्क्याह—न चेति। परिहारमाह— तत्रेति, तत्र="अमानि तत्तेन" इत्यत्रारोपविषयत्वं चिकुराणां नास्ति किंत्वऽयशोयुगस्यैव तथा चाऽयशोयुगे द्विफालबद्धचिकुरभागद्वयत्वमारोप्यते कविनेत्याऽऽरोपविषयस्याऽयशोयुगस्यै-वाख्यातार्थविशेष्यतान्वये विशेष्यत्वेन विवक्षितत्वात् तद्वाचकाऽयशोयुगपदस्य चैकवचनान्तत्वात् 'अमानि' इति क्रियापदस्याप्येकवचनान्तवत्वयुक्तमेवेत्यर्थः।

इच्छार्थकधातुस्थले मुख्यविशेष्यत्वरूपं कर्मत्वं द्वितीयार्थः, अतो 'वृष्टिसाध्यं सुखं भवतु' इत्यादीच्छास्थले 'सुखमिच्छति' इत्यादिवत् 'वृष्टिमिच्छति' इत्यादयो न प्रयोगाः।

अथ 'अहं सुखी स्याम्' इत्यादीच्छायाः सुखादि-विशेषणकतया तत्र 'सुखमिच्छति' इत्यादिप्रयोगानुपपत्तिरिति चेत्?, न– 'मम सुखं भवतु' इत्यादिसुखविशेष्यकेच्छाया एव

इच्छार्थकधातुस्थले 'सुखमिच्छति' 'सुखमभिलषति' इत्यादौ मुख्यविशेष्य त्वरूपं कर्मत्वं द्वितीयार्थस्तथा च सुखविशेष्यकेच्छाश्रयश्चैत्र इति शाब्दबोधः। मुख्यविशेष्यत्वरूपकर्मत्वस्य द्वितीयार्थत्वस्वीकारस्य फलमाह–अत इति, 'वृष्टिसाध्यं सुखं भवतु' इत्यत्र सुखस्यैवेच्छाविषयत्वेन मुख्यविशेष्यत्वात् 'मुखमिच्छति' इति प्रयोगस्तु भवति, वृष्टेः मुखविशेषणत्वेन मुख्यविशेष्य-त्वाभावात् वृष्टिमिच्छति' इति प्रयोगो न भवतीत्यर्थः।

ननु यदीच्छार्थकधातुयोगे मुख्यविशेष्यत्वरूपं कर्मत्वं द्वितीयार्थस्तदा 'अहं सुखी स्याम्' इत्यादीच्छायां सुखस्यात्मविशेषणत्वेन भासमानत्वाद् मुख्यविशेष्यत्वाभावेन तत्रान्यप्रयुक्तः 'सुखमिच्छति' इति प्रयोगो नोपपद्येतेत्या-शङ्कते– अथेति। परिहरति– नेति, 'मम सुखं भवतु' इत्याकारकसुख-विशेष्यकेच्छाया एव विषयाभिलापात्=विषयस्य (सुखस्य कदाचित्='अहं सुखी स्याम्' इत्यत्र सुखविशिष्टात्मबोधकशब्देन=अहं पदेनाभिलापात् 'अहं सुखी स्याम्' 'मम सुखं भवतु' इतीच्छयोः समानविषयकत्वेन 'मम सुखं भवतु' इतीच्छायाः सुखविशेष्यकत्वमस्तीति 'अहं सुखी स्याम्' इतीच्छाया अपि सुखविशेष्यकत्वं प्राप्तमिति तादृशेच्छामुद्दिश्य 'सुखमिच्छति' इति सुखविशेष्यकेच्छाबोधप्रयोगस्यानुपपत्तिर्नास्तीत्यर्थः। अत्र दृष्टान्तमाह–स्वकृत्येति, स्वकृत्येति, स्वकृत्यऽधीनसिद्धिकत्वरूपं यत् स्वकृतिसाध्यत्वं तत्प्रकारकपाक-विशेष्यकेच्छायाः 'पाकं चिकीर्षामि' इत्याकारकाया एव विषयस्य यथा 'पाकं कृत्या साधयामि' इत्यत्र पाकसिद्ध्यनुकूलो यः करोत्यर्थभूतकृत्यऽभिन्नो व्यापारस्तादृशव्यापारविशिष्टं यत्स्वं तद्बोधकशब्देन 'साधयामि' इति पदेनाभिलापो भवति तथैव 'मम सुखं भवतु' इत्याकारकेच्छाविषयस्यैव 'अहं सुखी स्याम्' इत्यत्र सुखविशिष्टात्मबोधकेन अहमिति पदेनाभिलापो भवति तत्राप्यत्रा–

कदाचित् सुखादिविशिष्टात्मबोधकशब्देन विषयाभिलापात्, स्वकृत्यऽधीनसिद्धिकत्वरूपस्वकृतिसाध्यत्वप्रकारकपाकविशेष्यकेच्छाया एव 'पाकं कृत्या साधयामि' इति पाकसिद्ध्यनुकूलकृत्यऽभिन्नव्यापारविशिष्टस्वबोधकशब्देन विषयाभिलापवत्।

यदि चोद्देश्यसुखादेर्विशेषणतयापि क्वचिद् भानमानुभविकं तदोद्देश्यादिव्यवहारनियामकः क्वाचित्कविशेषणसाधारणो विषयताविशेषोऽभ्युपेयः। अनुमितौ विशेष्यतया क्वाचित्कभानविषयसाध्यनिष्ठविधेयताख्यविषयतावत्। स एव च 'सुखमिच्छति' इत्यादौ द्वितीयाद्यर्थः।

ऽहंपदार्थस्य सिद्धत्वेनासिद्धस्य सुखस्यैवेच्छाविषयत्वेन मुख्यविशेष्यत्वात् 'अहं सुखी स्याम्' इत्याकारकेच्छामुद्दिश्य 'सुखमिच्छति' इति प्रयोगस्य न काचिदनुपपत्तिरित्यर्थः।

ननु 'अहं सुखी स्याम्' इत्यादौ सुखस्यात्मविशेषणत्वेनैव भानं भवतीति मुख्यविशेष्यत्वाभावादुक्तेच्छामुद्दिश्य 'सुखमिच्छति' इति प्रयोगस्योक्ताऽनुपपत्तिरस्त्येव 'सुखमिच्छति' इत्यनेन सुखविशेष्यकेच्छायाः प्रतिपादनात् 'अहं सुखी स्याम्' इत्यनेन चात्मविशेष्यकेच्छायाः प्रतिपादनादित्याशङ्क्य पक्षान्तरमाह—यदीति, यदुदेश्यभूतस्य सुखस्य विशेषणतयैव भानं भवति तदा क्वाचित्कविशेषणसाधारणः=विशेष्यविशेषणसाधारण उद्देश्यत्वव्यवहारनियामक एको विषयताविशेषः स्वीकार्यः स एव च द्वितीयार्थस्तथा च 'अहं सुखी स्याम्' इत्यत्र विशेषणीभूतेऽपि सुखे द्वितीयार्थभूतस्य तादृशविषयताविशेषस्य सत्त्वेन 'अहं सुखी स्याम्' इतीच्छामुद्दिश्य 'सुखमिच्छति' इति प्रयोगस्यानुपपत्तिर्नास्तीत्यर्थः। विशेष्यविशेषणसाधारणस्य विषयताविशेषस्य स्वीकारे दृष्टान्तमाह— अनुमितावितिः 'पर्वतो वह्निमान् धूमात्' इत्यनुमितौ वह्निः पर्वतविशेषणतया भासते। पर्वते वह्निर्धूमात्' इत्यनुमितौ च वह्निर्विशेष्यतया भासते इति विशेष्यतया भानविषयो यो वह्निरूपः साध्यस्तन्निष्ठा विधेयताख्या विषयता यथा विशेष्यविशेषणसाधारणा स्वीक्रियते तथा च 'पर्वतो वह्निमान्'

'ग्राममिच्छति' इत्यादौ ग्रामादिपदं ग्रामस्वत्वादिपरम्। अत एव च सिद्धस्य ग्रामादेर्मुख्यविशेष्यताया उपदर्शित-विलक्षणविषयताया वा विरहेऽपि न क्षतिः। ग्रामादेः सिद्धत्वेऽपि स्वत्वाद्यऽसिद्धोपरक्तस्येच्छायां प्राधान्येन क्वचिद् भानम्– विशिष्टस्यासिद्धत्वात्, तत्रैव च 'ग्राममिच्छति-इत्यादिप्रयोग इत्यपि वदन्ति।

'पाकं चिकीर्षति' इत्यादौ द्वितीयाया विशेष्यतारूप-कर्मत्वार्थकतया कृतिप्रकारकपाकविशेष्यकेच्छा प्रतीयते सा

इत्यत्र वह्नेर्विशेषणत्वेऽपि विधेयताख्यविषयता वह्नावेव 'पर्वते वह्निः' इत्यत्रापि वह्नेर्विशेष्यत्वेन विधेयताख्यविषयता वह्नावेवास्ति एवमेव 'मम सुखं भवतु' इत्यत्राप्युद्देश्यत्वव्यवहारनियामकविषयता सुखे-एव 'अहं सुखी स्याम्' इत्यत्राप्युद्देश्यत्वव्यवहारनियामकविषयता सुखे एवेत्युद्देश्यत्वव्यवहारनियामिका विशेष्यविशेषणसाधारणा एका विषयता कल्प्यते सैव द्वितीयार्थ इत्यर्थः।

'ग्राममिच्छति' इत्यत्र सिद्धस्य ग्रामस्येच्छाविषयत्वासंभवादऽसिद्धस्य ग्रामस्वत्वस्य चेच्छाविषयत्वसंभवाद् ग्रामपदं ग्रामस्वत्वपरं तथा च ग्रामस्वत्वविशेष्यकेच्छाश्रयश्चैत्र इति बोधाकारः। अत एव=ग्रामपदस्य ग्रामस्वत्वपरत्वादेव, ग्रामस्वत्वस्यैवेच्छाविषयत्वेन मुख्यविशेष्यत्वमस्तीति ग्रामस्य मुख्यविशेष्यत्वाभावेऽपि तथोपदर्शितविशेष्यविशेषणसाधारणविषयत्वा-भावेपि क्षतिः=ग्रामपदाद् द्वितीयानुपपत्तिर्नास्ति। क्वचित्तु ग्रामस्य शुद्धस्य सिद्धत्वेऽपि स्वत्वाद्यसिद्धोपरक्तस्य=असिद्धं यत् स्वत्वं तद्विशिष्टस्यासिद्ध-त्वादिच्छायां प्राधान्येन=विशेष्यत्वेन भानं भवति। इच्छाया असिद्धपदार्थ-विशेष्यकत्वनियमात् तत्रैव=यत्र स्वत्वविशिष्टग्रामस्याऽसिद्धत्वं भवति तत्रैव 'ग्राममिच्छति' इति प्रयोगो भवति न तु स्वत्वविशिष्टग्रामसिद्धावपीति पक्षान्तरमाह– ग्रामादेरिति। तथा च ग्रामपदस्य न ग्रामस्वत्वऽत्र लक्षणा किं तु ग्रामपदमऽसिद्धस्वत्वविशिष्टग्रामपरमेवेति भावः।

सन्नन्तधातुसमभिव्याहृतद्वितीयाया अर्थं निरूपयति– पाकमिति, 'पाकं चिकीर्षति' इत्यत्र विशेष्यतारूपं कर्मत्वं द्वितीयार्थः, द्वितीयार्थविशेष्यतायाश्च पाकपदस्यात्र द्वितीयान्तत्वेन पाकेऽन्वय इति सन्नर्थेच्छानिरूपितविशेष्यतायाः

च 'पाकं कृत्या साधयामि' इतीच्छा। अथ वा सनो धात्वर्थविषेष्यकेच्छावाचित्वात् कृतिविशेष्यकेच्छाचिकीर्षापदार्थः सा च 'पाककृतिर्भवतु' इतीच्छैव, प्रवर्तिका च सा भवतु मा वेत्यन्यदेतत्। पाकादेश्च कृतिकर्मत्वमेव द्वितीयया प्रत्याय्यते न त्विच्छाया विषयत्वरूपं कर्मत्वम्, गृहस्थितीच्छामादाय 'गृहं तिष्ठासति' इत्यादिप्रयोगापत्तेः। युक्तं चैतत्– सनो धात्वर्थ-

---

पाके प्राप्तत्वात् सन्प्रकृतिभूतकारोत्यर्थकृतौ प्रकारतैव प्राप्ता– एकस्यैव विशेष्यत्वसंभवादित्यत्र कृतिप्रकारिका पाकविशेष्यकेच्छा प्रतीयते इत्यर्थः। तस्याः स्वरूपमाह– सा चेति, सा=कृतिप्रकारकपाकविशेष्यकेच्छा। तथा च पाकं कृत्या=करोत्यर्थव्यापारेण साधयामीत्याकारकेच्छाश्रयश्चैत्र इति शाब्दबोधाकारः। पक्षान्तरमाह=अथ वेति, कर्तुमिच्छा हि चिकीर्षापदार्थ इति सन्नर्थेच्छानिरूपितविशेष्यता सन्प्रकृतिभूतधात्वर्थे कृत्यादावेव प्रतीयते न तु पाके इति सनो धात्वर्थ=सन्प्रकृतिभूतधात्वर्थविशेष्यकेच्छावाचकत्वं प्राप्तमिति करोत्यर्थकृतिविशेष्यकैवेच्छा चिकीर्षापदार्थ इत्यर्थः। एतस्या इच्छायाः स्वरूपमाह–सा चेति, सा=प्रकृतिभूतधात्वर्थप्रकृतिविशेष्यकेच्छा। तथा चात्र पाककृतिर्भवत्वित्याकारकेच्छाश्रयश्चैत्र इति शाब्दबोधाकारः। पूर्वोक्तायाः 'पाकं कृत्या साधयामि' इतीच्छायाः प्रवर्तकत्वेऽपि 'पाककृतिर्भवतु' इतीच्छाया नियमेन प्रवर्तकत्वं न प्रतीयते इत्याह– प्रवर्तिकेति। अस्मिन् पक्षे 'पाकं चिकीर्षति' इत्यत्रेच्छानिरूपितविशेष्यतायाः करोत्यर्थकृतावेव सत्त्वेन पाके-ऽभावात् पाके करोत्यर्थकृतिनिरूपितविशेष्यतारूपं कर्मत्वं द्वितीयया प्रत्याय्यते इति तदेव द्वितीयार्थो नत्विच्छानिरूपितविषयता (विशेष्यता रूपं कर्मत्व-मित्याह–पाकादेश्चेति। विपक्षे बाधकमाह–गृहस्थितीति, यदि सन्नर्थेच्छा-निरूपितविशेष्यत्वं सन्प्रकृतिभूतधात्वर्थादन्यस्मिन् पाकादावपि स्यात् तदा गृहस्थितीच्छानिरूपितविषयताया गृहे प्राप्त्या 'पाकं चिकीर्षति' इतिवत् 'गृहं तिष्ठासति' इत्यपि प्रयोगः स्यादेव न चैतदिष्टं यदा च सन्नर्थेच्छानिरूपितविषयत्वं प्रकृतिभूतधात्वर्थे एव स्वीक्रियते तदा तु 'तिष्ठासति' इत्यत्रेच्छानिरूपित विषयत्वं प्रकृतिभूतधात्वर्थस्थितावेव प्राप्तं न गृहे स्थाधातोश्चाऽकर्मकत्वाद् धात्वर्थस्थितिनिरूपित कर्मत्वमपि गृहे न प्राप्तमिति न गृहपदाद् द्वितीयापत्तिरित्यर्थः। अस्मिन् पक्षे स्वसम्मतिमाह–

प्रकारकेच्छावाचित्वे ओदनभोजनेच्छादशायाम् 'ओदनं बुभुक्षते' इति प्रयोगो न स्यात्– तत्र भोजनस्याऽप्रकारत्वात्।

न च कर्मतासंबन्धेन भोजनप्रकारिका यदौदन-विशेष्यिकेच्छा तदैवेतादृशप्रयोगः, सा चेच्छा भोजनधर्मि-केष्टसाधनताज्ञानाद् भोजनविशिष्टौदनधर्मिकेष्टसाधनताज्ञानाद् वा, ओदनस्य सिद्धतादशायामपि विशिष्टधर्मिकेष्टसाध-नताज्ञानाद् विशिष्टधर्मिकाऽसिद्धत्वज्ञानसहिताद् विशिष्टेच्छा-

---

युक्तमिति, एतत्=सनः प्रकृतिभूतधात्वर्थविशेष्यकेच्छावाचकत्वमेव युक्तम्। प्रथमोक्तमते बाधकमाह– सन इति, यदि सनः प्रकृतिभूतधात्वर्थप्रकार-केच्छावाचकत्वं प्रथमोक्तं स्यात्तदा भोजनस्य प्रकारत्वसत्त्वे एव 'बुभुक्षते' इति प्रयोगः स्यादिति ओदनभोजनेच्छादशायाम् 'ओदनं बुभुक्षते' इति प्रयोगो न स्यात्– अत्र भोजनस्य विशेष्यत्वेन प्रतीयमानत्वेन प्रकारत्वेनाऽप्रतीयमानत्वादित्यर्थः।

ननु कर्मतासंबन्धेन भोजनविशिष्टो य ओदनस्तद्विशेष्यकैव यदेच्छा भवति तदैव एतादृशः='ओदनं बुभुक्षते' इति प्रयोगो भवतीति न सनः स्वप्रकृतिभूतधात्वर्थभोजनादिविशेष्यकेच्छावाचकत्वकल्पनाया अपेक्षेत्याशङ्कते– न चेति। सा=ओदनविशेष्यकापीच्छा भोजनविषयकेष्टसाधनताज्ञानाद्वा कर्मतासंबन्धेन भोजनविशिष्टौदनविषयकेष्टसाधनताज्ञानाद्वा भवतीत्यन्यदेत दित्वाह– सेति। ननु सिद्धेरिच्छां प्रति प्रतिबन्धकत्वादोदनसिद्धतादशायामोदन-विशेष्यकेच्छा कथं स्यादित्याशङ्क्याह– ओदनस्येति, ओदनस्य सिद्धत्वेऽपि भोजनविशिष्टौदनस्याऽसिद्धत्वेन भोजनविशिष्टौदनविषयकाऽसिद्धत्वज्ञानसह-कृताद् भोजनविशिष्टौदनविषयकेष्टसाधनताज्ञानाद् विशिष्टेच्छायाः=भोजन-प्रकारककौदनविशेष्यकेच्छायाः संभवान्न कोपि दोषः (इच्छाप्रतिबन्धो न संभवति) इत्यर्थः। ननु यदि सनः स्वप्रकृतिभूतधात्वर्थप्रकारकेच्छावाचकत्वं स्यात्तदा 'भोजनोत्तरकालिकं गमनं भवतु' इत्यत्रापि भोजनस्य गमने विशेषण-त्वाद् भोजनप्रकारकगमनविशेष्यकेच्छायाः सत्त्वाद् भोजनप्रकारष्यकेच्छाबोधकः 'बुभुक्षते' इति प्रयोगः स्यादेव, एवं भुक्तौदनजन्यपुष्टिविशेष्यकेच्छाया अपि भोजनप्रकारकेच्छारूपत्वात् 'भुक्तौदनजन्या पुष्टिर्भवतु' इत्यत्रापि

संभवात्। यत्र भोजनसिद्धतादशायां भोजनोत्तरकालीनगमनत्वादिप्रकारिका भुक्तौदनजन्यपुष्टित्वादिप्रकारिका वेच्छा तत्र 'बुभुक्षते' इति प्रयोगस्य न प्रसङ्गः– मुख्यविशेष्यविशेषणतापन्नकर्मत्वांशे इच्छाप्रकारताया एव सन्प्रत्ययप्रकृत्यर्थे भानोपगमादिति वाच्यम्, 'भोजनं भवतु' इत्यादिभोजन-

---

'बुभुक्षते' इति प्रयोगः स्यादेव, सनः प्रकृतिभूतधात्वर्थविशेष्यकेच्छावाचकत्वे तूक्तस्थलयोः प्रकृत्यर्थभोजनविशेष्यकेच्छाया अभावादेव 'बुभुक्षते' इति प्रयोगापत्तिर्नास्तीति सनः प्रकृतिभूतधात्वर्थविशेष्यकेच्छावाचकत्वमेव युक्तं न तु प्रकृतिभूतधात्वर्थप्रकारकेच्छावाचकत्वमित्याशङ्क्याह– यत्रेति। भोजनसिद्धतादशायाम्=भोजने कृते सति। भोजनोत्तरकालीनगमनत्वादिप्रकारिका=भोजनप्रकारिका गमनत्वनिष्ठप्रकारतानिरूपितगमनविशेष्यिका 'भोजनोत्तरकालिकं गमनं भवतु' इत्याकारिका। भुक्तौदनजन्यपुष्टित्वप्रकारिका=भोजनप्रकारिका पुष्टित्वनिष्ठप्रकारतानिरूपितपुष्टिविशेष्यिका 'भुक्तौदनजन्या पुष्टिर्भवतु' इत्याकारिका वेच्छा भवति यत्र तत्रास्मन्मतेऽपि 'बुभुक्षते' इति प्रयोगापत्तिर्नास्तीत्यर्थः। उक्ते प्रयोगप्रसङ्गाभावे हेतुमाह–मुख्येति, भोक्तुमिच्छा हि बुभुक्षापदार्थ इति भुजधातूत्तरवर्तिसन्वाच्येच्छाया मुख्यं विशेष्यं भोजनमेव तादृशभोजनरूपमुख्यविशेष्ये विशेषणतापन्नं यत् कर्मत्वं तादृशकर्मत्वांशे=तादृशकर्मत्व–निरूपिका येच्छा तादृशेच्छानिरूपितप्रकारतैव सन्प्रत्ययकृतिभूतधात्वर्थे स्वीक्रियते तथा चोदनभोजनेच्छादशायामेव 'बुभुक्षते' इति प्रयोगः संभवति– मुख्यविशेष्यभूतभोजने विशेषणतापन्नं यत् कर्मत्वं तन्निरूपिका येच्छा तादृशेच्छानिरूपितप्रकारतायाः सन्प्रत्ययप्रकृत्यर्थभूतभोजने भासमानत्वाद् भोजनप्रकारकौदनविशेष्यकेच्छायाः अत्र प्रतीयमानत्वात्। 'भोजनोत्तरकालिकं गमनं भवतु' इत्याद्याकारकेच्छादशायां च 'बुभुक्षते' इति प्रयोगापत्तिर्नास्ति– 'भोजनोत्तरकालिकं गमनं भवतु' इत्याकारकेच्छायां मुख्यविशेष्यं गमनमेव तादृशगमने विशेषणतापन्नकर्मत्वस्य निरूपिका येच्छा तादृशेच्छानिरूपितप्रकारता भुजधात्वर्थे न संभवति किन्तु गमधात्वर्थे एव संभवतीति तत्र 'जिगमिषति' इत्येव प्रयोगो भवति न तु 'बुभुक्षते' इति प्रयोग इत्यर्थः प्रतिभाति। परिहारमाह– भोजनमिति, 'भोजनं भवतु' इत्याकारकभोजनविशेष्यकेच्छादशायामपि 'बुभुक्षते' इति प्रयोगः सर्वमते

विशेष्यकेच्छादशायामपि' 'बुभुक्षते' इति प्रयोगस्य सर्वसिद्धत्वेन धात्वर्थविशेष्यकेच्छाबोधकतायाः सन्प्रत्ययस्यावश्यमुपेयत्वात्।

न च द्वयी व्युत्पत्तिरेवोपेयते– एकव्युत्पत्त्यैव निर्वाहे व्युत्पत्तिद्वयकल्पने गौरवात्, अत एव च स्थित्यादिगोचरेच्छाया गृहादिविशेष्यकत्वस्योक्तरीत्या संभवेऽपि 'गृहं तिष्ठासति' इत्यादयो न प्रयोगाः। भोजनप्रकारकौदनविशेष्यकेच्छा-विशेषदशायाम् 'बुभुक्षते' इति प्रयोगसत्त्वे तूद्देश्यताख्य-विषयताया एव धात्वर्थे भानोपगमेन तस्य निर्वाहात्।

भवतीति सन्प्रत्ययस्य सन्प्रकृतिभूतधात्वर्थभोजनादिविशेष्यकेच्छाबोधक-त्वमावश्यकमेवास्तीति सनः स्वप्रकृतिभूतधात्वर्थविशेष्यकेच्छावाचकत्वमेव युक्तं न तु प्रकृतिभूतधात्वर्थप्रकारकपाकौदनादिविशेष्यकेच्छावाचकत्वं प्रथममतोक्तं युक्तमित्यर्थः।

ननु 'भोजनं भवतु' इत्याकारकेच्छादशायां सनः स्वप्रकृतिभूतधात्वर्थ-विशेष्यकेच्छावाचकत्वमप्यस्तु 'भोजनविशिष्ट ओदनो भवतु' इत्याकारकेच्छा-दशायां प्रकृतिभूतधात्वर्थप्रकारकेच्छावाचकत्वमप्यस्त्विति द्वय्येव व्युत्पत्ति-रस्त्वित्याशङ्क्याह– न चेति। परिहारमाह– एकेति। एकव्युत्पत्त्या=प्रकृतिभूत-धात्वर्थविशेष्यकेच्छावाचकत्वव्युत्पत्त्या। अत एव=सनः स्वप्रकृतिभूतधात्वर्थ-विशेष्यकेच्छावाचकत्वादेव, गृहस्थितीच्छायां गृहस्य विशेष्यत्वसंभवेऽपि सनो गृहादिविशेष्यकेच्छावाचकत्वमेव नास्ति येन गृहविशेष्यकेच्छामादाय 'गृहं तिष्ठासति' इति प्रयोगापत्तिः स्यात्। शेषं पूर्वमेव प्रतिपादितम्। 'भोजनविशिष्ट ओदनो भवतु' इत्याकारिकाया भोजनप्रकारकौदनविशेष्यकेच्छाया दशायामपि यदि 'ओदनं बुभुक्षते' इति प्रयोगो भवति तदा सन्प्रकृतिभूतधात्वर्थे भोजनादौ कर्मताख्यविशेष्यताया असत्त्वेऽप्युद्देश्यताख्यविशेष्यतारूपाया विषयतायाः संभवेन तस्य=' ओदनं बुभुक्षते' इति प्रयोगस्य निर्वाहो विज्ञेयःभोजनप्रकारकौदनविशेष्यकेच्छाया भोजनोद्देश्यकौदनविशेष्यकेच्छा-रूपत्वात् भोजनमुद्दिश्योदनस्येष्यमाणत्वात् धात्वर्थभोजने उद्देश्यताख्यविषयताया भासमानत्वादित्यर्थः।

न च धात्वर्थविशेष्यकेच्छायाः सन्प्रत्ययार्थत्वे 'पाकं चिकीर्षति' 'ओदनं बुभुक्षते' इत्यादौ पाकौदनादेर्द्वितीयया कृतिभोजनादिकर्मत्वप्रत्यायनसंभवेऽपि 'पाकश्चिकीर्ष्यते' 'ओदनो बुभुक्ष्यते' इत्यादौ कर्माख्यातेन तत्प्रत्यायनासंभवः– तत्प्रकृतिभूतसन्नन्तधात्वर्थकृतिभोजनेच्छाकर्मत्वस्यैव तत्प्रत्यायनयोग्यत्वात्, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वाद् इच्छाविषयत्वविशेषितकृतिभोजनादेश्च प्रकृत्याऽप्रतिपादनादिति वाच्यम्, कर्तृप्रत्ययस्थले सन्प्रत्ययार्थेच्छाया धात्वर्थविशेष्यतया भानेऽपि कर्मप्रत्ययस्थले तस्या धात्वर्थविशेषणतया भानोपगमात् 'चिकीर्ष्यते पाकः' इत्यादाविच्छा–

ननु सनः स्वप्रकृतिभूतधात्वर्थभोजनादिविशेष्यके(भोजनादिविषयके)च्छावाचकत्वमते 'पाकं चिकीर्षति' इत्यत्र पाकस्य करोत्यर्थकृतिकर्मत्वप्रत्यायनं द्वितीयया संभवति– द्वितीयायाः कर्मत्ववाचकत्वात् 'ओदनं बुभुक्षते' इत्यत्र चौदनस्य भोजनकर्मत्वप्रत्यायनं द्वितीयया संभवति यद्यपि तथापि 'पाकश्चिकीर्ष्यते' 'ओदनो बुभुक्ष्यते' इत्यादिकर्माख्यातस्थले तु पाकौदनादेः कर्माख्यातेन कृत्याद्यर्थकृतिभोजनादिकर्मत्वप्रत्यायनं न संभवति– कर्माख्यातप्रकृतिभूतो यः सन्नन्तधातुस्तदर्थभूता या कृतीच्छा भोजनेच्छा च तादृशकृतिभोजनादीच्छानिरूपितकर्मत्वस्यैव पाकौदनादौ तत्=तेन कर्माख्यातेन प्रत्यायनयोग्यत्वात्=प्रत्यायनसंभवात्, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेनात्रापि कर्माख्यातस्य प्रकृत्यर्थभूता या कृतिभोजनादीच्छा तदन्वितकर्मत्वबोधकत्वसंभवात् (पाकौदनादेः कृतिभोजनेच्छाकर्मत्वमेव प्राप्तं न तु कृतिभोजनादिकर्मत्वम्) प्रकृत्या=कर्माख्यातप्रकृतिभूतसन्नतधातुना च कृतिभोजनादीच्छैव प्रतिपादयितुं शक्यते– प्रकृतावपि सन्प्रत्ययभागार्थेच्छाया एव प्रधानत्वात् न तु इच्छाविषयत्वविशिष्टं कृतिभोजनादिकं येन कृतिभोजनादिकर्मत्वं कर्माख्यातेन पाकौदनादौ प्रतिपादयितुं शक्येतेत्यर्थः, यदि 'पाकचिकीर्ष्यते' 'ओदनं बुभुक्ष्यते' इत्यादौ कर्माख्यातप्रकृतिभूतसन्नतधातुना इच्छाविषयत्वविशिष्टकृतिभोजनादिकं प्रतिपाद्येत तदा कृतिभोजनादेरेव प्रकृत्यर्थत्वेन कृतिभोजनादिकर्मत्वं कर्माख्यातेन पाकौदनादौ

विशेषितकृत्यादेरेव सन्नन्तेन प्रतिपादनात् तादृशकृत्यादि-कर्मताया आत्मनेपदादिना प्रत्यायनसंभवात्। आख्यातादुपस्थितवर्तमानत्वादेश्च कृत्यादिविषयकेच्छा यत्र प्रकृत्यर्थो यत्र वेच्छाविषयकृतिस्तत्रोभयत्रैवेच्छायामन्वयः, प्रकृत्यर्थैकदेशेऽपि 'नीलतरो घटः' इत्यादिस्थले नीलरूपादौ तरबाद्यर्थातिशयान्वयानुरोधात्।

प्रतिपादयितुं शक्येतापि न चैवमस्ति कृतिभोजनादीच्छाया एव प्रकृत्यर्थत्वात् तादृशकृतिभोजनादीच्छाकर्मत्वमेव पाकौदनादौ प्रतिपादयितुं शक्यते न कृतिभोजनादिकर्मत्वं कृतिभोजनादेः प्रकृत्यर्थत्वाभावात् प्रत्ययानां च प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमादिति भाव इत्येवमाशङ्क्याह– न चेति। परिहारमाह– कर्तृप्रत्ययेति, 'पाकं चिकीर्षति' इत्यादिकर्तृप्रत्ययस्थले पाकादिकर्मककृत्यादिविषयकेच्छाश्रयः इत्याकारकबोधोदयात् सन्प्रत्ययार्थेच्छायाः सन्प्रकृतिभूतधात्वर्थविशेष्यतया भानेऽपि (तत्रेच्छाविषयत्वं धात्वर्थकृत्यादेरेव कृत्यादिकर्मत्वं च पाकादेर्द्वितीयया प्रत्याय्यते) 'पाकश्चिकीर्ष्यते' इत्यादिकर्मप्रत्ययस्थले तु तस्याः=सन्नर्थेच्छायाः सन्प्रकृतिभूतधात्वर्थविशेषणतयैव भानं स्वीक्रियते इच्छाविषयीभूतकृतिविषयः पाक इत्याकारकबोधोदयात् तथा चात्रेच्छाया विशेषणत्वेनेच्छाविशेषितकृतिभोजनादिकमेव कर्माख्यातप्रकृतिभूतसन्नन्तधातुना प्रतिपाद्यते इति कृतिभोजनादेरेव प्रकृत्यर्थत्वात् तादृशकृतिभोजनादिकर्मत्वं पाकौदनादावात्मनेपदेन=कर्माख्यातेन प्रतिपादयितुं शक्यते एव, एवं च प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमस्यापि न भङ्गः इत्यर्थः। नन्वाख्यातोपस्थितवर्तमानत्वस्य कुत्रान्वय इत्याशङ्क्याह–आख्यातेति, सन्नन्तधातोराख्यातस्य प्राप्तत्वेन सन्नन्तस्यैव प्रकृतित्वमितीच्छायाः प्रकृत्यर्थत्वं तथा च यत्र='पाकं चिकीर्षति' इत्यादाविच्छाया धात्वर्थविशेष्यत्वेन करोत्यर्थकृत्यादिविषयकेच्छा प्रकृत्यर्थस्तथा यत्र='पाकश्चिकीर्ष्यते' इत्यादिकर्माख्यातस्थले इच्छाया सन्प्रकृतिभूतधात्वर्थविशेषणत्वेनेच्छाविषयकृत्यादिः प्रकृत्यर्थस्तत्रोभयत्रैवाख्यातोपस्थितवर्तमानत्वादेरिच्छायामेवान्वयो न तु धात्वर्थकृत्यादौ वा पाकादौ वेत्यर्थस्तथा च 'चिकीर्षति' इत्यत्र कृतिविषयकवर्तमानेच्छाश्रयश्चैत्र इति बोधः, 'चिकीर्ष्यते' इत्यत्र वर्तमानेच्छाविषयीभूतकृतिविषयः पाक इति

न चैवं कर्मप्रत्ययस्थलेऽपि कृतिविशेषितैवेच्छा सना प्रत्याय्यतां विशेषणीभवन्ती कृतिरेव कर्मत्वेनाऽन्वीयताम्, भवन्मते विशेषणीभूतेच्छायां वर्तमानत्वाद्यपराख्यातार्थान्वयवदिति वाच्यम्, एकत्र विशेषणतयोपस्थितस्यान्यत्र विशेषणतयान्वयोऽव्युत्पन्न इति प्रथमान्तार्थविशेषणकर्मत्वे

बोधः। ननु कर्माख्यातस्थले सन्नन्तधात्वर्थस्यैकदेशभूतायामिच्छायां वर्तमानत्वादेः कथमन्वयः स्यात्–"पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति नियमादित्याशङ्क्याह–प्रकृत्यर्थेति, यथा 'नीलतरो घटः' इत्यत्र तरप्प्रत्ययार्थस्यातिशयस्य पदार्थैकदेशे नीले एवान्वयो भवति तथात्रापि ज्ञेयमित्यर्थः। अत्र सन्प्रत्ययार्थेच्छायाः प्रकृतिभूतधात्वर्थविशेष्यकत्वं प्रतिज्ञाय धात्वर्थविशेष्यतया भानस्वीकारे पूर्वापरविरोधो नाशङ्कनीयः–'चिकीर्षति' इत्यादौ कृत्यादिविषयकेच्छा सन्प्रत्ययार्थोऽस्ति सा चेच्छात्र धात्वर्थकृतेर्विशेष्यभूतास्ति अथ च तादृशेच्छायां विशेष्यतया (विषयतया) धात्वर्थकृतेरेव भानं भवति न तु पाकादेरिति धात्वर्थविशेष्यकाप्यस्तीति धात्वर्थविशेष्यकत्वार्थविशेष्यत्वयोः पदयोरनतिरिक्तार्थकत्वात्।

ननु कर्तृप्रत्ययस्थले इव कर्मप्रत्ययस्थलेऽपि कृतिविशेषितैवेच्छायाः= धात्वर्थविशेष्यतयैवेच्छायाः सना भानं स्वीक्रियतां न तु करोत्यादिधात्वर्थविशेषणतया तथा च यथा तव मते 'पाकश्चिकीर्ष्यते' इत्यादिकर्मप्रत्ययस्थले धात्वर्थे विशेषणीभूतायामपीच्छायामाख्यातप्रत्ययार्थस्य वर्तमानत्वस्यान्वयो भवति तथेच्छाविशेषणीभूतकृतेरेव प्रथमान्तार्थविशेषणीभूताख्यातार्थकर्मत्वेऽन्वयो भविष्यति, एवं चेच्छाया विशेष्यत्वप्राप्त्या विशेष्यभूतायामिच्छायामाख्यातार्थवर्तमानत्वस्यान्वयोपि युक्त एव स्यादित्याशङ्क्याह–न चेति। परिहारमाह–एकत्रेति, "एकत्र विशेषणतयोपस्थितस्यान्यत्र विशेषणतयान्वयोऽव्युत्पन्नः" इति नियमात् कर्मप्रत्ययस्थले इच्छाया धात्वर्थविशेष्यत्वस्वीकारे तादृशेच्छायां विशेषणीभूतस्य धात्वर्थस्य=कृतेः प्रथमान्तार्थे पाकादौ विशेषणीभूतकर्मत्वे विशेषणतयाऽन्वयो न संभवति, धात्वर्थकृतेः कर्माख्यातार्थभूतकर्मत्वे विशेष्यतयाप्यन्वयो न संभवति–कर्मत्वे विशेष्यतया (विशेष्यतारूपेण) प्रथमान्तार्थान्वयस्यैव प्रसक्तत्वात् तस्माद् कर्मप्रत्ययस्थले इच्छाया धात्वर्थविशेषणत्वमेव स्वीकार्यं धात्वर्थविशेषणीभूताया अपीच्छायाः प्रत्ययार्थत्वेन

इच्छायां विशेषणतयोपस्थितस्य धात्वर्थस्य विशेषणतयाऽन्वयायोगात्, विशेष्यतया चान्वयस्याप्रसक्तत्वात्। धात्वर्थविशेषणतया इच्छाभानेऽपि तस्या वर्तमानत्वादिविशेष्यतयैव भानेनोक्तव्युत्पत्तिविरोधविरहात्।

एवं धात्वर्थस्येतरविशेषणतयोपस्थितस्य स्वातन्त्र्येण कर्मतादिविशेषणत्वमयुक्ततममेव। प्रकृत्यर्थस्यैकदेशेऽपि प्रकृत्यर्थान्तर्गततया भासमाने एव प्रत्ययार्थान्वयदर्शनात्, न

प्राधान्याद् वर्तमानत्वादौ विशेष्यतयैवान्वयो भवति न तु विशेषणतयेति उक्तव्युत्पत्तेः="एकत्र विशेषणतयोपस्थितस्यान्यत्र विशेषणतयान्वयोऽव्युत्पन्नः" इति व्युत्पत्तेरपि विरोधो नास्त्येव–धात्वर्थे विशेषणीभूतेच्छाया वर्तमानत्वे विशेष्यतयैवान्वयस्वीकारात्। तस्याः=इच्छायाः। कृतिश्चात्र कर्मप्रत्ययस्थले इच्छायां न विशेषणं किं त्विच्छाविशेष्यमेवेतीच्छायां विशेष्यत्वेनान्विताया: कृतेः प्रथमान्तार्थविशेषणीभूतकर्माख्यातार्थकर्मत्वे विशेषणत्वेनान्वयोपि न विरुद्ध इत्यर्थः।

उपसंहरति–एवमिति, "एवम्" इत्यत्र 'एवं च' इति पाठो युक्तः। तथा च यदि कर्मप्रत्ययस्थले इच्छाया धात्वर्थविशेष्यत्वं स्यात्तदा इतरविशेषणतया=इच्छाविशेषणतया उपस्थितस्य धात्वर्थस्य=करोत्याद्यर्थस्य कृत्यादेः स्वातन्त्र्येणाख्यातार्थकर्मत्वे विशेषणत्वमयुक्तमेव–"एकत्र विशेषणतया" इति व्युत्पत्तिविरोधात्। प्रकृत्यर्थैकदेशेऽपि प्रत्ययार्थान्वयस्तत्र भवति यत्र प्रकृत्यर्थैकदेशस्य प्रकृत्यर्थान्तर्गततया भानं भवति न तु स्वातन्त्र्येण भासमाने यथा 'नीलतरो घटः' इत्यत्र तरप्प्रत्ययप्रकृतिभूतनीलपदस्यापि नीलत्वेन रूपेण घटवाचकत्वात् प्रकृत्यर्थभूतो यो घटस्तदन्तर्गततयैव नीलरूपस्य भानं भवतीति प्रकृत्यर्थैकदेशेऽपि तादृशनीलरूपे तरत्प्रत्ययार्थस्यातिशयस्याऽन्वयो भवति तथा चात्र प्रत्ययार्थकर्मत्वस्यापि धात्वर्थकृतौ विशेषणतयान्वयो न संभवति–'चिकीर्ष्यते' इत्यत्र कृतेः प्रकृत्यर्थैकदेशत्वेपि स्वातन्त्र्येण भासमानत्वादित्याह–प्रकृत्यर्थस्येति। इच्छाया धात्वर्थविशेष्यत्वस्वीकारे कृतिविशिष्टेच्छाया एवाख्यातप्रकृत्यर्थत्वेन कृतेः प्रकृत्यर्थैकदेशत्वं ज्ञेयम्। एकत्र विशेषणतयोपस्थितस्याप्यन्यत्र धर्मिपारतन्त्र्येण विशेषणतयान्वयो भवति

तु स्वातन्त्र्येण भासमाने। इच्छारूपविशेष्यपारतन्त्र्येण कर्मत्वान्वयोऽपि इच्छायाः कर्मत्वानन्वये दुर्घटः—विशेष्यान्वयिन्येव विशेषणस्य पारतन्त्र्येणान्वयस्य विशिष्टान्वयस्थले व्युत्पत्तिसिद्धत्वाद् न तु विशेष्यानन्वयिनि।

अथास्तु विषयतारूपकर्मत्वे 'चिकीर्ष्यते पाकः' इत्यादाविच्छायास्तत्परतन्त्रकृतेश्चान्वयः— उभयत्रैव पाकादेर्विषयत्वात्, स्थित्यादिकर्मत्वाऽप्रसिद्ध्या च 'गृहं तिष्ठास्यते'

तदप्यत्र न संभवति—कृतिविशेष्यभूताया इच्छायाः कर्मत्वेऽन्वयाभावेनेच्छाद्वारापीच्छाविशेषणीभूतकृतेः कर्मत्वेऽन्वयासंभवादित्याह—इच्छारूपेति। अत्र नियामकमाह—विशेष्यान्वयिन्येवेति, विशिष्टान्वयस्थले=यत्र विशेषणविशिष्टस्यैव विशेष्यस्य क्वचिदन्वयो भवति तत्र (यत्र विशेषणस्य धर्मिपारतन्त्र्येणान्वयो भवति तत्र) विशेष्यान्वयिन्येव विशेष्यपारतन्त्र्येण विशेषणस्यान्वयो व्युत्पत्तिसिद्धोऽस्ति न तु विशेष्यानन्वयिन्यपि, विशेष्यानन्वयिनि विशेष्यद्वारा विशेषणान्वयासंभवादित्यर्थः। पाकादिनिष्ठं कर्मत्वं हि करोत्याद्यर्थकृत्यादिमात्रनिरूपितमस्ति न तु सन्नर्थेच्छानिरूपितमिति तादृशकर्मत्वे इच्छाया अन्वयासंभवादिच्छाद्वारापि कृत्यन्वयो न संभवतीत्यर्थः।

ननु 'पाकश्चिकीर्ष्यते' इत्यत्र पाकनिष्ठं यत् कर्माख्यातार्थभूतं कर्मत्वं तद् विषयतारूपमेव पाकस्य चोभयत्रैव=कृताविच्छायां च विषयत्वात् कर्मत्वे इच्छाया अन्वयो युक्त एव तथा चेच्छाद्वारा इच्छान्वयिनि कर्मत्वं कृतेरप्यन्वयस्य नानुपपत्तिरित्याशङ्कते—अथेति। नन्वेवमिच्छाद्वारा धात्वर्थस्थितेर्गृहनिष्ठकर्मत्वेऽन्वयापत्त्या 'गृहं तिष्ठास्यते' इत्यपि प्रयोगः। स्यादित्याशङ्क्याह— स्थित्यादिति, कृत्यादीनां सकर्मत्वात् पाकादिनिष्ठकर्मत्वेऽन्वयः संभवति स्थितेश्चाऽकर्मकत्वेन गृहादिनिष्ठकर्मत्वेऽन्वयासंभवात् 'गृहं तिष्ठास्यते' इत्यादि प्रयोगस्यापत्तिर्नास्ति तथा च कर्मप्रत्ययस्थलेऽपि सन्नर्थेच्छाया धात्वर्थकृत्यादिविशेष्यत्वमेव स्वीकार्यं न तु धात्वर्थविशेषणमित्यर्थः। परिहारमाह— ओदन इति, 'पाकश्चिकीर्ष्यते' इत्यत्र कृतिकर्मत्वमिच्छाकर्मत्वं च विषयतारूपत्वादेकस्वरूपमेवेति तत्रेच्छाकृत्योरुभयोरप्यन्वयसंभवनेच्छाद्वारा इच्छाविशेषणीभूतकृतेरप्यन्वयः संभवति, 'ओदनो बुभुक्ष्यते' इत्यत्रेच्छाकर्मत्वं

इत्यादेरप्रसङ्गादिति चेत्?, 'ओदनो बुभुक्ष्यते' इत्यादौ का गतिः?– तत्रेच्छाकर्मताया विषयतारूपत्वाद् भोजनादि-कर्मतायाश्च तदन्यत्वात्, विशेष्यीभवदिच्छान्वयिनि कर्मत्वे भोजनाद्यन्वयायोग्यत्वेन विशिष्टान्वयासंभवात्।

वस्तुतः 'पाकश्चिकीर्ष्यते' इत्यत्राप्यगतिरेव कृत्य-विशेषणतया पाकनिष्ठेच्छाविषयतायाः कृतिविशेषणतया तन्निष्ठकृतिविषयताया भिन्नतया इच्छान्वयिनो विषयत्वरूप-कर्मत्वस्य कृत्यऽन्वयायोग्यत्वात्।

तु विषयतारूपमस्ति भोजनकर्मत्वं च तदन्यत्=गलाधस्संयोगरूपमेवास्ति न तु विषयतारूपम्– असंभवादिति विशेष्यभूतेच्छान्वयिनि कर्मत्वे=विषयता-रूपकर्मत्वे धात्वर्थस्य भोजनस्यान्वयो न संभवति भोजनस्य गलाधस्संयोग-रूपकर्मत्वे एवान्वयसंभवादिति विषयतारूपे इच्छाकर्मत्वे विशिष्टस्य= भोजनविशिष्टेच्छाया अन्वयासंभवात् 'ओदनो बुभुक्ष्यते' इत्यत्रागतिरेव स्यात्, तथा चात्र सन्नर्थेच्छाया धात्वर्थविशेषणत्वमेव स्वीकार्यं तथा च धात्वर्थस्य भोजनस्य विशेष्यत्वमेव स्यात् विशेष्यभूतस्य तु भोजनस्य स्वातन्त्र्येणा-प्योदननिष्ठे आख्यातार्थभूते कर्मत्वेऽन्वय संभवत्येवेति कर्माख्यातस्थले इच्छाया धात्वर्थविशेषणत्वमेवेत्यर्थः।

संन्नर्थेच्छायाः कर्माख्यातस्थलेऽपि धात्वर्थकृत्यादिविशेष्यत्वस्वीकारे यथा भोजनस्येच्छाविशेषणत्वे ह्युक्तरीत्या कर्मत्वेऽन्वयो न संभवति तथा 'पाकश्चिकीर्ष्यते' इत्यत्रापीच्छाविशेषणीभूतकृतेः कर्मत्वेऽन्वयो न संभवती-त्याह–वस्तुत इति, यद्यपि पाके इच्छाविषयताप्यस्ति धात्वर्थकृतिविषयताप्यस्ति तथापि पाकनिष्ठा या इच्छाविषयता सा इच्छायामेव विशेषणं भवति न तु कृतौ विशेषणं तन्निष्ठा=पाकनिष्ठा कृतिविषयता च कृतौ विशेषणं भवति न त्विच्छायामिति कृतौ विशेषणत्वाऽविशेषणत्वाभ्यां विषयतयोः परस्परं भिन्नतया इच्छान्वयिनः कृत्यऽविशेषणीभूतस्य विषयत्वरूपकर्मत्वस्य कृतावन्वयो न संभवति किं वा कृतिप्रतियोगिकान्वयायोग्यत्वात् (इच्छान्वयि कर्मत्वे कृतेरन्वयो न संभवति) इति 'पाकश्चिकीर्ष्यते' इत्यत्राप्यगतिरेवेत्यर्थः। तस्मात् कर्माख्यातस्थले इच्छाया धात्वर्थविशेषणत्वमेव स्वीकार्यं तथा च

यदि च विशेष्यान्वयिव्यक्तावेव तत्पारतन्त्र्येण विशेषणान्वय इति न नियमः, अपि तु तदन्वयितावच्छेदकावच्छिन्ने एवेति तथा च विषयतात्वावच्छिन्नस्योभयान्वययोग्यतया न प्रकृतेप्यन्वयानुपपत्तिः, अत एव "अरुणया" इत्यादावाऽऽरुण्यनिरूपितसाध्यताया गोनिरूपितसाध्यताभिन्नत्वेऽपि न तृतीयार्थे विशिष्टान्वयानुपपत्तिः, तत्र परम्परया विशेष्यान्वयिसोमक्रयव्यक्तेः परम्परया विशेषणान्वयि-

विशेष्यभूतस्य कृतिरूपधात्वर्थस्य पाकनिष्ठकर्मत्वे स्वातन्त्र्येणान्वयसंभवान्न काचिदनुपपत्तिः स्यादिति शेषः। "तन्निष्ठकृतिविषयतायाः" इति पञ्चम्यन्तम्।

ननु विशेष्यविशेषणस्य विशेष्यपारतन्त्र्येन योन्वयो भवति स विशेष्यान्वयितद्व्यक्तावेव भवतीति नियमो नास्ति किं तु तदन्वयितावच्छेदकावच्छिन्ने=विशेष्यान्वयितावच्छेदकावच्छिन्ने एव भवति न तु विशेष्यान्वयितावच्छेदकानवच्छिन्नेऽपीत्ययमेव नियमस्तथा च 'पाकश्चिकीर्ष्यते' इत्यत्र पाकनिष्ठेच्छाविषयतायाः पाकनिष्ठकृतिविषयतायाश्चोक्तरीत्या परस्परं भिन्नत्वेऽप्युभयोरपि विषयतयोरन्वयितावच्छेदकेन विषयतात्वेनावच्छिन्नत्वं त्वऽस्त्येवेति विषयतात्वावच्छिन्नाया विषयतायाविषयतात्वेन रूपेणोभयान्वययोग्यतया=इच्छाकृत्युभयान्वययोग्यतया विषयतात्वावच्छिन्ने पाकनिष्ठे इच्छायाः कृतेश्च धात्वर्थस्याऽन्वयसंभवान्न काचिदनुपपत्तिः। एवम् 'ओदनो बुभुक्ष्यते' इत्यत्राप्योदननिष्ठाया इच्छाविषयतायाभोजनविषयतायाश्चोक्तरीत्या भोजने विशेषणत्वाविशेषणत्वाभ्यां च भिन्नत्वेऽपि विषयतात्वावच्छिन्नाया विषयतायाविषयतात्वेन रूपेणैक्यादिच्छाभोजनोभयान्वययोग्यत्वाच्च तादृशविषयतात्वावच्छिन्नायामिच्छाया भोजनस्य चान्वयसंभवान्न काचिदनुपपत्तिः। अत एव=यतो विशेष्यान्वयितावच्छेदकावच्छिन्ने एव विशेष्यपारतन्त्र्येण तद्विशेषणस्यान्वयः स्वीक्रियते अत एव "अरुणया पिङ्गाक्ष्यैकहायन्या (गवा) सोमं क्रीणाति" इति श्रुतावाऽऽरुण्यनिरूपितसाध्यताया गोनिरूपितासाध्यतायाश्च (क्रयनिष्ठायाः) परस्परं भिन्नत्वेऽपि (गोः साक्षात्क्रयहेतुत्वाद् आरुण्यस्य च गोपरिच्छेदकत्वेन गोद्वारा क्रयहेतुत्वात्) विशेष्यान्वयितावच्छेदकावच्छिन्ने=साध्यतात्वावच्छिन्ने साध्यतात्वरूपेण

व्यक्त्यभेदवत् प्रकृतेऽपि परम्परयोभयान्वयिकर्मव्यक्त्यभेदोऽक्षत एवेत्युच्यते?, तदा 'भोजनकृतिर्भवतु' 'पाकश्च भवतु' इति समूहालम्बनेच्छामादाय 'पाकश्चिचकीर्ष्यते' इति प्रयोगस्य कालान्तरीयकृतिविषयतामादाय दुर्वारतैव।

विषयितासंबन्धेनेच्छाविशेषणीभवत्कृतिव्यक्तिकर्मत्वस्यैव तदिच्छान्वयिनि कर्मण्यऽन्वयान्नायमतिप्रसंग इति चेत्?, तथापि

साध्यतारूपे तृतीयार्थे विशिष्टान्वयस्य–आरुण्यविशिष्टाया गोः किं वा गोद्वाराऽऽरुण्यस्य (गवारुण्ययोरुभयोः) अन्वयानुपपत्तिर्नास्ति–उभयोरपि साध्यतयोः साध्यतात्वावच्छिन्नत्वात् साध्यतात्वेन रूपेणैक्याच्च, तत्र गोः साध्यतायां साध्यतायाः सोमक्रयेऽन्वयः, आरुण्यस्य च गवि गोः सोमक्रयेऽन्वयः किं वाऽऽरुण्यस्य परिच्छेदे परिच्छेदस्य गवि गोः साध्यतायां साध्यतायाः सोमक्रयेऽन्वय इत्येवं परम्परयाऽन्वये सत्यपि विशेष्यान्वयि= गवान्वयि सोमक्रयव्यक्तेः विशेषणान्वयि= आरुण्यान्वयिसोमक्रयव्यक्तेश्चा-भेदवत् प्रकृते='पाकश्चिचकीर्ष्यते' इत्यत्रापि कृतेः स्वनिरूपितविषयतायां तस्याश्च पाकेऽन्वय इच्छायाश्च स्वनिरूपितविषयतायां तस्या अपि पाके एवाश्रयतासंबन्धेनान्वय इत्येवं परम्परासंबन्धेनेच्छाकृत्युभयान्वयिकर्मव्यक्तेः= पाकव्यक्तेरभेदोऽस्त्येवेति तत्रेच्छायास्तत्परतन्त्रकृतेश्चान्वयसंभवान्न काचिदनुपपत्तिरित्याशयेनाशङ्कते यदि चेति। शिष्टम् "अथास्तु" इत्यत्र ज्ञेयम्। परिहारमाह–तदेति, यदि परम्परयोभयान्वयिपाकव्यक्तेरेकत्वमुच्यते तदा 'भोजनकृतिर्भवतु' 'पाकश्च भवतु' इति समूहालम्बनज्ञाने कृतिविषयत्वं भोजनेऽस्ति पाके तु केवलमिच्छाविषयत्वमेवास्ति अथापि कालान्तरीय-पाकविषयककृतिविषयतामादाय तादृशकालान्तरीयकृतेर्विषये वर्तमानेच्छायाः विषये च पाके कयाचित्परम्परया कृतीच्छयोरुभयोरप्यन्वयसंभवेनोक्तसमूहा-लम्बनेच्छादशायामपि 'पाकश्चिचकीर्ष्यते' इति प्रयोगापत्तिः स्यादेव न चैतदिष्टम्– कृतीच्छयोरुभयोरपि पाकविषयकयोर्वर्तमानतादशायामेव 'पाकश्चिचकीर्ष्यते' इति प्रयोगस्येष्टत्वादित्यर्थः।

ननु 'पाकश्चिचकीर्ष्यते' इत्यत्रेच्छाया धात्वर्थविशेष्यत्वमते विषयिता-संबन्धेनेच्छायां विशेषणीभूता या कृतिस्तादृशकृतिकर्मत्वस्यैव तदिच्छान्वयिनि=

तदिच्छाकाले 'पाक इदानीं न चिकीर्ष्यते' इति प्रयोगानुपपत्तिः— अन्वयितावच्छेदककृतिविषयतात्वकृतिगोचरवर्तमानेच्छा-विषयतात्वावच्छिन्नाभावयोस्तदा पाकेऽसत्त्वात्।

कृतीच्छान्वयिनि कर्मणि=पाकेऽन्वय इष्टोऽस्ति न त्विच्छायामविशेषणी-भूतकृतिकर्मत्वस्यापि तथा च कृतेरवर्तमानत्वे ह्यवर्तमानकृतेर्वर्तमानेच्छायां विषयितासंबन्धेन विशेषणत्वासंभवादेवोक्तसमूहालम्बनेच्छादशायां पाकविषयक-कृत्यभावे 'पाकश्चिकीर्ष्यते' इति प्रयोगस्यापत्तिर्नास्ति, वर्तमानैव च कृतिर्वर्तमानेच्छायां विशेषणं स्यादिति पाकविषयकयोः कृतीच्छयोर्वर्तमानत्वे तु 'पाकश्चिकीर्ष्यते' इति प्रयोग इष्ट एवेत्याशङ्कते— विषयितेति। अत्रापि दोषमुद्घाटयति— तथापीति, तदिच्छाफले=उक्तसमूहालम्बनेच्छादशायां पाकविषयकेच्छायाः सत्त्वेऽपि पाकविषयककृतेरसत्त्वात् 'पाक इदानीं न चिकीर्ष्यते' इतीष्टोऽपि प्रयोगो नोपपद्येत— 'पाक इदानीं न चिकीर्ष्यते' इत्यत्र पाकेऽन्वयितावच्छेदकं यत् कृतिविषयतात्वं तदवच्छिन्नप्रतियोगिता-कोऽभावः (कृतिविषयकत्वाभावः) अन्वयितावच्छेदकं यत् कृतिगोचर (कृतिविषयक) वर्तमानेच्छाविषयतात्वं तदवच्छिन्नप्रतियोगिताकश्चाभावः (इच्छाविषयत्वाभावः) बोध्यते उक्तसमूहालम्बनेच्छादशायां च पाकविषयक-कृतेरसत्त्वेन पाके कृतिविषयत्वाभावस्य सत्त्वेऽपीच्छाविषयत्वाभावो नास्त्येव पाकविषयकेच्छायाः सत्त्वादित्युक्तप्रयोगानुपपत्तिरित्यर्थः। अस्मन्मते तु कर्माख्यातस्थले इच्छाया धात्वर्थविशेषणत्वस्वीकारात् 'पाक इदानीं न चिकीर्ष्यते' इति वाक्यस्य पाके इच्छाविषयीभूतकृतिविषयत्वाभावबोधकत्वं स्वीक्रियते उक्तसमूहालम्बनेच्छाकाले च पाके इच्छाविषयत्वसत्त्वेऽपि कृतिविषयत्वस्याऽसत्त्वेनेच्छाविषयीभूतकृतिविषयत्वाभावस्य सत्त्वात् तद्बोध-कस्योक्तप्रयोगस्यानुपपत्तिर्नास्त्येव। त्वया तु कर्माख्यातस्थलेऽपि सन्नर्थेच्छाया धात्वर्थविशेष्यत्वस्वीकारेण 'पाक इदानीं न चिकीर्ष्यते' इति वाक्यस्य पाके कृतिविषयकेच्छाविषयत्वाभावबोधकत्वं वक्तव्यमुक्तसमूहालम्बनेच्छाकाले च पाके इच्छाविषयत्वस्यैव सत्त्वादिच्छाविषयत्वाभावो नास्त्येवेति त्वन्मते प्रयोगानुपपत्तिरस्त्येवेत्यर्थः।

न च वर्तमानकालावच्छिन्नकृतिविषयतात्वावच्छिन्नाभाव एव तत्र प्रतीयते स पाकेऽबाधित इति वाच्यम्, यदाऽतीतेच्छाधीनपाककृतिरपि तत्र वर्तते तदा तादृशाभावस्यापि तत्र बाधात्। पाककृतीच्छायामसत्त्यामुक्तेच्छासत्त्वेऽपि च तथा प्रयोगात्, कृत्यसत्त्वेऽपि पाककृतीच्छासत्त्वे तथाप्रयोगविरहात्,

ननु तत्र='पाक इदानीं न चिकीर्ष्यते' इत्यत्र वर्तमानकालावच्छिन्न-कृतिविषयत्वावच्छिन्न प्रतियोगिताकोऽभावः (वर्तमानकृतिविषयत्वाभावः) एव प्रतीयते स च कृतिविषयत्वाभावः पाके उक्तसमूहालम्बनेच्छादशाया-मबाधितः=अस्त्येव पाकविषयककृतेरभावादित्युक्तसमूहालम्बनेच्छादशायाम् 'पाक इदानीं न चिकीर्ष्यते' इति प्रयोगस्यानुपपत्तिर्नास्तीत्याशङ्क्याह– न चेति। परिहारमा हयदेति, यदा तत्र=उक्तसमूहालम्बनेच्छादशायां वर्तमानेच्छाधीनपाककृतेरसत्त्वेऽप्यतीतेच्छाधीनपाककृतेः संभवादतीतेच्छाधीन-पाककृतिवर्तते (स्यात्) तदा तत्र=पाके तादृशवर्तमानप्रकृतिविषयत्वस्यैव प्राप्त्या तादृशर्वर्तमानकृतिविषयत्वाभावस्य बाधात् 'पाक इदानीं न चिकीर्ष्यते' इति प्रयोगस्यानुपपत्तिस्तदवस्थैवेत्यर्थः। 'पाक इदानीं न चिकीर्ष्यते' इत्यत्र पाके कृतिविषयत्वाभावमात्रबोधे दोषान्तरं प्रदर्शयति–पाककृतीच्छायामिति, उक्तेच्छायाः= उक्तसमूहालम्बनेच्छायाः (पाकेच्छायाः) सत्त्वेऽपि पाककृतीच्छायामसत्यां पाकविषयककृतेरप्यसत्त्वं प्राप्तमिति पाके इच्छाविषयीभूतकृतिविषयत्वाभावबोधकस्य 'पाक इदानीं न चिकीर्ष्यते' इति वाक्यस्य प्रयोगो भवत्येव, यद्यत्र त्वदुक्तरीत्या पाके केवलं कृतिविषयत्वाभावस्यैव बोधः स्यात्तदोक्तरीत्या पाकेऽतीतेच्छा-धीनकृतिविषयत्वस्य संभवादुक्तसमूहालम्बनेच्छाकाले 'पाक इदानीं न चिकीर्ष्यते' इति प्रयोगो न स्यादेवेत्यर्थः। 'पाक इदानीं न चिकीर्ष्यते' इत्यस्य पाके कृतिविषयत्वाभावमात्रबोधकत्वस्वीकारे दोषान्तरं प्रदर्शयति-कृत्यसत्त्वेऽपीति, पाकविषयककृत्यसत्त्वेऽपि पाकविषयककृतिविषयकेच्छा-सत्त्वे तथाप्रयोगविरहात्='पाक इदानीं न चिकीर्ष्यते' इति प्रयोगो न भवति। पाककृतीच्छासत्त्वे पाके इच्छाविषयीभूतकृतिविषयत्वमेव प्राप्तमितीच्छा-विषयीभूतकृतिविषयत्वाभावबोधकस्य 'पाक इदानीं न चिकीर्ष्यते' इति वाक्यस्य प्रयोगापत्तिर्नास्त्येव, यद्यस्य वाक्यस्य पाके कृतिविषयत्वाभाव-

कृतिविषयत्वाभावमात्रबोधस्य तत्राभ्युपगमाऽसंभवाच्चेति कर्मप्रत्ययस्थले इच्छाधात्वर्थविशेषणमेव।

इदं तु तत्त्वम्– कर्मप्रत्ययस्थलेऽपि धात्वर्थविशेष्यतयैवेच्छा सन्प्रत्ययेन प्रत्याय्यते, तत्कर्मत्वमेव कर्माख्यातार्थः, तच्च धात्वर्थकर्मतया तद्विषयत्वम्। 'ओदनकर्मकभोजनं भवतु'

मात्रबोधकत्वं स्यात्तदा पाके वर्तमानेच्छाधीनकृतिविषयत्वसत्त्वेऽपि पाकविषयककृत्यन्तरस्याऽसत्त्वादेव 'पाक इदानीं न चिकीर्ष्यते' इति प्रयोग आपद्येतैव न चैतदिष्टमिति 'पाक इदानीं न चिकीर्ष्यते' इत्यत्र कृतिविषयत्वाभावमात्रबोधस्वीकारो न संभवतीत्याह–कृतिविषयत्वाभावमात्रेति। कर्मप्रत्ययस्थले सन्नर्थेच्छाया धात्वर्थविशेष्यत्वास्वीकारे उक्तदोषवृन्दप्रसङ्गाद धात्वर्थविशेषणत्वमेव युक्तमित्याह–इति कर्मप्रत्ययस्थले इति, तथा च 'पाक इदानीं न चिकीर्ष्यते' इति वाक्यस्य पाके इच्छाविषयीभूतकृतिविषयत्वाभावबोधकत्वादुक्तसमूहालम्बनेच्छादशायां प्रयोगानुपपत्तिरपि नास्ति पाककृतिच्छासत्त्वे प्रयोगापत्तिरपि दर्शितदिशा नास्तीति सर्वं सुस्थमिति भावः। अत्र "यदा" इत्यस्य स्थाने "यदि" इत्यपि पाठ उपलभ्यते।

उक्तरीत्या कर्मप्रत्ययस्थले इच्छाया धात्वर्थविशेष्यत्वं पराकृत्यापि तदेव संस्थापयितुमारभते इदं तु तत्त्वमित्यादीना। तत्कर्मत्वम्=इच्छाकर्मत्वम्। तच्च=इच्छाकर्मत्वं च धात्वर्थकर्मतया=धात्वर्थकर्मत्वेन रूपेण तद्विषयत्वम्=इच्छाविषयत्वं विज्ञेयम्। अनेन हि धात्वर्थकर्मत्ववप्रकारकेच्छाविषयत्वमेवेच्छाकर्मत्वमिति सिद्धम्। तथा च 'ओदनकर्मकभोजनं भवतु' इतीच्छायां सत्यामोदनस्य तथेच्छाविषयतया=भोजनरूपधात्वर्थकर्मत्वेनेच्छाविषयतया तत्कर्मत्वम्=इच्छाकर्मत्वमस्त्येवेति तत्र 'ओदनो बुभुक्ष्यते' इति प्रयोगानुपपत्तिर्नास्ति, एवम् 'पाकविषयककृतिर्भवतु' इतीच्छायां सत्यां पाकस्य तथेच्छाविषयतया=कृतिरूपधात्वर्थकर्मत्वेनेच्छाविषयतया इच्छाकर्मत्वमस्त्येवेति तत्र 'पाकश्चिकीर्ष्यते' इति प्रयोगस्यानुपपत्तिर्नास्ति, धात्वर्थकृतिकर्मपाकविषयकेच्छाविषयत्वाश्रयः पाक इति वा धात्वर्थकर्मत्वप्रकारकेच्छाविषयत्वाश्रयः पाक इति वा शाब्दबोधाकारः। गृहस्थितीच्छायां सत्यां गृहस्येच्छाविषयत्वेऽपि धात्वर्थभूतस्थितिकर्मत्वेनेच्छाविषयत्वं न भवति

'पाकविषयककृतिर्भवतु' इत्यादीच्छायां च पाकौदनादीनां तथेच्छाविषयतया तत्कर्मत्वमक्षतम्। गृहस्थित्यादीच्छायां च गृहादेः स्थित्याधारत्वादिनैव विषयत्वमिति न गृहादेस्तिष्ठा-सादिकर्मत्वम्। अत एव यदोदनव्यक्तिकर्मकभोजनमप्रसिद्धम्, अथ च भोजनकर्मतया तदिष्टं तत्र 'अयमोदनो बुभुक्ष्यते' इत्यादेः, दर्शनादिविषयत्वेन गगनादिगोचरेच्छास्थले च 'गगनं दिदृक्ष्यते' इत्यादेश्च प्रयोगस्य नानुपपत्तिः, न वा ओदनादिरूपकर्ममात्रोपरागेण यत्र भोजनादीच्छा दैववशेन च तद्भोजनादिकं विषादिकर्मकमपि तत्र 'विषं बुभुक्ष्यते' इत्यादयः प्रयोगाः।

ष्ठाधातोरकर्मकत्वात् किं तु स्थित्याधारत्वेनैवेच्छाविषयत्वं भवतीति 'गृहं तिष्ठास्यते गृहं तिष्ठासति' इत्यादिप्रयोगापत्तिरपि नास्ति किं तु 'गृहे तिष्ठास्यते' इत्येव प्रयोगो भवति गृहस्याधारत्वेन सप्तमीप्राप्तेरित्याह—गृहस्थित्यादीच्छायामिति। अत एवेति—यतो धात्वर्थकर्मण इच्छाविषयत्वे सति सन् भवति किं वा यतो धात्वर्थकर्मतया इच्छाविषयत्वमेवेच्छाकर्मत्वमत एव यदोदनव्यक्तिकर्मकं भोजनमप्रसिद्धं स्यात् (तदोदनस्य भोक्तुमशक्यत्वात्) अथ च तदोदनं भोजनकर्मत्वेनेष्टं स्यात् (तदोदनकर्मकभोजनेच्छायाः संभवात्) तत्र=तादृशदशायामपि 'अयमोदनो बुभुक्ष्यते' इति प्रयोगस्यानुपपत्तिर्नास्ति-उक्तोदनस्य भोजनासंभवेऽपि भोजनकर्मत्वेनेच्छाविषयत्वसंभवात् तत्र सनः साधुत्वात्। एवं यद्यपि गगनकर्मकदर्शनमप्रसिद्धमेव तथापि यदि गगनगोचरदर्शनेच्छा स्यात्तदा 'गगनं दिदृक्ष्यते' इति प्रयोगस्यानुपपत्तिर्नास्ति—गगने दर्शनकर्मत्वासंभवेऽपि दर्शनेच्छाविषयत्वस्य संभवाद् दर्शनेच्छाविषयत्वं च दर्शनकर्मत्वेनेच्छाविषयत्वमेवेत्यर्थः। इत्येवमनुपपत्तिं परिहृत्याऽनिष्टापत्तिं परिहरति—न वेति, यत्रौदनादिरूपकर्ममात्रस्योपरागेण=विषयकत्वेन भोजनादीच्छा=ओदनमात्रकर्मकत्वविशिष्टभोजनेच्छा (ओदनमात्रकर्मकभोजनेच्छा न तु विषादिकर्मकभोजनेच्छापि) तादृशभोजनकर्मभूतौदनेऽज्ञातविषस्य सत्त्वाद् दैववशेन तद्भोजनं विषकर्मकमपि जातम् ओदनेन सहाज्ञातविषस्यापि भोजनकर्मत्वप्राप्तेस्तत्र 'विषं बुभुक्ष्यते' इति प्रयोगस्यापत्तिर्नास्ति—विषस्य भोजनकर्मत्वेऽपि भोजनकर्मत्वेनेच्छाविषयत्वाभावात् (विषभोजनेच्छाया

कर्तृप्रत्ययस्थलेऽपि च तादृशविषयतारूपं कर्मत्वमेवेच्छा-विशेषणतया भासते न तु धात्वर्थकर्मत्वम्। धात्वर्थविशेषणतया तत्तत्पदार्थकर्मत्वविशिष्टभोजनादिनिरूपितविषयिताया नियमत इच्छायां भानोपगमेनोक्तस्थले 'विषं बुभुक्षते चैत्रः' इत्यादिप्रयोगवारणेऽपि 'गगनं दिदृक्षते चैत्रः' इत्यादिप्रयोगस्य दुरुपपादत्वात्।

असत्त्वात्) सन्प्रत्ययश्च तत्रैव भवति यत्र सन्प्रकृतिभूतधात्वर्थकर्मण इच्छाविषयत्वमपि स्यादित्यर्थः।

'पाकं चिकीर्षति' 'ओदनं बुभुक्षते चैत्रः' इत्यादिकर्तृप्रत्ययस्थलेऽपि 'पाकनिष्ठतादृशविषयतानिरूपिका या धात्वर्थभूतकृतिभोजनादिप्रकारकेच्छा 'तादृशेच्छाश्रयश्चैत्रः' इत्याकारकशाब्दबोधोदयात् तादृशविषयतारूपम्= सन्प्रकृतिभूतधात्वर्थकर्मत्वेनेच्छाविषयत्वरूपमेवेच्छाकर्मत्वं निरूपकत्व-संबन्धेनेच्छाविशेषणतया भासते न त्विच्छाविषयत्वासमानाधिकरणं केवलं धात्वर्थनिरूपितकर्मत्वमिच्छाविशेषणतया भासते इत्याहकर्तृप्रत्ययेति। विपक्षे बाधकमाह–धात्वर्थविशेषणतयेति, यदि इच्छाविषयत्वासमानाधिकरण-मपि धात्वर्थकर्मत्वमिच्छाविशेषणतया भासेत तदा धात्वर्थविशेषणतया= धात्वर्थविशेषणीभूतं यत् तत्तत्पदार्थकर्मत्वम्=ओदनादिपदार्थकर्मत्वं निरूपकत्वसंबन्धेन तद्विशिष्टं यद् भोजनादिकं तादृशभोजनादिनिरूपित-विषयिताया इच्छायां भानं भवत्येवेति नियमेन विषकर्मकभोजनेच्छायामसत्याम् 'विषं बुभुक्षते' इति प्रयोगापत्तिवारणं यद्यपि संभवति– भोजनेच्छायां विषकर्मत्वविशिष्टभोजनादिनिरूपितविषयिताया भानासम्भवाद् विषभोजनेच्छाया अभावात् तत्पदार्थकर्मत्वविशिष्टभोजनादिनिरूपितविषयिताया इच्छायां भानसंभवे एव सन्प्रत्ययप्राप्तिसंभवात्, तथापि 'गगनं दिदृक्षते चैत्रः' इति प्रयोगस्योपपादनं न संभवति– गगनकर्मत्वविशिष्टदर्शननिरूपितविषयिताया इच्छायां भाना संभवात्– दर्शने गगनकर्मत्ववैशिष्ट्यासंभवात्– गगनस्य दर्शनयोग्यत्वाभावात्, गगने धात्वर्थभूतदर्शनकर्मत्वाभावाद् गगननिष्ठधात्वर्थनिरूपितकर्मत्वस्येच्छा-विशेषणत्वासंभवादित्यर्थः। यदा च धात्वर्थकर्मत्वेनेच्छाविषयत्वरूपमेव कर्मत्वमिच्छाविशेषणं तदा तु 'गगनं दिदृक्षते' इत्यत्र घटादिषु प्रसिद्धं यद् धात्वर्थीभूतदर्शनकर्मत्वं तादृशदर्शनकर्मत्वेनेच्छाविषयत्वं गगनेऽपि सम्भवतीति

इदं तु बोध्यम्– सन्प्रतिपाद्येच्छायां धात्वर्थकृति-भोजनादेः केवलविशेष्यतासंबन्धेन न विशेषणत्वं तथा सति परकर्तृककृतिभोजनादिगोचरेच्छावति 'अयं चिकीर्षति, बुभुक्षते' इति प्रयोगप्रसङ्गात् किं तु विशेष्यतासमानकर्तृकत्वो-भयसंबन्धेनैव। उक्तातिप्रसङ्गवारणायेच्छासमानकर्तृकत्वेऽपि

'गगनं दिदृक्षते' इति प्रयोगोपपत्तिः संभवति– दर्शनकर्मत्वासंभवेऽपि दर्शनकर्मत्वेनेच्छाविषयत्वस्याकाशेऽपि संभवादित्यर्थः।

सन्प्रतिपाद्येच्छायां सन्प्रकृतिभूतधात्वर्थकृतिभोजनादेर्येन संबन्धेनान्वय इष्टस्तत्प्रतिपादयितुमारभते– इदं तु बोध्यमित्यादिना, यदि सन्नर्थेच्छायां धात्वर्थकृतिभोजनादेः केवलविशेष्यतासंबन्धेनान्वयः स्यात् तथा सति=तदा परकर्तृककृतिभोजनादिगोचरेच्छावति=चैत्रकर्तृककृतिभोजनादिविषयकेच्छावति मैत्रे 'अयं (मैत्रः) चिकीर्षति अयं बुभुक्षते' इति प्रयोगापत्तिः स्यादेव– मैत्रनिष्ठेच्छायास्तदा चैत्रकर्तृककृतिभोजनादिविषयकत्वात् चैत्रकर्तृक-कृतिभोजनादिनिरूपितविशेष्यतायाः (विषयितायाः मैत्रनिष्ठेच्छायां सत्त्वात् तादृशविशेष्यतासंबन्धेन चैत्रकर्तृककृतिभोजनादेरपि मैत्रनिष्ठेच्छाया-मप्यऽन्वयित्वेन विशेषणत्वादित्यर्थः। तस्मात् सन्नर्थेच्छायां धात्वर्थकृति-भोजनादेर्विशेष्यता– समानकर्तृकत्वैतदुभयसंबन्धेन विशेषणत्वं भवतीत्याह– किं त्विति, तथा चोक्तस्थले मैत्रनिष्ठेच्छायां चैत्रकर्तृककृतिभोजनादि-निरूपितविशेष्यतायाः सत्त्वेऽपि चैत्रकर्तृककृतिभोजनादिसमानकर्तृकत्वस्या-ऽसत्त्वात्– कृतिभोजनादिकर्तृत्वस्य चैत्रे कृतिभोजनादिविषयकेच्छाकर्तृत्वस्य च मैत्रे सत्त्वादिति, तथा च विशेष्यतासमानकर्तृकत्वैतदुभयसंबन्धेन मैत्रनिष्ठेच्छाया चैत्रकर्तृककृतिभोजनादेर्विशेषणत्वासंभवान्नोक्तस्थले 'अयं चिकीर्षति बुभुक्षते' इत्युक्तप्रयोगापत्तिरस्तीत्यर्थः। ननूक्तातिप्रसङ्गवारणायापि न धात्वर्थकृतिभोजनादीनां सन्नर्थेच्छायां विशेष्यतासमानकर्तृकत्वैतदुभयसंबन्धेन विशेषणत्वं स्वीकार्यं किं तु केवलविशेष्यतासंबन्धेनैव, इच्छासमानकर्तृकत्वस्य तु सन् प्रत्ययवाच्यत्वमेव स्वीकार्यं तादृशस्य सन्वाच्यस्येच्छासमानकर्तृकत्वस्य च क्रियायाम्=धात्वर्थकृतिभोजनादावन्वयः कर्तव्य इति कृत्यादीनां यत्रेच्छासमानकर्तृकत्वं स्यात् तत्रैव सन् भविष्यति उक्तस्थले तु कृत्यादिकर्तृत्वं चैत्रे इच्छाकर्तृत्वं च मैत्रे इति कृत्यादीनामिच्छासमानकर्तृकत्वाभावादुक्तस्थले

सन्प्रत्ययवाच्यतां स्वीकृत्य क्रियायां तदन्वयोपगमो न साधीयान्– इच्छान्तरसमानकर्तृकत्वमादाय दर्शितस्थलेऽति-प्रसङ्गतादवस्थ्यात्। स्वसमानकर्तृकत्वस्य वाच्यत्वे तत्तदिच्छा-रूपस्वपदार्थाननुगमेन व्युत्पत्त्यनुपपत्तिः।

न च समानकर्तृकत्वस्य संबन्धत्वोपगमे तत्र शक्ति-ग्राहकानुशासनविरोधः, यतः– "धातोः कर्मणः समानकर्तृ-

'अयं (मैत्रः) चिकीर्षति' इत्यादिप्रयोगापत्तिर्नास्तीत्याशङ्क्याह– उक्तातिप्रसङ्गेति। परिहारहेतुमाह–इच्छान्तरेति, यद्यप्युक्तस्थले चैत्रकर्तृककृतिभोजनादिविषया या मैत्रनिष्ठेच्छा तादृशेच्छासमानकर्तृकत्वं चैत्रकर्तृककृति भोजनादौ नास्ति इच्छायां मैत्रकर्तृकत्वस्य कृतिभोजनादौ च चैत्रकर्तृकत्वस्य सत्त्वात् तथापि चैत्रनिष्ठां यदीच्छान्तरम् दर्शनादिविषयकेच्छातादृशासमानकर्तृकत्वं तु चैत्रकर्तृककृतिभोजनादावस्त्येवेत्युक्तस्थले कृतिभोजनादाविच्छासमानकर्तृकत्वस्य प्राप्त्या 'अयं चिकीर्षति' इति प्रयोगापत्तिरूपोऽतिप्रसङ्गस्तदवस्थ एव स्यादित्यर्थः। ननु कृतिभोजनादौ धात्वर्थेऽन्वीयमानं यदिच्छासमानकर्तृकत्वं तत्रेच्छा- पदेनेच्छान्तरं न ग्राह्यं किं तु धात्वर्थीभूतकृतिभोजनादिविषयकैवेच्छा ग्राह्या तथा च तादृशेच्छाग्रहणार्थमिच्छापदस्थाने स्वपदं निवेश्य स्व (इच्छा) समानकर्तृकत्वस्य सन्प्रत्ययवाच्यत्वं कृतिभोजनादावन्वयं च वक्ष्यामस्तथा च नेच्छान्तरमादायोक्तातिप्रसङ्गः– स्वपदेन तदिच्छाव्यक्तिमात्रग्रहणाद् उक्तस्थले कृतिभोजनादिविषयकेच्छाकर्तृत्वं चैत्रे नास्ति कृतिभोजनादिकर्तृत्वं च चैत्रे एवेति न 'अयं चिकीर्षति' इति प्रयोगापत्तिरपीत्याशङ्क्याह– स्वसमानेति, एवं हि तत्तदिच्छाव्यक्तिबोधकस्वपदबोध्यस्वपदार्थस्य तत्तदिच्छारूपस्यानुगमाऽसंभवाद् व्युत्पत्त्यनुपपत्तिः=सन्प्रत्ययस्य शक्तिग्रह एव न संभवति, तस्मात् समानकर्तृकत्वमप्युक्तरीत्या संबन्धकोटावेव निवेशनीयं न तु सन्प्रत्ययवाच्यकोटौ तथा चोक्तरीत्या न कोपि दोष इत्यर्थः।

ननु यदि समानकर्तृकत्वमुक्तरीत्या संबन्धकोटौ निवेश्यते तदा शक्तिग्राहकानुशासनविरोधः=सन्विधायकसूत्रेणैव सन्प्रत्ययार्थो निरूप्यते इति तस्यैव शक्तिग्राहकत्वात् तद्विरोधः स्यात्– तेन सूत्रेण समानकर्तृकाद्धातोरिच्छायां सन् विधीयते इति समानकर्तृकत्वस्यापि सन्वाच्यत्वमेव युक्तमित्याशङ्क्याह–

कादिच्छायां वा" इति सन्विधायकसूत्रं सनः समान-कर्तृकत्वार्थकतां न प्रतिपादयति तस्य हि– 'इच्छाकर्मत्वेन तत्समानकर्तृकत्वेन च स्वार्थपराद्धातोरिच्छारूपार्थे सन् भवति' इत्येवार्थः। इच्छाधात्वर्थयोः संसर्गतया समानकर्तृकत्व-विवक्षायामपि समानकर्तृकत्वोपरक्तार्थपरत्वं धातोर्निर्वहतीति इच्छामात्रे शक्तिग्राहकं तत्सूत्रमिति।

सुबन्तोत्तरेच्छार्थविहितक्यच्काम्यजन्तस्य धातोरिच्छार्थ-कतया सन्प्रत्ययान्ताऽविशेषेऽपि सन्नन्तधातुवन्न सकर्मकता–

न चेति। परिहारमाह– यत इति, "धातोः कर्मणः" इति सन्विधायकं सूत्रम् "समानकर्तृकात्" इति पदेन सन्प्रत्ययस्य समानकर्तृकत्ववाचकतां न प्रतिपादयतीत्यर्थः। सन्विधायकोक्तसूत्रस्य स्वयमर्थमाह–तस्येति, 'इच्छाकर्मत्वेन तत्समानकर्तृकत्वेन' इति च प्रकारत्वं तृतीयार्थस्तथा च 'इच्छाकर्मत्वप्रकारक इच्छासमानकर्तृकत्वप्रकारकश्च यः स्वार्थस्तादृशस्वार्थ-पराद्धातोरिच्छारूपार्थे सन् भवति' इत्येव सूत्रार्थः–यस्य कृतिभोजनादिरूप-धात्वर्थस्येच्छाकर्मत्वमपि स्यादिच्छासमानकर्तृकत्वमपि स्यात् तादृशधात्वर्थ-बोधकधातोः सन् भवतीति यावत्, तदुक्तं वृत्तिकारेण–"इति कर्मण इषिणैक-कर्तृकाद्धातोः सन् प्रत्ययो वा स्यादिच्छायाम्" इतीच्छामात्रवाचकत्वं प्राप्तम्। 'चैत्रश्चिकीर्षति' इत्यत्र च धात्वर्थकृतेरिच्छाकर्मत्वमिच्छासमानकर्तृकत्वं चास्तीति सन्प्रत्ययो जातः, इति न समानकर्तृकत्वस्य सन्वाच्यत्वम्, धात्वर्थविशेषणस्य च समानकर्तृकत्वस्य कथं हि सन्वाच्यत्वं स्यात् तस्य (सनः) इच्छावाचकत्वात् समानकर्तृकत्वस्येच्छाविशेषणत्वाभावाच्चेति भावः। ननु यदीच्छायां धात्वर्थस्य समानकर्तृकत्वसम्बन्धेनान्वयो भवति तदा समानकर्तृकत्वस्य संसर्गत्वमेव प्राप्तं न तु धात्वर्थविशेषणत्वं तथा च सन्प्रकृतिभूतधातोः समानकर्तृकत्वविशिष्टस्वार्थबोधकत्वं कथं स्यात् सूत्रोक्तमित्याशङ्क्याह– इच्छाधात्वर्थयोरिति, अंसबद्धपदार्थस्य संसर्गत्वासंभवात् समानकर्तृकत्वस्य संसर्गतया विवक्षायामपि धात्वर्थविशेषणत्वं प्राप्तमेवेति न सूत्रोक्तस्य "समानकर्तृकात्" इति पदस्य विरोध इति तत्सूत्रम्=उक्तसन्-विधायकसूत्रं सन् इच्छामात्रे शक्तिग्राहकं न तु समानकर्तृकत्वेऽपीत्यर्थः।

तदन्तर्गतप्रातिपदिकस्यैवेच्छाकर्मबोधकतयेच्छायाः कर्माकाङ्क्षाविरहात्। न च 'पुत्रीयति' 'पुत्रकाम्यति' इत्यादौ क्यजादिप्रकृत्यर्थपुत्रादेः क्रियात्वाभावेनाऽकर्मकत्वेऽपि 'आत्मनः पाकमिच्छति पाकीयति' इत्यादौ प्रकृत्यर्थपाकादेः सकर्मकतया सन्नन्तसमुदायवद् क्यजाद्यन्तपाकादिसमुदायस्य सकर्मकताया दुर्वारतया 'तण्डुलं पाकीयति' इत्यादिप्रयोगापत्तिरिति वाच्यम्, कृधातुसमानार्थकयतेरिव सन्नन्तसमानार्थकस्य क्यजन्तादेरपि कर्मताबोधकसुप्साकाङ्क्षत्वानुपगमेन तथाप्रयोगाप्रसङ्गात्।

संप्रति नामधातुप्रकरणमारभते– सुबन्तोत्तरेति, 'आत्मनःपुत्रमिच्छति– पुत्रीयति पुत्रकाम्यति' इत्यादौ सुबन्त (द्वितीयान्त) पुत्रपदोत्तरमिच्छार्थे "सुप आत्मनः क्यच्" "काम्यच्च" इति सूत्राभ्यां क्यच्काम्यच्प्रत्ययौ भवतस्तादृशप्रत्ययान्तस्य "सनाद्यन्ता धातवः" इत्यनेन धातुसंज्ञा भवति तदनन्तरमाख्यातप्रत्ययो भवतीति 'पुत्रीयति पुत्रकाम्यति' इत्यादयः प्रयोगा भवन्ति, तत्र क्यच्काम्यच्प्रत्यययोर्यद्यपीच्छार्थकत्वेन सन्प्रत्ययतुल्यत्वात् सकर्मकत्वं स्यात्तथापि तदन्तर्गतस्य=क्यच्काम्यजन्तान्तर्गतस्य पुत्रादिप्रातिपदिकस्यैव क्यजादिप्रत्ययार्थेच्छायाः कर्मपदार्थबोधकतया (क्यजाद्यर्थेच्छां प्रति प्रकृत्यर्थभूतपुत्रादिपदार्थस्यैव कर्मत्वात्) क्यजादिप्रत्ययान्तस्य कर्माकाङ्क्षाया अभावात् सन्नन्तधातुवत् सकर्मकत्वं न भवतीति 'आत्मानं पुत्रीयति' इत्यादिः कर्मपदयुक्तः प्रयोगो न भवति। सन्नन्तस्थले तु सन्प्रत्ययार्थेच्छां प्रति सन्प्रकृतिभूतधात्वर्थस्य कर्मत्वेन सनः कर्माकाङ्क्षाविरहेऽपि प्रकृतिभूतधातोः कर्माकाङ्क्षया 'पाकं चिकीर्षति' इत्येवं सकर्मकः प्रयोगोपि भवत्येवेत्यर्थः। ननु 'पुत्रीयति' इत्यादौ प्रकृतिभूतपुत्रपदस्य सकर्मकत्वाभावेनास्य कर्माकाङ्क्षा– विरहाकर्मकत्वेपि 'आत्मनः पाकमिच्छति– पाकीयति' इत्यादौ पाकपदार्थस्य सकर्मकत्वेन यथा 'पाकं चिकीर्षति' इति सकर्मकप्रयोगो भवति तथेच्छार्थकक्यजादिप्रत्ययस्थलेपि 'तण्डुलं पाकीयति' इत्येवं सकर्मकः प्रयोगो कथं न स्यादित्याशङ्क्याह– न चेति। परिहारमाह– कृधातुसमानेति, यथा यद्यपि यतिधातुः कृधातुसमानार्थक एव तथापि कृञः सकर्मकत्वमस्ति यतेश्च सकर्मकत्वं नास्ति तथैव सन्नन्तसमानार्थकस्यापि क्यजन्तादेः प्रयोगस्य

कृदन्तकर्मत्वविवक्षायां तु षष्ठ्या बाधाद् द्वितीयाया अप्रसक्तिः।

न च धात्ववयवकृद्योगे "कर्तृकर्मणोः कृति" इत्यस्य द्वितीयाबाधकत्वे 'कंसकर्मकवधमाचष्टे कंसं घातयति' इत्यत्र द्वितीया न स्यात् कंसस्याख्यानकर्मत्वायोगेन वधकर्मतयैव तदुत्तरं द्वितीयासमर्थनादिति वाच्यम्, कृदन्तोत्तरयत्राख्यानार्थे णिच् तत्र "प्रकृतिवच्च कारकम्" इत्यनेन कृदन्तकारकस्य ण्यन्त-प्रकृतिप्रतिपाद्यक्रियाकारकतुल्यत्वातिदेशाद् 'राजानं गमयति' 'सूर्यमुद्गमयति' इत्यादौ ण्यन्तधातुयोगे तथा प्रकृत्यर्थक्रियाकर्तुः

धातोर्वा कर्मताबोधकं यत् सुप्=सुबन्तं तण्डुलमित्याद्युक्तपदं तत्साकाङ्क्षत्वा-भावादेव तथा प्रयोगस्य='तण्डुलं पाकीयति' इत्येवं सकर्मकप्रयोगस्य प्रसङ्गः=आपत्तिर्नास्तीत्यर्थः। कृदन्तं यत्पाकादिपदं तत्कर्मत्वविवक्षायामपि तण्डुलादिपदात् षष्ठ्येव संभवति "कर्तृकर्मणो कृति" इत्यनुशासनान्न तु द्वितीया तथा च 'तण्डुलस्य पाकीयति' इति प्रयोगसंभवेपि 'तण्डुलं पाकीयति' इति न संभवतीत्याह कृदन्तेति।

ननु यदि "कर्तृकर्मणोः कृति" इत्यनेन द्वितीयाबाधः स्यात्तदा 'कंसं घातयति' इत्यत्र कंसस्य 'कंसवधमाचष्टे' इत्याख्यानकर्मत्वं तु नास्त्येव वधस्यैवाख्यानकर्मत्वादिति बधकर्मत्वमेव कंसस्य वक्तव्यं तादृशवधकर्मतयैव कंसपदाद् द्वितीयासमर्थनं च कर्तव्यं तत्र वधपदस्य कृदन्तत्वेन तत्कर्मवाचक-कंसपदात् षष्ठ्येव स्यान्न तु द्वितीयेति 'कंसं घातयति' इति प्रयोगो न स्यादित्याशङ्क्याह– न चेति। तदुत्तरम्=कंसपदोत्तरम्। आचष्टे इत्यस्या-ख्यानार्थकत्वं विज्ञेयम्। परिहारमाह– कृदन्तोत्तरमिति, 'कंसवधमाचष्टे–कंसं घातयति' इत्यादौ यत्र कृदन्तबधादिपदोत्तरं णिच्प्रत्ययो भवति तत्र "आख्यानात् कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्" इत्यनुशासनेन चुरादिगणपठितेन कृदन्तकारकस्य 'गमयति' इत्यादिण्यन्तप्रकृति-भूतधातुप्रतिपाद्या या गमनादिक्रिया तादृशक्रियाकारकतुल्यत्वमतिदिश्यते इति यथा 'राजानं गमयति' इत्यादौ ण्यन्तधातुयोगे प्रकृत्यर्थगमनक्रियाकर्तृ राजपदार्थस्य कर्मत्वं भवति तथा 'कंसवधमाचष्टे कंसं घातयति' इत्यादौ कृदन्तवधपदोत्तरणिच्योगेपि कृदन्तवधपदार्थकारकस्य कंसस्य कर्मत्वं

कर्मत्वं तथा कृदन्तोत्तरणिच्योगेऽपीति= आख्येयगत्युद्-गत्यादिकर्तुः कर्मतया तदुत्तरं द्वितीयेति ण्यन्तधातुयोगे यथा प्रकृतेः कर्मणो द्वितीयान्तता तथा णिच्प्रत्ययान्तकृदन्त-कर्मणोऽपीति लाभात् कृदन्तकर्मणः कंसादेर्द्वितीयोपपत्तिः। तथाविवक्षायाम् 'तण्डुलस्य पाकीयति' इति प्रयोग इष्यते एव कारकविभक्त्यर्थस्य वृत्त्येकदेशेनाप्यन्वयस्य व्युत्पन्नत्वात्। संबन्धविवक्षायां च न तथा प्रयोगः।

संभवतीत्यर्थः। तथा च 'राजगतिमाचष्टे राजानं गमयति' 'सूर्योद्गतिं सूर्योदयम् आचष्टे—सूर्यमुद्गमयति' इत्यादावाख्येय (व्याख्येय गत्यादिकर्तृ राजादिपदार्थस्य कर्मत्वेन तदुत्तरम्=राजादिपदोत्तरं द्वितीया भवतीति यथा ण्यन्तधातुयोगे प्रकृतिभूतगम्यादिकर्मणो द्वितीयान्तता भवति तथा णिच्प्रत्ययान्तकृदन्त-वधादिकर्मणोपि द्वितीयान्तता भवतीत्युक्तानुशासनेन लाभादत्र कृदन्तवध-कर्मभूतस्य कंसादेः=कंसार्थप्रतिपादककंसपदाद् द्वितीया युक्तैवेत्यर्थः। स्वोक्तवाक्यं स्वयं व्याचष्टे—आख्येयेत्यादिना। विषयश्चायं विस्पष्टप्रतिपत्त्यर्थं हन्तेर्वधादेशस्तस्य णिचि घातयतीति रूपापत्तिश्चेत्यादिर्व्याकरणशास्त्रे द्रष्टव्यः। तथाविवक्षायाम्=तण्डुलस्य कृदन्तकर्मत्वविवक्षायां तु 'तण्डुलस्य पाकीयति' इति प्रयोगः 'कर्तृकर्मणोः कृति' इत्यनुशासनेनेष्ट एवेत्याह तथाविवक्षायामिति। उक्ते हेतुमाह— कारकेति, किं वा ननु 'तण्डुलस्य पाकीयति' इत्यत्र षष्ठ्यर्थस्य पदार्थस्य वृत्त्येकदेशेन='पाकीयति' इत्याकारकनामधातुवृत्तेरेकदेशेन पाकेनैवान्वयः कर्तव्यः स च न संभवति "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति नियमादित्याशङ्क्याह— कारकेति, 'तण्डुलस्य पाकीयति' इत्यत्र तण्डुलपदोत्तरषष्ठ्याः कर्मत्वार्थकत्वेन कारकविभक्तित्वापत्त्या तादृशकारकविभक्तिभूतषष्ठ्यर्थस्य कर्मत्वस्य वृत्त्येकदेशेनापि पाकादिनाऽन्वयो भवत्येवेति 'तण्डुलस्य पाकीयति' इति प्रयोगस्य नानुपपत्तिरित्यर्थः। संबन्धार्थकषष्ठ्यर्थभूतसंबन्धपदार्थस्य तु वृत्त्येकदेशेनान्वयो न भवतीति षष्ठ्या संबन्धविवक्षायां तथा='तण्डुलस्य पाकीयति' इति प्रयोगो न भवतीत्याह संबन्धविवक्षायां चेति, तादृशसंबन्धषष्ठ्याः कारकविभक्तित्वाभावात् तदर्थस्योक्तरीत्या वृत्त्येकदेशपाकेऽन्वयसंभवादित्यर्थः।

वस्तुतः संबन्धविवक्षायामपि तथा प्रयोग इष्यत एव। न च तत्र वृत्त्येकदेशेन षष्ठ्यर्थान्वये "प्रतियोगिपदादन्यद् यदन्यत् कारकादपि" इति व्युत्पत्तिविरोध इति वाच्यम्, तादृशव्युत्पत्तेरभेदान्वयस्थले एव स्वीकारात्, वृत्त्येकदेशेन भेदान्वये बाधकाभावात्। अत एव 'ऋद्धस्य राजमातङ्गाः' इत्यादिप्रयोगो नेष्यते, इष्यते च 'पितुः स्वर्गकामः' इत्यादिप्रयोगः। न च कारकपदप्रतियोगिपदयोर्भेदनिवेशनमफलमिति वाच्यम्,

---

स्वमतमाह—वस्तुत इति, षष्ठ्यर्थभूतसंबन्धस्यापि विवक्षायां तथा='तण्डुलस्य पाकीयति' इति प्रयोग इष्ट एव—षष्ठ्यर्थकर्मत्वविवक्षायां स्यात् षष्ठ्यर्थसंबन्धविवक्षायां च न स्यादित्यत्र मानाभावादित्यर्थः। ननु तत्र=षष्ठ्यर्थसंबन्धविवक्षायां वृत्त्येकदेशेन पाकेन षष्ठ्यर्थसंबन्धस्यान्वये "प्रतियोगिपदादन्यत्" इति नियमविरोधः स्यादित्याशङ्क्याह—न चेति। प्रतियोगिपदाविति—कारकस्यैव वृत्त्येकदेशेनान्वयः संभवति यथा 'तण्डुलस्य पाकीयति' इत्यत्र षष्ठ्या कर्मत्वादिविवक्षायां कर्मकारकस्य तण्डुलस्य वृत्त्येकदेशेन पाकेन, कारकादन्यस्य तु वृत्त्येकदेशेनान्वयो न संभवतीत्यत्र षष्ठ्या संबन्धविवक्षायां तण्डुलस्य कारकत्वाभावात्तदन्वयो वृत्त्येकदेशे पाके न संभवतीत्यर्थः। परिहारमाह—तादृशेति, "प्रतियोगिपदादन्यत्" इत्यस्य कारकपदार्थादन्यस्य वृत्त्येकदेशेनाऽभेदान्वयो न भवतीत्ययमेवार्थ इति कारकादन्यस्यापि वृत्त्येकदेशेन भेदान्वये बाधकाभावादत्र कारकादन्यस्यापि तण्डुलस्य भेदेन=स्वकर्मकत्वरूपभेदसंबन्धेन वृत्त्येकदेशे पाकेऽन्वये न कोपि दोष इत्यर्थः। उक्ते विनिगमनामाह—अत एवेति, यतः कारकादन्यस्य वृत्त्येकदेशेनाभेदान्वयो न भवतीत्ययमेवोक्तव्युत्पत्तेरभिप्रायोऽत एव 'ऋद्धस्य राजमातङ्गाः' इत्यत्र कारकादन्यस्य ऋद्धस्य समासवृत्त्येकदेशेन राजाऽभेदान्वयो न भवतीति 'ऋद्धस्य राजमातङ्गाः' इति प्रयोगोपि न भवति, भेदान्वये तु विरोधो नास्तीति 'पितुः स्वर्गकामः' इति प्रयोगो भवति—अत्र कारकादन्यस्यापि पितृपदार्थस्य समासवृत्त्येकदेशेन स्वर्गेण भेदान्वयस्यैवेष्टत्वादित्यर्थः। ननु "प्रतियोगिपदात्" इत्यत्र प्रतियोगिपदकारकपदयोर्भेदेन निवेशनम्=प्रतियोगि-पदकथनं व्यर्थमेव कारकपदेनैव तदर्थलाभात् कारकस्यैव प्रतियोगित्वादित्या-शङ्क्याह—न चेति। परिहारमाह—तन्निवेशस्येति, तन्निवेशस्य=प्रतियोगि-

तन्निवेशस्य दृष्टान्तविधयोक्तत्त्वात्– यथा प्रतियोगिपदाद्यर्थस्य कुत्राप्यभेदान्वयो न भवति तथा वृत्त्येकदेशेनाऽन्यपदार्थस्येत्यर्थे तात्पर्यादिति ध्येयम्।

अभेदविवक्षायाम्– 'पण्डितं पुत्रीयति', 'प्रवीरं पुत्रकाम्यति' इत्यादिप्रयोगाभाववत् परपुत्रादिगोचरेच्छावति पुंसि 'पुत्रीयति' इत्यादयो न प्रयोगाः– "सुप आत्मनः क्यच्" इत्यादिना इच्छाकर्तृसंबन्धि यदिच्छाकर्म तद्बोधकसुबन्तात् क्यच्काम्यचोर्विधानात्। संबन्धित्वं च संबन्धित्वेन भातत्वम्, अन्यथा यस्येच्छाकर्तुः पुत्रोऽसिद्धस्तस्यापि स्वीयत्वेन पुत्रेच्छा-

पदनिवेशस्य दृष्टान्तविधया सार्थकत्वादित्यर्थस्तथा चोक्तव्युत्पत्तेः–'यथा प्रतियोगिपदार्थस्य कुत्राप्यभेदान्वयो न भवति यथा–'चन्द्रवन्मुखम्' इत्यादौ सादृश्यप्रतियोगिनः चन्द्रस्य सादृश्ये भेदान्वय एव भवति न त्वऽभेदान्वय-स्तथाऽन्यपदार्थस्य=कारकादन्यपदार्थस्य वृत्त्येकदेशेनाऽभेदान्वयो न भवति' इत्ययमेवार्थ इति षष्ठ्याः संबन्धार्थकत्वविवक्षायामपि कारकादन्यस्यापि तण्डुलस्य वृत्त्येकदेशेन पाकेन भेदान्वये विरोधाभावात् 'तण्डुलस्य पाकीयति' इति प्रयोगो भवत्येवेत्यर्थः।

यथा ह्यऽभेदविवक्षायामपि 'पण्डितं पुत्रीयति' इत्यादिप्रयोगो न भवति तथा परपुत्रविषयकेच्छायां सत्यामपि 'पुत्रीयति' इत्यादि प्रयोगो न भवतीत्याह–अभेदेति। अत्र प्रमाणमाह–सुप इति, इच्छाकर्तृसंबन्धिपदार्थ एव यदेच्छाकर्म भवति तदैवेच्छार्थे "सुप आत्मनः क्यच्" इत्यादिना क्यच्काम्यचोर्विधानादित्यर्थः। स्वकीयपुत्रादिविषयकेच्छायामेव सत्येव क्यजादिप्रत्ययो भवतीति यावत्। तदुक्तं वृत्तिकारेण–"इषिकर्मण इषितृसंबन्धिनः सुबन्तादिच्छायामर्थे क्यच् प्रत्ययो वा स्यात्" इति। कर्तृसंबन्धित्वं च कर्तृसंबन्धित्वेन भासमानत्वमेव ग्राह्यमऽन्यथा पुत्राभावे पुत्रे पुत्रेच्छाकर्तृ-संबन्धित्वास्याऽसंभवात् पुत्रेच्छायां सत्यामपि 'पुत्रीयति' इति प्रयोगो न स्यात्, वस्तुतः पुत्रे सत्यपीच्छाविषयीभूतपुत्रस्याऽसत्त्वात् 'पुत्रीयति' इति प्रयोगो न स्यादित्याह-सम्बन्धित्वञ्चेति। ऋद्धस्य राजमातङ्गः इत्यत्रेव पुत्रीयति इत्यत्र नामधातुवृत्त्येकदेशेन पुत्रपदार्थेन पण्डितादिपदार्थस्याभेदान्वयो

दशायाम् 'पुत्रीयत्ययम्' इत्यादिप्रयोगस्य सर्वसिद्धस्यानुपपत्तेः।

उक्तस्थले 'पुत्रीयति' इत्यादिवाक्यस्य प्रामाण्यवारणाय च क्यजाद्यर्थेच्छायां पुत्रादेर्विषयित्वमात्रं न संबन्धः किं तु स्वांशे भासमानसंबन्धस्य प्रतियोगितया यो विषयस्तादृशपुरुष-वृत्तित्वसहितमित्युपेयम्। स्वसंबन्धस्य क्यजाद्यऽवाच्यत्वेप्युक्त-संबन्धेनैवेच्छायां सुबन्तार्थस्यान्वय इति व्युत्पत्तिप्रदर्शनायैव

न संभवतीति 'पण्डितं पुत्रीयति' 'प्रवीरं पुत्रकाम्यति' इत्यादयः प्रयोगा न भवन्तीत्यनुसंधेयम्।

उक्तस्थले इति—उक्तस्थले=परपुत्रादिगोचरेच्छावति पुंसि 'पुत्रीयति' इति प्रयोगो न भवतीति तादृशदशायाम् 'पुत्रीयति' इत्यादिवाक्यस्य प्रामाण्यवारणाय क्यजादिप्रत्ययार्थेच्छायां पुत्रादेर्विषयित्वमात्रं न संबन्धः= विषयित्वमात्रसंबन्धेन नान्वयो भवति अन्यथा चैत्रसमवेतमैत्रपुत्रविषयकेच्छा-यामपि मैत्रपुत्रस्य विषयित्वसंबन्धेनान्वयसंभवाद् मैत्रपुत्रविषयकेच्छावत्यपि चैत्रे 'पुत्रीयति' इति प्रयोगः स्यादेव, तस्मात् स्वांशे=पुत्रे भासमानो य इच्छाकर्तृपितुः स्वत्वसंबन्धस्तादृशसंबन्धस्य प्रतियोगिता च इच्छाकर्तृ-रूपपितृरूपो विषयश्चैत्रादिस्तादृशचैत्रादिरूपपितृपुरुषवृत्तित्वसहितविषयित्व-संबन्धेनैव क्यजाद्यर्थेच्छायां पुत्रादेरन्वयो भवति तथा च परपुत्रविषयकेच्छास्थले इच्छायामुक्तपितृरूपपुरुषवृत्तित्वं नास्तीति तादृशसंबन्धेनेच्छायां पुत्रान्वयासंभवात् 'पुत्रीयति' इति प्रयोगापत्तिर्नास्तीत्यर्थः। उक्ते प्रमाणमाह—स्वसंबन्धस्येति, स्वम्=पुत्रः। क्यजादेरिच्छामात्रवाचकत्वेन उक्तस्येच्छानुयोगिकपुत्रसंबन्धस्य क्यजाद्यऽवाच्यत्वेऽप्युक्तेनैवोभयसंबन्धेन क्यजादिवाच्येछायां सुबन्तार्थस्य= पुत्रस्यान्वयो भवतीति व्युत्पत्तेः=नियमस्य प्रदर्शनायैव "सुप आत्मनः क्यच्" इति सूत्रे "आत्मनः" इति षष्ठ्यन्तपदमुपात्तम्, "आत्मनः" इत्यनेन स्वकीयपुत्रादिविषयकेच्छायामेव सत्यां क्यच् भवतीति सूत्रार्थात् तादृशेच्छायाः पितृवृत्तित्वमुक्तं प्राप्तमेव, पुत्रनिरूपितविषयित्वमपीच्छायामस्त्येवेत्यर्थः। ननु "आत्मनः" इत्यनेनोक्तसंबन्धनियमे लब्धेऽपि षष्ठ्यर्थसंबन्धस्य किमिच्छाया-मेवान्वयो भवत्यन्यत्र वेत्याह— आत्मन इति, अस्य षष्ठ्यर्थसंबन्धस्येच्छाया-मन्वयो न भवति—इच्छायामन्वये ह्यात्मविषयकेच्छायां क्यच् स्यादिति

सूत्रे "आत्मनः" इत्युपात्तम्। "आत्मनः" इति षष्ठ्यर्थसंबन्धश्च न "धातोः कर्मणः" इत्यादिसूत्रानुवृत्तायामिच्छायामन्वेति अव्यावर्तकत्वादुक्तार्थलाभाऽप्रयोजकत्वात्, अपि तु सुप इत्यर्थे सुबन्तादित्यत्र। तच्चेच्छाकर्तृसंबन्धितयेच्छाविषयार्थकम्। एवं च "इच्छाकर्मणः सुबन्तादिच्छाकर्तुरिच्छायाम्" इति वृत्तावपि 'इच्छाकर्तुः सुबन्तात्' इत्येव योजना कार्या– यथाश्रुते दर्शितानुपपत्तेरिति ध्येयम्।

सूत्रार्थः स्यात् तत्र विनिगमनाविरहाद् यावदात्मविषयकेच्छायां क्यच् स्यादिति कस्या अपीच्छाया व्यावृत्तिर्न 'स्यादित्याह–अव्यावर्तकत्वादिति, तथोक्त–षष्ठ्यर्थसंबन्धस्येच्छायामन्वय उक्तसूत्रार्थलाभस्य प्रयोजकोपि न भवतीत्याह–उक्तार्थेति। तस्मात् "आत्मनः" इति षष्ठ्यर्थसंबन्धस्य सूत्रोक्तस्य "सुपः" इत्यस्य योर्थः सुबन्तादिति तस्मिन्नऽन्वयो भवति पुत्रादिपदार्थेऽन्वयो भवतीति यावदित्याह–अपि त्विति। तच्चोक्तसुबन्तं पुत्रादिपदमिच्छा–कर्तृसंबन्धितया य इच्छाविषयः पुत्रादिस्तदर्थकम्=तद्बोधकमेवेति परपुत्रादि–विषयकेच्छायां क्यजादिर्न भवतीति प्राप्तमित्याह–तच्चेति। स चेति प्रामादिकः पाठः। "सुप आत्मनः क्यच्" इति सूत्रस्य या खलु केनचित् "इच्छाकर्मणः सुबन्तादिच्छाकर्तुरिच्छायां क्यच्" इत्येवं वृत्तिर्विनिर्मिता तत्रापि 'इच्छाकर्तुः' इति षष्ठ्यर्थसंबन्धस्य सुबन्ते पुत्रपदार्थेऽन्वयलाभार्थम् 'इच्छाकर्तुः सुबन्तादिच्छाकर्मणः क्यच् स्यादिच्छायाम् इत्येवं योजना=अन्वयः कर्त्तव्यः अन्यथा यथाश्रुते="इच्छाकर्मणः सुबन्तादिच्छाकर्तुरिच्छायां क्यच्" इत्येवं यथाश्रुतान्वये स्वीकृते तु चैत्रपुत्रस्यापि मैत्रसमवेतेच्छाविषयत्वसंभवात् मैत्रस्य च चैत्रपुत्रविषयकेच्छाकर्तृत्वसंभवाद् परपुत्रस्यादिति स्वपुत्रविषयकेच्छायामेव क्यजादिप्रत्ययो भवति नान्यपुत्रविषयकेच्छायामपीति प्रदर्शितस्य नियमस्यानुपपत्तिः स्यादेवेत्याह–एवं चेति। उक्तवृत्तिग्रन्थस्य 'इच्छाकर्तुः सुबन्तादिच्छाकर्मणः क्यच् स्यादिच्छायाम्' इत्येवमन्वये तु सुबन्तपुत्रादिपदार्थस्य इच्छाकर्तृस्वत्ववत्त्वमिच्छाकर्मत्वं च प्राप्नोतीति स्वपुत्रविषयकेच्छायामेव क्यजादेः प्राप्तिः संभवति न तु परपुत्रविषयकेच्छायामपि–परपुत्रे पुत्रत्वेनेच्छाकर्तृस्वत्वासंभवादिति भावः।

'भृत्यं पुत्रीयति' इत्यादावाऽऽचारार्थविहितक्यजन्तस्य सकर्मकत्वं युज्यते एव, तथा हि– तमिवाचरतीत्यर्थे उपमानवाचिनः क्यच् विहितः, 'तमिवाचरति' इत्यस्य 'तत्तुल्यं जानाति' इत्यर्थः– आचारपदस्य व्यवहारमूलज्ञानपरत्वात्। तुल्यतया ज्ञानं च क्यजर्थस्तच्च सकर्मकमेव, तत्र तुल्यत्वे प्रतियोगितया पुत्रादेरन्वयः। पुत्रादिपदमेव वा गौण्या पुत्रादितुल्यपरम्, ज्ञानमात्रं क्यजर्थस्तत्र च स्वाभेदावगाहित्वसंबन्धेन पुत्रादितुल्यस्याऽन्वयः।

न चैवं पुत्रादिपदमुपमेयार्थकमेव नतूपमानार्थकमिति

"उपमानादाचारे" इति सूत्रसंपन्नप्रयोगमुदाहरति–भृत्यं पुत्रीयतीति, पुत्रवदाचरतीत्यर्थः। उक्तेच्छार्थकक्यच उक्तरीत्याऽकर्मकत्वेप्याऽऽचारार्थक-क्यचः सकर्मकत्वमेव–उपमानवाचकपदात् क्यचि जाते उपमेयस्यैव भृत्यादेः कर्मत्वसंभवात्–पुत्रमिव कमाचरतीति कर्माकाङ्क्षाया नित्यं सत्त्वादित्याह–आचारार्थेति। सकर्मत्वं स्वयमेव प्रतिपादयति–तथा हीति। उपमानवाचिनः= उपमानवाचकपुत्रादिपदात् उपमानत्वेनाभीष्टो यः पुत्रादिस्तद्वाचकपुत्रादिपदात्। आचारपदस्य व्यवहारकारणीभूतज्ञाने लक्षणा। तच्च=ज्ञानं च। क्यजर्थज्ञानस्य सकर्मकत्वात् क्यजन्तस्यापि सकर्मकत्वं प्राप्तम्। तत्र='भृत्यं पुत्रीयति=पुत्रतुल्यं जानाति' इत्यत्र तुल्यत्वे=सादृश्ये प्रतियोगिता पुत्रादेरन्वयः पक्षान्तरमाह–पुत्रादिपदमेवेति। तत्र=क्यजर्थज्ञाने। स्वम्=पुत्रतुल्यपदार्थः। स्वे पुत्रतुल्यपदार्थे भृत्यादौ यः पुत्राभेदस्तदवगाहित्वमत्र क्यजर्थज्ञाने वर्तत एवेति तेन संबन्धेन क्यजर्थज्ञाने पुत्रतुल्यस्य (पुत्रतुल्यपदार्थस्य) अन्वय इति पुत्रतुल्यज्ञानस्य (पुत्रतुल्यत्वविषयकज्ञानस्य) लाभः। स्वस्मिन्नऽभेदः स्वाभेद इति सप्तमी समासः, षष्ठीसमासे तु पुत्रतुल्यभृत्यादिपदार्थभेदः पुत्रे एव भासेत न चैतद् युक्तं प्रतिभाति-भृत्यादावेव पुत्राभेदभानस्य युक्तत्वादित्यनुसंधेयम्। किं वा स्वपदं पुत्रपरं ज्ञेयम्।

ननु यत्तुल्यं भवति तदुपमेयमेव भवति न तूपमानमिति पुत्रपदस्य पुत्रतुल्यार्थकत्वे पुत्रस्योपमेयत्वमेव स्यादिति पुत्रपदात् कथं क्यच् स्यात्

कथम् "उपमानादाचारे" इत्यनेन तदुत्तरं क्यचो विधानं संगच्छते इति वाच्यम्, पुत्रादिपदस्य तुल्यार्थकत्वेऽपि तुल्यत्वप्रतियोगितयोमानपुत्राद्यर्थकत्वात्, अत एव तस्य कर्मवाचकत्वं पुत्रादितुल्यस्याचारकर्मत्वात् सम्यगुपपद्यते। पूर्वमते उपमानपदस्य कर्मवाचकत्वमाचारकर्मविशेषणतुल्यताप्रतियोगिबोधकत्वरूपं बोध्यम्।

सूत्रेणोपमानवाचकपदादेव क्यज्विधानादित्याशङ्क्याह—न चेति। तदुत्तरम्=पुत्रपदोत्तरम्। परिहारमाह—पुत्रादिपदस्येति, तुल्यार्थकत्वेपि=पुत्रादितुल्यार्थकत्वेपि, सादृश्यप्रतियोगिन उपमानत्वनियमादत्रापि पुत्रस्य तुल्यत्वप्रतियोगित्वेन पुत्रपदस्योपमानभूतपुत्रार्थकत्वमक्षतमेवेति तदुत्तरं क्यच्प्राप्तौ न काचिदनुपपत्तिरित्यर्थः। अत एव=पुत्रपदस्योपमानवाचकत्वादेव, उपमानविषयकव्यवहारे उपमानस्यैव कर्मत्वात् 'पुत्रमिवाचरति' इत्यत्र च पुत्रतुल्यस्यैवाचारकर्मत्वात् तस्य=पुत्रतुल्यार्थकपुत्रशब्दस्य कर्मवाचकत्वमुपपद्यते अन्यथा पुत्रतुल्यस्याचारकर्मत्वेनाऽतदर्थकस्य पुत्रतुल्यार्थकत्वरहितस्य) पुत्रशब्दस्य कर्मवाचकत्वं न स्यादित्याह—अत एवेति। ननु पूर्वमते='तुल्यताज्ञानं क्यजर्थः' इति मते पुत्रतुल्यताज्ञानकर्मत्वं भृत्यादेरेव संभवति न तु पुत्रस्येति पुत्रशब्दस्य कथं कर्मवाचकत्वं स्यात्? कर्मवाचकत्वाभावे च पुत्रपदात् कथं क्यच् स्यात्=उक्तसूत्रेण "उपमानात् कर्मणः सुबन्तादाचारेऽर्थे क्यच् स्यात् (वृत्तिः)" इत्येवं कर्मवाचकपदादेव क्यचो विधानादित्याशङ्क्य पुत्रपदस्य प्रथममते कर्मवाचकत्वमुपपादयति—पूर्वमते इति, 'पुत्रमिवाचरति पुत्रीयति' इत्यत्रोपमानपदस्य=पुत्रपदस्य यद् आचारकर्मवाचकत्वं तद् उपमेयभूतभृत्यादिविषयकाचारकर्मभूतं यद् भृत्यादि तद्विशेषणीभूता या तुल्यता (सादृश्यम्) तत्प्रतियोगिभूतो यो पुत्रादिस्तद्बोधकत्वरूपमेव बोध्यं न त्वाचारविषयबोधकत्वरूपम्—तदसंभवादित्यर्थः। अत्राचारपदेन तुल्यत्वाचार एव ग्राह्य इति तादृशाचारे पुत्रस्य स्वकर्मकत्वसंबन्धेनान्वयासंभवेपि तादृशाचारैकदेशभूतायां तुल्यतायां तु स्वप्रतियोगिकत्वसंबन्धेनान्वयः संभवत्येवेति तावन्मात्रेणैवात्र पुत्रस्य कर्मत्वं पुत्रपदस्य च कर्मवाचकत्वं मन्तव्यमिति भावः।

स्वाभिप्रायमाह—वस्तुत इति, स्पष्टोऽयं ग्रन्थः। 'पुत्रीयति' इत्यस्य

वस्तुतः 'पुत्रमिवाचरति' इत्यस्य पुत्रं यथा व्यवहरति तथा व्यवहरतीत्येवार्थः, व्यवहारश्च प्रतिपाल्यत्वादिना ज्ञानं प्रतिपालनादिरूपो व्यापारो वा, एवं च 'पुत्रीयति' इत्यस्य पुत्रकर्मकव्यवहारतुल्यव्यवहारकर्तेत्यर्थः। मुखचन्द्रादेर्यया स्वजन्याह्लादस्य तुल्यतयोपमानोपमेयभावस्तथा पुत्रभृत्ययोरपि स्वकर्मकव्यवहारतुल्यतया स इति पुत्रपदस्योपमानवाचिता आचारनिष्ठसादृश्यप्रतियोग्याचारकर्मवाचिता च। आचार-सदृशाचार एव क्यचोऽर्थः, प्रथमाचारे कर्मतासबन्धेन पुत्रादेरन्वयः—अमाद्यन्तात् क्यच्प्रत्ययविधानेऽपि धात्ववयवतया

शाब्दबोधमाह—एवं चेति। पुत्रभृत्ययोरुपमानोपमेयभावं व्युत्पादयति-मुखेति। भृत्येन सह पुत्रविषयकव्यवहारसदृशव्यवहार इति स्वकर्मकव्यवहारतुल्यतया= पुत्रभृत्यकर्मकव्यवहारयोस्तुल्यतया पुत्रभृत्ययोरपि सः=उपमानोपमेयभावः सिद्धः। आचारनिष्ठेति-भृत्यकर्मकाचारनिष्ठं यत् सादृश्यं तत्प्रतियोगिभूतो यः पुत्रकर्मकाचारस्तत्कर्मवाचकत्वं पुत्रपदस्य प्राप्तम्। एवं परिनिष्पन्नं क्यजर्थमाह आचारसदृशेति। प्रथमाचारे=पुत्रकर्मकाचारे। आचारनिरूपिता पुत्रनिष्ठापि कर्मता निरूपकत्वसंबन्धेनाचारे वर्तते तादृशकर्मतासंबन्धेन च पुत्रस्याचारेऽन्वयः। अमाद्यन्तादिति—'पुत्रमिवाचरति' इत्यत्र द्वितीयान्तपुत्रपदात् "उपमानादाचारे" इत्यनेन क्यच्प्रत्ययो जातस्तादृशक्यजन्तस्य द्वितीयान्त-पुत्रपदस्य "सनाद्यन्ता धातवः" इत्यनेन धातुसंज्ञा जातेति द्वितीयाया धात्ववयवतया "सुपो धातुप्रातिपदिकयोः" इत्यनेन लोपो जातो लुप्तायाश्च विभक्तेः समासादौ अनुपस्थितेः=स्मरणाभावाद् द्वितीयार्थस्य कर्मत्वस्य प्रकारत्वासंभवेन संबन्धतया=संसर्गतया भानं स्वीक्रियते—अनुपस्थितस्यापि संसर्गत्वसंभवादिति कर्मतासंबन्धेन पुत्रस्य पुत्रविषयकाचारेऽन्वयः। अत्र लुप्तविभक्त्यनुसंधानाभावे दृष्टान्तमाह—यथेति। विभक्त्यन्तार्थविशिष्टे= राजसंबन्धविशिष्टे। पूर्वपदलक्षणा= राजपदस्य लक्षणा। यदि समासादावपि लुप्तविभक्तेः स्मरणं स्यात्तदा 'राजपुरुषः' इत्यत्र लुप्तषष्ठ्या अपि स्मरणं स्यात्तथा च स्मृतषष्ठ्यैव राजसंबन्धोपस्थितेः संभवाद् राजपदस्य राजसंबन्धविशिष्टे लक्षणाश्रयणं न स्यादेव, न च मा भवतु लक्षणाश्रयणं

लुप्तस्याऽऽमादेर्नियमेनानुपस्थितेः कर्मत्वस्य संबन्धतया भानमुपेयते, यथा 'राजपुरुषः' इत्यादिसमासरूपप्रातिपदिकावयवतया लुप्तषष्ठ्यादिप्रतिसंधानाऽनियमाद् विभक्त्यन्तार्थविशिष्टे पूर्वपदलक्षणोपेयते। द्वितीये आचारे भृत्यस्य कर्मतया क्यजन्तस्य सकर्मकत्वमिति।

'कुट्यां प्रासादयति' इत्यादावाधाररूपोपमानवाचिसप्तम्यन्तोत्तरविहितक्यजन्तस्य न सकर्मकता तत्र च प्रासादाधिकरणकाचारतुल्याचारः क्यजन्तार्थः स चावस्थानरूप एवेत्यकर्मक एवेति कुट्यास्तत्राधिकरणतया ततः सप्तम्येव।

स्मृतषष्ठ्या राजसंबन्धोपस्थितावपि दोषाभावादिति वाच्यम्, समासादौ लुप्तविभक्तिस्मरणस्वीकारे हि 'ऋद्धस्य राजमातङ्गाः' इत्यपि प्रयोगः स्यात्—स्मृतषष्ठीविशिष्टराजपदेन षष्ठ्यन्तऋद्धपदस्यान्वये बाधकाभावात्, न चैवं प्रयोगो भवतीति तन्निवारणार्थं समासादौ लुप्तविभक्तेः स्मरणाभावः स्वीकर्तव्यस्तथा च 'राजपुरुषः' इत्यत्र लुप्तषष्ठीस्मरणासंभवेन राजसंबन्धोपस्थितेरुपायाभावाद् राजपदस्य राजसंबन्धविशिष्टे (राजसंबन्धिनि) लक्षणा स्वीकार्या तथा च तयोरभेदान्वयेन राजसंबन्धविशिष्टाभिन्नः पुरुष इति शाब्दबोधो जायते इति भावः। द्वितीये=भृत्यविषयके आचारे भृत्यस्य कर्मत्वमिति क्यजन्तस्य 'पुत्रीयति' इत्यस्य सकर्मकत्वं प्राप्तमिति 'भृत्यं पुत्रीयति' इति प्रयोगो भवतीत्यर्थः।

"अधिकरणाच्चेति वक्तव्यम्" इति वार्तिकसंपन्नप्रयोगमुदाहरति—कुट्यामिति, 'कुट्यां प्रासादयति' इत्यत्र प्रासादस्याधिकरणरूपत्वेनैव प्रासादपदस्योपमानवाचकत्वं तादृशप्रासादपदाच्चाऽऽचारार्थे क्यच् जात इति कर्माकाङ्क्षाभावान्न सकर्मकत्वमित्यर्थः। अकर्मकत्वमुपपादयति—तत्रेति, तत्र='प्रासादयति' इत्यत्र। सः=आचारः। स्थितेरधिकरणसाकाङ्क्षत्वेन कर्माकाङ्क्षाभावात् स्थितिरूपाचारवाचकक्यचोप्यकर्मकत्वं प्राप्तमिति कुट्या अधिकरणत्वमेव। ततः=कुटीपदात्। कुट्यधिकरणकावस्थानस्य प्रासादधिकरणकावस्थानस्य च परस्परं साम्यमाह—अवस्थानयोरिति। एतादृशसादृशावस्थानाधिकरणयोः कुटीप्रासादयोरुपमेयोपमानभावः सिद्ध इत्यर्थः।

अवस्थानयोः साम्यं चैकजातीयसुखजनकत्वादिनाऽविशेष-ज्ञानविषयत्वेन वा।

'हंस इवाचरति हंसायते–हंसति' इत्यादावुपमा-नवाचिकर्तृवाचकपदोत्तरविहितक्यङन्तव्किबन्तधातुरप्यकर्मकः– तत्र हंसादिकर्तृकाचारतुल्याचारस्य गमनादिरूपस्य क्यङ्न्ताद्यर्थत्वेऽपि गम्यादिप्रतिपाद्यतावच्छेदकसंयोगादि-

---

"कर्तुः क्यङ् सलोपश्च" इति सूत्रसंपन्नप्रयोगमुदाहरति–हंसायते इति, अत्र क्यङन्तस्य हंसशब्दस्य "सनाद्यन्ता धातवः" इत्यनेन धातुत्वं प्राप्तस्य ङित्वात् "अनुदात्तङित आत्मनेपदम्" इत्यनेनात्मनेपदं प्राप्तम्। "सर्वप्रातिपदिकेभ्यः क्विब् वा वक्तव्यः" इति वार्तिकसंपन्नप्रयोगं चोदाहरति– हंसतीति, हंसकर्तृकगमनादिरूपाचारसादृशाचारकर्तेत्यर्थः। अकर्मकत्वमुक्तमुपपादयति– तत्रेति, यद्यपि गमनम् 'ग्रामं गच्छति' इत्यादौ सकर्मकमेव तथाप्यत्र क्यङाद्यन्तार्थभूतस्य गमनादिरूपाचारस्य सकर्मकत्वं नास्त्येव, अत्र हेतुमाह– गम्यादीति, गमधातुप्रतिपाद्यस्तु संयोगानुकूलव्यापार इति संयोगस्य प्रतिपाद्यतावच्छेदकत्वं प्राप्तं तादृशं यद् गम्यादिप्रतिपाद्यता (व्यापारता) वच्छेदकीभूतं संयोगादिरूपं फलं तदनवच्छिन्नस्यैव=तद्रहितस्यैव गमनादिरूपाचारस्य (गत्याद्यनुकरणमात्रस्य) तदर्थत्वोपगमात्=क्यङन्ताद्यर्थ-त्वोपगमात्तस्याकर्मकत्वम्– फलावच्छिन्नव्यापारबोधकस्यैव धातोः सकर्मक-त्वनियमादित्यर्थः। शब्दज्ञानेति– यत्र कोपि हंस इव शब्दं करोति तत्र 'हंसायते हंसति' इत्यादौ शब्दरूप एवाचारो ग्राह्य इति तत्र शब्दरूपाचार एव क्यङन्ताद्यर्थो भवति शब्दस्य सविषयकत्वं च तादृशशब्दजन्यज्ञानविषय-विषयकत्वेन विज्ञेयं यथा घटशब्दजन्यज्ञाने घटो विषय इति घटशब्दस्यापि स घटो विषय इति घटशब्दस्यापि स घटो विषय एव, यत्र पण्डितज्ञानमिव कोपि ज्ञानं करोति तत्र 'पण्डित इवाचरतीति पण्डितायते पण्डितति' इति प्रयोगो भवति तत्र ज्ञानरूप एवाचारो ग्राह्यो ज्ञानस्य च सविषयकत्वं स्पष्टमेव। शब्दज्ञानादयश्च व्यापारा यद्यपि सविषयकत्वेन सकर्मका एव संभवन्ति तथापि शब्दादिविषयरूपकर्मणाऽवरुद्धस्यैव=सहितस्यैव तस्य=शब्द-ज्ञानादिरूपव्यापारलक्षणाचारस्य तदर्थत्वोपगमात्=क्यङन्ताद्यन्तार्थत्वोपगमात्

रूपफलानवच्छिन्नस्यैव तदर्थत्वोपगमात्। शब्दज्ञानादिरूप-सविषयकव्यापारात्मकस्याचारस्य क्वचित्तदर्थत्वेऽपि विषयरूप-कर्माऽवरुद्धस्यैव तस्य तदर्थत्वोपगमात्, कर्मावरुद्धस्य च कर्मान्वयनिराकाङ्क्षत्वादित्यादिकं स्वयमूह्यम्।

कृत्यर्थकधातुयोगे इष्टसाधनत्वादिज्ञानविशेष्यता-प्रयोज्यसाध्यताख्यविषयताविशेष एव कर्मत्वं द्वितीयादेरर्थः,

---

शब्दादिविषयरूपकर्मण आचारकुक्षौ प्रवेशात् 'कर्मावरुद्धस्य च कर्माकाङ्क्षाया असंभवादकर्मकत्वं सिद्धम्, यथा– स्पर्धधातोः परभवानुकूलेच्छार्थकत्वात् फलभूतपराभवस्यापि धात्वर्थकुक्षौ प्रवेशादकर्मकत्वं भवति तथा प्रकृतेपि 'पण्डितायते' 'विद्वायते विद्वस्यते' इत्यादौ पण्डितादिकर्तृकात्मादिविषयक-ज्ञानादिव्यापारस्य तथा पण्डितादिकर्तृकस्य 'नित्यो जीवः' इत्याद्यात्मादि-विषयकशब्दादिव्यापारस्य च क्यङ्ताद्यन्तार्थत्वाद् विषयरूपकर्मणश्च तादृशव्यापारे एव प्रवेशेन तस्य कर्माकाङ्क्षाया अभावादकर्मकत्वम्, 'गच्छति' इत्यादौ तु संयोगानुकूलव्यापारस्यैव धात्वर्थत्वेन ग्रामादिरूपकर्मणो धात्वर्थव्यापारे प्रवेशाभावात् तत्साकाङ्क्षत्वात् सकर्मकत्वमिति व्यतिरेकः। किं वा "शब्दज्ञानादि" इत्यत्र शब्दज्ञानपदेन शब्दविषयकं ज्ञानं ग्राह्यम् 'पण्डितायते विद्वायते' इत्यादिस्थले पण्डितादितुल्याचारकर्तुमैत्रादेः पण्डितोच्चारित-शब्दसमुदायमात्रस्यैव ज्ञानं भवति न तु तदर्थस्यात्मादेः अत एव तादृशपण्डितत्वादिधर्मानाक्रान्तमेव मूर्खादिकमुद्दिश्य 'पण्डितायते' इत्यादि प्रयोगो भवति हंसातिरिक्तमेवोद्दिश्य च 'हंसायते' इत्यादि प्रयोगो भवति, शब्दविषयकज्ञानस्य तु सकर्मकत्वं स्पष्टमेव अथाप्यत्र तादृशविषयरूपकर्मणः क्यङन्ताद्यन्तार्थव्यापारकुक्षौ प्रवेशात् तादृशव्यापारस्य कर्मकत्वम् 'जानाति' इत्यादौ च व्यापारकुक्षौ विषयरूपकर्मणः प्रवेशाभावात् सकर्मकत्वमिति व्यतिरेक इति प्रतिभाति।

'घटं करोति' इत्यादिप्रयोगमुदाहरति–कृत्यर्थकेति, 'घटं करोति' इत्यत्र घटो मदिष्टसाधनमित्याकारकेष्टसाधनत्वज्ञाननिरूपिता विशेष्यता घटेऽस्ति तादृशविशेष्यताप्रयोज्या साध्यताख्यविषयतापि घटे जायते साध्यताया इष्टसाधनताज्ञानप्रयुक्तत्वेनेष्टसाधनताज्ञाननिरूपितविशेष्यताप्रयोज्यत्वात्,

न तु विषयतामात्रम्–यत्र 'घटं करोति' इति प्रयुज्यते तत्र 'कपालं करोति' 'जलाहरणं करोति' इत्याद्यप्रयोगात्।

अथैवम् 'काशान् कटं करोति' 'काष्ठं भस्म करोति' इत्यत्र काशकाष्ठादिपदोत्तरद्वितीयानुपपत्तिः– तत्र कृतिनिरूपितोक्तविषयताविरहादिति चेत्?, उपादानीयविलक्षणविषयतापि द्वितीयार्थः, सा च द्वितीयान्तरोपस्थाप्यसाध्यीयविषयताविशिष्टायामेव कृतावन्वेति, अतः– कटादिरूपकर्मान्तराऽसमभिव्याहारे 'काशान् करोति' इत्यादयो न प्रयोगाः।

तादृशसाध्यताख्यविषयतारूपं यत् कर्मत्वं तदेवात्र द्वितीयार्थः न तु विषयतामात्रम्=विषयतासामान्यम्। प्रतिषेधे हेतुमाह– यत्रेति, यदि विषयतासामान्यं द्वितीयार्थः स्यात्तदा घटो मदिष्टसाधनमित्याकारकेष्टसाधनताज्ञानकाले विषयतासामान्यं तु कपालेऽपि भवति कपालं विना घटोत्पत्तेरसंभवात् तथा जलाहरणेऽपि भवति जलाहरणार्थमेव घटापेक्षासत्त्वादिति 'घटं करोति' इति प्रयोगकाले 'कपालं करोति' 'जलाहरणं करोति' इत्यपि प्रयोगः स्यात् न चैतदिष्टमिति साध्यताख्यविषयतैव द्वितीयार्थस्तथा च घटो मदिष्टसाधनमितीष्टसाधनताज्ञानकाले साध्यता घटे एव प्रतीयते न कपालादाविति न 'कपालं करोति' इत्यादिप्रयोगापत्तिरत्रेत्यर्थः।

ननु यदि कृत्यर्थकधातुयोगे साध्यताख्यविषयतैव द्वितीयार्थस्तदा 'काशान् कटं करोति' इत्यादौ काशादेः सिद्धत्वेन तत्र=काशादौ साध्यताख्यविषयताया असम्भवात् काशादिपदोत्तरं द्वितीया न स्यादित्याशङ्कते– अथैवमिति। उत्तरमाह– उपादानीयेति, उपादानताख्याविषयतापि द्वितीयार्थोऽस्तीति काशानां कटोपादानत्वेन तद्बोधक द्वितीयायाः प्राप्तौ न काचिदनुपपत्तिः, सा=उपादानताख्यविषयता च या द्वितीयान्तरोपस्थाप्या=कटादिपदोत्तराद्वितीयोपस्थााप्या साध्यीयाविषयता तद्विशिष्टायामेव कृतावन्वेति तथा च कटादिरूपकर्मान्तरस्याऽसमभिव्याहारे कृतौ साध्यताख्यविषयताया अन्वयावऽसंभवेनोपादानताख्यविषयताया अन्वयासंभवात् 'काशान् करोति' इति प्रयोगो न भवति काशानां सिद्धत्वात्। कृतौ विषयतोभयस्यैव निरूपकत्वसंबन्धेनान्वयो ज्ञेय इत्यर्थः।

अथैवमपि 'काष्ठं भस्म करोति' 'दुग्धं दधि करोति' इत्यादौ काष्ठदुग्धादेः कर्मत्वानुपपत्तिः– तस्य भस्मदध्याद्यु-पादानताविरहात्, काष्ठदुग्धादिनाशानन्तरमेव तदारम्भक-परमाणुभिर्भस्मदध्याद्यारम्भात्, उत्पत्त्याश्रयस्यैवोपादानत्वात्, विभिन्नकालीनयोश्चाधाराधेयभावविरहात्, कारणस्यैवोपादान-त्वनियमाच्च। न च परिणामवादविद्वेषिणां नैयायिकानां काष्ठादेर्भस्मादिरूपद्रव्यान्तरकारणत्वम्, अपि तु प्रतिबन्ध-कत्वमेव द्रव्यवति द्रव्यान्तरानुत्पत्तेरिति चेत्?

ननु यदि 'काशान् कटं करोति' इत्यत्र काशानां कटोपादानत्वेन कारणत्वं काशपदोत्तरद्वितीयायाश्चोपादानताख्यविषयतार्थस्तदापि 'काष्ठं भस्म करोति' इत्यादौ काष्ठादिपदोत्तर द्वितीयाया उपादानताख्यविषयतार्थकत्वं न स्यात् काष्ठादेश्च कर्मत्वमपि न स्यात्, उक्ते हेतुमाह–तस्येति, तस्य= काष्ठदुग्धादेः भस्मदध्यादिकं प्रत्युपादानत्वासंभवात्, उपादानत्वाभावे हेतुमाह– काष्ठेति, कार्यावस्थायामपि विद्यमानस्यैवोपादानत्वं भवति यथा काशानां कार्यभूतकटावस्थायामपि विद्यमानत्वात्, काष्ठदुग्धादेस्तु कार्यभूतभस्मद-ध्याद्यवस्थायां सत्त्वं न भवति प्रत्युत काष्ठदुग्धादिनाशानन्तरमेव तदारम्भक-परमाणुभिः=काष्ठदुग्धाद्यारम्भकपरमाणुभिर्भस्मदध्यादिकार्योत्पत्तिर्दृश्यते उत्पत्त्याश्रयस्यैव चोपादानत्वं भवति विभिन्नकालयोश्चाधाराधेयभावो न संभवतीति विनष्टस्य काष्ठदुग्धादेर्भस्मदध्याद्युत्पत्त्याश्रयत्वासंभवात्, किं च कारणस्यैवोपादानत्वनियमाद् विनष्टस्य च काष्ठदुग्धादेर्भस्मदध्यादि-कारणत्वासंभवाद् न काष्ठदुग्धादेरुपादानत्वं संभवतीति न कर्मत्वमपि संभवति तथा च काष्ठदुग्धादिपदोत्तरं द्वितीयानुपपत्तिरित्याशङ्कते– अथैवमपीति। ननु काष्ठदुग्धादेरुपादानत्वाभावेऽपि परिणामित्वरूपं कारणत्वं भविष्यतीत्याशङ्क्याह– न चेति, न्यायमते परिणामवादाऽस्वीकारात् काष्ठादेर्भस्मादिरूपद्रव्यान्तरं प्रति कारणत्वमेव न संभवति येन परिणामि-कारणत्वं स्यात् प्रत्युत काष्ठादिसत्त्वे भस्माद्यऽसंभवाद् भस्मादिकं प्रति काष्ठादेः प्रतिबन्धकत्वमेव, उक्ते हेतुमाह–द्रव्यवतीति, काष्ठरूपद्रव्यवति काष्ठावयवभूतपरमाणुसमूहे भस्मरूपद्रव्यान्तरस्योत्पत्त्यऽसंभवादित्यर्थः।

कर्म हि त्रिविधं भवति–प्राप्यं प्रकृतिविकृती च। तत्र प्राप्यं कर्म-क्रियाजन्यफलशालि गम्यादेर्ग्रामादि ज्ञानादेर्विषयश्च। क्रियानिष्पाद्यं यत् तद् विकृतिरूपं यथा–पाकादेरोदनादि यथा वा कृतेर्माल्यादि कटादि च। प्रथमे तण्डुलादिरूपपूर्वद्रव्यं विनाश्यौदनादेर्निर्वर्तनम्, द्वितीये पुष्पादिरूपपूर्वद्रव्यमविनाश्यैव संदर्भादिरूपविशेषनिष्पादनेन विशिष्टस्य माल्यादेर्निर्वर्तनम्, तृतीये च काशादिरूपपूर्वधर्मिणमविनाश्य तत्रैव कटादिरूपधर्मिनिष्पादनम्, ईदृशं च कर्म प्रकृतेरसमभिव्याहारस्थले निर्वर्त्यमुच्यते।

'तण्डुलानोदनं पचति' 'कुसुमानि स्त्रजं करोति 'काशान् कटं करोति' इत्यादौ प्रकृतिसमभिव्याहारस्थलेऽपि निर्वर्त्यते निष्पाद्यते यदिति व्युत्पत्त्या यद्यप्योदनादेरपि निर्वर्त्यताऽस्ति

परिहरति–नेति। काष्ठदुग्धादीनां कर्मत्वप्रतिपादनार्थं कर्मभेदं निरूपयति–कर्मेति। प्राप्यकर्मस्वरूपमाह–तत्रेति, विषयः=घटादिः। तदुक्तम्–

"क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।।" इति।।

नहि ग्रामघटादौ गमनज्ञानादिना कश्चिद्विशेष उपलभ्यते इति प्राप्यकर्मत्वम्। विकृतिरूपकर्मस्वरूपमाह–क्रियानिष्पाद्यमिति, पाकादेः=पाकादिरूपक्रियायाः। प्रथमे="पाकादेरोदनादि" इत्यत्र। तण्डुलनाशानन्तरमेवौदनोत्पत्तेः। निर्वर्तनम्=संपादनम्। द्वितीये="कृतेर्माल्यादि" इत्यत्र। संदर्भः=ग्रथनं मालाया आकारसंपादनम्। विशिष्टस्य=संदर्भादिविशिष्टस्य। तृतीये="कटादि च" इत्यत्र। द्वितीयतृतीयोदाहरणयोर्विशेषो नास्ति बुद्धिवैशद्यार्थमेव पृथक्प्रतिपादनम्। ईदृशम्=उक्तौदनमाल्यादिरूपमेव कर्म प्रकृतेः=तण्डुलपुष्पादेरसमभिव्याहारस्थले='ओदनं पचति' 'माल्यं करोति' 'कटं करोति' इत्यादिस्थले निर्वर्त्यमुच्यते–वक्ष्यमाणप्रमाणात्। वक्ष्यमाणेन "सती वा" इत्यादिप्रमाणेन प्रकृतेरसमभिव्याहारे एव निर्वर्त्यत्वप्रतिपादनात्।

ननु यद्योदनादीनां निर्वर्त्यत्वमस्ति तदा तण्डुलादिरूपप्रकृतिसम-

तथापि तद्व्यावृत्तमेव पारिभाषिकं निर्वर्त्यत्वम्, तदुक्तमभियुक्तैः–

"सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते॥" इति।

यस्य=विकृतिकर्मणः, नाश्रीयते=न प्रयुज्यते इत्यर्थः। एवं च तत्र तत्रौदनादेर्विकार्यकर्मण्येवान्तर्भावः, तदुक्तम्–

"यदसज्जायते पूर्वं जन्मना यत्प्रकाश्यते।
तन्निर्वर्त्यम्, विकार्यं तु कर्म द्वेधा व्यवस्थितम्॥

भिव्याहारस्थलेऽपि निर्वर्त्यत्वं किं न स्यात् प्रकृतिसमभिव्याहारस्य प्रतिबन्धकत्वासंभवादित्याशङ्कायामाह–तण्डुलानिति, प्रकृतिसमभिव्याहारस्थले ओदनादेः व्युत्पत्तिसिद्धं निर्वर्त्यत्वमस्त्येव तथा च पूर्वोक्तं प्रकृत्यऽसमभिव्याहारस्थले एव यन्निर्वर्त्यत्वं तत् पारिभाषिकम्=सांकेतिकमेव निर्वर्त्यत्वमत एव तद्व्यावृत्तम्=भिन्नमेवेत्यर्थः। किं वा तद्व्यावृत्तं नामौदनादिव्यावृत्तं प्रकृतिसमभिव्याहारस्थले औदनाद्यनन्वयीत्यर्थः। अत्र प्रमाणमाह–सती वेति। श्लोकार्थमाह–यस्येति। न प्रयुज्यते=न समभिव्याह्रियते। 'कटं करोति' इत्यत्र कटप्रकृतिभूतकाशानां सत्त्वेपि तद्वाचककाशपदप्रयोगो न कृत इति कटस्य निर्वर्त्यत्वमिति 'सती प्रकृतिः परिणामिनी यस्य नाश्रीयते' इत्यस्योदाहरणम्। 'ओदनं पचति' इत्यत्रौदनप्रकृतिभूततण्डुलानां नाशानन्तरमेवौदनोत्पत्तेरुत्पत्तिकाले तण्डुलानामऽविद्यमानत्वं तद्वाचकतण्डुलपदप्रयोगश्च न कृत इत्योदनस्य निर्वर्त्यकर्मण 'अविद्यमाना वा' इत्यस्योदाहरणम्। उपसंहरति–एवं चेति, ओदनादेः=निर्वर्त्यकर्मण इत्यर्थः। उक्ते प्रमाणमाह–यदसज्जायत इति, यत् पूर्वमसदेव जायते जन्मना च प्रकाश्यते तन्निर्वर्त्यं कर्म यथा पूर्व तण्डुलावस्थायामसदेवौदनं स्वोत्पत्त्या प्रकटं भवतीति निर्वर्त्यम्। निर्वर्त्यकर्मणो विकार्यकर्मण्यन्तर्भावाय विकार्यस्वरूपमाह–विकार्यमिति, प्रकृतिभूतस्य काष्ठस्य नाशानन्तरं भस्मोत्पद्यते इति काष्ठभस्म विकार्यं कर्म एवमेवौदनमपि विकार्यं कर्म सुवर्णकुण्डलादौ च प्रकृतिभूतसुवर्णादेर्विनाशं विनैवाऽऽकारादिगुणान्तरमुत्पद्यते इति कुण्डलादिकं द्वितीयं विकार्यं कर्म, एवमेव कटादीनां

प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादिभस्मवत्।
किंचिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्॥" इति।

अत्र प्रकृतिरपि ग्राह्या, अन्यथा काष्ठसुवर्णादेस्तुरीयतापत्तेः। विकार्यपदेनैकव्युत्पत्त्या प्रकृतिविकृत्युभयाऽबोधनेऽप्युभयसाधारणरूपावच्छिन्ने पारिभाषिकमेव विकार्यपदम्।

प्रकृतिरूपं कर्म च क्रियया वस्त्वन्तरनिष्पत्तये पूर्वभावविशिष्टस्य यस्याऽसत्त्वरूपो विकारो निर्वाह्यते तद् यथा—पाकादेस्तण्डुलादिकृतेश्च पुष्पकाशादि, तत्र प्रथमस्थले तण्डुलादिरूपधर्मिनाशादेव पूर्वभावविशिष्टसत्त्वमोदनादि-

---

माल्यादीनां च द्वितीयविकार्यकर्मत्वमेव विज्ञेयम्, एतद् विकार्यकर्मैव विकृतिकर्मेति च ज्ञेयम्। ननु काशादिरूपप्रकृतिकर्मणोऽपि सत्त्वाच्चातुर्विध्यमेव स्यादित्याशङ्कायामाह—अत्रेति, अत्र विकार्यकर्मणा प्रकृतिकर्मापि संग्राह्यमऽन्यथा काष्ठसुवर्णादिरूपप्रकृतिकर्मणस्तुरीयत्वं स्यात्, विकार्यपदेनैकव्युत्पत्त्या प्रकृतिविकृत्युभयबोधनासंभवेप्युभयसाधारणं यत् कर्मत्वं तदवच्छिन्ने विकार्यपदं पारिभाषिकमित्यर्थः। किं वा विकार्यते यत् तत् विकार्यं विकृतिः विकार्यते यस्मिन् तद् विकार्यं प्रकृतिः, इत्येवं व्युत्पत्त्या विकार्यपदस्य प्रकृतिविकृत्युभयबोधकत्वमपि संभवत्येव। यद्यप्येतत्प्रतिपादनेन विकार्यकर्मणस्त्रैविध्यात्कर्मणश्चातुर्विध्यं प्राप्तं तथापि श्लोकोक्तविकार्यभेदद्वयस्यैकविधत्वमेव विज्ञेयमिति पूर्वोक्तकर्मत्रैविध्यप्रतिज्ञाविरोधो नास्तीति ध्येयम्।

प्रकृतिकर्मणः स्वरूपमाह—प्रकृतिरूपमिति। क्रियया=पाकादिक्रियया। वस्त्वन्तरनिष्पत्तये=विकृतिरूपौदनादिवस्तुसिद्ध्यर्थम्। पूर्वभावविशिष्टस्य=पूर्वरूपविशिष्टस्य, पूर्वं प्रकृत्यवस्थाकालिकं यद्रूपं तण्डुलस्वरूपं तद्विशिष्टस्य तण्डुलस्येति यावत्। यस्य=प्रकृतिभूततण्डुलादेः। असत्त्वरूपः=ध्वंसरूपः। विकार इति—ध्वंसरूपासत्त्वस्यापि प्रकृतिविकाररूपत्वात्। निर्वाह्यते=ओदनादिविकारानुगुणतया संपाद्यते इत्यर्थः। तथा च यस्याऽसत्त्वरूप-

रूपकर्मान्तरनिष्पादकम्, इतरत्र धर्मिणः काशकुसुमादेः सत्त्वेऽपि कटसंदर्भादिविरहरूपपूर्वभावासत्त्वेन तद्विशिष्टस्यासत्त्वं कटसंदर्भादिनिष्पादकक्रियातो निर्वहति, एवं च 'तण्डुलानोदनं पचति' इत्यादौ प्रकृतिकर्मोत्तरद्वितीयाया नाशकत्वमर्थः,

---

विकारेणौदनादिलक्षणविकारः (कार्यं) जायते तत् प्रकृतिकर्मेति लब्धम्। उदाहरति—यथेति। कर्मणि कर्मत्वस्य धात्वर्थमात्रनिरूपितत्वाद् धात्वर्थस्यैव कर्म भवतीति तण्डुलादिकं पाकस्यैव धात्वर्थस्य 'तण्डुलानोदनं पचति' इत्यत्र प्रकृतिकर्मेत्यभिप्रायेण षष्ठ्यन्तं पाकपदमाह—पाकादेरिति, एवमेव 'काशान् कटं करोति' इत्यादौ धात्वर्थकृतेरेव पुष्पकाशादिकं प्रकृतिकर्मेति षष्ठ्यन्तकृतिपदमाह—कृतेश्चेति। उक्तलक्षणसमन्वयमाह—तत्रेति, प्रथमस्थले=प्रथमे तण्डुलरूपप्रकृतिकर्मोदाहरणे। पूर्वभावविशिष्टतदसत्त्वम्=पूर्वभाव-विशिष्टस्य तण्डुलस्य तत्=पाकेन जायमानमसत्त्वमोदनादिकर्मान्तरस्य कार्यस्य निष्पादकं भवति। इतरत्र=द्वितीयोदाहरणे। कटमाल्यादिकार्यावस्थायां प्रकृतिभूत-काशकुसुमादेः सत्त्वेन न तदसत्त्वं माल्यादिविकार्यकर्मसंपादकं भवति किं तु कठसंदर्भादिविरहरूपो यः पूर्वभावः (प्रागभावः) पुष्पादिविशेषणीभूतं स्वरूपम् (काशपुष्पाद्यवस्थायां कार्यभूतकटसंदर्भाद्यभावस्यैव सत्त्वात्) तस्य पूर्वभावस्य कटसंदर्भाद्यभावरूपस्य कटसंदर्भाद्यवस्थायामसत्त्वेन कटसंदर्भादि-निष्पादकक्रियातः प्रकृतिभूतकाशकुसुमादिविशेषणीभूतस्य कटसंदर्भाद्य-भावस्याऽसत्त्वं जायते इति तद्विशिष्टस्य=कटसंदर्भाद्यभावविशिष्टस्य काशकुसुमादेरसत्त्वं क्रियातो निर्वहति=जायते एव विशेषणाभावेनापि विशिष्टाभावस्य सर्वसंमतत्वादिति तेनासत्त्वेन कटसंदर्भादिरूपं कार्यमुत्पद्यते इत्यर्थः। उपसंहरन् द्वितीयार्थमाह— एवं चेति। प्रकृतिकर्मोत्तरद्वितीयायाः=तण्डुलादिपदोत्तरद्वितीयायाः। प्रकृतिभूत-तण्डुलादेर्निरूपतित्वसंबन्धेन द्वितीयार्थनाशकत्वेऽन्वयस्तस्य चाश्रयतासंबन्धेन स्वरूपसंबन्धेन या पाकेऽन्वयः। विकृतिकर्मोत्तरद्वितीयायाः=ओदनादि-पदोत्तरद्वितीयायाः। विकृतिभूतौदनादेर्निरूपितत्वसंबन्धेन द्वितीयार्थोत्पादकत्वे-ऽन्वयस्तस्य चाश्रयतासंबन्धेन स्वरूपसंबन्धेन वा नाशकत्वविशिष्टे पाकेऽन्वयः। उत्पत्तेरिति षष्ठ्यर्थो निरूपितत्वमिति तण्डुलादिप्रकृतिनाशान्तर-मेवौदनादेर्जायमानत्वेन नाशे उत्पत्तिप्रयोजकत्वं यदस्ति तद् उद्देश्यतावच्छेदक-

तण्डुलाद्यन्वितं नाशकत्वं च पाकेऽन्वेति। विकृतिकर्मोत्तर-द्वितीयायाश्चोत्पादकत्वमर्थ ओदनाद्यन्वितस्य तस्य नाशकत्व-विशिष्टे पाकेऽन्वयः। नाशे चोत्पत्तेः प्रयोजकत्वमुद्देश्यता-वच्छेदकविधेयभावमहिम्ना नियमतो भासते अतः पाकस्य तण्डुलाद्यारम्भकसंयोगनाशजनकत्वेऽपि तन्नाशस्य द्रव्यान्तरो-त्पत्तौ द्रव्यनाशेनाऽन्यथासिद्धतया प्रयोजकत्वबाधेन संयोगमोदनं 'पचति' इति न प्रयोगः।

वस्तुतस्तु निर्वर्त्यकर्मासमभिव्याहारस्थले 'संयोगं पचति'

विधेयभावमहिम्ना नियमतो भासते इत्याह– नाशे चेति, 'तण्डुलानोदनं पचति' इत्यत्र तण्डुलानुद्दिश्यौदनोत्पत्तिर्विधीयते तण्डुलेषु च नाशो विशेषणम्– नाशस्य तण्डुलवृत्तित्वादिति नाशोऽत्रोद्देश्यतावच्छेदको विधेया चौदनोत्पत्तिरिति नाशोत्पत्त्योरुद्देश्यतावच्छेदविधेयभावः प्राप्तस्तत्रोद्देश्यतावच्छेदकमेव विधेय-प्रयोजकं भवति यथा "ब्राह्मणः पूज्यः" इत्यत्र विधेयस्य पूजनस्योद्देश्यता-वच्छेदकं ब्राह्मणत्वमेव प्रयोजकं तथात्राप्युद्देश्यतावच्छेदकस्य नाशस्योत्पत्ति-प्रयोजकत्वं नियमेन भासते इत्यर्थः। उक्तस्य फलमाह– अत इति, अत्र पाकस्येत्यनन्तरम् 'तण्डुलनाशजनकत्ववत्' इति शेषः। तण्डुलाद्यारम्भकसंयोग-नाशजनकत्वेपि=तण्डुलावयवसंयोगनाशजनकत्वेपि। तन्नाशस्य=तण्डुलावयव-संयोगनाशस्य। द्रव्यनाशेन= तण्डुलनाशेन (तण्डुलावयवसंयोगनाशेन तण्डुलनाशो भवतीति) अन्यथासिद्धतया=तण्डुलनाशे चरितार्थत्वाद् द्रव्यान्तरस्य= ओदनस्योत्पत्तौ प्रयोजकत्वं न संभवतीति 'संयोगमोदनं पचति' इति प्रयोगापत्तिर्नास्ति, यदि संयोगनाशस्य तण्डुलनाशेनाप्यानाप्योदनोत्पत्ता-वन्यथासिद्धत्वं न स्यात्तदा तण्डुलनाशस्येव तण्डुलावयवसंयोगनाशस्याप्योद-नोत्पत्तौ प्रयोजकत्वे 'तण्डुलानोदनं पचति' इतिवत् 'संयोगमोदनं पचति' इत्यपि प्रयोगः स्यादेव न चैतदिष्टमित्यर्थः।

वस्तुतस्तूक्तरीत्या 'संयोगमोदनं पचति' इति प्रयोगापत्तिवारणे कृतेपि 'संयोगं पचति' इति प्रयोगस्यापत्तिस्त्वऽस्त्येव– पूर्ववदत्रौदनोत्पत्तेर्विधेयत्वमेव नास्ति येनौदनोत्पत्तिं प्रति तण्डुलावयवसंयोगनाशस्यान्यथासिद्धत्वात् 'संयोगं पचति' इति प्रयोगो न स्यादित्याशङ्क्याह– वस्तुतस्त्विति, निर्वर्त्यकर्मणः=

इति प्रयोगवारणाय संयोगनाशद्वारा नाशकत्वमेव द्वितीयार्थो वक्तव्य इति कृतं प्रयोज्यप्रयोजकभावबोधनेन।

'तण्डुलमोदनं करोति' 'काष्ठं भस्म करोति' 'दुग्धं दधि करोति' इत्यादावपि प्रकृतिकर्मोत्तरद्वितीयया तन्नाशकत्वं कृतौ प्रत्याय्यते विकृतिकर्मोत्तरद्वितीयया च विषयताविशेष उत्पादकत्वं वा मिलितमुभयं वा कृतौ बोध्यते। 'काशान् कटं

ओदनादिकर्मणः। निर्वर्त्यकर्मसमभिव्याहाररहितस्य 'संयोगं पचति' इति प्रयोगस्य वारणाय संयोगनाशद्वारा नाशकत्वस्य द्वितीयार्थत्वं स्वीकार्यं तथा च गुणे गुणानङ्गीकारेण संयोगे संयोगान्तराभावात् संयोगपदोत्तरद्वितीयायाः संयोगनाशद्वारा नाशकत्वमर्थो न संभवतीति न 'संयोगं पचति' इति प्रयोगापत्तिरस्ति। एवमेव निर्वर्त्यकर्मसमभिव्याहारस्थलेपि द्वितीयायाः संयोगनाशद्वारा नाशकत्वार्थकत्वं स्वीकृत्य 'संयोगमोदनं पचति' इति प्रयोगस्यापत्तिनिवारणं संभवतीति कृतमुत्पत्तिनाशयोरुक्तप्रयोज्यप्रयोजकभाव-बोधनेनेत्यर्थः। यत्पदार्थावयवसंयोगस्य पाकेन नाशः संभवेत् तादृशतण्डुलादि-पदार्थवाचकपदात् पचतीत्यादिसमभिव्याहारे द्वितीया भविष्यति इति भावः। 'तण्डुलानोदनं पचति' इत्यत्र हि तण्डुलावयवसंयोगनाशद्वारा तण्डुलनाशको य ओदनोत्पादको व्यापारस्तदनुकूलकृतिमानिति शाब्दबोधः।

प्रयोगान्तरमुदाहरति– तण्डुलमोदनमिति, तन्नाशकत्वम्=प्रकृतिभूत-तण्डुलादिनाशकत्वम्। विकृतिः=ओदनादिः। विषयताविशेषः=साध्यताख्य-विषयता तस्याः कृतौ निरूपकत्वसंबन्धेनान्वयः प्रयोगान्तरमुदाहरति–काशानिति, कटादिसंपादने तत्प्रकृतिभूतकाशादीनां नाशो न दृश्यते इति काशादिपदोत्तर-द्वितीयाया नाशकत्वार्थकत्वासंभवाद् विषयताविशेषः=उपादानताख्य-विषयतैवार्थस्तस्याः कृतौ निरूपकत्वसंबन्धेनान्वयः। तत्र=कृतौ। पूर्ववदिति– विकृतिवाचककटादिपदोत्तरद्वितीयायाः साध्यताख्यविषयता वा उत्पादकत्वं वार्थः। द्वितीयान्तस्रगादिपदार्थमाह– स्रगादीति, कुसुमाद्युपादानककृत्या स्रगादिपदार्थो यो विन्यासविशेषो माल्याकारता तद्विशिष्टकुसुमादेरुत्पत्तिर्न भवति पूर्वमेव सिद्धत्वात् किं तु तादृशस्य विशेषणीभूतस्य विन्यासविशेषस्यैवेति तस्यैव कुसुमाद्युपादानककृतिविषयता (कृतिसाध्यता) अस्तीति 'स्रजम्'

करोति' 'कुसुमानि मौक्तिकानि वा स्त्रजं करोति' इत्यादौ काशादिपदोत्तरद्वितीया कृतौ विषयताविशेषमेव बोधयति– काशाद्युच्छेदकतायास्तत्र बाधात्। 'कटम्' इत्यादौ द्वितीयार्थः पूर्ववत्। स्त्रगादिपदार्थविन्यासविशेषविशिष्टकुसुमादेर्न कुसुमाद्युपादानककृतिविषयता, अपि तु विन्यासादिरूप-विशेषणस्यैव तस्यैव कृत्यधीनोत्पत्तिरिति स्त्रजमित्यादिद्विती-यान्तस्य विशिष्टसत्त्वनिर्वाहकत्वमर्थः, विशेषणोत्पादकस्यापि स्वरूपसंबन्धविशेषरूपं विशिष्टसत्वनिर्वाहकत्वमक्षतमेव।

'अग्निः श्यामं रक्तं करोति' इत्यादावचेतनकर्तृ-व्यापारबोधककरोतिसमभिव्याहृतश्यामादिपदोत्तरद्वितीयाया अपि नोपादानताख्यविलक्षणविषयतार्थकत्वसंभवः, अपि तु तादृशद्वितीयान्तेन श्यामरूपादिविशिष्टासत्त्वनिर्वाहकतारूपं विशिष्टोच्छेदकत्वं तादृशव्यापारे प्रत्याय्यते। 'घटं रक्तं करोति' इत्यादावपि घटादिपदस्याऽरक्तत्वविशिष्टघटादिलाक्षणिकतया

इति द्वितीयान्तस्य विशिष्टसत्त्वनिर्वाहकत्वम्=विन्यासविशिष्टकुसुमादि-संपादकत्वमर्थस्तस्य चाश्रयतासंबन्धेन स्वरूपसंबन्धेन वा कृतावन्वयः। ननु कुसुमानां पूर्वमेव सिद्धत्वात् कथं तत्संपादकत्वं कृतौ स्यादित्याशङ्क्याह– विशेषणेति, विशेषणोत्पादकस्य व्यापारस्य। विशिष्टस्य पूर्वमसिद्धत्वेन तत्संपादनसंभवादित्यर्थः। कृतिविषयता तु विन्यासादेरेवेत्यर्थः। तादृशविशिष्ट-सत्त्वनिर्वाहकत्वं च व्यापारे स्वरूपसंबन्धेन वर्तत इत्युक्तम्–'स्वरूप इति।'

प्रयोगान्तरमुदाहरति– अग्निरिति। वैशेषिकनये श्यामघटनाशानन्तरमेव रक्तघटोत्पत्तेः स्वीकारेण श्यामघटस्योपादानत्वासंभवान्न श्यामपदोत्तरद्वितीयाया उपादानताख्यविषयतार्थकत्वं संभवतीति श्यामरूपादिविशिष्टस्य घटस्य यदसत्त्वं विनाशस्तन्निर्वाहकतारूपं विशिष्टोच्छेदकत्वम्=श्यामादिरूपविशिष्ट-घटाद्युच्छेदकत्वं द्वितीयान्तार्थस्तस्य तादृशव्यापारे=उक्ताचेतनकर्तृकव्यापारे आश्रयतासंबन्धेन स्वरूपसंबन्धेन वान्वय इत्यर्थः। 'घटं रक्तं करोति' इत्यत्र च घटपदस्याऽरक्तत्वविशिष्टघटे लक्षणा तथा चाऽरक्तत्वविशिष्ट-

विशिष्टघटाद्यसत्त्वनिर्वाहकत्वं प्रतीयते।

प्रकृतिविकृतिभावस्थले कर्माख्यातेन प्रकृतेः कर्मत्वमेव प्रत्याय्यते, अतः 'काष्ठानि भस्मराशिः क्रियन्ते' इत्यादावाख्यातार्थविशेष्यकाष्ठादिवाचकपदसमानवचनत्वमाख्यातस्य न तु निर्वर्त्यभस्मादिरूपविकारवाचकपदसमानवचनता।

अथैवं निर्वर्त्यकर्मवाचकपदात् प्रथमा न स्यादपि तु द्वितीयैव–तत्कर्मताया लकारेणानभिधानात्।

यत्तु उभयकर्मत्वमेव लकारेणाभिधीयते–प्रधानाऽप्रधान-

घटनाशकत्वं द्वितीयार्थस्तस्य कृतावन्वयः पूर्ववदिति कृतावऽरक्तत्वादिविशिष्ट-घटाद्यसत्त्वसंपादकत्वं प्रतीयत इत्याह– घटं रक्तमिति।

'काष्ठानि भस्मराशिः क्रियन्ते' इत्यादिप्रकृतिविकृतिभावस्थले (काष्ठं प्रकृतिः भस्म च विकृतिः) कर्माख्यातेन प्रकृतेरेव कर्मत्वं प्रत्याय्यते इति आख्यातार्थविशेष्यता प्रकृतिभूतकाष्ठादावेवेति काष्ठादिपदसमानवचनत्वमेवाख्यातस्य प्राप्तं न तु निर्वर्त्यभस्मादिवाचकपदसमानवचनत्वं तत्कर्मत्वाबोधनादित्याह– प्रकृतीति। एवकारो भिन्नक्रम इति 'प्रकृतेरेव' इत्यन्वयः। एतदपूर्वमपि (३०८ पृ.) प्रतिपादितम्।

ननु कर्माख्यातेन यत्कर्मत्वमभिधीयते तद्वाचकपदात् प्रथमा भवति द्वितीयाप्रतिपाद्यकर्मत्वस्याख्यातेनैव प्रतिपादितत्वादिति यदि 'काष्ठानि भस्मराशिः क्रियन्ते' इत्यत्र कर्माख्यातेन केवलं काष्ठकर्मत्वमेव प्रत्याय्यते न भस्मराशिकर्मत्वं तदा भस्मराशिपदात् प्रथमा न स्यात् किं तु भस्मराशिकर्मत्वाभिधानार्थं द्वितीयैव स्यादित्याशङ्क्यते– अथेति।

परिहाराय मतान्तरमनुवदति–यत्त्विति, 'काष्ठानि भस्मराशिः क्रियन्ते' इत्यत्रोभयकर्मत्वम्=काष्ठकर्मत्वं भस्मराशिकर्मत्वं चाख्यातेनाभिधीयते एवेति न भस्मराशिपदाद् द्वितीयापेक्षेत्यर्थः। नन्वेकेन कर्माख्यातेनोभयकर्मत्वाभिधानं कथं स्यादित्याशङ्क्याह–प्रधानेति, 'अजा ग्रामं नीयते' इत्यादौ द्विकर्मकनीवहादिदुहादिधातूत्तरवर्तमानकर्माख्यातेन कर्मत्वद्वयाभिधानं न भवतीति

कर्मसमभिव्याहृतनीवहादिदुहादिरूपद्विकर्मकोत्तरकर्मप्रत्ययस्यैव कर्मत्वद्वयानभिधायकत्वनियमात् प्रकृते च कर्मद्वयस्यैव तुल्यत्वात्। विकृतेराख्यातार्थविशेष्यत्वेऽप्याऽऽख्यातस्य तत्समान-वचनत्वाऽनियमः "गृह्णाति वाचकः संख्यां प्रकृतेर्विकृतेर्न हि" इत्यनुशासनसिद्धप्रकृतिविकृतिसमभिव्याहृतलकारीयविकारसंख्या-बोधकत्वाभावव्युत्पत्तिनिर्वाह्य इत्युक्तस्थले न क्रियापद-स्यैकवचनान्तता, तदर्थान्वितसंख्याबोधकस्यैवाख्यातस्य तत्पद-समानवचनत्वनियमात्, न तु तद्विशेष्यकस्वार्थकर्मत्वादिबोध-जनकाख्यातमात्रस्येति।

तदसत्– विकारविकारिणोर्द्वयोराख्यातार्थविशेष्यत्वे

नियमोस्ति न तु सर्वत्र तथा च प्रकृते='काष्ठानि भस्मराशिः क्रियन्ते' इत्यत्र कर्मद्वयस्यैव तुल्यत्वादुभयकर्मत्वमाख्यातेनाभिधीयते एवेति न प्रथमा-ऽनुपपत्तिरित्यर्थः। ननु यदि विकृतिभूतो यो भस्मराशिस्तत्कर्मत्वमप्याख्या-तेनाभिधीयते तदा विकृतेः=भस्मराशेरप्याख्यातार्थविशेष्यत्वं प्राप्तमेव तथा चाख्यातस्य विकृतिवाचकपदसमानवचनत्वं किं न स्यादित्याशङ्क्याह– विकृतेरिति, विकृतेराख्यातार्थविशेष्यत्वेऽप्याख्यातस्य विकृतिवाचकपद-समानवचनत्वं न भवति किं तु प्रकृतिवाचकपदसमानवचनत्वमेव भवति, अत्र प्रमाणमाह–गृह्णातीति, वाचकः=कर्मत्ववाचक आख्यातप्रत्ययः। इत्यनुशासनेन सिद्धा या प्रकृतिविकृत्युभयसमभिव्याहृतलकारस्य=आख्यातस्य विकृतिसंख्याबोधकत्वाभावविषया व्युत्पत्तिस्तन्निर्वाह्यः=तत्प्रमाणक आख्यातस्य विकृतिवाचकपदसमानवचनत्वाऽनियमोस्तीत्युक्तस्थले='काष्ठानि भस्मराशिः क्रियन्ते' इत्यत्र न क्रियापदस्यैकवचनान्तता। आख्यातस्य यदर्थान्वितसंख्या-बोधकत्वं भवति तद्वाचकपदसमानवचनत्वं भवति नत्वाख्यातार्थविशेष्य-मात्रवाचकपदसमानवचनत्वमित्यत्राख्यातस्य काष्ठपदसमानवचनत्वमेव न भस्मराशिपदसमानवचनत्वमित्यर्थः। तद्विशेष्यकेति– यथा भस्मराशिविशेष्यको यः स्वार्थभूतः कर्मत्वादिस्तद्विषयकबोधजनकाख्यातमात्रस्य न तद्वाचकपद-समानवचनत्वं भवतीति विकृतेराख्यातार्थविशेष्यत्वेपि न तद्वाचकपदसमान-वचनत्वमाख्यातस्येति प्राप्तम्।

वाक्यभेदापत्तेः। 'घटपटौ स्तः' 'घटपटौ दृश्येते' इत्यादौ विशेष्यभेदेऽपि विशेष्यतावच्छेदकद्वित्वादेरेकधा भानान्न वाक्यभेदः, अत्र च न तादृशविशेष्यतावच्छेदकभानमस्ति येन तत्रैवाऽत्राप्येकवाक्यतानिर्वाहः (स्यात्?)। न चागत्येष्यते एवात्र वाक्यभेद इति वाच्यम्, तथा सत्येकवाक्यार्थपरस्य 'काष्ठं क्रियते' 'भस्म क्रियते' इत्येतादृशप्रयोगस्यापत्तेः। 'काष्ठं भस्म क्रियते' इति वाक्यजबोधस्य काष्ठविकृतिर्भ-

---

परिहरति– तदसदिति, विकारविकारिणोः=विकृतिप्रकृत्योरुभयोरप्याख्यातार्थविशेष्यत्वे प्रतिविशेष्यं। वाक्यसमाप्तिनियमेन वाक्यभेदः स्याद् यथा–'काष्ठानि भस्मराशिः क्रियन्ते' इत्यत्र 'काष्ठानि क्रियन्ते' 'भस्मराशिः क्रियते' इति। ननु यथा 'घटपटौ स्तः' इत्यादौ घटपटयोरुभयोरप्याख्यातार्थविशेष्यत्वेपि न वाक्यभेदस्तथा प्रकृतिविकृत्योरुभयोरप्याख्यातार्थविशेष्यत्वेऽपि नोक्तस्थले वाक्यभेद इत्याशङ्क्याह–घटपटाविति, 'घटपटौ स्तः' इत्यादौ विशेष्यभेदेपि विशेष्यतावच्छेदकं द्वित्वमेवेति 'घटपटौ द्वौ स्तः' इत्येवं शाब्दबोधस्वीकारान्न वाक्यभेदप्रसङ्गः। अत्र='काष्ठानि भस्मराशिः क्रियन्ते' इत्यत्र च न तादृशस्यैकस्य विशेष्यतावच्छेदकस्य मानमस्ति येन तत्रेव='घटपटौ स्तः' इत्यत्रेवात्रापि='काष्ठानि भस्मराशिः क्रियन्ते' इत्यत्राप्येकवाक्यतानिर्वाहः स्यादित्यर्थः, स्यादिति शेषः। ननु गत्यभावादिष्ट एव वाक्यभेद इत्याशङ्क्याह–न चेति, परिहारमाह–तथा सतीति, उक्तस्थले वाक्यभेदस्येष्टत्वे 'काष्ठानि भस्मराशिः क्रियन्ते' इत्यस्य स्थाने 'काष्ठं क्रियते' 'भस्म क्रियते' इति वाक्यद्वयस्यापि प्रयोगः स्यात् न चैतदिष्टम्–काष्ठस्य सिद्धत्वादिति न वाक्यभेदेष्टापत्तिः संभवति। किं च यदि 'काष्ठं भस्म क्रियते' इत्यादिप्रकृतिविकृतिसमभिव्याहारस्थले वाक्यभेद एव स्यात्तदा काष्ठभस्मनोः प्रकृतिविकृतिभावस्य भानासंभवात् काष्ठभस्मनोः पृथक् पृथग् वाक्यबोध्यत्वाद् भस्म काष्ठविकृतिर्वाऽन्यविकृतिर्वेति संशयोच्छेदकत्वमुक्तवाक्यजन्यबोधस्य न स्याद् अस्ति चैतत्संशयोच्छेदकत्वमिति न वाक्यभेदः स्वीकर्तुं शक्यते इत्यर्थः। ननु वाक्यभेदाभावेऽपि तव मते कथमेतत्संशयोच्छेदकत्वमुक्तवाक्यजन्यबोधस्य स्यादित्याशङ्क्याह–अस्मन्मते इति, अस्मन्मते तु 'काष्ठं भस्म क्रियते' इत्यादौ वाक्यभेदो नास्तीति काष्ठोच्छेदकत्वरूपं यत्

स्माऽन्यविकृतिर्वेति संशयनिवर्तकत्वानुपपत्तेः– काष्ठभस्मनोः प्रकृतिविकारभावाऽभानात्। अस्मन्मते च काष्ठोच्छेदकत्वरूप-काष्ठकर्मकत्व-भस्मनिर्वर्तकत्वरूपतत्कर्मकत्वयोरेकविशिष्टेऽपरान्वये एव पूर्वोपदर्शितरीत्या काष्ठोच्छेदप्रयोज्योत्पत्तिकत्वरूपकाष्ठ-प्रकृतिकत्वस्य भस्मनि लाभसंभवादिति चेत्?,

सत्यम्– 'काष्ठं भस्म क्रियते' इत्यादौ भस्मादि-निर्वर्त्यकर्मताया लकारेणानभिधानेऽपि तत्कर्मताया धात्वर्थ संसर्गतया भानोपगमेन तादृशकर्मोत्तरं प्रथमायाः साधुता।

काष्ठकर्मकत्वं तद्विशिष्टे एव करोत्यर्थव्यापारेऽपरस्य भस्मनिर्वर्तकत्वरूपस्य तत्=भस्मकर्मकत्वस्यान्वयो भवतीति पूर्वम् "एवं च तण्डुलान्" इत्यादिनोपदर्शितरीत्यैव काष्ठोच्छेद (काष्ठनाश) प्रयोज्योत्पत्तिकत्वरूपस्य काष्ठप्रकृतिकत्वस्य भस्मनि लाभसंभवात् काष्ठभस्मनोः प्रकृतिविकृतिभाव-भानलाभेन 'काष्ठं भस्म क्रियते' इति वाक्यबोधस्योक्तसंशयनिवर्तकत्वसंभवाद् भस्म काष्ठविकृतिरेवेति निश्चयोपि संभवत्येवेत्यर्थः। एवकारो भिन्नक्रम इति 'पूर्वोपदर्शितरीत्यैव' इत्यन्वयः। "अपरान्वये" इत्यत्र 'अपरान्वयेन' इति पाठो युक्तः।

अद्येत्यादिना कृतायाः शङ्काया उत्तरमाह–सत्यमिति, 'काष्ठं भस्म क्रियते' इत्यादौ भस्मादिकर्मतायाः संसर्गत्वं स्वीक्रियते तथा च धात्वर्थे भस्मकर्मकत्वमस्तीति भस्मकर्मकत्वसंबन्धेन किं वा निरूपकतासंबन्धेन धात्वर्थे वर्तमानभस्मकर्मत्वसंबन्धेन काष्ठकर्मत्वस्यान्वयो भवतीति भस्मकर्म-त्वस्य संसर्गत्वेन तदुपस्थित्यपेक्षाभावात् लकारेण=आख्यातेन भस्मकर्मत्वान-भिधानेपि तादृशकर्मोत्तरम्=भस्मपदोत्तरं द्वितीयापेक्षा नास्तीति प्रथमायाः साधुता, प्रकारतया भासमानस्यैवोपस्थितेरपेक्षितत्वात्। अत्रापि यदि भस्मकर्मतायाः प्रकारत्वमिष्टं स्यात्तदा लकारेण तदनभिधाने तदुपस्थापकद्वितीयाया अपेक्षा स्यात् न चैवमस्तीत्यर्थः। किं च यत्र कर्मत्वस्य प्रातिपदिकार्थविशेष्यत्वेन विवक्षा भवति तत्रैव तत्प्रातिपदिकाद् द्वितीया भवति न चात्र कर्मत्वस्य भस्मविशेष्यत्वेन विवक्षास्ति संसर्गत्वेनैव विवक्षितत्वादिति न भस्मपदादत्र द्वितीयापत्तिरित्याह–प्रातिपदिकार्थेति। उक्ते दृष्टान्तमाह–यथेति, अर्घप्रदानकाले

प्रातिपदिकार्थविशेष्यतया कर्मत्वादिविवक्षायामेव द्वितीयादिविभक्तिसाधुत्वात्। यथा 'अर्घो नमः' इत्यादौ नमः पदार्थत्यागेऽर्घादिकर्मत्वबोधेऽप्यर्घादिपदात्प्रथमैव-निपातार्थे त्यागे कर्मतासंबन्धेनैव नामार्थस्यान्वयात्। एवम् 'भूतले न घटः' इत्यादावपि घटादिसंबन्धस्याभावे संसर्गतया भानात् षष्ठी- विषयेऽपि प्रथमा।

न च धात्वर्थे नामार्थस्य साक्षादन्वयोऽव्युत्पन्न इति प्रकृते कर्मतायाः संसर्गतया भानं न संभवतीति वाच्यम्, 'घटो नीलो भवति' 'काष्ठं भस्म भवति' इत्यादौ भवनादिक्रियायां नीलादेः कर्तृतासंबन्धेन साक्षादन्वयवदत्रापि व्युत्पत्तिवैचित्र्येण कर्मान्तरविशेषणतापन्नक्रियायामऽपरकर्मणः कर्मतासंबन्धेन

यदुच्यते 'अर्घो नमः' इति वाक्यं तत्र नमःपदार्थभूतस्त्यागः (प्रदानम्) अर्घकर्मक एवेति त्यागेऽर्घकर्मत्व (कर्मकत्व) बोधेप्यर्घपदादत्र प्रथमेवास्ति तत्कस्य हेतोः? नम इति निपातपदं तदर्थे त्यागे कर्मतासंबन्धेन नामार्थस्यार्घपदार्थस्यान्वयात् तथा च यथात्रार्घकर्मतायाः संसर्गतया भासमानत्वेन तदुपस्थापकद्वितीयापेक्षाभावादऽर्घपदात् प्रथमायाः साधुता एवमुक्तस्थलेपि भस्मकर्मतायाः संसर्गतयैव भासमानत्वेन तदुपस्थापकद्वितीयापेक्षाभावाद् भस्मपदात् प्रथमायाः साधुतेत्यर्थः। एवमिति—यथा 'अर्घो नमः' इत्यत्र निपातभूतनमःपदस्यार्थे त्यागेऽर्घकर्मत्वस्य संसर्गतयैव भानं भवतीत्यर्घपदात् प्रथमैव जाता एवम् 'भूतले न घटः' इत्यत्रापि नञर्थाभावे घटसंबन्धस्य घटप्रतियोगिकत्वस्य संसर्गतया भानात् तदुपस्थापकषष्ठ्यपेक्षाभावात् षष्ठ्याः स्थाने घटपदात् प्रथमैव जातेत्यर्थः।

ननु 'अर्घो नमः' इत्यत्र भवतु कर्मत्वस्य संसर्गतया भानम् तत्र नम इति निपातार्थत्यागे अर्घ इति नामपदार्थस्य कर्मतासंबन्धेन साक्षादन्वयेऽपि पूर्वोक्तव्युत्पत्तिविरोधाभावात् 'काष्ठं भस्म क्रियते' इत्यत्र तु भस्मकर्मतायाः संसर्गत्वमाश्रित्य तादृशकर्मतासंबन्धेनैव करोतिधात्वर्थे भस्मान्वयोपि कर्तव्यः स तु न संभवति धात्वर्थे साक्षान्नामार्थान्वयस्याऽव्युत्पन्नत्वादित्याशङ्क्याह—न

साक्षादन्वयोपगमात्।

न चैवमपि कर्मत्वस्य प्रकृत्यर्थविशेष्यत्वेन विवक्षया 'काष्ठं भस्मराशिं क्रियते' इत्यादिप्रयोगापत्तिः, कर्मत्वान्तर-विशेषणतानापन्नक्रियायामेव द्वितीयया कर्मत्वं बोध्यते इति व्युत्पत्तिकल्पने? 'गौर्दुह्यते क्षीरम्' अजा नीयते ग्रामम्' इत्यादौ दोहननयनादिक्रियायां क्षीरग्रामादिकर्मकत्वानन्वयप्रसङ्ग इति वाच्यम्, प्रकृतिविकृत्युभयकर्मकस्थले तथा व्युत्पत्तेः।

चेति। परिहारमाह—घट इति, यथा पूर्वोक्तरीत्या 'घटो नीलो भवति' इत्यत्र नीलपदार्थस्य कर्तृतासंबन्धेन धात्वर्थे साक्षादेवान्वयस्तथा 'काष्ठं भस्म क्रियते' इत्यत्रापि काष्ठरूपकर्मान्तरविशेषणतापन्नकरोत्यर्थक्रियायां भस्मरूपा-ऽपरकर्मणः कर्मतासंबन्धेन साक्षादेवान्वय इत्यर्थः। अत्र च 'चैत्रादिवृत्तिव्यापार-जन्यभस्मरूपविकाराश्रयः काष्ठम्' इति शाब्दबोधोदयात् क्रियायाः काष्ठरूप-कर्मविशेषणत्वं विज्ञेयम्।

ननु भस्मकर्मतायाः संसर्गत्वविवक्षायां भवतूक्तस्थले भस्मपदात् प्रथमा अथापि कर्मत्वस्य प्रकृत्यर्थविशेष्यत्वविवक्षायां विशेष्यभूतकर्मत्व-स्योपस्थित्यपेक्षया तदुपस्थापकद्वितीयाया आवश्यकताया 'काष्ठं भस्मराशिं क्रियते' इति प्रयोगापत्तिः स्यादेव। यदि चैतद्दोषपरिहाराय कर्मान्तरविशेषणता-नापन्नक्रियायामेव द्वितीयया कर्मत्वं बोध्यते=द्वितीयोपस्थापितकर्मताया अन्वयो भवतीति व्युत्पत्तिः कल्प्यते तथा च काष्ठरूपकर्मान्तरविशेषणतापन्नक्रियायां भस्मराशिकर्मत्वस्यान्वयो न संभवतीति न 'काष्ठं भस्मराशि क्रियते' इति प्रयोगापत्तिरित्युच्यते? तदाऽनया व्युत्पत्त्या 'गौदुर्ह्यते क्षीरम्' 'अजा नीयते ग्रामम्' इत्यादौ गवाजादिकर्मान्तरविशेषणतापन्नायां दोहननयनादिक्रियायामपि क्षीरग्रामादिकर्मकत्वस्यान्वयो न भविष्यतीति क्षीरादिपदोत्तरं द्वितीयानुपपत्ति-रित्याशङ्क्याह—न चेति। परिहारमाह—प्रकृतीति, गोक्षीरयोरजाग्रामयोश्च प्रकृतिविकृतिभावो नास्तीत्यत्र न सा व्युत्पत्तिः कल्प्यते इति नात्र गवाजादि-कर्मान्तरविशेषणतापन्नोक्तक्रियायां क्षीरग्रामादिकर्मकत्वानन्वयप्रसङ्गः। प्रकृतिविकृतिभावस्थले च कर्मत्वान्तरविशेषणतानापन्नक्रियायां द्वितीयया

यथोक्तातिप्रसङ्गवारणाय दर्शिता व्युत्पत्तिः कल्प्यते तथा कर्तृत्वविशेषणतयाऽभासमानायामेव क्रियायां तृतीयार्थकर्तृत्वान्वय इत्यपि व्युत्पत्तिः कल्प्या, अन्यथा प्रकृत्यर्थविशेष्यतया कर्तृत्वविवक्षया 'काष्ठं भस्मना भवति' इति प्रयोगस्य दुर्वारत्वात्।

उत्पत्तिप्रयोजकनाशप्रतियोगित्वरूपविकार एव 'काष्ठं भस्म भवति' इत्यादौ धात्वर्थः, आधेयत्वरूपं तत्कर्तृत्वमेव

कर्मकत्वं बोध्यते' इति व्युत्पत्तिः कल्प्यते काष्ठभस्मनोश्च प्रकृतिविकृतिभाव एवेति काष्ठरूपकर्मान्तरविशेषणतापन्नक्रियायां द्वितीयोपस्थाप्यकर्मत्वस्यान्वयाऽस्वीकारात् 'काष्ठं भस्मराशिं क्रियते' इति प्रयोगापत्तिर्नास्तीत्यर्थः। यथैतदतिप्रसङ्गवारणायैषा व्युत्पत्तिः कल्प्यते तथा 'कर्तृत्वविशेषणतयाऽभासमानायामेव क्रियायां तृतीयार्थकर्तृत्वान्वयो भवति न तु कर्तृत्वविशेषणतया भासमानायामपि' इत्यपि व्युत्पत्तिः कल्प्यते तथाच काष्टरूपकर्तृविशेषणतया भासमानायां भवनक्रियायां भस्मपदोत्तरतृतीयार्थकर्तृत्वस्यान्वयासंभवाद् भस्मपदात्तृतीयापत्त्यभावात् 'काष्ठं भस्मना भवति' इत्यनिष्ठप्रयोगनिवारणं भविष्यति अन्यथा न भविष्यतीत्याह—यथोक्तेति। 'काष्ठं भस्म भवति' इत्यनिष्टप्रयोगनिवारणं भविष्यति अन्यथा न भविष्यतीत्याह—यथोक्तेति। 'काष्ठं भस्म भवति' इत्येव प्रयोगो भवति अत्र 'भस्मानुकूलभवनव्यापाराश्रयः काष्ठम्' इति शाब्दबोधः। प्रकृत्यर्थविशेष्यतया=भस्मविशेष्यतया।

उत्पत्तीति—'काष्ठं भस्म भवति' इत्यत्र भस्मोत्पत्तिप्रयोजको यः काष्ठनाशस्तत्प्रतियोगित्वरूपो यः काष्ठे जायमानो विकारः स एव भूधात्वर्थः, स च काष्ठेऽस्तीति काष्ठाधेयत्वं यद् धात्वर्थेऽस्ति तत् संसर्गतया भासते तेनैवाधेयत्वसंसर्गेण धात्वर्थे काष्ठान्वयः, तच्चाधेयत्वं काष्ठनिष्ठमुक्तधात्वर्थनिरूपितकर्तृत्वरूपमेवेत्यर्थः। काष्ठेनेति—'काष्ठेन भस्मना भूयते' इत्यत्रोत्पत्तौ यद् भस्माधेयत्वमस्ति तद् भस्मपदोत्तरतृतीयोपस्थाप्यमस्तीति प्रकारतया भासते एवं नाशप्रतियोगित्वे यत् काष्ठाधेयत्वं तदपि काष्ठपदोत्तरतृतीयोपस्थाप्यमस्तीति प्रकारतया भासते न संसर्गतयेत्यर्थः। ननु 'काष्ठेन भस्म भूयते' इति प्रयोगः किं न स्यादित्याशङ्क्याह—कर्तृत्वेति, उत्पत्त्यनुकूलव्यापारो

संबन्धमर्यादया भासते। 'काष्ठेन भस्मना भूयते' इत्यादौ भस्माद्याधेयत्वमुत्पत्तौ काष्ठाधेयत्वं च नाशप्रतियोगित्वे तृतीयोपस्थाप्यं प्रकारतया भासते। कर्तृत्वविशेषणतया भासमानस्य निरुक्तभवनस्यान्तर्गतायामेवोत्पत्तौ भस्मादेराधेयत्वं संबन्धतया भासते इति व्युत्पत्तेः 'काष्ठेन भस्म भूयते' इत्यादयो न प्रयोगाः—भावाख्यातस्य कर्तृत्वाबोधकत्वात्। कर्मत्वान्तर-विशेष्यतापन्नकृत्यादौ कर्मत्वस्य संसर्गतया भानमव्युत्पन्नमिति 'काष्ठं भस्मराशिः करोति' इत्यादयो न प्रयोगाः।

हि भवनपदार्थ इत्युत्पत्तिर्भवनान्तर्गता ज्ञेया यत्र कर्तृत्वविशेषणतया धात्वर्थभवनस्य भानं भवति तादृशभवनान्तर्गतायामुत्पत्तौ भस्माद्याधेयत्वं संबन्धतया भासते यथा 'काष्ठं भस्म भवति' इत्यत्राख्यातस्य कर्तरि जायमानत्वाद् धात्वर्थस्य कर्तृत्वविशेषणत्वमस्ति व्यापारकर्तृत्ववानिति बोधोदयादिति तत्र भस्माधेयत्वस्य संसर्गतया भानसंभवाद् भस्मपदोत्तरं तृतीयापेक्षा नास्ति, 'काष्ठेन भस्म भूयते' इत्यत्र तु भावे आख्यातमस्ति तस्य च कर्तृत्वाबोधकतया धात्वर्थस्य कर्तृत्वविशेषणत्वं नास्तीति न भस्माधेयत्वस्य संसर्गतया भानं स्वीक्रियते किं तु प्रकारतयैव तथा चाधेयत्वोपस्थापकतृतीयाया आवश्यकत्वात् 'काष्ठेन भस्मना भूयते' इत्येव प्रयोगो भवति न तु 'काष्ठेन भस्म भूयते' इत्यपीत्यर्थः। कर्मत्वान्तर-विशेष्यतापन्नकृत्यादिधात्वर्थे कर्मत्वान्तरस्य संसर्गतया भानं न भवतीति 'काष्ठं भस्मराशिः करोति' इति प्रयोगो न भवति—अत्र काष्ठनिष्ठ-कर्मत्वविशेष्यतापन्नक्रियायां भस्मराशिनिष्ठकर्मत्वस्य संसर्गतयैव भानं संभवति-भस्मराशिपदोत्तरं कर्मत्वोपस्थापकद्वितीयाया अभावात् कर्मत्वान्तर-विशेष्यतापन्नकृत्यादौ च कर्मत्वान्तरस्य संसर्गतया भानं न स्वीक्रियते किं तु प्रकारतयैव प्रकारत्वं चानुपस्थितस्य न संभवतीति कर्मत्वोपस्थापकद्वितीयाया आवश्यकत्वात् 'काष्ठं भस्मराशिं करोति' इत्येव प्रयोगो भवतीत्यर्थः। 'काष्ठनिष्ठकर्मत्वनिरूपको यो भस्मराशिकर्मको व्यापारस्तादृशव्यापारवान्' इत्यत्र बोधोदयात् कृत्यादिव्यापारस्य कर्मत्वविशेष्यत्वं सुस्पष्टमेव।

"अधिशीङ्स्थासां कर्म" इति सूत्रसंपन्नप्रयोगमुदाहर्तुमारभते-अधिशीङिति,

"अधिशीङ्स्थासां कर्म" इत्यादिनां यत्राधारस्य कर्मसंज्ञा तत्राऽऽधारत्वमाधेयत्वं वा द्वितीयार्थः, 'स्थलीमधिशेते' इत्यादौ तादृशार्थे द्वितीयायाः 'स्थल्या अधिशयिता' इत्यादौ कृत्प्रयोगे षष्ठ्याश्च साधुत्वार्थमेव कर्मसंज्ञाविधानात्। अथ कृञर्थव्यापारान्तरं धात्वर्थेऽन्तर्भाव्य शयनादिरूपफलावच्छिन्नव्यापारार्थकसोपसर्गशीङ्प्रभृतिधात्वर्थतावच्छेद-

---

प्राचीनमते आधारत्वमर्थः, किं तु आधारत्वस्य धात्वर्थे निरूपकत्वसंबन्धेनान्वयः स्याद् निरूपकत्वसंबन्धस्य च वृत्त्यनियामकतया अभावीयप्रतियोगितानवच्छेदकत्वेन पूर्वोक्तरीत्या 'न स्थलीमधिशेते' इत्यत्र शाब्दबोधो न स्यादिति नवीनमतेनाधायेत्वं द्वितीयार्थस्तच्चाश्रयतासंबन्धेन वर्तते आश्रयतासंबन्धस्य च वृत्तिनियामकतया नोक्तदोष इत्यर्थः। कर्मसंज्ञाविधानप्रयोजनमाह—स्थलीमिति, शेते इत्यत्र भूपृष्ठादिसंयोगो धात्वर्थः। स्थलीपदार्थस्याधिकरणत्वेन तद्वाचकस्थलीपदोत्तरं सप्तम्या युक्तत्वेपि 'स्थलीमधिशेते' 'स्थल्या अधिशयिता' इत्यादौ कर्मत्वबोधकद्वितीयाषष्ठ्योः साधुत्वार्थे सूत्रकारेण कर्मसंज्ञा विहितेत्यर्थः। तादृशार्थे=अधिकरणार्थे। ननु 'स्थलीमधिशेते' इत्यस्य 'स्थल्यां शयनं करोति' इत्ययमेवार्थस्तत्र करोतिपदवाच्यव्यापारस्य भूपृष्ठादिसंयोगरूपे धात्वर्थेऽन्तर्भाव कर्त्तव्य इत्युक्तवाक्यस्य 'भूपृष्ठादिसंयोगानुकूलकृतिमान्' इत्यर्थः स्यात् अत्र च भूपृष्ठादिसंयोगः फलमेवेति यथा संयोगादिरूपफलाश्रयतया 'ग्रामं गच्छति' इत्यादौ ग्रामादेः कर्मसंज्ञा भवति तथैव भूपृष्ठादिसंयोगरूपफलाश्रयत्वात् स्थल्यादीनामपि कर्मसंज्ञा संभवत्येवेति पुनः "अधिशीङ्" इत्यादिसूत्रेण स्थल्यादीनां कर्मसंज्ञाविधानं विधायकसूत्रं च व्यर्थमेवेत्याशङ्कते—अथेति। अत्र पक्षे भूपृष्ठादिसंयोगानुकूलव्यापारो धात्वर्थः। शयनादीति—शयनादिरूपं यत्फलं तदवच्छिन्नव्यापारार्थको यः सोपसर्गः=अध्युपसर्गसंयुक्तः शीङ्प्रभृतिधातुस्तदर्थतावच्छेदकं यच्छयनादिरूपं फलं तादृशफलाश्रयतयाप्याधारस्य= स्थल्यादेः कर्मत्वं संभवत्येवेत्यर्थः। क्रियाजन्यफलशालित्वं हि कर्मत्वमत्र च यच्छयनरूपं फलमुक्तं तत्तु शीङ्धात्वर्थ एव न तु धात्वर्थव्यापारजन्यमिति तादृशशयनाश्रयीभूतायाः स्थल्याः कर्मत्वं न स्यादित्युक्तम्— कृञर्थव्यापारेति, धात्वर्थशयने कृञर्थव्यापारस्यान्तर्भावे च कृते शयनस्य तादृशकृञर्थव्यापारजन्यत्वं प्राप्तमिति

कशयनादिरूपफलाश्रयतयाऽऽधारस्य कर्मत्वोपपादनसंभवात् तादृशसूत्राणां वैयर्थ्यमेव, अध्याद्युपसृष्टशीङ्प्रभृतीनामेव च तादृशार्थे निरूढलक्षणा न त्वनुपसृष्टानामऽतो न 'स्थलीं शेते' इत्यादयः स्वारसिकाः प्रयोगा इति चेत्?, न– धातोर्मुख्यार्थ-परत्वेऽपि दर्शितप्रयोगनिर्वाहाय भवगता पाणिनिमुनिना तादृश-सूत्रप्रणयनात्। तदप्रणीतवतां शर्ववर्मप्रभृतीनां मुख्यार्थपराणाम् 'स्थल्यामधिशेते' इत्यादिप्रयोगाणां साधुताया दुर्वारत्वाच्च।

कालाध्वदेशानामऽकर्मकक्रियायोगे कैश्चित् कर्मप्रत्य-यार्थं विभाषया कर्मत्वमनुशिष्यते। अन्ये तु क्रियान्तराऽन्त-

तादृशक्रियाजन्यशयनरूपफलाश्रयतया स्थल्यादीनां कर्मत्वं प्राप्नोतीति भावः। नन्वेवं शयनरूपफलाश्रयत्वात् स्थल्याः कर्मत्वापत्त्या 'स्थली शेते' इत्यपि प्रयोगः स्यादित्याशङ्क्याह– अध्याद्यपसृष्टेति, तादृशार्थे=अन्तर्भूतकृञर्थव्यापारे धात्वर्थे, अध्युपसर्गसंयोगे सत्येव कृञर्थव्यापारस्य धात्वर्थेऽन्तर्भावो भवति न त्वध्युपसर्गसंयोगाभावेपीति न 'स्थली शेते' इति प्रयोगापत्तिरित्यर्थः। परिहरति– नेति, उक्तार्थे निरूढलक्षणास्वीकारे स्थल्यादीनां त्वदुक्तरीत्या कर्मत्वसंभवेपि निरूढलक्षणाभावपक्षे धातोर्मुख्यार्थपरत्वे तु स्थल्यादीनां क्रियाजन्यफलशालित्वाभावात् कर्मत्वं न संभवतीति मुख्यार्थपक्षे कर्मत्वाप्राप्त्या दर्शितप्रयोगस्य 'स्थलीमधिशेते' इत्यादिप्रयोगस्य निर्वाहाय "अधिशीङ्" इत्यादिसूत्रं प्रणीतमिति न वैयर्थ्यम्। यैरेतादृशकर्मसंज्ञाविधायकं सूत्रं न प्रणीतं तेषां व्याकरणमतेन मुख्यार्थपक्षे कर्मत्वप्राप्त्यभावात् सप्तम्या 'स्थल्यामधिशेते' इत्यादिप्रयोगाणामपि साधुत्वं प्राप्नुयात् न चैतदिष्टमित्यर्थः। कृञर्थव्यापारानन्तर्भावेन भूपृष्ठादिसंयोगमात्रस्य धात्वर्थत्वपक्षे 'शेते' इत्यस्य 'भूपृष्ठादिसंयोगाश्रयः' इत्येवार्थः।

'मासमास्ते' इत्यादिप्रयोगानुदाहरति– कालाध्वेति। कैश्चित्=वार्तिक-कारादिभिः, तथा च वार्तिकम्– "अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्" इति तत्र देशस्य कर्मत्वं यथा– 'कुरून् स्वपिति' इति, कालस्य कर्मत्वं यथा–'मासमास्ते' इति, भावस्य (क्रियायाः कर्मत्वं यथा 'गोदोहमास्ते' इति, गन्तव्याध्वनः कर्मत्वं यथा–

भार्वेनोक्तरीत्या तत्र पाक्षिकं कर्मप्रत्ययमुपपादयन्तस्तन्नानुशासति, उक्तं च तैः–

"कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते॥" इति।

तन्मते च 'मासमधीते' 'मासमास्ते' 'योजनं धावति' इत्यादावभिव्याप्त्यर्थे "कालाध्वनोरत्यन्तसंयोगे" इत्यनेन द्वितीयाविधानं यद्यप्यनर्थकम्–धात्वर्थेऽध्ययनस्थित्यादि-विशेषणतयाऽभिव्यापनात्मकक्रियाया अन्तर्भावेन तत्कर्मतया 'क्रोशमास्ते' इति। अन्ये=सूत्रकारादयस्तु कालादीनां कर्मसंज्ञाविधानं न कुर्वन्ति 'मासमास्ते' इत्यादावासनरूपधात्वर्थे क्रियान्तरस्य=अभिव्याप्तिरूपक्रियाया अन्तर्भावोऽस्ति– मासाद्यभिव्याप्तेरासनादौ सत्त्वे एव कालादीनां कर्मत्वस्येष्टत्वादिति तादृशाभिव्याप्त्यैव कर्मत्वस्य प्राप्तेः केवलं कर्मप्रत्ययम्= "कालाध्वनोरत्यन्तसंयोगे" इत्यनेन द्वितीयाविधानं कुर्वन्ति। अत्यन्तसंयोगे एव द्वितीया भवति नान्यत्र 'मासस्य द्विरधीते' इत्यादावित्यभिप्रायेणोक्तम्–पाक्षिकमिति। तत्=कर्मत्वम्। कर्मत्वस्य स्वयं प्राप्तौ प्रमाणमाह– कालभावेति, अन्तर्भूता अभिव्याप्तिरूपा क्रिया येषामेतादृशैरकर्मकैर्धातुभिर्योगे कालभावाध्वदेशानामभिव्याप्तिनिरूपितं कर्मत्वमुपजायते एवाऽभिव्याप्तेः सकर्मकत्वादिति कालादीनामकर्मकधातुयोगे कर्मसंज्ञाविधानस्य प्रयोजनं नास्तीत्यर्थः। तन्मते चेति– तन्मते=कालादीनामुक्तरीत्या स्वयमेव कर्मत्वप्राप्तिमते 'मासमधीते' इत्यादौ धात्वर्थभूताध्ययनस्थित्यादिविशेषणीभूताया अभिव्याप्तिक्रियाया धात्वर्थेऽन्तर्भावोऽस्तीति धात्वर्थस्याकर्मकत्वेप्यन्तर्भूताभिव्याप्तिक्रियायाः सकर्मकत्वेन कालादीनां तत्कर्मतया तत्र तत्र=कालादिबोधकमासादिपदोत्तरम् "कर्मणि द्वितीया" इत्यनेनैव द्वितीयाप्राप्तिः संभवतीति पुनर्द्वितीयाविधानं यद्यप्यनर्थकमेवेत्यर्थः। विशेषणस्यैवान्तर्भावसंभवादऽभिव्यापनात्मकक्रियाया अध्ययनादिविशेषणत्वमुक्तम्– अध्ययनस्थित्यादीति। नन्वेवं विनिगमनाविरहात् कर्मसंज्ञाविधानमेवानर्थकं किं न स्यात्–'मासमास्ते' इत्यादौ द्वितीययैव कर्मत्वबोधसंभवादित्याशङ्क्याह– तादृशधात्वर्थेति, तादृशधात्वर्थे=अकर्मकधात्वर्थेऽभिव्याप्त्यनन्तर्भावपक्षेपि 'मासमास्ते' इत्यादौ द्वितीयया

तत्र तत्र द्वितीयोपपत्तेः, तादृशधात्वर्थे व्याप्त्यनन्तर्भावे 'माससमास्ते' इत्यादौ द्वितीयया तद्बोधनेऽपि 'आस्यते मासः' 'इत्यादौ स्थित्यादिव्याप्यत्वलाभाऽनिर्वाहात्, तथापि 'मासं रमणीया' 'क्रोशं कुटिला नदी' इत्यादौ भवतीत्यस्याऽनध्याहारेऽपि द्वितीयायाः साधुतानिर्वाहकत्वेन भाष्यकृतस्तत्सूत्रं सार्थकयन्ति, तत्र हि रमणीयत्वाभिव्याप्यत्वं मासादौ प्रतीयते न च तत्र क्रियासमभिव्याहारोऽस्ति यत्राभिव्याप्तिरन्तर्भविष्यति तत्कर्मतया द्वितीया च स्यात्। एवम् 'माससमासिता' इत्यादावभिव्याप्त्यन्तर्भावेन मासस्य कर्मत्वोपपादनेऽपि कृद्योगात् षष्ठ्येव स्यान्न द्वितीयेत्यतोऽपि तत्सूत्रं सार्थकम्।

तद्बोधनेऽपि=कर्मत्वबोधनेपि तथाऽभिव्याप्तिबोधनेपि 'आस्यते मासः' इत्यत्र मासपदोत्तरद्वितीयाऽभावात् कर्मत्वबोधनं न संभवति तथा च मासस्य स्थितिव्याप्यत्वभानमपि न संभवति आसधातोरकर्मकत्वेन तदुत्तरं कर्माख्यातमपि न स्यात् कर्मसंज्ञाविधाने तु धातोरकर्मकत्वेऽपि मासादीनां संज्ञया कर्मत्वप्राप्तौ तत्र कर्माख्यातं संभवति मासादौ स्थित्यादिव्याप्यत्वभानमपि संभवति– कर्मत्वादिति कर्मसंज्ञाविधानं नानर्थकं किं तु द्वितीयाविधायकसूत्रमेवानर्थकमित्यर्थः। द्वितीयाविधायकसूत्रसार्थक्यमाह– तथापीति, 'वनराजिर्मासं रमणीया' इत्यादौ भवतीत्यादिक्रियाध्याहारे तत्राभिव्याप्तेश्चान्तर्भावे तादृशाभिव्याप्तिनिरूपितं मासादीनां कर्मत्वं संभवति, अनध्याहारपक्षे तु क्रियैव कापि नास्ति यदन्तर्भूताभिव्याप्तिनिरूपितं मासादीनां कर्मत्वं स्यादिति कर्मत्वाप्राप्तौ च द्वितीयायाः साधुत्वं न स्यादित्यनध्याहारपक्षे द्वितीयायाः साधुत्वार्थं भाष्यकृतः=भाष्यकारा द्वितीयाविधायकसूत्रं सार्थकयन्ति। उपपादयति–तत्रेति, तत्र='मासं रमणीया' इत्यादौ। तत्कर्मतया=अभिव्याप्तिकर्मतया। सूत्रसार्थक्ये उदाहरणान्तरमाह– एवमिति, 'माससमासिता' इत्यत्र मासस्य धात्वर्थेऽन्तर्भूताभिव्याप्तिनिरूपितकर्मत्वप्राप्तावपि सूत्राभावे "कर्तृकर्मणोः कृति" इत्यनेन षष्ठ्येव मासपदोत्तरं स्यात्– कृद्योगात् न तु द्वितीया न चात्र षष्ठीष्टेति द्वितीयाविधायकं सूत्रं सार्थकमेव सूत्रे सति षष्ठीं बाधित्वा सूत्रेण द्वितीयाप्राप्तिसंभवादित्यर्थः। 'आस्यते मासः' इत्यादौ कर्मसंज्ञाविधानमपि सार्थकम्।

अथ केयमभिव्याप्तिर्याऽत्यन्तसंयोग इत्युच्यते?, न तावद्– व्याप्यवृत्तिः कालिकः संबन्धः कालिकसम्बन्धस्य व्याप्यवृत्तित्वं व्याप्यकालानवच्छिन्नत्वम्, दिवसादिमात्र-वृत्तिर्मासादिनिष्ठसंबन्धो दिवसाद्यवच्छिन्न इति तत्र 'मासमास्ते' इति न प्रयोगः। मासपदार्थश्चात्र त्रिंशद्दिनमात्रस्थायी कश्चिदखण्डः पदार्थो न तु क्रियाप्रचयः– तथा सति दिनैकादिमात्रस्थायिनोऽपि सम्बन्धस्य कासुचित् क्रियासु व्याप्यवृत्तितया तत्र तथाव्यवहारापत्तेरिति युक्तम्–'चैत्रो मासं काश्यां तिष्ठति' इत्यादौ काशीसंयोगस्य मासव्यापकस्यैक-

---

"कालाध्वनोरत्यन्तसंयोगे" इत्यनेनाध्ययनादौ मासादिव्यापकत्वे द्वितीया स्यादिति प्रतिपादनादत्यन्तसंयोगपदेन याभिव्याप्तिरुच्यते तत्स्वरूपं पृच्छति– अथेति। न तावदित्यस्य इति युक्तमित्यनेनान्वयः। ननु व्याप्यवृत्तिः=व्यापको यः कालिकसंबन्धः स एवाभिव्याप्तिरस्ति 'मासमधीते' इत्यत्राध्ययनस्य कालिकसंबन्धेन संपूर्णमासवृत्तित्वाद् व्याप्यवृत्तित्वं कालिकसंबन्धस्य लभ्यते, कालिकसम्बन्धस्य व्याप्य वृत्तित्वं च मासव्याप्यदिनादिकालिकेनाऽनवच्छिन्न-त्वमेव, यत्र च मासादिनिष्ठोऽपि कालिकसम्बन्धो दिवसादिमात्रवृत्तित्वाद् दिवसाद्यवच्छिन्न एव कालिकसंबन्धस्य मासे व्याप्यवृत्त्याऽभावात् 'मासमास्ते' इत्यादिः प्रयोगो न भवति, मासे व्याप्यवृत्त्या सत्त्वे च प्रयोगो भवतीति दोषाभावात् यत्कालिकसंबन्धस्य मासादिव्याप्यवृत्तित्वं तदेवाभिव्याप्तिपदार्थः। मासपदार्थश्च त्रिंशद्दिनमात्रस्थायी कश्चिदखण्डपदार्थ एव ग्राह्यो न तु क्रियाप्रचयः=सूर्यपरिस्पन्दसमूहः, तथा सति=क्रियाप्रचयस्य मासपदार्थत्वे हि एकदिनमात्रनिष्ठसंबन्धस्यापि कासुचित् क्रियासु व्याप्यवृत्तितया (एकदिनमात्राध्ययनस्थित्यादेः सत्त्वाद् दिनादिसमूहस्यैव च मासपदार्थत्वात्) तत्र=तादृशदशायामपि तथाव्यवहारापत्तेः='मासमास्ते' 'मासमधीते' इत्यादिप्रयोगः स्यादिति तद्वारणाय त्रिंशद्दिनस्थायी कश्चिदखण्डपदार्थ एव मास इति स्वीकार्यमित्याशङ्क्याह–न तावदिति, इति युक्तमित्यन्तं पूर्वपक्षः। युक्तत्वाभावे हेतुमाह–चैत्र इति। यदि त्रिंशद्दिनमात्रस्थाय्यखण्डपदार्थ (काल) संबन्ध एवाभिव्याप्तिः स्यात्तदा 'चैत्रो मासं काश्यां तिष्ठति' इत्यादिवाक्यस्य

स्याभावेऽप्रामाण्यप्रसङ्गात्–संयोगव्यक्तीनां मासनिष्ठकालिकसंबन्धस्यावान्तरदण्डाद्यात्मककालावच्छिन्नत्वात्।

न च संयोगानां भेदेऽपि चैत्रीयसंगोगत्वाद्यवच्छिन्ननिरूपितकालिकसंबन्धावच्छिन्नाधारता मासव्यापिकैकैव सा च नावान्तरकालावच्छिन्नेति तत्र तदनवच्छिन्नत्वबोधकमुक्तवाक्यं भवेदेव प्रमाणमिति वाच्यम्, सामान्यघटितविशेषधर्मावच्छिन्नाधिकरणताकूटादेव सामान्यधर्मावच्छिन्नवत्ताप्रत्ययोपपत्तेः शुद्धसामान्यधर्मावच्छिन्ननिरूपिताधिकरणतायामतिरिक्तायां मानाभावात्। यत्र त्रिंशद्दिनेषु कमपि

प्रामाण्यं न स्यात्–मासव्यापकस्यैकस्य काशीसंयोगस्याऽसंभवाद् गमनादिना पूर्वपूर्वसंयोगस्य नाशात् तथा संयोगव्यक्तीनां यो मासनिष्ठकालिकसंबन्धस्तस्य मासावान्तरदण्डादिकालैरवच्छिन्नत्वात्– संयोगस्यैकत्वाभावादिति नोक्तनिरूपणं युक्तमित्यर्थः।

ननु 'मासं काश्यां तिष्ठति' इत्यत्र संयोगव्यक्तीनां दण्डाद्यात्मककालभेदेन भेदेपि संयोगत्वेन सकलसंयोगानामेकत्वात् संयोगत्वावच्छिन्ननिरूपिता कालिकसंबन्धावच्छिन्ना काशीनिष्ठाऽऽधारता मासव्यापिकैकैव नाऽवान्तरदण्डाद्यात्मककालावच्छिन्नेति तदनवच्छिन्नत्वबोधकम्=अवान्तरदण्डाद्यनवच्छिन्नत्वबोधकम् 'मासं काश्याम्' इत्युक्तवाक्यं तत्र=मासव्यापकोक्ताधारतायां भवेदेव प्रमाणमिति नोक्ताऽप्रामाण्यापत्तिप्रसङ्ग इत्याशङ्क्याह–न चेति। तत्तद्विशेषव्यक्तिनिरूपिताधिकरणतास्वीकारेण निर्वाहः संभवतीति सैव स्वीक्रियते न तु सामान्यधर्मावच्छिन्ननिरूपिता सामान्यत एकाधिकरणतेति न संयोगत्वावच्छिन्ननिरूपिता मासव्यापिका काश्यामेकाधिकरणता संभवतीति संयोगव्यक्तिभेदादधिकरणताभेदे प्राप्ते कालभेदेन च संयोगानां भेदे प्राप्ते मासव्यापकैकसंयोगासंभवात् 'मासं काश्याम्' इत्यस्योक्तमप्रामाण्यं स्यादेवेत्यभिप्रायेण परिहरति– सामान्यघटितेति, विशेषधर्मोपि सामानाधिकरण्येन सामान्यधर्मघटित एव भवतीति सामान्य (संयोगत्व) घटितविशेषधर्मस्तद्व्यक्तित्वं तत्तत्संयोगव्यक्तिनिष्ठतत्तद्व्यक्तित्वधर्मावच्छिन्ननिरूपिताधिकरणताकूटादेव=तत्तदधिकरणताभिरेव सामान्यधर्मो यः संयोगत्वं तदवच्छिन्नवत्ता=

कालमधीतं तत्र मासेऽध्ययनसंबन्धस्याऽव्याप्यवृत्तितया 'मासमधीते' इति प्रयोगानुपपत्तिरिति न शक्यते वारयितुम्।

उच्यते–अभिव्याप्तिर्यावदवयसंबन्धः, यत्समुदायो मासादिपदार्थस्त एव तदवयवाः, एवं च त्रिंशद्दिनानां मासपदार्थतया त्रिंशद्दिनेषु किंचित्किंचित्कालावच्छेदेनाध्ययनसम्बन्धेऽपि 'मासमधीते' इतिऽप्रयोगोपपत्तिः। त्रिंशद्दिनसंबन्धश्च दिनपर्याप्तत्रिंशत्त्वव्यापकत्वम्, तादृशत्रिंशत्त्वादेश्च मासादिपदप्रवृत्तिनिमित्तस्य मासादिपदादेव लाभाद् व्याप-

---

तदवच्छिन्ननिरूपिताधिकरणताप्रत्ययोपपत्तेः (निर्वाहात्) केवलं सामान्यधर्मावच्छिन्न=संयोगत्वावच्छिन्ननिरूपितायामतिरिक्तायामधिकरणतायां मानाभावात्, तत्तसंयोगव्यक्तिनिरूपिताधिकरणता च नैका संभवति दण्डादिभेदेन भेदादित्युक्तवाक्यस्याप्रामाण्यं तदवस्थमेवेत्यर्थः। किं च मासस्याऽखण्डपदार्थत्वे यत्र त्रिंशद्दिनेष्वपि किंचित् कालमधीते न तादृशाखण्डकालपर्यन्तं तत्र मासेऽध्ययनसंबन्धस्य व्याप्यवृत्तित्वाभावात् 'मासमधीते' इति प्रयोगानुपपत्तिरेव, इष्टं च तत्रास्य वाक्यस्य प्रामाण्यमित्याह–यत्रेति। कमपीत्यस्य नित्यं प्रति कमपीत्यर्थः।

पृष्टमभिव्याप्तिस्वरूपमाह– उच्यते इत्यादिना। यावत्=सकलः। यत्समुदायः=दिनादीनां समुदायः। ते=दिनादयः। तदवयवाः=मासावयवाः। उपसंहरति– एवं चेति, यावदवयवसंबन्ध एवाभिव्याप्तिर्मासावयवाश्च दिनान्येवेति प्रत्येकदिने किंचित्कालाध्ययनेपि त्रिंशद्भिर्दिनैरध्ययनसंबन्धस्य जातत्वेन तत्र 'मासमधीते' इति प्रयोग उपपद्यते एवेत्यर्थः। त्रिंशद्दिनसंबन्धपदार्थमाह– त्रिंशद्दिनेति, त्रिंशद्दिनपर्याप्तं यत् त्रिंशत्वं तद् व्यापकत्वमेव त्रिंशद्दिनसंबन्धपदार्थः। त्रिंशद्दिनपर्याप्तत्रिंशत्त्वं च मासपदप्रवृत्तिनिमित्तत्वान्मासपदलभ्यमेवेति पारिशेष्याद् व्यापकत्वमात्रं द्वितीयार्थः। तथा च त्रिंशद्दिनव्यापकाध्ययनकर्ता चैत्र इति वाक्यार्थबोधः। एवम् 'मासं काश्याम्' इत्यत्रापि मासावयवदिनेषु काश्यवयवप्रदेशेषु च संयोगोऽस्त्येवेति भवेदेव प्रामाण्यमिति ध्येयम्।

कत्वमात्रं द्वितीयार्थः।

व्यापकत्वं च व्याप्यविशेषाऽघटितमखण्डं दुर्वचमिति खण्डशोऽभावप्रतियोगितावच्छेदकत्वमभावश्च द्वितीयार्थः। प्रथमाभावे प्रकृत्यर्थो मासादिराधयतासंबन्धेनान्वेति। मासादिनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नस्य च

'मासधीते' इत्यादौ द्वितीयार्थभूतं यदध्ययनादौ मासादिव्यापकत्वं तस्य स्वरूपमाह—व्यापकत्वं चेति, अखण्डं व्यापकत्वं व्याप्यविशेषाऽघटितं दुर्वचमेव तथाहि यथा 'धूमसमानाधिकरणात्यन्ताभावाऽप्रतियोगित्वं व्यापकत्वं वह्नौ' इत्यादौ धूमादिलक्षणव्याप्यघटितमेव व्यापकत्वं वक्तुं शक्यते तथात्रापि 'मासत्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं व्यापकत्वमध्ययने' इत्येवं मासत्वलक्षणव्याप्यघटितमेवाऽखण्डं व्यापकत्वं वक्तुं शक्यते एतादृशखण्डस्य व्याप्यघटितस्य व्यापकत्वस्य द्वितीयार्थत्वे तद्घटितस्य व्याप्यस्य भासत्वस्यापि द्वितीयार्थत्वं प्राप्नुयात् न च भासत्वस्य द्वितीयार्थत्वं युक्तं मासत्वस्य प्रकृतिभूतमासपदवाच्यत्वात् द्वितीयार्थत्वस्वीकारे च मासत्वस्य द्विधा भानप्रसङ्गाद् व्याप्यानामनन्तत्वेन व्याप्यभेदेन व्यापकत्वभेदापत्त्या तदनुगमासंभवाच्च खण्डशोऽभावप्रतियोगितावच्छेदकत्वमभावश्च द्वितीयार्थ इत्युच्यते अर्थात्—व्याप्यसमानाधिकरणो योऽत्यन्ताभावस्तादृशाभावप्रतियोगितावच्छेदकत्वाभाववत्त्वमत्र व्यापकत्वं ग्राह्यमस्ति तस्यैव खण्डद्वयं कृतम्—"अभावप्रतियोगितावच्छेदकत्वमऽभावश्च" इति एतादृशं खण्डशो व्यापकत्वं द्वितीयार्थः, अत्र मासत्वप्रवेशाभावान्नोक्तदोषप्रसङ्ग इति भावः। तत्र 'मासमधीते' इत्यत्र मासेऽध्ययनाभावस्तु नास्तीति नृत्यभावो ग्राह्य इति मासनिष्ठो यः 'मासे नृत्यं न' इत्याकारकोऽत्यन्ताभावस्तत्प्रतियोगि नृत्यं प्रतियोगितावच्छेदकत्वं नृत्यत्वे प्राप्तं प्रतियोगितावच्छेदकत्वाभाववत्त्वमध्ययनत्वे वक्ष्यमाणसंबन्धेन चाध्ययने प्राप्तं तदेव व्यापकत्वं तत्र प्रथमाभावो मासनिष्ठ एवेति प्रथमाभावे द्वितीयाप्रकृत्यर्थस्य मासस्याऽऽधेयतासंबन्धेनान्वय इत्याह—प्रथमाभावेति। द्वितीयाभावस्य=मासनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावस्य प्रतियोगि मासनिष्ठाभावप्रतियोगितावच्छेदकत्वमेवेति तस्य तादृशद्वितीयाभावे प्रतियोगितया=प्रतियोगितारूपेण स्वप्रतियोगिकत्वसंबन्धेन चान्वय

प्रतियोगितयाऽभावान्तरेऽन्वयः, तस्य चान्वयितावच्छेदकचैत्रकर्तृकाध्ययनत्वादिरूपस्वाश्रयघटितपरम्परासंबन्धेनाऽध्ययनादावन्वयः।

प्रथमाभावे च प्रतियोगिव्यधिकरणत्वं विशेषणमुपादेयम्, तेन त्रिंशद्दिनेष्वेव च यत्राधीतं तत्र दिनावान्तरदण्डादावध्ययनाभावेऽप्युक्तप्रयोगोपपत्तिः। मासपदं च त्रिंशद्दिनपरमेव न तु तावत्कालस्थाय्यऽखण्डवस्त्वन्तरपरम्—एकदिनाध्ययनस्थलेऽपि तादृशाखण्डकाले प्रतियोगिव्यधिकरणाध्ययनाभावासत्त्वेन मासमधीते इति प्रयोगापत्तेः। मासघटकं च दिनं इत्याह—मासादिनिष्ठेति। अभावान्तरे=द्वितीयाभावे। तस्य=द्वितीयाभावस्य (मासनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावस्य) चान्वयितावच्छेदकं यच्चैत्रकर्तृकाध्ययनत्वम् (अध्ययनस्यैव विशेष्यत्वादन्वयित्वम्) तद्रूपो यः स्वाश्रयस्तद्घटितेन परम्परासंबन्धेन=स्वाश्रयाध्ययनत्ववत्त्वसंबन्धेनाध्ययनेऽन्वयः तथा हि—स्वं द्वितीयाभावः, मासनिष्ठाभावप्रतियोगितावच्छेदकत्वस्याभावोऽध्ययनत्वे वर्तते—अध्ययनत्वस्य मासनिष्ठाभावप्रतियोगितानवच्छेदकत्वादिति स्वस्य द्वितीयाभावस्याश्रयो यदध्ययनत्वं तद् अध्ययने वर्तते एवेति तादृशस्वाश्रयीभूताध्ययनत्ववत्त्वसंबन्धेन द्वितीयाभावस्याध्ययनेऽन्वय इति द्वितीयाभाववत्त्वादध्ययनस्य मासव्यापकत्वं प्राप्तमेवेत्यर्थः। मासत्वस्य व्याप्यत्वेन मासत्वव्याप्यमासस्यापि व्याप्यत्वं सुग्रहमेवेति विज्ञेयम्।

प्रथमाभावेति— प्रथमाभावः प्रतियोगिव्यधिकरणः=दिनादिनिष्ठोऽध्ययनव्यधिकरणो नृत्याद्यभाव एव ग्राह्यस्तेन त्रिंशद्दिनेष्वपि यदा नित्यं किंचित्किंचित्कालमधीतं तत्र दिनावान्तरदण्डेष्वध्ययनाभावेऽपि 'मासमधीते' इति प्रयोगानुपपत्तिर्नास्ति एतादृशस्याऽध्ययनसमानाधिकरणस्याध्ययनाभावस्याभावपदेनाऽग्रहणात्, प्रतियोगिव्यधिकरणस्यैवाऽभावस्य ग्रहणात्, अन्यथा प्रत्येकदिनेष्वध्ययनवदध्ययनाभावस्यापि सत्त्वाद् मासनिष्ठाभावप्रतियोगित्वमेवाध्ययनस्य स्यादिति 'मासमधीते' इति प्रयोगो नोपपद्येत्यर्थः। "त्रिंशिद्दिनेष्वेव" इत्यत्रत्य एवकारोऽयोगव्यवच्छेदपरः। मासपदार्थमाह—मासपदं चेति। यदि मासपदं त्रिंशिद्दिनस्थाय्यऽखण्डपदार्थपरं स्यात्तदा मासस्यैकस्मिन्नपि

सूर्योदयावधि सूर्योदयान्तरपर्यन्तावस्थाय्यऽखण्डवस्तुरूपं न तु क्रियादिप्रचयः—तथा प्रतियोगिव्यधिकरणाध्ययनाभावसत्त्वेन व्यापकत्वरूपद्वितीयार्थस्य बाधापत्तेः।

'दिवसं स्वपिति' इत्यादौ च दिवसादिपदं सूर्योदयावधिसूर्योदयान्तरपर्यन्तक्षणकूटपरमेव अतो नैकदण्डादि-

---

दिवसेऽध्ययने कृते तादृशाखण्डकालेऽध्ययनं जातमेवत्यध्ययनव्यधिकरणस्याऽध्ययनाभावस्यऽतादृशाखण्डकाले सत्त्वेन तत्रापि 'मासधीते' इति प्रयोगः स्यादेव प्रतियोगिव्यधिकरणाभावसत्त्वे एतत्प्रयोगस्येष्टत्वादित्यर्थः। दिनपदार्थमाह—मासघटकं चेति। क्रियादिप्रचयः=सूर्यपरिस्पन्दप्रचयः। तथा सति=यदि क्रियासमूह एव दिनपदार्थः स्यात्तदा एकैकक्रियाव्यक्तेरपि मासत्वाधिकरणत्वं स्यात्तथा च तादृशक्रियावच्छेदकदण्डादिषु प्रतियोगिव्यधिकरणस्याप्यध्ययनाभावस्य सत्त्वादेवाध्ययने व्यापकत्वाप्राप्त्या द्वितीयार्थो व्यापकत्वं नैव संभवेत्, न हि दिनस्य प्रत्येकक्षणे प्रत्येकदण्डे वाध्ययनं भवति किं तु केषुचिदेव दण्डेषु। दिनस्याखण्डपदार्थत्वे दिनस्य कस्मिन्नपि भागेऽध्ययने कृते मासत्वाधिकरणीभूतदिनेष्वध्ययनसंबन्धादध्ययनस्य मासव्यापकत्वं संभवतीत्यर्थः।

'दिवसं स्वपिति' इत्यत्र दिवसपदं सूर्योदयावधि सूर्योदयान्तरपर्यन्तक्षणकूटपरमेवेति तादृशक्षणकूटेन स्वापसंबन्धे सत्येव 'दिवसं स्वपिति' इति प्रयोगो भवति न तु दण्डमात्रस्वप्नेपीत्याह—दिवसमिति। अत्र दिवसपदस्याखण्डवस्तुपरत्वे एकदण्डमात्रस्वप्नेप्यखण्डपदार्थेन स्वापसंबन्धे जाते 'दिवसं स्वपिति' इति प्रयोगः स्यात् न चैतदिष्टमिति तद्वारणाय दिवसपदस्य तादृशक्षणकूटपरत्वमुक्तमिति भावः।

ननु 'मासमधीते' इत्यत्र यदि व्यापकत्वं द्वितीयार्थो मासव्यापकत्वं चाध्ययने उच्यते तदा मासान्तरस्यापि मासत्वाद् मासान्तरेऽध्ययनाभावे मासत्वावच्छिन्नव्यापकत्वस्याध्ययने बाधान्मासव्यापकाध्ययनस्थलेपि 'मासमधीते' इति प्रयोगानुपपत्तिरित्याशङ्कते—अथेति। ननु यद्यपि मासपदेन यत्किंचित्त्रिंशद्दिनमात्रवृत्तिविशेषधर्मप्रकारेण=तद्व्यक्तित्वेन रूपेण मासपदार्थस्योपस्थितिर्न संभवति येनाध्ययनस्योपस्थिततन्मासव्यक्तिमात्रव्यापकत्वं

मात्रस्वप्ने तथाप्रयोगः।

अथ व्यापकत्वस्य द्वितीयार्थत्वे एकमासादिव्यापकाध्ययनस्थलेऽपि मासान्तरेऽध्ययनाभावसत्त्वेन मासत्वादिव्यापकताया अध्ययने बाधेन 'मासमधीते' इत्यादिप्रयोगानुपपत्तिः। न च मासपदेन यत्किंचित्त्रिंशद्दिनमात्रवृत्तिविशेषधर्मप्रकारेणानुपस्थापनेऽपि तद्धर्मवत्स्वनिरूपिताधेयत्वसंबन्धेन मासपदार्थस्याभावेऽन्वयोपगमाद् यत्किंचिन्मासनिष्ठाभावप्रतियोगितानवच्छेदकत्वमन्वयितावच्छेदके लभ्यते इति न काप्यनुपपत्तिरिति वाच्यम्, तत्तन्मासमात्रवृत्तिधर्मविशेषाणां

प्राप्नुयात् तथापि तद्धर्मवत्=मासत्वधर्मवत् यत्स्वं तन्मासव्यक्तिः (अध्ययनाधिकरणमासव्यक्तिः) तन्निरूपित यदाधेयत्वम् (पूर्वं मासाधेयत्वं प्रथमाभावे उक्तं तत्स्मरणीयम्) तादृशाधेयत्वसंबन्धेन मासपदार्थस्योक्तप्रथमाभावेऽन्वयः स्वीक्रियते इति यत्किंचिन्मास (तन्मासव्यक्ति=अध्ययनाधिकरणमासव्यक्ति) निष्ठाभावप्रतियोगितानवच्छेदकत्वमन्वयितावच्छेदके=अध्ययनत्वे लभ्यते तद्वत्त्वं चाध्ययनेऽस्त्येवेत्येवंरूपेण तन्मासव्यक्तिव्यापकत्वमध्ययने सुलभमेव, तन्मासव्यक्तेश्च संसर्गकोटिप्रवेशात्तदुपस्थितेरप्यपेक्षा नास्तीति न काप्यनुपपत्तिरित्याशङ्क्याह—न चेति। परिहारमाह—तत्तन्मासमात्रेति, यथा 'नीलो घटः' इत्यत्रत्यबोधे 'नीलो घटः' इति वाक्यमभेदसंसर्गबोधकं भवतु इत्येवं संसर्गविषयकतात्पर्यज्ञानस्यापि हेतुत्वं भवति तथा 'मासमधीते' इत्यत्रापि तत्तन्मासवृत्तिविशेषधर्माणां=तद्व्यक्तित्वानां सम्बन्ध घटकत्वेऽपि शाब्दबोधे "मासमधीते" इति वाक्यं तन्मासव्यक्तित्वसंसर्गबोधकं भवतु इत्येवं संसर्गविषयकतात्पर्यज्ञानस्य हेतुत्वे प्राप्ते तद्व्यक्तित्वरूपस्यापि संसर्गस्योपस्थित्यपेक्षा प्राप्तैव तथा च मासपदेन तद्व्यक्तित्वेन रूपेण मासपदार्थोपस्थितिं विना निर्वाहो नास्ति न च तद्व्यक्तित्वेनोपस्थितिः संभवति मासत्वावच्छिन्नयावन्मासव्यापकत्वं चाध्ययने बाधितमेवेति 'मासमधीते' इति प्रयोगानुपत्तिरेवेत्यर्थः। किं च संबन्धघटकतद्व्यक्तित्वरूपधर्मज्ञानाभाववतः (माघमासेऽनेनाधीतमित्यादिज्ञानाभाववतः) 'मासमधीते' इत्यनेन शाब्दबोधो न स्यात् न चैतदिष्टं विशिष्य तादृशधर्मज्ञानाभावेपि

संबन्धघटकत्वेऽपि शाब्दबोधे संसर्गतात्पर्यज्ञानस्य हेतुतया संसर्गविशेषोपस्थितेरपेक्षितत्वात्। संबन्धघटकतादृशधर्मान् विशिष्याऽविदुषः शाब्दबोधानुदयप्रसङ्गात्। न चेष्टापत्तिः– अनुभवविरोधात्। अनागतादिमासवृत्तितादृशधर्माणां विशिष्य ज्ञानसाम्ग्र्या असर्वज्ञस्य दुर्लभतयाऽस्मदादीनां सर्वेषामेव तादृशमासत्वव्यापकताबोधोच्छेदप्रसङ्गात्।

न च तादृशवाक्यार्थतात्पर्यमेव संसर्गतात्पर्यम्, उक्तज्ञाने च वाक्यार्थघटकः संबन्धः संसर्गमर्यादयैव भासते इति विशेषरूपेणानुपस्थितस्यैवोक्तधर्मघटितसंबन्धस्य तात्पर्यज्ञाने बाधाभावबलात् शाब्दबोधे च तात्पर्यज्ञानबलाद् भानमनप–

शाब्दबोधोदयदर्शनादित्याह– संबन्धघटकेति। भूततत्तन्मासव्यक्तित्वादिधर्माणां विशेषरूपेण ज्ञानसम्भवेऽपि 'मासमध्येष्यते' इत्यादौ भविष्यन् मासवृत्तीनां तादृशधर्माणां=तद्व्यक्तित्वधर्माणां विशेषरूपेण ज्ञानसामग्र्याः= उपस्थित्यादेरस्मदाद्यऽसर्वज्ञानां दुर्लभतया=असम्भवादध्ययने तादृश(भविष्यत्) मासत्वव्यापकताबोधस्योच्छेद एव स्याद् ज्ञानसामग्र्या दुर्लभत्वे ज्ञानस्यासंभवादिति न तद्व्यक्तित्वस्य संबन्धकोटिप्रवेशोप्यऽदुष्ट इत्याह– अनागतेति।

ननु 'मासमधीते' इत्याकारकवाक्यार्थविषयकं यदेव तात्पर्यं तदेव संसर्गविषयकमपि तात्पर्यम् 'मासमधीते' इत्याकारकवाक्यजन्यज्ञाने च वाक्यार्थघटको यस्तन्मासव्यक्तित्वघटितः संबन्ध उक्तरूपः (तद्धर्मवत्स्वनिरूपिताधेयत्वसंबन्धः) स संसर्गमर्यादयैव भासते इति विशेषरूपेणोपस्थित्यपेक्षाभावाद्विशेषरूपेणानुपस्थितस्यैवोक्तधर्मेण=तन्मासव्यक्तित्वधर्मेण घटितस्य संबन्धस्य=तन्मासव्यक्तिनिरूपिताधेयत्वसंबन्धस्य तात्पर्यज्ञाने बाधाभावबलाद् भानमऽनपवादं शाब्दबोधे च तात्पर्यज्ञानबलाद् भानमनपवादमेवेति तद्व्यक्तित्वरूपविशेषधर्मघटितसंसर्गस्याश्रयणेऽपि तेन संसर्गेण मासपदार्थस्याभावेऽन्वयोपगमेपि च न काप्यनुपपत्तिरित्याशङ्क्याह– न चेति। परिहारमाह– एकपदार्थेति, एकपदार्थविशिष्टो योऽपरपदार्थः स एव वाक्यार्थो भवति तादृशवाक्यार्थविशेषिता या तत्प्रतीतीच्छा=वाक्यार्थप्रत्यायनेच्छातादृशेच्छारूपं यत् तात्पर्यं तादृशतात्पर्यविषयकनिश्चयस्य वाक्यार्थनिश्चयसापेक्षत्वेन

वादमेवेति वाच्यम्, एकपदार्थविशिष्टापरपदार्थरूप- वाक्यार्थ-विशेषिततत्प्रतीतीच्छारूपतात्पर्यविषयकनिश्चयस्य प्राक् वाक्यार्थानिश्चये दुर्घटतया तस्य शाब्दधीहेतुत्वे च योग्यता-संशयाच्छाब्दबोधानुपपत्तेर्विशकलिततत्तत्पदार्थतत्तत्संसर्गविषय-कत्वविशेषितप्रतीतीच्छाज्ञानस्यैव शाब्दधीहेतुताया उपेयत्वात्, तत्र च तादृशसंसर्गोपस्थितेरवश्यापेक्षणीयत्वादिति चेत्?

वाक्यार्थनिश्चयात् पूर्वं दुर्घटतया=असंभवात्, वाक्यार्थबोधो न स्यादेव वाक्यार्थबोधकारणीभूतस्योक्ततात्पर्यनिश्चयस्य वाक्यार्थबोधात्पूर्वमसंभवात्, दोषान्तरमाह—तस्येति, किं चोक्ततात्पर्यनिश्चयस्य शाब्दबोधहेतुत्वस्वीकारे एकपदार्थेऽपरपदार्थवैशिष्ट्यरूपाया योग्यतायाः संशयेऽपि या शाब्दबोधोत्पत्तिः सर्वशास्त्रसिद्धास्ति सा नोपपद्येत यतस्त्वया ह्येकपदार्थवैशिष्टापरपदार्थ-विषयकतात्पर्यनिश्चयस्यैव शाब्दबोधहेतुत्वमुक्तं योग्यतापि चैकपदार्थेऽपर-पदार्थवैशिष्ट्यमेवेति योग्यतात्पर्ययोरेकरूपत्वे प्राप्ते तात्पर्यनिश्चये हि योग्यतानिश्चयोपि स्यादेव सर्वत्रेति योग्यतासंशयेन शाब्दबोधस्य क्वचिदपि प्रसङ्गो न स्यान्न चैतदिष्टं योग्यतासंशयेनापि शाब्दबोधस्वीकारादिति योग्यतासंशयादपि शाब्दबोधोपपत्त्यर्थं विशकलितं यत् तत्तत्पदार्थविषयकत्वम् (मासधीते इति वाक्यमऽध्ययनस्य मासव्यापकत्वबोधकं भवतु इति) तत्संसर्गविषयकत्वं च (तन्मासव्यक्तिनिरूपिताधेयत्वसंसर्गबोधकं भवतु इति) ताभ्यां विशेषिता या वाक्यार्थप्रत्यायनेच्छा तद्विषयकज्ञानस्यैव (एतादृशतात्पर्यज्ञानस्यैव) शाब्दबोधहेतुता स्वीकार्या तत्र च= एतादृशसंसर्गविषयकतात्पर्यज्ञाने च तादृशसंसर्गोपस्थितेः=विशकलितरूपेण प्रविष्टस्य संसर्गतात्पर्यज्ञानविषयीभूतसंसर्गस्योपस्थितेरवश्यमपेक्षासत्त्वात् तदेकदेशभूततन्मासव्यक्तित्वधर्माणामनुपस्थितौ शाब्दबोधो नैव संभवति, न च तादृशतद्व्यक्तित्वानामुपस्थितिः संभवति न वा यावन्मासव्यापकत्वमध्ययने संभवतीति शाब्दबोधानुपपत्तिरेवेति प्रयोगानुपपत्तिरपीत्यर्थः। अत्र च योग्यताया उक्तवैशिष्ट्यरूपत्वात् तात्पर्यस्य च विशकलितपदार्थविषयकत्वात्तयोर्भेदे प्राप्ते तात्पर्यनिश्चयेऽपि योग्यतासंशयसंभवाद् योग्यतासंशये उक्तशाब्द-बोधानुपपत्तिर्नास्तीति विज्ञेयम्।

सत्यम्– मासादिघटकतावद्दिनादिनिष्ठत्रिंशत्त्वादि-रूपमासत्वादिर्मासादिभेदेन नानैव, मासादिपदप्रवृत्तिनिमित्तता परमनुगतरूपेण, अन्यथा शक्त्यानन्त्यप्रसङ्गात्, सर्वोपसंहारेण व्युत्पत्तिं विना प्रागप्रतीतमासादेः शाब्दानुभवाऽनिर्वाहाच्च। न च त्रिंशत्त्वादिकं बुद्धिविशेषविषयत्वरूपं वाच्यम्– दिनादेर्द्रव्यानात्मकत्वेन तत्र गुणरूपसंख्याया असंभवात्, द्रव्यात्मकत्वेऽपि क्रमिकेषु तेषु संख्योत्पत्तेरसंभवात्, तत्र बुद्धेरनतिप्रसक्तं वैलक्षण्यमनुगतं दुर्वचम्– जातिरूपस्य तस्य संकरप्रसङ्गनिरस्तत्वात्, तत्तद्दिनविषयकत्वरूपस्य तत्तद्दि-

---

अथेत्यादिनाऽऽशङ्कितस्योत्तरमारभते– सत्यमित्यादिना, मासान्तरेऽध्ययनाभावेऽध्ययनस्य मासत्वावच्छिन्नव्यापकत्वं न संभवतीति यदुक्तं यद्यपि तत्सत्यं तथापि सकलमासेष्वेकं मासत्वं न स्वीक्रियते येनैषानुपपत्तिः स्यात् किं तु मासत्वस्य संख्यारूपत्रिंशत्त्वरूपत्वेन तादृशत्रिंशत्त्वस्य प्रत्येकमासभेदेन भेदसंभवात् प्रतिमासं मासत्वं भिन्नमेवेत्येकमासमात्राध्ययनस्थलेऽप्यध्ययनस्य मासत्वावच्छिन्नव्यापकत्वलाभात् 'मासमधीते' इति प्रयोगे न काप्यनुपपत्तिरित्यर्थः। नन्वेवं मासपदशक्त्यानन्त्यं स्यादित्याशङ्क्याह– मासादिपदेति, अनुगतरूपेण=मासत्वत्वेन रूपेण। परमिति त्वर्थकः। मासत्वत्वस्य प्रवृत्तिनिमित्तत्वस्वीकारे हेतुमाह– सर्वेति, सर्वोपसंहारेण व्युत्पत्तिं विना=सकलमासविषयकशक्तिग्रहं विना प्रागप्रतीतमासादेः=भविष्यन्मासादेः शाब्दबोधविषयत्वासंभवात्। ननु संख्यादिरूपो गुणो द्रव्ये एव संभवति नाद्रव्ये दिनं च क्रियाप्रचयरूपत्वात् न द्रव्यभूतमिति दिनेषु मासत्वरूप-त्रिंशत्त्वस्य संख्यारूपस्य संभवाऽभावात् त्रिंशत्त्वं बुद्धिविशेषविषयत्वरूपम् (अयमेकोऽयमेक इत्याद्यपेक्षाबुद्धिविषयत्वरूपम्) वाच्यम्=स्वीकार्यम्, दिनानां कालस्वरूपत्वेन द्रव्यात्मकत्वपक्षेपि त्रिंशद्दिनानामेकदा सत्त्वं न संभवति यत्र त्रिंशत्त्वसंख्याया उत्पत्तिः संभवेत् तस्मादपि त्रिंशत्त्वं बुद्धिविशेषविषयत्वमेव वाच्यम्, ननु तत्र 'मासमधीते' इत्यत्र त्रिंशद्दिनेषु या त्रिंशत्त्वबुद्धिर्भवति तादृशबुद्धेरनतिप्रसक्तं यत् किमपि वैलक्षण्यं त्रिंशद्दिनमात्रपर्याप्तं तदेव त्रिंशत्त्वमिति वक्ष्यामो न तु बुद्धिविशेषविषयत्वं त्रिंशत्त्वमित्याशङ्क्याह–

नाद्यननुगमेनाऽननुगतत्वादिति वाच्यम्, तावत्कालस्थायिनो द्रव्यस्यापि दिनादिरूपत्वसम्भवात्। मीमांसकानुयायिभिरगत्या संख्यायाः पदार्थान्तरत्वोपगमाच्च संख्यादिरूपनानादिनादि-निष्ठानुगतत्रिंशत्त्वादेः सुवचत्वात्।

एवम्– 'मासमधीते चैत्रः' इत्यादावधिकरणतैव द्वितीयार्थः, मासादिपदार्थतावच्छेदकदिनपर्याप्तत्रिंशत्त्वा-

तत्रेति, एतादृशं वैलक्षण्यमनुगतं दुर्वचमेवेत्यर्थः, दुर्वचत्वे हेतुमाह– जातीति, तादृशवैलक्षण्यस्य जातिरूपत्वमपि वक्तुं न शक्यते केनापि धर्मेण तस्य सांकर्यं स्यादेव सांकर्ये च जातित्वं न संभवति, तत्तद्दिनविषयकत्वरूप-त्वमपि न वक्तुं शक्यते– तत्तद्दिनानामननुगमेन तद्घटितस्य तत्तद्दिनविषयक-त्वस्याप्यननुगमादिति त्रिंशत्त्वादिकं बुद्धिविशेषविषयत्वमेव वाच्यमित्या-शङ्क्याह–न चेति। परिहारमाह– तावदिति, तावत्कालस्थायिनः= सूर्योदयावधिसूर्योदयान्तरपर्यन्तस्थायिनः। त्रिंशद्दिनानां द्रव्यात्मकत्वे तेषु क्रमिकेष्वपि क्रमेण त्रिंशत्त्वरूपसंख्याया उत्पत्तौ बाधकं नास्तीत्यर्थः। मीमांसकमतमाह– मीमांसकेति, संख्यायाः पदार्थान्तरत्वे द्रव्यानात्मकेष्वपि त्रिंशद्दिनेषु संख्यारूपत्रिंशत्त्वस्य सत्त्वे बाधकं नास्तीत्यर्थः। संख्यारूपं यन्नानादिनादिनिष्ठमनुगतं त्रिंशत्त्वं तस्येत्यन्वयः। सुवचत्वात्=निरूपयितुं शक्यत्वात्। नानात्रिंशद्दिनसमुदायभूतमासनिष्ठं संख्यारूपं त्रिंशत्त्वं त्रिंशत्त्वत्वरूपेणानुगतमेव नाऽननुगतमिति न दोष इति भावः।

'मासमधीते' इत्यत्र व्यापकत्वस्य द्वितीयार्थत्वमुपवर्ण्य संप्रत्यधिकरण-त्वस्य द्वितीयार्थत्वं वक्तुं पक्षान्तरमारभते– एवमिति, अत्र च पक्षे 'मासमधीते' इत्यस्य 'मासाधिकरणकाध्ययनकर्ता' इति शाब्दबोधः। मासादिपदार्थतावच्छेदकं त्रिंशद्दिनपर्याप्तं यत् त्रिंशत्त्वं तस्य धर्मिविशेषणतापन्नस्य=मासरूप-धर्मिविशेषणीभूतस्य द्वितीयार्थाधिकरणतायामन्वयः कर्तव्यः स चान्वयश्चैत्र-कर्तृकाध्ययनाधारतात्वादिव्याप्यधर्मावच्छिन्नस्वरूपसंबन्धरूपावच्छेद्यत्वसंसर्गेण कर्तव्य इत्यन्वयः, मासरूपधर्मिविशेषणतापन्नस्य त्रिंशत्त्वस्य येनावच्छेद्यत्व-संसर्गेण द्वितीयार्थाधिकरणतायामन्वयस्तेनैवावच्छेद्यत्वसंसर्गेण द्वितीयार्थाधि-करणतायां प्रकृत्यर्थस्य मासस्याप्यन्वय इत्यर्थादेव लभ्यते, "एकत्र विशेष-

देर्धर्मिविशेषणतापन्नस्य द्वितीयार्थाधिकरणतायां चैत्रकर्तृका-ध्ययनाधारतात्वादिव्याप्यधर्मावच्छिन्नं स्वरूपसंबन्धरूपमवच्छे-द्यत्वं संसर्गतया भासते इत्युपगमेन सामञ्जस्यात्, यत्किंचिदेक-मासं व्याप्य यत्राधीतं तत्राऽध्ययनाधारतानामवच्छेद्यता-वच्छेदकाधारतावृत्त्यऽन्यतमत्वविशेषादिरूपोक्तधर्मा-

---

णत्वेनोपस्थितस्य" इति व्युत्पत्तिविरोधात् मासविशेषणीभूतस्य त्रिंशत्त्वस्य स्वातन्त्र्येण द्वितीयार्थाधिकरणतायामन्वयो न संभवतीति मासरूपधर्मि-द्वारान्वयार्थमेव "धर्मिविशेषणतापन्नस्य" इत्युक्तं तथा च नोक्तव्युत्पत्तिविरोधः। चैत्रकर्तृकेति– चैत्रकर्तृकाध्ययनाधारतासु चैत्रकर्तृकाध्ययनाधारतात्वमप्यस्ति अन्यतमत्वमप्यस्त्येव नानात्वात् नानात्वाक्रान्तपदार्थेष्वेवान्यतमत्वव्यपदेशात् तत्राधारतात्वमधिकदेशवृत्तित्वाद् व्यापकम् अन्यतमत्वं चाल्पदेशवृत्तित्वाद् व्याप्यम् तथाच चैत्रकर्तृकाध्ययनाधारतात्वापेक्षया व्याप्यो यो धर्मोऽन्यतमत्वं तदवच्छिन्नं स्वरूपसंबन्धरूपं यद् अवच्छेद्यत्वं तद् द्वितीयार्थाधिकरण-तायामस्त्येवेति संसर्गतया शाब्दबोधे भासते नाम तेनावच्छेद्यत्वसंसर्गेण द्वितीयार्थाधिकरणतायां त्रिंशत्त्वस्यान्वय इत्यर्थः। अत्र "अवच्छेद्यता-वच्छेदकाधारतावृत्त्यन्यतमत्वविशेषादि" इत्यादिवाक्यानुरोधेन व्याप्यधर्मपदे-नान्यतमत्वं गृह्यते। अवच्छेद्यत्वं चानतिप्रसक्तत्वरूपमपि भवति स्वरूपसंबन्ध-रूपमपि भवति तत्र द्वितीयार्थाधिकरणताया अध्यापनादिमासेष्वपि सत्त्वादनति-प्रसक्तत्वरूपावच्छेद्यत्वस्यासंभवात् स्वरूपसंबन्धरूपमेवावच्छेद्यत्वं ग्रहीतुं शक्यते इत्युक्तं स्वरूपसंबन्धेति। द्वितीयार्थाधिकरणतायामवच्छेद्यत्वमप्यस्ति अन्यतमत्वमप्यस्तीत्यवच्छेद्यत्वं सामानाधिकरण्यादन्यतमत्वावच्छिन्नं जातम्। अत्र द्वितीयार्थाधिकरणतायां त्रिंशत्त्वस्योक्तावच्छेद्यत्वसंसर्गेणान्वयात् त्रिंशत्त्वा-वच्छिन्नपूर्णमासाधिकरणकत्वमध्ययने प्राप्नोति स एव 'मासमधीते' इत्य-स्यार्थः।

उक्तस्य फलमाह–यत्किंचिदिति, यत्र=यदा यत्किंचिदेकमासम्=एक-मासमात्रं व्याप्याधीतं तत्र=तदाप्यध्ययनाधारतानां तद्वृत्तित्रिंशत्त्वेन=तन्मासमात्र-वृत्तितत्त्रिंशत्त्वेनावच्छेदाद् अप्रसङ्गः='मासमधीते' इति प्रयोगस्यानुपपत्ति-र्नास्तीत्यन्वयः, मासेऽध्ययनाधारतापि वर्तते त्रिंशत्त्वमपि वर्तते इति त्रिंशत्त्वेनाध्ययनाधारतानामवच्छेदः, किं वा द्वितीयार्थभूताध्ययनाधारता-

वच्छिन्नाऽनतिप्रसक्तेन तद्वृत्तित्रिंशत्त्वेनाऽवच्छेदाद्, न्यूनकालाध्ययनस्थले चातिप्रसक्ततया तादृशस्य मासत्वस्योक्तरूपावच्छिन्नाधारताऽनवच्छेदकत्वाच्चाऽप्रसङ्गातिप्रसङ्गयोरनवकाशात्।

सूक्तावच्छेद्यत्वसंसर्गेण तत्त्रिंशत्त्वस्यान्वयात् तेन त्रिंशत्त्वेनाध्ययनाधारतानामवच्छेदः। तद्वृत्तित्रिंशत्त्वं विशिनष्टि—अवच्छेद्यतेति, द्वितीयार्थाधिकरणतायां संसर्गभूतं यद् अवच्छेद्यत्वं वर्तते तस्यावच्छेदकीभूतो योधिकरणतावृत्त्यन्यतमत्वविशेषस्तद्रूपोक्तधर्मेण (त्रिंशत्त्वेन) अवच्छिन्नो यो मासस्तदनतिप्रसक्तेन तद्वृत्ति (तन्मासवृत्ति) त्रिंशत्त्वेनेत्यन्वयः। तन्मासमात्रवृत्तित्रिंशत्त्वं तन्मासातिप्रसक्तं नास्तीति सुस्पष्टम्, अनतिप्रसक्तत्वात्तस्य स्वसमानाधिकरणाध्ययनाधारतावच्छेदकत्वं युक्तमेव तथा च तत्त्रिंशत्त्वं तन्मासमात्रे वर्तते नाधिककाले मासमात्रं चाधीतमेवेत्येकमासमात्राध्ययनस्थलेऽपि 'मासमधीते' इति प्रयोगस्यानुपपत्तिर्नास्तीत्यर्थः। अतिप्रसङ्गाभावमाह—न्यूनकालेति, यदा हि मासापेक्षया न्यूनकालमऽधीतं तत्र तादृशस्य= त्रिंशत्त्वरूपस्य मासत्वस्याध्ययनकालापेक्षयाऽधिककाले (सर्वमासे) वर्तमानत्वेनातिप्रसक्तत्वाद् उक्तरूपेण (अन्यतमत्वेन) अवच्छिन्ना याऽध्ययनाधारता तदवच्छेदकत्वं न संभवतीति तादृशस्थले अतिप्रसङ्गः='मासमधीते' इति प्रयोगस्यापत्तिर्नास्तीति न कोपि दोष इत्यर्थः। ननु व्यापकत्वस्य द्वितीयार्थत्वे तु मासादिपदप्रवृत्तिनिमित्तधर्मे मासत्वादौ यत् चैत्रीयाध्ययनाधारताव्याप्यत्वं तस्य द्वितीयाविभक्तित एव लाभः संभवति—व्यापकत्वस्य व्याप्यनिरूपितत्वाद् व्याप्यघटितत्वाच्च व्यापकत्वार्थकद्वितीयाया व्याप्यत्वाक्षेपकत्वात्, अत्र च पक्षे द्वितीयाया अधिकरणतार्थकत्वेन तद्वद् व्याप्यत्वाक्षेपकत्वासंभवाद् मासत्वस्याध्ययनाधारताव्याप्यत्वं शब्दतो न प्राप्तमिति "कालाध्वनोरत्यन्तसंयोगे" इत्यनेन द्वितीयाया यदऽत्यन्तसंयोगार्थपरत्वमुक्तं तदत्र न प्राप्नोति—अत्यन्तसंयोगस्याभिव्याप्तिरूपत्वाद् अभिव्याप्तेश्चोक्तरीत्या व्यापकत्वस्वरूपत्वाद् अध्ययननिष्ठतादृशव्यापकत्वस्य च मासत्वनिष्ठव्याप्यत्वं विनानुपपद्यमानत्वात् तादृशव्याप्यत्वस्य च केनापि पदेनात्र लाभाभावाद् द्वितीयाया अत्यन्तसंयोगबोधकत्वं न स्यादित्याशङ्क्याह—मासादिपदेति, मासादिपदप्रवृत्तिनिमित्तधर्मे= मासत्वे वा त्रिंशत्त्वे वा "चैत्राध्ययनाधारतायाः" इति षष्ठ्यर्थो निरूपितत्वमिति मासत्वे चैत्राध्ययनाधारतानिरूपितव्याप्यत्वस्य

मासादिपदप्रवृत्तिनिमित्तधर्मे चैत्राध्ययनाधारताया व्याप्यत्वस्य शब्दादलाभेऽप्यर्थतस्तल्लाभाद् द्वितीयाया अत्यन्तसंयोगार्थ-परत्वमिति नानुशासनविरोधः।

न च 'भूतले घटः' 'भूतलं घटवत्' इत्यादि प्रत्ययबलादतिप्रसक्तोऽपि धर्म आधेयत्वाधारत्वयोरवच्छेदक

शब्दतो लाभाभावेपि अर्थतः=अर्थात् तल्लाभात्=मासत्वेऽध्ययनाधारता-निरूपितव्याप्यत्वस्य लाभात् 'मासमधीते' इत्यादौ द्वितीयायाः "कालाध्वनोरत्यन्तसंयोगे" इत्यनुशासनविहितमत्यन्तसंयोगार्थपरत्वं नानुपपन्नमिति नोक्तानुशासनविरोध इत्यन्वयः। अर्थतो नामात्र द्वितीयार्थाधिकरणतायामवच्छेद्यत्वसंसर्गेण त्रिंशत्त्वरूपमासत्वस्योक्तरीत्या-न्वयेनार्थादेवाधिकरणतायां व्यापकत्वं मासत्वे च व्याप्यत्वं प्राप्तम्—अन्वय-प्रतियोग्यनुयोगिनोर्व्याप्यव्यापकभावसंभवादत्र च मासत्वस्यान्वयप्रतियोगि-त्वादित्यनुसंधेयम्। अभियुक्तैरप्युक्तम्—"यस्य यन्निष्ठावच्छेद्यत्वनिरूपकत्वं तस्य तद्व्याप्यत्वम्" इति।

ननु 'भूतले घटः' इत्यत्र घटे वर्तमानाऽऽधेयता घटत्वावच्छिन्नास्ति घटत्वं चैतद्भूतलावृत्तिष्वप्याधेयताशून्येषु घटेषु वर्तत एवेत्यतिप्रसक्तमेव तथापि घटत्वे आधेयतावच्छेदकत्वमस्त्येव तथा 'भूतलं घटवत्' इत्यत्र भूतले वर्तमानाऽऽधारता भूतलत्वावच्छिन्नास्ति भूतलत्वं चान्येष्वप्याधारताशून्येषु भूतलप्रदेशेष्वस्त्येवेत्यतिप्रसक्तस्यापि भूतलत्वस्याधारतावच्छेदकत्वमस्त्येव तथा च प्रकृतेऽपि न्यूनकालाध्ययनस्थलेतिप्रसक्तस्यापि मासत्वस्याध्ययना-धारतावच्छेदकत्वप्राप्त्या मासापेक्षया न्यूनकालाध्ययनेऽपि 'मासमधीते' इति प्रयोगापत्तिरूपोतिप्रसङ्गः स्योदेवेत्याशङ्क्याह—न चेति। परिहारमाह—तादृशेति, 'भूतले घटः' इत्यादिवाक्यजन्यबोधे घटत्वादावाधेयत्वाद्यवच्छेदकत्वस्य भानमेव न भवति येनातिप्रसक्तधर्मस्याधारताद्यवच्छेदकत्वं प्राप्नुयादित्यर्थः। अतिप्रसक्तधर्मस्याऽऽधेयतावच्छेदकत्वं न भवतीत्यत्र प्रमाणमाह— आधेयताया इति, यद्याधेयताया अतिप्रसक्तधर्मेणाप्यवच्छेद्यत्वम्= अवच्छिन्नत्वं स्यात्तदा "व्यभिचारिण्यतिव्याप्त्या न ह्यतिप्रसक्तमवच्छेदकम्" इत तत्स्थलीयचिन्ता-मणिपरिष्कारविरोधेन साध्यसामानाधिकरण्यावच्छेदकधर्मात्मकव्याप्तिशरीरे

इति वाच्यम्, तादृशप्रत्ययेऽवच्छेदकत्वभानानुपगमात्। आधेयताया अतिप्रसक्तधर्मावच्छेद्यत्वे साध्यसामानाधिकरण्यावच्छेदक धर्मात्मकव्याप्तिशरीरे मिश्रादीनां स्वरूप-

---

मिश्रादीनां स्वरूपसंबन्धरूपावच्छेदकत्वनिवेशस्याऽसंभवदुक्तिकता प्राप्नुयादित्यन्वयः, अयमर्थः– "साध्यसामानाधिकरण्यावच्छेदकधर्मो व्याप्तिः" इत्युक्तमऽर्थात्– वह्न्यादिसाध्यसामानाधिकरण्यं धूमेऽस्ति तदवच्छेदको यो धूमत्वरूपो धर्मः स एव व्याप्तिरित्युक्तं तत्र साध्यसामानाधिकरण्यं हि साध्याधिकरणवृत्तित्वमेव वृत्तित्वं चाधेयत्वमेवेति तादृशाधेयतावच्छेदकत्वं धूमत्वस्यैतादृशव्याप्तिलक्षणेन प्राप्तं चिन्तामणिकारेण च "साध्यसामानाधिकरण्यावच्छेदकधर्मो व्याप्तिः" इत्यत्र "व्यभिचारिण्यतिव्याप्त्या न ह्यतिप्रसक्तमवच्छेदकम्" इत्युक्तम् अर्थादतिप्रसक्तोपि धर्मो यद्यवच्छेदकः स्यात् तदाऽयोगोलके धूमाधिकरणता नास्ति वह्न्यधिकरणता त्वस्त्येवेति धूमसामानाधिकरण्याभाववत्यप्ययोगोलकवृत्तिवह्नौ सत्त्वेन वह्नित्वमतिप्रसक्तमस्ति क्वचिन्महानसाद्यन्तर्भावेण च धूमसामानाधिकरण्यावच्छेदकत्वमपि वह्नित्वे प्राप्नोतीति यद्यतिप्रसक्तधर्मोप्यवच्छेदकः स्यात्तदा वह्नित्वस्यापि धूमसामानाधिकरण्यावच्छेदकत्वात् व्याप्तित्वं स्यात्तादृशव्याप्त्याश्रयत्वाद् वह्नेरपि धूमानुमापकत्वं स्यान्न चैतदिष्टं वह्नेर्धूमव्यभिचारित्वादित्यऽतिप्रसक्तधर्मस्यावच्छेदकत्वं न भवतीति न वह्नित्वस्य धूमसामानाधिकरण्यावच्छेदकत्वमिति, मिश्रेण च "साध्यसामानाधिकरण्यावच्छेदकधर्मो व्याप्तिः" इत्यत्र वह्निं विनापि निस्सारितवह्निस्थले धूमस्य दर्शनाद् धूमत्वे यद् वह्निसामानाधिकरण्यावच्छेदकत्वं तत्स्वरूपसंबन्धरूपमेवावच्छेदकत्वमस्ति न त्वनतिप्रसक्तत्वरूपमवच्छेदकत्वमित्युक्तं तत्र यद्याधेयताया अतिप्रसक्तधर्मावच्छेद्यत्वमपि स्यात्तदा साध्याधिकरणवृत्तित्वरूपाधेयताया अतिप्रसक्तेनापि धूमत्वेनोक्तरीत्याऽवच्छेद्यत्वप्राप्त्या 'धूमस्योक्ताधेयतावच्छेदकत्वं यदस्ति तत्स्वरूपसंबन्धरूपमेवास्ति न त्वऽनतिप्रसक्तत्वरूपम्' इत्याकारकमिश्रकृतनिवेशस्याऽसंभवदुक्तिकतैव स्यात्– आधेयताया अतिप्रसक्तधर्मावच्छेद्यत्वे उक्तमिश्रकृतनिवेशस्य व्यर्थत्वापातादित्यर्थः प्रतिभाति। अतिप्रसक्तधर्मस्याऽऽधारतावच्छेदकत्वमपि न भवतीत्यत्र प्रमाणमाह आधारताया इति। तल्लक्षणेति–"साध्यसामानाधिकरण्यावच्छेदकधर्मो व्याप्तिः" इति व्याप्ति-

संबन्धरूपावच्छेदकत्वनिवेशस्य "व्यभिचारिण्यतिव्याप्त्या न ह्यतिप्रसक्तमवच्छेदकम्" इति तत्स्थलीयचिन्तामणि-परिष्कारविरोधादऽसंभवदुक्तिकतापत्तेः। आधारताया अति-प्रसक्तधर्मावच्छेद्यत्वे "यद्धेत्वधिकरणत्वं साध्याधिकरणता-वच्छेदकम्" इति तल्लक्षणाव्याख्यापक्षे स्वरूपसंबन्धरूपावच्छेदकत्वप्रवेशं व्यभिचारिण्य-तिव्याप्त्याऽदूषयित्वा "विरुद्धदिक्कालावच्छिन्न- वृत्तिकस्य" इत्यादिदूषणान्तरेण तत्परित्यज्य दीधितिकृतामनतिरिक्त-वृत्तित्वरूपावच्छेदकत्वविवक्षाया असंगत्यापत्तेः।

लक्षणस्य "यद्धेत्वधिकरणत्वं साध्याधिकरणतावच्छेदकम्" इत्याकारक-व्याख्यापक्षे स्वरूपसंबन्धरूपावच्छेदकत्वप्रवेशं व्यभिचारिण्यतिव्याप्त्या-दूषयित्वा वाऽदूषयित्वा वा विरुद्धदिक्कालेत्यादिदूषणान्तरेण स्वरूपसंबन्धरूपा-वच्छेदकत्वप्रवेशं परित्यज्य दीधितिकारेण यदत्र 'हेत्वधिकरणत्वे साध्याधि-करणतावच्छेदकत्वं यदस्ति तदऽनतिरिक्तवृत्तित्वरूपम्=अनतिप्रसक्त-त्वरूपमेवास्ति' इत्युक्तं तस्याऽऽधारताया अतिप्रसक्तधर्मावच्छेद्यत्वेऽसंगतिरेव स्यात्– आधारताया अतिप्रसक्तधर्मावच्छेद्यत्वे हेत्वधिकरणत्वेऽनतिरिक्त-वृत्तित्वरूपावच्छेदकत्वविवक्षया व्यर्थत्वादित्यर्थः। तथा च प्रकृते मासापेक्षया न्यूनकालाध्ययनस्थलेऽतिप्रसक्तस्य मासत्वस्याध्ययनाधारतावच्छेदकत्वाभावात् 'मासमधीते' इति प्रयोगापत्तिरूपोतिप्रसङ्गो नास्तीति भावः। अत्र "चिन्तामणि-परिष्कारविरोधात्" इत्यत्र चिन्तामणिपरिष्कारस्य च' इत्येवं पाठो युक्त इति संभाव्यते– उक्तमिश्रकृतनिवेशे चिन्तामणिपरिष्कारविरोधासंभवादित्यनुसंधेयम्। उदाहृतवाक्यानां विशेषतोऽर्थप्रतिपत्तिस्तु तत्तत्संदर्भेणैव संपाद्या। अतिप्रसक्त-धर्मस्याधारताद्यवच्छेदकत्वं न भवतीत्ययमेवात्र प्रघट्टकार्थः। वस्तुतस्तु 'मासमधीते' इत्यादिमूलग्रन्थः क्लेशकर एव छात्राणाम्।

'भूतले घटः' इत्यादिप्रतीतौ घटत्वादीनामाधेयत्वाद्यवच्छेदकत्वम-भ्युपगम्याह–अस्तु वेति, दर्शितप्रतीतिबलात्='भूतले घटः' इत्यादिप्रतीतिबलात्। घटत्वं ह्यऽव्यासज्यवृत्तिधर्मोऽस्तीति तस्योक्तरीत्यातिप्रसक्तस्याप्याऽऽधेयता-वच्छेदकत्वं संभवति 'भूतलं घटवत्' इत्यत्र भूतलत्वमप्यऽव्यासज्यवृत्ति-

अस्तु वाऽव्यासज्यवृत्तिधर्मस्यातिप्रसक्तस्यापि दर्शित-प्रतीतिबलादाधाराधेयभावावच्छेकत्वम्, व्यासज्यवृत्तेस्त्वति-प्रसक्तस्य तदवच्छेदकत्वमप्रसक्तम्–'क्षितिजलोभयं गन्धवत्' 'स्नेहगन्धोभयं क्षितौ' इत्याद्यप्रतीतेः।

अथ वा द्वितीयाद्यर्थेऽध्ययनाधारत्वे तत्तन्मासादिरूप-प्रकृत्यर्थविशेषणतापन्नतत्तन्मासत्वादिव्यक्तीनां व्यापकता-संबन्धेन स्वपारतन्त्र्येण विशेषणत्वमुपेयते, तादृशं च व्यापकत्वं

धर्मोऽस्तीति तस्योक्तरीत्यातिप्रसक्तस्याप्याधारतावच्छेदकत्वं संभवति, व्यासज्यवृत्तिधर्मस्य त्वतिप्रसक्तस्याधारत्वाद्यवच्छेदकत्वं न संभवति अन्यथा 'क्षितिजलोभयं गन्धवत्' इत्यत्र गन्धनिष्ठाधेयतानिरूपकाधारतावच्छेदक-त्वमऽतिप्रसक्तस्यापि व्यासज्यवृत्तिधर्मस्य क्षितिजलोभयत्वस्य स्यात् तथा च 'क्षितिजलोभयं गन्धवत्' इत्यपि प्रतीतिः स्याद् न चैवं प्रतीतिर्भवति–गन्धस्य क्षितिमात्रवृत्तित्वस्वीकारात्, व्यासज्यवृत्तिधर्मस्यातिप्रसक्तस्या-धेयतावच्छेदकत्वे 'स्नेहगन्धोभयं क्षितौ' इत्यत्र क्षितिनिष्ठाधारतानिरूपकाधेयता-वच्छेदकत्वमतिप्रसक्तस्यापि व्यासज्यवृत्तिधर्मस्य स्नेहगन्धोभयत्वस्य स्यात् तथा च 'स्नेहगन्धौ क्षितौ' इत्यपि प्रतीतिः स्याद् न चैवं प्रतीतिर्भवति–स्नेहस्य जलमात्रवृत्तित्वेन स्नेहे क्षितिनिष्ठाधारतानिरूपकाधेयताया अभावात्, क्षिति-जलोभयत्वं हि गन्धाभाववति जलेऽप्यस्त्येवेत्यतिप्रसक्तम्, स्नेहगन्धोभयत्वं च क्षित्यऽवृत्तिस्नेहेऽप्यस्तीत्यतिप्रसक्तमिति बोध्यम्। तथा च प्रकृते मासत्वमपि त्रिंशद्दिनेषु व्यासज्य वर्तते अथ च मासापेक्षया न्यूनकालाध्ययनस्थलेऽध्ययना-ऽनधिकरणदिनेष्वपि वर्तते इत्यतिप्रसक्तमपीति तत्र मासत्वस्याप्यध्ययनाधारता-वच्छेदकत्वं न संभवतीति मासापेक्षया न्यूनकालाध्ययनस्थले 'मासमधीते' इति प्रयोगस्यापत्तिर्नास्तीत्यर्थः।

पक्षान्तरमाह–अथ वेति, 'मासमधीते' इत्यत्राधिकरणतैव द्वितीयार्थ इति (३५८) यदुक्तं तत्र द्वितीयार्थाध्ययनाधारत्वे व्यापकतास्त्येवेति तेन संबन्धेन स्वपारतन्त्र्येण=धर्मिपारतन्त्र्येण=मासद्वारा तत्तन्मासादिरूपो यो प्रकृत्यर्थस्तत्र विशेषणतापन्नं यत् तत्तन्मासत्वं तद्व्यक्तीनां विशेषणत्वं स्वीक्रियते इत्यन्वयः। उक्तसंबन्धभूतव्यापकत्वस्य स्वरूपमाह–तादृशमिति,

स्वसमानाधिकरणव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकत्वसंबन्धेन स्वावच्छिन्नस्य यो भेदस्तदाश्रयधर्मवत्त्वम्, तादृशधर्मश्च 'चैत्रो मासमधीते' इत्यादौ चैत्रीयाध्ययनाद्याधारतात्वं विशिष्यैव संबन्धेऽन्तर्भावनीयम्। मासान्तरनिष्ठतादृशाभावप्रतियोगितावच्छेदकत्वस्य तादृशधर्मे सत्त्वेऽपि तत्तन्मासत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतादृशधर्मे उक्तसंबन्धेन तत्तन्मासत्वाद्यवच्छिन्नस्य यो भेदस्तदाश्रयत्वमक्षतमेवेति यत्किंचि-

---

तादृशम्=संबन्धभूतम्। स्वसमानाधिकरणेति—स्वं तत्तन्मासत्वं तत्समानाधिकरणो व्याप्यवृत्तिः (मासव्यापकः) च योऽभावो मासे नृत्याधिकरणता नास्तीत्यऽभावस्तत्प्रतियोगितावच्छेदकत्वं नृत्याधिकरणतात्वेऽस्तीत्येतादृशेन स्वसमानाधिकरणव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकत्वसंबन्धेन स्वावच्छिन्नम्=तत्तन्मासत्वावच्छिन्नं यन्नृत्याधिकरणतात्वं तस्य (स्वावच्छिन्नस्य=नृत्याधिकरणतात्वस्य) यो भेदस्तदाश्रयो यो धर्मः= अध्ययनाधिकरणतात्वरूपो धर्मस्तद्वत्त्वमऽध्ययनाधिकरणतायामस्त्येव—नृत्याधिकरणतात्वापेक्षयाऽध्ययनाधिकरणतात्वस्य भिन्नत्वादेव, एतादृशभेदाश्रयधर्मवत्त्वमेवात्र व्यापकत्वं ग्राह्यम्, यथा धूमसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वसंबन्धेन धूमविशिष्टं यद् घटत्वं तद्भिन्नधर्म (वह्नित्वधर्म) वत्त्वरूपं व्यापकत्वं वह्नौ भवतीत्यन्वयः। उक्तभेदाश्रयधर्मस्वरूपमाह—तादृशेति, तादृशधर्मः=तत्तन्मासत्वव्यापकतावच्छेदकीभूतो धर्मश्च (उक्तभेदाश्रयधर्मश्च) चैत्रीयाध्ययनाधारतात्वरूप एव विशेषरूपेण संबन्धकोटौ प्रवेशनीय इत्यन्वयः, तथा च 'मासमधीते' इत्यत्रोक्तव्यापकत्वसंबन्धेन तत्तन्मासत्वविशिष्टा याधिकरणता तादृशाधिकरणतानिरूपकं यदध्ययनं तादृशाध्ययनानुकूलकृतिमांश्चैत्र इति शाब्दबोधाकारः। यत्र च मासापेक्षया न्यूनकालेऽध्ययनं कृतं तत्र मासे नृत्यादेरपि संभवेन तदधिकरणताऽभावस्यासंभवादध्ययनाधारत्वे द्वितीयार्थभूते संबन्धभूतमुक्तव्यापकत्वमेव नास्ति येन तेन संबन्धेनाध्ययनधारत्वे तत्तन्मासत्वव्यक्तीनामन्वयः स्यात् तथा च मासापेक्षया न्यूनकालाध्ययनस्थले 'मासमधीते' इति प्रयोगापत्तिर्नास्ति। एकमासमात्राध्ययनस्थले 'मासमधीते' इति प्रयोगस्योपपत्तिं स्वयमाह—मासान्तरेति, मासान्तरनिष्ठो यस्तादृशाभावः=अध्ययनाधिकरणताभावस्तत्प्रतियोगितावच्छेदकत्वस्य तादृशधर्मे=

देकमासादिमात्रव्यापकाध्ययनादिस्थलेऽपि तादृशप्रयोगनिर्वाहः।

'प्रतिमासमधीते' इत्यादौ प्रत्यादिशब्दानां मासादिपदोपस्थाप्यानुगतरूपावच्छिन्नमासत्वादिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वसामान्याभावघटितव्यापकताबोधकतया यत्किंचिदेकमासव्यापकाध्ययनादिस्थले न तादृशः प्रयोगः।

अथाऽत्यन्तसंयोगार्थकद्वितीयाया एकादिपदं विनापि यत्किंचिदेकमासादिव्यापकताबोधकत्वे "उपसद्भिश्चरित्वा अध्ययनाधिकरणतात्वे सत्त्वेऽपि तत्तन्मासत्वसमानाधिकरणो योऽभावः= नृत्याधिकरणता नास्तीत्यभावस्तत्प्रतियोगितानवच्छेदकीभूते (तत्प्रतियोगितावच्छेदकीभूतं तु नृत्याधिकरणतात्वं ज्ञेयम्) तादृशधर्मे= अध्ययनाधिकरणतात्वे उक्तसंबन्धेन=स्व (तत्तन्मासत्व) समानाधिकरणव्याप्यवृत्त्यभाव (नृत्याधिकरणता नास्तीत्यभाव) प्रतियोगितावच्छेदकत्वसंबन्धेन यस्तत्तन्मासत्वावच्छिन्नः= नृत्याधिकरणतात्वधर्मस्तस्य यो भेद उक्तस्तदाश्रयत्वम् (अध्ययनाधिकरणतात्वधर्मे) अक्षतमेवेति तादृशव्यापकत्वसंबन्धेनाध्ययनाधिकरणतायां तन्मासत्वान्वयसंभवाद् यत्किंचिदेकमासमात्राध्ययनस्थलेपि तादृशप्रयोगस्य='मासमधीते' इति प्रयोगस्य निर्वाहः संभवत्येवेति न कोपि दोष इत्यर्थः।

प्रतिमासमिति–'प्रतिमासमधीते' इत्यत्र प्रतिशब्दस्य मासपदोपस्थाप्यं यन्मासत्वत्वाद्यनुगतरूपावच्छिन्नं मासत्वादि तद्वान् यो मासस्तन्निष्ठो योऽभावस्तत्प्रतियोगितावच्छेदकत्वस्य सामान्याभावेन घटिता अर्थात् मासत्वावच्छिन्ननिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपा या व्यापकता तद्बोधकत्वमस्तीति यत्किंचिदेकमासमात्रव्यापकाध्ययनस्थले तादृशप्रयोगः= 'प्रतिमासमधीते' इति प्रयोगो न भवति–मासत्वावच्छिन्नेष्वन्येषु मासेष्वऽध्ययनसंबन्धाभावात् किं तु यदा विवक्षितानेकमासेष्वऽध्ययनं भवति तदैव 'प्रतिमासमधीते' इति प्रयोगो भवतीत्यर्थः।

ननु यदि 'मासमधीते' इत्यादावेकपदं विनाप्यत्यन्तसंयोगार्थकद्वितीयाया अध्ययनस्यैकमासमात्रव्यापकताबोधकत्वं स्यात्तदा "मासमेकमग्निहोत्रं जुहोति"

मासमेकमग्निहोत्रं जुहोति" इत्यत्रैकपदवैयर्थ्यमिति चेत्?, न, तत्र मासाधिककालव्यापकत्वेऽपि मासव्यापकताऽधिककाल-व्यापकस्य होमस्य शास्त्रार्थतावारणायैकपदोपादानात्, तथा सति तस्य केवलार्थकतया भासमात्रव्यापकतालाभात् तादृशप्रयोजनोपपत्तेः। अत एव च "यावज्जीवमग्निहोत्रं जुहोति" इति श्रुतिबोधिताग्निहोत्रानुवादेन सतिलव्रीहिचरुरूपद्रव्यस्य मासैकरूपकालस्य च विधाने वाक्यभेदः स्यादिति

इत्यत्राप्येकपदं विनापि होमस्य द्वितीयया एकमासमात्रव्यापकत्वं प्राप्नुयादेवेति श्रुतावेकपदं व्यर्थमेव स्यादित्याशङ्कते—अथेति। परिहरति—नेति, होमस्य मासाधिककालव्यापकत्वेपि मासव्यापकत्वं स्यादेव तच्च नेष्टमिति मासाधिककालव्यापकतावारणायैकपदमुपात्तम्, तथा सति=एकपदोपादाने कृते च तस्य=एकपदस्य केवलार्थकतया मासमात्रव्यापकत्वे लब्धे तादृश-प्रयोजनोपपत्तेः=होमस्य मासाधिककालव्यापकत्ववारणरूपप्रयोजनं संपद्यते इत्यर्थः" "तादृशप्रयोजनोपपत्तेः" इत्यत्र "तादृशप्रयोगोपपत्तेः" इत्यपि पाठः। अत एवेति—अत एव=एकपदं विना मासमात्रव्यापकताबोध- स्यासंभवे-नैकपदस्य सार्थकत्वादेव पूर्वपक्षो निरस्त इत्यन्वयः। उपपादयति—यावज्जीवमित्यादिना, "यावज्जीवम्" इति श्रुत्युक्ताग्निहोत्रमनूद्य तिलादिद्रव्यस्य मासरूपकालस्य च "मासमेकमग्निहोत्रम्" इति श्रुत्या विधाने उभयविधानाद्वाक्यभेदः स्यात् स च नेष्ट इति तिलादिद्रव्येण मासरूपकालेन च विशिष्टस्यैव गौणं यदग्निहोत्रपदं तत्प्रतिपाद्यस्य कर्मान्तरस्यैव तादृशी श्रुतिः="मासमेकमग्निहोत्रम्" इति श्रुतिर्विधायिकास्तीति सिद्धान्तः, "मासमेकम्" इति श्रुतिस्थमग्निहोत्रपदं न मुख्याग्निहोत्रपरं किं तु मुख्याग्निहोत्रसदृशकर्मान्तरपरमेवेति गौणम्। अत्र च सिद्धान्ते पूर्वपक्षि-णोक्तम्—"मासमेकम्" इति श्रुत्या द्रव्यकालयोरुभयोर्विधानापेक्षैव नास्ति येन वाक्यभेदः स्यात् किन्तु "यावज्जीवमि" ति श्रुत्युक्तयावज्जीवकालान्तर-गतस्यैव मासरूपकालस्य "मासमेकम्" इति पदेनानुवादः क्रियते इति न कालविधानापेक्षा किं तु द्रव्यमात्रविधानापेक्षास्तीति द्रव्यमात्रविधाने च न वाक्यभेदप्रसङ्ग इति "मासमेकम्" इति श्रुतिर्न कर्मान्तरविधायिका किं तु "यावज्जीवम्" इति श्रुत्युक्ताग्निहोत्रमनूद्य द्रव्यमात्रविधायिकेति पूर्वपक्षो

तादृशद्रव्यकालोभयविशिष्टस्य गौणाग्निहोत्रपदप्रतिपाद्यस्य कर्मान्तरस्यैव विधायिका तादृशी श्रुतिरिति सिद्धान्ते यावज्जीवकालान्तर्गतमासरूपकालांशेऽप्यनुवादकतासंभवात् प्राप्ताग्निहोत्रानुवादेन द्रव्यस्यैव विधानमुचितमिति पूर्वपक्षो निरस्तः– "यावज्जीवम्" इत्यादिश्रुत्या यावज्जीवव्यापकत्वे बोधितेऽर्थतो मासैकव्यापकतालाभेप्युपसच्चरुकरणकत्व-विशिष्टहोमे तन्मात्रव्यापकताया अलाभेन तस्यापि विधेयतया वाक्यभेदस्य प्राप्ताग्निहोत्रानुवादेन द्रव्यविधिपक्षे दुर्वारत्वात्।

अथ तादृशश्रुतेर्द्रव्यकालोभयविशिष्टस्य गौणाग्निहोत्र-पदप्रतिपाद्यस्य कर्मान्तरस्य विधायकत्वेऽपि न कथं

निरस्त इत्यर्थः। अनुवादकतात्र "मासमेकम्" इति श्रुतेर्ज्ञेया। मासरूपकालांशे= मासरूपकालांशविषये। पूर्वपक्षनिरस्तत्वे हेतुमाह– यावज्जीवमिति, "यावज्जीवम्" इति श्रुत्या होमस्य यावज्जीवकालव्यापकत्वे बोधिते यद्यपि यावज्जीवाग्निहोत्रेऽर्थत एकमासव्यापकतापि लभ्यते एव तथापि "मासमेकम्" इति श्रुत्युक्तहोमे तन्मात्रव्यापकता=एकमासमात्रव्यापकता न लभ्यते उपायाभावाद् अनुवादेन च यावज्जीवकालस्यैवानुवादसंभवादिति "मासमेकम्" इति श्रुत्या तस्यापि=एकमासमात्रकालस्यापि विधानं कर्तव्यमेवेति कालद्रव्ययोरुभयोर्विधाने प्राप्ते वाक्यभेदः स्यादेव तस्मात् "मासमेकम्" इति श्रुतिः कालद्रव्योभयविशिष्टकर्मान्तरस्यैव विधायिका। विशिष्टस्य चैक्यान्न वाक्यभेदः, यदि "मासमेकम्" इति श्रुतावेकपदं सार्थकं न स्यात्तदा एतच्छ्रुत्युक्तहोमस्य यावज्जीवकालव्यापकत्वेप्येकमासव्यापकता-लाभसंभवात् "यावज्जीवम्" इति श्रुत्युक्तयावज्जीवनकालस्यैवानुवादसंभवेन कालविधानापेक्षाया अभावेन द्रव्यमात्रविधानापेक्षाप्राप्तौ द्रव्यमात्रविधाने च वाक्यभेदो न स्यादेवेति पूर्वपक्षः सङ्गत एव स्यात् न निरस्तः स्यात् एकपदसत्त्वे चैकमासमात्रकालस्यानुवादार्थं लाभाभावात् तद्विधाने द्रव्यविधाने च वाक्यभेदः स्यादेवेत्यऽगत्या द्रव्यकालविशिष्टकर्मान्तरविधाने प्राप्ते पूर्वपक्षनिरासः संभवतीत्यर्थः।

ननु तादृशश्रुतेः="मासमेकम्" इति श्रुतेर्द्रव्यकालोभयविशिष्टकर्मान्तर-

वाक्यभेदः?– विधेयभेदस्यैतावताप्यऽपरिहारात्, प्रत्युत धर्मिणोप्यधिकस्य विधानात्, एवं च–

"प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः।
अप्राप्ते तु विधीयन्ते बहवोप्येकयत्नतः॥"

इत्यपि निर्युक्तिकमिति चेत्?, न–यत्र विधेयांशे युगपदनेकधर्माणां विशेषणतया भानं तत्र विधेयविशेषणभेदेऽपि विशिष्टनिष्ठविधेयत्वाभेदेन वाक्यभेदविरहात्, अन्यथा 'भूतलं नीलघटवत्' इत्यादावपि 'नीलवद् घटवत्' इत्यादाविव वाक्यभेदप्रसङ्गात्। अनुवाद्यांशे विशेषणतया यत्रानेकेषां विधानं तत्र तेषां विधेयता भिन्नैवेति वाक्यभेदः।

विधायकत्वेऽपि विशिष्टविधाने विशेषणीभूतद्रव्यकालयोरपि विधानापत्त्या वाक्यभेदः स्यादेव, एतावतापि=विशिष्टविधानेनापि। प्रत्युत धर्मिणः=होमस्यापि विधानं कर्तव्यमिति त्रयाणां विधानं प्राप्तम्, तथा च प्राप्तकर्मोद्देशेनानेकस्य गुणस्य=अप्रधानस्य विशेषणीभूतस्य द्रव्यादेर्विधानं न संभवति–अनेकविधाने वाक्यभेदप्रसङ्गात् कर्मण्यप्राप्ते त्वऽनेकगुणविशिष्टस्य प्रधानस्य होमादेरेकयत्नतः=एकेन शब्दव्यापारेण (वाक्येन) विधानं संभवति, अनेकगुणविशिष्टस्यापि विधेयस्य प्रधानस्यैक्याद् वाक्यभेदप्रसङ्गाभावादित्येतत् "प्राप्ते कर्मणि" इत्यादिना यदुक्तं तदपि निर्युक्तिकमेव विशिष्टविधानेऽपि विशेषणीभूतद्रव्यादीनां विधेयतापत्त्या वाक्यभेदप्रसङ्गस्य गले पतितत्वादित्याशङ्कते–अथेति। परिहरति–नेति, विशेषणीभूतद्रव्यादीनां पृथग्वाक्येन विधानाऽभावाद् विशेषणानां भेदेऽपि विशिष्टस्य भेदाभावेन तद्गतविधेयत्वस्यैक्याच्च न विशिष्टविधाने वाक्यभेदप्रसङ्ग इत्यर्थः। विपक्षे बाधकमाह–अन्यथेति, यदि विशिष्टविधानेऽपि वाक्यभेदः स्यात्तदा 'नीलवद् घटवत्' इत्यत्र यथा वाक्यभेदोस्ति तथा 'नीलघटवत्' इति विशिष्टविधानेऽपि वाक्यभेदः स्यात् न चैतदिष्टमित्यर्थः। वाक्यभेदस्थलमाह–अनुवाद्येति, यत्रैकं प्रधानमनूद्य तद्विशेषणत्वेनानेकेषां द्रव्यादीनां विधानं भवति तत्र विशिष्टविधानाभावात् प्रतिविशेषणनिष्ठविधेयतायाश्च भेदाद् वाक्यभेदो भवतीत्यर्थः। अथेत्यारभ्यायं पाठः प्रक्षिप्त एव।

यद्यपि तत्रोपसच्चरुकरणकहोमाधिकरणतात्वेन वाऽधिकारिविशेषकृततादृशहोमाधिकरणतात्वेन वा मासैकव्यापकता मासन्यूनकालहोतृकृतहोमाधिकरणतायामप्यन्यान्यदिने पुरुषान्तरकर्तृकहोमाधिकरणतासत्त्वेनाक्षतैव, तत्तत्पुरुषकर्तृकतादृशहोमाधिकरणतात्वेन व्यापकतायाः श्रुतितात्पर्यविषयत्वे च विधेयानन्त्यम्, तथापि विभिन्नपुरुषकर्तृकहोमाधिकरणताद्वयावृत्ति- तादृशचरुहोमाधिकरणतामात्रवृत्तिधर्मत्वेनाऽनुगतीकृत्य तत्तत्पुरुषकर्तृकतादृशचरुहोमाधिकरणतात्वावच्छिन्नव्यापकतानां संसर्गविधया विवक्षितत्वान्न दोषः।

यद्यपीति—यद्यपि तत्र=मासाग्निहोत्रस्थले मासापेक्षया चैत्रेण न्यूनकालेऽपि होमे कृते तत्कालवृत्तितादृशहोमाधिकरणतायामुपसच्चरुकरणकहोमाधिकरणतात्वेन रूपेण वा अधिकारिविशेषकृत=उपसद्होमकारिकृतहोमाधिकरणतात्वेन रूपेण वा मासव्यापकताऽक्षतैव मासेऽन्यान्यदिने=चैत्रकर्तृकहोमहीनदिनेषु मैत्रादिकर्तृकहोमाधिकरणतायाः सत्त्वात् चैत्रकर्तृकस्य मैत्रादिकर्तृकस्य च होमस्य तुल्यत्वात्, यदि चैत्रादिरूपैककर्तृकर्तृकहोमाधिकरणतायां मासव्यापकता श्रुतितात्पर्यविषयीभूता स्यात्तदाऽन्यान्यदिने मैत्रकर्तृकहोमेन चैत्रकर्तृकहोमस्य मासव्यापकत्वापत्त्यभावेऽपि होमकर्तृभूतचैत्रादिपुरुषानन्त्येन होमरूपविधेयानन्त्यं स्यात् तत्तु नेष्टम्, तथापि धर्मत्वेन=विभिन्नपुरुषकर्तृकहोमाधिकरणताद्वयाऽवृत्तित्वे सति यस्तादृशचरुहोमाधिकरणताकमात्रवृत्तित्वं धर्मस्तेन रूपेण होमाधिकरणतात्वावच्छिन्नव्यापकतानामनुगमं कृत्वा चैत्रादिरूपतत्तत्पुरुषकर्तृकतादृशचरुहोमाधिकरणतात्वावच्छिन्नव्यापकतानां संसर्गविधया=होमप्रतियोगिकमासवृत्तिहोमाधिकरणतानुयोगिकसंसर्गविधया=(मासव्यापकहोमाधिकरणतायामेतादृशव्यापकतासंबन्धेन होमान्वयः) संसर्गत्वेन विवक्षितत्वान्न दोषः=कर्तृभूतचैत्राद्यनन्तव्यक्तीनां संसर्गकोटौ प्रवेशेन तदुपस्थित्यपेक्षाऽभावात् चैत्रादिभेदेन होमरूपविधेयानन्त्यप्रसङ्गो नास्तीत्यर्थः। होमाधिकरणतात्वावच्छिन्नव्यापकतानां विभिन्नपुरुषकर्तृकहोमाधिकरणताद्वयेऽपि संभवात् तद्वृत्तित्वं कथं स्यादित्याशङ्क्य विभिन्नपुरुषकर्तृकहोमाधिकरणताद्वयावृत्तित्वस्य स्वरूपमाह—तादृशाधिकरणताद्वयावृत्तित्वं चेति, स्वं तादृशहोमाधिकरणताः तद्वृत्तित्वं पुनरपि स्वं होमाधिकरणता तन्निरूपको

तादृशाधिकरणताद्वयावृत्तित्वं च स्ववृत्तित्वस्वनिरूपकहोमकर्तृनिष्ठभेदप्रतियोगिकर्तृकहोमाधिकरणतावृत्तित्वोभयसंबन्धेनाऽधिकरणताविशिष्टान्यत्वरूपमनुगतं बोध्यम्।

'मासमधीते' इत्यादावपि चैत्रादिकर्तृकाध्ययनाधिकरणतात्वरूपव्यापकतावच्छेदकधर्मस्योक्तानुगतरूपेणैवानुगमः कार्यः। अतो 'मासमधीयानो दृष्टः' इत्यादौ विशिष्य चैत्रत्वाद्यनुपस्थितावपि नान्वयबोधानुपपत्तिः। अन्यत् स्वयमूहनीयम्।

यो होमस्तादृशहोमकर्तृनिष्ठो यो भेदः=मासाग्निहोत्रहोमविशेषकर्ता नेति भेदस्तादृशभेदप्रतियोगी यो मासाग्निहोत्रहोमविशेषकर्ता तत्कर्तृको योऽन्यहोमस्तादृशहोमाधिकरणतायां वृत्तित्वं चैतदुभयसंबन्धेनाधिकरणताविशिष्टा या व्यापकता= विभिन्नपुरुषकर्तृकहोमाधिकरणताद्वयवृत्तिव्यापकता तादृशव्यापकताभिन्नत्वमेव तादृशाधिकरणताद्वयाऽवृत्तित्वस्यानुगतं रूपं बोध्यमित्यन्वयः। तथा चैतादृशव्यापकता एकपुरुषकर्तृकसकलमासनिष्ठहोमाधिकरणतायामेव संभवति नान्यत्रेति पुरुषद्वयकृतमासव्यापकोक्तानिष्टहोमस्थले श्रुतेर्न चरितार्थतेत्यर्थः। अत्र "वृत्तिधर्मत्वेन" इत्यत्र 'वृत्तित्वधर्मेण' इत्येवं पाठो युक्तः, त्वप्रत्ययस्य च 'अवृत्ति–वृत्ति' इत्युभयत्रैवान्वयः। "उपसद्भिश्चरित्वा मासमेकग्निहोत्रं जुहोति" इत्यत्र मीमांसकैस्तु उपसन्मासाभ्यां विशिष्टस्य नित्याग्निहोत्रातिरिक्तकर्मान्तरस्य विधानं प्रतिपाद्यते इति ध्येयम्।

मासमधीत इति– चैत्रादिकर्तृकाध्ययनाधिकरणतात्वरूपो यो व्यापकतावच्छेदकधर्मस्तस्याप्युक्तानुगतरूपेण=विभिन्नपुरुषकर्तृकाध्ययनाधिकरणताद्वयावृत्तित्वचैत्रकर्तृकाध्ययनाधिकरणतामात्रवृत्तित्वरूपेणाऽनुगतेनानुगमः कार्यः तादृशानुगतधर्मावच्छिन्नव्यापकतायाश्च संसर्गकोटौ प्रवेशः कार्य इति 'मासमधीयानो दृष्टः' इत्यादौ विशेषरूपेण चैत्रत्वाद्यनुपस्थितावपि न शाब्दबोधानुपपत्तिः–चैत्रत्वावच्छिन्नचैत्रकर्तृकाध्ययनाधारतात्वविशिष्टव्यापकतायाः संसर्गकोटौ प्रवेशेन तद्विशेषणीभूतचैत्रत्वादीनामुपस्थित्यऽपेक्षाभावादित्यर्थः। द्वितीयार्थाध्ययनाधारत्वे उक्तव्यापकतासंबन्धेन तत्तन्मासत्वादिव्यक्तीनामन्वयः कर्तव्य इति पूर्वमेव (३६२) प्रतिपादितम्।

'दण्डं विना न घट उत्पद्यते' 'रासभं विनापि घट उत्पद्यते' इत्यादौ विनापदार्थोऽभावनान्। तत्पदसमभिव्याहृतद्वितीयाया अभावान्वयिप्रतियोगित्वमनुयोगित्वं वार्थः। अभाववतश्चोत्पत्तावाऽऽधारत्वेनान्वयः। तथा च 'दण्डाभाववद्वृत्त्युत्पत्तिकत्वाभाववान् घटः' 'रासभाभाववद्वृत्त्युत्पत्तिको घटः' इत्यासकारको बोधः। यद्यपि निपातार्थे नामार्थस्य साक्षादपि भेदान्वयस्तथापि संभवति सार्थकत्वे विभक्तेर्निरर्थकत्वमनुचितमिति द्वितीयायाः सार्थकत्वमुपेयते।

'भूतले न घटः' 'चन्द्र इव मुखम्' इत्यादौ प्रथमायाः प्रतियोगिताद्यर्थकत्वे प्रथमैव न साधुः स्यात्– प्रातिपदि-

---

विनापदसमभिव्याहृतद्वितीयाया अर्थं प्रतिपादयितुमारभते–दण्डं विनेति, "विनापदार्थोऽभाववान्" इत्यत्राभाववत्पदेन देशो कालो वा ग्राह्यः, अभावश्च द्वितीयाप्रकृत्यर्थदण्डादीनां ग्राह्यः। तत्पदम्=विनापदम्। प्रतियोगित्वमनुयोगित्वं वा द्वितीयार्थस्तत्र प्रतियोगित्वस्य निरूपकत्वसंबन्धेनाऽनुयोगित्वस्य चाश्रयतासंबन्धेनाऽभावान्वयित्वं ज्ञेयम्, अभाववतः कालस्य देशस्य वोत्पत्तावाधारत्वेन रूपेणान्वयः देशकालयोरेवोत्पत्त्याऽऽधारत्वात्, तथा चात्र दण्डस्याभावेऽभावस्य काले कालस्योत्पत्तौ उत्पत्तेर्नञर्थाभावे तस्य घटेऽन्वयः। स्वयमेव वाक्यार्थमाह–तथा चेति, दण्डाभाववान् यः कालो देशो वा तद्वृत्तिर्योत्पत्तिस्तादृशोत्पत्त्यभाववान् घट इत्यर्थः। तथा रासभाभाववान् यः कालो देशो वा तद्वृत्त्युत्पत्तिमान् घट इत्यर्थः। यद्यपीति– यद्यपि निपातार्थनामार्थयोः साक्षादपि भेदान्वय इष्ट एवेत्यत्र प्रतियोगित्वस्य द्वितीयार्थत्वाभावेऽपि तेन संबन्धेन निपातार्थे=विनापदार्थाभावे नामार्थस्य दण्डस्य भेदान्वयः साक्षादपि संभवति तथापि विभक्तेः सार्थकत्वे संभवति सति निरर्थकत्वमनुचितमेवेति प्रतियोगित्वस्य द्वितीयार्थत्वमुक्तं तथा च दण्डस्य द्वितीयार्थे तस्य च विनापदार्थघटकाभावेऽन्वयः कर्तव्य इत्यर्थः।

ननु यथा 'दण्डं विना न घटः' इत्यत्र द्वितीयायाः प्रतियोगित्वार्थकत्वं स्वीकृतं तथा 'भूतले न घटः' इत्यत्रापि भूतले घटप्रतियोगिक एवाभावः

कार्थान्वयिनोऽन्यपदेनाभिधानस्थले एव "प्रातिपदिकार्थ" इत्यादिसूत्रेण प्रथमाविधानादिति तत्र प्रतियोगित्वादिः संबन्धविधयैव भासते इत्युपेयते।

'दण्डं विना न घटोत्पत्तिः' इत्यादौ च विनान्तार्थे घटोत्पत्त्याद्यभावान्वयेऽनुयोगिविशेषणदण्डाद्यभावस्य च तदनुयोगितावच्छेदकत्वं भासते– 'द्रव्ये न गन्धः' इत्यऽप्रयोगा–दुपलक्षणीभूतधर्मावच्छिन्ने न नञर्थाभावान्वय इति व्युत्पत्तेरिति।

प्रतीयते इति प्रथमाया अपि प्रतियोगित्वार्थकत्वं स्वीक्रियतामित्याशङ्क्याह– भूतल इति। 'चन्द्र इव मुखम्' इत्यत्र चन्द्रप्रतियोगिकसादृश्यवन्मुखमित्यर्थः, साधुत्वाभावे हेतुमाह– प्रातिपदिकार्थेति, अभिहिते कर्मणि कर्तरि च प्रथमा भवतीति प्रातिपदिकार्थे घटादावऽन्वयिनः कर्मत्वादेरन्यपदेनाख्यातप्रत्ययेना–भिधानस्थले एव "प्रातिपदिकार्थे" इति सूत्रेण प्रथमा भवतीति प्रतियोगित्वस्य प्रथमयैवाभिधाने प्रथमायाः साधुत्वं न स्यादिति तत्र='भूतले न घटः' इत्यादौ प्रतियोगित्वस्य संबन्धविधयैव भानं संभवति न तु प्रथमार्थत्वेनेत्यर्थः। तत्र=अत्र।

दण्डमिति– 'दण्डं विना न घटोत्पत्तिः' इत्यादौ विनान्तार्थे=दण्डाभाववति काले देशे वा घटोत्पत्त्यभावस्यान्वये कृते सति=घटोत्पत्त्यभावविशिष्टो दण्डाभाववान् काल इत्यत्र घटोत्पत्त्यभावस्य दण्डाभाववान् काल एवानुयोगी तादृशनुयोगिविशेषणतां प्राप्तस्य दण्डाभावस्य (दण्डाभाववति दण्डाभावस्य विशेषणत्वात्) तदनुयोगितावच्छेदकत्वम्=घटोत्पत्त्यभावानुयोगितावच्छेदकत्वं भासते इत्यर्थः। नन्वत्र घटोत्पत्त्यभावानुयोगिताया अवच्छेदकत्वं दण्डाभावस्य कथमुक्तं कालत्वादेर्वा द्रव्यत्वादेर्वा कथं नोक्तम्–घटोत्पत्त्यभावविशिष्टे देशे काले च द्रव्यत्वादेरपि सत्त्वादित्याशङ्क्योक्ते दण्डाभाावस्यावच्छेदकत्वे हेतुमाह– द्रव्येति, 'द्रव्ये न गन्धः' इति प्रयोगो न भवति द्रव्यभूतपृथिव्यां गन्धस्य सत्त्वादेवेत्युपलक्षणीभूतो यो जलादीनां धर्मो द्रव्यत्वं तदवच्छिन्ने नञर्थाभावान्वयो न भवतीति व्युत्पत्त्या यथा तत्र जलत्वाद्यवच्छिन्ने एव गन्धाभावस्यान्वयो भवति न द्रव्यत्वावच्छिन्ने एवमत्रापि नञर्थाभावस्योप–लक्षणीभूतं यद् द्रव्यत्वादि तदवच्छिन्नेऽन्वयो न भवति किं त्वनतिप्रसक्त–

'रासभं विना न घटोत्पत्तिः' इति न प्रयोगः– अतिप्रसक्ततया रासभाभावस्य घटोत्पत्त्याद्यभावानुयोगितावच्छेदकताविरहात्।

अथ वाऽभाव एव विनार्थः, 'दण्डं विना न घटः' इत्यादौ च विनान्तार्थस्याभावस्य नञर्थे घटाद्यभावे प्रयोज्यतासंबन्धेनैवान्वयः। अत एव 'रासभं विना न घटः'

दण्डाभावविशिष्टे एवेति दण्डाभावस्य घटोत्पत्त्यभावानुयोगितावच्छेदकत्व-मुक्तमित्यर्थः। 'दण्डं विना न घटोत्पत्तिः' इत्यत्र दण्डाभावस्यानुयोगिता-वच्छेदकत्वस्वीकारस्य फलमाह– रासभमिति, रासभाभावस्य घटोत्पत्तिस्थलेपि संभवात् घटोत्पत्त्यभावेन सह नियतत्वाभावाच्चातिप्रसक्तत्वमस्ति अतिप्रसक्तस्य चावच्छेदकत्वं न भवतीति रासभाभावस्य घटोत्पत्त्यभावानुयोगितावच्छेदकत्वं न संभवतीति 'रासभं विना न घटोत्पत्तिः' इति प्रयोगो न भवति, विनान्तार्थघटकाभावस्योक्तानुयोगितावच्छेदकत्वसंभवे एवैवं योगसंभवादित्यर्थः।

पक्षान्तरमाह– अथ वेति, अभाव एव विनापदार्थो न त्वभाववान्, तथा च 'दण्डं विना' इत्यस्य दण्डाभाव एवार्थस्तस्य च दण्डाभावस्य नञर्थे घटाभावे प्रयोज्यतासंबन्धेनान्वयः–घटाभावे दण्डाभावप्रयोज्यत्वस्य सत्त्वादित्यर्थः। अत एवेति– घटाभावदण्डाभावयोरत्र प्रयोज्यप्रयोजक-भावभानादेव 'रासभं विना न घटः' इति प्रयोगो न भवति, घटाभावस्य रासभाभावप्रयोज्यत्वाभावाद् रासभाभावेऽपि घटोत्पत्तिसंभवादित्यर्थः। अत एवेति–घटाभावदण्डाभावयोः प्रयोज्यप्रयोजकभावभानादेव दण्डाद्यभाववति देशे काले वा घटादेः सत्त्वेपि 'जायते' इत्यस्य पदस्याध्याहारं विनापि 'दण्डं विना न घटः' इति प्रयोग उपपद्यते अन्यथा यदि घटाभावदण्डाभावयोः परस्परं प्रयोज्यप्रयोजकभावभानं न स्यात् किं तु घटोत्पत्त्यभावदण्डाभावयोरेव प्रयोज्यप्रयोजकभावभानं स्यात्तदाऽभावप्रतियोगिभूतोत्पत्तिबोधकम् 'जायते' इति पदं विना 'दण्डं विना न घटः' इति प्रयोगो न स्यात्–प्रतियोगिभूतपदार्थो-पस्थितिं विना तदभावबोधनासंभवादिति 'जायते' इति पदस्याऽध्याहारः कर्तव्यः स्यादेव यदा च घटाभावदण्डाभावयोरपि प्रयोज्यप्रयोजकभावः स्वीकृतस्तदा तूत्पत्तिपदार्थोपस्थापकस्य 'जायते' इति पदस्यापेक्षाऽभावान्न तदध्याहारापेक्षेत्यर्थः। दण्डाद्यभाववतीति–यद्यपि घटाभावदण्डाभावयोः

इत्यादयो न प्रयोगाः। अत एव दण्डाद्यभाववति घटादेर्वृत्तावपि 'जायते' इत्यस्याध्याहारं विनैव 'दण्डं विना न घटः' इति प्रयोगोपपत्तिः। 'रासभं विना घटः' इत्यादौ च विनार्थस्याभावस्य सामानाधिकरण्यसंबन्धेन घटादावन्वयः।

दीधितिकृतापि "अविनाभावो व्याप्तिः" इत्यत्र 'साध्यं विना=साध्याभाववति योऽभावः- इति यद् व्याख्यातं तत्र सप्तम्यन्तेन मतुपा संसर्गविधया भासमानं तदधिकरणनिष्ठ-

कार्यकारणभावो नास्ति अन्यथा दण्डाभाववति घटाभाव एव स्यान्न तु घटोपि न चैवमस्तिदण्डाभाववति देशे काले च घटस्याप्युपलब्धेस्तथापि घटाभावदण्डाभावयोः प्रयोज्यप्रयोजकभावस्त्वस्त्येव तथा च दण्डाभाववति घटादेर्वृत्तावपि=घटस्य सत्त्वेपि घटाभावदण्डाभावयोः प्रयोज्यप्रयोजकभाव-स्वीकारात् 'दण्डं विना न घटः' इति प्रयोग उपपद्यते तत्रोक्तरीत्या 'जायते' इति पदस्याऽध्याहारापेक्षापि नास्तीत्यर्थः। रासभमिति–'रासभं विना घटः' इत्यत्र यस्मिन् देशे काले वा रासभाभावो भवति तस्मिन् घटोपि संभवत्येवेति रासभाभावघटयोः सामानाधिकरण्यं प्राप्तमिति तेन सामानाधिकरण्येन रासभाभावस्य घटेऽन्वय इति 'रासभाभावविशिष्टो घटः' इत्यत्र शाब्दबोधाकार इत्यर्थः।

विनापदार्थोऽभाव एव नत्वऽभाववान् (अभावाधिकरणम्)इत्यत्र दीधितिकारं प्रामाणयति–दीधितिकृतापीति, विनापदघटितस्याविनाभावपदस्य साध्यं विना=साध्याभाववति योऽभावः'स व्याप्तिः' इति व्याख्यायां साध्याभाववतीति सप्तम्यन्तेन मतुपा हेत्वभावस्य यत् तदधिकरणनिष्ठत्वम्= साध्याभावाधिकरणनिष्ठत्वमुपात्तम्=उक्तं तत् संसर्गविधयैव भासमानमुपात्तम् अर्थात् तत्रोक्तं हेत्वभावे साध्याभावाधिकरणनिष्ठत्वं संसर्गविधयैव भासते न तु साध्याभावाधिकरणं विनार्थत्वेन=विनापदार्थत्वेनोपात्तम् अर्थात् साध्याभावाधिकरणम्=साध्याभाववान् विनापदार्थो नोक्त इति नाऽभाववान् विनापदार्थः किं त्वऽभाव एवेत्यर्थः। हेत्वभावे साध्याभाववद्वृत्तित्वसंसर्गेण हि साध्याभाववतोऽन्वयो विज्ञेयः। ननु दीधितिकृता 'साध्यं विना' इत्यस्य 'साध्याभाववति' इति व्याख्या कृता तत्र विनिगमनाविरहात् स्वारस्याच्च

त्वमेवोपात्तं न तु विनार्थत्वेनाधिकरणम्, अभावाधिकरणपर्यन्तस्य विनार्थत्वेऽपि सप्तम्याऽऽधेयत्वरूपाऽपदार्थविवरणरूपताया आवश्यकत्वात्।

न च विनापदोत्तरलुप्तसप्तम्यर्थ एव 'अभाववति' इति सप्तम्या विवृत इति वाच्यम्, निपातोत्तरविभक्तेर्निरर्थकत्वात्। अत एव सर्वत्र निपातोत्तरं साधुत्वार्थं प्रथमैवेति शाब्दिकाः।

विनापदस्याऽभाववान् एवार्थ इति दीधितिकारेष्टं प्रतीयते, अन्यथा 'साध्यं विना' इत्यस्य 'साध्याभाववति' इति व्याख्यायां मतुपाऽपदार्थस्यैव विवरणं कृतमित्यापद्येत मतुबर्थाधिकरणस्याऽपदार्थत्वापत्तेः 'साध्यं विना' इत्यस्य साध्याभावमात्रार्थकत्वासंभवादित्याशङ्क्याह—अभावाधिकरणेति, अभाववतो विनार्थत्वस्वीकारेण अभावाधिकरणपर्यन्तस्य=साध्याभाववतीति पदघटकस्य साध्याभाववत् इत्यस्यापि विनापदार्थत्वे स्वीकृते साध्याभाववत्पदोत्तरसप्तम्या यदाऽऽधेयत्वरूपस्यार्थस्य विवरणं कृतं तत्तु कस्यापि पदस्य नार्थ इत्यऽपदार्थ एवेत्युक्तायाम् "साध्याभाववति" इति व्याख्यायामपदार्थविवरणत्वं त्वावश्यकमेव=गले पतितमेवेति मतुपाप्यऽपदार्थस्यैव विवरणं कृतमिति स्वीकार्यं तथा च विनापदार्थोऽभाव एव न त्वभाववानिति सिद्धम्। किं वा ननु "साध्यं विना=साध्याभाववति" इत्यत्र दीधितिकृताऽभाववानेव विनापदार्थ उक्त इति कथं त्वयाऽभावमात्रस्य विनापदार्थत्वमुच्यते इत्याशङ्क्याह—दीधितिकृतेति। 'अविनाभावः' इत्यत्राऽविनापदेन भावपदसमासः।

ननु "साध्याभाववति" इत्यत्र मतुपा विनापदोत्तरलुप्तसप्तम्यर्थस्यैव विवरणं कृतं नाऽपदार्थस्येत्याशङ्क्याह—न चेति। उत्तरमाह—निपातेति। अत एव=निपातोत्तरविभक्तेर्निरर्थकत्वादेव प्रथमातिरिक्तविभक्तिप्राप्तिर्व्यर्थैवेति साधुत्वार्थं प्रथमैव सापि लोपं प्राप्नोतीति न मतुपा उक्तसप्तम्यर्थविवरणं संभवतीत्यर्थः।

ननु दीधितिकृतैव "पृथिव्यामेव गन्धः" इत्यत्र निपातभूतैवकारपदोत्तरसप्तम्या आधेयत्वबोधकत्वं स्वीकृतमिति कथं नोपातोत्तरविभक्ते-

"पृथिव्यामेव गन्धः" इत्यादावेवकारप्रकृतिकसप्तम्या यदाऽऽधेयत्वबोधकत्वमङ्गीकृतं दीधितिकृद्भिस्तत्रापि तेषां न निर्भरः। अस्तु वा तत्र प्रतियोगितया पृथिव्यन्यवृत्तित्व-भानानुरोधेनैवकारस्यान्यवृत्तित्वार्थकत्वं गौरवादुपेक्ष्य तत्राधेयत्ववाचकत्वेन क्लृप्तायाः सप्तम्याः कल्पनम्। प्रकृते चाधेयत्वस्य संसर्गतयैवोपपत्तौ विनापदसाकाङ्क्षाधेयत्वार्थ-कसप्तमीकल्पनं दुष्कल्पनमेव।

एवकारस्थले चाऽभावरूपे एवार्थेऽन्यरूपतदर्थान्तर-स्याऽऽधेयतासंबन्ध इति न संभवति–आधेयतायास्तद्वत्येव

र्निरर्थकत्वं स्यात् तथा च विनापदोत्तरविभक्तेरपि सार्थकत्वात्तदर्थस्यैव "साध्याभाववति" इत्यत्र मतुपा विवरणं कृतमित्याशङ्क्याह–पृथिव्यामिति। उत्तरमाह–तत्रापीति। तत्र=एवपदोत्तरल्लुप्तसप्तम्या आधेयत्वबोधकत्वे। एवकारोत्तरसप्तम्या आधेयत्वबोधकत्वमभ्युपगम्याह–अस्तु वेति। तत्र='पृथिव्यामेव गन्धः' इत्यत्र, एवकारस्याऽन्ययोगव्यवच्छेदोर्थस्तत्रान्य-योगोऽन्यवृत्तित्वमेव व्यवच्छेदश्चाभाव एवेत्यऽन्यवृत्तित्वप्रतियोगिकाभावे प्रतियोगित्वरूपेण पृथिव्यन्यवृत्तित्वस्य भानं भवति, एवकारस्यान्यवृत्तित्वे च शक्तिस्वीकारे गौरवं स्यादिति वृत्तित्वार्थभागं परित्यज्यान्यपदार्थेऽभावे चैवकारस्य खण्डशः शक्तिः, एवकारोत्तरप्राप्ताधेयत्वार्थकसप्तम्या वृत्तित्व-मेवार्थस्तस्य च सप्तम्यर्थवृत्तित्वस्यान्य पदार्थे नान्वयः इति सम्प्तम्यन्तैव-कारेणान्यवृत्तित्वाभावोऽर्थो लब्ध इति एवकारस्थलेऽन्यवृत्तित्वार्थकत्वस्वीकारे गौरवभयात् सप्तमीकल्पनं युज्यते। प्रकृते="साध्यं विना" इत्यत्राधेयत्वस्य संसर्गतयापि भानं संभवतीति विनापदोत्तरं सप्तमीकल्पनं न युक्तमेव तथा च "साध्याभाववति" इति मतुपाऽपदार्थविवरणमेव कृतमित्याह–प्रकृते चेति।

नन्वेवमेवकारस्थलेप्याधेयत्वस्य संसर्गत्वमेवास्तु तथा चाभावे आधेयतासंबन्धेनान्यपदार्थस्यान्वयं वक्ष्याम इत्याशङ्क्याह–एवकारस्थल इति। परिहारहेतुमाह–आधेयताया इति, यथा 'भूतले घटः' इत्यत्र तद्वति=

संबन्धत्वात्, न तु तदभावे। न च तत्राधेयत्वाभावो न प्रतीयते, अपि तु तत्संबन्धावच्छिन्नप्रतियोगिताकपृथिव्याद्यन्याभाव इत्युपेयं तादृशप्रतियोगिताकत्वमेवाभावेऽन्वयस्य संबन्धोस्त्विति वाच्यम्, आधेयतासंबन्धस्य प्रतियोगिन आधारस्याऽनुयोगिन्याधेये वृत्त्यनियामकत्वेनाऽभावप्रतियोगितानवच्छेदकत्वात्। 'चैत्रः पचति' इत्यादौ कृत्यादिसंबन्धस्याऽपदार्थत्वेऽपि 'पाककृतिमान्' इत्यादौ मतुबादिपदेन विवरणवद् उक्तस्थले सामानाधिकरण्यस्य पदेन विवरणमपि न विरोधमापादयति, विवरणीयार्थस्याप्यन्यलभ्यत्वेऽपदार्थतोपपत्तेरित्यलमसदावेशेन।

आधेयत्ववति=भूतलवृत्तिघटे एव भूतलस्याधेयतासंबन्धः संभवति न तु भूतलाभावे तथा एवकारस्थलेप्यन्यपदार्थस्य स्वाभावे आधेयतासंबन्धो न संभवतीत्यर्थः। नन्वेवकारस्थले आधेयत्वाभावो न प्रतीयते नाम आधेयतासंबन्धेनान्यपदार्थस्याऽभावेऽन्वयो नोच्यते किं तु तत्संबन्धावच्छिन्न=आधेयत्वसंबन्धावच्छिन्नप्रतियोगिताकपृथिव्याद्यन्याभावो गन्धे प्रतीयते तादृशाभावे च तादृशप्रतियोगिकत्वम्=आधेयत्वसंबन्धावच्छिन्नप्रतियोगिताकत्वसंबन्धेन पृथिव्याद्यन्यपदार्थस्यान्वय इत्युच्यते इत्याशङ्क्याह न चेति परिहारमाह–आधेयतेति अभावे, आधेयत्वसम्बन्धवच्छिन्नप्रतियोगिताकत्वसम्बन्धेनाऽन्यपदार्थस्यान्वयस्वीकारेपि आधेयतासंबन्धेनान्यपदार्थाभाव इत्येव प्राप्तं तत्र 'पृथिव्यामेव गन्धः' इत्यत्रान्यपदार्थाधेयताभावो गन्धे बोधनीय इत्याधारभूतोन्यपदार्थ एवाभावप्रतियोगी आधेयभूतो गन्धश्चानुयोगी आधेयतासंबन्धश्च वृत्त्यनियामक इति अनुयोगिन्याधेये गन्धे प्रतियोगिभूताधारस्यान्यपदार्थस्याधेयतासंबन्धोऽभावीयप्रतियोगितावच्छेदको न संभवति–वृत्त्यनियामकत्वादिति न चायं कल्पोपि युक्त इति नैवकारस्थले आधेयत्वस्य संसर्गविधया भानं संभवतीत्यर्थः। "अविनाभावः" इत्यस्य दीधितिकृता यः "साध्यसामानाधिकरण्यम्" इति निष्कर्ष उक्त स आपाततोऽपदार्थ एव प्रतिभातीति तद्दोष प्रसङ्गसंगत्योद्धरति–चैत्र इति, यथा 'चैत्रः पचति' इत्यत्र कृतेराख्यातार्थत्वेपि कृतिसंबन्धस्तु यद्यपि कस्यापि पदस्यार्थो नास्ति 'चैत्रः पचति' इत्यस्य 'पाककृतिमान्' इति विवरणे च मतुपा संबन्धस्यैव

'विना वातं वृक्षः पतितः' इत्यादौ विनापदार्थस्याभावस्याश्रयतासंबन्धेन वृक्षेऽन्वयात् 'वाताभावविशिष्टो वृक्षः पतितः' इति शब्दतो लभ्यते, पतनेऽनुभवसिद्धो वातजन्यत्वाभावलाभश्चाऽऽर्थः– जन्यतायाः पदानुपस्थाप्यत्वात् तदभावस्य तस्य वृत्त्यनियामकसंबन्धत्वात् तदवच्छिन्नवाताभावस्य च शब्देन बोधयितुमशक्यत्वात्।

'पुत्रं विना गतः' इत्यादौ पुत्रादिपदं लक्षणया पुत्रगमनादिपरम्, विनापदबोध्यतदभावश्च समानकालीन-

---

विवरणं क्रियते तथापि संबन्धस्याऽपदार्थत्वं नास्ति अन्यलभ्यत्वाभावात् एवमुक्तस्थले= "अविनाभावः" इत्यत्र साध्यसामानाधिकरण्यं यद्यपि कस्यापि पदस्यार्थो नास्ति तथापि पदेन="साध्यसामानाधिकरण्यं व्याप्तिः" इति पदेन साध्यसामानाधिकरण्यविवरणेपि विरोधः=अपदार्थविवरणत्वदोषो नास्ति– साध्यसामानाधिकरण्यस्यान्यलभ्यत्वाभावात्, व्याख्यातस्यार्थस्यान्य- लभ्यत्वे एवाऽपदार्थत्वदोषापत्तिस्वीकारादित्यर्थः।

विना वातमिति– वातमिति प्रतियोगित्वं द्वितीयार्थस्तथा च वाताभावविशिष्ट इत्यस्य वातप्रतियोगिकाभावविशिष्ट इत्यर्थः। ननु 'विना घातं वृक्षः पतितः' इत्यत्र वृक्षकर्तृकं पतनं वातजन्यत्वाभाववदिति प्रतीतिर्भवति न तु वाताभावविशिष्टो वृक्षः पतित इत्याशङ्क्याह–पतन इति, 'विना वातम्' इत्यत्र जन्यतायाः कस्यापि पदस्यार्थत्वाभावात् पतने वातजन्यत्वाभावलाभ आर्थ एव, तथा च जन्यतायाः पदानुपस्थाप्यत्वात् तदभावस्य= जन्यत्वाभावस्य (वातजन्यत्वाभावस्य) शब्देन बोधयितुमशक्यत्वात्– पदोपस्थाप्यस्यैव शब्देन बोधयितुं शक्यत्वात् तथा तस्य=जन्यत्वस्य वृत्त्यनियामकसंबन्धत्वेन तदवच्छिन्नवाताभावस्य=जन्यत्वसंबन्धावच्छिन्नप्रतियोगिताकवाताभावस्यापि (जन्यत्वसंबन्धेन वाताभावस्यापि) शब्देन बोधयितुमशक्यत्वात् पतने वातजन्यत्वाभावलाभ आर्थ एवेत्यर्थः।

पुत्रं विनेति– अत्र पुत्रपदस्य लक्षणया पुत्रगमनपरत्वात् 'पुत्रगमनं विना=पुत्रगमनाभावकाले गत इत्यर्थः। तदभावः=पुत्रगमनाभावः। यस्मिन्

त्वादिसंबन्धेन गमनेऽन्वेति, समानकालीनत्वघटककालनिष्ठं स्वाधिकरणत्वमनवच्छिन्नं बोध्यम्, अतो गमनादिकाले तदनधिकरणदेशावच्छेदेन गमनाद्यभावसत्त्वे पि नातिप्रसङ्गः।

केचित्तु– उक्तस्थलेऽसाहित्यमेव विनापदार्थः, तस्य च गमनादिकर्तर्थऽन्वयः। असाहित्यं च स्वकर्तृकसमभिव्याहृतगमनादिक्रियासमानकालीनतादृशक्रियाकर्तृत्वरूपसाहित्याभावः। क्रियान्वयिस्वकर्तृकतादृशक्रियाकालीनत्वाभाव एव

काले पुत्रगमनाभावस्तस्मिन् काले एव पितृगमनमिति समानकालिकत्वं तेन संबन्धेन पुत्रगमनाभावविशिष्टं पितृगमनमित्यर्थः। संबन्धभूतसमानकालिकत्वघटककाले यत् स्वाधिकरणत्वम्=पुत्रगमनाभावाधिकरणत्वं तदऽनवच्छिन्नम्=देशानवच्छिन्नं बोध्यं तथा च पित्रा सह पुत्रस्य गमनकाले तदनधिकरणदेशावच्छेदेन=यन्मार्गोपरि पितृपुत्राभ्यां न गम्यते तन्मार्गे=तद्देशावच्छेदेन किं वा पितृगमनानधिकरणदेशावच्छेदेन=मार्गान्तरावच्छेदेन पुत्रगमनाभावसत्त्वेपि नातिप्रसङ्गः='पुत्रं विनागतः' इति प्रयोगापत्तिर्नास्ति, अन्यथा कालनिष्ठस्य पुत्रगमनाभावाधिकरणत्वस्य देशेनावच्छिन्नत्वे पितृगमनानधिकरणदेशावच्छेदेन पुत्रगमनाभावस्य पुत्रगमनकालेऽपि सत्त्वेन प्राप्त्या 'पुत्रं विना गतः' इति प्रयोगः स्यादेव न चैतदिष्टमित्यर्थः।

लक्षणाश्रयणगौरवरहितं मतान्तरमाह–केचिदिति। उक्तस्थले='पुत्रं विना गतः' इत्यत्र। तस्य=असाहित्यस्य। तथा च पुत्राऽसाहित्यवान् (पुत्रसाहित्याभावविशिष्टः) गत इत्यर्थः। असाहित्यपदार्थमाह– असाहित्यमिति, स्वं गमनकर्ता पिता तत्कर्तृका समभिव्याहृता या गत इति गमनक्रिया तादृशक्रियासमानकालिका या तादृशक्रिया=गमनक्रिया तत्कर्तृत्वरूपस्य साहित्यस्याभाव एवाऽसाहित्यपदार्थ इत्यर्थः, गच्छता पुत्रेण च गमनरूपमेव साहित्यं कर्तव्यमिति गमनकर्तृत्वं साहित्यमित्युक्तम्। सर्वत्रोक्तस्थलेषु विनापदार्थोऽभाव एवेत्युक्तमिति 'पुत्रं विना गतः' इतयत्राप्यभावेनैव विनापदार्थेन भवितव्यमित्याशयेन पक्षान्तरमाह– क्रियान्वयीति, क्रियान्वयी=पितृकर्तृकगमनक्रियान्वयी यः स्वकर्तृकतादृशक्रियाकालीनत्वस्य=पुत्रकर्तृकगमनक्रियाकालिकत्वस्याभावः स एव विनापदार्थः स चाभावः पितृगमनेऽस्त्येवेत्यर्थः। स्वकर्तृकेत्यत्र कर्तृत्वं

वा विनार्थः, कर्तृत्वे पुत्रादेराधेयत्वेनान्वयः, विभक्तिः साधुत्वार्थैव। अस्तु वाऽऽधेयत्वं द्वितीयार्थः। सप्तम्या आधेयत्वार्थकत्वेऽपि नात्र सप्तमीप्रसक्तिः– तस्याः कारकविभक्तित्वेन क्रियान्वयिस्वार्थबोधकत्वात्, अतः शेषषष्ठीप्रसक्त्या तामेवोपपदविभक्तिर्द्वितीया बाधते इति "सर्वा उपपदविभक्तयः षष्ठ्यपवादिकाः" इत्यस्याऽविरोध इति। विनासमानार्थकयोर्ऋतेऽन्तरेणेति निपातयोरपि दर्शितैव रीतिः। एवं विनायुक्ततृतीयापञ्चमीस्थलेऽपि।

मर्यादाऽभिविध्यर्थकयावच्छब्दयोगेऽपि द्वितीया दृश्यते। तत्र मर्यादार्थको यावच्छब्दः– "आरम्भ तस्यां दशमीं तु

पुत्रनिष्ठं विवक्षितमिति पुत्रस्य कर्तृत्वे आधेयत्वसंबन्धेनैवान्वयेनाधेयत्वस्य संसर्गविधयाभानसंभवेन तदुपस्थित्यपेक्षाभावात् पुत्रपदोत्तरद्वितीया विभक्तिः साधुत्वार्थत्वेन निरर्थकैवेत्याह–कर्तृत्वे इति। विभक्तेर्निरर्थकत्वानौचित्यात् पक्षान्तरमाह– अस्तु वेति, द्वितीयविभक्त्यर्थभूताधेयत्वेन कर्तृत्वे पुत्रान्वयो ज्ञेयः। ननु यद्यत्राधेयत्वं द्वितीयार्थस्तदात्र पुत्रपदात्सप्तमी किं न स्यात् तस्याप्याधेयत्वार्थकत्वादित्याशङ्क्याह– सप्तम्या इति। सप्तमीप्रसक्त्यभावे हेतुमाह– तस्या=सप्तम्याः कारकविभक्तित्वेन क्रियान्वयि स्वार्थबोधकत्वमस्ति, अत्र च नाधेयत्वस्य क्रियान्वयित्वमस्तीति न सप्तमीप्रसक्तिः। अत इति– अत्र विभक्त्यर्थस्य क्रियान्वयित्वं नास्तीत्यऽकारविभक्तेः शेषषष्ठ्या एव प्राप्तिरस्ति तां च विनापदयोगे विधीयमाना द्वितीया बाधते इति पुत्रपदोत्तरं द्वितीया प्राप्ता– उपपदविभक्तीनां=विनादिपदसंयोगेन प्राप्तानां विभक्तीनां षष्ठीबाधकत्वादित्यर्थः। उक्ते प्रमाणमाह– सर्वा इति। 'ऋते' 'अन्तरेण' इति पदयोरप्येषैव रीतिरित्याह– विनासमनार्थकयोरिति। एवम् 'पुत्रेण विना गतः' 'पुत्राद्विना गतः' इत्यत्राप्युक्तरीतिरेव ज्ञेयेत्याह– एवमिति। विनायुक्त= विनापदसमभिव्याहृत।

मर्यादेति–मर्यादार्थकस्याभिविध्यर्थकस्य च यावच्छब्दस्य योगेपि द्वितीया भवति, तत्र 'तेन विना मर्यादा' 'तेन सहाभिविधिः' मर्यादार्थकया–

यावत् प्रपूजयेत् पर्वतराजपुत्रीम्" इत्यादौ। मर्यादा=सीमा कालरूपा देशरूपा च कालनिष्ठं तत्त्वं च तत्कालनिष्ठं समभिव्याहृतकालप्रागभावानधिकरणस्वप्रागभावाधिकरणस्वसजातीयत्वावत्कालवृत्तिसमभिव्याहृतक्रियानधिकरणत्वम्, एवं चोक्तस्थले यावच्छब्देन पूजारूपक्रियायां शुक्लदशमीनिष्ठतादृशसीमात्वनिरूपकत्वं प्रत्याय्यते, तावतैवार्थतः शुक्लदशम्यां मर्यादात्वं लभ्यते। तन्निष्ठसीमात्वनिरूपकत्वं च तदवृत्तित्वे

वच्छब्दोदाहरणमाह– आरभ्येति। तस्याम्=आश्विनकृष्णनवम्यां पूजामारभ्याऽऽश्विनशुक्लदशमीं यावत् (शुक्लनवमीपर्यन्तं दशमीं विना) प्रपूजयेदित्यर्थः। देशकालयोर्भेदेन द्विविधां मर्यादामाह– मर्यादेति। तत्त्वम्=सीमात्वम्। तत्कालेति– तत्कालनिष्ठं यत् समभिव्याहृतकालप्रागभावानधिकरणस्वप्रागभावाधिकरणस्वसजातीययावत्कालवृत्तिसमभिव्याहृतक्रियानधिकरणत्वं तदेव दशमीनिष्ठं सीमात्वमित्यन्वयः, तत्र तत्कालनिष्ठम्=दशमीकालनिष्ठम् (दशमीनिष्ठम्) यत्– समभिव्याहृतकालः कृष्णनवमीकालस्तत्प्रागभावानधिकरणं स्वप्रागभावस्य दशमीप्रागभावस्य चाधिकरणं यः स्वजातीयः दशमीसजातीयो यावत्कालः कृष्णनवमीमारभ्य शुक्लनवमीपर्यन्तकालस्तद्वृत्तिः समभिव्याहृताया क्रिया पूजारूपक्रिया तदनधिकरणत्वं तदेव दशम्यां सीमात्वमस्ति, नवमनवरात्रपर्यन्तमेव पूजाविधानेन दशम्यां पूजाया अभावात्, कृष्णनवमीप्रागभावस्याधिकरणीभूतः कालः कृष्णाष्टमीपर्यन्तकालः कृष्णनवमीप्रागभावानधिकरणीभूतश्च कृष्णनवमीमारभ्य कालः स एव कालः शुक्लदशमीप्रागभावाधिकरणोपि। साजात्यं च तिथित्वरूपेण विज्ञेयम्। फलमाह– एवं चेति, शुक्लदशमीनिष्ठसीमात्वस्य निरूपिका पूजारूपक्रियैव– दशम्याः पूजारूपक्रियानधिकरणत्वात्, तदनधिकरणस्यैव तत्सीमात्वात्–तदुच्यते–तेन विना सीमेत्यर्थः। तावतेति–यतो यावच्छब्देन तु पूजारूपक्रियायामुक्तसीमात्वनिरूपकत्वमात्रं प्रत्याय्यतेऽतो दशम्यां यो मर्यादात्वलाभः स आर्थ एवेत्यर्थः। सीमात्वनिरूपकत्व स्वरूपमाह–तन्निष्ठेति, तन्निष्ठ=दशमीनिष्ठ। तदवृत्तित्वे सति=शुक्लदशम्यऽवृत्तित्वे सति कृष्णनवमीप्रागभावानधिकरणीभूतस्तथा शुक्लदशमीप्रागभावाधिकरणीभूतो यस्तिथिकूटः= कृष्णनवमीमारभ्य शुक्लनवमीपर्यन्तः षोडशतिथ्यात्मकस्तिथिसमूहस्तद्व्यापकत्वं यत्पूजारूपक्रियायामस्ति तदेव

सति कृष्णनवमीप्रागभावानधिकरणशुक्लदशमीप्रागभावाधिकरणतिथिकूटव्यापकत्वम्, तावता षोडशतिथ्यधिकरणकषोडशपूजारारूपस्यैककर्मणो विधेयतया लाभः।

व्याप्यकालसमुदाये सजातीयत्वविशेषणात् पूजायामुक्तविशेषणद्वयाक्रान्तदण्डादिसमुदायाऽव्यापकत्वेऽपि न बाधः, अन्वयितावच्छेदकरूपेण साजात्यस्य विवक्षणात् उक्तस्थले च 'तिथिम्' इत्यस्याध्याहारेण दशमीपदार्थतावच्छेदकस्य

दशमीनिष्ठसीमात्वस्य निरूपकत्वं विज्ञेयमित्यर्थः। फलमाह—तावतेति। तावता=एतावता कृष्णनवमीमारभ्य शुक्लनवमीपर्यन्तं षोडशतिथिषु षोडशोपचारात्मकपूजारूपमेकमेव कर्मात्र विधेयमस्तीति लभ्यते न तु तिथिभेदेन षोडश कर्माणीत्यर्थः। "समभिव्याहृत" इत्यत्र स्वसमभिव्याहृत इति पाठे स्वपदेन दशमी ग्राह्या।

ननूक्तपूजा षोडशतिथीनां कस्मिंश्चित् प्रातरादौ समये एव क्रियते नाऽहर्निशमिति कथं पूजायाः षोडशतिथिव्यापकत्वं स्यादित्याशङ्क्याह—व्याप्यकालेति, व्याप्यकालसमुदाये=पूजाव्याप्यकालसमुदाये किं वा षोडशतिथ्यात्मककालापेक्षया व्याप्यकालसमुदाये पूजाधिकरणे काले सजातीयत्वम्=तिथित्वेन रूपेण दशमीसजातीयत्वं स्वसजातीयेत्युक्तसीमात्वलक्षणनिक्षिप्तविशेषणेन विवक्षितमस्तीति दण्डादिसमुदाये विशेषणद्वयस्य=समभिव्याहृतकाल (कृष्णनवमी) प्रागभावानधिकरणत्वस्य स्वप्रागभावा (दशमीप्रागभावा) धिकरणत्वस्य च सत्त्वेऽपि तिथित्वेन दशमीसजातीयत्वाभावात् पूजायां तादृशदण्डादिसमुदायाव्यापकत्वेऽपि न व्यापकत्वस्य बाधः—तिथित्वेन दशमीसजातीयासु षोडशतिथिषु पूजायाः सत्त्वेन व्यापकत्वाक्षतेरित्यर्थः। उक्ते हेतुमाह—अन्वयितेति, पूजायाः षोडशतिथ्यात्मककालेऽन्वयोस्तीति पूजान्वयी षोडशतिथ्यात्मककालस्तस्यावच्छेदकं च तिथित्वमित्यन्वयितावच्छेदकं यत् तिथित्वं तेन रूपेण साजात्यस्य विवक्षणाद् दण्डादेश्च तिथित्वानाक्रान्ततया तिथित्वेन रूपेण सजातीयत्वाभावादित्यर्थः। ननु कथमत्र तिथित्वमन्वयितावच्छेदकं स्यादित्याशङ्कायामाह—उक्तस्थले इति, उक्तस्थले="आरभ्य तस्यां दशमीं

तिथित्वघटितत्वेन वा यावत्पदार्थान्वयितावच्छेदकतया तिथित्वभानात् तेन रूपेण दण्डादेर्दशमीसजातीयत्वाभावात्। तिथिश्चाऽखण्डकालविशेषरूपा न तु चन्द्रमण्डलकलारम्भाद्यनुगुणक्रियाप्रचयरूपा– पूजायास्तावत्क्रियावृत्तित्वासंभवात्।

अत्र च प्रागभाव एव यावत्पदार्थः। द्वितीयार्थः प्रतियोगित्वमनुयोगित्वं वा, तत्र तत्प्रकृत्यर्थदशम्या अन्वयः, तावता दशमीप्रतियोगिकप्रागभावलाभः, तस्य स्वप्रति-

---

तु यावत्" इत्यत्र द्वितीयान्ततिथिपदस्याध्याहारेण 'दशमीं तिथिं यावत्' इति जातमिति दशमीपदार्थतावच्छेदकं तिथित्वमिति प्राप्तम्, अध्याहारस्वीकाराभावे च दशम्यास्तिथिरूपत्वाद् दशमीपदार्थतावच्छेदकं तिथित्वघटितम्= दशमीतिथित्वमेव ग्राह्यमिति सीमारूपयावत्पदार्थान्वयिनी या दशमी तदवच्छेदकतया तिथित्वं भासते एवेत्यन्वयितावच्छेदकत्वं तिथित्वे प्राप्तमेव तेन च तिथित्वरूपेण दण्डादेर्दशमीसजातीयत्वाभावात्तत्र दण्डादौ पूजाया अभावेऽपि न पूजायां व्यापकत्वक्षतिः–तिथित्वेन सजातीयासु षोडशतिथिषु पूजायाः सत्त्वादेवेत्यर्थः। तिथिस्वरूपमाह–तिथिश्चेति, तिथिश्च ज्योतिश्शास्त्रानुमताऽखण्डकालरूपैव ग्राह्या न तु चन्द्रमण्डलकलारम्भानुगुणक्रियासमूहरूपा अन्यथा पूजायाः प्रातरादौ काले एव सत्त्वेन तादृशक्रियाश्रयीभूतप्रत्येकक्षणेष्वऽभावात् तिथिव्यापकत्वं न स्यादित्यर्थः।

"आरभ्य तस्याम्" इत्युक्तोदाहरणं स्वयं नैयायिकरीत्या परिष्करोति–अत्रेति। तत्र=द्वितीयार्थे प्रतियोगित्वादौ। तत्प्रकृत्यर्थदशम्याः=द्वितीयाप्रकृत्यर्थदशम्याः। एतावत्पर्यन्तं यल्लब्धं तदाह–तावतेति। तावता=एतावता 'दशमीं यावत्' इत्यस्य दशमीप्रतियोगिकप्रागभाव इत्यर्थः सिद्ध इत्यर्थः। तस्य= दशमीप्रतियोगिकप्रागभावस्य, स्वं दशमीप्रागभावस्तत्प्रतियोगिभूता या दशमी तदवृत्तित्वसमानाधिकरणं यद् व्यापकत्वं तेन संबन्धेन पूजारूपक्रियायामन्वयः–पूजायां दशमीवृत्तित्वं नास्ति तदतिरिक्तषोडशतिथिव्यापकत्वं चास्त्येव एतेनाश्विनकृष्णनवमीमारभ्य दशमीप्रागभावाधिकरणषोडशतिथिवृत्तित्वं पूजायां प्राप्तं दशम्यां च दशमीप्रागभावो न भवतीति दशम्यऽवृत्तित्वमपि प्राप्तम्। संबन्धघटकव्यापकत्वस्य स्वरूपमाह व्यापकत्वमिति, स्वं दशमीप्राग–

योग्यऽवृत्तित्वविशिष्टव्यापकतासंबन्धेन पूजारूपसमभिव्याहृत-क्रियायामन्वयः। व्यापकत्वं च स्वाधिकरणतिथिनिष्ठाभाव-प्रतियोगितानवच्छेदकपूजाविशेषत्ववत्त्वम्। स्वाधिकरणत्वं च

भावस्तदधिकरणीभूतनवम्यादितिथिषु पूजाया अभावो नास्तीति तन्निष्ठाऽभावप्रतियोगितानवच्छेदकं यत्पूजाविशेषत्वं तद्वत्त्वमेव पूजायां व्यापकत्वमस्तीत्यर्थः। ननु दशमीप्रागभावाधिकरणभूतास्तु भाद्रपदतिथयोऽपि भवन्ति तासु पूजासंबन्धस्याभावात् कथं पूजायां स्वाधिकरणतिथिव्यापकत्वं स्यादित्याशङ्क्य स्वाधिकरणत्वं परिष्करोति—स्वाधिकरणत्वमिति, स्वं दशमीप्रागभावस्तदधिकरणीभूता याऽऽश्विनकृष्णनवमी तत्प्रागभावावच्छिन्ना या आश्विनकृष्णनवमीपूर्वभूताऽष्टम्यादयस्तिथयस्तासां यो भेदः=कृष्णनवमी-प्रागभावावच्छिन्ना न इत्याकारकभेदस्तादृशभेदविशिष्टेन कालिकविशेषणता-संबन्धेन=कालिकसंबन्धेन दशमीप्रागभावाधिकरणत्वं ग्राह्यं तथा च कृष्णनवमीपूर्वभाव्यऽष्टम्यादितिथिषु कृष्णनवमीप्रागभावस्यैव सत्त्वात् कृष्णनवमीप्रागभावावच्छिन्ना नेति भेद एव नास्ति येन तादृशाष्टम्यादीनां तादृशभेदघटितसंबन्धेन दशमीप्रागभावाधिकरणत्वं स्यात् तथाच तादृशाष्टम्यादिषु पूजाया असत्त्वेऽपि न व्यापकत्वक्षतिः, कृष्णनवमीप्रागभावावच्छिन्ना नेति भेदः कृष्णनवम्यादिषु भवतीति तादृशभेदघटितसम्बन्धेन तासां दशमी-प्रागभावाधिकरणत्वमप्यस्ति पूजाधिकरणत्वमप्यस्तीति पूजायां व्यापकत्वं प्राप्तमित्यर्थः। स्वाधिकरणत्वपरिष्कारे दशमीप्रागभावनिवेशस्य फलमाह एतेनेति, यदि 'स्वाधिकरणत्वं च कृष्णनवमीप्रागभावावच्छिन्नभेदविशिष्ट-कालिकविशेषणतासंबन्धेन' इत्येवोच्येत तदा कृष्णनवमीपदेन भाविकृष्णनवमी-ग्रहणसंभवाद् भाविकृष्णनवमीप्रागभावाधिकरणत्वमादाय= भाविकृष्णनवमी-प्रागभावावच्छिन्ना नेति भेदस्याभिप्रेतषोडशतिथिष्वऽसत्त्वात् (तत्र भाविकृष्ण-नवमीप्रागभावावच्छिन्नत्वस्यैव सत्त्वात्) तेन संबन्धेन तासां षोडशतिथीनां दशमीप्रागभावाधिकरणत्वमेव न संभवतीति कृष्णनवमीप्रागभावाधिकरण-प्रतियोगिकभेदस्य=कृष्णनवमीप्रागभावावच्छिन्नभेदस्याव्यावर्तकतया= अभिप्रेत-षोडशतिथीनां तदन्यतिथीनां च परस्परं विशेषापादकत्वासंभवात् तत्सामान्यभेदनिवेशे=तादृशस्य सामान्यरूपस्य कृष्णनवमीप्रागभावावच्छिन्न-भेदस्य निवेशेऽप्रसिद्धिः=अभिप्रेतषोडशतिथिषु दशमीप्रागभावाधिकरणत्वस्याऽ-

स्वाधिकरणकृष्णनवमीप्रागभावावच्छिन्नभेदविशिष्टकालिकविशेषणतासंबन्धेन, एतेन कृष्णनवमीप्रागभावाधिकरण-

---

प्रसिद्धिरेव स्यात् तासु भाविकृष्णनवमीप्रागभावस्यैव सत्त्वेन भाविकृष्णनवमीप्रागभावावच्छिन्नभेदस्य दशमीप्रागभावसंबन्धभूतस्याऽसत्त्वात्, सा चाप्रसिद्धिरेतेन= उक्तरूपेण दशमीप्रागभावाधिकरणत्वस्य संबन्धपरिष्कारेण नास्तीत्यन्वयः, अप्रसिद्ध्यभावे हेतुमाह—तथा सत्यपीति, तथा सत्यपि= संबन्धस्वरूपपरिष्कारे दशमीप्रागभावानिवेशेउक्तरीत्या षोडशतिथिषु दशमीप्रागभावाधिकरणत्वाऽप्रसिद्धावपि दशमीप्रागभावनिवेशेनाऽप्रसिद्धिर्नास्तीति भावः—तथा हि तत्तद्दशमीप्रागभावाधिकरणत्वं दशमीपूर्वभावतिथिकूटकाले एव संभवतीति स्वाधिकरण=दशमीप्रागभावाधिकरणीभूतकृष्णनवमीप्रागभावावच्छिन्नभेदवत्त्वसंबन्धेन तत्तद्दशमीप्रागभावाधिकरणकालस्य= अभिप्रेतषोडशतिथिकालस्य तत्तत्प्रागभावाधिकरणत्वम्=दशमीप्रागभावाधिकरणत्वमक्षतमेव, अत्र च यद्यपि दशमीप्रागभावाधिकरणत्वं कृष्णनवमीपूर्वभाव्यष्टम्यादिष्वस्ति तथापि तत्र कृष्णनवमीप्रागभावस्यैव सत्त्वेन कृष्णनवमीप्रागभावावच्छिन्नभेदवत्त्वं नास्तीति न तासां विवक्षितदशमीप्रागभावाधिकरणत्वं प्राप्नोति, दशमीप्रागभावाधिकरणत्वे सति कृष्णनवमीप्रागभावानधिकरणत्वं चाभिप्रेतषोडशतिथिष्वेवास्ति। तत्र च पूजासंबन्धस्य सत्त्वात् पूजायां तादृशतिथिकूटव्यापकत्वं प्राप्तमेवेत्यर्थः। नन्वेवमपि=उक्तरीत्या स्वाधिकरणत्वसंबन्धकोटौ दशमीप्रागभावाधिकरणीभूतकृष्णवनवमीप्रागभावावच्छिन्नभेदस्य निवेशे कृतेपि आश्विनशुक्लदशमीप्रागभावाधिकरणत्वं व्यवहितपूर्वकृष्णनवम्याम्=भाद्रपदकृष्णनवम्यामपि संभवति तादृशभाद्रपदकृष्णनवमीप्रागभावश्चाश्विनकृष्णप्रतिपदादितिथिषु नास्तीति तत्र व्यवहितपूर्वकृष्णनवमीप्रागभावावच्छिन्नभेदोऽस्त्येवेति तादृशभेदघटितकालिकसंबन्धेनाऽव्यवहितपूर्वकृष्णनवमीपूर्वतिथीनाम्=आश्विनकृष्णप्रतिपदादितिथीनामपि तत्तद्दशमीप्रागभाववत्त्वमऽस्ति पूजाधिकरणत्वं च नास्तीति कथं पूजायां दशमीप्रागभावाधिकरणकृष्णनवमीप्रागभावानधिकरणतिथिकूटव्यापकत्वं स्यात् उक्तरूपाक्रान्तास्वाश्विनकृष्णप्रतिपदादिषु पूजाया अभावात् कृष्णनवमीपदेन भाद्रपदकृष्णनवम्या अपि ग्रहणसंभवादित्याशङ्क्याह—न चैवमपीति। कृष्णनवमीपदेन पूर्वकृष्णनवमीग्रहणमात्रप्रसक्तदोषं

प्रतियोगिकभेदस्याऽव्यावर्तकतया तत्सामान्यभेदनिवेशे भाविकृष्णनवमीप्रागभावाधिकरणत्वमादाय नाऽप्रसिद्धिः– तथा सत्यपि तत्तद्दशमीप्रागभावाधिकरणकालस्य स्वाधिकरणकृष्णनवमीप्रागभावावच्छिन्नभेदवत्त्वसंबन्धेन तत्तत्प्रागभावाधिकरणत्वाक्षतेः।

न चैवमपि व्यवहितपूर्वकृष्णनवमीप्रागभावावच्छिन्नभेदघटितसंबन्धेनाऽव्यवहितपूर्वकृष्णनवमीपूर्वतिथीनामपि

परिहरति–स्वावच्छिन्नेति, उक्ते प्रागभावसंबन्धे=दशमीप्रागभावाधिकरणत्वस्य संबन्धपरिष्कारे यः खलु स्वावच्छिन्नभेदः=कृष्णनवमीप्रागभावावच्छिन्नप्रतियोगिकभेदः प्रविष्टस्तस्य तत्र दशमीप्रागभावसंबन्धे स्वावच्छिन्न=दशमीप्रागभावावच्छिन्नकृष्णनवमीप्रागभावानधिकरणत्वसंबन्धेनैव निवेशः कर्तव्यस्तथा चाश्विनकृष्णाष्टम्यादिषु दशमीप्रागभावावच्छिन्नाभाद्रकृष्णनवमीप्रागभावानधिकरणत्वस्य सत्त्वेपि दशमीप्रागभाववच्छिन्नाश्विनकृष्णनवमीप्रागभावाधिकरणत्वमप्यस्तीत्याश्विनकृष्णाष्टम्यादयो न ग्राह्या अभिप्रेताश्विनकृष्णनवम्यादिषोडशतिथिशु तु दशमीप्रागभावावच्छिन्नकृष्णनवमीप्रागभावानधिकरणत्वमस्त्येवेत्येतादृशसंबन्धेन तासु स्वावच्छिन्नभेदः=कृष्णनवमीप्रागभावावच्छिन्नप्रतियोगिकभेदः संभवतीति तादृशभेदसंबन्धेन तासु स्वाधिकरणत्वम्=दशमीप्रागभावाधिकरणत्वं संभवत्येव तासु पूजासंबन्धस्य च सत्त्वात् पूजायां तादृशषोडशतिथिव्यापकत्वमप्यस्त्येवेति न कोपि दोषः। यद्यप्यभिप्रेतषोडशतिथिष्वपि कार्तिककृष्णनवमीप्रागभावाधिकरणत्वमस्ति तथापि दशमीपदेनाश्विनशुक्लदशमीग्रहणात् तादृशदशमीप्रागभावाधिकरणत्वं तु कार्तिककृष्णनवम्यां नास्त्येवेति तादृशदशमीप्रागभावाधिकरणभूता कृष्णनवमी आश्विनकृष्णनवम्येव ग्रहीतुं शक्यते। भाद्रादिकृष्णनवमीपरिहारोपायस्त्वनुपदमेवोक्तः।

ननु यदुक्तम्–"व्यापकत्वं च स्वाधिकरणतिथिनिष्ठाभावप्रतियोगितानवच्छेदकपूजाविशेषत्ववत्त्वम्" इति तत्र नञोऽत्यन्ताभाववद् भेदबोधकत्वमप्यस्तीत्यनवच्छेदकपदेन 'पूजात्वे स्वाकरणतिथिनिष्ठाभावप्रतियोगितावच्छेदकत्वं नास्ति' इत्याकारकात्यन्ताभावो ग्राह्यः किं वा 'पूजात्वं स्वाधिकरणतिथिनिष्ठाभावप्रतियोगितावच्छेदकं न' इत्याकारकभेदो ग्राह्य

तत्तद्दशमीप्रागभाववत्त्वात् तदधिकरणतिथिव्यापकत्वं पूजायां न संभवतीति वाच्यम्, स्वावच्छिन्नकृष्णनवमीप्रागभावानधिकरणत्वसंबन्धेन स्वावच्छिन्नभेदस्यैव प्रागभावसंबन्धे निवेशनीयत्वात्। स्वाधिकरणनिष्ठाभावप्रतियोगितानवच्छेदकत्वमपि तादृशावच्छेदकत्वसंबन्धेन स्वावच्छिन्नस्य भेदः, अतस्तादृशावच्छेदकत्वत्वावच्छिन्नाभावनिवेशे यत्किंचिद्दशमीप्रागभावाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वमादा-

इत्याशङ्क्य भेदग्रहणेन परिष्करोति स्वाधिकरणनिष्ठेति, स्वं दशमीप्रागभावः। व्यापकत्वलक्षणे यत् "स्वाधिकरणतिथिनिष्ठाभावप्रतियोगितानवच्छेदकत्वम्" इत्युक्तं तदपि=तत्रापि नञाभेद एव ग्राह्यः स च भेदः तादृशावच्छेदकत्वसंबन्धेन=दशमीप्रागभावाधिकरणतिथिनिष्ठाभावप्रतियोगितावच्छेदकत्वसंबन्धेन स्वावच्छिन्नस्य=दशमीप्रागभावावच्छिन्नस्य भेदो ग्राह्य इत्यन्वयः, तथा च दशमीप्रागभावाधिकरणाभिप्रेतषोडशतिथिषु पूजाया अभावो नास्तीति पूजात्वे दशमीप्रागभावाधिकरणाभिप्रेततिथिनिष्ठाभावप्रतियोगितावच्छेदकत्वं नास्त्येव गगनस्य चावृत्तिपदार्थत्वात् तादृशतिथिष्वऽभावोऽस्त्येवेति गगनत्वे दशमीप्रागभावाधिकरणतिथिनिष्ठाभावप्रतियोगितावच्छेदकत्वमस्त्येवेति तेन संबन्धेन गगनत्वे दशमीप्रागभावाधिकरणतिथिनिष्ठाभावप्रतियोगितावच्छेदकत्वमस्त्येवेति तेन संबन्धेन गगनत्वे दशमीप्रागभावोऽपि संभवतीति गगनत्वस्योक्तसंबन्धेन दशमीप्रागभावावच्छिन्नत्वं प्राप्तमित्युक्तसंबन्धेन स्वावच्छिन्नस्य=दशमीप्रागभावावच्छिन्नस्य गगनत्वस्य भेद उक्तपूजाविशेषत्वेऽस्त्येवेति तादृशभेदवत्त्वमेव पूजात्वेऽभावप्रतियोगितानवच्छेदकत्वं ज्ञेयं तथा च 'दशमीप्रागभावाधिकरणतिथिनिष्ठाभावप्रतियोगितावच्छेदकत्वसंबन्धेन दशमीप्रागभावावच्छिन्नं न' इत्याकारकभेदवत्त्वमेव पूजात्वे व्यापकतावच्छेदकत्वं लब्धमित्यर्थः। एवं भेदनिवेशस्य फलमाह– अत इति, उक्तव्यापकत्वलक्षणे अनवच्छेदकेति पदघटितनञाऽत्यन्तभावग्रहणतात्पर्येण तादृशावच्छेदकत्वत्वावच्छिन्नाभावनिवेशो नाम यदि दशमीप्रागभावाधिकरणतिथिनिष्ठाभावप्रतियोगितावच्छेदकत्वाऽत्यन्ताभावस्य निवेशः स्यात् तदा यत्किंचिद्दशमीप्रागभावाधिकरणभूता=श्रावणादिदशमीप्रागभावाधिकरणता या तिथिस्तस्यां

याऽप्रसिद्धिवारणाय विशिष्य तत्तत्प्रागभावरूपस्वपदार्थस्य संबन्धमध्ये प्रवेश्यतयाऽननुगम इति निरस्तम्।

देशरूपा सीमा च 'काशीतः कौशिकीं यावद् याति' इत्यादौ तत्र कौशिक्या गमनसीमात्वं प्रतीयते तच्च काशीपूर्वकौशिकीपश्चिमदेशव्यापकगमनानधिकरणत्वम्। यावत्पदेन च कौशिक्यनधिकरणत्वे सति काशीपूर्व-

---

पूजाया अभावादेव तादृशतिथिनिष्ठाभावप्रतियोगितावच्छेदकत्वमेव पूजात्वे प्राप्तं न तु तादृशतिथिनिष्ठाभावप्रतियोगितावच्छेदकत्वाभाव इति तादृशतिथि-निष्ठाभावप्रतियोगितावच्छेदकत्वेन पूजात्वे व्यापकतावच्छेदकत्वस्याऽप्रसिद्धिरेव स्यात्– अत्यन्ताभावनिवेशे तादृशतिथिनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावस्यैव व्यापकत्वपदार्थत्वात् तस्य चाभावस्य पूजात्वे उक्तरीत्या बाधात्। एतद्दोषपरिहाराय यदि स्वाधिकरणेत्यत्र स्वपदार्थस्य दशमीप्रागभावस्य तत्तद्दशमीप्रागभावरूपेण निवेशः कृतः स्यात्तदाऽऽश्विनशुक्लदशम्या एव ग्रहणेन यत्किंचिद्दशमीग्रहणासंभवाद् उक्ते दोषे निवृत्तेऽपि तत्तद्दशमीप्रागभावस्य सम्बन्धमध्ये प्रवेशेनाऽननुगमः स्यादिति दोष स्यादिति निरस्तम्-उक्तव्यापक त्वलक्षणे उक्तनञोक्तभेदस्य ग्रहणेनाऽत्यन्ताभावस्याऽग्रहणात्। नञा भेदग्रहणे च दशमीप्रागभावाधिकरणतिथिनिष्ठाभावप्रतियोगितावच्छेदकत्वसंबन्धेन यावद्दशमीप्रागभावावच्छिन्नगगनत्वस्य भेदः पूजात्वे प्राप्स्यत्येवेति न पूजात्वे व्यापकतावच्छेदकत्वाप्रसिद्धिशङ्कापि संभवति– तादृशभेदवत्त्वस्यैवात्र व्यापकतावच्छेदकत्वेनाभिमतत्वादित्यर्थः। एवकारस्य तृतीयान्तसंबन्धेनेति पदेनान्वयः।

देशरूपसीमाबोधकयावच्छब्दमुदाहरति–देशरूपेति। तत्र=इत्यत्र। तच्च= सीमात्वं च। तेन विना सीमा भवतीति कौशिकीं यावद् गमनकर्त्रा काशीतः कौशिकीपश्चिमदेशपर्यन्तमेव गन्तव्यमिति कौशिकीपश्चिमदेशव्यापक-गमनाऽनधिकरणत्वमेव कौशिक्यां सीमात्वं प्राप्तमित्यर्थः। यावत्पदबोध्यमाह– यावत्पदेनेति, तेन विना सीमा भवतीति सीमाभूतकौशिक्यऽनधिकरणत्वं गमने प्राप्तम्। कौशिकीपदोत्तरद्वितीयार्थमाह–तत्रेति, अवधित्वमवधिमत्त्वं चाश्रयतासंबन्धेन कौशिकीपश्चिमदिशि विज्ञेयमित्यर्थः। कौशिकी च काशीतः

कौशिकीपश्चिमदेशव्यापकत्वं गमने प्रत्याय्यते। तत्र द्वितीयार्थोऽवधित्वमवधिमत्त्वं वा प्रतीच्याद्यऽन्वयि। निष्कर्षः पूर्ववत् स्वयमूहनीयः।

अभिविध्यर्थो यावच्छब्दः 'कार्तिकमारभ्य चैत्रं यावच्छीतं भवति' इत्यादौ 'काशीतः पाटलिपुत्रं यावद् वृष्टो देवः' इत्यादौ च। अभिविधिः=तत्पर्यन्ताभिव्याप्तिः। एवं च प्रथमे कार्तिकपूर्वकालोत्तरचैत्रोत्तरकालपूर्वकालव्यापकत्वं चैत्रोत्तरकालाऽवृत्तित्वसहितं शीतभवने द्वितीये च काशीपश्चिमदेशपूर्वपाटलिपुत्रपूर्वदेशपश्चिमदेशव्यापकत्वं पाटलिपुत्रपूर्वदेशावृत्तित्वसहितं वृष्टौ यावत्पदेन प्रत्याय्यते, विशेषः

पूर्वदिश्यऽभ्युपगन्तव्या। किं वा पूर्वदेवात्राप्यवधित्वं प्राचीनमतेनाऽवधिमत्त्वं च नवीनमतेन द्वितीयार्थ इत्यनुसन्धेयम्।

अभिविध्यर्थकयावच्छब्दमुदाहरति– अभीति। तेन सहाभिविधिः। 'चैत्रं यावत्' इति कालरूपाभिविध्युदाहरणम्, 'पाटलिपुत्रं यावत्' इति देशरूपाभिविध्युदाहरणम्। अभिविधिस्वरूपमाह–अभिविधिरिति, निष्कर्षमाह–एवं चेति। प्रथमे=प्रथमोदाहरणे, कार्तिकपूर्वकालोत्तर=कार्तिकपूर्वकाल आश्विनकालस्तदपेक्षयोत्तरकालः कार्तिकारम्भकालस्तं कालमारभ्य चैत्रोत्तरकालपूर्वकाल= चैत्रोत्तरकालो वैशाखारम्भकालस्तदपेक्षया पूर्वकालश्चैत्रसमाप्तिकालस्तादृश कालव्यापकत्वं वैशाखव्यापकत्वं शीतेनास्तीति चैत्रोत्तरकालावृत्तित्वसहितं शीतभवने=शीतसत्तायां यावत्पदेन प्रत्याय्यते इत्यन्वयः। द्वितीये=द्वितीयोदाहरणे च काशीपश्चिमदेशपूर्व=काश्या यः पश्चिमदेशस्तदपेक्षया यः पूर्वदेशस्तदपेक्षया पश्चिमदेशः पूर्वस्यां पाटलिपुत्रनगरसमाप्तिदेशस्तादृशदेशव्यापकत्वं पाटलिपुत्रापेक्षया यः पूर्वदेशस्तदऽवृत्तित्वसहितं वृष्टौ यावत्पदेन प्रत्याय्यते इत्यन्वयः। यावच्छब्दसमानार्थकाऽऽङ्शब्दप्रयोगस्थलेऽपि='आबालं हरिभक्तिः' 'कार्तिकमारभ्याऽऽचैत्रम्' 'काशीत आपाटलिपुत्रम्' इत्यादावप्युक्तयावच्छब्दरीतिरेव विज्ञेया। तद्योगे=आङ्शब्दयोगे "पञ्चम्यऽपाऽऽङ्परिभिः" इति सूत्रेण पञ्चम्यपि भवति यथा–'आ मुक्तेः

पूर्ववत्। यावच्छब्दसमानार्थकाऽऽङ्शब्दस्थलेऽपि दर्शितैव रीतिरवसेया, तद्योगे च पञ्चमी साधुः।

'यज्ञमनु प्रावर्षत्' इत्यादावऽनुशब्दार्थः कारकत्वरूपं हेतुत्वम्– "अनुर्लक्षणे" इत्यत्र कर्मप्रवचनीयसंज्ञाविधायकसूत्रे लक्षणपदस्य कारकहेतुपरत्वात्, तत्र च यज्ञान्वितस्याधैयत्वरूपद्वितीयार्थस्याऽन्वयः, हेतुतायाश्च निरूपकत्वसंबन्धेन वृष्टावन्वयः। जन्यत्वं वाऽनुशब्दार्थः, तत्र निरूपितत्वरूपद्वितीयार्थस्य यज्ञान्वितस्यान्वयः, जन्यतायाश्चाऽऽश्रयत्वसंबन्धेन वृष्टावन्वयः। 'अन्वऽर्जुनं योद्धारः' इत्यत्रापकर्षरूपं

संसारः' इति।

अनुशब्दसमभिव्याहृतद्वितीयार्थमनुशब्दार्थं चाह–यज्ञमिति। कारकहेतुपरत्वादिति–उक्तं च महाभाष्ये "अनुर्हेताविति" "लक्षणेन हेतुरपि व्याप्तो न ह्यवश्यं तदेव लक्षणं भवति येन पुनः पुनर्लक्ष्यते किं तर्हि? यत् सकृदपि निमित्तत्वाय कल्पते तदपि लक्षणं भवति" इत्यादि। तथा चात्रानुशब्देन हेतुत्वबोधकेन यज्ञे वृष्टिहेतुत्वं बोध्यते–यज्ञहेतुका वृष्टिरित्यर्थः। तत्र=अनुशब्दार्थहेतुत्वे आधेयत्वरूपद्वितीयार्थस्य=वृत्तित्वरूपद्वितीयार्थस्यान्वयः, हेतुत्वस्य च निरूपकत्वसंबन्धेन वृष्टावन्वयः–यज्ञवृत्तिहेतुताया वृष्टिनिरूपितत्वात्। आधेयत्वस्य निरूपकत्वसंबन्धेन यज्ञेऽन्वयः, स्वरूपसंबन्धेनाश्रयत्वसंबन्धेन वा हेतुत्वेऽन्वय इत्यर्थः तथा च यज्ञनिष्ठा या वृष्टिहेतुता तादृशहेतुतानिरूपिका वृष्टिरिति शाब्दबोधः। पक्षान्तरमाह–जन्यत्वमिति, तत्र=जन्यत्वे। निरूपितत्वं द्वितीयार्थस्तथा च यज्ञनिरूपितजन्यतावती वृष्टिरिति प्राप्तम्। उदाहरणान्तरमाह–अन्वर्जुनमिति, हीनत्वमनुशब्दार्थः, अवधित्वं द्वितीयार्थ इति 'अर्जुनम्' इति द्वितीयान्तस्याऽर्जुनावधिकत्वमर्थस्तस्य=अर्जुनावधिकत्वस्य चापकर्षेऽन्वयः तथा च 'अर्जुनावधिकापकर्षवन्तो योद्धारः (अर्जुनापेक्षयाऽपकृष्टाः) इत्यर्थः सिद्धः। नन्ववधित्वं ह्यपादानतारूपमेव अपादानत्वे च "अपादाने पञ्चमी" इत्यनेन पञ्चमी प्राप्नोतीत्यत्राप्यर्जुनपदात् पञ्चमी किं न स्यादित्याशङ्क्याह–अवधित्वस्येति, पञ्चमी कारकविभक्तिरस्तीति यत्र पञ्चम्यर्थावधित्वस्य क्रियायामन्वयो भवति तत्रैव पञ्चमी

हीनत्वमनुशब्दार्थः, अर्जुनावधिकत्वं द्वितीयान्तार्थस्तस्य चापकर्षेऽन्वयः। अवधित्वस्याऽपादानतारूपत्वेऽपि क्रियान्वयाभावान्न पञ्चमीप्रसक्तिः। 'अस्मादयं दीर्घः' इत्यादौ 'भवति' इत्यस्याऽध्याहारेणैव पञ्चम्युपपादनात्। अतः षष्ठ्यपवादतानिर्वाहः।

'वृक्षं प्रति विद्योतते विद्युत्' 'मातरं प्रति साधुः' 'यो मां प्रति स्यात्' 'वृक्षं वृक्षं प्रति सिञ्चति' इत्यादौ "लक्षणेत्थंभूत०" इत्यादिसूत्रानुशिष्टकर्मप्रवचनीयसंज्ञक-

---

भवति नान्यत्र अत्र चावधित्वस्यापकर्षे एवान्वयो न क्रियायामिति न पञ्चम्यापत्तिरित्यर्थः। नन्वेवम् 'अस्मादयं दीर्घः' इत्यत्रापि पञ्चमी न स्यात् क्रियापदस्याभावादत्राप्यवधित्वस्य क्रियायामन्वयासंभवादित्याशङ्क्याह—अस्मादिति, अत्र 'भवति' इति क्रियापदाध्याहारेण तद्वाच्यक्रियायामेवावधित्वस्यान्वयेन पञ्चम्या युक्तत्वादित्यर्थः। फलमाह—अत इति, उपपदविभक्तिः षष्ठीबाधिकैव भवति न कारकविभक्तिबाधिका, अत्र च पञ्चम्याः प्राप्तिरेव नास्ति येनोपपदविभक्तेरत्रत्यद्वितीयायाः पञ्चमीबाधकत्वं स्यादिति षष्ठ्यपवादतानिर्वाहो जात इत्यर्थः।"

"लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यऽनवः" इति सूत्रसिद्धप्रयोगानुदाहरति—वृक्षमिति। "लक्षणेत्थम्" इति सूत्रेण लक्षणाद्यर्थबोधकप्रत्यादीनां कर्मप्रवचनीयसंज्ञा विधीयते ततश्च "कर्मप्रवचनीययुक्ते द्वितीया" इत्यनेन कर्मप्रवचनीयप्रत्यादियोगे द्वितीया भवति, अनुशिष्टम्=अनुशासितम्। प्रथमे='वृक्षं प्रतिविद्योतते विद्युत्' इत्यत्र कृष्णपक्षरात्रावन्तस्थः पुरुषो विद्युतमपश्यन्नपि वृक्षप्रकाशेन विद्युद्विद्योतनमनुमिनोति—प्रकारान्तरेण वृक्षप्रकाशासंभवादिति परिचायकत्वरूपम्=ज्ञापकत्वरूपं लक्षणत्वं प्रत्यादिकर्मप्रवचनीयार्थः परिचायकत्वं वृक्षे वर्तते इति आधेयत्वम्=वृत्तित्वं द्वितीयार्थः। वृक्षप्रकाशज्ञाप्या विद्युत् किंवा प्रकाशद्वारा वृक्षवृत्तिज्ञापकतानिरूपितज्ञाप्यताश्रयविद्योतनव्यापारवती विद्युत् इत्यादिश्च शाब्दबोधः। पक्षान्तरमाह परिचेयत्वरूपमिति, परिचेयत्वरूपम्=परिचयकर्मत्वरूपं लक्ष्यत्वं प्रतेरर्थः, अत्र पक्षे निरूपितत्वं द्वितीयार्थः—वृक्षनिरूपितलक्ष्यत्ववती विद्युद्विद्योतते इत्यर्थः। द्वितीये='मातरं

प्रत्यादिशब्देषु प्रथमे परिचायकत्वरूपं लक्षणत्वं परिचेयत्वरूपं लक्ष्यत्वं वा कर्मप्रवचनीयार्थः, वृक्षप्रकाशेन विद्युद्विद्योतनज्ञानाद् वृक्षस्य परिचायकता, द्वितीयार्थश्चाऽऽधेयत्वं निरूपितत्वं वा। द्वितीये साधुत्वम्=प्रियकारित्वं साधुत्वघटकक्रियान्वयी संबन्धः कर्मप्रवचनीयार्थः, संबन्धान्वयिप्रतियोगित्वं तन्निरूपकत्वं वा द्वितीयार्थः। तृतीये भागः=स्वत्वाश्रयः प्रत्याद्यर्थः, तदन्वयी संबन्धो द्वितीयार्थः, इत्थं चाऽस्मत्संबन्धी यो भाग स्यादिति बोधः। चतुर्थे कर्मण्येव द्वितीया षत्वबाध एव संज्ञाफलं प्रतिश्च

प्रति साधुः इत्यत्र साधुत्वं प्रियकारित्वमेव तत्र साधुत्वघटका=प्रियकारित्वघटका ह्यनुकलाचरणरूपा या क्रिया तादृशक्रियान्वयी=तादृशक्रियानिरूपितो यः+सेवकत्वादिरूपः संबन्धः स प्रत्यादिकर्म प्रवचनीयस्यार्थः, तादृशसंबन्धप्रतियोगित्वं मातरीति प्रतियोगित्वं द्वितीयार्थस्तथा च मातृप्रतियोगिकोक्तसंबन्धाश्रय इत्यर्थः प्राप्तः। किं वा तादृशसंबन्धनिरूपकत्वं मातरि वर्तते इति निरूपकत्वं द्वितीयार्थस्तथा च मातृनिरूपितोक्तसंबन्धवानित्यर्थः प्राप्तः। तृतीये='यो मां प्रति स्यात्' इत्यत्र स्वत्वाश्रयो भाग एव कर्मप्रवचनीयप्रत्याद्यर्थः तदन्वयी=भागान्वयी यः संबन्धः=स्वत्वसंबन्धः स द्वितीयार्थ इत्यर्थः। वाक्यार्थस्वरूपमाह—इत्थमिति, अत्र 'दीयताम्' इत्यादिशेषः। चतुर्थे='वृक्षं वृक्षं प्रति सिञ्चति' इत्यत्र कर्मण्येव द्वितीयेति कर्मत्वं द्वितीयार्थस्तथा च सकलवृक्षकर्मकं सेचनमिति शाब्दबोधः। नन्वत्र वृक्षस्य कर्मत्वं तु सिञ्चतिक्रियापदयोगादपि संभवतीति प्रतिशब्दस्य कर्मप्रवचनीयसंज्ञाविधानस्य किं फलमित्याशङ्क्याह—षत्वबाध एवेति, अत्र "उपसर्गात्सुनोति" इति सूत्रेण उपसर्गसंज्ञकप्रतिशब्दयोगे सिचः सकारस्य षत्वं प्राप्नोति तत्र "लक्षणेत्थंभूत" इति सूत्रेण प्रतेः कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाबाधात् षत्वबाधो जातः स एव प्रतेः कर्मप्रवचनीयसंज्ञाफलम्, तदुक्तम्—"अत्रोपसर्गत्वाभावान्न षत्वम्" इति, इत्यर्थः। 'गृहे गृहेऽश्वाः' इत्यत्र यथाऽश्वानां गृहव्यापकत्वं द्विरुक्तया लभ्यते तथा 'वृक्षं वृक्षं प्रति सिञ्चति' इत्यत्रापि सेचनस्य वृक्षव्यापकता द्विरुक्त्यैव लभ्यते इति प्रतिशब्दो निरर्थक एव न वीप्सार्थक इत्याह—प्रतिश्चेति। विपक्षे बाधकमाह—

निरर्थकः—'गृहे गृहेऽश्वाः' इत्यादाविव व्यापकतायां द्विरुक्तिबललभ्यत्वात्। प्रतिशब्दस्य व्यापकतार्थकत्वे उक्तार्थकत्वेन 'गृहं व्याप्नुवतेऽश्वाः' इत्यादाविव द्विरुक्तिरेव न स्यात्।

न च प्रतिशब्दस्यापि व्यापकतार्थकत्वम् 'प्रतिदिन-मधीते' इत्यादौ क्लृप्तं द्विरुक्तेरपि 'वृक्षं वृक्षं सिञ्चति' इत्यादौ क्लृप्तमिति प्रकृते "संभेदेनान्यतरवैयर्थ्यम्" इति न्यायाद् द्वयोरेव

प्रतिशब्दस्येति यथा 'गृहं व्याप्नुवतेऽश्वाः' इत्यत्र व्याप्नुवते इति पदेनैव व्यापकताया उक्तत्वाद् गृहपदद्विरुक्तिर्न भवति—उक्तार्थानामप्रयोग इति नियमात् तथा 'वृक्षं वृक्षं प्रति' इत्यत्रापि यदि प्रतिशब्दो व्यापकताबोधकः स्यात् तदा व्यापकताबोधिका वृक्षपदद्विरुक्तिर्न स्यात् उक्तार्थानामप्रयोगात् अस्ति च द्विरुक्तिरिति तयैव व्यापकतारूपार्थे लब्धे प्रतिशब्दो निरर्थक एवेत्यर्थः।

शङ्कते— न चेति। प्रकृते='वृक्षं वृक्षं प्रति सिञ्चति' इत्यत्र। संभेदेति— एकार्थबोधकयोरेकत्रापि संभेदे=संयोगे प्राप्तेऽन्यतरस्य वैयर्थ्यं न भवति किं तु द्वयोरेव सार्थक्यमेव भवतीति 'वृक्षं वृक्षं प्रति' इत्यत्र व्यापकता-बोधकयोर्द्वयोरेव=द्विरुक्तिप्रतिशब्दयोर्द्वयोरेव सार्थक्यं युक्तमित्यर्थः। परिहारमाह— प्रतिमासमिति, अव्ययीभावसमासोत्तरं साधुत्वार्थं प्रथमैव प्राप्नोति न प्रथमातिरिक्तापि विभक्तिः सा प्रथमापि निरर्थकैव भवति तस्मात् 'प्रतिमासम्' इत्यऽव्ययीभावसमासोऽस्तीति तदुत्तरं द्वितीयादिविभक्तिरेव न संभवति यथा व्यापकत्वबोधनं स्यादिति प्रतिशब्देनैव मासव्यापकत्वमध्ययनक्रियायां बोध्यते इति युक्तं तत्र प्रतेर्व्यापकत्वार्थकत्वं प्रकारान्तरेण व्यापकत्व लाभाऽसंभवात्। 'वृक्षं वृक्षं प्रति' इत्यत्र तु प्रतिशब्दबोध्यव्यापकताया निरूपकत्वसंबन्धेन वृक्षे विशेषणत्वं स्यादेव एवं च सेचनरूपक्रियायां प्रतिशब्देन व्यापकत्वबोधनं न संभवति— द्वितीयार्थकर्मत्वेनावरुद्धः=विशिष्टो यः प्रकृत्यर्थभूतो वृक्षस्तद्विशेषिताया:=वृक्षे विशेषणतां प्राप्ताया व्यापकतायाः सेके विशेषणत्वासंभवात् एकविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणत्वं न भवतीति व्युत्पत्तिविरोधादित्यर्थः। एवम् 'वृक्षं वृक्षं प्रति' इत्यत्र प्रतिशब्देन

व्यापकताबोधकत्वमऽवर्जनीयमिति वाच्यम्, 'प्रतिमासमधीते' इत्यादावव्ययीभावे हि प्रथमारिक्तविभक्तेरसाधुत्वेन प्रतिशब्देन मासान्वितव्यापकत्वं क्रियायां बोध्यते विभक्तिः साधुत्वार्था। 'वृक्षं वृक्षं प्रति सिञ्चति' इत्यत्र तु सेके द्वितीयार्थकर्मत्वावरुद्धप्रकृत्यर्थवृक्षविशेषितव्यापकता बोधयितुं न शक्यते– एकविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणत्वे व्युत्पत्तिविरोधात्, कर्मत्वसंबन्धस्यैव च व्यापकताघटकत्वेन स्वीकरणीयतया वृत्त्यनियामकस्य तस्य तथात्वासंभवाच्च। तस्य सेककर्मत्वे आश्रयतासंबन्धघटितव्यापकताप्रत्यायनमपि न युज्यते–

वृक्षविशेषणत्वेनापि व्यापकत्वं बोधयितुं न शक्यत इत्याह– कर्मत्वेति, कर्मत्वसंबन्धेनैव प्रतिशब्दप्रतिपाद्यव्यापकताया वृक्षविशेषणत्वं स्वीकार्यं तत्र च तस्य=कर्मत्वसंबन्धस्य वृत्त्यनियामकतयाऽभावीयप्रतियोगितावच्छेदकत्वं न संभवतीति 'न वृक्षं वृक्षं प्रति सिञ्चति' इत्यत्र कर्मत्वसंबन्धेन व्यापकत्वाभावबोधनासंभवेन तस्य कर्मत्वसंबन्धस्य तथात्वासंभवात्= व्यापकतासंबन्धत्वमपि न संभवतीत्यर्थः। ननु प्रतिशब्दप्रतिपाद्यव्यापकताया यदि सेचनवृक्षयोरन्वयो न संभवति तदा सेचनकर्मत्वे आश्रयतासंबन्धेनान्वयो भवतु– आश्रयतासंबन्धस्य च वृत्तिनियामकत्वेन न व्यापकत्वाभावबोधानुपपत्तिरपीत्याशङ्क्या हतस्येति, तस्य= प्रतिशब्दस्याश्रयतासंबन्धेन सेककर्मत्वेऽपि व्यापकताप्रत्यायकत्वं न संभवतीत्यर्थः। उक्ते हेतुमाह– प्रकृत्यर्थेति, व्यापकतायाः सेककर्मत्वेऽन्वये हि कर्मत्वविशेषणीभूतव्यापकतायाः कर्मत्वापेक्षया पूर्वं प्रवेशेन प्रकृत्यर्थभूतो यो वृक्षः सुबर्थभूतं च यत्कर्मत्वं तयोर्मध्यपतित्वं प्राप्नुयाद् न चैतद् युक्तम्–प्रकृत्यर्थसुबर्थयोर्मध्ये नञर्थातिरिक्तपदार्थभानस्य व्युत्पत्तिविरुद्धत्वादित्यर्थः। प्रकृत्यर्थसुबर्थयोर्मध्ये नञर्थमात्रस्य भानं भवतीत्यस्योदाहरणमाह– नामूढस्येति, इदं च चतुर्थाध्यायप्रथमाह्निकन्यायसूत्रद्वयम्, मोहहीनस्य रागद्वेषौ न भवत इति प्रथमसूत्रार्थस्तत्र मोहाभावे रागद्वेषोत्पत्त्यभावहेतुत्वं प्रतीयते इति पञ्चम्यर्थहेतुतायां नञर्थाभावस्य विशेषणत्वेन प्रकृत्यर्थ (उत्पत्ति) विभक्त्यर्थ (हेतुत्व) योर्मध्यपतितत्वेन भानं भवति, एवं नानुपमृद्येत्यस्य बीजादेरुपमर्दम्=विनाशं

प्रकृत्यर्थसुर्थयोरन्तरानञर्थातिरिक्तभानस्य व्युत्पत्तिविरुद्ध-त्वात्, "नामूढस्येतरोत्पत्तेः" "नानुपमृद्य प्रादुर्भावात्" इत्यादौ नञर्थमात्रस्य पञ्चम्यर्थहेतुतायां विशेषणत्वेन प्रकृत्यर्थस्य च विशेष्यत्वेनाऽन्वयात्, तस्मात् प्रतिरनर्थक एव। द्विरुक्तान्वये तात्पर्यबलाच्च सेचनकर्मत्वे वृक्षादेर्व्यापकत्वं संसर्गतयैव भासते।

यदि च 'वृक्षं प्रति सिञ्चति' इत्यादावुपसर्गस्य प्रतेर्वाच्यो द्योत्यो वा कश्चिदन्योऽर्थः? तदास्तु स एवात्रापि तदर्थः। अत एव तस्येवाऽस्यापि प्रतिशब्दस्य प्रयोगो नानर्थः। वस्तुतः–

विनाऽङ्कुरादिप्रादुर्भावो न भवतीत्यर्थस्तत्रोपमर्दाभावे प्रादुर्भावाभावहेतुत्वं प्रतीयते इति न प्रादुर्भावादित्यत्र पञ्चम्यर्थहेतुतायां नञर्थाभावस्य विशेषणत्वेन प्रकृत्यर्थभूतप्रादुर्भावविभक्त्यर्थभूतहेतुत्वयोर्मध्यपतिततत्वेन भानं भवतीत्यर्थः। उपसंहरति तस्मादिति, यस्मात् प्रतिशब्देन सेकसेककर्मत्ववृक्षाणां विशेषणत्वेन व्यापकताबोधनं न सम्भवति तस्मात् प्रतिशब्दोऽत्र निरर्थक एवेत्यर्थः। नन्वेवं द्विरूक्त्यापि व्यापकत्वबोधनं न स्यादित्याशङ्क्याह–द्विरुक्तेति। वृक्षादेरिति षष्ठ्यर्थो निरूपितत्वम्। वृक्षादिनिरूपितं सेचनकर्मत्वनिष्ठं व्यापकत्वं द्विरुक्तितात्पर्यबलात् संसर्गमर्यादया भासते संसर्गमर्यादया भाने च न कोपि दोषः, उक्तदोषाणां प्रतिशब्दोपस्थापितव्यापकत्वस्य प्रकारतया भाने एव संभवादित्यर्थः।

पक्षान्तरमाह–यदि चेति, अन्यः=व्यापकत्वभिन्नः कर्मत्वादिरूपः। सः= व्यापकत्वभिन्नः। अत्र='वृक्षं वृक्षं प्रति सिञ्चति' इत्यत्र। तदर्थः=प्रतिशब्दार्थः। कर्मत्वस्य प्रतिशब्दार्थत्वे द्वितीया साधुत्वार्था निरर्थकैव विज्ञेयेति भावः। अत एव नाम 'वृक्षं प्रति' 'वृक्षं वृक्षं प्रति' इत्युभयत्रापि प्रतिशब्दस्य समानार्थत्वादेव। तस्येव='वृक्षं प्रति' इत्यत्रत्यप्रतिशब्दस्येव। अस्य='वृक्षं वृक्षं प्रति' इत्यत्रत्यप्रतिशब्दस्य। स्वाभिप्रायमाह–वस्तुत इति, तादृशप्रतेः= कर्मप्रवचनीयप्रतेः। यथा 'कुतोऽध्यागच्छति कुतः पर्यागच्छति' इत्यत्रानर्थक-योरप्यऽधिपरिशब्दयोः प्रयोगस्य प्रयोजनान्तरानुपपत्तिर्नास्ति "गतिर्गतौ" इतिनिघाताभावस्यैव प्रयोजनत्वोपपत्तेस्तथा 'वृक्षं वृक्षं प्रति' इत्यत्रानर्थक-कर्मप्रवचनीयप्रतिशब्दप्रयोगस्य प्रयोजनान्तरानुपपत्तिर्नास्ति–(३८३ पृ.)

अनर्थकयोः कर्मप्रवचनीयाऽधिपरिशब्दयोः प्रयोगवत् तादृशप्रतेरपि प्रयोगस्य प्रयोजनान्तरानुपपत्तिश्चिन्त्या। प्रतेर्यत्र व्यापकतार्थकत्वं तत्र 'प्रतिवृक्षं सिञ्चति' इत्यव्ययीभावसमास एव नियतः– तदर्थकाव्ययस्याऽव्ययीभावसमासविधेर्विभाषाधिकारीयताविरहेण नित्यत्वात्, अतो वीत्सया 'प्रतिवृक्षं सिञ्चति' इतिवत् 'वृक्षं प्रति सिञ्चति' इति न प्रयोगः। यत्र व्यापकत्वार्थकेनाऽव्ययेनाऽव्ययीभावसमासस्तदुत्तरं सर्वत्र प्रथमा

उक्तषत्वाभावस्यैव प्रयोजनत्वोपपत्तेरिति प्रयोजनान्तरानुपपत्तिर्योक्ता सा चिन्त्येत्यर्थः। प्रतेर्यत्रेति, "अव्ययं विभक्ति" इत्यनेन यथाशब्दार्थकाव्ययेन समासः प्राप्तो यथाशब्दार्थाश्च योग्यतावीप्सादयस्तत्र वीप्सैव व्यापकतेति तदर्थकप्रतिशब्देन सह समासे जाते 'प्रतिवृक्षम्' इति जातम्। तस्मात् 'वृक्षं वृक्षं प्रति' इत्यत्र प्रतिशब्दस्य व्यापकतार्थकत्वेऽव्ययीभावसमास एव स्यात् न चास्ति समास इति नात्र प्रतिशब्दो व्यापकतार्थक इति भावः। नित्यत्वादिति चिन्त्यम्–वृक्षं वृक्षं प्रति' इत्यसमस्तवाक्यस्याप्यभीष्टत्वात् तदुक्तम्– "प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यात् तद्योगे द्वितीयागर्भं वाक्यमपि" इति। समासस्य नियतत्वे हेतुमाह– तदर्थकेति, तदर्थकाव्यस्य=विभक्त्याद्यर्थकाव्यस्य, निरूपितत्वं षष्ठ्यर्थस्तथा च तदर्थकाव्यनिरूपिताव्ययीभावसमासविधेर्नित्यत्वादित्यर्थः। उक्तसमासनित्यत्वस्य फलमाह– अत इति, वीप्सायाम् 'वृक्षं प्रति' इति प्रयोगो न भवति किंतु 'प्रतिवृक्षम्' 'वृक्षं वृक्षं प्रति' इति वेत्यर्थः। उक्तसमासस्य विशेषान्तरमाह– यत्रेति, तथा च 'प्रतिवृक्षम्' इत्यत्र प्रथमायाः "नाव्ययीभावात्" इति सूत्रेणाम्भावः प्राप्तस्तथा च प्रथमायाः साधुत्वार्थकत्वेन निरर्थकत्वाद् व्यापकत्वं प्रतेरेवार्थ इति भावः। विशेषान्तरमाह– न त्विति, उक्तयुक्त्या="सेके द्वितीयार्थकर्मत्वावरुद्ध" इत्यादियुक्त्या, निरूपकत्वसंबन्धेन गृहे विशेषणतां प्राप्ताया व्यापकताया अश्वविशेषणत्वासंभवात्–"एकविशेषणत्वेनोपस्थितस्य" इति व्युत्पत्तिविरोधदित्यर्थः। तदाधारतादीति, तत्=अश्वः। 'प्रतिगृहेऽश्वाः' इत्यत्र यद्यश्वाधारतारूपसप्तम्यर्थे आश्रयत्वसंबन्धेन समासार्थस्य गृहव्यापकत्वस्यान्वयः क्रियेत, (अश्वाधारतागृहव्यापकतावती इति) किं वाऽश्वाधारतारूपसप्तम्यर्थेऽभेदसम्बन्धेन तदर्थस्य=समासार्थस्य व्यापकरूपधर्मिण एवान्वय क्रियेत–

विभक्तिरेव। न तु 'उपकुम्भे गच्छति' इतिवत् 'प्रतिगृहेऽश्वाः' इत्यादिरपि प्रयोगः– उक्तयुक्त्या तत्र प्रतिनाऽश्वादौ गृहादिव्यापकताया बोधयितुमशक्यत्वात्। तदाधारतादि-रूपसप्तम्याद्यर्थे च समासार्थस्य गृहादिव्यापकत्वस्या-श्रयतासंबन्धेन तदर्थस्य व्यापकरूपधर्मिणो वाऽभेदसंबन्धेनान्वये 'मेयत्वे घटः' 'घटवृत्तौ घटः' इत्यादिप्रयोगवारणाय कल्प्यायाः सप्तम्यर्थाधारतायामाऽऽश्रयत्वसंबन्धेनाऽभेदसंबन्धेन वा प्रकृत्यर्थाऽनन्वयव्युत्पत्तेर्विरोधात्।

'उपकुम्भे निधेहि' 'उपकुम्भादागतः' 'उपकुम्भेन कृतः' इत्यादौ च विवक्षितस्याधारत्वाऽपादानत्वकर्तृत्वादौ कुम्भसमी-पादेराधेयतासंबन्धेनाऽन्वयस्याऽऽधेयत्वादौ निरूपितत्वसंबन्धेन

अश्वाधारता गृहव्यापिकेत्येवं तदा सप्तम्यर्थ घटाधारत्वे आश्रयतासंबन्धेन मेयत्वस्याप्यन्वयः स्यादिति 'मेयत्वे घटः' इत्यपि प्रयोगः स्यात्तथा "घटवृत्तौ घटः' इत्यत्र सप्तम्यर्थो घटाधारता प्रकृत्यर्थोपि घटवृत्तिपदवाच्या घटवृत्तित्वविशिष्टा घटाधारतैव–घटनिष्ठाधारताया घटवृत्तित्वादिति सप्तम्यर्थ-घटाधारतायामभेदसंबन्धेन प्रकृत्यर्थभूताया घटाधारताया अप्यन्वयः स्यादिति 'घटवृत्तौ घटः' इत्यपि प्रयोगः स्यात् न चैवं प्रयोगौ भवत इति तद्वारणाय 'सप्तम्यर्थाधारतायामाश्रयत्वसम्बन्धेनाऽभेदसंबन्धेन वा प्रकृत्यर्थस्यान्वयो न भवति' इति व्युत्पत्तिः कल्प्या तथा चैतस्याः कल्पाया व्युत्पत्तेर्विरोधात् 'प्रतिगृहेऽश्वाः' इत्यत्राप्यश्वाधारतारूपसप्तम्यर्थे आश्रयतासंबन्धेन प्रकृत्यर्थस्य गृहव्यापकत्वस्य अभेदसंबन्धेन च व्यापकरूपधर्मिणो वाऽन्वयो न संभवतीति 'प्रतिगृहेऽश्वाः' इति प्रयोगोपि न भवति। उपकुम्भपदात्तु "दुरान्तिकार्थेभ्यो द्वितीया च" "सप्तम्यधिकरणे च" इति सूत्राभ्यां द्वितीयातृतीयापञ्चमीसप्तम्यो वचनाद् भवतीत्यर्थः।

उपकुम्भेति– 'उपकुम्भे' इत्यत्र सप्तम्यर्थाधारत्वे 'उपकुम्भात्' इत्यत्र पञ्चम्यर्थाऽपादानत्वे 'उपकुम्भेन' इत्यत्र तृतीयार्थकर्तृत्वे आधेयतासंबन्धेन कुम्भसमीपस्यान्वये (आधारत्वादौ कुम्भसमीपाधेयतायाः सत्त्वात्)

तदन्वयस्य वा बोधे न कश्चिद् व्युत्पत्तिविरोध इत्युपपद्यन्ते तथा प्रयोगा इति ध्येयम्।

'त्वां च मां चान्तरा' इत्यादौ "अन्तरान्तरेण युक्ते" इति द्वितीयाया निरूपितत्वमर्थः, तस्यान्तरापदार्थता-वच्छेदकमध्यत्वेऽन्वयः। एवमन्यत्रापि तदर्थस्तूक्तदिशा स्वयं परिच्छेद्यः॥

॥ इति द्वितीयाविभक्तयः ॥

तथाऽऽधेयत्वे=आधारत्वापादानत्वकर्तृत्वादिनिष्ठाधेयत्वे तदन्वयस्य=कुम्भसमीपान्वये न कश्चिद्व्युत्पत्तिविरोधोस्तीति तथाप्रयोगाः='उपकुम्भे' इत्याद्युक्तप्रयोगा उपपद्यन्ते। आधारत्वादिनिष्ठाधेयत्वस्य कुम्भसमीपनिरूपितत्वेन तादृशाधेयत्वे कुम्भसमीपनिरूपितत्वस्य सत्त्वात् तेन संबन्धेन तादृशाधेयत्वे कुम्भसमीपस्यान्वयः। आधारत्वादीनां च कुम्भसमीपवृत्तित्वेनाऽऽधार-त्वादावाऽऽधेयत्वं ज्ञेयमित्यर्थः।

त्वां चेति– 'त्वां च मां चान्तरा हरिः' इत्यत्र "अन्तरान्तरेण युक्ते" इति सूत्रेण द्वितीया भवति तस्याश्च द्वितीयाया निरूपितत्वमर्थः, तस्य च द्वितीयार्थभूतनिरूपितत्वस्य अन्तरापदार्थतावच्छेदकमध्यत्वेऽन्वयस्तथा च त्वन्मन्निरूपितमध्यत्वविशिष्टो हरिरिति शाब्दबोधः, आवयोर्मध्येहरिरेवेति भावार्थः। अन्तरापदस्य मध्यपदार्थवाचकत्वाद् मध्यत्वमन्तरापदार्थता-वच्छेदकमित्यर्थः। अन्तरेणेति पदं विनार्थकम् यथा–'अन्तरेण हरिस्मरणं न सुखम्' इति। अत्र न निरूपितत्वं द्वितीयार्थः किं तु विनापादोक्तस्थलीय-रीतिरूह्येति– हरिस्मरणाभावप्रयोज्यसुखाभाव इति शाब्दबोधः। प्रतियोगित्वं द्वितीयार्थः। द्वितीयाकारकनिरूपणमुपसंहरति– एवमिति। अन्यत्र=अन्यद्वितीयो-दाहरणेष्वप्येवमेव विज्ञेयम्। तदर्थः=तादृशद्वितीयार्थो द्वितीयाप्रापकशब्द-विशेषार्थश्च स्वयमुक्तदिशा परिच्छेद्यः=निर्वचनीयः– शास्त्रस्य मार्गमात्र-प्रदर्शकत्वादित्यर्थः।।

॥ मतिः श्रान्ता पुरो गन्तुं विरमत्यधिकलेखतः ॥
॥ इति व्युत्पत्तिवादाऽऽदर्शे द्वितीयाकारकं समाप्तम् ॥

———o———